ANGEL, *s.* ईश्वरदूतः, देवदूतः, ईश्वरप्रेषः, स्वर्गी *m.* (न्), परमेश्वरप्रेरितः, स्वर्गीयदूतः, स्वर्गदूतः, दिव्यदूतः.

ANGELICAL, ANGELIC, *a.* ईश्वरदूतोपमः -मा -मं, दिव्यः -व्या -व्यं, देवरूपी -पिणी -पि (न्), स्वर्गीयः -या -यं.

ANGELICALLY, *adv.* ईश्वरदूतवत्, स्वर्गीयजनवत्, दिव्यप्रकारेण.

ANGER, *s.* क्रोधः, कोपः, अमर्षः, रोषः, चेतोविकारः; 'my anger is appeased,' मम क्रोधः शाम्यति; 'through anger,' कोपात्.—(Smart of a sore) व्रणवेदना.

To ANGER, *v. a.* कुप् in caus. (कोपयति -यितुं), प्रकुप्, सङ्कुप्; क्रुध् in caus. (क्रोधयति -यितुं).

ANGLE, *s.* अस्रः, कोणः, द्विभुजः.—(Apparatus to take fish) मत्स्यवेधनोपकरणं.

To ANGLE, *v. a.* वडिशेन मत्स्यान् जलाद् उद्धृ (*c.* 1. -हरति -ते -हर्त्तुं), वडिश (nom. वडिशयति), मत्स्यवेधनेन मीनान् व्यध् (*c.* 4. विध्यति व्यद्धुं) or ग्रह् (*c.* 9. गृह्णाति ग्रहीतुं).

ANGLE-ROD or ANGLING-ROD, *s.* मत्स्यग्रहणार्थं दण्डः.

ANGLER, *s.* मत्स्यवेधकः, मत्स्यबन्धी *m.* (न्), यो वडिशेन मत्स्यान् गृह्णाति.

ANGLING, *s.* वडिशेन मत्स्यवेधनं, मत्स्यबन्धनं.

ANGLING-LINE, *s.* मत्स्यग्रहणार्थं सूत्रं or रज्जुः *m.*

ANGRILY, *adv.* सकोपं, सरोषं, सामर्षं, कोपेण, क्रोधात्.

ANGRY, *a.* क्रुद्धः -द्धा -द्धं, क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), जातामर्षः -र्षा -र्षं, रुष्टः -ष्टा -ष्टं, क्रोधाक्रान्तः -न्ता -न्तं, सामर्षः -र्षा -र्षं, कृतकोपः -पा -पं, कृतक्रुधः -धा -धं, आगतमन्युः -न्युः -न्यु, सरोषः -षा -षं, रोषणः -णा -णं, सकोपः -पा -पं, समन्युः -न्युः -न्यु.—(To be angry) क्रुध् (*c.* 4. क्रुध्यति क्रोद्धुं), अनुक्रुध्, समभिक्रुध्, सङ्क्रुध्, अभिसंक्रुध्; रुष् (*c.* 4. रुष्यति रोषितुं), कुप् (*c.* 4. कुप्यति कोपितुं), प्रकुप्, सङ्कुप् with dative; असूय् (असूयति -ते, असूयितुं) with acc.

ANGUISH, *s.* परितापः, वेदना, तीव्रवेदना, क्लेशः, पीडा, दुःखं, आधिः *m.*, मनस्तापः, परिवेदनं, विबाधा, कृच्छ्रं, कष्टं, तोदः.

ANGULAR or ANGULOUS, *a.* सास्रः -स्रा -स्रं, कोणविशिष्टः -ष्टा -ष्टं, अस्रवान् -वती -वत् (न्), असोपेतः -ता -तं.

ANHELATION, *s.* उच्छ्वसनं, निःश्वसनं.—(Palpitation) हृदयकम्पनं.

ANIMADVERSION, *s.* (Reproof) अनुयोगः, निन्दा, अपालम्भः, घृणा.—

(Infliction of punishment) दण्डयोगः.—(Observation) चर्चा, निरीक्षणं, अन्वेषणं.

To ANIMADVERT, *v. n.* (To pass censure on) प्रतिनिन्द् (c. 1. -निन्दति -निन्दितुं), उपालभ् (c. 1. -लभते -लब्धुं).—(To punish) दण्डं प्रणी (c. 1. -नयति -नेतुं), दण्ड् (c. 10. दण्डयति -यितुं).—(To make observation) निरीक्ष् (c. 1. -ईक्षते -ईक्षितुं), चर्चां कृ.

ANIMADVERTED, *p.p.* प्रतिनिन्दितः-ता-तं.—(Punished) दण्डितः-ता-तं.

ANIMADVERTER, *s.* प्रतिनिन्दकः, दण्डप्रणेता *m.* (तृ), अनुयोगी *m.* (न्).

ANIMAL, *s.* जन्तुः *m.*, प्राणी *m.* (न्), चेतनः, जीवी *m.* (न्), जन्तुः *m.*, जन्मी *m.* (न्), शरीरी *m.* (न्).—(Beast) पशुः *m.*, तिर्य्यङ् *m.* (-ञ्च्).

ANIMAL, *a.* जीवी -विनी -वि (न्), प्राणी -णिनी -णि (न्), चेतनः -ना -नं, चेतनावान् -वती -वत् (त्).—(Animal food) मांसाहारः.

ANIMALCULE, *s.* क्षुद्रजीवी *m.* (न्), क्षुद्रजन्तुः *m.*

To ANIMATE, *v. a.* जीव् in caus. (जीवयति -यितुं), प्राण् in caus. (-प्राणयति -यितुं), आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, परिविश्वस् in caus.; उत्था in caus. (उत्थापयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं).

ANIMATE, ANIMATED, *part. a.* (Inspirited) आश्वासितः -ता -तं, उद्युक्तः -क्ता -क्तं, उत्तेजितः -ता -तं.—(Living) चेतनः -ना -नं, प्राणी -णिनी -णि (न्).—(Vivacious) प्रफुल्लवदनः -ना -नं, हृष्टहृदयः -या -यं, रसिकः -का -कं, सारवान् -वती -वत् (त्).

ANIMATION, *s.* (The act of enlivening) आश्वासनं, उत्तेजनं.—(The state of being enlivened, vivacity) प्रफुल्लता, हृष्टता.

ANIMATOR, *s.* आश्वासकः, जीवदः, प्राणदः, प्रोत्साहकः.

ANIMOSITY, *s.* वैरं, द्वेषः, विरोधः, मात्सर्य्यं.

ANISE, *s.* छत्रा, सालेयः, शीतशिवः, मधुरिका, मिश्री, मिश्रेया.

ANKER, *s.* रसानां परिमाणविशेषः.

ANKLE, *s.* गुल्फः -ल्फं, घुटिका or घटिका, घुटिः *f.*, चरणग्रन्थिः *f.*

ANKLED, *a.* गुल्फयुक्तः -क्ता -क्तं, गुल्फसम्बन्धी -न्धिनी -न्धि (न्).

ANKLET, *s.* नूपुरः, पादाङ्गदं, मञ्जीरं, पादकटकः.

ANNALIST, *s.* क्रमानुसारेण चरित्रलेखकः, चरित्रलेखकः, पुरावृत्तरचकः, आख्यानरचकः, वृत्तान्तलेखकः, आख्यानसङ्ग्राहकः.

To ANNALIZE, *v. a.* चरित्राणि or पुरावृत्तकथा रच् (c. 10. रचयति -यितुं).

ANNALS, *s.* क्रमानुसारेण सङ्गृहीत इतिहासः, पुरावृत्तं, पुरावृत्तकथा, चरित्राख्यानं, वृत्तान्तविवरणं.

ANNATES, *s.* प्रथमफलं, नवशस्यं.—(Sacrifice of first-fruits) अग्रायणं.

To ANNEAL, *v. n.* रङ्गस्थिरीकरणनिमित्तं काचं तप् (c. 1. तपति तप्तुं or caus. तापयति -यितुं).

ANNEALING, *s.* यत् काचस्य तपनं रङ्गस्थिरीकरणाय क्रियते.

To ANNEX, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आबन्ध्; संयुज् in caus. (-योजयति -यितुं), उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; उपस्था in caus. (-स्थापयति -यितुं).

ANNEXED, *p. p.* संयोजितः -ता -तं, उपाहितः -ता -तं, अनुबद्धः -द्धा -द्धं.

ANNEXATION, *s.* अनुबन्धनं, उपस्थापनं, संयोगः, संयोजनं, उपधानं.

ANNEXMENT, *s.* (The act of annexing). *See the last.*—(The thing annexed) अनुबन्धः, उपाहितं, संयुक्तभागः.

To ANNIHILATE, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; प्रली in caus. (-लापयति or -लाययति -यितुं), उद्धृ (c. 1. -हरति -ते -हर्त्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), लोपं कृ.

ANNIHILATED, *p. p.* उच्छिन्नः -न्ना -न्नं, विनाशितः -ता -तं.

ANNIHILATION, *s.* नाशः, क्षयः, प्रलयः, विनाशः, अभावः, समुच्छेदः, लोपः, निर्भावः, प्रलीनता.

ANNIVERSARY, *s.* दिवसः केनापि सविशेषेण कारणेन वत्सरे वत्सरे प्रसिद्धः, प्रतिवार्षिक उत्सवः, वत्सरे वत्सरे सेवितो महोत्सवः.

ANNIVERSARY, *a.* सांवत्सरिकः-की-कं, सांवत्सरः-री-रं, प्रतिवार्षिकः-का-कं.

To ANNOTATE, *v. n.* टीकां or भाष्यं लिख् (c. 6. लिखति लेखितुं) or रच् (c. 10. रचयति -यितुं).

ANNOTATION, *s.* टीका, भाष्यं, टिप्पनी *f.*

ANNOTATOR, *s.* टीकालेखकः, भाष्यकरः, भाष्यकृत्.

To ANNOUNCE, *v. a.* आख्या (c. 2. -ख्याति -ते -ख्यातुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), आख्या in caus.; विघुष् (c. 1. -घोषति -घोषितुं or c. 10. घोषयति), विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्, सन्निविद्; विज्ञा in caus. (-ज्ञापयति -यितुं).

ANNOUNCED, *p. p.* प्रकाशितः -ता -तं, निवेदितः -ता -तं, आवेदितः -ता -तं, अवघुष्टः -ष्टा -ष्टं, आख्यातः -ता -तं, परिकीर्त्तितः -ता -तं.

ANNOUNCEMENT, *s.* ख्यापनं, विज्ञापनं, विज्ञप्तिः *f.*, निवेदनं, विघोषणं.—(News) सन्देशः, वैमाचारः, संवादः.

ANNOUNCER, *s.* आख्यायकः, विज्ञापकः, विघोषकः, सन्देशहरः.

To ANNOY, *v. a.* पीड् (c. 10. पीडयति -यितुं), अभिपीड्, उपपीड्, प्रपीड्, प्रतिपीड्, सम्पीड्; तप् in caus. (तापयति -यितुं), सन्तप्, परितप्; क्लिश् (c. 9. क्लिश्नाति क्लेष्टुं), अर्द् in caus (अर्दयति -यितुं), समर्द्, बाध् (c. 1. बाधते, बाधितुं).

ANNOYANCE, *s.* व्यथा, क्लेशः, विडम्बना, दुःखं, पीडा, बाधा.—(The act of annoying) पीडनं.—(A source of annoyance) कण्टकः, -कं.

ANNOYED, *p. p.* क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, व्यथितः -ता -तं.

ANNOYER, *s.* क्लेशकः, दुःखकरः, व्यथाकरः.

ANNOYING, *a.* क्लेशी -शिनी -शि (न्), क्लेशकः -का -कं, दुःखकरः -री -रं.

ANNUAL, *a.* वार्षिकः -की -कं, आब्दिकः -की -कं, सांवत्सरः -री -रं, वर्षैकः -का -कं, समीनः -ना -नं.—(Lasting only for a year) एकवर्षजीवी -विनी -वि (न्); 'an annual plant,' ओषधिः *f.*

ANNUALLY, *adv.* प्रतिवर्षं, प्रतिवत्सरं, वत्सरे वत्सरे, वत्सरक्रमेण.

ANNUITY, *s.* वार्षिकं or सांवत्सरिकं वेतनं or वृत्तिः यत्र निरूपितमूल्यं वत्सरे वत्सरे कस्मैचिद् दीयते.

To ANNUL, *v. a.* लोपं कृ, निरर्थकं -कां -कं कृ, विनश् in caus. (-नाशयति -यितुं).

ANNULAR *I.* मण्डलाकारः -रा -रं, वलयाकारः -रा -रं, वलयाकृतिः -तिः -ति, अङ्गुरीयाकारः -रा -रं.

ANNULET, *s.* क्षुद्रवलयः, क्षुद्राङ्गुरीयः, -यं.

ANNULMENT, *s.* लोपः, नाशः, विनाशः.

To ANNUMERATE, *v. a.* संख्यां संख्यया संयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).

ANNUMERATION, *s.* संख्या संख्यया संयोजनं.

ANNUNCIATION, प्रत्यादेशः, घोषणं, -णा, ख्यापनं, विज्ञापनं.

ANODYNE, *a.* शूलघ्नः -घ्नी -घ्नं, वेदनाशान्तिकः -की -कं, पीडाशमकः -का -कं.

ANODYNE, *s.* शूलघ्नं, वेदनाशान्तिकं.

To ANOINT, *v. a.* लिप् (c. 6. लिम्पति -ते लेप्तुं), अनुलिप्, आलिप्, समालिप्, उपलिप्, विलिप्; अभ्र् (c. 7. अनक्ति अंक्तुं) or caus. (अभ्रयति -यितुं), समालभ् (c. 1. -लभते -लब्धुं).—(To consecrate by unction) अभिषिच् (c. 6. -सिञ्चति -सेक्तुं).

ANOINTED, *p. p.* लिप्तः -प्ता -प्तं, अभिषिक्तः -क्ता -क्तं, दिग्धः -ग्धा -ग्धं, अनुलिप्तः -प्ता -प्तं, अभ्यक्तः -क्ता -क्तं, कृताभिषेकः -का -कं.

ANOINTER, *s.* अभिषेचकः, लेपकः, अभ्रनकर्त्ता *m.* (र्त्तृ).

ANOINTING, *s.* अभिषेकः, -चनं, विलेपनं, समालम्भः, अभ्यञ्जनं, अञ्जनं.

ANOMALOUS, *a.* विधिविरुद्धः -द्धा -द्धं, विधिहीनः -ना -नं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अविधिः -धिः -धि.

ANOMALOUSLY, *adv.* अविधानतस् *ind.*, अविधिवत् *ind.*, अनियमतस् *ind.*

ANOMALY, *s.* अविधिः *m.*, अविधानं, विधिविरुद्धता, अनियमः.

ANON, *adv.* (Quickly, soon) शीघ्रं, सपदि, झटिति.—(Now and then) कदापि, कदाचित्.

ANONYMOUS, *a.* अनामकः -का -कं, नामहीनः -ना -नं, सञ्ज्ञारहितः -ता -तं.

ANONYMOUSLY, *adv.* नामव्यतिरेकेण, संज्ञाव्यतिरेकेण, संज्ञां विना.

ANOTHER, *a.* अन्यः -न्या -न्यत्, इतरः -रा -रं, परः -रा -रं, अपरः -रा -रं, परकीयः -या -यं, अन्यदीयः -या -यं. Another is often expressed by अन्तर in composition; as, 'another place,' स्थानान्तरं; 'along with another king,' राजान्तरेण सह. 'In another place,' अन्यत्र; 'in another manner,' अन्यथा; 'at another time,' अन्यदा; 'one after another,' अनुपूर्व्वशस् *ind.*, एकैकशस्; 'a defect in another,' परच्छिद्रं; 'another's wife,' परदारः; 'another man's goods,' परद्रव्यं, परस्वं; 'another's right,' परस्वत्वं; another day,' अन्यस्मिन् दिवसे, अन्येद्युः (स्).

To ANSWER, *v. n.* (To speak in reply) प्रतिवच् (c. 2. -वक्ति -वक्तुं), प्रतिभाष् (c. 1. -भाषते -भाषितुं), प्रतिवद् (c. 1. -वदति -ते -वदितुं), प्रतिब्रू (c. 2. -ब्रवीति -वक्तुं), व्याहृ (c. 1. -हरति -ते -हर्त्तुं), प्रतिभण् (c. 1. -भणति -भणितुं), प्रतिजल्प् (c. 1. -जल्पति -जल्पितुं).—(To correspond, to suit) युज् in pass. (युज्यते), अनुरूपः -पा -पं or तुल्यरूपः -पा -पं or सदृशः -शी -शं अस्.—(To succeed) सम्पद् (c. 4. -पद्यते -पत्तुं), संसिध् (c. 4. -सिध्यति -सेद्धुं).—(To be accountable for) प्रतिभूः or प्रतिनिधिः अस्, लग्नकं दा (c. 3. ददाति दातुं).

ANSWER, *s.* प्रतिवचनं, प्रतिकाक्यं, प्रतिवाक् *f.* (च्), उत्तरं, प्रत्युत्तरं, प्रत्युक्तिः *f.*, प्रतिवाणिः *f.*—(Refutation of a charge) वाक्यखण्डनं, वाक्याघातः.

ANSWERABLE, *a.* प्रतिवाक्यः -क्या -क्यं.—(Responsible) परानुयोगाधीनः -ना -नं, पराङ्हानाधीनः -ना -नं, अभियोक्तव्यः -व्या -व्यं, येन प्रत्युत्तरं दातव्यं सः, यो लग्नकं दातुम् अर्हति.—(Corresponding to) योग्यः -ग्या -ग्यं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).

ANSWERED, *p. p.* प्रत्युक्तः -क्ता -क्तं, प्रतिभाषितः -ता -तं, प्रतिभणितः -ता -तं.

ANT, *s.* पिपीलिका, पुत्तिका.

ANT-BEAR, *s.* पिपीलिकाखादको जन्तुविशेषः.

ANT-HILL, *s.* वल्मीकः, -कं, कृमिशैलः, कूलकः, भूश्रवाः *m.* (स्), वम्रीकूटं, वामलूरः, स्यमीकः, मृत्तिकाकूटं.

ANTAGONIST, *s.* विरोधी *m.* (न्), विपक्षः, वैरी *m.* (न्), शत्रुः *m.*, अभियोक्ता *m.* (क्तृ), पर्य्येवस्याता *m.* (तृ), प्रतिबन्धकः.

ANTAGONISTIC, *a.* विरोधी -धिनी -धि (न्), विपक्षः -क्षा -क्षं, विपरीतः -ता -तं.

ANTALGIC, *a.* वेदनाशमकः -का -कं, शूलघ्नः -घ्नी -घ्नं, शोकापनुदः -दा -दं.

ANTARCTIC, *adj.* दक्षिणकेन्द्रीयः -या -यं.—(The south pole) दक्षिणकेन्द्रं, कुमेरुः *m.*

ANTECEDENT, *a.* पूर्व्वगतः -ता -तं, अग्रगतः -ता -तं, अग्रगामी -मिनी -मि (न्).

ANTECEDENTLY, *adv.* पूर्व्वं, अग्रे, पूर्व्वतस्, अग्रतस्.

ANTEDILUVIAN, *a.* प्राग् भूतसम्प्लवाद् विद्यमानः -ना -नं, प्राग् जलाप्लावनाद् वर्त्तमानः -ना -नं.

ANTELOPE, *s.* मृगः, हरिणः, रेणेयः कुरङ्गः—ङ्गकः—ङ्गमः.

ANTEMERIDIAN, *a.* पूर्व्वाह्णेतनः -नी -नं.

ANTEMUNDANE, *a.* प्राग् जगत्सृष्टेर् वर्त्तमानः -ना -नं.

ANTEPAST, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, अग्रग्रहणं.

ANTEPENULTIMATE, *s.* उपधायाः पूर्व्वं विद्यते यद् अक्षरं, पूर्व्वोपान्तः.

ANTERIOR, *a.* प्राक्तनः -नी -नं, पूर्व्वः -र्व्वी -र्व्वं, अग्रः -ग्रा -ग्रं.

ANTHEM, *s.* ईश्वरस्तवात्मकं गीतं, ईश्वरस्तुतिरूपकं गानं.

ANTHONY'S FIRE, *s.* उद्दः, रोगविशेषः.

ANTHROPOPHAGI, *s.* नृजग्धाः *m. pl.*, आममांसाशिनः *m. pl.*, क्रव्याशिनः *m. pl.*, अश्रपाः *m. pl.*, राक्षसाः *m. pl.*

ANTIBILIOUS, *a.* पित्तघ्नः -घ्नी -घ्नं.

ANTIC, *a.* (Buffoon-like) भण्डोपमः -मा -मं.—(Odd, unnatural) अपरूपः -पा -पं, विरूपः -पा -पं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं.

ANTIC, *s.* (A buffoon) भण्डः, भाण्डकरः.—(An odd gesture) असङ्गतप्रकारेण हस्तादिविक्षेपः, विरूपो ऽङ्गविक्षेपः.

ANTI-CHAMBER, *s.* उपशाला.

To ANTICIPATE, *v. a.* (Before the time) पूर्व्वतस् ग्रह् (c. 9. गृह्णाति ग्रहीतुं), प्रवेष्ट् (c. 1. -ईष्टते -ईष्टितुं).—(To foretaste) पूर्व्वस्वादनं कृ, अग्रतस् अनुभू (c. 1. -भवति -भवितुं), पूर्व्वं ज्ञा (c. 9. जानाति ज्ञातुं) or भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं), उद्दृश् (c. 1. उत्पश्यति उद्द्रष्टुं), प्रदृश्.

ANTICIPATED, *p. p.* पूर्व्वभुक्तः -क्ता -क्तं, पूर्व्वतस् अनुभूतः -ता -तं, प्रदृष्टः -ष्टा -ष्टं, प्रवेष्टितः -ता -तं, सन्दृष्टः -ष्टा -ष्टं, चित्तकलितः -ता -तं, पुरस्कृतः -ता -तं.

ANTICIPATION, *s.* पूर्व्वभुक्तिः *f.*, पूर्व्वभोजनं, पूर्व्वज्ञानं, प्रवेष्टणं.

ANTIDOTAL, *a.* विषनाशी -शिनी -शि (न्), विषघाती -तिनी -ति (न्), विषघ्नः -घ्नी -घ्नं, गरघ्नः -घ्नी -घ्नं.

ANTIDOTE, *s.* विषनाशनं, प्रतिविषं.—(Dealer in) विषवैद्यः, जाङ्गुलिकः.

ANTIFEBRILE, *a.* ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरान्तकः -का -कं.

ANTIMONY, *s.* स्रोतोञ्जनं, सौवीरं, कापोताञ्जनं, यामुनं.—(Made of antimony) स्रोतोञ्जनमयः -यी -यं.

ANTIPATHY, *s.* सहजो विरोधः, द्वन्द्वभावः, विरक्तिः *f.*, वैरिता, शत्रुता, विमतिः *f.*, अनिच्छा.

ANTIPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

ANTIPHONY, *s.* प्रतिगानं, परस्परगीतिः *f.*, प्रतिध्वनिः *f.*

ANTIPODES, *s.* भूमण्डलस्य विपरीतभागे वर्त्तिनः; अन्यतरस्मिन् भूगोलभागे वर्त्तिनः परस्पराम् अभिमुखपादतला जनाः.

ANTIQUARIAN, *a.* प्राक्कालीनः -ना -नं, पूर्व्वकालीनः -ना -नं, प्राक्तनः -नी -नं.

ANTIQUARY, ANTIQUARIAN. *s.* प्राक्कालीनविषयेषु पण्डितः, पुरातनद्रव्यानुसन्धायी *m.* (न्).

ANTIQUE, *a.* (Ancient) पुराणः -णा or -णी -णं, पुरातनः -नी -नं, प्राक्तनः -नी -नं, पूर्व्वकालीनः -ना -नं, चिरन्तनः -नी -नं.—(Old-fashioned) अप्रचलः -ला -लं, अपरूपः -पा -पं.

ANTIQUE, *s.* प्राचीनद्रव्यं, प्राक्कालीनविषयः.

ANTIQUITY, *s.* (Old-times) प्राक्कालं, पूर्व्वकालं, गतकालं.—(The ancients) प्राचीनपुरुषाः *m. pl.*—(Ancientness) पुरातनत्वं, प्राचीनत्वं.

ANTISEPTIC, *a.* पूतिघ्नः -घ्नी -घ्नं, पूतिनिवारकः -का -कं, पूतिनाशकः -का -कं.

ANTISTES, *s.* प्रधानपुरोहितः, धर्म्माध्यक्षः.

ANTITHESIS, *s.* अर्थान्तरन्यासः, अर्थवैपरीत्यं, विकल्पः, प्रतिपक्षता, विरोधः.

ANTITYPE, *s.* प्रतिमूर्त्त्या प्रदर्शिता मूर्त्तिः *f.*, मूलमूर्त्तिः *f.*, वस्तु *n.*, आदर्शः.

ANTLER, *s.* मृगशृङ्गं, मृगशृङ्गशाखा, मृगविषाणं.

ANTLERED, *a.* शृङ्गी -ङ्गिनी -ङ्गि (न्), विषाणी -णिनी -णि (न्).

ANUS, गुदं, पायुः *m.*, मेढ्रः, अपानं.

ANVIL, *s.* सूर्म्मी *f.*, शूर्म्मिः *m.*, स्थूणा, लोहप्रतिमा.

ANXIETY, *s.* चिन्ता, चित्तोद्वेगः, औत्सुक्यं, मनोदुःखं, मनस्तापः, चित्तवेदना, आधिः *m.*, व्यग्रता, उद्वेगः -जनं, उत्तापः, चिन्ताभारः, मानसी व्यथा.

ANXIOUS, *a.* (Solicitous) उद्विग्नः -ग्ना -ग्नं, उद्विग्नमनाः -नाः -नः (स्), चिन्तापरः -रा -रं, व्यग्रः -ग्रा -ग्रं, उत्सुकः -का -कं, विधुरः -रा -रं, समनुः -न्युः -न्यु.—(Eagerly endeavouring) सयत्नः -त्ना -त्नं.—(Desirous of) ईप्सुः -प्सुः -प्सु, इच्छुः -च्छुः -च्छु; 'anxious to see,' दर्शनेप्सुः; 'anxious to do,' कर्तुकामः -मा -मं.—(To be anxious) उत्सुकाय् (nom. उत्सुकायते).

ANXIOUSLY, *adv.* औत्सुक्येन, उद्वेगेन, मनोदुःखेन, चिन्तया, सोद्वेगं, सयत्नं.

ANY, *a.* कश्चित् *m.* काचित् *f.* किञ्चित् *n.*, को ऽपि *m.* कापि *f.* किमपि *n.*, कश्चन *m.* काचन *f.* किञ्चन *n.*; 'any thing,' किञ्चित्, किमपि; 'any where,' क्वचित्, क्वापि, कुत्रचित्, कुत्रापि; 'any longer,' पुनर्; 'any how,' कथञ्चन, कथञ्चित्, यथातथा; 'at any time,' कदाचित्, कर्हिचित्; 'any further,' दूरतरं; 'any one soever,' यः कश्चित्.

AORTA, *s.* हृत्पिण्डवामकोपनिर्गता रक्तप्रवाहका वृहन्नाडी.

APACE, *adv.* सत्वरं, शीघ्रं, क्षिप्रं, सहसा, द्रुतं, सवेगं.

APART, *adv.* Often expressed by the prep. वि; पृथक्, विरलं, प्रविरलं, प्रगतः -ता -तं, उज्जृम्भः -म्भा -म्भं; 'having the knees apart,' प्रगतजानुः -नुः -नु.—(Privately) एकान्ते, एकान्ततस् *ind.*, निभृतं, रहसि, विविक्तं, विजने.—(At a distance) दूरे, किंयदूरे.—(Aside, to one's self) स्वगतं, विजने, जनान्तिकं.

APARTMENT, *s.* शाला, कोष्ठः, आवासः, आगारं, गृहं.—(The inner apartments) अन्तःपुरं, अन्तर्गृहं.

APATHETIC, *a.* वीतरागः -गा -गं, निःसङ्गः -ङ्गा -ङ्गं, निःस्पृहः -हा -हं, निरीहः -हा -हं, निरपेक्षः -क्षा -क्षं.

APATHY, *s.* विरागः, वैराग्यं, निरीहता, जाड्यं, मान्द्यं.

APE, *s.* वानरः, अपु ऽः कपिः *m.*, प्रवङ्गः.—(Imitator) अनुकारी *m.* (न्).

To APE, *v. a.* वानरवत् or कपिवत् अनुकृ (c. 8. -करोति -कर्तुं).

APEPSY, *s.* अजीर्णं, मान्द्यावित्वं, तीक्ष्णाग्निः *m.*

APERIENT, *a.* रेचकः -की -कं.—(An aperient medicine) रेचकः.

APERTURE, *s.* छिद्रं, रन्ध्रं, द्वारं, पथः.—(Act of opening) व्यादानं.

APETALOUS, *a.* दलहीनः -ना -नं, पुष्पपत्ररहितः -ता -तं, निष्पत्रः -त्रा -त्रं.

APEX, *s.* शिखा, शिखरं, अग्रं, चूडा, शिरः *n.* (स्).

APHORISM, *s.* सूत्रं, वचनं, तत्त्वं, उपदेशवाक्यं, आदेशः.

APHRODISIAC, *a.* (Exciting passion) वाजीकरः -रा -रं, कामाग्निदीपनः -ना -नं.

APIARY, *s.* करण्डः, क्षुद्रकः, मधुमक्षिकारक्षणस्थानं, मधुकरस्थानं.

APIECE, *adv.* प्रत्येकं, एकैकशस् *ind.*, एकशस् *ind.*, एकतस् *ind.*, एकैकं, पृथक् पृथक्, विभागशस् *ind.*

APISH, *a.* कापेयः -यी -यं, कपिस्वभावः -वा -वं, वानरोपमः -मा -मं.—(Imitative) अनुकारशीलः -ला -लं.

APISHNESS, *s.* कापेयं, वानरता, अनुकारशीलता.

APITPAT, *adv* पटपटा *ind.*

APOCALYPSE, *s.* प्रकाशितं भविष्यद्वाक्यं, प्रकाशनं, विवृतिः *f.*, स्पष्टीकरणं.

APOCRYPHA, *s.* धर्मग्रन्थानां मध्ये गणितः सन्दिग्धप्रमाणो ग्रन्थः.

APOCRYPHAL, *a.* (Of uncertain authority) सन्दिग्धप्रमाणः -णा -णं, असिद्धप्रमाणः -णा -णं.

APOLOGETIC, APOLOGETICAL, *a.* व्यपदेशकः -का -कं, पक्षपाती -तिनी -ति (न्), प्रतिवादकः -का -कं, क्षान्तिकः -की -कं.

APOLOGIST, *s.* (For another) पक्षपातकर्ता *m.* (र्तृ), परररक्षार्थं वादी *m.* (न्), प्रतिवादी *m.* (न्), उत्तरवादी *m.*—(For one's self) व्यपदेष्टा *m.* (ष्टृ), क्षमकारी, स्वदोषस्वीकारी *m.* (न्), प्रत्यवस्कन्दकारी *m.* (न्).

APOLOGISE, *v. n.* (To state some plea) व्यपदिश (c. 6. -दिशति -देष्टुं), क्षम or व्यपदेशं or प्रत्यवस्कन्दं कृ.—(To acknowledge one's fault) स्वदोषस्य स्वीकारं कृ.—(To apologise for another) पक्षपातं कृ, परररक्षार्थं प्रतिवद् (c. 1. -वदति -वदितुं).

APOLOGUE, *s.* उपकथा, हितोपदेशकं उपाख्यानं, नीतिवाक्यं.

APOLOGY, *s.* व्यपदेशः, अपदेशः, उपदेशः, प्रतिवादः, उत्तरं, क्षम *n.* (न्), प्रत्यवस्कन्दः, स्वदोषस्वीकारः, क्षमकरणं.—(For another) पक्षपातः, परररक्षार्थं प्रतिवादः.

APOPHLEGMATIC, *a.* कफनाशनः -नी -नं, कफघ्नः -घ्नी -घ्नं, श्लेष्मघ्नः -घ्नी -घ्नं.

APOPHTHEGM, *s.* सूत्रं, नीतिवाक्यं, वचनं, आदेशः.

APOPLECTICAL, APOPLECTIC, *a.* (Relating to apoplexy) अङ्गविकृतिविषयः -या -यं.—(Inclined to apoplexy) अङ्गविकृतिशीलः -ला -लं.

APOPLEXY, *s,* अङ्गविकृतिः *f.*

APOSTACY, *s.* स्वधर्मत्यागः, स्वधर्मच्युतिः *f.*, अवहारः, स्वधर्मभंशः, भ्रष्टत्वं, स्वजातीयधर्मत्यागानन्तरं परधर्माश्रयः.

APOSTATE, *s.* स्वधर्मत्यागी *m.* (न्), स्वजातीयव्यवहारभ्रष्टः, आत्मधर्मच्युतः, अन्यशाखः, स्वजातीयधर्मं त्यक्त्वा परधर्माश्रितः.

To APOSTATIZE, *v. n.* स्वधर्मात् or स्वजातीयव्यवहारात् भ्रंश् (c. 4. भ्रश्यति, c. 1. भ्रंशते भ्रंशितुं) or च्यु (c. 1. च्यवते च्योतुं), विच्यु; स्वजातीयधर्मं त्यक्त्वा परधर्मं आश्रि (c. 1. -श्रयति -श्रयितुं).

APOSTEME, APOSTHUME, *s.* श्वयथुः, विद्रधिः *m.*, शोफः, स्फोटः, पूयसम्पूर्णः स्फोटः.

APOSTLE, *s.* ईश्वरप्रेरितः, ईश्वरदूतः, ईश्वराज्ञावहः, प्रेरितः.

APOSTLESHIP, *s.* ईश्वरप्रेरितत्वं, ईश्वरदौत्यं, प्रेरित्वं.

APOSTOLICAL, APOSTOLIC, *a.* (Enjoined by an apostle) ईश्वरप्रेरितेनादिष्टः -ष्टा -ष्टं.—(Relating to the Apostles) ईश्वरप्रेरितसम्बन्धी -न्धिनी -न्धि (न्).

APOSTROPHE, *s.* सम्बोधनं, वाक्यालङ्कारविशेषः.

To APOSTROPHISE, *v. a.* सम्बोधनं कृ, सम्बोधनेन आमन्त्र् (c. 10. -मन्त्रयते -यितुं).

APOSTUME, *s.* पूयसम्पूर्णः स्फोटः, विद्रधिः *m.*

APOTHECARY, *s.* विक्रयार्थं औषधपेषकः, भेषजविक्रेता *m.* (तृ), औषधविक्रेता *m.* (तृ), अगदङ्कारः.

APOTHEGM, *s.* *See* APOPHTHEGM.

APOTHEOSIS, *s.* देवत्वं, ब्रह्मत्वं, ब्रह्मनिर्द्धारणं, देवगणितत्वं.

To APPAL, *v. a.* भी in caus. (भाययति or भीषयति -यितुं), त्रस् in caus. (त्रासयति -यितुं), वित्रस्, सन्त्रस्; उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ.

APPALLED, *p. p.* भयविप्लुतः -ता -तं, भयसंहृष्टरोमा -मा -म (न्), शङ्कितः -ता -तं, सन्त्रस्तः -स्ता -स्तं, व्याकुलीकृतः -ता -तं.

APPARATUS, *s.* उपकरणं, सज्जा, यन्त्रं, सामग्र्यं, सामग्री *f.*—(Military apparatus) शस्त्रोपकरणं.

APPAREL, *s.* वेशः, वस्त्रं, परिधानं, परिच्छदः, अम्बरं, आभरणं, संध्यानं

To APPAREL, *v. a.* वस्त्र (nom. वस्त्रयति -यितुं), आच्छद् (c. 10. -छादयति -यितुं); वेष्ट् (c. 1. वेष्टते, वेष्टितुं), वस् in caus. (वासयति -यितुं), प्रवस्; प्रवृ (c. 5. -वृणोति, -वरितुं or -वरीतुं), रूप्ये (c. 1. -व्यति -व्यातुं).—(To apparel one's self) वस् (c. 2. वस्ते, वसितुं).

APPARELLED, *p. p.* आच्छादितः -ता -तं, प्रच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, वस्त्रवेष्टितः -ता -तं, संवीतः -ता -तं.

APPARENT, *a.* व्यक्तः -क्ता -क्तं, अभिव्यक्तः -क्ता -क्तं, प्रत्यक्षः -क्षा -क्षं, स्पष्टः -ष्टा -ष्टं, स्फुटः -टा -टं, प्रेक्षणीयः -या -यं, प्रेक्ष्यः -क्ष्या -क्ष्यं, प्रत्यक्षः -क्षा -क्षं.—(Not real) अवास्तवः -वी -वं; apparent praise,' *i. e.*

'not real,' व्याजस्तुतिः *f.*, मिथ्याप्रशंसा; 'heir-apparent,' युवराजः. —(To make apparent) प्रादुष्कृ, आविष्कृ, प्रत्यक्षीकृ, स्पष्टीकृ, प्रकटीकृ.

Apparently, *adv.* प्रादुस् *ind.*, साक्षात् *ind.*, आविस्, प्रत्यक्षतस्, स्पष्टं.

Apparition, *s.* (Appearance, form) आभासः, आभा, छाया, आकारः, आकृतिः *f.*, रूपं.—(Spectre, walking spirit) रात्रिञ्चरः, प्रेतनरः, प्रेतः, वेतालः.

Apparitor, *s.* यष्टिधरः, प्रेष्यजनः, राजदूतः.

Appeachment, *s.* अभियोगः, अपवादः.

To appeal, *v. n.* परावर्त्तं प्रार्थ् (c. 10. -अर्थयते -यितुं); यत् कार्य्यं अवरप्राड्विवाकेन नीरितं or निर्णीतं तस्यापि पुनर्विचारम् उत्तमप्राड्विवाकसकाशात् प्रार्थ्.—(To call another as witness) साक्षिणं कृ, आह्वे (c. 1. -ह्वयति -ते -ह्वातुं).

Appeal, *s.* परावर्त्तव्यवहारः, पुनराह्वानं, पुनर्विचारप्रार्थना, उत्तमप्राड्विवाकसाक्षाद् आह्वानं.—(The calling upon any one as witness or judge) आह्वानं.

To appear, *v. n.* (To become visible) दृश् in pass. (दृश्यते), अभिदृश्, प्रतिदृश्; प्रभू (c. 1. -भवति -भवितुं), सम्भू, प्रकाश् (c. 1. -काशते -काशितुं), सम्प्रकाश्, सङ्काश्, उदि (c. 1. उदयति -यितुं), अभ्युदि, उच्चर् (c. 1. -चरति -चरितुं).—(Show one's self) स्वात्मानं दृश् in caus. (दर्शयति -यितुं, दर्शनं दा.—(To seem) प्रतिभा (c. 2. -भाति -भातुं), सम्प्रभा, निर्भा, आभा; लक्ष् in pass. (लक्ष्यते).—(To be evident) प्रकाश्, प्रादुर्भू (c. 1. -भवति -भवितुं), आविर्भू; प्रादुरस् (c. 2. -अस्ति); 'you appear dismayed,' विस्मित इव प्रतिभासि.

Appearance, *s.* (Coming into sight) दर्शनं, सन्दर्शनं.—(Entry into a place or company) उपस्थितिः *f.*, प्रवेशनं.—(The thing seen) रूपं, आकृतिः *f.*, मूर्त्तिः *f.*, आकारः.—(Semblance, not reality) छाया, आभासः, आभा, अवस्तुता.—(Presence, mien) रूपं, अवस्था, भावः, आकारः.—(Probability) अनुमेयत्वं, अनुभवनीयत्वं.

To appease, *v. a.* शम् in caus. (शमयति -यितुं), उपशम्, प्रशम्; सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्; तुष् in caus. (तोषयति -यितुं), परितुष्, सन्तुष्; प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, सम्प्रसद्; सुस्थिरं -रां -रं कृ; परिमृज् (c. 6. -मृजति -र्ष्टुं), परामृज्, अनुनी (c. 1. -नयति -ते -नेतुं).—(To be appeased) शम् (c. 4. शाम्यति, शमितुं), उपशम्; प्रसद् (c. 1. -सीदति -सत्तुं).

Appeased, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशान्तः -न्ता -न्तं, आराधितः -ता -तं, अनुनीतः -ता -तं, प्रसन्नः -न्ना -न्नं, प्रसादितः -ता -तं.

Appeasing, *s.* शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, आराधनं, प्रसादनं.

Appellant, *s.* उत्तमप्राड्विवाकसकाशात् परावर्त्तप्रार्थकः, परावर्त्तप्रार्थयिता *m.* (तृ), पुनराह्वानकर्त्ता *m.* (र्तृ), आह्वानकर्त्ता *m.* (र्तृ), आवेदकः.

Appellate, *s.* पुनराहूतः, उत्तमप्राड्विवाकसाक्षाद् आहूतः, प्रत्यर्थी *m.* (न्).

Appellation, *s.* नामधेयं, नाम *n.* (न्), आख्या, संज्ञा, अभिधानं, अभिधा, अभिख्या, आह्वा.

Appellative, *a.* अभिधायिकः -का -कं, अभिधानीयकः -का -कं.—(Common) सामान्यः -न्या -न्यं, साधारणः -णा -णं

Appellee, *s.* आहूतः, अभियुक्तः, प्रत्यर्थी *m.* (न्).

To append, *v. a.* अनुबन्ध् (c. 9. -बध्नाति -बन्धुं or caus. -बन्धयति -यितुं), आबन्ध्; उपाधा (c. 3. -दधाति -धत्ते -धातुं), आधा; अवलम्ब् in caus. (-लम्बयति -यितुं).

Appendage, *s.* अनुबन्धः, सम्बन्धः, उपाहितं, शेषांशः, उपाहितभागः.

Appendant, *adj.* अनुबन्धी -न्धिनी -न्धि (न्), सम्बन्धी -न्धिनी -न्धि (न्).

अवलम्बी -म्बिनी -म्बि (न्).

Appendix, *s.* परिशिष्टं, उपग्रन्थः, शेषग्रन्थः

To appertain, *v. n.* (To belong to one's self) आत्मसात् or आत्माधीनः -ना -नं, or स्वाधीनः -ना -नं, or स्वकीयः -या -यं अस्.—(To belong, in general) सम्बन्ध् in pass. (-बध्यते). The sense of 'appertaining' may often be expressed by the root अस् or विद् with the gen. case: as, 'money appertains to me,' मम धनं विद्यते.

Appertaining, *p.* सम्बन्धी -न्धिनी -न्धि (न्), अनुबन्धी -न्धिनी -न्धि (न्).

Appertenance, *s.* अनुबन्धः, सम्बन्धः, उपकरणं, सामग्री.

Appetency, *s.* कामः, लोभः, अभिलाषः, वाञ्छा, इच्छा.

Appetite, *s.* (Desire) कामः, लोभः, रागः, रुचिः *f.*, अभिरुचिः *f.*, अतिवाञ्छा, अतिशयलोभः, अभिलाषः, इच्छा.—(Hunger) बुभुक्षा, क्षुधा, आहारादिवाञ्छा, भक्तछन्दं.—(The digestive faculty causing appetite) अग्निः *m.*, वह्निः *m.*, अग्निवृद्धिः *f.*—(One who has no appetite for food) अग्निरहितः.

Appetitive, *a.* कामुकः -का -कं, अभिलाषुकः -का -कं, इच्छुकः -की -कं.

To applaud, *v. a.* प्रशंस् (c. 1. -शंसति -शंसितुं), अभिप्रशंस्; प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), प्रणादेन प्रशंस्, प्रशंसां कृ, श्लाघां कृ.—(By clapping the hands) करतालेन प्रशंस्.

Applauder, *s.* प्रशंसकः, स्तावकः, श्लाघाकर्त्ता *m.* (र्तृ).

Applause, *s.* (Loudly expressed) प्रणादः, जयशब्दः, धन्यवादः, प्रशंसाशब्दः, सांराविणं, भुजनिःस्वनः, शब्दोऽनुरागजः.—(Praise) श्लाघा, प्रशंसा, स्तुतिः *f.*

Applausive, *a.* प्रशंसकः -का -कं, स्तुतिमयः -यी -यं, श्लाघान्वितः -ता -तं.

Apple, *s.* (A kind of fruit) फलप्रभेदः.—(Pupil of the eye) नयनतारा, कनीनिका, चक्षुर्गोलकः.

Appliance, *s.* (The means applied) उपायः, अभ्युपायः, उपकरणं, सामग्री.—(The act of applying) योगः, अर्पणं.

Applicability, *s.* योग्यता, प्रयोज्यत्वं, सामञ्जस्यं, साङ्गत्यं

Applicable, *a.* योग्यः -ग्या -ग्यं, प्रयोक्तव्यः -व्या -व्यं, प्रयोज्यः -ज्या -ज्यं, उपयोग्यः -ग्या -ग्यं, व्यवहरणीयः -या -यं, अर्पणीयः -या -यं, अर्प्यः -र्प्या -र्प्यं, संयोजनीयः -या -यं, व्यापी -पिनी -पि (न्), समञ्जसः -सा -सं.

Application, *s.* (Of one thing to another) योगः, अर्पणं, न्यसनं.—(Attention to) आसक्तिः *f.*, अनुष्ठानं, योगः, प्रवेशः, व्यसनं.—(Use) उपयोगः, प्रयोगः, प्रयोजनं.—(Application of mind, study) मनःप्रवेशः, अभिनिवेशः, प्रवेशः, अभ्यसनं, अभ्यासः, विद्याभ्यासः, अध्यवसायः, अभियुक्तता, मनोयोगः.—(Petition) याच्ञा, प्रार्थना, निवेदनपत्रं.

Applied, *p. p.* प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, निवेशितः -ता -तं.

Applier, *s.* उपेता *m.* (तृ), प्रयोजकः.

To apply, *v. a.* (One thing on another) संयुज् (c. 10. -योजयति -यितुं), न्यस् (c. 4. -अस्यति, -असितुं), विन्यस्; सृ in caus. (सर्पयति -यितुं), सङ्क्रम् in caus. (-गमयति -यितुं), प्रविश् in caus. (-वेशयति -यितुं), निविश्, संलग्नीकृ.—(To make use of) प्रयुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), उपयुज्.—(To attend to) आस्था (c. 1. तिष्ठति -ते -स्थातुं), समास्था, अनुष्ठा.—(To have recourse to, solcit) प्रयाच् (c. 1. -याचति -याचितुं), अभियाच्, आशिष् (c. 1. -अयति -ते -अयितुं), प्रार्थ् (c. 10. -अर्थयति -ते -यितुं).—(To make effort study) अभ्यस् (c. 4. -अस्यति -असितुं), यत् (c. 1. यतते, यतितुं) प्रयत्.—

To apply, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज् उपपद

(c. 4. -पद्यते -पत्तुं), सङ्गतः -ता -तं भू.—(Have recourse as a petitioner) कार्य्यसिद्धिनिमित्ते अन्यम् आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अर्थ् (c. 10. अर्थयते -यितुं), प्रार्थ्.

To APPOINT, *v. a.* निधा (c. 3. -दधाति -धातुं), स्था in caus. (स्थापयति -यितुं), अवस्था, प्रस्था; युज् (c. 10. योजयति -यितुं).—(To appoint over any office) अधिकृ (c. 8. -करोति -कुरुते -कर्तुं), प्रकृ; नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), with acc. of the pers. and loc. of the thing; अभिषिच् (c. 6. -सिञ्चति -सेक्तुं), with two acc. or with acc. and loc.; समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.—(To make an appointment) समयं कृ, समयाकृ.

APPOINTED, *p. p.* स्थापितः -ता -तं, प्रस्थापितः -ता -तं, नियोजितः -ता -तं, नियतः -ता -तं, विहितः -ता -तं, नियुक्तः -क्ता -क्तं, व्यवस्थितः -ता -तं.—(To any office) अधिकृतः -ता -तं, व्यापृतः -ता -तं, वावृत्तः -त्ता -त्तं.—(An appointed duty) नियोगः.—(An appointed time) कालावधिः *m.*—(Agreed upon) कृतसङ्केतः -ता -तं.—(As to time) कृतकालः -ला -लं, कृतावधिः -धिः -धि.

APPOINTMENT, *s.* नियोगः, -जनं, निपुक्तिः *f.*, प्रस्थापनं, निरूपणं, कल्पनं.—(Engagement) समयः, प्रज्ञप्तिः *f.*—(Breaking an appointment) समयभेदः, समयव्यभिचारः.—(Stipulation) समयः, नियमः, सङ्केतः.—(Order) आज्ञा.—(Decree) नियमः, विधिः *m.*—(Office) अधिकारः, पदं.—(Equipment, furniture) सज्जा, उपकरणं, सामग्री.—(Allowance) वर्त्तनं, निरूपितमूल्यं.—(Assignation) अभिसारः.

To APPORTION, *v. n.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, संविभज्; अंश् (c. 10. अंशयति -यितुं), व्यंश्; विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप् (c. 10. -कल्पयति -यितुं), विधा (c. 3. -दधाति -धातुं).

APPORTIONMENT, *s.* विभागः, संविभागः, अंशनं, परिकल्पनं, विन्यासः.

APPOSITE, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, सङ्गतः -ता -तं, हृदयङ्गमः -मा -मं, यथार्थः -र्था -र्थं, यथार्हः -र्हा -र्हं.

APPOSITELY, *adv.* स्थाने, यथार्हतस् *ind.*, यथार्थं, सङ्गतप्रकारेण.

To APPRAISE, *v. a.* (Set a price on) अर्घं संख्या in caus. (-ख्यापयति -यितुं), मूल्यं निरूप् (c. 10. -रूपयति -यितुं) or व्यवसो, (c. 4. -स्यति -सातुं), मूल्यनिर्णयं कृ, मूल्यं निश्चितं कृ.

APPRAISER, *s.* अर्घसंख्यापकः, मूल्यनिरूपकः, मूल्यविज्ञापकः.

APPRAISING, *s.* अर्घसंख्यापनं, मूल्यनिरूपणं, मूल्यविज्ञापनं.

To APPRECIATE, *v. a.* मूल्यं or अर्घं or गुणागुणं or भद्राभद्रतां or सारासारं विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), or निरूप (c. 10. -रूपयति -यितुं), or निश्चितं कृ or विविच् (c. 7. -विनक्ति -वेक्तुं); 'one who knows how to appreciate,' गुणज्ञः, गुणागुणज्ञः, गुणग्राही *m.* (न्), मर्म्मज्ञः.

APPRECIATION, *s.* मूल्यविज्ञानं, गुणागुणज्ञानं, भद्राभद्रनिरूपणं, दोषादोषबोधः, विज्ञानं.

To APPREHEND, *v. a.* (Lay hold on) ग्रह् (c. 9. गृह्णाति -ह्णीते ग्रहीतुं), परिग्रह्, सङ्ग्रह्; परामृश् (c. 6. -मृशति -मर्ष्टुं), धृ (c. 1. धरति धर्त्तुं).—(Seize in order for trial) आसिध् (c. 1. -सेधति -सेद्धुं); ग्रह्, धृ, आक्रम् (c. 1. -क्रामति -क्रमति -क्रमितुं).—(By the mind) उपलभ् (c. 1. -लभते -लब्धुं), ऊह् (c. 1. ऊहते ऊहितुं); अनुया (c. 2. -याति -यातुं), अवगम् (c. 1. -गच्छति -गन्तुं), अवबुध् (c. 4. -बुध्यते -बोद्धुं).—(To fear) शङ्क् (c. 1. शङ्कते शङ्कितुं) आशङ्क्; भी (c. 3. बिभेति भेतुं).

APPREHENDED, *p. p.* (Understood) उपलब्धः -ब्धा -ब्धं, अवगतः -ता -तं.—(Arrested) आसिद्धः -द्धा -द्धं.

APPREHENSIBLE, ग्राह्यः -ह्या -ह्यं, धीगम्यः -म्या -म्यं, उपलभ्यः -भ्या -भ्यं,

APPREHENSION, *s.* (Fear) भयं, शङ्का, आशङ्का, सन्देहः.—(Opinion)

मतिः *f.*, बुद्धिः *f.*, बोधः.—(Seizure) ग्रहणं, आक्रमणं, धरणं.—(Arrest) आसेधः.—(Conception) उपलब्धिः *f.*, मेधा, अनुभवः, अनुमानं, अवगमः, अनुबोधः, उपलम्भः.

APPREHENSIVE, *a.* शङ्कितः -ता -तं, शङ्की -ङ्किनी -ङ्कि (न्), शङ्कान्वितः -ता -तं, कृतभयः -या -यं.

APPRENTICE, *s.* शिल्पविद्याशिष्यः, शिष्यः, निरूपितकालपर्य्यन्तं शिल्पविद्याशिक्षार्थं नियमपत्रेण स्थापितः or धृतः सेवकः.

To APPRENTICE, *v. a.* आविहितकालात् शिल्पविद्याशिक्षार्थं नियमपत्रेण शिष्यं or सेवकं स्था in caus. (स्थापयति -यितुं).

APPRENTICESHIP, *s.* शिल्पविद्याशिक्षावधिः *m.*, शिल्पशिक्षासमयः, सेवाकालः, दास्यकालः.

To APPRIZE, *v. a.* ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा; विद् in caus. (वेदयति -यितुं), निविद्, समाविद्; बुध् in caus. (बोधयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

APPRIZED, *p. p.* विज्ञापितः -ता -तं, अनुज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं, बोधितः -ता -तं.

To APPROACH, *v. n.* (Draw near to) अधिगम् (c. 1. -गच्छति -गन्तुं), आगम्, अभिगम्, अभ्यागम, उपागम्, उपगम्, समुपगम्; या (c. 2. याति यातुं), अभिया, आया, उपाया, प्रत्यया, समाया, उपया, समुपया; उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), ऋ (c. 1. ऋच्छति अर्त्तुं), अभ्यृ; अभिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), उपावृत्, प्रतिवृत्, उपवृत्; समभ्यागा used only in the 3d pret.; as, 'he approached,' समभ्यागात्. इ, *i. e.* इ with आ (c. 2. ऐति, ऐतुं), अभ्ये, उपे, अभी (अभ्येति); उपसृप् (c. 1. -सर्पति -सर्प्तुं), समुपसृप्; आक्रम् (c. 1. -क्रामति -क्रमितुं), उपक्रम्; आव्रज् (c. 1. -व्रजति -व्रजितुं), प्रतिव्रज्, अभिपद् (c. 4. -पद्यते -पत्तुं), समापद्, समुपपद्, प्रतिपद्; अंह् (c. 1. अंहते अंहितुं).

To APPROACH, *v. a.* उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus.; समीपं धा (c. 3. -दधाति -धत्ते -धातुं), निकटे धा; सङ्क्रम् in caus. (-गमयति -यितुं).

APPROACH, *s.* आगमः, अभिगमनं, आगमनं, उपगमः, उपस्थितिः *f.*, उपसत्तता.

APPROACHABLE, *a.* अगम्यः -म्या -म्यं, उपगम्यः -म्या -म्यं, उपसाद्यः -द्या -द्यं.

APPROACHED, *p. p.* अभिगतः -ता -तं, उपगतः -ता -तं, उपस्थितः -ता -तं, अभ्यासगतः -ता -तं, प्रत्युपस्थितः -ता -तं.

APPROACHING, *a.* (Near at hand) उपस्थितः -ता -तं, समुपस्थितः -ता -तं, आसन्नः -न्ना -न्नं.

APPROBATION, *s.* सम्मतिः *f.* or -तं, अनुमतिः *f.* or -तं, प्रशंसा, प्रसादः, मनःसन्तोषः, ग्रहणं.

To APPROPRIATE, *v. a.* (To consign to some particular use) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, caus. -योजयति -यितुं), उपयुज्, विनियुज्.—(To claim to one's self by an exclusive right) स्वीकृ, स्वीयमिति or ममेति वद् (c. 1. वदति वदितुं), स्वकीयं -यां -यं or आत्मीयं -यां -यं or स्वाधीनं -नां -नं or आत्माधीनं -नां -नं or आत्मसात् कृ, स्वस्वत्वं बुध् in caus. (बोधयति -यितुं), or ज्ञा in caus. (ज्ञापयति -यितुं.)

APPROPRIATE, *a.* (Suited to the occasion) प्रस्तावसदृशः -शी -शं.—(Belonging peculiarly) आत्मनीनः -ना -नं, स्वकीयः -या -यं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धकः -का -कं, विशेषकः -का -कं, जनीनः -ना -नं.—(Suitable) युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं, उपयोगी -गिनी -गि (न्).

APPROPRIATED, *p. p.* (Made one's own) आत्मसात्कृतः -ता -तं.

APPROPRIATELY, *adv.* युक्तं, यथायोग्यं, यथोचितं, यथातथा, स्थाने.

APPROPRIATENESS, *s.* (Fitness of application) युक्तता, योग्यत्वं, औचित्यं, उपयुक्तता, सामञ्जस्यं, सङ्गतता.

APPROPRIATION, *s.* (The application of something to a particular purpose) उपयोगः, प्रयोगः, विनियोगः.—(Claiming any thing as peculiar) आत्मग्रहणं, स्वत्वबोधनं, आत्मसात्करणं.

APPROVAL, *s.* अनुमतिः *f.*, सम्मतिः *f.*, अनुमन्त्रं, सम्मतं, प्रशंसा.

To APPROVE, *v. a.* अनुमन् (c. 4. -मन्यते -मन्तुं), सम्मन्; प्रशंस् (c. 1. -शंसति -शंसितुं), रुच्, in caus. (रोचयति -यितुं), अनुरुच्; 'that is approved by me,' तत् मया प्रशस्यते or तत् मह्यं रोचते. प्रतिनन्द् (c. 1. -नन्दति -नन्दितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं).—(To prove, show) प्रमाणीकृ, प्रमाण् (nom. प्रमाणयति -यितुं), विभू in caus. (-भावयति -यितुं).

APPROVED, *p. p.* सम्मतः -ता -तं, अभिमतः -ता -तं, मतः -ता -तं, यथाभिमतः -ता -तं, प्रशस्तः -स्ता -स्तं, शिष्टः -ष्टा -ष्टं.—(Tried) परीक्षितः -ता -तं.—(Of tried probity) उपधाशुचिः -चिः -चि.

To APPROXIMATE, *v. n.* उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), समीपं or निकटं वृत् (c. 1. वर्त्तते वर्त्तितुं), or स्था, उपागम् (c. 1. -गच्छति -गन्तुं), उपगम्, समुपगम्, अभिगम्.—(To be like) तुल्यः -ल्या -ल्यं or सदृशः -शी -शं अस्.

To APPROXIMATE, *v. a.* नेद् (nom. नेदयति -यितुं), उपस्था in caus. (-स्थापयति -यितुं), समीपं स्था in caus., उपनी (c. 1. -नयति -नेतुं), सङ्गम् in caus. (-गमयति -यितुं).

APPROXIMATE, *a.* समीपः -पा -पं, आसन्नः -न्ना -न्नं, सन्निकृष्टः -ष्टा -ष्टं, उपस्थायी -यिनी -यि (न्).

APPROXIMATED, *p. p.* उपस्थापितः -ता -तं, उपनीतः -ता -तं, उपनतः -ता -तं, उपसन्नः -न्ना -न्नं, कृतसन्निधानः -ना -नं.

APPROXIMATION, *s.* (Approach) उपगमः, समुपगमः, समीपगमनं, संहतता -त्वं, उपस्थितिः *f.*, उपस्थानं, समुपस्था.—(Nearness) नैकट्यं, सामीप्यं, सान्निध्यं, सन्निधानं.

APPULSE, *s.* आघातः, आघातनं, प्रतिहननं, प्रतिघातः.

APPURTENANCE, *s.* *See* APPERTENANCE.

APRICOT, *s.* फलविशेषः.

APRIL, *s.* चैत्रः, चैत्रिकः, मधुः, वैशाखः, माधवः, राधः.

APRON, *s.* मलनिवारणार्थं स्त्रीभिर् धृतम् आच्छादनं.

APROPROS, *adv.* स्थाने, यथायोग्यं, यथावसरं, यथावकाशं.

APSIS, *s.* (In astronomy) मन्दोच्चः.

APT, *a.* (Fit) उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, आप्तः -प्ता -प्तं.—(Having a tendency to) expressed by शीलः in composition; as, 'disposed to piety,' धर्म्मशीलः -ला -लं, or by the affix आलुः; as, 'apt to sleep,' शयालुः -लुः -लु, or by the desiderative adjective; as, 'apt to do,' चिकीर्षुः -र्षुः -र्षु; 'apt to fall,' पिपतिषुः -षुः -षु.—(Skilful) कुशलः -ला -लं, दक्षः -क्षा -क्षं, पटुः -टुः -टुः -टु, अभिज्ञः -ज्ञा -ज्ञं.—(Ready, quick) त्वरितः -ता -तं, उद्युक्तः -क्ता -क्तं.

APTITUDE, *s.* (Fitness) योग्यता, पात्रता or -त्वं, उपयोगिता, आप्तिः *f.*—(Tendency) शीलत्वं, -ता, अभिप्रायः, आशयः.—(Disposition) शीलः, स्वभावः, भावः, रीतिः *f.*

APTLY, *adv.* यथायोग्यं, योगतस् *ind.*, स्थाने.—(Skilfully) दाक्ष्येण, चातुर्य्येण, सपाटवं.

APTNESS, *s.* (Fitness) योग्यता.—(Skill) कुशलता, पाटवं, विदग्धता, चातुर्य्यं.—(Ability) शक्तिः *f.*, सामर्थ्यं.

AQUATIC, *a.* (Inhabiting the water) जलेचरः -रा -रं, जलजः -जा -जं, वारिजः -जा -जं, वारिचरः -रा -रं, अम्बुचरः -रा -रं, अम्बुजः -जा -जं, आम्भसिकः -की -कं, जलोद्भवः -वा -वं, जलभूः -भूः -भु.—(Growing in the water) अम्भोरुहः, जलरुहः.—(Watery) औदकः -की -कं, आप्यः -प्या -प्यं; 'an aquatic animal,' जलजन्तुः *m.*

AQUEDUCT, *s.* जलमार्गः, जलपथः, जलनिर्गमः, जलप्रणाली.

AQUEOUS, *a.* अम्मयः -यी -यं, सजलः -ला -लं, जलसः -सा -सं, अनूपः -पा -पं.

AQUEOUSNESS, *s.* सजलता, औदकत्वं, अनूपता.

AQUILINE, *a.* (Resembling an eagle) उत्क्रोशरूपः -पा -पं, गृध्राकारः -रा -रं.—(Hooked) वक्रः -क्रा -क्रं, कुञ्चितः -ता -तं, वृजिनः -ना -नं; 'having an aquiline nose,' प्रलम्बघोणः.

ARABIA, *s.* यवनः, यवनदेशः.

ARABIAN, *a.* यवनसम्बन्धी -न्धिनी -न्धि (न्), यवनदेशीयः -या -यं; 'an Arabian,' यवनदेशजः.

ARABLE, *a.* कृषियोग्यः -ग्या -ग्यं, कर्षणीयः -या -यं, फालकृष्टः -ष्टा -ष्टं.

ARATION, *s.* कृषिः *f.*, कार्षिः *f.*, कर्षणं, हलहतिः *f.*

ARBITER, *s.* प्रमाणपुरुषः, मध्यस्थः, निर्णेता *m.* (तृ), विचारकर्त्ता *m.* (र्त्तृ).

ARBITRABLE, *a.* निर्णेयः -या -यं, विचारणीयः -या -यं.

ARBITRARILY, *adv.* स्वेच्छया, स्वेच्छातस् *ind.*, स्वकामतस् *ind.*

ARBITRARY, *a.* (Following the will) कामकारी -रिणी -रि (न्), यथाकामी -मिनी -मि (न्), स्वतन्त्रः -न्त्रा -न्त्रं, स्वच्छन्दः -न्दा -न्दं, स्वाधीनः -ना -नं, अनायत्तः -त्ता -त्तं, स्वैरवृत्तः -त्ता -त्तं.—(Capricious) चपलः -ला -लं.—(Tyrannical) क्रूरचरितः -ता -तं.—(Depending on no rule) अविहितः -ता -तं.

To ARBITRATE, *v. n.*, *v. a.* विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -नयति -ते -नेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), निश्चयं or विचारं or निर्णयं or परिच्छेदं कृ.

ARBITRATED, *p. p.* निर्णीतः -ता -तं, तीरितः -ता -तं, निश्चितः -ता -तं, कृतनिश्चयः -या -यं.

ARBITRATION, *s.* (Determination) निर्णयः, विचारः, -रणं, निश्चयः, परिच्छेदः.—(Mediation) माध्यस्थ्यं

ARBITRATOR, *s.* प्रमाणपुरुषः, स्थेयः, मध्यस्थः, निर्णेता *m.* (तृ), निश्चायकः, विचारकः.

ARBOROUS, *a.* वार्क्षः -र्क्षी -र्क्षं, वार्क्ष्यः -र्क्ष्यी -र्क्ष्यं, वृक्षसम्बन्धी -न्धिनी -न्धि (न्).

ARBOUR, *s.* लतागृहं, कुञ्जः, निकुञ्जः, पर्णशाला, मण्डपः -पं, कुटुङ्गकः, लावरः.

ARC, *s.* (Segment of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः.

ARCADE, *s.* (Garden-walk) वृक्षैर् आच्छादित उद्यानपथः.—(A street arched over) इष्टकानिर्म्मिततोरणाकारपटला वीथिः, or धनुराकारेण पटलेन आवृता वीथिः.

ARCH, *s.* (Part of a circle) खण्डमण्डलं, वृत्तखण्डं, गोलखण्डं.—(Arched gateway) तोरणः -णं.—(The arched roof of a house) खोडकशीर्षं.—(Vault of heaven) खगोलः, नभोमण्डलं.

ARCH, *a.* (Sly, waggish) क्रीडाशीलः -ला -लं, रसिकः -का -कं, लोलापाङ्गः -ङ्गा -ङ्गं, विदग्धः -ग्धा -ग्धं.—(Chief) प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं.

To ARCH, *v. a.* (To make in the form of an arch) मण्डलीकृ, गोलीकृ तोरणरूपेण निर्मा (c. 2. -माति, c. 4. -मायते -मातुं) or कृ in caus. (कारयति -यितुं), तोरणाकारपटलेन आछद् (c. 10. -छादयति -यितुं).—(To build an arch) तोरणं निर्मा.

ARCHANGEL, *s.* 'ईश्वरदूतानां मध्ये मुख्यदूतः or प्रधानदूतः, ईश्वरदूताधिष्ठाता *m.* (तृ).

ARCHBISHOP, *s.* धर्म्माध्यक्षाणां मध्ये प्रधानो or मुख्यो धर्म्माध्यक्षः.

ARCHDEACON, *s.* (The bishop's vicegerent) धर्म्माध्यक्षसहायः, धर्म्माध्यक्षोपकारकः.

ARCHAIOLOGY or ARCHÆOLOGY, *s.* प्राक्कालीनव्यवहारविषयं वाक्यं, पुरातनशास्त्रं.

ARCHED, *p. p.* मण्डलीकृतः -ता -तं, गोलीकृतः -ता -तं, तोरणाकारः -रा -रं, कुञ्चितः -ता -तं.

ARCHER, *s.* धनुर्धरः, धन्वी *m.* (न्), धन्वा *m.* (न्), धनुष्मान् *m.* (-त्), धानुष्कः, धनुर्धारी *m.* (न्), इष्वासः, इषुधरः, काण्डीरः, निषङ्गी *m.*, अस्त्री *m.*

ARCHERY, *s.* धनुर्विद्या, शराभ्यासः, उपासनं, शराघातः, बाणमोक्षणं.—(Skilled in) कृतहस्तः, सुप्रयोगविशिखः, कृतपुङ्खः.

ARCHETYPE, *s.* मूलं, मूलमूर्त्तिः *f.*, आदर्शः, सूक्ष्मशरीरं.

ARCHITECT, *s.* स्थपतिः *m.*, गृहादिनिर्म्माणविद्याज्ञः, गृहनिर्म्माणाध्यक्षः, निर्म्माता *m.* (तृ).

ARCHITECTURAL, *a.* निर्म्माणविद्यासम्बन्धी -न्धिनी -न्धि (न्).

ARCHITECTURE, *s.* निर्म्माणविद्या, निर्म्माणशिल्पं, गृहादिनिर्म्माणशिल्पं.

ARCHITRAVE, *s.* गृहस्य यो भागः स्तम्भाग्रे अवलम्बते or निवेश्यते.

ARCHIVES, *s.* प्राक्कालीनग्रन्थरक्षागारं.—(Ancient records) इतिहासः, पुरावृत्तं

ARCHNESS, *s.* विदग्धता, वैदग्ध्यं, रसित्वं.

ARCHWISE, *adv.* तोरणरूपेण, अर्द्धमण्डलाकारेण, तोरणवत्; धनुराकारेण.

ARCTIC, *a.* उत्तरः -रा -रं, उदीचीनः -ना -नं, उत्तरकेन्द्रीयः -या -यं, चित्रशिखण्डध्रुवःस्थितो भूगोलभागः.

ARDENCY, *s.* उत्तापः, उत्साहः, उग्रता, व्यग्रता, कौतूहलं, उत्सुकता.

ARDENT, *a.* (Hot) उत्तप्तः -प्ता -प्तं, प्रचण्डः -ण्डा -ण्डं.—(Eager) कुतूहली -लिनी -लि (न्), उत्सुकः -का -कं, अतीच्छः -च्छा -च्छं, व्यग्रः -ग्रा -ग्रं, उत्साही -हिनी -हि (न्).—(Affectionate) अनुरागी -गिणी -गि (न्).

ARDENTLY, *adv.* उत्तापेन, कौतूहलेन, औत्सुक्येन, सानुरागं.

ARDOUR, *s.* उत्तापः, आसक्तिः *f.*, उग्रता, व्यग्रता, कौतूहलं, औत्सुक्यं, उत्साहः.—(Of affection) अनुरागः.

ARDUOUS, *a.* (Lofty) उच्चः -च्चा -च्चं, प्रांशुः -शुः -शु, आरोहणदुर्गम्यः -म्या -म्यं.—(Difficult) दुष्करः -रा -रं, सुदुष्करः -रा -रं, अतिदुष्करः -रा -रं, कठिनः -ना -नं, दुर्गम्यः -म्या -म्यं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं.

ARDUOUSNESS, *s.* उच्चता, उच्चुङ्गता.—(Difficulty) कठिनता, काठिन्यं.

AREA, *s.* अङ्गणं, प्राङ्गणं, अभ्यन्तरस्थानं.

ARENA, *s.* रङ्गः, रङ्गभूमिः *f.*, मल्लभूः, अक्षवाटः.

ARGENT, *a.* रूप्यः -प्या -प्यं, रौप्यः -प्यी -प्यं, राजतः -ती -तं.

ARGILLOUS, *a.* मृण्मयः -यी -यं, मार्त्तिकः -की -कं, चिक्कणमृत्तिकामयः -यी -यं.

To ARGUE, *v. n.* (To reason) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, विवेचनं कृ.—(To dispute) विवद् (c. 1. -वदते -वदितुं), वादानुवादं or उत्तरप्रत्युत्तरं कृ.

To ARGUE, *v. a.* (To prove by argument) प्रमाण्, (nom. प्रमाणयति -यितुं), प्रमाणीकृ, प्रमाणेन or तर्केण or विचारेण सिद्धीकृ; सूच् (c. 10. सूचयति -यितुं).—(To charge with, as a crime) दोषारोपं कृ, अपवद् (c. 1. -वदति -वदितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

ARGUER, *s.* तर्की *m.* (न्), विवादी *m.* (न्), विचारकः, प्रतिवादी *m.* (न्), न्यायी *m.* (न्).

ARGUMENT, *s.* (A reason stated) पक्षः, प्रमाणं, हेतुः *m.*, कारणं, वितर्कः, न्यायः; 'a false argument,' पक्षाभासः; 'a different side of the argument,' पक्षान्तरं.—(Controversy) वादानुवादः, वादयुद्धं, वाक्कलहं, विचारः, वितर्कः, विवादः, वितण्डा.—(The subject of any work) विषयः.—(Table of contents) अनुक्रमणिका, निर्घण्टः.

ARGUMENTATION, *s.* वितर्कणं, विचारणं, न्यायः.

ARGUMENTATIVE, *a.* (Consisting of argument) तार्किकः -की -कं, वितर्की -र्किणी -र्कि (न्), विवादी -दिनी -दि (न्), न्यायी -यिनी -यि (न्), विचारी -रिणी -रि (न्).—(Disposed to controversy) विवादशीलः -ला -लं, विवादार्थी -र्थिनी -र्थि (न्), विवादप्रियः -या -यं.

ARGUMENTATIVELY, *adv.* सवितर्कं, वादानुवादपूर्व्वकं, वितर्कपूर्व्वकं, न्यायवत्.

ARID, *a.* शुष्कः -ष्का -ष्कं, शोषितः -ता -तं, परिशुष्कः -ष्का -ष्कं; 'arid soil,' मरुः *m.*, मरुस्थली, धन्वा *m.* (न्).

ARIDITY, *s.* शुष्कता, -त्वं, शोषः, शोषणं, परिशोषः

ARIGHT, *adv.* युक्तं, ऋतं, यथातथं, यथोचितं, यथायोग्यं, सम्यक्, यथार्हं.

To ARISE, *v. n.* (To stand up) उत्था for उत्स्था (c. 1. -तिष्ठति -ते -थातुं).—(To have origin) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्; उच्चर् (c. 1. -चरति -चरितुं), उदि (c. 1. -अयति -एतुं), अभ्युदि, समुदि; प्रभू (c. 1. -भवति -भवितुं), सम्भू, आविर्भू, प्रादुर्भू; प्रवृत् (c. 1. -वर्त्तते -वर्त्तितुं), प्रसृ (c. 1. -सरति -सर्त्तुं), उद्भा (c. 2. -भाति -भातुं), निर्भा; आत्मानं दृश् in caus. (दर्शयति -यितुं), जन् (c. 4. जायते जनितुं), अभिजन्, उपजन्, सञ्जन्.—(From death) प्रतिसञ्जन्, समुत्था.

ARISEN, *p. p.* उत्थितः -ता -तं, सञ्जातः -ता -तं, जातः -ता -तं, जनितः -ता -तं, उत्पन्नः -न्ना -न्नं, समुत्पन्नः -न्ना -न्नं, विनिःमृतः -ता -तं. जन्यः -न्या -न्यं.

ARISTOCRACY, *s.* (A form of government) कुलीनजनाधिष्ठितं राज्यं, कुलीनवर्गप्रमुखं राज्यं, कुलीनवर्गप्रभुत्वं.—(The persons of whom it is composed) कुलीनजनाः, कुलीनवर्गः.

ARISTOCRATICAL, *a.* कुलीनः -ना -नं, कुलीनकः -का -कं, कौलेयः -यी -यं, कुलीनवर्गयोग्यः -ग्या -ग्यं, उत्कृष्टः -ष्टा -ष्टं.

ARISTOCRATICALLY, *adv.* कुलीनजनवत्, राजन्यवत्, कुलीनकप्रकारेण.

ARITHMETIC, *s.* गणनाविद्या, गणितं, पाटीगणितं, अङ्कविद्या, परिपाटिः *f.* -टी परिकर्म्म *n.* (न्); 'the eight rules of arithmetic,' परिकर्म्माष्टक.

ARITHMETICAL, *a.* गणनाविद्यानुरूपः -पा -पं, अङ्कविद्यानुसारी -रिणी -रि (न्).

ARITHMETICIAN, *s.* गणनाविद्याज्ञः, गणनाशास्त्रपण्डितः, अङ्कविद्याज्ञः, गणकः.

ARK, *s.* (A vessel, ship) नौः, नौका, पोतः, तरणी, वृहन्नौका.—(A chest) आधारः, कोषः, पेटिका, पेटः -टा -टी.

ARM, *s.* (Of the body) बाहुः *m. f.*, भुजः or -जा *f.*, दोषा *f.*, दोः *m.* (-स्), प्रवेष्टः.—(Of a tree) शाखा, उपशाखा.—(Of the sea) समुद्रवङ्क्रः.—(Of a river) वक्रं, वङ्क्रः, नदीवङ्क्रः, नदीवक्रं, पुटभेदः.—(Power, might) बलं, शक्तिः *f.*; 'a dominion acquired by one's own arm,' स्वभुजोपार्ज्जितं राज्यं'—(The upper arm) प्रगण्डः.

To ARM, *v. a.* सन्नह् (c. 4. -नह्यति -नद्धुं), सज्जीकृ, अस्त्रैः or शस्त्रैः सज्जीकृ, or युज् in caus. (योजयति -यितुं), or समायुज्.—(To arm one's self, put on one's arms) नह् (c. 4. नह्यते नद्धुं), सन्नह्.—(To put on armour) वर्म्म् (nom. वर्म्मयति -यितुं or संवर्म्मयति).

ARMADA, *s.* वृहन्नौकासमूहः, समुद्रयुद्धाय सज्जीकृतो वृहन्नौकासमूहः.

ARMADILLO, *s.* घुणः, कवचाकारचर्म्मधारी विलवासी क्षुद्रजन्तुः.

ARMAMENT, *s.* सैनिकः, युद्धाय सज्जीकृतं बलं, योद्धृसज्जनं.

ARMED, *p. p.* सज्जः -ज्जा -ज्जं, वर्म्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, अभिसन्नद्धः -द्धा -द्धं, सायुधः -धा -धं, कृतास्त्रः -स्त्रा -स्त्रं, शस्त्री -स्त्रिणी -स्त्रि (न्).—(Having a weapon in the hand) शस्त्रपाणिः -णिः -णि.

ARM-HOLE, *s.* कक्षः, बाहुमूलं, भुजकोटरः, कक्षस्थानं, दोर्म्मूलं.

ARMISTICE, *s.* किञ्चित्कालपर्य्यन्तं युद्धनिवर्त्तनं, सन्धिः *m.*, धर्मा.

ARMLESS, *a.* (Without an arm) अभुजः -जा -जं.—(Without weapons) अस्त्रहीनः -ना -नं, अशस्त्रः -स्त्रा -स्त्रं.

ARMLET. *s.* (Bracelet) वलयः or यं, केयूरं, अङ्गदं.—(A little arm) क्षुद्रबाहुः *m.*, उपशाखा.

ARMORIAL, *a.* कावचिकः -की -कं, आयुधिकः -का -कं, आयुधीयः -या -यं.—(Belonging to the escutcheon of a family) कुलचिह्नसम्बन्धी -न्धिनी -न्धि (न्).

ARMORY, *s.* आयुधागारं, शस्त्रागारं, अस्त्रागारः.—(A collection of arms) शस्त्रसंहतिः *f.*, शस्त्रसमूहं.

ARMOUR, *s.* वर्म्म *n.* (न्), लौहवर्म्म *n.* (न्), तनुत्रं, तनुत्राणं, कवचः or -चं, वारवाणः, कञ्चुकः, त्वक्त्रं, दंशनं, सन्नाहः, देहावरणं, युद्धास्त्रं, तनुवारं, सज्जा.—(Chain-armour) जालिका, जालप्राया; 'arrayed in armour,' वर्म्मितः -ता -तं, कवची -चिनी -चि (न्).

ARMOUR-BEARER, *s.* सान्नहानकः, वर्म्मवाहकः.

ARMOURER, *s.* अस्त्रकारकः, शस्त्रकारः, शस्त्रमाजैः, अस्त्रनिर्म्माणशिल्पज्ञः, सज्जाकर्त्ता *m.* (र्त्तृ), असिधावकः.

ARM-PIT, *s.* कक्षः, बाहुमूलं, भुजकोटरः, दोर्मूलं.

ARMS, *s.* अस्त्रं, शस्त्रं, आयुधः, युद्धास्त्रं, शस्त्रास्त्रं.—(War in general) विग्रहः, समरः, रणः, युद्धं, सङ्ग्रामः.—(State of hostility) युद्धावस्था, रणसमयः; 'dexterity in arms,' अस्त्रलाघवं; 'the taking up of arms,' अस्त्रग्रहणं, युद्धे प्रवृत्तिः, अस्त्रधारणं; 'passage of arms,' अस्त्रशिक्षा, शस्त्राभ्यासः; 'a brother in arms,' सहयुध्वा *m.* (न्).—(The ensigns armorial of a family) कुलीनपदसूचकचिह्नं, कुलचिह्नं.

ARMY, *s.* सेना *f.*, सैन्यं, बलं, वाहिनी, चमूः *f.*, दण्डः or -ण्डं, अनीकं, चक्रं, ध्वजिनी, व्यूहः, योधसमूहः, पृतना, वरूथिनी.—(A complete army) अक्षौहिणी, चतुरङ्गः.—(In motion) प्रचक्रं.

AROMA, *s.* गन्धः, वासः, आमोदः, धूपः, परिमलः.

AROMATIC. *a.* सुगन्धीयः -या -यं, गन्धी -न्धिनी -न्धि (न्), तिक्तः -क्ता -क्तं, सुरभितः -ता -तं, सुवासितः -ता -तं, धूपितः -ता -तं.

AROMATICS, *s.* उपस्कराः *m. pl.*, सुगन्धिद्रव्याणि *n. pl.*, सुगन्धानि *n. pl.*

To AROMATISE, *v. a.* वास् (c. 10. वासयति -यितुं), धूप् (c. 1. धूपायति, धूपयितुं).

AROUND, *adv.* (Circularly) परितस्, अभितस्.—(On every side) समन्ततस्, सर्व्वतस्, विश्वतस्, समन्तात्.

AROUND, *prep.* परि, अभि.

To AROUSE, *v. a.* (To excite) उत्सह् in caus. (-साहयति -यितुं), प्रोत्सह्, उत्था for उत्स्था in caus. (उत्थापयति -यितुं), उद्बुध् in caus. (-बोधयति -यितुं), प्रबुध्.—(To wake from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus., निद्रां भञ्ज् (c. 7. भनक्ति भंक्तुं).

AROUSED, *p. p.* प्रोत्साहितः -ता -तं.—(Awaked) प्रबोधितः -ता -तं, प्रबुद्धः -द्धा -द्धं, निद्राभङ्गः -ङ्गा -ङ्गं.

To ARRAIGN, *v. a.* (To set in order) विरच् (c. 10. -रचयति -यितुं), स्वस्थाने स्था in caus. (स्थापयति -यितुं).—(To accuse) अभियोगं कृ, आह्वे (c. 1. -ह्वयति -ह्वातुं), अपवद् (c. 1. -वदति -वदितुं), अभिशप् (c. 1. -शपति -शप्तुं).

ARRAIGNED, *p. p.* अभियुक्तः -क्ता -क्तं, आहूतः -ता -तं, अभिशप्तः -प्ता -प्तं.

ARRAIGNMENT, *s.* अभियोगः, आह्वानं, अपवादः.

To ARRANGE, *v. a.* रच् (c. 10. रचयति -यितुं), विरच्; विधा (c. 3. -दधाति -धातुं), संविधा; क्रमेण or यथाक्रमं स्था in caus. (स्थापयति -यितुं), ग्रन्थ् (c. 1. ग्रन्थति, c. 9. ग्रथ्नाति, ग्रन्थितुं).

ARRANGED, *p. p.* विरचितः -ता -तं, ग्रथितः -ता -तं, विन्यस्तः -स्ता -स्तं, विहितः -ता -तं, प्रतिविहितः -ता -तं, परिमितः -ता -तं, व्यूढः -ढा -ढं; 'well-arranged,' सुघटितः -ता -तं.

ARRANGEMENT, *s.* विन्यासः, पर्य्यायः, प्रतिविधानं, व्यूहनं, व्यूढिः *f.*, रचना, विरचनं, ग्रन्थनं, -ना, व्यवस्थापनं, अनुसन्धानं, क्रमेण स्थापनं, परिपाटिः *f.*—(The state of being in order) क्रमः.

ARRANGER, *s.* विरचकः, उपायज्ञः, उपेता *m.* (तृ), व्यासः.

ARRANT, *a.* (Bad in a high degree) अतिदुष्टः -ष्टा -ष्टं, अतिनिकृष्टः -ष्टा -ष्टं, अतिकुत्सितः -ता -तं.—(Excessive) अत्यन्तः -न्ता -न्तं.

ARRAS, *s.* नानावर्णानि चित्रितवस्त्राणि.

ARRAY, *s.* (Of battle) व्यूहः, or -हनं, व्यूढिः *f.*, बलविन्यासः; 'to draw up in battle array,' व्यूह् (c. 1. -ऊहते -ऊहितुं).—(Order) क्रमः, श्रेणी, पङ्क्तिः *f.*, रचना.—(Dress) आभरणं, भूषणं, परिच्छदः.

To ARRAY, *v. a.* (To put in order) क्रमेण or व्यूहेन रच् (c. 10. रचयति -यितुं), विरच् or स्था in caus. (स्थापयति -यितुं), or व्यवस्था: or विधा (c. 3. -दधाति -धातुं), or सज्जीकृ.—(To dress) वस्त्रम् आछद् (c. 10 -छादयति -यितुं), संव्ये (c. 1. -वयति -व्यातुं), भूष् (c. 10. भूषयति -यितुं); अलङ्कृ, परिष्कृ.

ARREAR, *s.* ऋणशेषं, ऋणशेषांशः, ऋणस्य अशोधितो भागः, ऋणस्य शोधनीयो भागः.

To bewet, *v. a.* क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति, सेक्तुं).

To bewilder, *v. a.* मुह् in caus. (मोहयति -यितुं), व्यामुह्, परिमुह्, विप्रमुह्; आकुलीकृ, व्याकुलीकृ, विभ्रम् in caus. (-भ्रमयति -यितुं), सम्भ्रम्.

Bewildered, *p. p.* आकुलः -ला -लं, व्याकुलः -ला -लं, आकुलितः -ता -तं. आकुलीकृतः -ता -तं, सम्भ्रान्तः -न्ता -न्तं, कातरः -रा -रं, व्यग्रः -ग्रा -ग्रं. मोहितः -ता -तं, मुग्धः -ग्धा -ग्धं, विमूढः -ढा -ढं, विमुग्धः -ग्धा -ग्धं, व्यस्तः -स्ता -स्तं, परिविह्वलः -ला -लं.

Bewilderment, *s.* व्याकुलता, आकुलत्वं, व्यग्रता, वैक्लव्यं, सम्भ्रमः, कातरता.

To bewitch, *v. a.* मन्त्रद्वारा वशीकृ or मुह् in caus. (मोहयति -यितुं), मोहं कृ, अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं).—(To captivate) मनो हृ (c. 1. हरति, हर्तुं).

Bewitched, *p. p.* मोहितः -ता -तं, वशीकृतः -ता -तं, अभिमन्त्रितः -ता -तं.

Bewitcher, *s.* मोहकः, मोहनः, मायी *m.* (न्), वशीकर्त्ता *m.* (र्त्तृ), मायाकृत्.

Bewitchment, *s.* वशीक्रिया, वशिः *m.*, वशिता, वशीकरणं, मोहनं, परिमोहनं, विमोहनं, सम्मोहः, मोहः, माया, काम्मणत्वं.

Bewitching, *a.* मोही -हिनी -हि (न्), मोहनः -नी -नं, मनोहारी -रिणी -रि (न्), मनोहरः -रा -रं, प्रलोभकः -का -कं, आकर्षिकः -की -कं, मायी -यिनी -यि (न्).

Bewitchingly, *adv.* यथा मनो ह्रियते or वशीक्रियते तथा, मनोहरप्रकारेण, यथा मोहो जायते तथा, मायया, प्रलोभनाय.

To bewray, *v. a.* (To betray) परादा (c. 3. -ददाति -दातुं), प्रदा; शत्रुहस्तेषु समृ in caus. (-अर्पयति -यितुं).—(To indicate) सूच् (c. 10. (सूचयति -यितुं), पिशुन (nom. पिशुनयति -यितुं).

Beyond, *prep.* and *adv.* अति prefixed.—(On the farther side) पारं, पारे; 'beyond the sea,' समुद्रपारं; 'from beyond,' पारात्; 'to go beyond,' अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -चरितुं).—(In front) अग्रे.—(Superior to) अतिरेकी -किणी -कि (न्), विशिष्टः -ष्टा -ष्टं.—(More than) अधिकं, or expressed by अति prefixed; as, 'beyond mortal strength,' अतिमानुषः -षी -षं; 'beyond's one's power,' अतिशक्ति; 'beyond measure,' अतिशयं, अतीव; 'passed beyond the range of sight,' चक्षुर्विषयम् अतिक्रान्तः.—(At a distance) दूरे.

Bezel or bezil, *s.* रत्नाधारयोग्योऽङ्गुरीयकभागः, अङ्गुरीयकस्य यत्स्थाने मणिः खच्यते or प्रणिधीयते तत्.

Bhaváni, *s.* (The wife of the god Śiva, and the goddess of destruction; called Bhaváni in her amiable form) भवानी, उमा, महादेवी, देवी.—(The pure one) गौरी.—(As terrible in form and irascible in temper) दुर्गा, काली, चण्डी, चण्डिका.—(As daughter of Himálá, the sovereign of the snowy mountains) पार्वती, हैमवती.—(As wife of Śiva) शिवा, ईश्वरी, रुद्राणी, सर्व्वाणी, मृडानी.—(The all-auspicious) सर्व्वमङ्गला.—(The mother) अम्बिका.—(As the performer of austerities) कात्यायनी, अपर्णा.

Biangulated, *a.* द्विकोणः -णा -णं, द्व्यस्रकः -का -कं, कोणद्वयविशिष्टः -ष्टा -ष्टं.

Bias, *s.* (Inclination) भावः, शीलः, शीलत्वं, वाञ्छा, स्वभावः, इच्छा, अभिलाषः, सङ्कल्पः, छन्दं, चिकीर्षा, स्पृहा, अभिप्रायः.—(Inclination to go on one side) पार्श्वे गमनेच्छा.—(Partiality) पक्षपातः, पक्षपातिता, साचीकृतं.—(That which biasses, or induces to act) प्रवर्त्तः -र्त्तकः, प्रणोदः, प्रोत्साहः -हकः, प्रयोजकः.

To bias, *v. a.* प्रवृत् in caus. (-वर्त्तयति -यितुं), आवृज् in caus. (-वर्जयति -यितुं); साचीकृ; प्रणुद् (c. 6. -णुदति -णोत्तुं), आकृष् (c. 1. -कर्षति -क्रष्टुं), चेष्ट् in caus. (चेष्टयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं), आकृ in caus. (-कारयति -यितुं), पक्षपातीकृ.

Biassed, *p. p.* प्रवर्त्तितः -ता -तं, प्रोत्साहितः -ता -तं, प्रणोदितः -ता -तं, साचीकृतः -ता -तं, आकृष्टः -ष्टा -ष्टं.—(In favour of a side) पक्षग्राही *m.* (न्).

BIB, *s.* बालकस्य वक्षस्स्थलच्छादनयोग्यं क्षौमीनिर्म्मितं उत्तरीयवस्त्रं.

BIBBER, *s.* सुरापी *m.* (न्), सुरापः, मद्यपायी *m.* (न्), पानपरः, मद्यपाः *m.*

BIBLE, *s.* धर्म्मपुस्तकं, ईश्वरवाक्यप्रकाशको ग्रन्थः.

BIBLICAL, *a.* धर्म्मपुस्तकविषयः -या -यं, धर्म्मपुस्तकसम्बन्धकः -का -कं.

BIBLIOGRAPHY, *s.* ग्रन्थविद्या, ग्रन्थविद्यानुसेवनं.

BIBLIOMANIA, *s.* प्राचीनपुस्तकप्राप्तणे व्यग्रता, दुर्लभग्रन्थान्वेषणे व्यग्रता.

BIBLIOTHEKE, *s.* पाठार्थं सुरक्षितो ग्रन्थसमूहः, विद्यानुसेवनार्थं ग्रन्थकुटी.

BIBULOUS, *a.* जलशोषकः -का -कं, जलनिपानशीलः -ला -लं.

BICAPSULAR, *a.* बीजकोशो द्वैधीकृतो यस्य, द्विधाभूतबीजकोशः -शा -शं.

BICIPITAL, *a.* द्विमुद्धः -द्धी -द्धं, द्विशीर्षकः -का -कं, द्विशिराः -राः -रः (स्).

To BICKER, *v. n.* (To skirmish) डिम्बाहवं कृ; कलह (nom. कलहायते -यितुं), कलहं कृ.—(To wrangle) विवद् (c. 1. -वदते -वदितुं), वाग्युद्धं कृ.—(To quiver) स्फुर् (c. 6. स्फुरति, स्फुरितुं).

BICKERING, *s.* कलहः, विप्रलापः, विवादः, द्वन्द्वं, वाग्युद्धं.—(Petty warfare) डिम्बः, डिम्बाहवः.

BICKERN, *s.* सूच्याकाराग्रयुक्तः शूर्म्मिभागः, कर्म्मकारसेवितं लोहयन्त्रं.

BICORNE, *a.* द्विशृङ्गः -ङ्गा -ङ्गं, शृङ्गद्वयविशिष्टः -ष्टा -ष्टं.

To BID, *v. a.* (To invite) निमन्त्र् (c. 10. -मन्त्रयति -ते -यितुं), आह्वे (c. 1. -ह्वयति -ह्वातुं).—(To command) आज्ञा in caus. (-ज्ञापयति -यितुं), प्रेर् (c. 10. प्रेरयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), समादिश्.—(To offer a price) अमुकमूल्यं दित्सामीति or दातुमिच्छामीति वद् (c. 1. वदति, वदितुं) or ख्या in caus. (ख्यापयति -यितुं) or घुष् (c. 10. घोषयति -यितुं) or अभिधा (c. 3. -दधाति -धातुं).—(To bid welcome) स्वागतमिति वद्.—(To bid adieu) आमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्; आप्रच्छ् (c. 6. -पृच्छते -प्रष्टुं).—(To bid defiance) आह्वे, समाह्वे.

BIDDEN, *p. p.* (Commanded) आज्ञातः -ता -तं, प्रेरितः -ता -तं, चोदितः -ता -तं, देशितः -ता -तं, आदिष्टः -ष्टा -ष्टं.—(Invited) निमन्त्रितः -ता -तं, केतितः -ता -तं, आहूतः -ता -तं.

BIDDER, *s.* क्रेता *m.* (तृ), क्रायकः, मूल्यदित्सुः *m.*, प्रकाशक्रयसमये अमुकमूल्यं दित्सामीति or दास्यामीति ख्यापयति यो जनः.

BIDDING, *s.* (Command) आज्ञा, प्रेरणं, आदेशः, निर्देशः, शासनं.—(Offer of a price) मूल्यदित्साख्यापनं, अमुकमूल्यं दित्सामीति ख्यापनं, मूल्यदित्सा.

To BIDE, *v. a.* and *n.* (To remain) स्था (c. 1. तिष्ठति -ते, स्थातुं), वृत् (c. 1. वर्त्तते, वर्त्तितुं), वस् (c. 1. वसति, वस्तुं).—(To expect) प्रतीक्ष् (c. 1. -ईक्षते -ईक्षितुं), उदृश् (c. 1. -पश्यति -द्रष्टुं).—(To endure) सह् (c. 1. सहते, सोढुं), मृष् (c. 4. मृष्यति, मर्षितुं).

BIDENTAL, *a.* द्विदन् -दती -दत् (त्), द्विदन्तः -न्ती -न्तं, द्विरदः -दा -दं.

BIENNIAL, *a.* द्वैवर्षिकः -की -कं, द्विवर्षः -र्षी -र्षं, द्विवर्षीयः -या -यं, द्विवर्षमात्रस्थायी -यिनी -यि (न्), वत्सरद्वयमात्रजीवी *m.* (न्).

BIER, *s.* शिबिका, शववाहनं, शवयानं, कटः, खट्टिः *m.*, खाटः, वारुठः, प्रेतवाहनसाधनं खट्वादि.

BIESTING, *s.* पेयूषः -षं, पीयूषः -षं, प्रसवानन्तरं प्रथमगोदुग्धं.

BIFID, BIFIDATED, *a.* द्विखण्डीकृतः -ता -तं, द्वैधीकृतः -ता -तं.

BIFOLD, *a.* द्विगुणः -णा -णं, द्वैधः -धी -धं, द्विःप्रकारः -रा -रं.

BIFORMED, *a.* द्विरूपः -पा -पी -पं, द्विमूर्त्तिमान् -मती -मत् (त्).

BIFURCATED, *s.* द्व्यग्रः -ग्रा -ग्रं, अग्रद्वयविशिष्टः -ष्टा -ष्टं.

BIG, *a.* स्थूलः -ला -लं, वृहन् -हती -हत् (त्), विपुलः -ला -लं.—(Big-bodied) वृहत्कायः -या -यं, महाकायः -या -यं, महाङ्गः -ङ्गी -ङ्गं.—(A *pregnant* woman) गर्भिणी, *गर्भवती*.—(*Bombastic*) गर्हितः -ता -तं.—(Teeming with) सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, आकीर्णः -र्णा -र्णं, पूर्णः -र्णा -र्णं.—(As big as) परिमाण or परिमित, or मात्र affixed; as, 'as big as an egg,' अण्डपरिमाणः -णा -णं; 'as big as a grain of mustard,' सर्षपपरिमितः -ता -तं; 'as big as a man,' पुरुषमात्रः -त्रा -त्रं.

BIGAMIST, *s.* द्विभार्य्यः, द्विपत्नीस्वामी *m.* (न्), एककाले विवाहद्वयकर्त्ता *m.* (र्त्तृ).

BIGAMY, *s.* एककाले द्विविवाहकरणं, द्विपत्नीधारित्वं.

BIG-BELLIED, *a.* वृषूदरः -रा -रं, स्थूलोदरः -रा -रं, लम्बोदरः -रा -रं, वृहत्कुक्षिः -क्षिः -क्षि, पिचण्डिलः -ला -लं, वृद्धनाभिः -भिः -भि, तुन्दवान् -वती -वत् (त्).

BIG-BONED, *a.* वृहदस्थिमान् -मती -मत् (त्), वृहदङ्गः -ङ्गी -ङ्गं.

BIGGIN, *s.* बालकयोग्यं शिरोवेष्टनं, बालशिरस्कं.—(A pot) पात्रं, आधारः.

BIGNESS, *s.* स्थूलता, स्थौल्यं, वृहत्त्वं, विपुलता.—(Size, comparative bulk) परिमाणं; 'of the bigness of an egg,' अण्डपरिमाणः -णा -णं.

BIGNONIA, *s.* पाटलिः *m. f.* -ला, अमोघा, काचस्थाली, फलेरुहा, कुबेराक्षी.

BIGOT, *s.* स्वमतधारणे व्यग्रः, विचारणां विना or अविचार्य्य पक्षपाती *m.* (न्), निर्बन्धशीलः, व्यग्रचित्तः.

BIGOTED, *a.* अविचार्य्य स्वमते स्थितः -ता -तं, स्वमतधारणे व्यग्रः -ग्रा -ग्रं, स्वमतेनिष्ठितः -ता -तं, साचीकृतः -ता -तं, स्वमतरक्षी -क्षिणी -क्षि (न्).

BIGOTRY, *s.* विचारणां विना स्वमते व्यवस्थितिः *f.* or अभिनिवेशः or अतिनिर्बन्धः, साचीकृतं.

BIG-SWOLN, *a.* अतिस्फीतः -ता -तं, उच्छूनः -ना -नं, प्रवृद्धः -द्धा -द्धं.

BIG-UDDERED, *a.* पीनोधी *f.*, पीवरस्तनी *f.*, पीनस्तनधारिणी *f.*

BILBO, *s.* कृपाणः, खड्गः, निस्त्रिंशः, असिः *m.*

BILE, *s.* पित्तं, मायुः *m.*, भाजकं, पलाग्निः *m.*

BILE, *s.* (A boil) स्फोटः, स्फोटकः, विस्फोटः.

To BILGE, *v. n.* (To spring a leak) नौकातले or नौकापार्श्वे दारुस्फोटनप्रयुक्तं जलं गृहीत्वा मज्ज् (c. 6. मज्जति, मज्जितुं).

BILIARY, *a.* पैत्तः -त्ती -त्तं, पित्तसम्बन्धी -न्धिनी -न्धि (न्).

BILINGUOUS, *a.* द्विजिह्वः -ह्वा -ह्वं, द्विभाषावादी -दिनी -दि (न्).

BILIOUS, *a.* पित्तलः -ला -लं, पैत्तः -त्ती -त्तं, पैत्तिकः -की -कं.

To BILK, *v. a.* वञ्च् in caus. (वञ्चयति -ते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्.

BILL, *s.* (Beak of a bird) चञ्चुः *f.*, तुण्डः, तुण्डिः *m.*, मुखः.—(A kind of hatchet) दात्रं, लवित्रः.—(An act of parliament) व्यवस्था.—(A written paper of any kind) पत्रं, लेखः -खा, लेख्यं.—(An account of money) विक्रयपत्रं.—(An advertisement) घोषणापत्रं.—(In law) भाषापादं, पूर्व्वपक्षपादः, अभियोगपत्रं.

To BILL, *v. n.* (To kiss, embrace) चुम्ब् (c. 1. चुम्बति, चुम्बितुं), निंस् (c. 2. निंस्ते, निंसितुं), आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), परिरिंसां कृ.

BILLET, *s.* (A note) पत्रं, लेखः, लेख्यं.—(A ticket) निदर्शनपत्रं, चिह्नं.—(A log of wood) काष्ठखण्डं, काष्ठं.

To BILLET, *v. a.* निदर्शनपत्रेण सैन्यानाम् आवासस्थानं प्रकॢप् (c. 10. -कल्पयति -यितुं); सैन्यान् वस् in caus. (वासयति -यितुं).

BILLIARDS, *s. pl.* इदानीन्तनजनैः सेविता गुलिकाक्रीडा.

BILLION, *s.* खर्व्वः.—(A million millions) नियुतनियुतानि, शङ्कः.

BILLOW, *s.* ऊर्म्मिः *m. f.*, महोर्म्मिः *m. f.*, भङ्गः, तरङ्गः, उच्छोलः, पयोराशिः *f.*, वारिराशिः *f.*, कल्लोल, अर्णवः.

To BILLOW, *v. n.* तरङ्ग (nom. तरङ्गायते), तरङ्गरूपेण प्लवद् (c. 1. -लवति -लोठितुं), महावेलया प्रवृध् (c. 1. -वर्धते -वर्धितुं).

BILLOW-BEATEN, *a.* तरङ्गोच्छान्तः -न्ता -न्तं, तरङ्गक्षिप्तः -प्ता -प्तं, उत्तरङ्गः -ङ्गा -ङ्गं.

BILLOWY, *a.* ऊर्म्मिमान् -मती -मत् (द्), तरङ्गितः -ता -तं, महावेलः -ला -लं, महातरङ्गः -ङ्गा -ङ्गं, प्रलोठितः -ता -तं.

BILL-STICKER, *s.* घोषणापत्राणि राजमार्गादिषु जनसङ्कीर्णस्थानेषु स्थापयति यः.

BIN, *s.* धान्यकोष्ठकं, कुशूलः, पिटः.

BINARY, *a.* द्वैधः -धी -धं, द्विगुणः -णा -णं.

To BIND, *v. a.* (To tie) बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, योक्त्र (nom. योक्त्रयति -यितुं), यन्त्र् (c. 10. यन्त्रयति -यितुं), संयम् (c. 1. -यच्छति -यन्तुं). —(To fasten to any thing, fasten on) आबन्ध्, अनुबन्ध्, आकच् (c. 1. -कचते -कचितुं), पिनद्धं -द्धां -द्धं कृ.—(To tie together) सबन्ध्, संश्लिष् in caus. (-श्लेषयति -यितुं), ग्रन्थ् (c. 9. ग्रथ्नाति, ग्रथितुं or caus. ग्रन्थयति -यितुं), संहृ (c. 1. -हरति -हर्त्तुं).—(To unite) संयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं or caus. -योजयति -यितुं).—(To connect closely) सबन्ध्, संश्लिष् in caus.; 'my life is bound up in his,' मम प्राणा अस्य प्राणैर् बद्धाः सन्ति.—(To constrain, compel) धृ (c. 1. धरति, धर्त्तुं).—(To bind one's self by a promise) प्रतिज्ञा (c. 9. -जानीते -ज्ञातुं), सम्प्रतिज्ञा; 'to bind one's self over to appear,' दर्शनप्रातिभाव्यं दा.—(To be bound, obliged) expressed by the fut. pass. part.; as, 'he is bound to marry the damsel,' तेन कन्या वोढव्या, or by the root अर्ह्, as, कन्यां वोढुम् अर्हति.—(To bind books) ग्रन्थपत्राणि चर्म्मादिना छादयित्वा सबन्ध्.—(To make costive) आनद्धं -द्धां -द्धं कृ, निबद्धं -द्धां -द्धं कृ. —(To secure with bandages) अनुवेष्टितं कृ, क्षतानि बन्ध्.

BINDER, *s.* ग्रन्थपत्राणि चर्म्मादिना सबन्धा *m.* (न्धृ).

BINDING, *s.* (A bandage) बन्धनं, दाम *n.* (न्), उद्दानं, पट्टः.—(Of a book) ग्रन्थपत्राच्छादनं.

BINDWEED, *s.* क्षीरविदारी, महाश्वेता, विदारी, इक्षुगन्धा, वृक्षगन्धिका, क्रोष्ट्री, श्यामा.

BINOCULAR, *a.* द्विनयनः -नी -नं, द्विनेत्रः -त्रा -त्रं, चक्षुर्द्वयविशिष्टः -ष्टा -ष्टं.

BINOMIAL, *a.* (In algebra) द्विपदः -दा -दं.

BIOGRAPHER, *s.* शिष्टसमाचाररचकः, शिष्टजनचरित्ररचकः, मृतजनचरित्रनिबन्धा *m.* (न्धृ).

BIOGRAPHICAL, *a.* शिष्टसमाचारसम्बन्धकः -का -कं, शिष्टजनचरित्रविषयः -या -यं.

BIOGRAPHY, *s.* (The act of writing it) शिष्टजनचरित्ररचना, शिष्टसमाचाररचना.—(The book) शिष्टजनचरित्रग्रन्थः, शिष्टसमाचारः.

BIPARTITE, *a.* द्वैधः -धी -धं, द्वैधीकृतः -ता -तं.

BIPARTITION, *s.* द्वैधीकरणं, द्विधाकरणं, द्वैधीभावः.

BIPED, *a.* द्विपादः -दा -दं, द्विपदः -दा -दं, द्विपाद् -पदी -पत्.

BIPEDAL, *a.* द्विपादपरिमाणः -णा -णं, द्विपादवान् -वती -वत् (त्).

BIPENNATED, *a.* द्विपक्षः -क्षा -क्षं, पक्षद्वयविशिष्टः -ष्टा -ष्टं.

BIRCH or BIRCH-TREE, *s.* भूर्ज्जः, भूर्ज्जपत्रः, कवचपत्रं, चर्म्मी *m.* (न्), मृदुच्छदः, मृदुत्वचः, विप्रा, शृङ्गी, महौषधं, अरुणा, प्रतिविषा.

BIRCHEN, *a.* भूर्ज्जमयः -यी -यं, भूर्ज्जनिर्म्मितः -ता -तं.

BIRD, *s.* पक्षी *m.* (न्), पक्षिणी *f.*, खगः, विहगः, विहङ्गः -ङ्गमः, पतगः, पत्री *m.* (न्), पतत्री *m.* (न्), विहायाः *m.* (स्), गरुत्मान् *m.* (त्), नीडजः, नीडोद्भवः, द्विजः, अण्डजः, नगौकाः *m.* (स्), पक्षवाहनः, शकुनिः *m.* -नः, विकिरः, विष्किरः, वाजी *m.* (न्), पतन् *m.* (त्), शकुनः, नभसङ्गमः, पत्ररथः, विः *m.*, वी, पिप्तन् *m.* (त्).

To BIRD, *v. n.* (To catch birds) पक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or धृ (c. 1. धरति, धर्त्तुं), or बन्ध् (c. 9. बध्नाति, बन्द्धुं), शकुन (nom. शकुनयति -यितुं).

BIRDCAGE, *s.* पञ्जरं, पिञ्जरं, वीतंसः, कुलायिका, पक्षिशाला, शालारं.

BIRDCALL, *s.* पक्षिप्रलोभनार्थं शाकुनिकैर् वादितं पक्षिरावानुकारिणी वंशी.

BIRD-CATCHER, *s.* शाकुनिकः, व्याधः, जालिकः, जीवान्तकः, वागुरिकः.

BIRD-FANCIER, *s.* पक्षिपोषकः, पक्षिपालकः, पक्षिप्रियः.

BIRDING, *s.* (Catching birds) पक्षिग्रहणं, पक्षिबन्धनं, श्येनम्याता.

BIRDLIKE, *a.* पक्षिसन्निभः -भा -भं, पक्षिसदृशः -शी -शं, पक्षिनिभः -भा -भं.

BIRDLIME, *s.* अतिश्यानम् उदपेषं येन लिप्तासु तरुशाखासु पक्षिणो बध्यन्ते.

BIRD'S-EYE-VIEW, *s.* यादृशं दीयमानेन पक्षिणा क्रियते तादृशं दर्शनं, उच्चैःस्थानाद् अवलोकनं.

BIRD'S-NEST, *s.* नीडः -डं, कुलायः, पक्षिशाला.

BIRTH, *s.* जन्म *n.* (न्), जातिः *f.*, जनिः *f.*, जननं, जनिमा *m.* (न्), उत्पत्तिः *f.*, उद्भवः, सम्भवः, भवः, जनुः *n.* (स्).—(The act of bringing forth) प्रसवनं, प्रसवः, उत्पादनं, प्रसूतिः *f.*—(Extraction, lineage) वंशः, कुलं, अन्वयः, जातिः *f.*—(Rise, origin) योनिः *m. f.*, मूलं, उद्भवः. —(Rank, high birth) कुलीनता, कौलीनं; 'of good birth,' कुलीनः -ना -नं, कुलजः -जा -जं, कौलेयः -यी -यं, सुजन्मा -न्मा -न्म (न्), महाकुलप्रसूतः -ता -तं, महाकुलः -ला -लं; 'pride of birth,' कुलाभिमानं; 'blind from birth,' जन्मान्धः -न्धा -न्धं, जात्यन्धः -न्धा -न्धं.—(To give birth to) सु (c. 1. सवति, c. 2. सौति, सोतुं), प्रसु, जन् in caus. (जनयति -यितुं), सञ्जन्.

BIRTHDAY, *s.* जन्मदिनोत्सवः, जन्मदिवसः, जन्मतिथिः *m.*, जन्मदिनं.

BIRTHPLACE, *s.* जन्मभूमिः *f.*, जन्मस्थानं, जन्मदेशः.

BIRTHRIGHT, *s.* ज्येष्ठत्वं, ज्यैष्ठ्यं, ज्येष्ठाधिकारः, ज्येष्ठभागः, पैतृकं.

BISCUIT, *s.* पिष्टकः, पूपः, अपूपः, सुकान्दवो गोधूमादिचूर्णमयः पिष्टकः.

To BISECT, *v. a.* द्वैधीकृ, द्विभागीकृ, द्विखण्डीकृ, द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं) or कृत् (c. 6. कृन्तति, कर्त्तितुं).

BISECTED, *p. p.* द्वैधीकृतः -ता -तं, द्विखण्डीकृतः -ता -तं, द्विधा छिन्नः -न्ना -न्नं.

BISECTION, *s.* द्विधाकरणं, द्वैधीकरणं.

BISHOP, *s.* धर्म्माधिपतिः *m.*, धर्म्माध्यक्षः.

BISHOP, *s.* (A beverage) मद्यनागरङ्गरसादिनिर्म्मितं पानीयं.

BISHOPRIC, *s.* धर्म्माधिपतिपदं, धर्म्माध्यक्षाधिकारः.

BISMUTH, *s.* अतिदृढः शुक्लवर्णो विदेशीयधातुप्रभेदः.

BISON, *s.* अरण्यवृषभप्रभेदः.

BISSEXTILE, *s.* चतुर्थः संवत्सरो यस्मिन् अधिदिवसो निवेश्यते.

BIT, *s.* (Part of a bridle) खलीनः, कविका -कं, वल्गा, मुखयन्त्रणं, लङ्गनी.—(A piece) खण्डं, भागः, भित्तं, भित्तं, भित्तिः *f.*; 'in bits,' खण्डशस्, भागशस्, खण्डं खण्डं.—(A mouthful, morsel) पिण्डः -ण्डं, ग्रासः; 'a tit bit,' स्वाद्वन्नं, भोजनविशेषः; 'not a bit,' न मनागपि, न किञ्चिदपि, न सूक्ष्मम्पि; 'a bit bigger,' किञ्चित्स्थूलतरं.

To BIT, *v. a.* खलीन (nom. खलीनयति -यितुं), अश्वमुखं खलीनेन यन्त्र् (c. 10. यन्त्रयति -यितुं).

BITCH, *s.* शुनी, कुक्कुरी, सरमा, कुलाक्षुता.—(A name of reproach) बन्धकी.

To BITE, *v. a.* दंश् (c. 1. दशति, दंष्टुं), विदंश्; 'to bite the lips,' दशनच्छदं or दन्तान् सन्दंश्.—(To gnaw) चर्व् (c. 1. चर्वति, चर्वितुं); 'to bite the nails,' नखान् खाद् (c. 1. खादति, खादितुं).—(To pain by cold) शीतार्त्तं -र्त्तां -र्त्तं कृ.—(To rail at) अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(To vex) पीड् (c. 10. पीडयति -यितुं).—(To defraud) वञ्च् (c. 10. वञ्चयति -ते -यितुं).

BITE, *s.* दंशः, दंशनं, दन्ताघातः; 'the mark of the teeth,' दशनाङ्कः.

BITER, *s.* दंशकः, खादिता *m.* (तृ), दंष्टा *m.* (ष्टृ), वञ्चकः.

BITING, *a.* दंशकः -का -कं, दंशेः -रा -रं, पीडाकरः -रा -रं.

BITTEN, *p. p.* दष्टः -ष्टा -ष्टं, सन्दष्टः -ष्टा -ष्टं, दंशितः -ता -तं.

BITTER, *a.* तिक्तः -क्ता -क्तं, तिक्तस्वादः -दा -दं, तिक्तरसः -सा -सं.—(Pungent) कटुः -टुः -टुः -टु, तीक्ष्णः -क्ष्णा -क्ष्णं, तिग्मः -ग्मा -ग्मं.—(Grievous) उग्रः -ग्रा -ग्रं, आतयिकः -की -कं.—(Cruel, severe) कठोरः -रा -रं, निष्ठुरः -रा -रं, पीडाकरः -रा -रं.—(Malicious) मत्सरः -रा -रं, पिशुनः -ना -नं.

BITTERGOURD, *s.* इन्द्रवारुणिका, अरुणा.

BITTERLY, *adv.* उग्रं, निष्ठुरं, उग्रतया; 'one who grieves bitterly,' उग्रशोकः -का -कं.

BITTERN, *s.* क्रौञ्चजातीयः पक्षिभेदः, क्रौञ्चः, क्रुडः, कलिकः.

BITTERNESS, *s.* तिक्तः, तिक्तत्वं, तिक्तरसः.—(Pungency) कटुता, तिग्मता, तीक्ष्णता.—(Malice) असूया, मात्सर्य्यं.—(Severity) उग्रत्वं -ता, निष्ठुरता, कठोरता.—(Sorrow) शोकः, उग्रशोकः, दुःखं.

BITUMEN, *s.* शिलाजतु *n.*, अश्मजतुकं, शिलादद्रु *m.*, गिरिपुष्पकं, शैलं, शैलनिर्य्यासः.

BITUMINOUS, *a.* शिलाजतुमयः -यी -यं, शिलाजतुगुणविशिष्टः -ष्टा -ष्टं.

BIVALVE, *a.* द्विकपाटः -टा -टं, द्विकोषः -षा -षं.—(Bivalve shell) कम्बुः *m.*, शम्बुः *m.*, शम्बुकः -का, जलशुक्तिः *f.*, पङ्कमण्डुकः.

BIVOUAC, *s.* (A guard at night) वीरासनं.

To BLAB, *v. n.* and *a.* रहस्यं प्रकाश् in caus. (-काशयति -यितुं), रहस्यभेदं कृ.

BLAB, BLABBER, *s.* रहस्यभेदकः, रहस्यप्रकाशकः, वाचालः, वावदूकः, जल्पकः.

BLABBER-LIPPED, *a.* स्थूलोष्ठः -ष्ठा -ष्ठं, लम्बोष्ठः -ष्ठा -ष्ठं.

BLACK, *a.* कृष्णः -ष्णा -ष्णं, श्यामः -मा -मं, -मलः -ला -लं, कालः -ला -लं, कालकः -का -कं, काणीः -णी -णीं, असितः -ता -तं, नीलः -ला -लं, मेचकः -का -कं, श्यामः -मा -मं.—(Dark) तमस्वी -स्विनी -स्वि (न्), तिमिरः -रा -रं, अन्धकारयुक्तः -क्ता -क्तं, निष्प्रभः -भा -भं.—(Horrible) घोरः -रा -रं, दारुणः -णा -णं.—(Cloudy of countenance) म्लानवदनः -ना -नं.—(Black with crime) कृष्णकर्म्मा -र्म्मी -र्म्म (न्).—(White and black) सितासितः -ता -तं.

BLACK, *s.* (The colour) कृष्णः, कृष्णवर्णः.—(A blackamoor) कृष्णदेहः, श्यामाङ्गः; 'black clothes,' नीलवस्त्रं, नीलाम्बरं; 'clothed in black,' नीलवस्त्रः -स्त्रा -स्त्रं, नीलाम्बरः -रा -रं, श्यामवस्त्रः -स्त्रा -स्त्रं.—(Lamp-black) दीपकिट्टं, कज्जलं.

To BLACK, *v. a.* कृष्ण (nom. कृष्णायते -यितुं), कृष्णीकृ.

BLACKAMOOR, *s.* श्यामाङ्गः, श्यामदेहः, कृष्णदेहः, कृष्णाङ्गः.

BLACKBERRY, *s.* कृष्णवर्णी कण्टकगुल्मफलं, शृगालकण्टकफलं.

BLACKBEETLE, *s.* भ्रमरः, भृङ्गः, अलिः *m.*

BLACKBIRD, *s.* कृष्णवर्णो मधुरशब्दविशिष्टः पक्षिप्रभेदः.

To BLACKEN, *v. a.* कृष्णीकृ, कृष्ण (nom. कृष्णायते -यितुं), श्याम (nom. श्यामयति -यितुं), श्यामीकृ.—(To darken) तिमिर (nom. तिमिरयति -यितुं).

To BLACKEN, *v. n.* श्याम (nom. श्यामायते), नील (nom. नीलायते).

BLACKENED, *p. p.* कृष्णीकृतः -ता -तं, श्यामितः -ता -तं, कृष्णीभूतः -ता -तं, तमोवृतः -ता -तं, तमोभूतः -ता -तं, सन्तमसः -सा -सं.

BLACKEYED, *a.* असितनयनः -नी -नं, कृष्णनयनः -नी -नं, नीलाक्षः -क्षी -क्षं.

BLACKGUARD, *s.* अधमाचारः, दुर्वृत्तः, दुराचारः, कृष्णकर्म्मा *m.* (न्), दुष्टः.

BLACKING, *s.* पादुकाञ्जनं, मसिः *f.*—सी, कालौ.

BLACKISH, *a.* ईषत्कृष्णः -ष्णा -ष्णं, ईषत्कालः -ला -लं. आकालः -ला -लं.

BLACKLEAD, *s.* सीसकप्रभेदो येन तूलिकायां निवेशितेन कृष्णरेखा क्रियते.

BLACKLY, *adv.* कृष्णवर्णेन, कृष्णं, दारुणं, अतिदुष्टतया.

BLACK-MOUTHED, *a.* दुर्मुखः -खी -खं, मुखरः -रा -रं, वाग्दुष्टः -ष्टा -ष्टं.

BLACKNESS, *s.* कृष्णता -त्वं, कृष्णिमा *m.* (न्), कालिमा *m.* (न्), श्यामत्वं, नीलिमा *m.* (न्).—(Darkness) तमः *n.* (स्), तमिस्रं, तिमिरं, अन्धकारः.—(Horribleness) घोरता, दारुणता.—(Atrocity) अतिदुष्टता.

BLACKPUDDING, *s.* अधुनातनजनखादितम् असृग्धान्यादिपूरितं शूकरपुरीतत्.

BLACKSMITH, *s.* लोहकारः, ध्माकारः, कर्म्मकारः, अयस्कारः, कर्म्मारः, व्योकारः.

BLADDER, *s.* वस्तिः *m. f.* मूत्राशयः, तिलकं, क्लोम *n.* (न्), क्लोमं.

BLADE, *s.* (The sharp part of a weapon) फलं, पत्रं, फलकः -कं, धारा, परश्वः, पुष्करं; 'the blade of a sword,' असिपत्रं.—(Spire of grass) काण्डं, दलः -लं, अङ्कुरः, तृणदलं, तृणकाण्डं, किसलः, कुशः.—(Of the shoulder) अंशः, स्कन्धास्थि *n.*, भुजशिरः *n.* (स्).

BLADED, *a.* काण्डवान् -वती -वत् (त्), मञ्जरितः -ता -तं, दलवान् -वती -वत् (त्).

BLAIN, *s.* विस्फोटः, स्फोटः, स्फोटकः, व्रणं, वटी, वरटी.

BLAMABLE, *a.* निन्दनीयः -या -यं, निन्द्यः -न्द्या -न्द्यं, निन्दार्हः -र्हा -र्हं, दोषी -षिणी -षि (न्), अपराधी -धिनी -धि (न्), अपराद्धः -द्धा -द्धं, सापराधः -धा -धं, गर्हितः -ता -तं, दूष्यः -ष्या -ष्यं, गर्ह्यः -र्ह्या -र्ह्यं, वाच्यः -च्या -च्यं.

BLAMABLENESS, *s.* निन्द्यता, निन्दार्हत्वं, अपराधिता -त्वं, दोषित्वं.

BLAMABLY, *adv.* सापराधं, अपराधेन, निन्द्यप्रकारेण, यथा दोषो जायते तथा.

To BLAME, *v. a.* (To lay the blame) दोषम् आरुह् in caus. (-रोपयति -यितुं), दोषीकृ.—(To censure) निन्द् (c. 1. निन्दति, निन्दितुं), प्रणिन्द्, प्रतिनिन्द्, विनिन्द्; तिरस्कृ; कुत्स् (c. 10. कुत्सयति -ते -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), उपालभ् (c. 1. -लभते -लब्धुं), गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयते -यितुं), विगर्ह्, परिगर्ह्; 'he casts the blame on him,' तस्मिन् दोषं क्षिपति.

BLAME, *s.* (Censure) निन्दा, परीवादः, अपवादः, आक्षेपः, घृणा, तिरस्कारः, गर्हा, परिभाषणं, जुगुप्सा, कलङ्कः, कुत्सा, निवादः, अवर्णः, उपालम्भः, उपक्रोशः.—(Fault) दोषः, अपराधः, वचनीयता, वाच्यता —(Imputation of a fault) दोषारोपः; 'I am not to blame,' नाहम् अपराद्धः, or सापराधः, or निन्दार्हः.

BLAMED, *p. p.* निन्दितः -ता -तं, जुगुप्सितः -ता -तं, गर्हितः -ता -तं, तिरस्कृतः -ता -तं, धिक्कृतः -ता -तं, उपालब्धः -ब्धा -ब्धं, अवरीणः -णा -णं.

BLAMELESS, *a.* निर्दोषः -षा -षं, निरपराधः -धा -धं, अनिन्द्यः -न्द्या -न्द्यं, अनिन्दितः -ता -तं, अनेनाः -नाः -नः (स्), अविगर्हितः -ता -तं, अनघः -घा -घं.

BLAMELESSLY, *adv.* अपराधं विना, दोषव्यतिरेकेण, निरपराधं, अनघं, अनिन्द्यप्रकारेण.

BLAMELESSNESS, *s.* अनिन्द्यता, निर्दोषता, निरपराधता, शुद्धत्वं.

BLAMER, *s.* निन्दकः, दोषारोपकः, परिवादकः, निन्दाकर्त्ता *m.* (र्तृ), कलङ्ककरः.

BLAMEWORTHY, *a.* निन्दार्हः -र्हा -र्हं, निन्दनीयः -या -यं.

To BLANCH, *v. a.* (To whiten) शुक्लीकृ, धवलीकृ.—(To peel such things as have husks) निस्तुष (nom. -तुषयति -यितुं), तुषीकृ, त्वच् (nom. त्वचयति -यितुं), त्वचं निष्कृष् (c. 1. -कर्षति -क्रष्टुं), त्वक्परिपुटनं कृ.

BLAND, *a.* मृदुः -दुः -दुः -दु, स्निग्धः -ग्धा -ग्धं, मसृणः -णा -णं, मेदुरः -रा -रं, चिक्कणः -णा -णं, कोमलः -ला -लं, सोमालः -ला -लं.—(In speech) प्रियम्वदः -दा -दं.

BLANDATION, *s.* चाटूक्तिः *f.*, चाटुकारः, कोमलत्वं.

To BLANDISH, *v. a.* (To caress, flatter) शान्त्व् or भान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, प्रियं वद् (c. 1. वदति, वदितुं).

BLANDISHMENT, *s.* (Gesture of love) ललितं, हावः, विलासः, विभ्रमः —(Soft words) प्रियवाक्यं, चाटूक्तिः *f.*, चाटुः *m.*

BLANK, *a.* (Empty, not written upon) शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं, लेखाशून्यः -न्या -न्यं, अलिखितः -ता -तं.—(White) शुक्लः -क्ला -क्लं.—(Pale, depressed) पाण्डुः -ण्डुः -ण्डु, विवर्णवदनः -ना -नं, म्लानवदनः -ना -नं, विषण्णः -ण्णा -ण्णं.—(Confused) विस्मितः -ता -तं, विलक्षः -क्षा -क्षं, आकुलः -ला -लं.—(Without rhyme) अनुप्रासहीनः -ना -नं, अमित्राक्षरः -रा -रं, यमकहीनः -ना -नं, छन्दोरहितः -ता -तं.

BLANK, *s.* (A void space) शून्यं, रिक्तं, शून्यत्वं -ता, रिक्तता, शून्यस्थानं.—(A paper without writing) लेखाशून्यं पत्रं,—(In a lottery) माङ्गल्यरहिता or लाभरहिता गुटिका, दौर्भाग्यं.

To BLANK, *v. a.* शून्यीकृ, म्लानीकृ, आकुलीकृ, विस्मयाकुलं -लां -लं कृ.

BLANKET, *s.* कम्बलः, रङ्कः, ऊर्णायुः *m.*, सहस्रलोम *n.* (न्), मेषकम्बलः, साशूकः, कुतपः.—(Covered with a blanket) कम्बलः -ली -लं, कम्बलाच्छादितः -ता -तं.

To BLANKET, *v. a.* कम्बलेन आच्छद् (c. 10. -छादयति -यितुं).

To BLASPHEME, *v. a.* परमेश्वरं निन्द् (c. 1. निन्दति, निन्दितुं) or अवमन् (c. 4. -मन्यते -मन्तुं) or अभिशप् (c. 1. -शपति -शप्तुं) or आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), ईश्वरनिन्दां कृ, पाषण्डीयकथां कथ् (c. 10. कथयति -यितुं).

BLASPHEMER, *s.* ईश्वरनिन्दकः, ईश्वराभिशापकः, ईश्वरावमानकृत्, पाषण्डः, गर्ह्यवादी *m.* (न्).

BLASPHEMOUS, *a.* ईश्वरनिन्दकः -का -कं, ईश्वरावमानकरः -री -रं, पाषण्डीयः -या -यं.

BLASPHEMOUSLY, *adv.* ईश्वरनिन्दापूर्व्वकं, ईश्वरनिन्दाक्रमेण, पाषण्डवत्.

BLASPHEMY, *s.* ईश्वरनिन्दा, ईश्वरावमानं, ईश्वराभिशापः, देवनिन्दा, पाषण्डता.

BLAST, *s.* (A gust of wind) वातः, वायुवेगः, वायुगुल्मः, वातरूपः, निर्घातः, प्रभञ्जनः, व्योममुद्गरः.—(Puff) श्वासः.—(Of a horn) शृङ्ग्मानं.—(Blight) विनाशः, व्याघातः, क्षयः.

To BLAST, *v. a.* (To ruin, destroy) विनश् in caus. (-नाशयति -यितुं), क्षि in caus. (क्षययति -यितुं), विहन् (c. 2. -हन्ति -हन्तुं).—(To make to wither) मृ in caus. (मारयति -यितुं), म्लानीकृ, विशृ in caus. (-शारयति -यितुं).

BLASTED, *p. p.* विनाशितः -ता -तं, मारितः -ता -तं, परिम्लानः -ना -नं, विशीर्णः -र्णा -र्णं.—(By lightning) विद्युद्धतः -ता -तं.

BLASTER, *s.* विनाशकः, मारकः, नाशयिता *m.* (तृ), विधाती *m.* (न्), विशारणकृत्.

BLAZE, *s.* ज्वालः -ला, ज्वलः, ज्वलका, ज्वालाग्निः *m.*, उल्का; 'a blaze of light,' रश्मिजालं, अंशुजालं.—(Publication) प्रकाशनं, प्रकटीकरणं, प्रचारणं.

To BLAZE, *v. n.* ज्वल् (c. 1. ज्वलति, ज्वलितुं), प्रज्वल्, सम्प्रज्वल्, or in freq. (जाज्वल्यते), दीप् (c. 4. दीप्यते, दीपितुं), आदीप्, प्रदीप् or in freq. (देदीप्यते).

To BLAZE ABROAD, *v. a.* प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रचर् in caus. (-चारयति -यितुं), विघुष् (c. 10. -घोषयति -यितुं), विख्या in caus. (-ख्यापयति -यितुं), प्रकटीकृ.

BLAZING, *a.* ज्वाली -लिनी -लि (न्), ज्वालः -ली -लं, ज्वालन् -लनी -लत् (न्), उज्ज्वलः -ला -लं, जाज्वल्यमानः -ना -नं, ज्वलितः -ता -तं. प्रज्वलितः -ता -तं, उच्छिखः -खा -खं, प्रदीप्तः -प्ता -प्तं.

To BLAZON, *v. a.* (To draw coats of arms) कुलीनपदचिह्नानि लिख् (c. 6. लिखति, लेखितुं).—(To explain coats of arms) चित्रगतानि कुलीनपदचिह्नानि व्याख्या (c. 2. -ख्याति -ख्यातुं).—(To deck) भूष् (c. 10. भूषयति -यितुं), परिभूष्, परिष्कृ.—(To celebrate) प्रख्या, विख्या.—(To display, publish) प्रकाश् in caus. (-काशयति -यितुं), प्रचर् in caus. (-चारयति -यितुं).

To BLEACH, *v. a.* धाव् (c. 1. धावति, धावितुं, c. 10. धावयति -यितुं), वस्त्राणि वायुव्याप्यानि कृत्वा शुक्लीकृ or धवलीकृ or निर्णिज् (c. 3. -नेनेक्ति -नेक्तुं).

To BLEACH, *v. n.* वायुव्यापकत्वाद् धवलीभू or शुक्लीभू.

BLEACHED, *p. p.* धौतः -ता -तं, धवलितः -ता -तं, शुक्लीकृतः -ता -तं, धवलीकृतः -ता -तं, धवलीभूतः -ता -तं, वीतरागः -गा -गं; 'bleached silk,' धौतकौशेयं, पत्रोर्णं; 'a pair of bleached clothes,' उन्नमनीयं.

BLEACHER, *s.* धावकः, वस्त्रधावकः, वस्त्रनिर्णेजकः.

BLEAK, *a.* (Cold) शीतलः -ला -लं, शिशिरः -रा -रं, हिमः -मा -मं, हैमनः -नी -नं, -निकः -की -कं, हिमशीतलः -ला -लं.—(Exposed to the weather) अभावकाशिकः -की -कं, शीतावकाशिकः -की -कं.—(Cheerless) निरानन्दः -न्दा -न्दं.

BLEAKNESS, *s.* शीतता, शीतलता, शैत्यं, हिमता, शीतावकाशिकत्वं.

To BLEAR, *v. a.* चुल्लीकृ, तिमिर (nom. तिमिरयति -यितुं).

BLEAREDNESS, *s.* (Having blear eyes) चुल्लत्वं, पिल्लत्वं, क्लिन्नाक्षता.

BLEAR-EYED, *a.* क्लिन्नाक्षः -क्षा -क्षं, चुल्लः -ल्ली -ल्लं, पिल्लः -ल्ली -ल्लं.

To BLEAT, *v. n.* उ (c. 1. अवते, ओतुं), मेषरुतं कृ, अविवत् शब्दं कृ.

BLEATING, *s.* मेषरुतं, मेषरावः, मेषशब्दः, उरभ्रनादः.

To BLEED, *v. n.* रक्तं or शोणितं सु (c. 1. सवति, सोतुं), प्रसु or मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्; 'the wound bleeds,' क्षतं शोणितं स्रवति.

To BLEED, *v. a.* रक्तं or शोणितं सु in caus. (स्रावयति -यितुं) or मुच् in caus. (मोचयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं) or अवसिच् (c. 6. -सिञ्चति -सेक्तुं).

BLEEDER, *s.* रक्तस्रावकः, असृक्स्रावी *m.* (न्), रक्तमोचकः, सिराव्यधनकृत्, रक्तावसेचकः.

BLEEDING, *s.* (Venesection) रक्तस्रावः, असृक्स्रावः, रक्तमोक्षणं, असृग्विमोक्षणं, सिरामोक्षः, सिराव्यधः, रक्तावसेचनं.

To BLEMISH, *v. a.* मलिन (nom. मलिनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus. (दूषयति -यितुं), अपयशः कृ, सदोषं -षां -षं कृ.

BLEMISH, *s.* दोषः, कलङ्कः, छिद्रं, कलुषं, अघं, आगः *n.* (स्).—(Loss of reputation) अपयशः *n.* (स्), अख्यातिः *f.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, वाच्यता.—(Without blemish) अनघः -घा -घं, निश्छिद्रः -द्रा -द्रं.

BLEMISHED, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, दोषवान् -वती -वत् (त्), सदोषः -षा -षं, कलुषितः -ता -तं.

To BLENCH, *v. n.* सहसा सङ्कोचं कृ, मील् (c. 1. मीलति, मीलितुं), निमील्.

To BLEND, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, मिश्रीकृ, सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), संयुज् (c. 7. -युनक्ति -योक्तुं), संश्लिष् in caus. -श्लेषयति -यितुं), एकीकृ, एकत्र कृ, व्यतिकरं कृ.—(To be mingled) सङ्कृ in pass. (-कीर्य्यते), मिल् (c. 6. मिलति, मेलितुं), सम्मिल्.

BLENDED, *p. p.* मिश्रितः -ता -तं, मिश्रीकृतः -ता -तं, सम्मिश्रः -श्रा -श्रं, व्यामिश्रः -श्रा -श्रं, सम्पृक्तः -क्ता -क्तं, आश्लिष्टः -ष्टा -ष्टं, सङ्कीर्णः -र्णा -र्णं, मिलितः -ता -तं, एकीकृतः -ता -तं, क्रश्लिष्टः -ता -तं, संसृष्टः -ष्टा -ष्टं, सन्निपतितः -ता -तं, संवलितः -ता -तं.

To BLESS, *v. a.* (To pronounce a blessing) आशिषं दा (c. 3. ददाति, दातुं), or वद् (c. 1. वदति, वदितुं), or गद् (c. 1. गदति, गदितुं), or आशंस् (c. 1. -शंसते -शंसितुं), धन्यवादं कृ, कुशलं वद्.—(To make happy) सुख् (c. 10. सुखयति -यितुं), सुखिनं -खिनीं -खि कृ, धन्यं -न्यां -न्यं कृ, मङ्गलं -लां -लं कृ, कुशलं -लां -लं कृ.—(To glorify, give thanks) कञ्चिद् धन्यं वद्, कस्यचिद् गुणान् वद् or कृत् (c. 10. कीर्त्तयति -यितुं), स्तु (c. 2. स्तौति, स्तोतुं); 'God bless you!' स्वस्ति,

मङ्गलं भूयात्, शुभं भूयात्.

BLESSED, *a.* धन्यः -न्या -न्यं, मङ्गलः -ला -लं, कुशलः -ला -लं, प्राप्तमङ्गलः -ला -लं, कृतमङ्गलः -ला -लं, कल्याणः -णी -णं, क्षेमवान् -वती -वत् (त्), परमसुखभागी -गिनी -गि (न्), सुखी -खिनी -खि (न्).—(In the joys of heaven) प्राप्तस्वर्गः -र्गा -र्गं, सिद्धः -द्धा -द्धं.

BLESSEDNESS, *s.* धन्यत्वं, माङ्गल्यं, कौशल्यं, कल्याणं, परमसुखं, परमानन्दः, सन्नतिः *f.*—(In heaven) सिद्धिः *f.*, स्वर्गगतिः *f.*, परमपदं, परम्पदं, परमागतिः *f.*, अपवर्गः.

BLESSER, *s.* आशीर्वादी *m.* (न्), आशंसिता *m.* (तृ), धन्यवादकृत् *m.*, कुशलवादी *m.* (न्).

BLESSING, *s.* (Benediction) आशीः *f.* (स्), आशीर्वादः, धन्यवादः, आशीर्वचनं, कुशलवादः, कुशलं.—(A benefit received) वरः, हितं, कुशलं, उपकृतं, धन्यत्वं; 'wishing blessing,' आशंसुः -सुः -सु.

BLIGHT, *s.* नाशः, क्षयः, विनाशः, व्याघातः, आघातः, दूषणं, कलङ्कः, विषं.

To BLIGHT, *v. a.* दुष् in caus. (दूषयति -यितुं), नश् in caus. (नाशयति -यितुं), विनश्, क्षि in caus. (क्षययति -यितुं) मृ in caus. (मारयति -यितुं), म्लानीकृ, विशीर्णं -र्णां -र्णं कृ, विफलीकृ.

BLIGHTED, *p. p.* दूषितः -ता -तं, विनाशितः -ता -तं, मारितः -ता -तं.

BLIND, *a.* अन्धः -न्धा -न्धं, अन्धकः -का -कं, अचक्षूः -क्षूः -क्षुः (स्), विचक्षूः -क्षूः -क्षुः (स्), गताक्षः -क्षा -क्षं, अनक्षः -क्षा -क्षं, नेत्रेन्द्रियविकलः -ला -लं, अदृक् *m.* (श्).—(Blind from birth) जात्यन्धः -न्धा -न्धं, जन्मान्धः -न्धा -न्धं.—(Blind of one eye) काणः -णा -णं.—(Hard to find, private) अदृश्यः -श्या -श्यं, निभृतः -ता -तं; 'a blind well,' अन्धकूपः.—(Dark) तमस्वी -स्विनी -स्वि (न्).—(Ignorant) हतज्ञानः -ना -नं, अज्ञः -ज्ञा -ज्ञं, दुर्बुद्धिः -द्धिः -द्धि.

To BLIND, *v. a.* अन्धीकृ, तिमिरीकृ, तिमिर (nom. तिमिरयति -यितुं).

BLIND, *s.* (Screen to hinder the sight) तिरस्करिणी, व्यवधा, -धानं.—(Something to mislead) छद्म *n.* (न्), कपटः, कपटवेशः, छद्मवेशः.

BLINDED, *p. p.* अन्धीकृतः -ता -तं, अन्धीभूतः -ता -तं, तमोवृतः -ता -तं.—(By sin) पापतिमिरः -रा -रं.

To BLINDFOLD, *v. a.* वस्त्रेण नयने or दृशौ बन्ध् (c. 9. बध्नाति, बन्द्धुं), or अवरुध् (c. 7. -रुणद्धि -रोद्धुं), or विरुध्, or आवृ (c. 5. -वृणोति -वरितुं -वरीतुं), वस्त्रेण नयने आछद् (c. 10. -छादयति -यितुं).

BLINDFOLD, *a.* वस्त्रावरुद्धनयनः -नी -नं, अवरुद्धदृष्टिः -ष्टिः -ष्टि, बद्धनेत्रः -त्री -त्रं.

BLINDLY, *adv.* अन्धवत्, अनालोचितं, अविचार्य्य, असमीक्ष्य, अविचिन्त्य, सहसा.

BLIND-MAN'S-BUFF, *s.* बालानाम् क्रीडाविशेषो यस्मिन् एकतमो वस्त्रावरुद्धनयनः or अवरुद्धदृष्टिर् इतरान् इतस्ततः पलायमानान् जिघृक्षया नुधावति.

BLINDNESS, *s.* अन्धता -त्वं, तिमिरं.—(Ignorance) अज्ञानं, आवरणं, दुर्बुद्धित्वं, मोहः.

To BLINK, *v. n.* मील् (c. 1. मीलति, मीलितुं), निमील् or in caus. (निमीलयति -यितुं), निमिष् (c. 6. -मिषति -मेषितुं).

BLINK, *s.* निमेषः, निमिषः, मीलितं, दृष्टिनिपातः, अर्द्धवीक्षणं.

BLINKING, *s.* मीलनं, निमीलनं, निमेषः, *part.* निमीलन् -लन्ती -लत् (त्).

BLISS, *s.* परमसुखं, परमाह्लादः, परमानन्दः, प्रहर्षः, सुखं, शर्म्म *n.* (न्), प्रह्लादः, अत्यन्तसुखं, धन्यता, कल्याणं.—(Celestial life) अपवर्गः, मोक्षः, सिद्धिः *f.*, मुक्तिः *f.*, स्वर्गगतिः *f.*, परमपदं, परम्पदं.

BLISSFUL, *a.* परमसुखमयः -यी -यं, आनन्दमयः -यी -यं, परमाह्लादवान् -वती -वत् (त्), सुखी -खिनी -खि (न्), धन्यः -न्या -न्यं, सानन्दः -न्दा -न्दं, प्रमोदी -दिनी -दि (न्).

BLISSFULLY, *adv.* परमसुखेन, परमाह्लादेन, परमानन्दपूर्व्वकं, सानन्दं.

BLISSLESS, *a.* सुखहीनः -ना -नं, आह्लादरहितः -ता -तं, निरानन्दः -न्दा -न्दं.

BLISTER, *s.* त्वक्स्फोटः, स्फोटः, स्फोटकः, विस्फोटः, शोफः, व्रणं.—(On the foot) पादस्फोटः, स्फुटिः *f.*, विपादिका.—(A blistering plaster) त्वक्स्फोटोत्पादक उपनाहः.

To BLISTER, *v. a.* त्वक्स्फोटम् उत्पद् in caus. (-पादयति -यितुं).

To BLISTER, *v. n.* व्रणरूपेण श्वि (c. 1. श्वयति, श्वयितुं) or स्फुट् (c. 1. स्फोटते, स्फोटितुं).

BLISTERED, *p. p.* व्रणी -णिनी -णि (न्), शूनः -ना -नं, स्फातः -ता -तं.

BLITHE, BLITHESOME, *a.* हृष्टः -ष्टा -ष्टं, हृष्टमानसः -सी -सं, प्रहृष्टः -ष्टा -ष्टं, प्रफुल्लः -ल्ला -ल्लं, आनन्दी -न्दिनी -न्दि (न्), आह्लादी -दिनी -दि (न्), प्रमोदी -दिनी -दि (न्), पुलकितः -ता -तं, उल्लासितः -ता -तं, मुदान्वितः -ता -तं, प्रसन्नवदनः -नी -नं.

BLITHELY, *adv.* सहर्षं, हृष्टमनसा, प्रहृष्टं, प्रहर्षेण, प्रह्लादेन, सानन्दं.

BLITHENESS, BLITHESOMENESS, *s.* प्रहर्षः, हर्षः, प्रहृष्टता, प्रफुल्लता, आह्लादः, आनन्दः.

To BLOAT, *v. a.* मांसाद्याहारेण मनोज्ञं संशूनीकृ or पीनीकृ or स्थूलीकृ, स्फाय् in caus. (स्फापयति -यितुं), श्वि in caus. (श्वाययति -यितुं), आप्यै in caus. (-प्याययति -यितुं).

To BLOAT, *v. n.* मांसाद्युपभोगेन संशूनीभू or पीनीभू or स्थूलीभू, स्फाय् (c. 1. स्फायते, स्फायितुं), श्वि (c. 1. श्वयति, श्वयितुं), संश्वि, आप्यै (c. 1. (-प्यायते -प्यातुं).

BLOATED, *p. p.* शूनः -ना -नं, मांसोपभोगसंशूनः -ना -नं, प्रोच्छूनः -ना -नं, पीनः -ना -नं, स्फीतः -ता -तं, स्फातः -ता -तं, प्रवृद्धः -द्धा -द्धं, स्थूलीभूतः -ता -तं.

BLOATEDNESS, *s,* शूनता, स्थूलता, स्फातिः *f.*, स्फीतिः *f.*, पीनता.

BLOBBER-LIPPED, *a.* स्थूलोष्ठः -ष्ठा -ष्ठं, लम्बोष्ठः -ष्ठा -ष्ठं.

BLOCK, *s.* (Of wood) स्थूलकाष्ठं, काष्ठं, काष्ठखण्डं.—(Any mass) पिण्डः -ण्डं.—(A massy body) स्थूलद्रव्यं, भारः, स्थूणा.—(Of stone) शिला.—(Obstruction) अवरोधः -धकं, विरोधः, प्रतिष्टम्भः, विष्टम्भः, प्रतूहः, विघ्नः.—(A washerman's block) फलकः.

To BLOCK UP, *v. a.* प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), उपरुध्, निरुध्, संरुध्, स्तम्भ् (c. 9. स्तभ्नाति, स्तम्भितुं or caus. स्तम्भयति -यितुं), अपिधा (c. 3. -दधाति -धातुं), पिधा, बाध् (c. 1. बाधते, बाधितुं), आवृ (c. 5. -वृणोति -वरितुं -वरीतुं), प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

BLOCKADE, *s.* अवरोधः, रोधः, रोधनं, वेष्टनं, परिवेष्टनं, चिरारोधः.

To BLOCKADE, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), उपरुध्, संरुध्, निरुध्, प्रतिरुध्, विरुध्; परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), बाध् (c. 1. बाधते, बाधितुं).

BLOCKADED, *p. p.* रुद्धः -द्धा -द्धं, परिवेष्टितः -ता -तं, बाधितः -ता -तं.

BLOCKED UP, *p. p.* प्रतिरुद्धः -द्धा -द्धं, रुद्धः -द्धा -द्धं, प्रतिष्टभः -भा -भं, स्तब्धः -ब्धा -ब्धं, सबाधः -धा -धं, वारितः -ता -तं, विघ्नितः -ता -तं.

BLOCKHEAD, *s.* स्थूलबुद्धिः *m.*, स्थूलधीः *m.*, मन्दबुद्धिः *m.*, मूर्खः, मूढः, दुर्बुद्धिः *m.*, बर्ब्बरः.

BLOOD, *s.* असृक् *n.* (ज्), लोहितं, रक्तं, रुधिरं, शोणितं, क्षतजं, असं; 'to lose blood, रक्तं मुच् (c. 6. मुञ्चति, मोक्तुं); 'to flow with blood,' रक्तं सु (c. 1. सवति, सोतुं).—(Kindred, lineage) कुलं, वंशः, सन्तानः, गोत्रं, गोष्ठी; 'of whole blood,' सोदरः, सहोदरः, सोदर्य्यः, समानोदर्य्यः, सगर्भः, सनाभिः *m.*, एकशरीरः; 'of half blood,' भिन्नोदरः.—(Murder) वधः, नृहत्या, घातनं, मारणं.

To BLOOD, *v. a.* (To stain with blood) असृजा or शोणितेन लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप् or अञ्ज् (c. 7. अनक्ति, अंक्तुं) or मलिन (nom. मलिनयति -यितुं).—(To let blood) रक्तं or शोणितं सु in caus. (स्रावयति -यितुं) or मुच् in caus. (मोचयति -यितुं).

BLOOD-BESPOTTED, *a.* रक्तमलिनः -ना -नं, शोणितोक्षितः -ता -तं.

BLOOD-DRINKING, *a.* रक्तपः -पा -पं, रक्तपायी -यिनी -यि (न्) or रुधिरपायी, शोणितपः -पा -पं, असृक्पः -क्पा.

BLOODHOUND, *s.* अतिक्रूरो मृगव्यकुक्कुरभेदः स च घ्राणबलेन मृगस्थानं नयति.

BLOODILY, *adv.* जिघांसया, क्रूरं, निघृरं, नैर्घृण्येण, निर्दयं.

BLOODINESS, *s.* रक्तपक्षीता.—(Disposition to kill) जिघांसा.

BLOODLESS, *a.* नीरक्तः -क्ता -क्तं, रक्तहीनः -ना -नं, निःशोणितः -ता -तं.

BLOODLETTER, *s.* रक्तावकः, असृक्स्रावी *m.* (न्), रक्तमोचकः, सिरावेधकः.

BLOODSHED, *s.* रक्तपातः, असृक्पातः, वधः, नृहत्या, रिपुहत्या.

BLOODSHEDDER, *s.* रक्तपातकः, जिघांसुः *m.*, घातकः, हन्ता *m.* (न्) or निहन्ता, वधोद्यतः.

BLOODSHOT, *a.* रक्तपूर्णः -र्णा -र्णं, शोणिताप्लुतः -ता -तं.—(Redness of the vessels of the eye) रक्ताभिष्यन्दः; 'having bloodshot eyes,' रक्तेक्षणः -णा -णं.

BLOOD-STAINED, *a.* असृग्लिप्तः -प्ता -प्तं, शोणिताक्तः -क्ता -क्तं, रक्ताक्तः -क्ता -क्तं, शोणितोक्षितः -ता -तं, रक्तमलिनः -ना -नं.

BLOODSUCKER, *s.* शोणितपः, रक्तपायी *m.* (न्) or रुधिरपायी, असृक्पः.—(A leech) जलौका, रक्तपा *f.*, जलौकाः *m.* (स्).

BLOODTHIRSTY, *a.* रक्तपिपासुः -सुः -सु, शोणितप्रियः -या -यं, जिघांसुः -सुः -सु, क्रूरः -रा -रं, वधोद्यतः -ता -तं.

BLOODVESSEL, *s.* असृग्वहा *f.*, नाडिः *f.*, रक्तप्रवाहकनाडिः *f.*, शिरा, रक्तवाही *m.* (न्).

BLOODY, *a.* रक्तमयः -यी -यं, शोणितमयः -यी -यं, रक्ताक्तः -क्ता -क्तं.—(Murderous) मारात्मकः -का -कं, क्रूरः -रा -रं.

BLOODY-FLUX, *s.* रक्तातीसारः, रक्तपित्तः, अधोसृपित्तं, सारणः, प्रवाहिका.

BLOODY-MINDED, *a.* मारात्मकः -का -कं, जिघांसुः -सुः -सु, क्रूरचेताः -ताः -तः (स्).

BLOODY-RED, *a.* रक्तवर्णः -र्णा -र्णं, लोहितवर्णः -र्णा -र्णं.

BLOOM, *s.* (A blossom) पुष्पं, कुसुमं, पल्लवः, मुकुलः -लं.—(Fresh-colour) नववर्णः.—(In a state of bloom) अदृष्टपरिणामः.—(Bloom of youth) नवयौवनं, अक्षतयौवनं; 'in the bloom of youth,' प्रौढयौवनः -ना -नं.

To BLOOM, *v. n.* फुल्ल् (c. 1. फुल्लति, फुल्लितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), कुसुम (nom. कुसुमयति -यितुं), विकस् (c. 1. -कसति -कसितुं)—(To flourish) ऋध् (c. 5. ऋध्नोति, अर्धितुं), समृध्; रध् (c. 1. रधते, रधितुं), वृध् (c. 1. वर्धते, वर्धितुं).

BLOOMING, *a.* फुल्लवान् -वती -वत् (त्), प्रफुल्लः -ल्ला -ल्लं, विकसन् -सन्ती -सत् (त्), स्फुटन् -टन्ती -टत् (त्), विकासी -सिनी -सि (न्).—(Flourishing) वर्द्धमानः -ना -नं, समृद्धः -द्धा -द्धं, उदयी -यिनी -यि (न्).

BLOSSOM, *s.* पुष्पं, कुसुमं, पल्लवः, मुकुलः -लं, धारकः, प्रसवः.

To BLOSSOM, *v. n.* फुल्ल् (c. 1. फुल्लति, फुल्लितुं), कुसुम (nom. कुसुमयति -यितुं), स्फुट् (c. 6. स्फुटति, स्फुटितुं, c. 1. स्फोटते, स्फोटितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं), विकस् (c. 1. -कसति -कसितुं).

BLOSSOMING, *a.* फुल्लवान् -वती -वत् (त्), पुष्पितः -ता -तं, पुष्पवान् -वती -वत् (त्), कुसुमितः -ता -तं, कुसुमवान् -वती -वत् (त्), स्फुटितपुष्पः -ष्पा -ष्पं.

To BLOT, *v. a.* मलिन (nom. मलिनयति -यितुं), मलिनीकृ, लिप् (c. 6. लिम्पति, लेप्तुं), दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), कृष्णीकृ.—(To make indistinct) अस्पष्टीकृ.

To BLOT OUT, *v. a.* (To efface, destroy) विनश् in caus. (-नाशयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उद्धृ (c. 1. -हरति -हर्तुं), विलुप् in caus. (-लोपयति -यितुं).—(To erase) व्यामृष् (c. 1. -मर्षति -मर्षितुं), लोपं कृ.

BLOT, *s.* (Erasure) लोपः, व्यामर्षः.—(Spot, stain) कलङ्कः, अपकलङ्कः, कलुषं, मलं, दोषः.—(Disgrace) अपकीर्त्तिः *f.*, अपयशः *n.* (स्), अकीर्त्तिः *f.*

BLOTCH, *s.* किलासं, सिध्म *n.* (न्), स्फोटः, विस्फोटः, व्रणं, कच्छपिका.

To BLOTCH, *v. a.* किलासीकृ, मलिन (nom. मलिनयति -यितुं).

BLOTCHY, *a.* किलासी -सिनी -सि (न्), सिध्मलः -ला -लं, सिध्मवान् -वती -वत् (त्).

BLOTTED, *p. p.* मलिनितः -ता -तं, दूषितः -ता -तं, कलङ्कितः -ता -तं.

BLOTTING-PAPER, *s.* मसीशोषकः, मसीशोषणयोग्यं पत्रं.

BLOW, *s.* (A stroke) प्रहारः, आघातः, अभिघातः, घातः, पातः, पातनं, दण्डः, हतिः *f.*, आहतिः *f.*—(A blow with the fist) मुष्टिपातः; 'a blow which reduces to powder,' निष्पेषः.—(Blooming of flowers) फुल्लिः *f.*, फुल्लतिः *f.*, स्फुटनं, विकाशः.—(The act of a fly which infects meat by depositing eggs) मक्षिकया अण्डप्रसवेन खाद्यमांसदूषणं.

To BLOW, *v. n.* (As the wind) वा (c. 2. वाति, वातुं), प्रवा.—(To breathe) श्वस् (c. 2. श्वसिति, श्वसितुं), उच्छ्वस्, श्वासप्रश्वासं कृ.—(To pant) कृच्छ्रेण श्वस्, विनिश्वस्, दुःश्वासं कृ, यष्टिप्राणः -णा -णं भू.—(As a flower) फुल्ल् (c. 1. फुल्लति, फुल्लितुं), स्फुट् (c. 6. स्फुटति, स्फुटितुं), पुष्प् (c. 4. पुष्प्यति, पुष्पितुं).

To BLOW, *v. a.* ध्मा (c. 1. धमति, ध्मातुं), समाध्मा, प्रध्मा, उपध्मा; 'he blew his horn,' शृङ्गं दध्मौ; 'fire blown by the wind,' वायुना ध्मायमानोऽग्निः.—(To blow away) अपध्मा, विध्मा.—(To blow out) निर्वा in caus. (-वापयति -यितुं).—(To blow upon) वीज् (c. 10. वीजयति -यितुं), अनुवीज्, उद्वीज्, उपवीज्; 'blown upon by sacred breezes,' पुण्यैर्वायुभिर् अनुवीजितः.—(To puff upon, to cool) फुत् कृ, फूत्कारं कृ.—(To blow the nose) नासिकं ध्मा.—(One who blows his nose) नासिकन्धमः.

BLOWING, *part.* (As a flower) स्फुटन् -टन्ती -टत् (त्), विकाशी -शिनी -शि (न्), फुल्लवान् -वती -वत् (त्).—(The act) फुल्लिः *f.*, स्फुटनं, प्रस्फोटनं, विकाशः.

BLOWN, *p. p.* (As a flower) फुल्लः -ल्ला -ल्लं, उत्फुल्लः -ल्ला -ल्लं, प्रफुल्लः -ल्ला -ल्लं, स्फुटः -टा -टं, व्याकोशः -शा -शं, विकसितः -ता -तं, विकचः -चा -चं, प्रस्फुटः -टा -टं.—(Inflated) आध्मातः -ता -तं.

BLOW-PIPE, *s.* नाडिः *f.*—(One who uses it) नाडिन्धमः.

BLOWZY, *a.* आतपदग्धवदनः -नी -नं, सूर्य्यतेजसा विकृतवर्णः -र्णा -र्णं.

BLUBBER, *s.* तिमिमेदः *n.* (स्), तिमिवसा, तिमितैलं, बृहन्मीनमेदः *n.* (स्).

To BLUBBER, *v. n.* यथा गर्दभौ श्वयतस् तथा रुद् (c. 2. रोदिति, रोदितुं), अतिशयक्रन्दनाद् उच्चूनमुखो भू.

BLUDGEON, *s.* लगुडः, परिघः, परिघातनं, गदा.—(Armed with) लगुडहस्तः.

BLUE, *s.* (The colour) नीलः, नीलवर्णः.

BLUE, *a.* नीलः -ला -लं, नीलवर्णः -र्णा -र्णं, श्यामः -मा -मं.

To BLUE, *v. a.* नीलीकृ.—(To become blue) नील (nom. नीलायते).

BLUEBOTTLE, *s.* नीलशरीरः स्थूलमक्षिकाप्रभेदः, वर्द्धणा.

BLUE-EYED, *a.* नीलनयनः -नी -नं, नीलाक्षः -क्षी -क्षं.

BLUENESS, *s.* नैल्यं, नीलता -त्वं, श्यामता.

BLUFF, *a.* (Big) स्थूलः -ला -लं.—(Harsh) रूक्षः -क्षा -क्षं, परुषः -षा -षं, उग्रः -ग्रा -ग्रं, कर्कशः -शा -शं.—(Not pointed) घनाग्रः -ग्रा -ग्रं.—(Exposed to wind) वातावकाशिकः -की -कं.

BLUFFNESS, *s.* रूक्षता, काकैश्यं, परुषत्वं, घनत्वं.

BLUISH, *a.* आनीलः -ला -लं, ईषन्नीलः -ला -लं. ईषच्छ्यामः -मा -मं.

To BLUNDER, *v. n.* प्रमद् (c. 4. -माद्यति -मदितुं), स्खल् (c. 1. स्खलति, स्खलितुं), भ्रम् (c. 1. भ्रमति, c. 4. भ्राम्यति, भ्रमितुं), अनवधानं कृ.

BLUNDER, *s.* प्रमादः, स्खलितं, स्खलनं, दोषः, भ्रमः, कर्म्मदोषः, अनवधानं, अशुद्धं.

BLUNDERBUSS, *s.* अनेकशो लोहगुलिकाप्रक्षेपणी विशालमुखविशिष्टा नाडिः *f.*

BLUNDERER, *s.* प्रमादी *m.* (न्), प्रमादकर्त्ता *m.* (र्त्तृ), दोषकर्त्ता *m.* (र्त्तृ), स्खलनशीलः.

BLUNDERING, *a.* प्रमादी -दिनी -दि (न्), प्रमत्तः -त्ता -त्तं, स्खलन्मतिः -तिः -ति, अनवधानः -ना -नं, दोषी -षिणी -षि (न्).

BLUNDERINGLY, *adv.* प्रमादेन, प्रमाद्यतस्, स्खलनपूर्ब्बं, अनवधानेन, अवधानं विना.

BLUNT, *a.* (Not sharp) अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अप्रखरः -रा -रं, धाराहीनः -ना -नं.—(Thick, obtuse) घनः -ना -नं, स्थूलः -ला -लं.—(Dull of understanding) मन्दमतिः -तिः -ति, अविदग्धः -ग्धा -ग्धं.—(Rough) रूक्षः -क्षा -क्षं, परुषः -षा -षं, कर्कशः -शा -शं, अमसृणः -णा -र्णं.

To BLUNT, *v. a.* घनीकृ, धाराम् अतीक्ष्णां कृ, विरूग्नधारं -रां -रं कृ, रुग्नीकृ, विरुग्नीकृ, स्थूलीकृ.—(To lessen) अल्पीकृ, न्यूनीकृ, शम् in caus. (शमयति -यितुं), ह्रस् in caus. (ह्रासयति -यितुं); 'one who blunts desire,' कामावसायिता *m.* (तृ).

BLUNTED, *p. p.* घनीकृतः -ता -तं, विरुग्नधारः -रा -रं, विरुग्नः -ग्ना -ग्नं.

BLUNTLY, *adv.* पारुष्येण, कार्कश्येन, कर्कशवाक्येन, परुषोक्त्या, सपारुष्यं.

BLUNTNESS, *s.* अतीक्ष्णता, धाराहीनता, घनत्वं, रूक्षता, स्थूलता.—(Of intellect) मन्दमतिता, अविदग्धता, बुद्धिमान्द्यं.—(Of manner) पारुष्यं, रूक्षता, कर्कशत्वं, कार्कश्यं.

BLUR, *s.* कलङ्कः, दोषः, कलुषं, मलं.

To BLUR, *v. a.* मलिन (nom. मलिनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), दुष् in caus. (दूषयति -यितुं), कलुष (nom. कलुषयति -यितुं).

BLURRED, *p. p.* मलिनितः -ता -तं, परिमलितः -ता -तं, कलुषितः -ता -तं.

To BLURT, *v. a.* असमीक्ष्य or अविमृश्य or अविचार्य्य or प्रमादेन वद् (c. 1. वदति, वदितुं). जल्प् (c. 1. जल्पति, जल्पितुं).

To BLUSH, *v. n.* लज्ज् (c. 6. लज्जते, लज्जितुं), विलज्ज्, संलज्ज्, व्रीड् (c. 4. व्रीड्यति, व्रीडितुं), त्रप् (c. 1. त्रपते, त्रपितुं), ह्री (c. 3. जिह्रेति, ह्रेतुं); 'to blush at any thing,' ह्री with abl. or gen. c.—(To become red) अरुणीभू, ईषदरुणीभू, लोहित (nom. लोहितायते).—(In the face) लोहिताननः -नी -नं भू.

To BLUSH, *v. a.* (To make red) अरुणीकृ, अरुण (nom. अरुणयति -यितुं).

BLUSH, *s.* कषोल्लरागः.—(Colour in the face resulting from shame) लज्जाप्रयुक्तं वदनरञ्जनं. व्रीडाजनितो मुखारुणिमा *m.* (न्).—(Bashfulness) लज्जा, ह्रीः *f.*, व्रीडा, त्रपा; 'full of blushes,' ह्रीपरिगतः -ता -तं.—(To put to the blush) ह्री in caus. (ह्रेपयति -यितुं); 'put to the blush,' ह्रेपितः -ता -तं.—(At the first blush or aspect) प्रथमदर्शने, आदावेव.

To BLUSTER, *v. n.* (To roar) गर्ज् (c. 1. गर्जति, गर्जितुं).—(To be tumultuous) तुमुलं कृ, मुखरीभू, झष् (nom. झष्यायते).—(To brag) विकत्थ् (c. 1. -कत्थते -कत्थितुं).—(To be violent) भृश (nom. भृशायते).—(To bully) तर्ज् (c. 1. तर्जति, तर्जितुं), मुखरीकृ, भर्त्स् (c. 10. भर्त्सयते -यितुं).

BLUSTERER, *s.* शूरम्मन्यः, भर्त्सनकारः, कलहकारः, दाम्भिकः, विकत्थी *m.* (न्).

BLUSTERING, *s.* गर्ज्जनं, गर्ज्जितं, तुमुलं, कोलाहलः, भर्त्सनं, विकत्थनं.

BLUSTEROUS, *a.* गर्जनकारी -रिणी -रि (न्), महास्वनः -ना -नं, मुखरः -रा -रं

BOA-CONSTRICTOR, *s.* (A snake) अजगरः, वाहसः, शयुः *m.*, वोड्रः.

BOAR, *s.* वराहः, शूकरः, दंष्ट्री *m.* (न्), स्थूलनासः, पृथुस्कन्धः, कोलः, किरः, दृढलोमा *m.* (न्), वक्रदंष्ट्रः; 'wild boar,' वनशूकरः.

BOARD, *s.* (A plank) फलकः -कं, दीर्घकाष्ठं.—(A table) भोजनाधारः, फलकः, भोजनासनं, मञ्चः.—(Food) भोजनं, आहारः, भृतिः *f.*, अन्नजलं. 'board and clothing,' ग्रासाच्छादनं; 'board and lodging,' ग्रासावासौ *du.*—(A council) सभा; 'the members of it,' सभासदः *m. pl.*—(The deck of a ship) नौकापृष्ठं, पोतपृष्ठं, नौकातलं, नौकाफलकं, पोतास्तरणं; 'on board,' नौकारूढः -ढा -ढं.—(A board for playing drafts, &c.) अष्टापदं, शारिफलं, नयपीठी.

To BOARD, *v. a.* (To enter a ship by force) नावं बलात् or बलेन or प्रसह्य आरुह् (c. 1. -रोहति -रोढुं) or अधिक्रम् (c. 1. -क्रामति -क्रमितुं) or आक्रम् or अवप्लु (c. 1. -प्लवते -प्लोतुं).—(To lay with boards) फलक (nom. फलकयति -यितुं), फलकैः or दीर्घकाष्ठैः or काष्ठफलकेन आस्तृ (c. 9. -स्तृणाति -स्तरितुं -स्तरीतुं).—(To diet another at a settled rate) निरूपितमूल्येन स्वगृहे अन्तेवासिनं भुज् in caus. (भोजयति -यितुं) or भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To BOARD, *v. n.* (To diet with another at a settled rate) निरूपितवेतनं दत्त्वा or निरूपितमूल्येन परगृहे भोजनशयनादि कृ or अन्तेवासी भू.

BOARDER, *s.* (One who diets with another) निरूपितमूल्येन परगृहे भोजनशयनादिकर्त्ता *m.* (र्त्तृ), सहभोजी *m.* (न्), सहभोक्ता *m.* (क्तृ), पांक्तयः.—(A pupil at a boarding-school) अन्तेवासी *m.* (न्).

BOARDING-SCHOOL, *s.* यस्मिन् विद्यालये अन्तेवासिनः शिक्षकगृहे भोजनशयनादि कुर्व्वन्ति सः.

BOARD-WAGES, *s.* भोजनक्रयणार्थं वेतनं, अन्नक्रयणार्थं वर्त्तनं, भोजनात् प्रति वेतनं.

BOARISH, *a.* वाराहः -ही -हं, सौकरः -री -रं, असभ्यः -भ्या -भ्यं.

To BOAST, *v. n.* आत्मानं श्लाघ् (c. 1. श्लाघते, श्लाघितुं), कत्थ् (c. 1. कत्थते, कत्थितुं), विकत्थ् with inst. of the thing of which boast is made, दम्भं कृ, परिकृत् (c. 10. -कीर्त्तयति -यितुं), दृप् (c. 4. दृप्यति, दृप्तुं), गर्ह्व् (c. 1. गर्ह्वति, गर्ह्वितुं).

BOAST, BOASTING, *s.* आत्मश्लाघा, विकत्था, विकत्थनं, परिकीर्त्तनं, अहङ्कारोक्तिः *f.*, शूरत्वं, दम्भः, दर्पकरणं, दर्पः, गर्ह्वः, अभिमानं, आहोपुरुषिका, अहमहमिका.

BOASTED, *p. p.* श्लाघितः -ता -तं, परिकीर्त्तितः -ता -तं.

BOASTER, *s.* आत्मश्लाघी *m.* (न्), विकत्थी *m.* (न्), -त्थिनी *f.*, -त्थनः, उपजल्पी *m.* (न्), दम्भी *m.* (न्), शूरम्मन्यः, शूरत्वानी *m.* (न्).

BOASTFUL, *a.* दाम्भिकः -की -कं, दम्भी -म्भिनी -म्भि (न्), गर्ह्वितः -ता -तं, गर्ह्वपूर्णः -र्णा -र्णं, विकत्थनः -ना -नं, अवलिप्तः -प्ता -प्तं, वाचालः -ला -लं.

BOASTFULLY, *adv.* गर्ह्वेण, दम्भेन, सदर्पं, सगर्ह्वं, सदम्भं, विकत्थनपूर्ब्बं.

BOASTLESS, *a.* दम्भहीनः -ना -नं, अगर्ह्वः -र्ह्वा -र्ह्वं, अभिमानरहितः -ता -तं.

BOAT, *s.* नौः *f.*, नौका, पोतः, तरी, तरणी, तरण्डः, उडुपः.

BOATFUL, *s.* नौकापूरणं, पोतपूरणं.

BOATLOAD, *s.* नौकाभारः, पोतभारः.

BOATMAN, *s.* नाविकः, पोतवाहः, नियामः, नौकारूढः, औडुपिकः.

BOATSWAIN, *s.* मुख्यनाविकः, प्रधाननाविकः, नाविकः, कर्णधारः, नियोगाधिष्ठाता *m.* (तृ).

To BOB, *v. a.* (To crop) ह्रस् in caus. (ह्रासयति -यितुं).—(To beat) तड् in caus. (ताडयति -यितुं).

To BOB, *v. n.* (To play backwards and forwards) इतस्ततो लुड्

(c. 6. लुठति, लुठितुं) or स्फुर् (c. 6. स्फुरति, स्फुरितुं) or प्रेङ्ख् (c. 1. प्रेङ्खति, प्रेङ्खितुं), दोल् (nom. दोलायते -यितुं), चञ्च् (c. 1. चञ्चति, चञ्चितुं), चञ्चल (nom. चञ्चलायते).

Bob, *s.* (Ear-ring) कुण्डलं, कर्णिका.—(A blow) प्रहारः, आघातः.

Bobbin, *s.* कपालनालिका, सूत्रगण्डिका, तन्तुकीलः.

Bobtail, *s.* छिन्नवालधारी *m.* (न्), ह्रस्वपुच्छी *m.* (न्), कर्त्तितलाङ्गूली *m.* (न्).

Bobtailed, *a.* छिन्नवालः -ला -लं, ह्रस्वपुच्छः -च्छा -च्छं, ह्रसितलाङ्गूलः -ला -लं.

Bobwig, *s.* शिरोरुहहीनैर् भृतं परकीयकृत्रिमकेशनिर्म्मितं शिरस्त्रं.

To bode, *v. a.* शुभाशुभं or मङ्गलामङ्गलं प्रदृश् in caus. (-दर्शयति -यितुं), इष्टानिष्टम् आविद् in caus. (-वेदयति -यितुं) or सूच् (c. 10. सूचयति -यितुं), पूर्व्वलिङ्गं or पूर्व्वचिह्नं or पूर्व्वलक्षणं दा (c. 3. ददाति, दातुं), निपातं or विनिपातं शंस् (c. 1. शंसति, शंसितुं).

Bodement, *s.* पूर्व्वलक्षणं, पूर्व्वचिह्नं, पूर्व्वलिङ्गं, चिह्नं, शुभाशुभलक्षणं, शुभाशुभचिह्नं, शकुनं, उत्पातः, अजन्यं, निमित्तं, उपसर्गः, उपलिङ्गः, भाविमूचकं चिह्नं.

Bodice, *s.* चोलः -ली, अङ्गिका, चेलिका, कञ्चुलिका, कूर्पासकः -कं.

Bodied, *a.* शरीरी -रिणी -रि (न्), देही -हिनी -हि (न्), अङ्गी -ङ्गिनी -ङ्गि (न्).

Bodiless, *a.* अशरीरः -रा -रं or -री -रिणी -रि (न्), अनङ्गः -ङ्गा -ङ्गं, अङ्गहीनः -ना -नं, निराकारः -रा -रं, अमूर्त्तः -र्त्ता -र्त्तं, व्यङ्गः -ङ्गी -ङ्गं.

Bodily, *a.* शारीरिकः -की -कं, दैहिकः -की -कं, शरीरजः -जा -जं, कायिकः -की -कं, अङ्गकः -का -की -कं, आङ्गः -ङ्गी -ङ्गं.—(Bodily hardship) कायक्लेशः, देहक्लेशः, कृच्छ्रं.

Bodily, *adv.* शरीरतस्, सदेहं, सशरीरं, सकायं, साङ्गं.—(In a mass) साकल्येन.—(United with the body) शरीरसंयुक्तः -क्ता -क्तं, शरीरसम्पृक्तः -क्ता -क्तं.

Bodkin, *s.* सूचिविशेषः, सूचिः -ची, सूचिनी.—(A dagger) छुरिका, शङ्कुः *m.*—(Instrument for piercing) आविधः, वेधनिका.—(For the hair) केशरचनायोग्यः कीलविशेषः.

Body, *s.* (As opposed to the immaterial substance of an animal) शरीरं, देहः, कायः, गात्रं, मूर्त्तिः *f.*, अङ्गं, वपुः *n.* (स्), कलेवरं, वर्ष्म *n.* (न्), विग्रहः, संहननं, तनुः *f.* -नूः *f.*, करणं; 'a dead body,' मृतशरीरं, शवः, कुणपः; 'a little body,' शरीरकं.—(Substance) मूर्त्तिः *f.*; 'the body of cloth,' वस्त्रयोनिः *m.*—(A person) पुरुषः, जनः, मनुष्यः, लोकः.—(A collective mass) समूहः, समवायः, सङ्घातः, समुदायः, मण्डलं, सङ्घः, वृन्दं, निवहः, ओघः; 'a body of men,' जनसमूहः; 'a body of water,' पयोराशिः *m.*, वारिराशिः *m.*; 'in a body,' सङ्घशस्, सङ्घम्य, समूह्य.—(A society of men) संसर्गः, समागमः, पङ्क्तिः *f.*—(A corporate body) श्रेणी.—(A collegiate or religious body) आश्रमः.—(Strength) बलं.—(The main part) प्रधानभागः; 'body of a tree,' प्रकाण्डः, स्कन्धः; 'the body or interior of a building,' प्रासादाभ्यन्तरं, अन्तर्गृहं, अन्तर्भवनं, भवनोदरं, भवनगर्भः.—(A body of troops) गुल्मः, सैन्यदलं, सैनिकः; 'a body of reserve,' प्रतिग्रहः; 'body to body,' अङ्गाङ्गि.

Body-clothes, *s.* (Of horses) आस्तरः, पर्य्ययणं, अश्वानां गात्रवस्त्रं.

To body-forth, *v. a.* रूप् (c. 10. रूपयति -यितुं), निर्मा (c. 2. -माति -मातुं).

Body-guard, *s.* परिचरः, परिधिस्थः, अनुचरः, परिवारः.

Bog, *s.* अनूपः, अनूपभूः *f.*, कच्छः, कच्छभूः *f.*, पङ्कः, कर्दमः, पङ्ककर्दटः.

Bog-trotter, *s.* अनूपवासी *m.* (न्), कच्छभूमिवासी *m.* (न्), कच्छदेशस्थायी *m.* (न्).

To boggle, *v. n.* (To hesitate) शङ्क् (c. 1. शङ्कते, शङ्कितुं), विशङ्क्, अभिशङ्क्, आशङ्क्, सन्दिह् (c. 2. -देग्धि -देग्धुं), दोल् (nom. दोलायते -यितुं), आन्दोल्, विलम्ब् (c. 1. -लम्बते -लम्बितुं), विकल्प् (c. 1. -कल्पते -कल्पितुं).

Boggler, *s.* सन्दिग्धमतिः, शङ्कितमतिः, संशयिता *m.* (तृ), संशयालुः, शङ्काशीलः.

Boggy, *a.* अनूपः -पा -पं, आनूपः -पी -पं, पङ्किलः -ला -लं, कार्द्दमः -मी -मं, कच्छः -च्छा -च्छं.

To boil, *v. n.* (To be effervescent) फेन् (nom. फेनायते -यितुं), फुत् कृ.—(To boil over) उत्सेचनं कृ.—(To be cooked by boiling) क्वथ् in pass. (क्वथ्यते), आ in pass. (आयते), पच् in pass. (पच्यते).—(To be hot) तप् in pass. (तप्यते).

To boil, *v. a.* क्वथ् (c. 1. क्वथति, क्वथितुं), स्थाल्यां पच्, आ (c. 2. आति, आतुं or caus. अपयति -यितुं), तप् in caus. (तापयति -यितुं).

Boil, *s.* व्रणं -णः, तनुव्रणः, विस्फोटः, स्फोटः, स्फोटकः, पिटकः -का, नालीव्रणः, गण्डः, पोटिकः; 'blind boil,' अन्धालजी.

Boiled, *p. p.* क्वथितः -ता -तं, आणः -णा -णं, शृतः -ता -तं, अपितः -ता -तं.—(In a caldron) पैठरः -री -रं, स्थालीपक्वः -क्वा -क्वं, उरुपः -रुप्या -रुप्यं; 'boiled rice,' भक्तं.

Boiler, *s.* स्थाली, ऋजीषं, पिष्टपचनं, पिठरः -रं, उखा, कन्दुः *m. f.*

Boisterous, *a.* (Stormy) वातवान् -वती -वत् (त्), वातलः -ला -लं, गर्জनकारी -रिणी -रि (न्); 'a boisterous wind,' प्रचण्डपवनः.—(Violent) प्रचण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, रोषणः -णा -णं, साहसिकः -की -कं.—(Turbulent) कलहकारी -रिणी -रि (न्).—(Noisy) शब्दकारी -रिणी -रि (न्) or तुमुलकारी.—(Laughing violently) अट्टहासी -सिनी -सि (न्).

Boisterously, *adv.* प्रचण्डं, प्रचण्डतया, महारोषेण, महाशब्देन, कोलाहलेन.

Boisterousness, *s.* वातलत्वं, प्रचण्डता, साहसित्वं, सरोषता.

Bold, *a.* (Brave) शूरः -रा -रं, प्रवीरः -रा -रं, निर्भयः -या -यं, निर्विशङ्कः -ङ्का -ङ्कं.—(Daring, audacious) साहसी -सिनी -सि (न्), प्रगल्भः -ल्भा -ल्भं, प्रतिभान्वितः -ता -तं.—(Impudent) निर्लज्जः -ज्जा -ज्जं, धृष्टः -ष्टा -ष्टं, अनिभृतः -ता -तं, प्रतिभानवान् -वती -वत् (त्); 'to be bold,' धृष् (c. 5. धृष्णोति, धर्षितुं).

To bolden, *v. a.* निर्भयं -यां -यं कृ, अभयं दा (c. 3. ददाति, दातुं).

Bold-faced, *a.* प्रतिभामुखः -खी -खं, निर्लज्जमुखः -खी -खं, निर्लज्जः -ज्जा -ज्जं.

Boldly, *adv.* शूरवत्, साहसेन, प्रागल्भ्येन, निर्भयं, भयं विना; 'to speak boldly,' जल्प् (c. 1. जल्पति, जल्पितुं).

Boldness, *s.* (Courage) शौर्य्यं, शूरता, वीरता, निर्भयत्वं, अक्षोभः.—(Daringness) प्रागल्भ्यं, प्रगल्भता, साहसं, प्रतिभानं.—(Impudence) निर्लज्जत्वं, धार्ष्ट्यं, धृष्टता.

Bole, *s.* (Trunk of a tree) स्कन्धः, प्रकाण्डः, स्थाणुः *m.*

Boll, *s.* नाडिः -डी *f.*, नाली, काण्डः -ण्डं.

To boll, *v. n.* अतसीवत् स्फुट् (c. 6. स्फुटति, स्फुटितुं) or विकस् (c. 1. -कसति -कसितुं) or शस्ययुक्तः -क्ता -क्तं भू.

Bolster, *s.* उपधानं, उपधानीयं, उच्छीर्षकं, उपवर्हः, गण्डोलिकः.—(Bandage) पट्टः बन्धनं.—(A prop, support) उपस्तम्भः, उपघ्नः, आलम्बः.

To bolster up, *v. a.* (To support) संस्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, स्तम्भितुं or caus. स्तम्भयति -यितुं), उपस्तम्भ्, विष्टम्भ्; धृ (c. 1. धरति, धर्त्तुं or caus. धारयति -यितुं), आलम्ब् (c. 1. -लम्बते -लम्बितुं), समवलम्ब्.

Bolt, *s.* (Of a door) अर्गलं, तालकं, कीलः, तालयन्त्रं, द्वारयन्त्रं, अपलं.—(A dart) मृगः, शूलः -लं, शल्यं, शङ्कुः *m.*, प्रासः, शरः.—(Thunder-bolt) वज्रं, कुलिशं, अशनिः *m. f.*

To BOLT, *v. a.* (To shut with a bolt) अर्गलेन or तालकेन द्वारं पिधा (c. 3. -दधाति -धातुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं).—(To sift) चालनेन पू (c. 9. पुनाति, पवितुं) or शुध् in caus. (शोधयति -यितुं), तितउना चल् in caus. (चालयति -यितुं).—(To blurt out) अविचार्य्य वद् (c. 1. वदति, वदितुं), जल्प् (c. 1. जल्पति, जल्पितुं).

To BOLT OUT, *v. n.* अकस्मात् or झटिति निर्गम् (c. 1. -गच्छति -गन्तुं) or निःसृ (c. 1. -सरति -सर्त्तुं), निष्पत् (c. 1. -पतति -पतितुं), विनिष्पत्, अभिनिष्पत्.

BOLTED, *p. p.* अर्गलेन बद्धः -द्धा -द्धं, कीलितः -ता -तं.

BOLTER, *s.* (A sieve) चालनं -नी, तितउः *m.* -उ *n.*

BOLTHEAD, *s.* वकः, वकयन्त्रं, काचवकयन्त्रं.

BOLTING-HOUSE, *s.* शस्यचालनस्थानं, शस्यपवनस्थानं.

BOLTSPRIT or BOWSPRIT, *s.* नौकाग्रभागे स्थापितो महाकूपकावलम्बिताधारो वहिर्प्रेणतः क्षुद्रकूपकः, पोताग्रवहिःप्रलम्बो गुणवृक्षकः.

BOLUS, *s.* गुली, गुटिका, रोगिभिर् निगरणीय औषधीयगोलः.

BOMB, *s.* पुरभेदने प्रयुक्तोऽग्न्यस्त्रविशेषः स च अन्तर्ज्वलनबलेन वज्रनिष्पेषतुल्यशब्देन विदीर्णो भूत्वा सहस्रखण्डशः पतति.

To BOMB or BOMBARD, *v. a.* पूर्व्वोक्तेन अग्न्यस्त्रेण पुरं मृद् (c. 9. मृद्नाति, मर्द्दितुं) or प्रमृद् or विमृद् or अवमृद्.

BOMBARDIER, *s.* पूर्व्वोक्तेन अग्न्यस्त्रेण पुरमर्द्दी *m.* (न्) or नगरविमर्द्दी *m.*

BOMBARDMENT, *s.* प्रागुक्तेन अग्न्यस्त्रेण पुरमर्द्दनं or नगरविमर्द्दनं.

BOMBASIN, *s.* दुकूलं, बन्धुमरणसमये शोकमूचकः सूक्ष्मकौशासरविशेषः.

BOMBAST, *s.* गर्व्वितवाक्यं, दर्पवाक्यं, असारवाक्यं, फल्गुवाक्यं, अतिशयोक्तिः *f.*

BOMBASTICAL, *a.* अतिगर्व्वितः -ता -तं, दर्पेध्मातः -ता -तं, निरर्थकः -का -कं, फल्गुः -ल्गुः -ल्गु, असारः -रा -रं.

BOMBYX, *s.* तन्तुकीटः, कोषकारः, कोशकारकः.

BONA FIDE, *a.* अर्थतस्, तत्त्वतस्, वस्तुतस्, निर्व्याजं, निर्व्वलीकं.

BOND, *s.* बन्धनं, बन्धः, पाशः, आबन्धः.—(A written contract) प्रतिज्ञापत्रकं, पत्रं, लेख्यप्रसङ्गः, लेख्यं, करणं, काचनकी *m.* (न्).—(Union, tie) सन्धिः *m.*, श्लेषः, संहतिः *f.*, संसक्तिः *f.*—(Connection) संयोगः, सम्बन्धः.—(Captivity) बन्धनं.—(That which binds, obligation) नियमः, अवश्यकता.

BONDAGE, *s.* बन्दित्वं, दासत्वं, बन्धनं, प्रतिबन्धनं, परप्रेष्यत्वं.

BONDSMAID, *s.* दासी, दासिका, चेटी, किङ्करी.

BONDSMAN, *s.* दासः, क्रीतदासः, किङ्करः, चेटः.

BONE, *s.* अस्थि *n.*, अस्थिकं, कुल्यं, हड्डं, कीकसं; 'backbone,' पृष्ठास्थि *n.*

To BONE, *v. a.* निरस्थीकृ, अस्थीनि निष्कृष् (c. 1. -कर्षति -क्रष्टुं).

BONE-ACHE, *s.* अस्थिवेदना, अस्थिव्यथा.

BONED, *a.* (Bony) अस्थिमान् -मती -मत् (त्).—(Having the bones extracted) निरस्थिः -स्थिः स्थि.

BONELESS, *a.* अनस्थिः -स्थिः -स्थि, अस्थिहीनः -ना -नं, अस्थिरहितः -ता -तं.

To BONESET, *v. n.* त्रुटितास्थि or भिन्नास्थि स्वस्थं or सुस्थं कृ or स्वस्थाने पुनः संस्था in caus. (-स्थापयति -यितुं) or पुनः सन्धा (c. 3. -दधाति -धातुं), करपादादिजोटनं or अस्थिभङ्गं समाधा or कित् in des. (चिकित्सति -त्सितुं).

BONESETTER, *s.* त्रुटितास्थि स्वस्थं करोति यो वैद्यः, त्रुटितास्थिसमाधाता *m.* (तृ), भग्नास्थिचिकित्सकः

BONFIRE, *s.* उत्सवकाले or उद्धर्षसमये समिद्धो हर्षसूचनार्थं महाज्वालोऽग्निः, जयोग्निः *m.*

BON-MOT, *s.* रसवद्वाक्यं, परिहासवाक्यं, नर्म्म *n.* (न्), श्लेषवाक्यं, द्व्यर्थवाक्यं, ठट्टरी.

BONNET, *s.* स्त्रीलोकभृतं शिरस्त्रं or शिरस्त्रं or शिरोवेष्टनं or मस्तकाभरणं.

BONNILASS, *s.* सुन्दरी, रूपवती, प्रमदा, सुमुखी, मुग्धा, सुरूपी.

BONNILY, *adv.* हृष्टवत्, हृष्टपुष्टवत्, सुष्ठु, सुन्दरं, रमणीयप्रकारेण, साधु.

BONNY, *a.* (Pretty) सुन्दरः -री -रं, रूपवान् -वती -वत् (त्), सुरूपः -पी -पं, सुदृश्यः -श्या -श्यं, चारुः -ह्वी -रु.—(Cheerful) हृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं.—(Plump) हृष्टपुष्टः -ष्टा -ष्टं, सुललितः -ता -तं.

BONY, *a.* (Having bones) अस्थिमान् -मती -मत् (त्).—(Strong) दृढाङ्गः -ङ्गी -ङ्गं.—(Made of bone) अस्थिमयः -यी -यं.—(Full of bones) अस्थिपूर्णः -र्णा -र्णं.

BOOBY, *s.* मन्दबुद्धिः *m.*, दुर्मतिः *m.*, दुर्बुद्धिः *m.*, मूढः, मूर्खः, स्थूलधीः *m.*—(A kind of bird) वकः.

BOOK, *s.* पुस्तकं -की, ग्रन्थः, पत्रं, पत्रिका, पुस्तं -स्ती; 'a book of science,' शास्त्रं. This last may be used in connexion with some other word to limit its application; as, 'a book on law,' धर्म्मशास्त्रं; 'a poetical book,' काव्यशास्त्रं.—(A manuscript, written book) लेख्यं, लिखितं.

To BOOK, *v. a.* ग्रन्थे or पुस्तके or लेख्ये समारुह् in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं); 'booked, committed to writing,' लेख्यारूढः -ढा -ढं.

BOOKBINDER, *s.* चर्म्मादिना ग्रन्थपत्रसङ्घन्धा *m.* (न्धृ), ग्रन्थाच्छादनकृत्.

BOOKCASE, *s.* ग्रन्थकुटी, ग्रन्थकोष्ठः, ग्रन्थभाण्डं, ग्रन्थाधारः.

BOOKISH, *a.* ग्रन्थी -न्थिनी -न्थि (न्), पुस्तकी -किनी -कि (न्), शास्त्रज्ञः -ज्ञा -ज्ञं.

BOOKKEEPER, *s.* गणनाध्यक्षः, ग्रन्थसमारोपणकृत्, गणितलेखकः.

BOOKMATE, *s.* सहाध्यायी *m.* (न्).

BOOKSELLER, *s.* ग्रन्थविक्रेता *m.* (तृ), ग्रन्थविक्रयी *m.* (न्), पुस्तकविक्रेता *m.* (तृ).

BOOKWORM, *s.* ग्रन्थखादकः कीटः.—(Too closely given to books) ग्रन्थी *m.* (न्), ग्रन्थासक्तः, ग्रन्थपरः, शास्त्रगर्द्धः, ग्रन्थचुम्बकः.

BOOM, *s.* (A long pole) वातवसनप्रसारणार्थं दीर्घयष्टिः or दण्डः.—(A bar of wood laid across a harbour) पारक्यनौकाप्रवेशनिवारणार्थं पोतबन्धनस्थाने स्थापितम् अवरोधकं.

To BOOM, *v. n.* ऊर्म्मिवत् प्रलुठ् (c. 1. -लोठति -लोठितुं) or उच्छल् (c. 1. -छलति -छलितुं) or पातोत्पातं कृ.

BOON, *s.* वरः, प्रसादः, दानं, प्रदानं, वरदानं, उपकृतं, हितं, अनुग्रहः; 'granting boons,' वरदः -दा -दं.

BOON, *a.* (Gay) हृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, हासी -सिनी -सि (न्),—(Boon-companion) सहपायी *m.* (न्).

BOOR, *s.* ग्रामी *m.* (न्), ग्राम्यजनः, ग्रामवासी *m.* (न्), ग्रामिकः, क्षेत्रिकः, वृषलः.

BOORISH, *a.* ग्राम्यः -म्या -म्यं, ग्रामीयः -या -यं, ग्रामिकः -की -कं, क्षेत्रिकः -की -कं, असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, प्राकृतः -ता -तं, असंस्कृतः -ता -तं.

BOORISHLY, *adv.* ग्राम्यजनवत्, वृषलवत्, असभ्यजनवत्, असभ्यं, अशिष्टं, असंस्कृतप्रकारेण.

BOORISHNESS, *s.* ग्राम्यत्वं -ता, असभ्यता, अशिष्टता, असंस्कृतिः *f.*, वृषलत्वं.

BOOT, *s.* पादुका *f.*, पादूः *f.*, उपानत् *f.* (ह्), पन्नद्धा *f.*, पन्नद्धी, अनुपदीना, जङ्घात्राणं, पादत्रं, पादरक्षणं, पादरक्षः.—(Profit) फलं, लाभः, अर्थः.

To BOOT, *v. a.* (To profit) फलाय or लाभाय भू, फलं or लाभं दा (c. 3. ददाति, दातुं), उपकृ (c. 8. -करोति -कर्त्तुं).

To BOOT, *v. n.* (To put on boots) पादुके अधिरुह् (c. 1. -रोहति -रोढुं) or आरुह् or परिधा (c. 3. -दधाति -धत्ते -धातुं).

BOOT-TREE, *s.* पादुकानां चर्म्मशिथिलीकरणयोग्यं जङ्घाकृति काष्ठयन्त्रं.

BOOTED, *a.* सपादुकः -का -कं, उपानद्दृढपादः -दा -दं, पादुकारूढः -ढा -ढं.

BOOTH, *s.* मण्डपः -पं, पटमण्डपः, दूष्यं, औपकार्य्या.

BOOTLESS, *s.* निरर्थकः -का -कं, अनर्थकः -का -कं, व्यर्थः -र्था -र्थं, निष्फलः

-ला -लं, विफलः -ला -लं, निष्प्रयोजनः -ना -नं, अनामिषः -षा -षं.

Bootmaker, *s.* पादुकाकारः, पादुकाकृत्, पन्नद्धाकृत्, पन्नद्धाकारः, पादुकृत् *m.*

Booty, *s.* लोष्ट्रं, लोत्र or -त्रं, लुप्तं.—(In cattle) गोग्रहः.

Bopeep, *s.* पितृपुत्रकयोः क्रीडाविशेषो यत्र पिता बालविनोदार्थं सन्वस्त इव स्वमुखगोपनं कृत्वा पश्चात् सन्त्रासनार्थम् अकस्माद् बालकमुखनिरीक्षणं करोति.

Borachio, *s.* सुराभाजनं, मद्यभाजनं, कुतूः *f.*—(Drunkard) पानरतः.

Borable, *a.* वेध्यः -ध्या -ध्यं, व्यध्यः -ध्या -ध्यं, छिद्रणीयः -या -यं.

Borage, *s.* खिलरुह ओषधिप्रभेदः.

Borax, *s.* रसशोधनः, लोहद्रावी *m.* (न्), लोहस्नेषणः, विडं, धातुमारिणी.

Bordel, *s.* वेश्याजनसमाश्रयः, वेश्यागृहं, गणिकागृहं, वेश्याश्रयः.

Border, *s.* (Of a river, &c.) तीरं, कूलं, तटं, कच्छः, कच्छान्तः—(Edge of any thing) प्रान्तः, अन्तः -न्तं, उपान्तं, समन्तः, पर्य्यन्तं, सीमा, उत्सङ्गः, धारः.—(Frontier) समन्तः, सामन्तं, पर्य्यन्तं, सीमा; 'dwelling on the border,' सामन्तवासी -सिनी -सि (न्), पर्य्यन्तस्थः -स्था -स्थं; 'the border of a wood,' वनान्तं; 'of a city,' नगरोपान्तं; 'along the border,' प्रान्ततस्.—(Of a garment) अञ्चलः, वस्त्राञ्चलं.—(A garden-bed) स्थलं.

To border, *v. a.* (To surround with a border) प्रान्त (nom. प्रान्तयति -यितुं), समन्त (nom. समन्तयति -यितुं), पर्य्यन्तं कृ.

To border upon, *v. n.* प्रान्ततस् or पर्य्यन्ते or निकटे or समीपं स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते, वर्त्तितुं) or वस् (c. 1. वसति, वस्तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं).—(To approach nearly to, resemble) कल्पः -ल्पा -ल्पं अस् in comp., सदृशः -शी -शं अस्.

Bordered, *p. p.* प्रान्तिनः -ना -नं, समर्य्यादः -दा -दं, वलयितः -ता -तं.

Borderer, *s.* सामन्तवासी *m.* (न्), सीमावासी *m.* (न्), निकटवर्त्ती *m.* (न्), समीपवासी *m.* (न्), प्रतिवासी -सिनी -सि (न्).

Bordering, *a.* प्रत्यन्तः -न्ता -न्तं, सामन्तः -न्ता -न्तं, पर्य्यन्तस्थः -स्था -स्थं.

Bore, *s.* (Hole made by boring) छिद्रं, रन्ध्रं.—(The instrument of boring) वेधनी, वेधनिका.—(Diameter of a hole) सुषिरं, शुषिरं, छिद्रं, व्यासं, छिद्रव्यासं.—(A swelling tide) वानं.

To bore, *v. a.* व्यध् (c. 4. विध्यति, व्यद्धुं), छिद्र् (c. 10. छिद्रयति -यितुं), शुषिरीकृ.

Boreal, *a.* उत्तरः -रा -रं, उदङ् -दीची -दक् (च्), उदीचीनः -ना -नं.

Boreas, *s.* उत्तरवायुः *m.*, उदीचीनवातः.

Bored, *p. p.* (Pierced) विद्धः -द्धा -द्धं, छिद्रितः -ता -तं, शुषिरः -रा -रं; 'having the ears bored,' छिद्रकर्णः -र्णी -र्णं.

Borer, *s.* वेधकः, छिद्रकर्त्ता.—(An instrument) वेधनी, वेधनिका.

To be born, *v. pass.* जन् (c. 4. जायते, जनितुं), अभिजन्, सञ्जन्, उत्पद् (c. 4. -पद्यते -पत्तुं), प्रभु in pass. (-भूयते), सम्भू (c. 1. -भवति -भवितुं).

Born, *p. p.* जातः -ता -तं, जनितः -ता -तं, उपजातः -ता -तं, उत्पन्नः -न्ना -न्नं, उत्पादितः -ता -तं, सम्भूतः -ता -तं, प्रसूतः -ता -तं, प्रभवः -वा -वं, कृतजन्मा -न्मा -न्म (न्), उत्पत्तिः -ता -तं; 'born blind,' जात्यन्धः; 'a born slave.' गर्भदासः.

Borne, *p. p.* सोढः -ढा -ढं, ऊढः -ढा -ढं, क्षान्तः -न्ता -न्तं; 'easy to be borne,' सुसहः -हा -हं, सुवहः -हा -हं; 'grass borne along by the wind,' वात्याप्रेरिततृणं; 'it is borne on the shoulder,' स्कन्धेन समुह्यते

Borough, *s.* नगरं -री, पुरं -री, प्रजाप्रतिनिधिसभायां सामाजिकजनप्रेरणाधिकारयुक्ता नगरी.

To borrow, *v. a.* ऋणं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), ऋणं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), याच् (c. 1. याचति, याचितुं), ऋणं परियाच् निरूपितकालपर्य्यन्तं परद्रव्यप्रयोगं प्रार्थ्

Borrow, *s.* (The thing borrowed) याचितकं, प्रतिदेयं.

Borrower, *s.* ऋणग्राही *m.* (न्), ऋणग्रहः, ऋणप्रार्थकः, ऋणप्रार्थयिता *m.* (तृ), याचकः, ऋणयाचकः.

Borrowing, *s.* ऋणग्रहः -हणं, ऋणयाचना, याचना, ऋणप्रार्थनं.

Bosky, *a.* तरुगुल्मावृतः -ता -तं, वार्क्षः -क्षी -क्षं.

Bosom, *s.* उरः *n.* (स्), क्रोडं -डा, अङ्कः, वत्सं, वक्षः *n.* (स्), वक्षस्स्थलं, भुजान्तरं.—(Female breast) स्तनः, स्तनौ *m. du.*, कुचः, कुचतटं, वक्षोरुहः, वक्षोजं, उरसिजः, उरसिरुहः, स्तनकुट्मलं.—(The heart) हृदयं, अन्तःकरणं, चित्तं, मनः *n.* (स्), मर्म्म *n.* (न्).—(A secret receptacle) गर्भः.

Boss, *s.* गण्डः, उच्चैःप्रकारेण खचित अलङ्कारः, पिण्डः.

Bossed or bossy, *a.* गण्डखचितः -ता -तं, गण्डानुविद्धः -द्धा -द्धं.

Botanic, botanical, *a.* उद्भिद्विद्याविषयः -या -यं, वृक्षादिविद्यासम्बन्धकः -का -कं.

Botanist, *s.* उद्भिद्विद्याज्ञः, वृक्षादिविद्यातत्त्वज्ञः, वृक्षादिशास्त्रपण्डितः.

Botany, *s.* उद्भिद्विद्या, ओषधिविद्या, वृक्षलतातृणादिविद्या, वृक्षायुर्वेदः.

Botch, *s.* दद्रुः *m.*, पामा *n.* -मा *f.* (न्), व्रणः, सिध्मं, कच्छूः *f.*, त्वक्पुष्पं.—(Flaw) दोषः, छिद्रं.—(A patch) कन्था, कर्पटः.

To botch, *v. a.* (To patch old clothes) जीर्णवस्त्राणि or चीरवस्त्राणि सिव् (c. 4. सीव्यति, सेवितुं) or सूच्या सन्धा (c. 3. -धत्ते -धातुं).—(To mark with stains) मलिनं (nom. मलिनयति -यितुं).—(To spoil) दुष् in caus. (दूषयति -यितुं).

Botcher, *s.* जीर्णवस्त्रसूचिकः, चीरवस्त्रभेदकः, कर्पटवस्त्रभेदी *m.* (न्).

Botchy, *a.* पामनः -ना -नं, दद्रुणः -णा -णं, कच्छुरः -रा -रं, सिध्मलः -ला -लं. व्रणमयः -यी -यं, मली -लिनी -लि (न्), सदोषः -षा -षं.

Both, *a.* उभौ *m. du.*, उभयः -या -यं, द्वयं; 'on both sides,' उभयतस्, उभयत्र; 'in both ways,' उभयथा; 'for both objects,' उभयार्थं; 'both hands,' हस्तद्वयं.

Both, *conj.* (And) च -च.—(As well as) तथा. 'Both' may be expressed by the use of the indeclinable participle; as, 'he both labours and suffers reproach,' परिश्रम्य निन्दां भुङ्क्ते.

To bother, *v. a.* क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), पीड् (c. 10. पीडयति -यितुं), अभिपीड्, प्रपीड्, बाध् (c. 1. बाधते, बाधितुं), व्यथ् (c. 10. व्यथयति -यितुं).

Bothered, *p. p.* क्लेशितः -ता -तं, पीडितः -ता -तं, व्यथितः -ता -तं.

Bottle, *s.* काचकूपी, कूपी, कुतूः *f.*, काचपात्रं, काचभाजनं, सुराभाजनं, मद्यभाजनं, पुटग्रीवः.

To bottle, *v. a.* काचकूप्यां or कुत्वां निविश् in caus. (-वेशयति -यितुं).—(To bottle wine, &c.) कूप्यां or कुतूं मद्येन पॄ in caus. (पूरयति -यितुं).

Bottled, *a.* (Big-bellied) लम्बोदरः -रा -रं.—(As wine) कूपीनिवेशितः -ता -तं.

Bottlescrew, *s.* कुतूमध्ये or काचकूपीमध्ये यत छिद्रप्रतिबन्धकं तरुत्वङ्निर्म्मितं द्रव्यं विद्यते तदाकर्षणयोग्यं परिवर्त्तैकयन्त्रं or कुटिलयन्त्रं.

Bottom, *s.* (The lowest part of any thing) अधोभागः, तलं, अधःस्थानं, अधोवशः; 'the bottom of a tree,' वृक्षतलं.—(Low ground) दरीभूः *f.*, दरी, निम्नभूमिः *f.*, प्रान्तरं, उपत्यका, शैलोपत्यका.—(Dregs) मलं, खलः, किट्टं, शेषं, अवशेषं.—(Foundation) मूलं.

To bottom, *v. n.* (To rest upon) अवलम्ब् (c. 1. -लम्बते -लम्बितुं).

समालम्ब्. Sometimes expressed by मूल in comp.; as, 'all actions are bottomed upon money,' धनमूलाः क्रियाः सर्वाः.

Bottomless, *a.* अतलस्पर्शः -र्शा -र्शं, तलहीनः -ना -नं, अगाधः -धा -धं.

Bougie, *s.* (Wax taper) सिक्थकमयो दीपः, वर्त्ती.

Bough, *s.* शाखा, विटपः, तरुविटपः, लता.

Bought, *p. p.* क्रीतः -ता -तं, क्रयक्रीतः -ता -तं.

To bounce, *v. n.* (To make a sudden noise) स्वन् (c. 1. स्वनति, स्वनितुं), ध्वन (c. 1. ध्वनति, ध्वनितुं), क्वण् (c. 1. क्वणति, क्वणितुं).—(To spring against with great force) प्रस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), प्रपत् (c. 1. -पतति -पतितुं), अभिप्लु (c. 1. -प्लवते -प्लोतुं).—(To spring, leap) प्लु, उत्प्लु.—(To boast, bully) विकत्थ् (c. 1. -कत्थते -कत्थितुं), तर्ज् (c. 1. तर्जति, तर्जितुं).

Bounce, *s.* (A sudden noise) ध्वनिः *m.*, क्वणः, क्वणितं.—(A sudden blow) एकपाताभिघातः, अकस्मादाघातः.—(A boast, threat) विकत्थनं -त्था, भर्त्सनं.

Bouncer, *s.* (A boaster, bully) विकत्थी *m.* (न्), शूरम्मन्यः, भर्त्सनकारः, दाम्भिकः.

Bound, *s.* (A limit) अन्तः -न्तं, समन्तः, पर्य्यन्तं, प्रान्तः, सीमा, परिसीमा, अवधिः *m.*, मर्य्यादा; 'without bounds,' अनन्तः -न्ता -न्तं, अत्यन्तः -न्ता -न्तं.—(A leap) प्लवः, प्लवनं, प्लुतं.—(Rebound) प्रतिघातः, प्रतिहतिः *f.*, उत्प्लवः, उत्पतनं.

To bound, *v. a.* (To limit) प्रान्त (nom. प्रान्तयति -यितुं), समन्त, समर्य्यादं -दां -दं कृ, पर्य्यन्तं कृ.—(To restrain) नियम् (c. 1. -यच्छति -यन्तुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

To bound, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति, वल्गितुं), आवल्ग्.—(To rebound) उत्प्लु, उत्पत् (c. 1. -पतति -पतितुं).

Bound, *p. p.* बद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, निबन्धितः -ता -तं, सन्धितः -ता -तं, सन्धानितः -ता -तं, सन्दितः -ता -तं, मृतः -ता -तं, मूर्णः -र्णा -र्णं, उद्दितः -ता -तं, सितः -ता -तं.—(In, leather) चर्म्मावनद्धः -द्धा -द्धं, चर्म्मोच्छादितः -ता -तं; 'dignity is bound up with (dependent on) riches,' गौरवं धननिबन्धितं or धनप्रतिष्ठितं or धनसम्बद्धं.

Bound for, *part. a.* जिगमिषुः -षुः -षु, प्रस्थितः -ता -तं, प्रयातः -ता -तं, प्रयास्यन् -स्यन्ती -स्यत् (त्).

Boundary, *s.* सीमा *f.* -मा *m.* (न्) or परिसीमा, पर्य्यन्तं, अन्तः -न्तं, समन्तः, प्रान्तः, वलयः, अवधिः *m.*, मर्य्यादा, परिसरः, उपकण्ठं —(On the boundary) पर्य्यन्तस्थः -स्था -स्थं; 'boundary tree,' सीमावृक्षः; 'boundary mark,' सीमालिङ्गं, सीमाचिह्नं, स्थलसीमा *m.* (न्).

Bounded, *p. p.* प्रान्तितः -ता -तं, समर्य्यादः -दा -दं, वलयितः -ता -तं

Bounden, *a.* बद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं; 'a bounden duty,' अवश्यकता, कर्त्तव्यता, नियमः.

Bounding-stone, *s.* बालानां क्रीडाप्रस्तरः.

Boundless, *a.* अनन्तः -न्ता -न्तं, अमितः -ता -तं, अपरिमितः -ता -तं, अप्रमेयः -या -यं, अमेयः -या -यं, अत्यन्तः -न्ता -न्तं; 'of boundless glory,' अमिततेजाः -जाः -जः (स्).

Boundlessness, *s.* अनन्तता, आनन्त्यं, अत्यन्तता, अप्रमेयता, अमेयत्वं.

Bounteous, bountiful, *a.* दानशीलः -ला -लं, वदान्यः -न्या -न्यं, बहुप्रदः -दा -दं, अतिदाता -त्री -तृ (तृ), त्यागशीलः -ला -लं, दायकः -का -कं, स्थूललक्ष्यः -क्ष्या -क्ष्यं, उदारः -रा -रं, दयालुः -लुः -लु, मुक्तहस्तः -स्ता -स्तं, अकृपणः -णा -णं.

Bounteously, bountifully, *adv.* वदान्यवत्, वदान्यतया, उदारवत्, स्थूललक्ष्यतया, अतिदानेन, अतित्यागेन, दयापूर्व्वकं, अकार्पण्येन.

Bounteousness, bountifulness, *s.* दानशीलत्वं, स्थूललक्ष्यत्वं, अतिदानं, त्यागशीलता, त्यागिता, अतिसर्ज्जनं, वदान्यता, मुक्तहस्तत्वं, अकार्पण्यं, दयालुत्वं.

Bounty, *s.* (Favour) अनुग्रहः, दया, कृपा, प्रसादः.—(Generosity) वदान्यता, त्यागशीलता, दयालुत्वं.—(Gift) दानं, प्रदानं, स्वेच्छया दानं; 'king's bounty,' राजवर्ज्जनं.

Bouquet, *s.* कुसुमस्तवकः, स्तवकः, पुष्पगुच्छः, गुच्छः, समाली, गुलुम्छः.

To bourgeon, *v. n.* स्फुट् (c. 6. स्फुटति, स्फुटितुं), अङ्कुर (nom. अङ्कुरयति -यितुं).

Bourn, *s.* अन्तः -न्तं, पर्य्यन्तं, समन्तः, अवधिः *m.*, मर्य्यादा, सीमा.

To bouse, *v. n.* अतिशयेन सुरापानं or मद्यपानं कृ.

Bousy, *a.* मद्यपीतः -ता -तं, पानप्रसक्तः -क्ता -क्तं, क्षीवः -वा -व.

Bout, *s.* (A turn) वारः, वासरः; 'at one bout,' एकवारे.—(A drinking bout) सम्पीतिः *f.*

Bow, *s.* (Salutation) नमस् *ind.*, प्रणामः, प्रणतिः *f.*, नमस्कारः.—(A rainbow) इन्द्रायुधं, शक्रधनुः *n.* (स्), इन्द्रचापः.—(A knot) ग्रन्थिः *m.*, पाशः.—(Of a ship) पोताग्रं, नौकाग्रं, नावो ऽग्रभागः, मङ्क्तः.

Bow, *s.* (A weapon) धनुः *m.*, -नुः *n.* (स्), -नु *n.*, धन्वा *m.*, -न्व *n.* (न्), चापः, शरासनं, कार्मुकं, इष्वासः, कोदण्डः or -ण्डं, शरावापः; 'middle of the bow,' लक्तकः, धनुर्मध्यं.—(For playing stringed instruments) कोणः, शारिका, परिवादः.—(Bow of Arjuna) गाण्डीवः.—(Of Karṅa) कालपृष्ठं.—(Of Siva) पिनाकः, अजगवं.

To bow, *v. a.* (To bend) नम् in caus. (नामयति or नमयति -यितुं) or नम् (c. 1. नमति, नन्तुं), प्रणम्, अभिनम्, विनम्, अवनम्, आनम्; कुब्ज् (c. 1. कुब्जति, कुब्जितुं), नम्रीकृ, प्रह्वीकृ, भुग्नीकृं.—(To bow the head) शिरसा प्रणम्.

To bow, *v. n.* नम् (c. 1. नमति, नन्तुं), प्रणम्, अभिनम्, विनम्, नम्रीभू; 'bowing the body,' प्रणम्य कायं; 'bowing the head,' प्रणम्य शिरसा, प्रह्वीभू.—(To submit, yield) क्षम् (c. 1. क्षमते, क्षमितुं, क्षन्तुं), अभ्युपे (-उपैति -उपैतुं).

Bow-bent, *a.* धनुराकृतिः -तिः -ति, कुटिलः -ला -लं, वक्रः -क्रा -क्रं.

Bowed, *p. p.* नतः -ता -तं, नामितः -ता -तं, आनतः -ता -तं, अवनतः -ता -तं, परिणतः -ता -तं, प्रणतः -ता -तं, अवनतः -ता -तं, नम्रः -म्रा -म्रं, नम्रमूर्त्तिः -र्त्तिः -र्त्ति, प्रह्वः -ह्वा -ह्वं, प्रह्वीकृतः -ता -तं.

Bowels, *s.* अन्त्रं *n. sing.*, अन्त्राणि *n. pl.*, नाड्यः *f. pl.*, कोष्ठः *m. sing.* —(Compassion) कृपा, दया.—(The inner part) अभ्यन्तरं, गर्भः, विलं, विवरं.

Bower, *s.* कुञ्जः, निकुञ्जः, मञ्जरीकुञ्जः, लतानिर्म्मितं मन्दिरं, कुञ्जकुटीरः, मण्डपः, झाटः, वञ्जुरं, कुटङ्कः.—(Cottage) कुटीरः. पर्णशाला.—(Anchor) नौकाया अग्रभागे स्थापितो ऽङ्कुशाकारो लोहबन्धः.

To bower, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), परिच्छद् (c. 10. -छादयति -यितुं).

Bowery, *a.* कुञ्जवान् -वती -वत् (त्), लतावृतः -ता -तं, लतापरिच्छन्नः -न्ना -न्नं.

Bowl, *s.* (A vessel for liquids) पात्रं, भाजनं, कंसः -सं, शरावः, पुटकः.—(A ball) गुलिका.—(The bowl, poison) विषं.

To bowl, *v. a.* गुलिकाम् आवृत् in caus. (-वर्त्तयति -यितुं).—(To play at bowls) गुलिकाभिः क्रीड् (c. 1. क्रीडति, क्रीडितुं).

Bowler, *s.* गुलिकावर्त्तनकृत्, गुलिकावर्त्तकः, गुलिकाक्रीडाकृत्.

Bow-legged, *a.* प्रभुः -भुः -भु, प्रगतजानुः -नुः -नु, विरलजानुः -नुः -नु

Bowling-green, *a.* गुलिकाक्रीडायोग्यं समस्थलं or समस्थलीकृतो भूभागः.

Bowman, *s.* धन्वी *m.* (न्), धनुष्मान् *m.* (त्), धानुष्कः, धनुर्धारी *m.* (न्), धनुर्धरः, धनुर्भृत् *m.*, इष्वासः, इषुधरः, काण्डीरः, काण्डवान् *m.* (त्),

निषङ्गी *m.* (न्), अस्त्री *m.* (न्), शार्ङ्गी *m.* (न्).

Bowshot, *s.* वाणगोचरं, शरगोचरं, धनुःक्षेपणं, शरैकक्षेपः.

Bowsprit, *s.* पोताग्रवहिःप्रलम्बो गुणवृक्षकः. *See* Boltsprit.

Bowstring, *s.* ज्या, गुणः, धनुर्गुणः, मौर्व्वी, भारवं, शिञ्जिनी, तावरं, पत्त्रिका.

Bow-window, *s.* धनुराकृति वातायनं, धनुराकारो गवाक्षः, प्रग्रीवः.

Bowyer, *s.* धनुर्धरः, धनुर्भृत् *m.*, धन्वी *m.* (न्), धनुष्मान् *m.* (त्).

Box, *s.* (A kind of tree) अतिदृढो वृक्षप्रभेदः.—(A case to hold any thing) भाण्डं, सम्पुटः, सम्पुटकः, मुद्राधारः, आधारः, पात्रं, भाजनं, समुद्गः, पेटिका, वासनं.—(For spectators) प्रेक्षागारं.—(A blow) मुष्ट्याघातः, मुष्टिप्रहारः, मुष्टिपातः, पाणिघातः, कराघातः, कीला, आघातः, प्रहारः, बाहुप्रहरणं.

To box, *v. n.* (To fight with the fist) मल्लयुद्धं कृ, मुष्ट्या युध् (c. 4. युध्यते, योद्धुं), मुष्टीमुष्टि or बाहूबाहवि युध्.

To box, *v. a.* (To strike with the fist) मुष्ट्या अभिहन् (c. 2. -हन्ति -हन्तुं), निहन्, or तड् (c. 10. ताडयति -यितुं) or प्रहृ (c. 1. -हरति -हर्त्तुं).—(To enclose in a box) सम्पुटके or भाण्डे निविश् in caus. (-वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं).

Boxen, *a.* पूर्व्वोक्तवृक्षकाष्ठनिर्म्मितः -ता -तं.

Boxer, *s.* मल्लयोधः, झल्लः, मल्लः, पाणिघातः, बाहुप्रहरणः, बाहुयोधी *m.* (न्), रङ्गावतारी *m.* (न्).

Boxing, *s.* मौष्टा, मल्लयुद्धं, मुष्टिपातः, पाणिघातः, बाहुयुद्धं, बाहुप्रहरणं.—(Boxing-match) मल्लयात्रा.

Boy, *s.* कुमारः -रकः, बालः, बालकः, पुत्रः, पुत्रकः, अप्राप्तव्यवहारः.—(A word of contempt for a young man) माणवः, माणवकः; 'multitude of boys,' माणव्यं.

Boyhood, *s.* बालकत्वं, बाल्यं, शैशवं, शिशुत्वं, कौमारं, कैशोरं, माणव्यं.

Boyish, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालकशीलः -ला -लं, कौमारः -री -रं, शिशुयोग्यः -ग्या -ग्यं, माणवीणः -णा -णं.

Boyishly, *adv.* बालरूपेण, बालकवत्, शिशुवत्, कुमारवत्, बालिशप्रकारेण.

Boyishness, *s.* बालिश्यं, बालेयत्वं, बालकत्वं, कुमारशीलत्वं, शिशुशीलता.

Brabble, *s.* कलहः, व्यवक्रोशनं, विवादः, वाग्युद्धं, विप्रलापः, द्वन्द्वं.

To brabble, *v. n.* कलह (nom. कलहायते -यितुं), व्यवक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

To brace, *v. a.* बन्ध् (c. 9. बध्नाति, बन्द्धुं), योक्त्र (nom. योक्त्रयति -यितुं).—(To strain up, tighten) सन्निबन्ध्, संस्तम्भ् (c. 9. -स्तभ्नाति -स्तम्भितुं), दृढ् (nom. दृढयति -यितुं).

Brace, *s.* (A pair) युगं, युग्मं, युगलं, द्वयं, यमलं, यामलं.—(Bandage) बन्धनं, बन्धः.—(Strap) चर्म्मबन्धः -न्धनं.—(Of a coach) रथालम्बि चर्म्मबन्धादि.—(Of a ship) नौकासम्बन्धी रज्जुविशेषः.

Bracelet, *s.* वलयः -यं, कङ्कणं, करभूषणं, अङ्गदं, हस्तसूत्रं, वालकः, कक्षुः *m.*, आवापकः, पारिहार्य्यः, कटकः.

Brachial, *a.* बाहुसम्बन्धी -न्धिनी -न्धि (न्).

Brachygraphy, *s.* सङ्क्षिप्तलिखनविद्या, सङ्क्षिप्ताक्षरलिखनं, सङ्केतलेखनविद्या.

Bracket, *s.* नागदन्तः -न्तकः, नागः, हस्तिदन्तः, गजदन्तः, सालेयः.

Brackish, *a.* क्षाररसयुक्तः -क्ता -क्तं, ईषल्लवणः -णा -णं, क्षारसंसृष्टः -ष्टा -ष्टं.

Brackishness, *s.* क्षारः, क्षारत्वं, क्षाररसः.

Brad, *s.* लोहमयः कीलविशेषः, क्षुद्रशङ्कुः *m.*

To brag, *v. n.* कत्थ् (c. 1. कत्थते, कत्थितुं), विकत्थ्, श्लाघ् (c. 1. श्लाघते, श्लाघितुं), with inst. of the thing, आत्मानं श्लाघ्.

Brag, *s.* अहङ्कारोक्तिः *f.*, विकत्था -त्थनं, दम्भः, आहोपुरुषिका अहमहमिका, आत्मश्लाघा, गर्व्वितवाक्यं, शूरमानं, परिकीर्त्तनं.

Braggart, braggadocio, bragger, *s.* शूरम्मन्यः, शूरमानी *m.* (न्), पिण्डीशूरः, उपजल्पी *m.* (न्), विकत्थी *m.* (न्), अवलिप्तः, अहङ्कारी *m.* (न्), अहङ्कारपूर्णः, आत्मश्लाघी *m.* (न्).

Braggingly, *adv.* अहङ्कारेण, साहङ्कारं, विकत्थया, आत्मश्लाघापूर्व्वं, दम्भात्.

Brahmá, *s.* (The first deity of the Hindu triad, the Creator of the world, Providence) ब्रह्मा *m.* (न्), वेधाः *m.* (स्), विधिः *m.*, विरिञ्चिः *m.*, दुहिणः.—(As creator of the world) स्रष्टा *m.* (ष्ट्र), विश्वसृक् -ट् (ज्).—(Born in the lotus which sprung from the navel of Vishńu) नाभिजः, नाभिभूः *m.*, अब्जजः, अब्जयोनिः, पद्मगर्भः, पद्मभूः *m.*, पद्मासनः, कमलासनः.—(The self-existent) स्वयम्भूः *m.*, आत्मभूः *m.*—(Born from the golden egg) हिरण्यगर्भः.—(As elder of the deities) सुरज्येष्ठः.—(The four-faced one) चतुर्म्मुखः, चतुराननः.—(The great father and lord of all) पितामहः, प्रजापतिः *m.*, लोकेशः.—(Supporter of all) धाता *m.* (तृ), विधाता *m.* (तृ).—(Exalted in heaven) परमेष्ठः -ष्ठी *m.* (न्).

Brahmin or -bráhman, *s.* ब्राह्मणः, विप्रः, बाडवः.—(As the first-born among mortals) अग्रजन्मा *m.* (न्).—(As receiving second birth at his investiture with the sacred thread) द्विजः, द्विजातिः *m.*, द्विजन्मा *m.* (न्).—(As learned in the Vedas) श्रोत्रियः.—(As a deity upon earth) भूदेवः, भूमिदेवः.—(As born from the mouth of Brahmá) मुखजः.—(A Brahmin by birth but not by duties) ब्राह्मणब्रुवः.—(The wife of a Brahmin) ब्राह्मणी.—(The condition of a Brahmin) ब्राह्मण्यं, ब्राह्मणता.

Brahminical, *a.* ब्राह्मः -ह्मी -ह्मं, ब्राह्मणजातीयः -या -यं; 'the brahminical caste,' ब्राह्मणजातिः *f.*

Brahminicide, *s.* ब्रह्महत्या, ब्राह्मणवधः.—(One who kills a Brahmin) ब्रह्महा *m.* (न्).

To braid, *v. a.* वेणीकृ, वेणिरूपेण केशान् रच् (c. 10. रचयति -यितुं) or ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति, ग्रन्थितुं) or केशसंस्कारं कृ.—(Weave, interweave) वे (c. 1. वयति, वातुं), ग्रन्थ्, उत्खच् (c. 10. -खचयति -यितुं).

Braid, *s.* (Of hair) वेणिः -णी *f.*, प्रवेणिः, कवरः -री, धम्मिल्लः, केशवेशः, केशगर्भः.—(A knot) ग्रन्थिः *m.*, बन्धः.

Braided, *p. p.* वेणीभूतः -ता -तं, ग्रथितः -ता -तं, कवरः -री -रं.

Brain, *s.* मस्तिष्कं or -स्कः, गोहीं, मस्तकस्नेहः.—(Intellect) बुद्धिः *f.*, मतिः *f.*, धीः *f.*

To brain, *v. a.* मस्तकं निष्पिष्य मस्तिष्कं वहिःकृत्य हन् (c. 2. हन्ति, हन्तुं).

Brainish, *a.* मदोन्मत्तः -त्ता -त्तं, मदोत्तप्तः -प्ता -प्तं, उत्तप्तः -प्ता -प्तं.

Brainless, *a.* मस्तिष्कहीनः -ना -नं, निर्बुद्धिः -द्धिः -द्धि, दुर्मतिः -तिः -ति.

Brainpan, *s.* कपालः -लं, मस्तकः -कं, कर्प्परः, शिरोस्थि *n.*, मुण्डः, करोटः, शीर्षकं.

Brainsick, *a.* मूढबुद्धिः -द्धिः -द्धि, विभ्रान्तशीलः -ला -लं, चञ्चलमतिः -तिः -ति.

Brainsickness, *s.* मूढता, चञ्चलत्वं, चपलत्वं, प्रामाद्यं, प्रमादित्वं.

Brake, *s.* (A thicket of brambles) कण्टकगहनं, गुल्मगहनं, झाटः -टं.—(A snaffle) खलीनः -नं, मुखयन्त्रणं.—(That which moves a military engine) युद्धयन्त्रवाहनं, युद्धयन्त्रचालनसाधनं.

Bramble, *s.* कण्टकगुल्मः, कण्टकस्तम्बः, शृगालकोलिः *m.*, शृगालकण्टकः, गोक्षुरः.

Brambly, *a.* शृगालकण्टकावृतः -ता -तं, कण्टकी -किनी -कि (न्).

Bramin, *s.* *See* Brahmin.

BRAN, *s.* तुषः -षा, धान्यकल्कं, धान्यत्वक् *f.* (च्), बुस.

BRANCH, *s.* शाखा, लता, विटपः, तरुविटपः, तरुभुजः, काण्डः, विस्तारः; 'a large branch,' स्कन्धशाखा, शाला.—(Of a river) कुसरित् *f.*, उपनदी, उपसरित्, अल्पनदी, नदीवङ्कः, वङ्कुः *f.* प्रणालः -ली.—(A section, subdivision) शाखा, अङ्गः, सर्गः, परिच्छेदः, विच्छेदः, अङ्गरकन्धः; a branch of the Vedas,' वेदाङ्गः.—(Offspring) कुलसन्ततिः *f.*, कुलसन्तानः, अपत्यं, प्रवरं.

To BRANCH, *v. n.* शाखा (nom. शाखायते), लता (nom. लतायते), शाखारूपेण विस्तृ in pass. (-स्तीर्य्यते) or भिद्रीभू or विभिद् in pass. (-भिद्यते) or विच्छिद् in pass. (-छिद्यते).—(To speak diffusely) विस्तरशस् or सुविस्तरं वद् (c. 1. वदति, वदितुं).

To BRANCH, *v. a.* शाखावत् पृथक्कृ or विभिद् (c. 7. -भिनत्ति -भेत्तुं).

BRANCHLESS, *a.* शाखाहीनः -ना -नं, विटपरहितः -ता -तं, अभिन्नः -न्ना -न्नं.

BRANCHY, *a.* शाखी -खिनी -खि (न्), शाख्यः -ख्या -ख्यं, विस्तीर्णशाखः -खा -खं, काण्डीरः -रा -रं, विस्तीर्णः -र्णा -र्णं, विस्तारयुक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं.

BRAND, *s.* (A burning stick) उल्का, दग्धकाष्ठं, तप्तकाष्ठं.—(A mark of infamy) अपकीर्त्तिचिह्नं, अभिशस्ताङ्कः, अङ्कः, अङ्कनं.

To BRAND, *v. a.* अपमानचिह्नेन अङ्क् (c. 10. अङ्कयति -यितुं), तप्तलोहेन चिह्न् (c. 10. चिह्नयति -यितुं), अभिशस्ताङ्कं कृ.

BRANDED, *p. p.* अपमानचिह्नाङ्कितः -ता -तं, अभिशस्ताङ्कचिह्नितः -ता -तं, कृताङ्कः -ङ्का -ङ्कं; 'branded with infamy,' दुर्नामग्रस्तः -स्ता -स्तं.

To BRANDISH, *v. a.* भ्रम् in caus. (भ्रमयति or भ्रामयति -यितुं); 'they brandished their pikes,' शूलानि भ्रमयाञ्चक्रुः; विधू (c. 5. -धूनोति -धवितुं), उल्लल् in caus. (-ल्लालयति -यितुं), व्याव्यध् (c. 4. -विध्यति -व्यद्धुं)

BRANDISHED, *p. p.* उद्भ्रान्तः -न्ता -न्तं, अवधूतः -ता -तं, उल्लालितः -ता -तं.

BRANDLING, *s.* कृमिप्रभेदः स च मत्स्यप्रलोभार्थं कदाचित् वडिशे निवेश्यते.

BRANDY, *s.* मद्यशुण्डा, मद्यासवं, सुरा, आसवं, शीधुः *m.*, वारुणी.

BRANGLE, *s.* (Squabble) व्यावक्रोशी, व्यवक्रोशनं, उच्चैर्भाषणं, कलहः, विप्रलापः.

BRANNY, *a.* तुषाकृतिः -तिः -ति, तुषमयः -यी -यं, धान्यत्वङ्मयः -यी -यं.

BRASIER OR BRAZIER, *s.* (Worker in brass) ताम्रकारः, कांस्यकारः, कामन्धमी *m.* (न्).—(A pan to hold coals) अङ्गारशकटी, अङ्गारपात्रं.

BRASIERY, *s.* कुप्यशाला, सन्धानी.

BRASS, *s.* रीतिः *f.*, रेत्यं, आरः, ताम्रं, कांस्यं -स्यकं, पित्तलं, पीतलोहं, पीतलं -लकं, आरकूटः -टं.—(Impudence) निर्लज्जता, धार्ष्ट्यं, प्रगल्भता.

BRASSY, *a.* रैत्यः -त्यी -त्यं, कांस्यमयः -यी -यं, पित्तलगुणविशिष्टः -ष्टा -ष्टं.

BRAT, *s.* शिशुः *m.*, बालकः, बालः, पुत्रकः, शावकः.

BRAVADO, *s.* विकत्था, अहङ्कारवाक्यं, आत्मश्लाघा, आहोपुरुषिका, अहमहमिका.

BRAVE, *a.* शूरः -रा -रं, वीरः -रा -रं, प्रवीरः -रा -रं, पराक्रान्तः -न्ता -न्तं, विक्रान्तः -न्ता -न्तं, निर्भयः -या -यं, धृष्टः -ष्टा -ष्टं, साहसिकः -की -कं, उद्भटः -टा -टं.—(Excellent) साधुः -धुः -धु, उत्तमः -मा -मं, प्रशस्तः -स्ता -स्तं.—(Noble) उदारः -रा -रं.

BRAVE, *s.* (A bully) शूरम्मन्यः, दम्भी *m.* (न्).—(Defiance) समाह्वानं, क्रन्दनं, आस्पन्द्रा.

To BRAVE, *v. a.* (To menace) भर्त्स् (c. 10. भर्त्सयते -यितुं), अभिभर्त्स्, अवभर्त्स्, परिभर्त्स्, तर्ज् (c. 1. तर्जति, तर्जितुं).—(To challenge) आह्वे (c. 1. -ह्वयते -ह्वातुं), समाह्वे, क्रन्दनं कृ, स्पर्ध् (c. 1. स्पर्धते, स्पर्धितुं).

To BRAVE, *v. n.* (To carry a boasting appearance) दाम्भिकवद् वृत् (c. 1. वर्त्तते, वर्त्तितुं) or चर् (c. 1. चरति, चरितुं), धृष् (c. 5. धृष्णोति, धर्षितुं), दृप् (c. 4. दृप्यति, दर्प्तुं).

BRAVED, *p. p.* (Challenged) आहूतः -ता -तं, समाहूतः -ता -तं.

BRAVELY, *adv.* (In a brave manner) सवीर्य्यं, शूरवत्, वीरवत्, अभीतवत्, सपराक्रमं, शौर्य्येण, निर्भयं, प्रसभं.—(Excellently) साधु, प्रशस्तं, सु prefixed.

BRAVERY, *s.* शूरता, शौर्य्यं, वीरता, वीर्य्यं, पराक्रमः, विक्रमः, कापुरुष्यराहित्यं; 'to show bravery in battle,' पराक्रम् (c. 1. -क्रमति -क्रमितुं), विक्रम्.—(Bravado, boast) विकत्था, आस्पन्द्रा.—(Magnificence) प्रतापः, तेजः *n.* (स्).

BRAVINGLY, *adv.* दाम्भिकवत्, सदम्भं, आह्वानपूर्व्वकं, समाह्वानक्रमेण.

BRAVO, *interj.* साधु.—(A murderer) घातकः, दस्युः *m.*, आततायी *m.* (न्).

To BRAWL, *v. n.* व्यवक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), कलह (nom. कलहायते -यितुं), वैर (nom. वैरायते -यितुं), विवद् (c. 1. -वदति -वदितुं), विप्रलप् (c. 1. -लपति -लपितुं).

BRAWL, *s.* कलहः, व्यवक्रोशः, व्यावक्रोशी, आक्रोशः, उच्चैर्भाषणं, उच्चैर्घुष्टं, व्यावभाषी, विवादः, वाग्युद्धं, विप्रलापः, द्वन्द्वं, संरावः.

BRAWLER, *s.* कलहकारः -री *m.* (न्), कलहप्रियः, विरोधी *m.* (न्), कलिप्रियः, युयुत्सुः *m.*

BRAWN, *s.* (The flesh of a boar) शूकरमांसं.—(The musculous part of the body) स्नायुः *f.*, स्नसा.—(The arm) बाहुः *m.*—(A boar) शूकरः, वराहः.

BRAWNINESS, *s.* मांसलत्वं, दृढाङ्गता, शरीरदृढता, दृढिमा *m.* (न्).

BRAWNY, *a.* मांसलः -ला -लं, स्नायुमान् -मती -मत् (त्), दृढाङ्गः -ङ्गी -ङ्गं.

To BRAY, *v. a.* (To pound) चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, विचूर्ण्, पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, विनिष्पिष्, उत्पिष्.

To BRAY, *v. n.* (Like an ass) गर्हभवद् रु (c. 2. रौति, रवितुं) or चित्कारं कृ or नद् (c. 1. नदति, नदितुं).

BRAY, *s.* खरनादः, गर्हभनादः, गर्हभरावः, चित्कारः, खरशब्दः, नादः.

BRAYER, *s.* (One that brays like an ass) खरनादी *m.* (न्), नादी *m.* (न्), चित्कारकृत्.—(One that pounds) चूर्णकः, निष्पेष्टा *m.* (ष्टृ), पेष्णरः.

To BRAZEN, *v. n.* धृष् (c. 5. धृष्णोति, धर्षितुं), अभिभर्त्स् (c. 10. -भर्त्सयते -यितुं).

BRAZEN, *a.* रैत्यः -त्यी -त्यं, पित्तलमयः -यी -यं, ताम्रिकः -की -कं.—(Impudent) निर्लज्जः -ज्जा -ज्जं, धृष्टः -ष्टा -ष्टं.

BRAZEN-FACED, *a.* निर्लज्जमुखः -खी -खं, लज्जाहीनः -ना -नं, स्वल्पव्रीडः -डा -डं.

BRAZENNESS, *s.* रैत्यत्वं.—(Impudence) निर्लज्जता, धृष्टता, प्रगल्भता.

BRAZIER, *s.* ताम्रकारः, कांस्यकारः. *See* BRASIER.

BREACH, *s.* भङ्गः, भेदः, छेदः, खण्डं, रन्ध्रं, छिद्रं.—(The act of breaking) भञ्जनं, भेदनं, खण्डनं.—(A gap in a wall) सन्धिः *m.*, गृहरन्ध्रं, खानिकं, सुरुङ्गा, कुड्यच्छेदः.—(Violation) अतिक्रमः, लङ्घनं, उल्लङ्घनं.—(Violation of a law) व्यवस्थातिक्रमः, व्यवस्थालङ्घनं.—(Breach of promise) प्रतिज्ञाभङ्गः.—(Breach of confidence) विश्वासभङ्गः.—(Separation of friendship) सुहृद्भेदः, विरोधः, विच्छेदः.

BREAD, *s.* अपूपः, पूपः, पिष्टकः, कान्दवं, अभ्युषः.—(Food in general) अन्नं, आहारः, भोजनं.

BREAD-CORN, *s.* गोधूमः, सुमनाः *m.* (स्), सुमनः, शस्यं, धान्यं, आपुष्पं

BREAD-FRUIT, *s.* पनसः, पनसनालिका, कण्टकिफलः, कण्टकफलः.

BREADTH, *s.* पृथुता, पार्थवं, प्रथिमा *m.* (न्), विशालता, विपुलता, विस्तारः, विस्तीर्णता, परिसरः, प्रस्थः, विततिः *f.*, आयामः, आयतनं, पाटः.

To BREAK, *v. a.* (Burst or part asunder by force) भञ्ज् (c. 7. भनक्ति, भंक्तुं), निर्भञ्ज्, विनिर्भञ्ज्, प्रभञ्ज्; भिद् (c. 7. भिनत्ति, भेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं), परिखण्ड्, विदृ in caus. (-दारयति -यितुं), स्फुट् (c. 10. स्फोटयति -यितुं), रुज् (c. 6. रुजति, रोक्तुं), अवरुज्, आरुज्,

समारुज्; क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्; शकलीकृ, दल् in caus. (दालयति -यितुं), विदल्.—(Penetrate, break through) व्यध् (c. 4. विध्यति, व्यद्धुं), निर्भिद्, छिद्र (c. 10. छिद्रयति -यितुं).—(Crush) मृद् (c. 9. मृद्नाति, मर्दितुं), पिष् (c. 7. पिनष्टि, पेष्टुं).—(Break or sink the spirit) मनो खण्ड् or हन् (c. 2. हन्ति, हन्तुं) or प्रतिहन्, भग्नाशं -शां -शं कृ, आशाविभिन्नं -न्नां -न्नं कृ, खण्डिताशंसं -सां -सं कृ.—(Tame) दम् in caus. (दमयति -यितुं or c. 4. दाम्यति, दमितुं), प्रदम्; विनी (c. 1. -नयति -नेतुं).—(Make bankrupt) परिक्षीणं -णां -णं कृ, निर्धनीकृ.—(Overcome) पराजि (c. 1. -जयति -ते -जेतुं).—(Break down, destroy) अवभञ्ज्, प्रभञ्ज्, विनश् in caus. (-नाशयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं).—(Violate a promise) संविदं व्यतिक्रम् (c. 1. -क्रामति -क्रमितुं), विसंवद् (c. 1. -वदति -वदितुं), विसंविद् (c. 2. -वेत्ति -वेदितुं).—(Infringe a law) व्यवस्थाम् अतिक्रम् or व्यतिक्रम् or लङ्घ् (c. 1. लङ्घते, लङ्घितुं, c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, or अतिचर् (c. 1. -चरति -चरितुं) or लुप् in caus. (लोपयति -यितुं).—(Break a vow) व्रतं लुप् in caus.—(Interrupt) लुप्, विलुप्, विप्रलुप् in caus., उच्छिद्, विच्छिद्, प्रतिहन्, अन्तरि (c. 2. -एति -एतुं).—(Break intelligence) प्रथमसंवादं कृ, प्रथमाख्यानं कृ.—(Break the heart) दलद्धृदयं -यां -यं कृ, भग्नान्तःकरणं -णां -णं कृ.—(Break into a house) सन्धिं कृ, कुड्यं छिद्.—(Break a bone) अस्थि भञ्ज् or भिद्.—(Make to cease) निवृत् in caus. (-वर्त्तयति -यितुं).—(Separate) वियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).—(Break off, relinquish) त्यज् (c. 1. त्यजति, त्यक्तुं).—(Reform a bad habit) दोषखण्डनं कृ.—(Dissolve friendship) सौहृद्यं भिद्.—(Break one's sleep) निद्रां भञ्ज्, निद्राभङ्गं कृ.—(Break one's fast) पारणं कृ, प्रातर्भोजनं कृ, उपवासानन्तरं प्रथमाहारं कृ.—(Break wind) पर्द् (c. 1. पर्दते, पर्दितुं), गुदरवं कृ.

To BREAK, *v. n.* (Part in two) भञ्ज् in pass. (भज्यते), भिद् in pass. (भिद्यते), विभिद्, विच्छिद् in pass. (-छिद्यते), त्रुट् (c. 4. त्रुट्यति, त्रुटितुं), विदृ in pass. (-दीर्य्यते), स्फुट् (c. 6. स्फुटति, स्फुटितुं), शकलीभू.—(Dawn) प्रभा (c. 2. -भाति -भातुं), उष् (c. 1. ओषति, ओषितुं or उच्छति, उच्छितुं), व्युष्, समुष्.—(Open as a sore) पूय् (c. 1. पूयते, पूयितुं), पूयनं कृ, पक्वः -क्वा -क्वं भू.—(Become bankrupt) परिक्षीणः -णा -णं भू.—(Decline, decay) जॄ (c. 4. जीर्य्यति, जरितुं, जरीतुं), क्षि in pass. (क्षीयते), ग्लै (c. 1. ग्लायति, ग्लातुं), ध्वंस् (c. 1. ध्वंसते, ध्वंसितुं), सद् (c. 1. सीदति, सत्तुं), विनश् (c. 4. -नश्यति -नशितुं -नंष्टुं), विशॄ in pass. (-शीर्य्यते).—(Part friendship) विरञ्ज् in pass. (-रज्यते).—(Break in, force one's way in) बलात् or प्रसह्य प्रविश् (c. 6. -विशति -वेष्टुं), आपत्, (c. 1. -पतति -पतितुं), अभिपत्, अवलुप् (c. 6. -लुम्पति -लोप्तुं).—(Break forth) प्रपत् (c. 1. -पतति -पतितुं), निष्पत्.—(Break loose) प्रमुच् in pass. (-मुच्यते), विप्रमुच्.—(Break off, desist suddenly) अकस्माद् विरम् (c. 1. -रमति -रन्तुं) or निवृत् (c. 1. -वर्त्तते -वर्त्तितुं).—(Break out, arise suddenly) अकस्माद् उत्पद् (c. 4. -पद्यते -पत्तुं) or जन् (c. 4. जायते, जनितुं) or दृश् in pass. (दृश्यते) or प्रभू.—(Break up) विगम् (c. 1. -गच्छति -गन्तुं), निवृत्.—(Break forth, as fire) प्रज्वल् (c. 1. -ज्वलति -ते -ज्वलितुं).—(Break, as waves) भङ्गरूपेण प्लुड् (c. 1. -लोठति -लोठितुं).

BREAK, *s.* (Interruption) विच्छेदः, छेदः, अन्तरायः.—(Cessation) विरामः, विरतिः *f.*, निवृत्तिः *f.*, उपशमः, क्षयः.—(Opening of the day) अरुणोदयः, प्रभातं, उदयः, दिवसमुखं, उषः; 'at break of day,' प्रभाते, प्रातःकाले; 'breaking a blood-vessel,' उरोक्षतं.

BREAKER, *s.* (One who breaks) भंक्ता *m.* (क्तृ), भञ्जकः, भङ्गकरः, भेदकः, भेदी *m.* (न्), विदारकः.—(Destroyer) नाशकः.—(A wave breaking over a sandbank) सैकतसूचको भङ्गः, भङ्गिः *f.*, -ङ्गी, तरलायितः, लहरिः *f.*, उल्लोलः, तरङ्गः.

BREAKFAST, *s.* प्रातर्भोजनं, प्रातराशः, कल्यवर्त्तः, कल्यजग्धिः *f.*, प्रथमाहारः.

To BREAKFAST, *v. n.* प्रातर्भोजनं or प्रातराशं कृ, प्रथमाहारं कृ.

BREAKFASTED, *p. p.* प्रातराशितः -ता -तं.

BREAKING, *s.* भङ्गः, भञ्जनं, भेदः, भेदनं, खण्डनं, शकलीकरणं, विदारणं.—(Breaking down) प्रभङ्गः.—(Breaking a vow) व्रतलोपनं.

BREAM, *s.* पृथुशरीरो मत्स्यभेदः.

BREAST, *s.* वक्षः *n.* (स्), उरः *n.* (स्), वक्षस्स्थलं or वक्षःस्थलं, क्रोडं -डा, अङ्कः, वत्सं, भुजान्तरं, हृदयस्थानं.—(Female breast) स्तनः, स्तनौ *m. du.*, स्तनकुट्मलं, कुचः, कुचतटं, वक्षोरुहः, वक्षोजं, उरसिजः, उरोजः.—(Heart) हृदयं, अन्तःकरणं, मनः *n.* (स्), चित्तं, मर्म्म *n.* (न्).

BREAST-BONE, *s.* वक्षोस्थि *n.*, उरोस्थि *n.*

BREAST-HIGH, *a.* वक्षोदघ्नः -घ्ना -घ्नं, वक्षोदेशपर्य्यन्तः -न्ता -न्तं.

BREAST-PLATE, *s.* कवचं, उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, आयसी *f.*, नागोदरं, वाणवारः.

BREASTWORK, *s.* वक्षोदेशपर्य्यन्तं दुर्गप्राचीरं, वक्षःसमानः प्राकारः.

BREATH, *s.* प्राणः, श्वासः, श्वसितं, असुः *m.*—(Inspiration and expiration) श्वासप्रश्वासः, श्वासनिःश्वासः.—(Pause, respite) उच्छ्वासः, विरामः, उपशमः.—(Out of breath) उच्छ्वसन् -सन्ती -सती -सत् (त्), उच्छ्वसितः -ता -तं, यष्टिप्राणः -णा -णं.—(Holding one's breath) श्वासप्रश्वासधारणं.—(Breeze, moving air) खश्वासः, मृदुवातः, मन्दानिलः, अनिलः, समीरणः.

To BREATHE, *v. n.* श्वस् (c. 2. श्वसिति, श्वसितुं), आश्वस्, उच्छ्वस्, प्राण् (c. 2. प्राणिति, प्राणितुं).—(To inspire and expire) श्वासप्रश्वासं कृ, श्वासनिःश्वासं कृ.—(To live) जीव् (c. 1. जीवति, जीवितुं).—(To take breath, recover breath) प्रत्याश्वस्.

To BREATHE, *v. a.* (To inspire) श्वस् (c. 2. श्वसिति, श्वसितुं).—(To breathe forth, expire) निःश्वस्, प्रश्वस्.—(To exhale) प्रवा (c. 2. -वाति -वातुं).

BREATHING, *s.* श्वासः, श्वासप्रश्वासं, प्राणः, श्वसितं.—(Ardent wish) आकाङ्क्षा, स्पृहा, लालसा. *Part.* प्राणन् -नन्ती -नत् (त्), श्वसन् -सती -सन्ती -सत् (त्), असुमान् -मती -मत् (त्), प्राणभृत् *m. f. n.*—(Breathing through the nose) नासिकन्धमः.—(Accent) प्राणसूचकं चिह्नं; 'the hard breathing,' महाप्राणः; 'the soft breathing,' अभिनिधानं.

BREATHING-HOLE, *s.* वातायनं, वायुच्छिद्रं, वायुपथः, गवाक्षः, जालं.

BREATHING-TIME, *s.* उच्छ्वासः, विश्रामः, विरामः, उपशमः, निर्वृतिः *f.*

BREATHLESS, *a.* (Without breath, lifeless) प्राणहीनः -ना -नं, अप्राणः -णा -णं, व्यसुः -सुः -सु, निरुच्छ्वासः -सा -सं, विचेतनः -ना -नं.—(Panting for breath) उच्छ्वसन् -सती -सत् (त्), उच्छ्वसितः -ता -तं, नष्टश्वासः -सा -सं, यष्टिप्राणः -णा -णं.—(Dead) मृतः -ता -तं.—(Half dead) मृतकल्पः -ल्पा -ल्पं.

BRED, *p. p.* (Born) जातः -ता -तं, उत्पन्नः -न्ना -न्नं.—(Produced) जनितः -ता -तं, उत्पादितः -ता -तं.—(Reared, educated) पुष्टः -ष्टा -ष्टं, शिक्षितः -ता -तं, गृहीतविद्यः -द्या -द्यं, विनीतः -ता -तं; 'well-bred,' सुविनीतः -ता -तं; 'ill-bred,' अनीतः -ता -तं, अविनीतः -ता -तं, अविनयः -या -यं, दुराचारः -रा -रं, दुःशीलः -ला -लं.

BREECH, *s.* (The back part of any thing) पश्चाद्भागः, पश्चिमो भागः, पश्चाद्देशः, अधोदेशः.—(Of an animal) नितम्बः. स्फिचौ *f. du.*, कटिदेशः, कटीरकं, कटिप्रोथः.—(Of a cannon) यस्माद् अन्तरग्निबलेन लोहगोलो निःसार्य्यते तस्य युद्धयन्तस्य पश्चाद्भागः.

BREECHES, *s.* कञ्चुकः, पुम्भिर् भृतं कटिवस्त्रं, पुरुषस्य कटिवस्त्रं, कटिजङ्घादिपरिधानं, कटीपटः, शाटकः.

To BREED, *v. a.* (To procreate, give birth to) सू (c. 1. सवति, c. 2. सौति, सोतुं), प्रसू, प्रजन् (c. 4. -जायते -जनितुं) or जन् in caus. (जनयति -यितुं), सञ्जन्; वृध् in caus. (वर्धयति -यितुं).—(To be pregnant) गर्भवती or गर्भिणी or सञ्जातगर्भा भू.—(To cause, produce) जन् in caus., उत्पद् in caus. (-पादयति -यितुं).—(To rear) पुष् (c. 9. पुष्णाति, c. 1. पोषति or in caus. पोषयति -यितुं), पाल् (c. 10. पालयति -यितुं), प्रतिपाल्.—(To educate) शिक्ष् (*i.e.* des. of शक्) in caus. (शिक्षयति -यितुं), विनी (c. 1. -नयति -नेतुं).—(To contrive, plot) घट् (c. 1. घटते, घटितुं).

To BREED, *v. n.* (To have birth) जन् (c. 4. जायते), उपजन्, अभिजन्; उत्पद् (c. 4. -पद्यते).—(To increase) वृध् (c. 1. वर्धते, वर्धितुं), पुष् (c. 4. पुष्यति, पोष्टुं).

BREED, *s.* (Race, family) वंशः, कुलं, जातिः *f.*, सन्तानः, सन्ततिः *f.*, अन्वयः.—(Offspring) अपत्यं, प्रजा; 'a horse of a good breed,' आजानेयः, भूमिपक्षः, भूमिरक्षकः.—(Number of animals born at once) शावकगणः, यः शावकगण एककाले डिम्बाद् उत्पद्यते or प्रसूयते.

BREEDBATE, *s.* कलहकारः, विवादार्थी *m.* (न्), कलिप्रियः, कलहप्रियः.

BREEDER, *s.* (A producer) जनकः, प्रजनिष्णुः, उत्पादकः, सूती *m.* (न्).—(A prolific female) सुतिनी, अवन्ध्या, प्रसवित्री, प्रजायिनी, जननी.—(A rearer) पोषकः, पोष्टा *m.* (ष्टृ), पोषयिता *m.* (तृ), विनेता *m.* (तृ).

BREEDING, *s.* (Rearing) पोषः -षणं, पालनं.—(Education) शिक्षा, विनयः.—(Good manners) विनयः, सभ्यता, सुशीलता; 'a man of breeding,' सुविनीतः.

BREESE, *s.* दंशः, दंशकः, वनमक्षिका, गोमक्षिका.

BREEZE, *s.* मृदुवातः, मन्दानिलः, अनिलः, मारुतः, मरुत् *m.*, वायुः *m.*, सुवायुः *m.*, चारवायुः *m.*, पवनः, श्वासः, समीरणः, समीरः, मन्दसमीरणः; 'soft breezes,' सुखस्पर्शाः *m. pl.*

BREEZY, *a.* (Windy) वातलः -ला -लं, वातवान् -वती -वत् (त्), वायवः -वी -वं.—(Fanned by the breezes) वायुभिः or मन्दानिलैर् अनुवीजितः -ता -तं or उपवीजितः or उद्वीज्यमानः -ना -नं.

BRETHREN, *s.* (Plur. of brother) भ्रातरः *m. pl.*, समानोदर्य्याः.—(Of the same race) बान्धवाः *m. pl.*, सजातयः *m. pl.*, समानजातयः.—(Associates) संसर्गिणः *m. pl.*, सङ्गिनः *m. pl.*—(Spiritual brethren) एकगुरवः *m. pl.*, सतीर्थ्याः *m. pl.*

BREVET, *s.* अधिकवत्रैनं विना श्रेष्ठपदमात्रप्रतिपत्तिः *f.*, अधिकवेतनव्यतिरेकेण ज्येष्ठख्यातिमात्रप्राप्तिः *f.*, पदमात्रवृद्धिः *f.*

BREVIARY, *s.* (A compendium) सङ्ग्रहः, संहिता.—(Of prayers) प्रार्थनासङ्ग्रहः, प्रार्थनासंहिता.

BREVIATE, *s.* सङ्ग्रहः, संहिता, संहारः, प्रत्याहारः.

BREVITY, *s.* सङ्क्षेपः -पणं, सङ्क्षिप्तिः *f.*, सङ्क्षिप्तत्वं, समस्तत्वं, उपसङ्क्षेपः, सङ्ग्रहः -हणं, समसनं, समासः, परिमितता, संहारः, समाहारः, अल्पत्वं.

To BREW, *v. a.* (To make beer) यवसुरं पच् (c. 1. पचति, पक्तुं) or क्लृप् (c. 1. क्लृपति, क्लृपितुं), यवजमद्यं कृ.—(To mingle) मिश्र् (c. 10. मिश्रयति -यितुं).—(To contrive) घट् (c. 1. घटते, घटितुं), प्रचिन्

(c. 10. -चिन्तयति -यितुं), परिचिन्

BREWAGE, *s.* नानासम्मिश्रद्रव्यनिर्म्मितं पानीयं, निष्क्वाथः, सन्निपातः प्रकीर्णकं.

BREWER, *s.* यवसुरक्वथिता *m.* (तृ), यवसुरपाचकः.

BREWERY or BREWHOUSE, *s.* यवसुरपचनस्थानं, यवसुरक्वथनस्थानं.

BREWING, *s.* यवसुरपचनं, यत्किञ्चिद् यवसुरम् एककाले पच्यते.

BREWIS, *s.* यूषक्वथितः पिष्टकः or अपूपः.

BRIBE, *s.* उत्कोचः -चा -चकः, उपप्रदानं, उपायनं, अभ्युपायनं, कौशलिकं, पारितोषिकं; 'the receiver of a bribe,' उत्कोचकः, उत्कोचादाता *m.* (तृ), उत्कोचग्राहकः.

To BRIBE, *v. a.* उत्कोचं दा (c. 3. ददाति, दातुं) or उपप्रदा, अन्याय्यकर्म्मसम्पादनार्थम् उपायनं दा.

BRIBER, *s.* उत्कोचदाता *m.* (तृ), उत्कोचदायी *m.* (न्), उपप्रदाता *m.* (तृ),

BRIBERY, *s.* उत्कोचस्य दानादानापराधः.—(Giving bribes) उत्कोचदानं, उत्कोचचर्य्या.—(Receiving bribes) उत्कोचग्रह -हणं.

BRICK, *s.* इष्टका, इष्टिका, सुधा; 'burnt brick,' पक्वेष्टका, क्वामकं; 'a brick-house,' इष्टकागृहं, सुधाभवनं; 'brick-built,' इष्टकानिर्म्मितः -ता -तं; 'a pile of bricks,' इष्टकाराशिः *f.*

To BRICK, *v. a.* इष्टकान्यासं कृ, इष्टकान्यासं कृत्वा निर्म्मा (c. 2. -माति -मातुं).

BRICK-BAT, *s.* इष्टकाशकलं, इष्टकाखण्डं, भिन्नेष्टका, भग्नेष्टकाशकलं.

BRICK-DUST, *s.* इष्टकाचूर्णं, इष्टकाक्षोदः, इष्टकाक्षोदितं.

BRICK-KILN, *s.* पाकपुटी, आपाकः, इष्टकापचनस्थानं, पवनं.

BRICKLAYER, *s.* लेपकः, लेपी *m.* (न्), लेप्यकृत् *m.*, प्रलेपकः, सुधाजीवी *m.* (न्), अट्टालिकाकारः, पलगण्डः.

BRICKMAKER, *s.* इष्टकाकारी *m.* (न्), इष्टकाकृत्, इष्टकाकारः, सुधाकृत्.

BRICKWORK, *s.* इष्टकान्यासः, सुधान्यासः, इष्टकानिर्म्माणं, इष्टकानिर्म्मितं यत्किञ्चिद् भवनादि.

BRIDAL, *s.* विवाहोत्सवः, विवाहपर्व्व *n.* (न्), विवाहः, विवाहकर्म्म *n.* (न्) or उद्वाहकर्म्म.

BRIDAL, *a.* वैवाहिकः -की -कं, उद्वाहिकः -का -कं, विवाहयोग्यः -ग्या -ग्यं, पाणिग्रहणिकः -की -कं; 'bridal clothes,' आनन्दपटं.

BRIDE, *s.* नवोढा, नवभार्य्या, नववधूः *f.*, नवपत्नी, ऊढा, नवकारिका, नववरिका, पाणिगृहीता, सुवासिनी; 'one who chooses her own husband,' स्वयंवरा.

BRIDE-BED, *s.* विवाहशय्या, नवोढाशयनं, आनन्दशय्या, ऊढावोढ्रोर् नवशयनं.

BRIDE-CAKE, *s.* विवाहोत्सवकाले गृहाभ्यागतैः खादनीयः पिष्टकः or अपूपः, आनन्दपिष्टकः.

BRIDEGROOM, *s.* वरः, वोढा *m.* (-ढृ), परिणेता *m.* (तृ), पाणिग्राहः, विवाहोद्यतः.

BRIDEMAID, *s.* (Attendant on the bride) जन्या.

BRIDEMAN, *s.* (Attendant on the bridegroom) जन्यः.

BRIDEWELL, *s.* निग्रहगृहं, निग्रहागारं, दण्डप्रणयनगृहं, कारागारं, कारावेश्म *n.* (न्).

BRIDGE, *s.* सेतुः *m.*, पिण्डलः, पिण्डिलः, धरणः, संवरः, सम्वरः.—(Footbridge) सङ्क्रमः.—(A bridge of boats) नौसेतुः *m.*—(Of the nose) नासावंशः.—(Of a musical instrument) तन्त्रालम्बः, तन्त्रधारणार्थं काष्ठखण्डं.

To BRIDGE, *v. a.* (Connect by a bridge) सेतुना बन्ध् (c. 9. बध्नाति, बन्धुं).

BRIDLE, *s.* वागा, रश्मिः *m.*, वल्गा, दन्तालिका.—(Restraint) संयमः, यमः, यन्त्रणं, निग्रहः.

To BRIDLE, *v. a.* रश्मिभिर् यम् (c. 1. यच्छति, यन्तुं).—(To restrain) यम्, नियम्, संयम्, निग्रह् (c. 9, -गृह्णाति -ग्रहीतुं), वशीकृ.

BRIDLEHAND, *s.* अश्वारूढस्य यो हस्तो वागां सङ्कृल्लाति or धरति.

BRIEF, *a.* (Concise) सङ्क्षिप्तः -प्ता -प्तं, साङ्क्षेपिकः -की -कं, सामासिकः -की -कं, परिमितः -ता -तं, सङ्कृहीतः -ता -तं.—(Not long, as time, &c.) अचिरः -रा -रं, अल्पः -ल्पा -ल्पं, अल्पकालः -ला -लं.—(Contracted) सङ्कुचितः -ता -तं, संहृतः -ता -तं, ह्रस्वः -स्वा -स्वं; 'in a brief space of time,' अचिरेण, अचिरात्, न चिरेण; 'for a brief space,' अल्पमात्रं.

BRIEF, *s.* (Writing of any kind) पत्रं.—(An epitome) सङ्कृहः, सङ्क्षेपः, संहारः.—(A writ) आज्ञापत्रं.—(A writing explaining the case) निवेदनपत्रं, अर्थतत्त्वज्ञापकं पत्रं.

BRIEFLY, *adv.* (Concisely) सङ्क्षेपेण, सङ्क्षेपात्, सङ्क्षेपतस्, समासतस्, अविस्तरशस्, न विस्तरेण, परिमितप्रकारेण.—(Quickly) अचिरेण, क्षिप्रं, आशु, अविलम्बितं.

BRIEFNESS, *s.* सङ्क्षिप्तिः *f.*, सङ्क्षिप्तत्वं, सङ्क्षेपः, उपसङ्क्षेपः, समस्तत्वं, समासः, समसनं, संहारः, परिमितता, अल्पत्वं -ता.—(Of life) आयुरल्पत्वं.

BRIER OR BRIAR, *s.* गोक्षुरः, कण्टकगुल्मः, शृगालकण्टकः, शृगालकोलिः *m.*

BRIERY, *a.* कण्टकी -किनी -कि (न्), कण्टकितः -ता -तं, शृगालकण्टकावृतः -ता -तं.

BRIG, *s.* कूपकद्वयविशिष्टः सामुद्रपोतप्रभेदः.

BRIGADE, *s.* व्यूहः, चमूः *f.*, गुल्मः, वाहिनी, सैन्यदलं, सेनामुखं.

CABALLER, *s.* कुमन्त्रणाकृत्, कुमन्त्री *m.* (न्), भेत्ता *m.* (तृ), भेदकरः,

राजद्रोही *m.* (न्).

CABBAGE, *s.* (A pot-herb) शाकप्रभेदः, शाकं, हरितकं, शूरणं, शिमुः *m.*—(Any thing stolen) मूषितं, मुष्टं, अपहारः, लोष्ट्रं, होढं.

To CABBAGE, *v. n.* (To steal in cutting clothes) सूचिकवत् पटखण्डम् अवलिह्य चुर् (c. 10. चोरयति -यितुं) or मुष् (c. 9. मुष्णाति, मोषितुं).

CABBAGE-TREE, *s.* (A species of palm) तालजातीयो वृक्षप्रभेदः, उच्चतरुः *m.*

CABIN, *s.* (A small room) कुटिः *f.*, कुटी, कोष्ठः, शालिका, शाला, स्थलं.—(A chamber in a ship) नौकाभ्यन्तरे कुटिः or कोष्ठः or कक्षः or वेश्म *n.* (न्).—(A cottage) कुटीरः, वेश्म *n.* (न्), कुट्टिमः, पर्णशाला.—(A tent) पटकुटिः *f.*, पटवेश्म *n.* (न्), मण्डपः.

To CABIN, *v. n.* (To live in a cabin) कुटीरे वस् (c. 1. वसति, वस्तुं).

CABIN-BOY, *s.* नौकारूढानां परिचारकः or सेवकः or प्रेष्यः.

CABINET, *s.* (Private room) कक्षः, उपरोधकं, कक्षान्तरं, अन्तःशाला.—(Private council of the state) प्रधानमन्त्रिणां गूढसभा, धीसचिवानां सभा, शिष्टसभा, गूढमन्त्रणं, गूढभाषितं; 'a cabinet-minister,' मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, गूढमन्त्री *m.*—(A place in which rare things are kept) विशिष्टाधारः, दुर्लभद्रव्याधारः, रत्नकोष्ठः, रत्नाधारः, रत्नपात्रं, रत्नभाण्डं.—(A kind of box) समुद्गः, समुद्गकः, सम्पुटः.

CABINET-MAKER, *s.* रत्नाधारकृत्, रत्नभाण्डकृत्, समुद्गकारः, सम्पुटकृत्.

CABLE, *s.* नौरज्जुः *m.*, नौबन्धनरज्जुः *m.*, शाणरज्जुः, नौबन्धनार्थं स्थूलरज्जुः or महारज्जुः, नौकाया महागुणः or वृहद्गुणः.

CABLED, *a.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः -द्धा -द्धं.

CABRIOLET, *s.* चक्रद्वययुक्तः सपिधानो रथविशेषः, कणीरथः, हयनं.

CACHECTICAL, *a.* दोषत्रयपीडितः -ता -तं, दुष्टशरीरः -रा -रं, असस्थः -स्था -स्थं.

CACHEXY, *s.* शरीरदोषः, रक्तदूषणं, दोषत्रयं, शरीरस्य असास्थ्यं.

CACHINNATION, *s.* अट्टहासः, आच्छुरितं, अवच्छुरितं, प्रहासः, प्रहसनं.

CACKLE or CACKLING, *s.* कूजनं, हंसनादः, हंसरुतं, कुक्कुटोशब्दः.—(Making a cackle) हंसनादी -दिनी -दि (न्).—(Idle talk) जल्पनं, आलस्यवचनं, वृथाकथा, असम्बद्धं.

To CACKLE, *v. n.* कूज् (c. 1. कूजति, कूजितुं), हंसनादं कृ, हंसवत् or कुक्कुटीवत् शब्दं कृ.

CACKLER, *s.* हंसरूपेण नादी *m.* (न्), कूजकः, कूजनकृत्.—(A tell-tale) जल्पकः, वाचालः, रहस्यभेदकः.

CACOCHYMY, *s.* शरीरविकारः, रक्तविकारः, शरीरदोषः, दोषत्रयं.

CACODŒMON, *s.* अपदेवता, पिशाचः, वेतालः, भूतः, दैत्यः.

CACOPHONY, *s.* विस्वरपदं, अपरवः, अवक्षणः, कष्टपदं, कटुश्रुतिः *f.*

CADAVEROUS, *a.* मृतशरीरोपमः -मा -मं, शवसवर्णः -र्णा -र्णं.

CADE, *s.* (A barrel) दीर्घगोलाकारः काष्ठमयो भाण्डविशेषः.

CADE, *a.* कोमलः -ला -लं, सुकुमारः -री -रं, गृह्यकः -का -कं.

To CADE, *v. a.* कोमलतया or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति, पोषितुं) or संवृध् in caus. (-वर्धयति -यितुं).

CADENCE, *s.* (Fall, state of sinking) पातः, पतनं, अवपातः, च्युतिः *f.*—(Modulation of the voice, tone) स्वरः, कलः, स्वनः, निःस्वनः, निह्रादः, विरावः, क्वणः, विरिञ्चः, छन्दः *n.* (स्).

CADENT, *a.* (Falling down) पातुकः -का -कं, पतयालुः -लुः -लु.

CADET, *s.* अनुजः, अवरजः, जघन्यजः, कनिष्ठः.—(A young volunteer) युद्धकर्मशिक्षार्थं वेतनं विना क्षत्रियधर्म्मम् आचरति यो कुलीनयुवा.

CADGER, *s.* विपणी *m.* (न्), प्रापणिकः, आपणिकः, अशनवनीतादिविक्रयिकः.

CADI, *s.* तर्कीयदेशे प्राड्विवाकः, धर्म्माध्यक्षः, दण्डनायकः, न्यायाधिपतिः

CADUCITY, *s.* पातुकता, पतयालुत्वं, पतनशीलता, सद्यःपातित्वं. अस्थिरता.

CÆSURA, *s.* विच्छित्तिः *f.*, विच्छेदः, अवच्छेदः, विरामः.

CAG, *s.* (A barrel) दीर्घगोलाकृतिः काष्ठनिर्म्मितः पात्रविशेषः.

CAGE, *s.* पञ्जरं, पिञ्जरं, वीतंसः, कुलायिका, पक्षिशाला, शालारं.—(A prison) कारा, कारागारं, कारावेश्म *n.* (न्), बन्धनगृहं.

To CAGE, *v. a.* पञ्जरे or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To CAJOLE, *v. a.* (To flatter, wheedle) शान्त्व् or सान्त्व् (c. 10. शान्त्वयति, सान्त्वयति -यितुं), लल् in caus. (लालयति -यितुं).—(With intent to overreach) वञ्च् in caus. (वञ्चयते -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CAJOLED, *p. p.* लालितः -ता -तं, मधुरैर्वचोभिः संलापितः -ता -तं, वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

CAJOLER, *s.* (Coaxer) लालनकृत् *m.*, चाटुकारः.—(Deceiver) वञ्चकः, प्रतारकः, कूटकः, कूटकारः, कपटिकः.

CAJOLERY, *s.* (Coaxing) लालनं, चाटूक्तिः *f.*—(Overreaching) छलं, वञ्चनं, प्रतारणं, कूटता, कपटः, व्याजः.

CAITIFF, *s.* दुर्वृत्तः, दुरात्मा *m.* (न्), नराधमः, खलः, धूर्त्तः, शठः.

CAITIFF, *a.* दुर्वृत्तः -त्ता -त्तं, खलः -ला -लं, शठः -ठा -ठं, अधमः -मा -मं.

CAIRN, *s.* प्रस्तरचितिः *f.*, पाषाणचितिः *f.*, शिलाराशिः *m.*, पाषाणोत्करः

CAKE, *s.* पूपः, अपूपः, पिष्टकः, पोलिका, करम्भः.—(A mass of any thing) पिण्डः.

To CAKE, *v. n.* पिण्डीभू, पिण्ड (nom. पिण्डायते), पिष्टकरूपेण घनीभू.

CAKED, *p. p.* पिण्डितः -ता -तं, पिण्डीभूतः -ता -तं, घनीकृतः -ता -तं.

CALABASH, *s.* वृहदलाबूप्रभेदः, अलाबूः *f.*, चिप्पिका.

CALAMANCO, *s.* ऊर्णानिर्म्मितः पटविशेषः, ऊर्णामयवस्त्रं.

CALAMINE, *s.* शिलाजतुस्वभावो भूमिविशेषो यत्संसर्गेण ताम्रं पित्तलः सम्पद्यते.

CALAMITOUS, *a.* व्यसनी -निनी -नि (न्), आपत्तिकः -की -कं, विपन्नः -न्ना -न्नं, विपद्युक्तः -क्ता -क्तं, आपद्ग्रस्तः -स्ता -स्तं, दुर्गतः -ता -तं, विधुरः -रा -रं, दैवोपहतः -ता -तं, उपाकृतः -ता -तं, दुःखी -खिनी -खि (न्), क्लेशी -शिनी -शि (न्), औत्पातिकः -की -कं, शोकपूर्णः -र्णा -र्णं, व्यथाकरः -रा -रं.

CALAMITY, *s.* विपद् *f.*, आपद् *f.*, विपत्तिः *f.*, व्यसनं, व्यापद् *f.*, विप्लवः, उपप्लवः, दुर्घटना, दौर्गत्यं, दुर्दैवं, दौर्भाग्यं, दुःखं, क्लेशः.—(From heaven) विनिपातः, उत्पातः, विनिहतः

CALAMUS, *s.* सुगन्धिवेतसप्रभेदः, वेत्रः, वेणुः *m.*, यंशः, नडः, नलः.

CALASH, *s.* (A pleasure-carriage) क्रीडारथः, पुष्परथः, केलिरथः.

CALCAREOUS, *a.* शर्करिकः -का -कं, शार्करीयः -यी -यं, शर्करावान् -वती -वत् (त्).

CALCEATED, *p. p.* सपादुकः -का -कं, पादुकारूढः -ढा -ढं, उपानद्युक्तः -क्ता -क्तं.

CALCEDONY, *s.* (A kind of opal) शिवधातुः *m.*, गोमेदसन्निभः.

To CALCINATE or CALCINE, *v. a.* भस्मीकृ, आतञ्चनं कृ, प्रतीवापं कृ.

CALCINATION, *s.* भस्मीकरणं, आतञ्चनं, प्रतीवापः.—(Apparatus for) पातालः.

CALCINED, *p. p.* भस्मीकृतः -ता -तं, भस्मीभूतः -ता -तं.

CALCULABLE, *a.* गणनीयः -या -यं, विगण्यः -ण्या -ण्यं, संख्येयः -या -यं.

To CALCULATE, *v. n.* गण् (c. 10. गणयति -यितुं), विगण्, प्रगण्, संख्या (c. 2. -ख्याति -ते -ख्यातुं), परिसंख्या, सम्परिख्या, कल् (c. 10. कलयति -यितुं), सङ्कल्.

CALCULATED, *p. p.* गणितः -ता -तं, विगणितः -ता -तं, परिगणितः -ता -तं, राशिगतः -ता -तं, चिन्तकलितः -ता -तं.—(Adapted, suited) युक्तः -क्ता

-क्षं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं, पर्य्याप्तः -प्ता -प्तं.

CALCULATION, *s.* (The act) गणनं *n.* -ना, विगणनं, सङ्ख्यानं, परिसङ्ख्यानं, गुणनं.—(The result) गणितं.

CALCULATOR, *s.* गणकः, विगणकः, गणनकृत्, गुणकः, गुणकारः, सङ्ख्याकृत्.

CALCULOUS, *a.* शार्करः -री -रं, आश्मिकः -की -कं, अश्मरः -रा -रं, आश्मनः -नी -नं, अश्ममयः -यी -यं, शिलामयः -यी -यं.

CALCULUS, *s.* (Stone in the bladder) अश्मरी, अश्मरीरुः, शर्करा, मूत्रकृच्छ्रं.

CALDRON, *s.* पिठरः, उखा, स्थाली, उदस्थाली, पिष्टपचनं, कन्दुः *m.*, कटाहः.

CALECHE, *s.* क्रीडारथः, पुष्परथः, केलिरथः.

CALEFACTION, *s.* तपनं, तापनं, प्रतापनं, दाहनं, सिद्धकरणं.

CALEFACTORY, *a.* तापकः -का -कं, तापनः -नी -नं, तापकरः -री -रं.

To CALEFY, *v. n.* (To be heated) तप् (c. 1. तपति, तप्तुं), प्रतप्.

CALENDAR, *s.* (Almanack) पञ्जिः *f.*, पञ्जी, पञ्जिका, तिथिपत्रपत्रं.

CALENDER, *s.* (A hot-press) वस्त्रस्निग्धीकरणार्थं or पटश्लक्ष्णीकरणार्थं or वस्त्रमार्जनार्थं चक्रयन्त्रं.

To CALENDER, *v. a.* (To dress cloth) पूर्व्वोक्तयन्त्रेण वस्त्रं or पटं स्निग्धीकृ or श्लक्ष्णीकृ or मृज् (c. 2. मार्ष्टि, मार्ष्टुं), प्रमृज्.

CALENDS, *s.* मासस्य प्रथमदिनं, शुक्लपक्षस्य प्रथमदिवसः, अक्षुण्णदिनं, प्रतिपद् *f.*, पक्षतिः *f.*

CALENTURE, *s.* समुद्रयायिनां व्याधिप्रभेदस् तद्रोगग्रस्तः पोतवाहः शस्यक्षेत्रम् इति बुद्धा समुद्रमध्ये आत्मानं प्रक्षिपति.

CALF, *s.* गोवत्सः, वत्सः, वष्कयः, शकृत्करिः *m.* -री *f.*, दोषकः.—(Newborn) तर्णः, तर्णकः.—(A herd of calves) वात्सकं.—(The thick part of the leg) जङ्घायाः स्थूलभागः or मांसलभागः, जङ्घापिण्डः, जङ्घामध्यं, मांसपिण्डाङ्गं.—(A dolt) स्थूलबुद्धिः, जडः.

CALIBRE, *s.* (Bore of a gun, &c.) छिद्रं, यन्त्रछिद्रं, सुषिरं, शुषिरं, व्यासः, छिद्रव्यासः, विस्तारः, छिद्रविस्तृतिः *f.*—(Size, measure) परिमाणं, मात्रा.—(Sort, kind) प्रकारः.

CALICE, *s.* कंसः, पात्रं, भाजनं, पुटकं.

CALICO, *s.* कार्पासं, नानावर्णमूत्रिमुद्रितः कार्पासपटः, चित्रितकार्पासं.

CALID, *a.* उष्णः -ष्णा -ष्णं, तप्तः -प्ता -प्तं, नैदाघः -घी -घं.

CALIDITY, *s.* तापः, उष्णता, घर्म्मः, निदाघः, अशिशिरता.

CALIGATION, *s.* अन्धकारः, तिमिरं, तमः *n.* (स्), तमिस्रं, मेघतिमिरं.

CALIGINOUS, *a.* तमस्वी -स्विनी -स्वि (न्), अन्धकारयुक्तः -क्ता -क्तं, तमोवृतः -ता -तं.

CALIGRAPHY, *s.* चारुलेखनं, शुभलेखनं, सुलेखनं, चारुलेखनशिल्पं.

CALIX, *s.* पुष्पगर्भः, पुष्पकोषः, पुष्पाधारः, कुसुमपुटी, उपदलं, पुष्पसन्धौ दलमयो बहिःकोषः or पुटः, पुष्पधारको दलपुटः.

To CALK, *v. a.* नौकातले दारुस्फोटनप्रयुक्तानि छिद्राणि शणसूत्रादिना निरुध् (c. 7. -रुणद्धि -रोद्धुं) or पिधा (c. 3. -दधाति -धातुं).

CALKER, *s.* नौकातले शणसूत्रादिना छिद्रावरोधी *m.* (न्) or छिद्रप्रतिबन्धकः.

CALL, *s.* (Summon) आह्वानं, आहूतिः *f.*, आह्वयः, आकरणं.—(Invitation) निमन्त्रणं.—(Address by name) सम्बोधनं, नामग्रहः.—(Impulse) वेगः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी, ईश्वराह्वानं.—(Requisition, obligation) प्रयोजनं, अवश्यकता.—(Claim, demand) अभियोगः.—(Authority) अधिकारः.—(A visit) अभिगमः, अभ्यागमः, समायः.—(Challenge) आहूतिः *f.*—(A calling over the names of the members of parliament) महासभायां प्रत्यक्षाप्रत्यक्षनिर्णयनार्थम् एकैकशः प्रतिनिधिनामव्याहरणं.

To CALL, *v. a.* (Name, denominate) अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -ख्यातुं), प्रथक्ष् (c. 2. -क्षे), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, नाम कृ; 'they called his name Rama,' तस्य नाम राम इति चक्रुः; 'to call upon by name,' सम्बोधनं कृ; 'to be called,' अभिधा in pass. (-धीयते), ख्या in pass. (ख्यायते).—(Summon) आह्वे (c. 1. -ह्वयति -ह्वातुं).—(Invite) निमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्.—(Convoke) समाह्वे, आह्वे, सङ्कृ (c. 10. -घट्टयति -यितुं).—(Appeal to, invoke) ह्वे, आह्वे, उपह्वे.—(Call forth, put in action, excite) प्रोत्सह् in caus. (-साहयति -यितुं), उद्युज् in caus. (-योजयति -यितुं), चेष्ट् in caus. (चेष्टयति -यितुं).—(Call back, revoke) निवृत् in caus. (-वर्त्तयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं).—(Call for, require) अर्ह् (c. 1. अर्हति, अर्हितुं), प्रार्थ् (c. 10. -अर्थयते -यितुं), याच् (c. 1. याचति, याचितुं); 'this matter calls for deliberation,' अत्र विचारेण प्रयोजनं.—(Call in, as coin) मुद्राप्रचलनं निवृत्, मुद्राप्राचर्य्यं निवृ in caus. (-वारयति -यितुं).—(Call over names) प्रत्यक्षाप्रत्यक्षनिश्चयनार्थं नामानि एकैकश उदाह् (c. 1. -हरति -हर्त्तुं) or परिसंख्या or वच् in caus. (वाचयति -यितुं).—(Call out, exclaim) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्, उच्चैःस्वरे घुष् (c. 10. घोषयति -यितुं), उद्घुष्, चित्कारं कृ, चीत्कृ.—(Call out, challenge) आह्वे, उपाह्वे.—(Call to witness) साक्षिणं कृ or आह्वे.—(Call to mind) स्मृ (c. 1. स्मरति, स्मर्त्तुं).—(Call to account) अनुयुज् (c. 7. -युङ्क्ते -योक्तुं), अभियुज्, अनुसन्धा (c. 3. -दधाति -धातुं), निबर्हं -र्हां -र्हं कृ.—(Call up, from sleep) जागृ in caus. (जागरयति -यितुं), प्रबुध् in caus. (-बोधयति -यितुं).—(Address) आमन्त्र्, आलप् (c. 1. -लपति -लपितुं); 'by name,' नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Call upon, implore) प्रार्थ् (c. 10. -अर्थयते -यितुं), विनयेन प्रार्थ्.—(To visit) अभिगम् (c. 1. -गच्छति -गन्तुं), अभ्यागम्, अभिभू in caus. (-सारयति -यितुं).

CALLED, *p. p.* (Named) प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, उदाहृतः -ता -तं, परिकीर्त्तितः -ता -तं, स्मृतः -ता -तं, शब्दितः -ता -तं, संज्ञितः -ता -तं. The following are used in composition only: नामा -मा -म, अभिधानः -ना -नं, आख्यः -ख्या -ख्यं, आह्वः -ह्वा -ह्वं, आह्वयः -या -यं, नामधेयः -या -यं; thus, 'a lake called blue-lotus,' नीलोत्पलनाम or नीलोत्पलाभिधानं सरः.—(Summoned, invited) आहूतः -ता -तं, निमन्त्रितः -ता -तं.

CALLING, *s.* (Inviting) आह्वानं, हूतिः *f.*, हवः, निमन्त्रणं.—(Addressing by name) सम्बोधनं, नामग्रहः.—(Giving name) नामकरणं.—(Profession, employment) वृत्तिः *f.*, जीविका, उपजीविका, व्यापारः, व्यवसायः.—(Divine vocation) प्रत्यादेशः, आकाशवाणी.

CALLOSITY, *s.* (Induration of the skin) कदरः, किणः, त्वक्काठिन्यं, त्वग्घनता, त्वग्दृढता, तनुकूपघनता.

CALLOUS, *a.* कठिनः -ना -नं, दृढः -ढा -ढं, घनः -ना -नं, घनीकृतः -ता -तं.—(Hard-hearted) कठिनहृदयः -या -यं.—(Insensible, unfeeling) विचेतनः -ना -नं, कर्कशः -शा -शं, निर्हृदयः -या -यं, कृपाहीनः -ना -नं.—(Shameless) निर्लज्जः -ज्जा -ज्जं.

CALLOUSLY, *adv.* काठिन्येन, सकार्कश्यं, दार्ढ्येन, निर्हृदयं, लज्जां विना.

CALLOUSNESS, *s.* (Hardness) कठिनता, काठिन्यं, कार्कश्यं, दृढता, दार्ढ्यं, दृढिमा *m.* (न्).—(Insensibility, want of feeling) अचैतन्यं, हृदयकाठिन्यं, निर्हृदयता, निर्लज्जता.

CALLOW, *a.* पक्षहीनः -ना -नं, अजातपक्षः -क्षा -क्षं, अजातपर्णः -र्णी -र्णं, अनुत्पन्नपक्षः -क्षा -क्षं, गरुद्रहितः -ता -तं, नग्नदेहः -हा -हं, अकृतदीक्षः -क्षा -क्षं.

CALM, *s.* (Freedom from wind and waves) निर्वातः, वायुनिवृत्तिः *f.*, निर्वेगता, निस्तरङ्गता.—(Quiet, repose) शान्तिः *f.*, शमः, प्रशान्तिः *f.*,

विश्रामः, विश्रान्तिः *f.*, प्रसन्नता, प्रसादः.

CALM, *a.* (Free from wind and waves) निर्वातः -ता -तं, गतानिलः -ला -लं, निवृत्तवायुः -युः -यु, निर्वेगः -गा -गं, निस्तरङ्गः -ङ्गा -ङ्गं.—(Quiet, composed in mind) शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विश्रान्तः -न्ता -न्तं, प्रसन्नः -न्ना -न्नं, अव्याकुलः -ला -लं, निराकुलः -ला -लं, समाहितः -ता -तं, प्रशान्तात्मा -त्मा -त्म (न्), स्थिरमतिः -तिः -ति, शान्तचेताः -ताः -तः (स्), अनवेगहीनः -ना -नं, असम्भ्रमः -मा -मं, अनुग्रः -ग्रा -ग्रं.—(In countenance) प्रसन्नमुखी -खिनी -खि (न्).

To CALM, *v. a.* शम् in caus. (शमयति -यितुं), प्रशम्, उपशम्, तुष् in caus. (तोषयति -यितुं), परितुष्, प्रसद् in caus. (-सादयति -यितुं), अभिप्रसद्, शान्त् or सान्त् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्; 'to be calm,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. 6. -सीदति -सत्तुं), सम्प्रसद्; 'the sea became calm,' प्रससाद सागरः; 'my mind is calm,' अन्तरात्मा प्रसीदति.

CALMED, *p. p.* शमितः -ता -तं, प्रशमितः -ता -तं, प्रसादितः -ता -तं.

CALMER, *s.* शमकः, शान्तिकर्त्ता *m.* (र्त्तृ), शान्तिकरः, शान्तिदः, तुष्टिकरः.

CALMLY, *adv.* शान्त्या, शान्तं, मनःप्रसादेन, असम्भ्रमं, प्रशान्तचेतसा.

CALMNESS, *s.* शान्तता, प्रशान्तता, शान्तिः *f.*, विश्रान्तता, प्रसादः, निराकुलता, अव्याकुलता, स्थिरता, असम्भ्रमः.—(Of the sea) निर्वातत्वं.

CALOMEL, *s.* घटकृत्वः शोधितः or ऊर्द्ध्वपातितः पारदः स च चिकित्सकैर् नानाव्याधिप्रतिकाराय रोगाङ्गेषु प्रयुज्यते.

CALORIFIC, *a.* तापकरः -री -रं, तापजनकः -का -कं, निदाघकरः -री -रं.

CALOTTE, *s.* धर्म्मोचार्य्यैर् धृतं शरावाकृति मस्तकाभरणं or शिरोवेष्टनं.

CALTROP, *s.* विग्रहसमये शत्रोर् अश्वखुरवेधनार्थं रणभूमौ न्यस्तं शूलत्रययुक्तं लोहयन्त्रं.—(The plant) गोक्षुरः -रकः, गोखुरः -रकः.

To CALVE, *v. n.* वत्सं or तर्णं सु (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् in caus. (जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं); 'a cow that calves often,' बहुसूतिः *f.*, चिरसूता, वन्ध्यवणी; 'cows calve every year,' प्रतिवर्षं प्रसूयन्ते गावः; 'a cow that has lately calved,' नवसूतिका; 'calving of a cow,' गोप्रसवः.

To CALUMNIATE, *v. a.* परिवद् (c. 1. -वदति -वदितुं), अपवद्, निन्द् (c. 1. निन्दति, निन्दितुं), मिथ्या अभियुज् (c. 7. -युनक्ति -युङ्क्ते -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षर् in caus. (-क्षारयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), परगुणान् अपवद.

CALUMNIATED, *p. p.* अभिशस्तः -स्ता -स्तं, मिथ्याभिशस्तः -स्ता -स्तं, मिथ्याभियुक्तः -क्ता -क्तं, आक्षारितः -ता -तं, क्षारितः -ता -तं, कलङ्कितः -ता -तं.

CALUMNIATOR, *s.* परिवादी *m.* (न्) -दकः, पिशुनः, अभिशस्तकः, अभिशापकः, मिथ्याभियोगी *m.* (न्), अभ्यसूयकः, निन्दकः, गुणघाती *m.* (न्), गुणापवादकः, कलङ्ककरः, कुवादः.

CALUMNIOUS, *a.* पिशुनः -ना -नं, असूकः -का -कं, अभ्यसूयकः -का -कं, वाग्दुष्टः -ष्टा -ष्टं, कलङ्ककरः -री -रं, कलङ्कमयः -यी -यं, कलङ्की -ङ्किनी -ङ्कि (न्).

CALUMNIOUSLY, *adv.* परिवादेन, सापवादं, गुणापवादेन, असूयया, सकलङ्कं, पैशुन्येन, पिशुनवचनेन, निन्दापूर्व्वकं, सासूयं.

CALUMNY, *s.* परिवादः, अपवादः, असूया *f.* -यनं, असूयुः *m.*, अभ्यसूया, पिशुनवचनं, पिशुनवाक्यं, पैशुन्यं, अभिशंसनं, मिथ्याभिशंसनं, अभिशपनं, अभिशापः, आक्षारः -रणं, कलङ्कः, गुणापवादः, वादोषः, मिथ्याभियोगः, निन्दा, परदोषवादः, अलीकप्रवादः.

CALX, *s.* चूर्णं, भस्म *n.* (न्).—(Of brass) रीतिपुष्पं, रीतिका, पुष्पकेतु *n.*, पौष्पकं, कुसुमाञ्जनं.

CALYCLE, *s.* क्षुद्रमुकुलं, क्षुद्रकुड्मलं, नवजालकं.

CÁMADEVA, *s.* *See* KÁMADEVA.

CAMBIST, *s.* हुण्डिकापत्रक्रयविक्रयजीवी *m.* (न्).

CAMBRIC, *s.* अंशुकं, दुकूलं, कुलीनस्त्रीलोकेन भृतः सूक्ष्मक्षौमपटविशेषः.

CAMEL, *s.* उष्ट्रः, क्रमेलः, क्रमेलकः, महाङ्गः, मयः, वणिग्वहः, शरभः, द्विककुद् *m.*, दीर्घग्रीवः; 'a young camel,' करभः; 'a flock of camels,' औष्ट्रकं.

CAMELEON, *s.* सरटः, सरटुः *m.*, प्रतिसूर्य्यः, कृकलासः, कृकवाकुः *m.*

CAMELOPARD, *s.* तरक्षुरूपेण चित्रित उष्ट्रजातीयो दीर्घग्रीवो जन्तुप्रभेदः.

CAMELOT, *s.* (A stuff made of camel's hair, &c.) उष्ट्रलोमादिनिर्म्मितं वस्त्रं.

CAMEO, *s.* तक्षितुं शक्यो द्विवर्णप्रस्तरविशेषः, तक्षणीयत्वक्षमः कक्षुविशेषः.

CAMERA-OBSCURA, *s.* सान्धकारकुटीपटलनिवेशितश् चाक्षुषयन्त्रविशेषो यद्द्वारेण अन्तरस्थश्वेतफलके प्रतिविम्बिता बहिःस्था विषया दृश्या भवन्ति.

CAMERATED, *a.* (Arched) तोरणाकारपटलयुक्तः -क्ता -क्तं, तोरणीकृतः -ता -तं.

CAMISADO, *s.* सौप्तिकं, सौप्तिकवधः, नैशाक्रमः, नैशाभिक्रमः, रात्रियुद्धं, रात्रौ or अन्धकारे अभियोगः or अवस्कन्दः.

CAMOYS or CAMOUS, *a.* (Flat, said of the nose) चिपिटः -टा -टं, चिक्किनः -ना -नं, अवभटः -टा -टं.

CAMP, *s.* वाहिनीनिवेशः, निवेशः, शिविरं, कटकः, मन्दिरं, स्कन्धावारः, बलस्थितिः *f.*, घटकः; 'camp-follower,' सेनाचरः.

To CAMP, *v. n.* (To pitch a camp, to lodge in a camp) निविश् (c. 6. -विशते -वेष्टुं), सैन्यं निविश् in caus. (-वेशयति -यितुं), शिविरे वस् (c. 1. वसति, वस्तुं).

CAMPAIGN, *s.* (A level open tract of ground) समभूमिः *f.*, समस्थलं, तरुगुल्मरहितः समो भूभागः, निर्वनभूमिः.—(The time for which any army keeps the field) अभियेणनकालः, युद्धकालः, रणक्षेत्रे वर्त्तनकालः, वत्सरमध्ये यत्कालपर्य्यन्तं सैन्या रणक्षेत्रे युयुत्सवो विचरन्ति.

CAMPANIFORM, *a.* (As a flower) घण्टाकारः -रा -रं, घण्टाकृतिः -तिः -ति.

CAMPESTRAL, *a.* क्षेत्रिकः -की -कं, कैदारः -री -रं, जाङ्गलः -ली -लं.

CAMPHOR or CAMPHIRE, *s.* कर्पूरः -रं, चन्द्रः, सोमः, सोमसंज्ञं, सिताभः, ताराभः, सुधांशुः *m.*, घनसारः, हिमवालुका.

CAMPHORATED, *a.* कर्पूरसंसृष्टः -ष्टा -ष्टं, कर्पूरोयः -या -यं.

CAN, *s.* कंसः, कांस्यः, त्रापुषकुम्भः, लौहकुम्भः, धातुमयपात्रं, भाजनं

To CAN, *v. n.* (To be able) शक् (c. 5. शक्नोति, c. 4. शकति, शक्तुं), समर्थः -र्था -र्थं अस्, क्षम् (c. 1. क्षमते, क्षन्तुं), प्रभू (c. 1. -भवति -भवितुं),

CANAILLE, *s.* अन्त्याः *m. pl.*, अन्त्यजातीयाः *m. pl.*, अन्त्यजाः *m. pl.*, प्राकृतमनुष्याः *m. pl.*, अधमजातीयाः *m. pl.*, खलाः *m. pl.*, हीनवर्णाः *m. pl.*, पृथग्जनाः *m. pl.*, इतरजनाः *m. pl.*

CANAL, *s.* कुल्या, उपकुल्या, खातं, प्रणालः -ली, खल्लः, जलनिर्गमः, सारणिः *f.*, कृत्रिमा सरित्.

CANARY-BIRD, *s.* उत्तालरुतविशिष्टः पीतवर्णो विजातीयः क्षुद्रपक्षी.

To CANCEL, *v. a.* (To annul, obliterate) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अपनृज् (c. 2. -नक्ष्टि -नक्तुं), निर्मृज्, व्यामृज्, परिमृज्, उद्धृ (c. 1. -हरति -हर्त्तुं).—(To mark a writing with cross lines) लिखितलोपसूचनार्थं व्यत्यस्तरेखाद्वयेन पत्रं चिह्न् (c. 10. चिह्नयति -यितुं).

CANCELLATED, *p. p.* व्यत्यस्तरेखाचिह्नितः -ता -तं.

CANCELLED, *p. p.* लुप्तः -प्ता -प्तं, उच्छिन्नः -न्ना -न्नं, व्यामृष्टः -ष्टा -ष्टं.

CANCER, *s.* (A sore) विद्रधिः *m.*, व्रणः, गलितक्षतं, नालीव्रणः, तनुव्रणः, उपदंशः, विस्फोटः, नाडी.—(The sign of the summer

solstice) कर्कटः, कर्कः, कर्कटराशिः *m.*; 'stars in cancer,' पुष्यः, सिध्यः, तिष्यः.—(A crab-fish) कुलीरः, कर्कटः.

To CANCERATE, *v. n.* (To become a cancer) व्रणीभू, विद्रधीभू, व्रण (nom. व्रणायते).

CANCEROUS, *a.* विद्रधिगुणविशिष्टः -ष्टा -ष्टं, विद्रधीयः -या -यं.

CANCRINE, *a.* कर्कटीयः -या -यं, कुलीरसम्बन्धी -न्धिनी -न्धि (न्).

CANDENT, *a.* प्रचण्डः -ण्डा -ण्डं, अत्युष्णः -ष्णा -ष्णं, अत्यन्ततप्तः -प्ता -प्तं.

CANDID, *a.* (Fair, upright) सरलः -ला -लं, दक्षिणः -णा -णं, उदारः -रा -रं, अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, शुद्धमतिः -तिः -ति, ऋजुः -जुः -जु, अगूढभावः -वा -वं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं.—(Pure) शुचिः -चिः -चि, विमलः -ला -लं, निर्म्मलः -ला -लं.—(White) शुक्लः -क्ला -क्लं.

CANDIDATE, *s.* अर्थी *m.* (न्), प्रार्थकः, याचकः, प्रत्याशी *m.* (न्), पदान्वेषी *m.* (न्), अभियोक्ता *m.* (क्तृ).

CANDIDLY, *adv.* सरलं, दाक्षिण्येन, अजिह्मं, धर्म्मेतस्, अमायया, निर्व्यलीकं, निर्व्याजं, कपटं विना, मायाव्यतिरेकेण.

CANDIDNESS, *s.* सरलता, सारल्यं, दाक्षिण्यं, शुचिता, ऋजुता, आर्जवं, अजिह्मता, निर्व्यलीकता, अमाया.

CANDIED, *a.* घनीभूतः -ता -तं.—(Sugar) खण्डमोदकः, माक्षिकशर्करा, उपला, दृढगात्रिका.

To CANDIFY, *v. a.* शुक्लीकृ, धवलीकृ, धवल (nom. धवलयति -यितुं).

CANDLE, *s.* दीपः -पकः, दीपिका, प्रदीपः, वर्त्ती, वर्त्तिः *f.*, दशाकर्षः, शिखी *m.* (न्), कज्जुलध्वजः.

CANDLEHOLDER, *s.* दीपधारी *m.* (न्), दीपवाहः, प्रदीपभृत्, दीपहस्तः.

CANDLELIGHT, *s.* दीपद्युतिः *f.*, प्रदीपद्युतिः, दीपप्रभा, वर्त्तिदीप्तिः *f.*

CANDLEMAS, *s.* मरियम्नामिकायाः कन्यायाः शुचित्वम् उद्दिश्य महोत्सवो यस्य सेवनकाले भूरिप्रदीपाः समिद्धा भवन्ति.

CANDLESTICK, *s.* दीपाधारः, दीपपादपः, प्रदीपपादपः, दीपवृक्षः, वर्त्याधारः, शिखातरुः *m.*, शिखावृक्षः, कौमुदीवृक्षः, कज्जुलरोचकः.

CANDLESTUFF, *s.* दीपिकानिर्म्माणार्थं तैलवसादि द्रव्यं, वसा, तैलं, स्नेहः.

CANDOUR, *s.* सरलता, दाक्षिण्यं, शुचिता, अमाया, ऋजुता, सत्यता, सत्यवादित्वं, विमलात्मता, मनोनिर्म्मलत्वं, निर्व्यलीकता, औदार्य्यं, सुशीलता.

To CANDY, *v. a.* (To form into congelations) खण्डीकृ, खण्डमोदाकारं -रां -रं or उपलाकारं कृ, घनीकृ or सान्द्रीकृ or संहतीकृ, श्यै in caus. (श्यापयति -यितुं).

To CANDY, *v. n.* (To grow congealed) खण्डीभू, खण्डमोदकवद् घनीभू or सान्द्रीभू, उपलाकारः -रा -रं भू, श्यै (c. 1. श्यायते, श्यातुं).

CANDY, *s.* (Sugar) खण्डमोदकः, खण्डः, उपला, शुक्लोपला, माक्षिकशर्करा, शर्करा, दृढगात्रिका.

CANE, *s.* वेतसः, वेणुः *m.*, वेत्रः, वेत्रं, वंशः, कीचकः, वानीरः; 'made of cane,' वैणवः -वी -वं, वैत्रकः -की -कं, वैदलः -ली -लं; 'a worker in cane,' वेणुच्छेदनजीवी *m.* (न्), वैदलकारः; 'a blow with a cane,' वेत्राघातः, वेत्रेण आघातः.—(A stick) यष्टिः *m. f.*, दण्डः; 'a cane stick,' वैणवी यष्टिः.—(Sugar-cane) इक्षुः *m.*, इक्षुयष्टिः *m.*, इक्षुदण्डः.—(Cane-chair) वेत्रासनं.

To CANE, *v. a.* (To beat with a cane) दण्डेन or वेत्रेण or यष्टिना हन् (c. 2. हन्ति, हन्तुं) or ताड् (c. 1. ताडयति -यितुं), वेत्राघातं कृ.

CANICULAR, *a.* (Belonging to the dog-star) कुक्कुराख्यनक्षत्रसम्बन्धी -न्धिनी -न्धि (न्).

CANINE, *a.* कुक्कुरसम्बन्धकः -का -कं, कुक्कुरीयः -या -यं, शौवः -वी -वं.

CANISTER, *s.* (A basket) उल्लकः, करण्डः.—(A tin-box) त्रापुषपात्रं.

CANKER, *s.* (A corroding sore) गलितक्षतं, विद्रधिः *m.*, नालीव्रणः.—(A worm that destroys fruits) फलनाशकः कीटः.—(Anything that corrupts or corrodes) कलङ्कः, विषं, दूषकः, गरः.—(Corrosion, consuming) दूषणं, विलयः, विलयनं, क्षयः, नाशः, विनाशः.—(Virulence) विषालुता, सगरता.

To CANKER, *v. a.* (To corrupt, corrode) दुष् in caus. (दूषयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं), विली in caus. (-लाययति -यितुं), विनश् in caus. (-नाशयति -यितुं), क्षि in caus. (क्षययति -यितुं), मृ in caus. (मारयति -यितुं).

To CANKER, *v. n.* (To grow corrupt) दुष् (c. 4. दुष्यति, दोष्टुं), प्रदुष्, विली (c. 4. -लीयते -लेतुं), विषसम्पर्कात् or विषसंसर्गात् क्षी in pass. (क्षीयते), गल् (c. 1. गलति, गलितुं), विगल्.

CANKER-BIT, *a.* विषाक्तदन्तेन दष्टः -ष्टा -ष्टं or दंशितः -ता -तं.

CANKERED, *p. p.* कलङ्कितः -ता -तं, दूषितः -ता -तं, विषाक्तः -क्ता -क्तं, गरली -लिनी -लि (न्).—(In disposition) प्रतीपः -पा -पं, दुःशीलः -ला -लं, विषहृदयः -या -यं.

CANNABINE, *a.* शाणः -णी -णं, भाङ्गीनः -ना -नं, शणसूत्रमयः -यी -यं.

CANNIBAL, *s.* पुरुषादः, नृजग्धः, नरभुक् *m.* (ज्), मनुष्यभोजी *m.* (न्), अम्रपः, पिशिताशः, क्रव्याशी *m.* (न्), आममांसाशी *m.* (न्), राक्षसः.

CANNIBALISM, *s.* नृजग्धत्वं, क्रव्याशिता, मनुष्यभोजित्वं.

CANNON, *s.* अन्तरग्निबलेन लोहगुलिकाप्रक्षेपणं युद्धयन्त्रं, वृहल्लोहप्रक्षेपार्थं सुषिरयन्त्रं, गोलासनं, गुलिप्रक्षेपणी वृहल्लोहनाडिः *f.*

To CANNONADE, *v. a.* पूर्व्वोक्तेन यन्त्रेण मृद् (c. 9. मृद्नाति, मर्द्दितुं) or प्रमृद्.

CANNON-BALL, *s.* रणगुलिः *f.*, रणगोलः, गुलिः *f.* -ली, अयोगुडः, पूर्व्वोक्तवृहन्नाडेः प्रक्षेपणीयो लोहगोलकः, दूरवेधिनी गुलिका, आग्नेयास्त्रं.

CANNONEER, *s.* पूर्व्वोक्तयन्त्रेण मर्द्दी *m.* (न्) or विमर्द्दी, रणगुलिप्रक्षेपकः, रणगोलासः, आग्नेयास्त्रप्रक्षेपकः.

CANOE, *s.* वृक्षस्य खातस्कन्धनिर्म्मिता क्षुद्रनौका, लघुनौका.

CANON, *s.* (A rule, a law) विधिः *m.*, नियमः, सूत्रं, व्यवस्था, शास्त्रं, रीतिः *f.*—(Ecclesiastical law) पौरोहितधर्म्मशास्त्रं, धर्म्माध्यक्षसमाजेन व्यवस्थापिता धर्म्मसंहिता, पौरोहित्यसम्बन्धि स्मृतिशास्त्रं, याजकीयधर्म्मशास्त्रं.—(The received books of Holy Scripture) धर्म्ममूलं, धर्म्मपुस्तकसंहिता, धर्म्मनिदर्शनं.—(A dignitary of a Cathedral) महापूजाशालासम्बन्धीयमठे गुरुः or सभासद्, महाभजनप्रासादे प्रधानपुरोहितः, महापूजाशालायां मुख्यधर्म्माध्यापकः.

CANONESS, *s.* पूर्व्वोक्तपुरोहितव्यवहारानुसारिणी स्त्री or नारी.

CANONICAL, *a.* वैधिकः -की -कं, नैयमिकः -की -कं, शास्त्रीयः -या -यं, धर्म्मशास्त्रीयः -या -यं, रीत्यनुसारी -रिणी -रि (न्), व्यावहारिकः -की -कं, पौरोहितधर्म्मानुरूपः -पा -पं.

CANONICALLY, *adv.* विधिवत्, शास्त्रवत्, विधितस्, शास्त्रतस्, विधिपूर्व्वकं, रीतिपूर्व्वकं, नियमपूर्व्वकं, यथाविधि, यथाशास्त्रं, पौरोहितधर्म्मानुसारेण, याजकीयस्मृतिशास्त्रक्रमेण.

CANONICALS, *s. pl.* धर्म्माध्यापकलाक्षणिकं वस्त्रादि, पुरोहितवेशः, याजकवेशः.

CANONIST, *s.* पौरोहितधर्म्मशास्त्रज्ञः, पुरोहितव्यवहारपण्डितः, याजकीयधर्म्मशास्त्रज्ञः.

CANONIZATION, *s.* सिद्धानाम् मध्ये आरोपणं, अमुकसाधुजनः सिद्धिं प्राप्तवान् इति घोषणापत्रेण विज्ञापनं.

To CANONIZE, *v. a.* सिद्धलोकमध्ये आरुह् in caus. (-रोपयति -यितुं), अमुकसाधुजनः सिद्धानां मध्ये विगणनीय इति घोषणापत्रेण विज्ञा in caus. (-ज्ञापयति -यितुं).

CANONIZED, *p. p.* सिद्धलोकारोपितः -ता -तं, सिद्धानां मध्ये संख्यातः -ता -तं.

CANONRY OR CANONSHIP, *s.* पूर्व्वोक्तपुरोहितसम्बन्धि पदं or वर्त्तनं.

CANOPIED, *p. p.* वितानीकृतः -ता -तं, वितानाच्छादितः -ता -तं.

CANOPY, *s.* वितानं -नकं, चन्द्रातपः, उल्लोचः, आच्छादनं, पिधानं, व्यवधा.

To CANOPY, *v. a.* वितानीकृ, चन्द्रातपेन आच्छद् (c. 10. -छादयति -यितुं).

CANOROUS, *a,* सुस्वरः -रा -रं, सुधारुस्वनः -ना -नं, स्वरयुक्तः -क्ता -क्तं.

CANT, *s.* (A technical form of speaking) परिभाषा, लाक्षणिकवाक्यं, कल्पितवाक्यं, कल्पितसंज्ञा, रचितवाक्यं.—(A corrupt dialect) भ्रष्टभाषा, अपभाषा, कुभाषा, अपशब्दः.—(A whining pretension to goodness) अन्तर्दुष्टस्य धर्म्मध्वनीकरणार्थं सद्वाक्यमात्रं, साधुवाङ्मात्रं, दम्भोक्तिः *f.*, दाम्भिकवचनं, धर्म्मोपदेशकवाक्यं, निःसत्यवाक्यं, वैलक्ष्यवचनं, वाक्छलं, छाद्मिकवचनं.

To CANT, *v. n.* (To talk in technical language) परिभाष् (c. 1. -भाषते -भाषितुं), लाक्षणिकवाक्यं or रचितवाक्यं वद् (c. 1. वदति, वदितुं).—(To speak hypocritically) धर्म्मध्वनीकरणार्थं or धर्म्मोपदेशमात्रात् सज्जन इव वद्, दम्भार्थं स्वव्यवहारविरुद्धं सद्वाक्यमात्रं वद्.

CANTATION, *s.* (The act of singing) गानं, गीतिः *f.*, गीतं, गानकरणं.

CANTEEN, *s.* सैन्यानां प्रस्थानकाले मद्यशुण्डादिधारणयोग्यं त्रापुषभाण्डं.

CANTER, *s.* (Pace of a horse) अश्वपुलायितं, अश्ववल्गितं, विक्रान्तिः *f.*—(A canting hypocrite) दम्भार्थं वादी *m.* (न्), वाङ्मात्रेण धार्म्मिकः, दाम्भिकः, छद्मतापसः, धर्म्मध्वजी *m.* (न्), आर्य्यलिङ्गी *m.* (न्), साधुम्मन्यः.

To CANTER, *v. n.* अश्वपुलायितेन or अश्ववल्गितेन चल् (c. 1. चलति, चलितुं).

CANTHARIDES, *s. pl.* त्वक्स्फोटोत्पादका विदेशीयमक्षिकाप्रभेदाः.

CANTHUS, *s.* (Corner of the eye) अपाङ्गः -ङ्गकं, नयनोपान्तः, नेत्रपर्य्यन्तः.

CANTICLE, *s.* उपगीतं, उपगानं, ईश्वरीतं काव्यबन्धः.—(Book of the Bible) सुलेमान्नाम्ना राज्ञा रचितं धर्म्मग्रन्थानां मध्ये गणितं गीतं.

CANTLE OR CANTLET, *s.* (A piece) खण्डं, भिन्नं, भागः, विभागः, शकलं.

CANTO, *s.* अध्यायः, सर्गः, पद्धतिः *n.* (न्), परिच्छेदः, विच्छेदः, स्कन्धः, खण्डः -ण्डं, उच्छ्वासः, काण्डः, परिवर्त्तः.

CANTON, *s.* मण्डलं, उपमण्डलं, चक्रं, भूप्रदेशः, भूमिभागः, भूभागः, देशः.

To CANTON, *v. n.* (To divide into parts) खण्डशस् or भागशस् or खण्डं खण्डं विभज् (c. 1. -भजति -भक्तुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or व्यंश् (c. 10. -अंशयति -यितुं).—(To canton a town for soldiers) नगरे स्वं स्वम् आवासं सैन्यानां कॢप् (c. 10. कल्पयति -यितुं).

CANTONMENT, *s.* सैन्यावासः, नगरे पृथक् पृथक् परिकल्पितं सैन्यनिवासस्थानं.—(Camp) कटकः, शिविरं.

CANVASS, *s.* (A coarse cloth) शाणं, शणवस्त्रं, पटः, पटी, स्थूलपट्टं, स्थूलशाटिः *m.*—(Sails of a ship) वातवसनं.—(Solicitation upon an election) अमुकपदप्रेप्सया परसम्मतग्राहणं.

To CANVASS, *v. a.* (To sift, examine) परीक्ष् (c. 1. -ईक्षते -ईक्षितुं), निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं).—(To debate) विचर् in caus. (-चारयति -यितुं), तर्क् (c. 10. तर्कयति -यितुं), वितर्क्.

To CANVASS, *v. n.* (To solicit votes) अमुकपदप्रेप्सया परेषां सम्मतं or आश्रयं or आग्रहं or अनुपालनं or संवर्द्धनं प्रार्थ् (c. 10. -अर्थयते -यितुं).

CANVASSER, *s.* प्रार्थकः, अर्थी *m.* (न्), अमुकपदप्रेप्सुः *m.*, पराश्रयप्रार्थकः.

CANY, *a.* वेतस्वान् -स्वती -स्वत् (त्), वैत्रकः -की -कं, वैदलः -ली -लं, वैत्रवः -वी -वं.

CANZONET, *s.* (A little song) उपगीतं, उपगानं, गीतकः, ईश्वरीतं.

CAP, *s.* शिरोवेष्टः -ष्टनं, शिरस्कं, शिरस्त्रं, शिरस्त्राणं, शिरोवस्त्रं, मस्तकाभरणं.

To CAP, *v. n.* (To take off the cap in salutation) मस्तकम् उच्छाद्य or शिरस्त्रम् उन्मथ्य अभिवद् (c. 10. -वादयति -ते -यितुं); अभिवादनार्थं शिरस्त्रम् अपहृ in caus. (-हारयति -यितुं), or अवमुच् (c. 6. -मुञ्चति -मोक्तुं).

To CAP, *v. a.* (To cover) पिधा (c. 3. -दधाति -धातुं), सपिधानं -ना -नं कृ; 'to cap verses,' प्रतिमालां कृ.

CAPABILITY, *s.* शक्यत्वं, शक्तिः *f.*, शक्तता, सामर्थ्यं, समर्थता, क्षमता, उपयोगिता, योग्यता, युक्तिः *f.*, पात्रता, सामञ्जस्यं; 'of acting,' क्रियाशक्तिः *f.*

CAPABLE, *a.* (Having powers equal to any thing) क्षमः -मा -मं, समर्थः -र्था -र्थं, शक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं; 'capable of building a house,' गृहकरणे शक्तः; 'capable of a journey,' अध्वनि क्षमः; 'capable of toils,' क्लेशानाम् उचितः; 'capable of being done,' शक्यः -क्या -क्यं; 'to be capable of,' शक् (c. 5. शक्नोति or pass. शक्यते), क्षम् (c. 1. क्षमते), उत्सह् (c. 1. -सहते) with inf.; कॢप् (c. 1. कल्पते), उपकॢप्; 'I am not capable of leaving thee,' त्वाम् उत्सहे नोत्सहे; 'he is rendered capable of immortality,' अमृतत्वाय कल्पते.—(Qualified, competent) उपयुक्तः -क्ता -क्तं. पाचिकः -का -कं.—(A competent person) पात्रं, सत्पात्रं.—(One endowed with good qualities, intelligent) गुणवान् -वती -वत् (त्), बुद्धिमान् -मती -मत् (त्), कृती -तिनी -ति (न्).—(Capable of holding) धारणक्षमः -मा -मं, आदानयोग्यः -ग्या -ग्यं.

CAPACIOUS, *a.* विशालः -ला -लं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, पृथुः -थुः -थु, विवृतः -ता -तं, विपुलः -ला -लं, उरुः -रुः -रु, प्रसृतः -ता -तं, प्रस्थः -स्था -स्थं.

CAPACIOUSNESS, *s.* विशालता, विस्तीर्णता, पृथुता, परिसरः, उरुत्वं.

To CAPACITATE, *v. a.* क्षमीकृ, उपयुक्तं -क्तां -क्तं कृ, उपयोगित्वं दा (c. 3. ददाति, दातुं).

CAPACITY, *s.* (Size) परिमाणं.—(Power of holding) धारणशक्तिः *f.*, कोष्ठः.—(Room) प्रसरः, विस्तृतिः *f.*, विस्तारः.—(Power of the mind) धीशक्तिः *f.*, बुद्धिपात्रता.—(Power, ability, fitness) शक्तिः *f.*, सामर्थ्यं, बलं, योग्यता, उपयुक्तता, उपयोगित्वं, पात्रता; 'according to one's capacity,' यथाशक्ति, यथासामर्थ्यं, यथाबलं; 'beyond one's capacity,' अतिशक्ति.—(State, profession) भावः, दशा, अवस्था, वृत्तिः *f.*

CAP-À-PÉE OR CAP-À-PIÉ, अङ्गप्रत्यङ्गं, मस्तकात्प्रभृति पादपर्य्यन्तं, सर्व्वाङ्गं.—(Completely armed) संवर्म्मितः -ता -तं.

CAPARISON, *s.* (Of a horse or elephant) आस्तरः -रणं, परिष्टोमः, वर्णः, जयनं, सज्जा, अश्वसज्जा, अश्वपरिधानं, प्रसरः.

To CAPARISON, *v. a.* परिष्टोमं or आस्तरं परिधा (c. 3. -दधाति -धातुं), सज्जीकृ.

CAPARISONED, *p. p.* परिष्टोमभूषितः -ता -तं, सज्जितः -ता -तं, जयनयुक् *m. f. n.* (ज्).

CAPCASE, *s.* लघुवस्त्राधारः, भाण्डं, समुद्गः -द्गकः, सम्पुटः.

CAPE, *s.* (Promontory) अनरीपः -पं, नासारूपेण समुद्रमध्ये प्रलम्बो भूमिभागः, समुद्रमध्ये उदग्रा गिरिनासिका, स्थलाभोगः.—(Neck-piece of a cloak) ग्रीवाप्रच्छदः, स्कन्धप्रच्छदः, स्कन्धप्रावरणं, उत्तरप्रच्छदः.—(A small cloak) अरत्निपर्य्यन्तं लम्बमानः क्षुद्रप्रावारः.

CAPER, *s.* (A jump) प्लुतं, प्लवः, क्रम्पः, वल्गितं, उत्फालः, लङ्घनं नर्त्तनं.—(A kind of pickle) सन्धानविशेषः.

To CAPER, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), वल्ग् (c. 1. वल्गति, वल्गितुं), उत्पत् (c. 1. -पतति -पतितुं).

CAPILLAMENT, *s.* केशरः, केसरः, पक्ष्म *n.* (न्), किञ्जल्कः, किञ्जल्कः.

CAPILLARY, *a.* (Resembling hair) केशोपमः -मा -मं, केशिकः -की -कं, केशरी -रिणी -रि (न्).—(Minute) सूक्ष्मः -क्ष्मा -क्ष्मं, कणीकः -का -कं.

CAPILLARY, *s.* सूक्ष्मतृणाकारदलविशिष्ट ओषधिभेदः.—(Vein) सूक्ष्मनाडिः *f.*

CAPITAL, *a.* (Relating to the head) मस्तकसम्बन्धी -न्धिनी -न्धि (न्). —(Chief, principal) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, ज्यायः -य्या -य्यं, विशिष्टः -ष्टा -ष्टं, ज्येष्ठः -ष्ठा -ष्ठं, प्रधानः in comp. —(Criminal in the highest degree, worthy of death) महापातकी -किनी -कि (न्), बधार्हः -र्हा -र्हं, बधदण्ड्यः -ण्ड्या -ण्ड्यं; 'a capital crime,' महापातकं, महापापं.—(A capital city) पुरोत्तमः, *see* the next.—(Capital punishment) बधदण्डः, उत्तमसाहसं, प्राणहननं, प्राणदण्डः.—(Capital stock) मूलद्रव्यं.

CAPITAL, *s.* (In money, &c.) मूलं, मूलधनं, मूलद्रव्यं, नीवी -विः *f.*, परिपणं.—(A capital city) राजधानं -नी, स्कन्धावारः, कट्टः -टं, स्कट्टः -टं.—(A large letter) वृहदक्षरं, महाक्षरं.—(Top of a pillar) स्तम्भशीर्षं, स्तम्भाग्रं, स्तम्भशृङ्गं.

CAPITALIST, *s.* कोटीश्वरः, मूलधनाढ्यः, धनाढ्यः, धनवान् *m.* (त्), कोषवान् *m.* (त्), सधनः, वित्तवान् *m.* (त्).

CAPITALLY, *adv.* उत्तमसाहसेन, प्राणदण्डेन, परमं, उत्तमप्रकारेण.

CAPITATION, *s.* मस्तकसंख्या, शरीरगणना, व्यक्तिः परिसंख्या, प्रत्येकं or एकशस् or एकतस् or एकैकशस् or पृथक् पृथक् संख्यानं or परिगणना.

CAPITOL, *s.* रोमनगरे पूजितस्य युपितराख्यस्य आदिदेवस्य प्रासादः.

CAPITULAR, *s.* (The statutes of the chapter of a cathedral) महाभजनप्रासादे सङ्घसभासद्भिर् विहिता व्यवस्थासंहिता.—(A member of the chapter) महाभजनप्रासादे सभासद् *m.*, महापूजाशालासम्बन्धीयमठे सभासद्.

CAPITULAR, *a.* पूर्वोक्तमठव्यवस्थासम्बन्धी -न्धिनी -न्धि (न्).

To CAPITULATE, *v. n.* (To surrender on certain stipulations) समयं or नियमं कृत्वा शत्रुवशे or शत्रुस्वत्वे or शत्रोरधिकारे परादा (c. 3. -ददाति -दातुं) or प्रदा, or सम्प्रदा or समृ in caus. (-अर्पयति -यितुं) or शत्रोरधीनः -ना -नं भू or शत्रोर् वशीभू.—(To draw up any thing in heads) मार्गेषु निबन्ध् (c. 9. -बध्नाति -बन्द्धुं) or रच् (c. 10. रचयति -यितुं), सम्प्रवच् (c. 2. -वक्ति -वक्तुं), समासतस् or सङ्क्षेपतस् लिख् (c. 6. लिखति, लेखितुं).

CAPITULATION, *s.* (Surrendering on certain stipulations) नियमपूर्वकं परादानं or सम्प्रदानं or प्रदानं or समर्पणं.—(Reduction to heads) मार्गेषु निबन्धनं or रचना, समासतो लिखनं.

CAPITULATOR, *s.* नियमपूर्वकं परादाता *m.* (तृ) or सम्प्रदाता *m.* (तृ), समयकर्त्ता *m.* (र्तृ).

CAP-MAKER, *s.* शिरस्त्रकारी *m.* (न्), शिरोवेष्टनकृत्, मस्तकाभरणविक्रेता *m.* (तृ).

CAPON, *s.* छिन्नवृषणः कुक्कुटः, वृषणहीणः कृकवाकुः *m.*

CAPOT, *s.* पिकेदाख्यायां क्रीडायां सङ्घद्यूतपत्राणां निर्जयः or स्वीकरणं.

To CAPOT, *v. a.* पूर्वोक्तक्रीडायां सङ्घद्यूतपत्राणि निर्जि (c. 1. -जयति -जेतुं) or स्वीकृ.

CAPOUCH, *s.* (A monk's hood) सन्न्यासिभिर् धृतं शिरःपिधानं.

CAPRICE, *s.* मनोलौल्यं, लौल्यं, चापलं, निर्बन्धः, अखट्टिः *m.*, असङ्ग्रहः, खाटिः *f.*

CAPRICIOUS, *a.* चपलः -ला -लं, चञ्चलः -ला -लं, लोलः -ला -लं, अस्थिरः -रा -रं, सङ्कुमुकः -का -कं, चञ्चलहृदयः -या -यं, लोलचेताः -ताः -तः (स्), चलचित्तः -त्ता -त्तं, चपलात्मकः -का -कं, प्रकृतितरलः -ला -लं, नैकभाव्याश्रयः -या -यं, असदाग्रः -ग्रा -ग्रं.

CAPRICIOUSLY, *adv.* मनोलौल्येन, चापल्येन, चाञ्चल्येन, लोलचेतसा.

CAPRICIOUSNESS, *s.* चापल्यं, चपलता, चाञ्चल्यं, चञ्चलता, अस्थिरता, चलता, हृदयचाञ्चल्यं, चलचित्तता, चित्ततरलता.

CAPRICORN, *s.* (Sign of the zodiac) मकरराशिः *m.*, मकरः.

CAPRIOLE, *s.* अश्वप्लुतं, तुरङ्गवल्गितं, अश्वस्य गतिविशेषः.

CAPSTAN, *s.* गुरुभाराकर्षणार्थं यष्टिभिः सञ्चारितं चक्रयन्त्रं.

CAPSULAR, CAPSULARY, *a.* बीजकोशाकारः -रा -रं, पुटाकारः -रा -रं.

CAPSULATED, *a.* कोशस्थः -स्था -स्थं, कोशपरिगतः -ता -तं.

CAPSULE, *s.* बीजकोशः, बीजगुप्तिः *f.*, कोषः, पुटः, सिक्ता.

CAPTAIN, *s.* (In the army) सैन्याधिपतिः *m.*, सैन्याध्यक्षः, व्यूहपतिः *m.*, गुल्मपतिः, योधमुख्यः, दण्डनायकः, सेनानीः *m.*—(Of a ship) नौकाधिपतिः *m.*, नौकाधिष्ठाता *m.* (तृ), पोताध्यक्षः, नौपतिः.—(Any chief) मुखरः, नायकः, नेता *m.* (तृ), पुरोगः -गमः, अग्रगः.

CAPTAINSHIP, *s.* सैन्याधिपतिपदं, नौकाध्यक्षाधिकारः, नेतृत्वं, मुखरत्वं.

CAPTATION, *s.* (Courting favour) लोकरञ्जनं, लोकानुरञ्जनं लोकसेवनं, लोकप्रशंसासेवनं, जनप्रसादलिप्सा.

CAPTION, *s.* (Seizure of person) आसेधः.—(Overreaching) प्रलम्भः, प्रतारणं, छलं.

CAPTIOUS, *a.* (Censorious) छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्), घृणी -णिनी -णि (न्), दोषग्राही -हिणी -हि (न्), विवादशीलः -ला -लं, उद्ग्राहशीलः -ला -लं.—(Fallacious, insidious) मोही -हिनी -हि (न्), भ्रान्तिकरः -री -रं.

CAPTIOUSLY, *adv.* विवादार्थं, विवादमात्रवाञ्छया. छिद्रान्वेषिवत्, उद्ग्राहशीलत्वात्, घृणया.

CAPTIOUSNESS, *s.* छिद्रान्वेषिता, विवादशीलता, घृणा, दोषग्राहित्वं, उद्ग्राहशीलता.

To CAPTIVATE, *v. a.* (To bring into bondage) वशीकृ, वन्दीकृ दासीकृ, करदीकृ, दम् in caus. (दमयति -यितुं).—(To charm) वशीकृ चित्तं or मनो हृ (c. 1. हरति, हर्त्तुं) or अपहृ, हृदयं ग्रह् (c. 9. गृह्णाति ग्रहीतुं), मुह् in caus. (मोहयति -यितुं).

CAPTIVATED, *p. p.* वशीकृतः -ता -तं, वशीभूतः -ता -तं, वशतापन्नः -न्ना -न्नं.

CAPTIVATING, *a.* मनोहरः -रा -रं, चित्तहारी -रिणी -रि (न्), चित्तापहारी -रिणी -रि (न्), हृदयग्राही -हिणी -हि (न्), मोहनः -ना -नी -नं, मोही -हिनी -हि (न्).

CAPTIVATION, *s.* वशीकरणं, ग्रहणं, बन्धनं, दासीकरणं, वन्दीकरणं.

CAPTIVE, *a.* वन्दीकृतः -ता -तं, दासीभूतः -ता -तं, शत्रुधृतः -ता -तं, शत्रुवशः -शा -शं, शत्रुग्रस्तः -स्ता -स्तं, कारास्थितः -ता -तं, कारागुप्तः -प्ता -प्तं, ग्रहणः -णा -णं.

CAPTIVE, *s.* वन्दिः *f.*, वन्दी, शत्रुधृतः, कारास्थः, कारागुप्तः, ग्रहणः, उपग्रहः, प्रग्रहः, करदः, करवरकी; 'taken alive,' जीवग्राहः.—(Slave) दासः; 'to take captive,' वन्दीकृ, दासीकृ.—(One charmed by beauty, &c.) वशीभूतः, मोहितः.

CAPTIVITY, *s.* बन्धनं, बन्दिभावः, कारागोपनं, वशित्वं, वश्यता, शत्रुवशिता.—(Servitude) दासत्वं, दास्यं, दासभावः.

CAPTOR, *s.* वन्दीकर्त्ता *m.* (र्तृ), ग्राहकः, जेता *m.* (तृ), लोग्रकृत्.

CAPTURE, *s.* (The act of taking) ग्रहणं; 'capture of a fort,' दुर्गलङ्घनं, दुर्गभङ्गः.—(The prize taken) लोग्रं, लोचं; 'capture of cattle,' गोग्रहः.

To CAPTURE, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), वन्दीकृ, दासीकृ, करदीकृ; 'to capture a fort,' दुर्गं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or लङ्घ् (c. 10. लङ्घयति -यितुं)

CAPUCHIN, *s.* रोमीयमतस्थः सन्न्यासिविशेषः.

CAPUT MORTUUM, *s.* मलं, खलं, किट्टं, कल्कं, विनीयः, शेषं.

CAR, *s.* रथः, चक्रयानं, गन्त्री, गन्त्रीरथः, शकटः; 'of the gods,' विमानः -नं; 'war-car,' स्यन्दनः, शताङ्गः; 'pleasure-car,' क्रीड

पुष्परथः ; 'covered car,' कर्णीरथः, हयनं, प्रवहणं ; 'multitude of cars,' रथ्या, रथकट्या ; 'car-maker,' रथकारः.

CARABINE or CARBINE, *s.* (A short gun used by the light horse) सङ्क्षानसमये अश्वारूढैर्धृता सीसकगोलकप्रक्षेपणी बाहुपरिमाणा लोहनाडिः.

CARABINEER, *s.* पूर्वोक्तशस्त्रधारी हयारूढः, पूर्वोक्तशस्त्रभृत्.

CARACK, *s.* (A large ship of burthen) भारवाहिनी वृहन्नौका.

CARACOLE, *s.* तिर्य्यक्प्लुतं, तिर्य्यग्वल्गितं, वक्रगतिः *f.*, कुटिलगतिः, अर्द्धचन्द्राकारा तुरङ्गगतिः.

To CARACOLE, *v. a.* तिर्य्यक् प्लु (c. 1. प्लवते, प्लोतुं) or वल्ग् (c. 1. वल्गति, वल्गितुं), अश्ववत् वक्रगत्या or अर्द्धचन्द्राकारगत्या चल् (c. 1. चलति, चलितुं).

CARAT, CARACT, *s.* (A weight of four grains) रक्तिकाद्वयसम उन्मानविशेषः.—(Manner of expressing the fineness of gold) स्वर्णकारभाषायां सुवर्णनिर्म्माल्यवाचिकः शब्दः.

CARAVAN, *s.* सार्थः, पथिकसन्ततिः *f.*, यात्रा, यात्रिकसङ्घः, सार्थवाहसमूहः, समध्वगनिवहः.

CARAVANSARY, *s.* पथिकाश्रयः, पथिकावासस्थानं, सार्थवाहानाम् उत्तरणस्थानं, उपकारी.

CARAWAY or CARWAY, *s.* अजसादा, क्षुद्रबीजप्रभेदः स च पिष्टकापूपादिना कदापि संसृज्यते.

CARBONADO, *s.* भर्ज्जनार्थं छिन्नमांसं or व्यवछिन्नमांसं, भर्ज्जनयोग्यं विनिकृत्तमांसं.

To CARBONADO, *v. a.* भर्ज्जनार्थं मांसं व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं) or विनिकृत् (c. 6. -कृन्तति -कर्त्तितुं) or विशस् (c. 1. -शसति -शसितुं).

CARBUNCLE, *s.* (Swelling) व्रणः -णं, विस्फोटः, स्फोटः, गण्डः.—(Jewel) पद्मरागः, सर्पमणिः.

CARBUNCLED, *a.* (Having swellings) व्रणी -णिनी -णि (न्).—(Set with the jewel) पद्मरागमयः -यी -यं, सर्पमणिकरञ्चितः -ता -तं.

CARCANET, *s.* (A chain or necklace of jewels) रत्नावलिः *f.*, मणिमाला, मुक्तावली.

CARCASS, *s.* (A dead body) शवः -वं, मृतशरीरं, मृताङ्गं, मृतकं, कुणपः -पं.—(The remains, ruins) शेषभागः, जीर्णभागः.

CARCELAGE, *s.* (Prison fees) काराध्यक्षशुल्कं, कारारक्षकेण गृहीतं शुल्कं.

CARCERAL, *a.* कारासम्बन्धी -न्धिनी -न्धि (न्), बन्धनालयसम्बन्धकः -का -कं.

CARD, *s.* (A painted paper used in games of chance) क्रीडापत्रं, द्यूतपत्रं, चित्रितद्यूतपत्रं.—(The paper on which the points of the compass are marked under the needle) दिग्विदिगङ्कितं पत्रं.—(The instrument for combing wool, flax, &c.) ऊर्णाशणादिमार्जनार्थं लोहदन्तयुक्तं यन्त्रं, ऊर्णामार्जनी, ऊर्णानिर्घर्षणयन्त्रं.

To CARD, *v. a.* (To comb wool) पूर्वोक्तयन्त्रेण ऊर्णां सम्मृज् (c. 2. -मार्ष्टि -मार्ष्टुं) or निर्घृष् (c. 1. -घर्षति -घर्षितुं).

CARDAMOM, *s.* (Large) एला, एलीका, पृथ्वीका, चन्द्रबाला, निष्कुटिः *f.*, बहुला.—(Small) तुत्था, त्रिपुटा, त्रुटिः *f.*, कोरङ्गी, कुक्षिका.

CARDER, *s.* (One that cards wool) ऊर्णामार्जकः, ऊर्णानिर्घर्षणकः.—(One that plays much at cards) द्यूतपत्रक्रीडासक्तः.

CARDIACAL, CARDIAC, *a.* तेजस्करः -री -रं, दीपनः -ना -नं, अग्निदः -दा -दं.

CARDINAL, *a.* (Chief) परमः -मा -मं, मुख्यः -ख्या -ख्यं, उत्तमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं, विशिष्टः -ष्टा -ष्टं, अग्र्यः -ग्र्या -ग्र्यं, प्रधानः in comp.

CARDINAL, *s.* रोमनगरे महाधर्म्माध्यक्षसमाजे सभासद्, रोमीयमतधारिणां मध्ये धर्म्माधिपतिः *m.*

CARDINALATE or CARDINALSHIP, *s.* पूर्वोक्तधर्म्माधिपतेः पदं or अधिकारः.

CARDINAL-POINT, *s.* उत्तरदिक्, पूर्वदिक्, पश्चिमदिक्, दक्षिणदिक् *f.* (श्).

CARDMATCH, *s.* (Game at cards) द्यूतपत्रक्रीडा, चित्रितपत्रद्यूतं.

CARE, *s.* (Anxiety) चिन्ता, चिन्तोद्वेगः, चित्तवेदना, मनोदुःखं, मनस्तापः, आधिः *m.*, चर्च्चा, औत्सुक्यं, उद्वेगः -जनं, चिन्ताभारः, मानसी व्यथा ; 'cares of this world,' सांसारिकी चिन्ता.—(Diligence, pains) प्रयत्नः, यत्नः, व्यवसायः, आस्था ; 'with care,' प्रयत्नतस्.—(Regard, attention) अवेक्षा, अपेक्षा, मनःप्रवेशः, मनोयोगः.—(Caution, heed) अवधानं, अप्रमादः ; 'to take care,' अवधा (c. 3. -धत्ते -धातुं), सावधानः -ना -नं भू.—(Heed, in order to protection) गुप्तिः *f.*, रक्षणं, रक्षा, पालनं ; 'to take care of, protect,' रक्ष् (c. 1. रक्षति, रक्षितुं), पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोप्तुं).—(The object of care) रक्षणीयः -या -यं, अपेक्षाभूमिः *f.*—(Care and management) योगक्षेमः.

To CARE, *v. n.* (To care for, concern one's self about) अपेक्ष् (c. 1. -ईक्षते -ईक्षितुं), अवेक्ष्, चिन्त् (c. 10. चिन्तयति -यितुं), अनुचिन्, सेव् (c. 1. सेवते, सेवितुं), भज् (c. 1. भजति -ते, भक्तुं), मनो धा (c. 3. दधाति, धातुं) with loc.

CARE-CRAZED, *a.* चिन्ताव्याकुलः -ला -लं, चिन्ताकुलः -ला -लं, चिन्ताव्यग्रः -ग्रा -ग्रं.

To CAREEN, *v. a.* (To calk) दारुजीर्णत्वाद् दारुस्फोटनाद् वा नौकां पार्श्वे पर्य्यस्य छिद्राणि पिधा (c. 3. -दधाति -धातुं).

CAREER, *s.* (A race-ground) धावनस्थानं, चर्य्यास्थानं.—(A race) चर्य्या, मार्गः, पणलाभार्थं धावनं.—(Course of action, &c.) गतिः *f.*, मार्गः, क्रियाप्रसङ्गः, प्रसरः, पर्य्यायः, क्रमः, रीतिः *f.*, गमनं, चलनं ; 'in full career, at full speed,' परमवेगेन, सरभसं, सर्ब्बवेगेन.

To CAREER, *v. n.* परमवेगेन धाव् (c. 1. धावति -वितुं), त्वर् (c. 1. त्वरते -रितुं).

CAREFUL, *a.* (Heedful, attentive) सावधानः -ना -नं, अवहितः -ता -तं, कृतावधानः -ना -नं, अप्रमत्तः -त्ता -त्तं, अप्रमादी -दिनी -दि (न्), सयत्नः -त्ना -त्नं, यत्नवान् -वती -वत् (त्), प्रयत्नवान् -वती -वत्.—(Anxious, full of care) चिन्तावान् -वती -वत् (त्), सचिन्तः -न्ता -न्तं, उत्सुकः -का -कं, व्यग्रः -ग्रा -ग्रं.

CAREFULLY, *adv.* सावधानं, सयत्नं, प्रयत्नतस्, यत्नतस्, प्रयत्नेन, प्रयत्नात्, यत्नात्, प्रमादं विना, अप्रमत्तं, प्रमादव्यतिरेकेण.

CAREFULNESS, *s.* अवधानता, सावधानता, सयत्नता, अप्रमादः, अप्रमादित्वं.

CARELESS, *a.* प्रमत्तः -त्ता -त्तं, प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), अनवहितः -ता -तं, अनवधानः -ना -नं, निरपेक्षः -क्षा -क्षं, असावधानः -ना -नं, असमीक्ष्यकारी -रिणी -रि (न्).—(To be careless of) प्रमद् (c. 4. -माद्यति -मदितुं) with abl. ; 'he is careless of his own interest,' स्वहितात् प्रमाद्यति.

CARELESSLY, *adv.* प्रमादेन, प्रमाद्यतस्, सप्रमादं, निरपेक्षं, अनपेक्षया, अवधानं विना, अनवधानेन.—(Implying absence of restraint) निर्यन्त्रणं.

CARELESSNESS, *s.* अनवधानं -नता, असावधानता, प्रमाद्यं, प्रमादः, अनपेक्षा.

To CARESS, *v. a.* आलिङ्ग् (c. 1. -लिङ्गति -लिङ्गितुं), समालिङ्ग्, भज् (c. 1. भजते, भक्तुं), स्वञ्ज् (c. 1. स्वजते, स्वंक्तुं), परिष्वञ्ज् ; क्रोडीकृ ; परिमृश् (c. 6. -मृशति -मर्ष्टुं), परिरभ् (c. 1. -रभते -रब्धुं), प्रेम कृ.

CARESS, *s.* आलिङ्गितं -ङ्गनं, परिष्वङ्गः, ललितं, क्रोडीकृतिः *f.*, अङ्कपाली, अङ्कपालिः *m.*, परिरम्भः.

CARESSED, *p. p.* आलिङ्गितः -ता -तं, क्रोडीकृतः -ता -तं, परिमृष्टः -ष्टा -ष्टं, परिरब्धः -ब्धा -ब्धं, परिष्वक्तः -क्ता -क्तं, उपगूढः -ढा -ढं.

CARET, *s.* इह किञ्चिद् अधिकं विस्मृतं वा निवेशयितव्यम् इति सूचनार्थं हंसपादाकृति चिह्नं.

CARGO, *s.* नौकाभारः, पोतभारः, पौतिकं, पोतस्थद्रव्यं, पोतस्थं भाण्डं.

CARICATURE, *s.* विकृताकारत्वाद् हास्यजनकं प्रतिमानं or उपमानं, हास्यप्रतिमानं, हास्योपमानं, हास्यचित्रं, विकृतचित्रं, हास्यप्रकारेण or अतिशयेन चित्रितम् आलेख्यं.

To CARICATURE, *v. a.* आकारं or मूर्त्तिं विकृत्य or साचीकृत्य हास्यप्रकारेण चित्र् (c. 10. चित्रयति -यितुं) or आलिख् (c. 6.-लिखति -लेखितुं), हास्यप्रतिमानं कृ, मूर्त्तिविकारपूर्व्वकं प्रतिमूर्त्तिं चित्रे लिखित्वा हास्यभूमिं कृ.

CARICATURED, *p. p.* हास्यप्रकारेण चित्रलिखितः -ता -तं, अङ्गविकारपूर्व्वकम् आलिखितः -ता -तं.

CARICATURIST, *s.* हास्यप्रकारेण उपमाता *m.* (तृ), हास्यप्रतिमानकृत्, हास्यचित्रकर्त्ता *m.* (र्त्तृ), विकृतप्रतिमानकृत्, यो मूर्त्तिम् चित्रे विकृत्य प्रतिमूर्त्तिं हास्यास्पदं करोति.

CARIES or CARIOSITY, *s.* अस्थिगलितत्वं, अस्थिपूयनं, अस्थिव्यसनं, अस्थिपाकः, अस्थिक्षयः, अस्थिशोषः.—(Of the teeth) दन्तव्यसनं.

CARIOUS, *a.* गलितः -ता -तं, पूयपूर्णः -र्णा -र्णं, क्षीणः -णा -णं, पूतिगन्धः -न्धा -न्धं.

To CARK, *v. n.* (To be anxious) चिन्ताव्याकुलः -ला -लं or चिन्ताव्यग्रः -ग्रा -ग्रं अस्, उत्सुक (nom. उत्सुकायते).

CARLE, *s.* दुर्वृत्तः, दुराचारः, अधमाचारः, कुशीलः, असभ्यः, निकृष्टः.

CARMAN, *s.* रथिकः, रथी *m.* (न्), रथवाहकः, चातुरिकः, सारथिः *m.*

CARMELITE, *s.* (Belonging to the order of Carmelites) रोमीयमतधारी सन्न्यासिविशेषः.

CARMINATIVE, *a.* वातघ्नः -घ्नी -घ्नं, वायुघ्नः -घ्नी -घ्नं, वायुनाशी -शिनी -शि (न्), रोचकः -का -कं, रुचकः -का -कं, अग्निदः -दा -दं, स्वेदजनकः -का -कं.

CARMINE, *s.* जतुसवर्णो रक्तरङ्गः, सिन्दूरोपमः or ओड्रपुष्पसवर्णो रङ्गः, जतुजरङ्गः, रक्तरेणुः *m.*

CARNAGE, *s.* संहारः, विशसनं, वधः, हत्या, घातनं, निहननं, निषूदनं.

CARNAL, *a.* (Fleshly, bodily) शारीरिकः -की -कं, शरीरजः -जा -जं, दैहिकः -की -कं, कायिकः -की -कं, वापुषिकः -की -कं.—(Worldly) सांसारिकः -की -कं, लौकिकः -की -कं, ऐहिकः -की -कं, ऐहलौकिकः -की -कं.—(Sensual) विषयी -यिणी -यि (न्), विषयासक्तः -क्ता -क्तं, विषयसङ्गी -ङ्गिनी -ङ्गि (न्), विषयानुरागी -गिणी -गि (न्), विषयोपसेवी -विनी -वि (न्), कामासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, कामुकः -का -कं; 'carnal desire,' कामः; 'carnal connexion,' अङ्गसङ्गः, सङ्गहरणं.

CARNALITY, *s.* विषयासक्तिः *f.*, विषयोपसेवा, विषयकामः, कामासक्तिः, विषयसङ्गः, शारीरिकविषयेषु अनुरागः, सङ्गः, कामिता.

CARNALLY, *adv.* शारीरिकरीतिक्रमेण, सांसारिकरीत्यनुसारात्, विषयसङ्गात्, कामुकवत्; 'to know carnally,' भज् (c. 1. भजते, भक्ते).

CARNATION, *s.* (Flesh colour) मांसवर्णः.—(The flower) मांसवर्णविशिष्टः पुष्पप्रभेदः.

CARNELIAN or CORNELIAN, *s.* मांसवर्णः प्रस्तरविशेषः.

CARNEOUS, *a.* मांसलः -ला -लं, मांसशीलः -ला -लं, मांसगुणविशिष्टः -ष्टा -ष्टं.

To CARNIFY, *v. n.* and *a.* मांसीभू, मांसंसाद्, मांससात्कृ.

CARNIVAL, *s.* (The feast held before Lent) वसन्तसमये प्राङ्मुहोपवासाद् रोमीयमतधारिभिः सेवितो महोत्सवः, दोलोत्सवः, होलाका.

CARNIVOROUS, *a.* क्रव्यादः -दा -दं, क्रव्यभुक् *m. f. n.* (ज्), क्रव्यभोजनः -ना -नं, मांसाशी -शिनी -शि (न्), मांसभक्षः -क्षा -क्षं, आमिषाशी -शिनी -शि (न्) or पिशिताशी, आममांसभक्षी -क्षिणी -क्षि (न्).

CARNOSITY, *s.* अर्ब्बुदः, गण्डः, मेदोग्रन्थिः *m.*, अर्शः *n.* (स्), दुष्टमांसं, मांसवृद्धिः *f.*

CAROB-BEAN, *s.* सिक्षाप्रभेदः, सिक्षिका, शिक्षा.

CAROCHE, *s.* क्रीडारथः, पुष्परथः, रथः, प्रवहणं, चातुरं

CAROL, *s.* (A song of joy) हर्षगीतं, हर्षगानं, आनन्दगीतं, जयगीतं जयशब्दः, आह्लादसूचकं गीतं.—(A song of devotion) स्तवगीतं, भक्तिगीतं, गीतं, स्तुतिः *f.*, स्तोत्रं, गाथा, स्तोत्रिः *f.*, सङ्गीतं.

To CAROL, *v. n.* गै (c. 1. गायति, गातुं), सुस् (nom. सुस्रायते); 'to celebrate in song, &c.' उपगै, स्तु (c. 2. स्तौति, स्तोतुं), उपवीण (nom. उपवीणयति -यितुं).

CAROTID, *s.* (Two arteries) हृत्पिण्डाद् रक्तप्रवाहकं वृहद्वाहिद्वयं, कण्डराद्वयं.

To CAROUSE, *v. n.* (To drink largely) अतिशयेन पा (c. 1. पिबति, पातुं) or सम्पा, अतिशयसम्पीता क्षीवः -वा -वं भू, उत्सवं कृ.

CAROUSE or CAROUSAL, *s.* सम्पीतिः *f.*, अतिपानं, अतिशयसम्पीतिः *f.*, उत्सवः.

CAROUSER, *s.* पानप्रसक्तः, पानरतः, सम्पीतिरतः, मद्यपीतः, अतिपायी *m.* (न्).

CARP, *s.* (A fish) शफरी, मकरी, प्रोष्ठी, प्रोष्टः, रोहितः.

To CARP AT, *v. n.* निन्द् (c. 1. निन्दति -न्दितुं), प्रतिनिन्द्, गर्ह् (c. 1. गर्हते, गर्हितुं, c. 10. गर्हयति -ते -यितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अवक्षिप्, दोषीकृ, दोषं or छिद्रम् अन्विष् (c. 6. -इच्छति -एषितुं), असूय (nom. असूयति -यितुं).

CARPENTER, *s.* तक्षकः, तक्षा *m.* (न्), सूत्रधारः, त्वष्टा *m.* (ष्टृ), काष्ठतक्षकः, काष्ठतट् (क्ष्), तष्टा *m.* (ष्टृ), स्थपतिः *m.*, वर्द्धकिः *m.*, रथकारः; 'carpenter's bench,' उद्वनः.

CARPENTRY, *s.* त्वष्टिः *f.*, तक्षणं, काष्ठतक्षणं, सूत्रधारकर्म्म *n.* (न्), तक्षकक्रिया.

CARPER, *s.* दोषग्राही *m.* (न्), दोषकथकः, छिद्रान्वेषी *m.* (न्), दोषैकदृक् *m.* (श्), घृणी *m.* (न्), पापदर्शी *m.* (न्), गुणघाती *m.* (न्), निन्दकः विवादशीलः, विवादप्रियः.

CARPET, *s.* आस्तरणं, पादपाशी, कुथः, कुथा, चित्रितवस्त्रं, पुष्पालङ्कृतवस्त्रं, आसनवस्त्रं; 'a carpet of grass,' दर्भास्तरणं; 'brought on the carpet,' प्रस्तुतः -ता -तं, उपन्यस्तः -स्ता -स्तं, प्रतिज्ञातः -ता -तं.

To CARPET, *v. a.* चित्रितवस्त्रादिना आस्तृ or आस्तॄ (c. 5. -स्तृणोति, c. 9. -स्तृणाति -स्तरितुं -स्तरीतुं).

CARPING, *a.* दोषग्राही -हिणी -हि (न्), घृणी -णिनी -णि (न्), निन्दकः -का -कं.

CARPING, *s.* (Cavil) निन्दा, गर्हा -र्हणं, घृणा, अपवादः, दोषकल्पनं, दोषप्रसक्तिः, दोषीकरणं, छिद्रान्वेषः, असूया, जुगुप्सा, घृतीया, आक्षेपः, उद्गाहः.

CARPINGLY, *adv.* निन्दया, घृणया, असूयया, विवादशीलत्वात्, जुगुप्सया, सापवादं.

CHANCERY, *s.* दण्डनैष्ठुर्य्यशमका महाविचारणसभा, महाविचारस्थानं, धर्म्मोग्रतानियामकः सभाविशेषः.

CHÁNDÁLA, *s.* (An outcaste or man of a degraded tribe) चाण्डालः, चण्डालः, मातङ्गः, निषादः, दिवाकीर्त्तिः, श्वपचः, जनङ्गमः, अन्तेवासी, पुक्कसः, श्वदः.

CHANDELIER, *s.* दीपवृक्षः, दीपपादपः, शिखातरुः, शिखावृक्षः, दीपाधारः.

CHANDLER, *s.* (A huckster) वार्त्ताजीवः, वैवधिकः, विवधिकः; 'a corn-chandler,' धान्यमायः.—(One who makes or sells candles) दीपिकाकृत्, दीपावेक्रेता *m.* (तृ).

To CHANGE, *v. a.* विकृ (c. 8. -करोति -कर्त्तुं), अन्यरूपं -पीं -पं कृ, भिन्नरूपं -पीं -पं कृ, विपर्य्यस् (c. 4. -अस्यति, असितुं).—(To barter) निमे (c. 1. -मयते -मातुं), विमे, विनिमे, परिवृत् in caus. (-वर्त्तयति -यितुं); 'he changes beans for sesamum-seed,' तिलेभ्यः प्रति माषान् ददाति.—(To change the mind) अन्यमानसीभू, विपरीतं विज्ञा (c. 9. -जानाति -ज्ञातुं).—(To change a note) हुण्डिकापत्रं सुवर्णरूप्यादिभिः परिवृत्.—(To change gold for coin of less value) सुवर्णरूप्यादिकं कुप्यनाणकपणकपर्दादिभिः परिवृत्.—(To change one's clothes) वासांसि अवतार्य्य or विहाय or अवमुच्य अपराणि परिधा (c. 3. -दधाति -धातुं).

To CHANGE, *v. n.* विकृ (c. 8. -कुरुते), विकृतीभू, अन्यथा भू, अन्यरूपः -पी -पं भू, भिन्नरूपः -पी -पं भू, विकृताकारः -रा -रं भू; 'the mouse was changed into a cat,' मूषिको विडालः कृतः.—(To change in mind) विमनीभू.—(To change one's evil course) पापाद् विनिवृत् (c. 1. -वर्त्तते -वर्त्तितुं) or निवृत्.

CHANGE, *s.* विकारः, विकृतिः *f.*, विक्रिया, वैकृत्यं, परिणामः, विपरिणामः, विपर्य्ययः, परिवर्त्तः, अन्यथाभावः.—(Vicissitude) आवृत्तिः *f.*, परिवृत्तिः *f.*; 'of the seasons,' ऋतुपर्य्यायः.—(Variety) वैचित्र्यं, विभेदः. —(Reformation) निवर्त्तनं.—(Small money) अल्पसारं धनं यथा कुप्यनाणकपणकपर्दकादि, अल्पार्घमुद्रा, क्षुद्रमुद्रा.—(Place where merchants meet) वणिक्समागमचत्वरं, श्रेष्ठिचत्वरं.—(Of the moon) अमावसी, प्रतिपत् चन्द्रपरिवर्त्तः, पर्व्वसन्धिः *m.*; 'of mind,' बुद्धिभेदः.

CHANGEABLE, *a.* (Possible to be changed) विकार्य्यः -र्य्या -र्य्यं.—(Fickle) अस्थायी -यिनी -यि (न्), अस्थिरः -रा -रं, अधीरः -रा -रं, चलः -ला -लं, चलचित्तः -त्ता -त्तं, चपलः -ला -लं, सङ्गसुकः -का -कं, नैकभावाश्रयः -या -यं, प्रकृतितरलः -ला -लं, अन्यमनाः -नाः -नः (स्), अन्यमानसः -सी -सं.—(Inconstant) अनित्यः -त्या -त्यं.

CHANGEABLENESS, *s.* अस्थिरता, अस्थैर्य्यं, चलचित्तता, चञ्चलत्वं, चापल्यं.

CHANGED, *p. p.* विकारितः -ता -तं, विकृतः -ता -तं, वैकृतः -ता -तं, कृतविक्रियः -या -यं, अन्यरूपः -पी -पं, परिणतरूपः -पी -पं, विपर्य्यस्तः -स्ता -स्तं, विकृताकारः -रा -रं.—(In feelings) विमनीकृतः -ता -तं, विमनीभूतः -ता -तं.

CHANGELING, *s.* कुलीनपुत्रेण परिवर्त्तितो धात्रीपुत्रः; वेतालेन सुरूपबालकम् अपहृत्य तस्य स्थाने उपसर्ज्जितः कुरूपबालक इति केचिन् मन्यन्ते; उपसर्ज्जितपुत्रः, उपकल्पितपुत्रः, कृत्रिमपुत्र., पुत्रप्रतिनिधिः *m.*

CHANGER, *s.* हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः.

CHANNEL, *s.* (A strait) सङ्कटं.—(The bed of a river) नदीभागः, नदीपात्रं, गर्भः, नदीगर्भः.—(A long excavation, a canal) कुल्या, उपकुल्या, खातं, नालः, प्रणालः.—(A narrow passage) सङ्कीर्णपथः.—(Furrow of a pillar) स्तम्भरेखा, स्तम्भसीता.—(A stream) स्रोतः *n.* (स्).

To CHANNEL, *v. a.* खन् (c. 1. खनति, खनितुं, खातुं), उत्खन्, कुल्याः कृ, सीताः कृ.

To CHANT, *v. n.* गै (c. 1. गायति, गातुं), प्रगै, उद्गै, सुस्र (nom. सुस्रायते), पठ् (c. 1. पठति, पठितुं).

CHANT, *s.* गीतं, गेयं, गानं, गाथा, खेलिः *f.*, स्तोत्रं.

CHANTED, *p. p.* गीतः -ता -तं, परिगीतः -ता -तं, पठितः -ता -तं.

CHANTER, *s.* उद्गाता *m.* (तृ), गायकः, गेणुः, गाथिकः, सुस्रयुः *m.*

CHANTICLEER, *s.* उषाकलः, कुक्कुटः, कृकवाकुः, यामघोषः.

CHAOS, *s.* महाभूतादिसाङ्कर्य्यं, प्राग्जगत्सृष्टेर् जलादिभूतानाम् अस्तव्यस्तता, एकार्णवः.—(Confusion) सङ्करः, साङ्कर्य्यं, संक्षोभः, व्यस्तता, अव्यक्तता.

CHAOTIC, *a.* सङ्करीकृतः -ता -तं, अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, सङ्कीर्णः -र्णा -र्णं, सङ्कुलः -ला -लं, एकार्णवीभूतः -ता -तं, अव्यक्तः -क्ता -क्तं, अलक्षणः -णा -णं.

To CHAP, *v. n.* (To break into gapings from the effect of cold) शीतोपहतत्वात् चुट् (c. 4. चुट्यति, चुटितुं) or विदल् (c. 1. -दलति -दलितुं) or विभिद् in pass. (-भिद्यते) or विदृ in pass. (-दीर्य्यते) or छिद् in pass. (छिद्यते) or स्फुट् (c. 6. स्फुटति, स्फुटितुं).

CHAP, *s.* (Cleft, chink) चुटितं, चुटिः *f.* -टी, छिद्रं, रन्ध्रं, गर्त्तः, भित्तिः *f.*; 'in the feet,' पाददारी, अलसः.—(A person, a fellow, contemptuously) माणवः -वकः, मनुष्यकः, नागरः.

CHAPE, *s.* (The catch of any thing by which it is held) बन्धनी, बन्धनकीलकः, सङ्गृहणार्थं दन्तकः, ग्रहणी, रक्षणी, आलानं.

CHAPEL, *s.* (Shrine) देवागारः, देवतागारः, देवायतनं, देवालयं.—(A small place of worship subject to a church) महामन्दिराधीना क्षुद्रपूजाशाला, अप्रधानमन्दिरं.—(Of ease) दूरस्थैः सेवितं क्षुद्रभजनभवनं.

CHAPELRY, *s.* क्षुद्रमन्दिराधिकारः, पूर्व्वोक्तपूजाशालाधीनो भूमिभागः.

CHAPERON, *s.* नृत्यगीतादिसमाजे अनूढाम् तरुणीम् उपास्ते या मध्यमवयस्का भाविनी or कुलीना स्त्री.

To CHAPERON, *v. a.* नृत्यगीतादिसमाजे अनूढां तरुणीं युवतिगणं वा उपास् (c. 2. -आस्ते -आसितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं), or उपचर् (c. 1. -चरति -चरितुं).

CHAPFALLEN, *a.* म्लानवदनः -नी -नं, मलिनमुखः -खी -खं, हताशः -शा -शं.

CHAPITER, *s.* स्तम्भशीर्षं, स्तम्भमस्तकः, स्तम्भशृङ्गं, ऊर्द्धस्तम्भः, स्तम्भस्य ऊर्द्धभागः.

CHAPLAIN, *s.* पुरोहितः, कुलाचार्य्यः, ऋत्विक् *m.* (ज्), कुलगुरुः *m.*, कुलविप्रः.

CHAPLAINSHIP, *s.* पौरोहित्यं, पुरोहितपदं, कुलाचार्य्यपदं, आर्त्विज्यं.

CHAPLET, *s.* माला, माल्यं, स्रक् *f.* (ज्), दाम *n.* (न्), कुसुमावतंसकं, निर्य्यूहः, आपीडः, पीडा; 'chaplet-maker,' मालाकारः, मालिकः; 'chaplets worn in different positions,' गर्भकः, प्रभद्रकं, ललामकं, प्रालम्बं, वैकक्षकं, आपीडः, शेखरः.

CHAPMAN, *s.* आपणिकः, विपणी *m.* (न्), क्रयिकः, विक्रयिकः.

CHAPPED, *p. p.* चुटितः -ता -तं, चुटितवान् -वती -वत् (त्), विदलितः -ता -तं, विभिन्नः -न्ना -न्नं, विदीर्णः -र्णा -र्णं, छिन्नः -न्ना -न्नं.

CHAPS, *s. pl.* (The mouth of a beast of prey) आस्यं, मुखं, वदनं. हनुः *m.*—(Entrance of a channel) सङ्कटमुखं, सङ्कटप्रवेशः.

CHAPTER, *s.* (Division) अध्यायः, अध्ययः, सर्गः, पर्व्व *n.* (न्), परिच्छेदः, विच्छेदः, काण्डः -ण्डं, खण्डः -ण्डं, स्कन्धः, उच्छ्वासः, आश्वासः, प्रकरणं, लम्बकः.—(An assembly of canons) महामन्दिरे प्रधानपुरोहितानां सभा.

To CHAR, *v. a.* (To burn wood to a cinder) अङ्गारसात्कृ, अङ्गारीकृ, अङ्गार (nom. अङ्गारयति -यितुं); ईषद्दह् (c. 1. -दहति -दग्धुं).

To CHAR, *v. n.* (To work at other's houses by the day) गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं यावद् व्यापृता भू or नियुज् in pass. (-युज्यते).

CHAR-WOMAN, *s.* गृहसम्मार्जने उदकवाहने इत्यादिकुत्सितकर्म्मणि एकदिनमात्रं नियुक्ता or व्यापृता चेटी, प्रत्यहं भृतिं गृह्णाति या कर्म्मकरी, दिनिकाचेटी, दिनिकाप्रेष्या, प्रेष्या, सैरिन्ध्री.

CHARACTER, *s.* (Disposition) शीलः -लं, शीलत्वं -ता, स्वभावः, वृत्तिः *f.*, स्वरूपं, स्वाभिप्रायः, चारित्रं.—(Property, peculiarity) भावः, गुणः, विशेषः.—(Natural character) स्वभावः, निसर्गः, प्रकृतिः *f.*—(Mark) लक्षणं, चिह्नं, अभिज्ञानं.—(Letter) अक्षरं, वर्णः -र्णी.—(Handwriting) स्वहस्ताक्षरं.—(Personage in a drama) भूमिका.—(Reputation, honour) मर्य्यादा, कीर्त्तिः *f.*, यशः *n.* (स्).—(Dignity) गौरवं

CHARACTERISTIC, *a.* लाक्षणिकः -की -कं, लाक्षण्यः -ण्या -ण्यं, विशेषकः -का -कं, विशेषणः -णा -णं, स्वाभाविकः -की -कं, गुणवाचकः -का -कं.

CHARACTERISTIC, *s.* लक्षणं, विशेषलक्षणं, संलक्षणं, लिङ्गं, चिह्नं, विशेषः -षणं, अभिज्ञानं, संज्ञा, गुणः, उपाधिः *m.*, स्वधर्म्मः, स्वभावः; 'generic property,' समानाधिकरणं; 'specific property,' जातित्वं.

CHARACTERISTICALLY, *adv.* विशेषतस्, सविशेषं, लक्षणतस्.

To CHARACTERIZE, *v. a.* लक्ष् (c. 10. लक्षयति -यितुं), संलक्ष्, उपलक्ष्; विशिष् in caus. (-शेषयति -यितुं), चिह्न (c. 10. चिह्नयति -यितुं).—(To give an account of the personal qualities) गुणदोषान् व्याख्या (c. 2. -ख्याति -ख्यातुं).

CHARACTERIZED, *p. p.* विशिष्टः -ष्टा -ष्टं, विशेषितः -ता -तं, सविशेषः -षा -षं -षणः -णा -णं, लक्षितः -ता -तं, संलक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लिङ्गी -ङ्गिनी -ङ्गि (न्).

CHARADE, *s.* सर्व्वतोभद्रः, वर्द्धमानः, प्रवह्लिका, पद्यविरचिता प्रश्नदूती यथा किंस्विच्छीघ्रतरं वायोः किंस्विद्बहुतरं तृणात् मनः शीघ्रतरं नताच्चिन्ता बहुतरा तृणादिति.

CHARCOAL, *s.* अङ्गारः -रं, निधापकः, दग्धकाष्ठं, दग्धेध्मं.

To CHARGE, *v. a.* (Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं), अभिशप् (c. 1. -शपति -शप्तुं), अभिशंस् (c. 1. -शंसति -शंसितुं), अधिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Impute a crime to any one) दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Enjoin, exhort) आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, प्रत्यादिश्, निर्दिश्, उपदिश्; आज्ञा in caus. -ज्ञापयति -यितुं).—(Intrust) निक्षिप्, न्यस् (c. 4. -अस्यति -असितुं), सम् in caus. (-अर्पयति -यितुं).—(Impose as a task) नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं).—(Attack) अभिद्रु (c. 1. -द्रवति -द्रोतुं); आस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिधाव् (c. 1. -धावति -ते -धावितुं).—(Burden, load) भारं न्यस्, or निविश् in caus. (-वेशयति -यितुं) or आरुह् in caus. (-रोपयति -यितुं), पॄ (c. 10. पूरयति -यितुं) with inst. c.—(Ask a price) मूल्यं प्रार्थ् (c. 10. -अर्थयते -र्त्ति -यितुं).

CHARGE, *s.* (Care, custody) गुप्तिः *f.*, रक्षा, रक्षणं; 'to take charge of,' रक्ष् (c. 1. रक्षति, रक्षितुं), अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Trust) निक्षेपः, उपनिक्षेपः, न्यासः, उपन्यासः, उपनिधिः *m.*; 'to give in charge,' निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), नियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).—(Commission, office, task,

duty) नियोगः, अधिकारः, भारः, व्रतं, धर्म्मः.—(Mandate, command) आदेशः, आज्ञा, शासनं.—(Exhortation) प्रत्यादेशः, उपदेशः.—(Accusation) अभियोगः, अभिशापः, अभिशंसनं, अपवादः.—(Imputation) दोषारोपः, दोषकल्पनं; 'to lay a crime to any one's charge,' दोषं कस्मिंश्चिद् आरुह् in caus. (-रोपयति -यितुं).—(Onset, attack) संशरणं, आस्कन्दः, अभ्यवस्कन्दः, उपघातः, अभिक्रमः, आक्रमः; 'charge sounded by musical instruments,' आडम्बरः.—(Burden) भारः, धुरा.—(Charge of a gun) पञ्चगुणगुलिकादिकम् एकवारे युद्धनाडौ निवेशयितव्यं.—(Expense) व्ययः.—(Price) मूल्यं, अर्घः.

Chargeable, *a.* (Liable to be accused) अभियोक्तव्यः -व्या -व्यं, अभियोज्यः -ज्या -ज्यं.—(Imputable) आरोपणीयः -या -यं.—(Causing expense) व्ययकारी -रिणी -रि (न्).

Charged, *p. p.* (Loaded) भुग्नेहः -हा -हं, धुरीणः -णा -णं, धुरीयः -या -यं, भारवान् -वती -वत् (त्), भाराक्रान्तः -न्ता -न्तं, अभिपूर्णः -र्णा -र्णं, गर्भः -र्भा -र्भं in comp.; as, 'a cloud charged with water,' अम्भोगर्भो जलदः.—(Accused) अभियुक्तः -क्ता -क्तं, अभिशस्तः -स्ता -स्तं.—(Injoined) समादिष्टः -ष्टा -ष्टं, प्रत्यादिष्टः -ष्टा -ष्टं.—(Made to pay) दापितः -ता -तं.—(Imputed) आरोपितः -ता -तं.

Charger, *s.* (Large dish) वृहत्पात्रं, पात्रं, भाजनं.—(War-horse) वारकीरः, योधहरः, युद्धाश्वः, युद्धवाजी *m.* (न्).

Charily, *adv.* परिमितप्रकारेण, मितप्रकारेण, परिमितं, अमुक्तहस्तेन, अल्पशस्.

Chariot, *s.* रथः, चक्रयानं, गन्त्री, गन्त्रीरथः; 'of war,' स्यन्दनः, शताङ्गः; 'of the gods,' विमानः -नं; 'covered chariot,' कर्णीरथः, हयनं; 'pleasure-chariot,' क्रीडारथः; 'chariot-race,' रथचर्य्या; 'chariot-horse,' रथ्यः; 'warrior mounted on a chariot,' स्यन्दनारोहः, रथारूढः, रथी *m.* (न्).

Charioteer, *s.* सूतः, यन्ता *m.* (न्तृ), नियन्ता (न्तृ), अधिरथः, रथवाहकः, सादिः *m.*, सारथिः *m.*, चातुरिकः, प्राजिता *m.* (तृ), क्षत्ता *m.* (त्तृ), सञ्चेत्ता *m.* (त्तृ), दक्षिणस्थः, प्रचेता *m.* (तृ).

Charitable, *a.* (Kind in giving alms and assisting the poor) कृपणवत्सलः -ला -लं, दरिद्रवत्सलः -ला -लं, दीनवत्सलः -ला -लं, करुणात्मकः -का -कं, दानशीलः -ला -लं, दरिद्रोपकारी -रिणी -रि (न्) or परोपकारी, अन्नदाता -त्री -तृ (तृ) or भिक्षादाता, दयालुः -लुः -लु, दरिद्रपोष्टा -ष्ट्री -ष्टृ (ष्टृ), दरिद्रपालकः -का -कं, सत्त्वभूतानुकम्पकः -का -कं, धर्म्मात्मा -त्मा -त्म (न्).—(Kind in judging of others) परदोषसहनः -ना -नं, अनसूयकः -का -कं, अमत्सरः -रा -रं.

Charitably, *adv.* दरिद्रोपकारशीलत्वात्, दयया, सदयं, दयालुवत्, दीनवत्सलवत्, दरिद्रपोष्टृवत्, सानुकम्पं.—(Without malignity) अनसूयया, अमत्सरं, परदोषसहनवत्.

Charity, *s.* (Kindness to the poor, liberality) दरिद्रोपकारः, दरिद्रपालनं, दरिद्रपोषणं, दया, कारुण्यं, दयालुत्वं, दानशीलता, कृपा, सुकरं, पूर्त्तं.—(Almsgiving) भिक्षादानं, दानं, दानधर्म्मः.—(Alms) भिक्षा, भैक्षं, भिक्षान्नं, पुण्यं, पुण्यकं; 'for charity,' पुण्यार्थे.—(Christian charity, love) प्रेम *n.* (न्), सत्त्वभूतानुकम्पः, सत्त्वप्राणिनः प्रति प्रेम.

Charlatan, *s.* मिथ्याचिकित्सकः, दुश्चिकित्सकः, छद्मवैद्यः, आयुर्वेदानभिज्ञः.—(Deceiver) छली *m.* (न्), मायी *m.* (न्), कपटी *m.* (न्).

Charlatanical, *a.* आयुर्वेदविरुद्धः -द्धा -द्धं, मिथ्याचिकित्सासम्बन्धीयः -या -यं, कापटिकः -की -कं, छाद्मिकः -की -कं, दाम्भिकः -की -कं.

Charlatanry, *s.* मिथ्याचिकित्सा, दुश्चिकित्सा, आयुर्वेदानभिज्ञता, छलं, कपटः -टं, छद्म *n.* (न्), दम्भः, प्रतारणं, वञ्चनं, वाक्छलं.

Charles's wain, *s.* सप्तर्षयः *m.pl.*, चित्रशिखण्डिनः *m.pl.*, शकटाकृति नक्षत्रं.

Charlock, *s.* शस्यक्षेत्ररोही पीतपुष्पविशिष्ट ओषधिभेदः.

Charm, *s.* (Words having mystic power) मन्त्रः, अभिचारमन्त्रः.—(Charm, amulet) कवचः -चं, संवदनं -ना, गारुडः; 'subduing by charms, &c.' वशक्रिया, अभिचारः, संवदनं -ना; 'under the influence of a charm,' अनुमन्त्रितः -न्ता -तं, अभिमन्त्रितः -न्ता -तं.—(Something of power to charm or allure) प्रलोभनं, विलोभनं.—(Beauty) मुग्धता, शोभा, कान्तिः *f.*, श्रीः, सौन्दर्य्यं.

To Charm, *v. a.* (To enchant) मन्त्रद्वारेण वशीकृ or मुह् in caus. (मोहयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयते -यितुं), अनुमन्त्र्, अभिचर् (c. 10. -चारयति -यितुं).—(To rejoice the mind) मनो हृ (c. 1. हरति, हर्त्तुं) or रम् in caus. (रमयति -यितुं), हृष् in caus. (हर्षयति -यितुं).—(To allure) प्रलुभ् in caus. (-लोभयति -यितुं).

Charmed, *p. p.* (With joy) हृतमानसः -सी -सं, हृष्टमानसः -सी -सं, प्रह्लादितः -ता -तं. उल्लासितः -ता -तं.—(By incantations, &c.) अभिमन्त्रितः -न्ता -तं, अनुमन्त्रितः -न्ता -तं, अभिचारितः -ता -तं, वशः -शा -शं, वशीभूतः -ता -तं, वशीकृतः -ता -तं, वशतापन्नः -न्ना -न्नं, मोहितः -ता -तं, आकृष्टः -ष्टा -ष्टं.

Charmer, *s.* (A dealer in charms) गारुडिकः, जाङ्गुलिकः.—(An enchanter) अभिचारी *m.* (न्), -रिणी *f.*, मायी *m.* (न्), -यिनी *f.*, मायाकारः, मोही *m.* (न्), -हिनी *f.*—(Word of endearment applied to a woman) प्रिया, वत्सा, मुग्धा.

Charming, *a.* मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, कमनीयः -या -यं, सुभगः -गा -गं, कान्तः -न्ता -न्तं, मोदकः -का -कं, हर्षकरः -री -रं, विचित्रः -त्रा -त्रं, सश्रीकः -का -कं, आकर्षकः -का -कं, आकृष्टवान् -वती -वत् (त्), असेचनकः -का -कं; 'a charming woman,' मुग्धा, प्रमदा.

Charmingly, *adv.* मनोरमं, रमणीयप्रकारेण, रम्यं, रमणीयतया, विचित्रं, सुभगं, यथा मनो ह्रियते तथा, मनोहरप्रकारेण.

Charmingness, *s.* रम्यत्वं, रमणीयता, कमनीयता, मनोहरत्वं, सश्रीकता.

Charnel-house, *s.* शवास्थिस्थानं, अस्थिसञ्चयस्थानं, श्मशानं, शवास्थिगृहं.

Charred, *p. p.* अङ्गारितः -ता -तं, अङ्गारसात्कृतः -ता -तं, अङ्गीदग्धः -ग्धा -ग्धं.

Chart, *s.* वेलालेख्यं, वेलापटः, समुद्रयायिनां पथदर्शनार्थं नदीसमुद्रवेलासैकतादिभिर् अङ्कितं पत्रं, समुद्रद्वीपादीनाम् आलेख्यं, नौकारूढानां पथदर्शकं पत्रं.

Charter, *s.* शासनं, शासनपत्रं, राजाज्ञापत्रं, प्रामाणिकपत्रं, धर्म्मकीलः, पट्टः.—(Privilege) अधिकारः.

Chartered, *p. p.* राजादिसकाशात् शासनपत्रेण अधिकारयुक्तः -क्ता -क्तं.

Chary, *a.* परिमितः -ता -तं, मितः -ता -तं, अमुक्तहस्तः -स्ता -स्तं, सावधानः -ना -नं, अवहितः -ता -तं, विचक्षणः -णा -णं.

To Chase, *v. a.* (To hunt) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिद् (c. 1. -खेडति -खेटितुं), परिकल् (c. 10. -कालयति -यितुं).—(To pursue) अनुधाव् (c. 1. -धावति -धावितुं), पश्चाद्धाव्, अभिधाव्, अनुसृ (c. 1. -सरति -सर्त्तुं), अन्विष् (c. 4. -इष्यति -एषितुं), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अनुवृत् (c. 1. -वर्त्तते -वर्त्तितुं), पश्चाद्वृत्.—(To drive away) निरस् (c. 4. -अस्यति -असितुं), अपास्; निराकृ; अपानुद् (c. 6. -नुदति -नोत्तुं), द्रु in caus. (द्रावयति -यितुं).—(To chase gold and silver vessels) राजतानि भाण्डानि रेखादिना अलङ्कृ or उपस्कृ.

Chase, *s.* (Hunting) मृगव्यं, मृगया *f.*, खेटः -टं, आखेटः, आखोदनं, पापर्द्धिः *f.*, आखोदनं, पराधिः *f.*; 'he went to the chase,' मृगयायै गतः or मृगयां कर्त्तुं गतः.—(The game hunted) जाङ्गलं.—(Pur-

suit, running after) अनुधावनं, अभिधावनं, पश्चाद्धावनं, अनुसरणं, अन्वेषणं, मृगणं.—(Open ground fit for hunting) मृगव्ययोग्यो निर्द्वनभूमिभागः, जाङ्गलभूमिः.

CHASED, *p. p.* अनुधावितः -ता -तं, मृगितः -ता -तं, द्रावितः -ता -तं.

CHASER, *s.* मृगयुः *m.*, आखेटकः, अनुधावकः, अनुसारी *m.* (न्), द्रावकः, पश्चाद्धावकः.

CHASM, *s.* छिद्रं, अवटः -टिः *m.*, विवरं, बिलं, रन्ध्रं, दरी, गर्त्तः, कुहरं, शुषिरं, रोकं, विरोकं, विद्रं, टङ्कः, भङ्गः, भर्करा, रोपं, रुहकं.

CHASTE, *a.* अलम्पटः -टा -टं, यतमैथुनः -ना -नं, सङ्कृचः -चा -चं, अकामः -मा -मं, अपांशुलः -ला -लं, यतेन्द्रियः -या -यं, जितेन्द्रियः -या -यं, निष्कामः -मा -मं, ऊर्द्धरेताः -ताः -तः (स्), अव्यसनी -निनी -नि (न्), धर्म्मचारी -रिणी -रि (न्), संयतोपस्थः -स्था -स्थं, अव्यभिचारी -रिणी -रि (न्); 'a chaste wife,' पतिव्रता, साध्वी, सती *f.*, अव्यभिचारिणी, कुलवधूः; 'most chaste,' महासती; 'a chaste woman,' कुलस्त्री, कुलपालिका.—(Pure, correct, as language, &c.) शुद्धः -द्धा -द्धं, विशुद्धः -द्धा -द्धं, शुचिः -चिः -चि, निर्म्मलः -ला -लं.

CHASTELY, *adv.* निष्कामं, उपस्थनिग्रहेण, इन्द्रियसंयमेन, शुद्धं, शुचि.

To CHASTEN OR CHASTISE, *v. a.* शास् (c. 2. शास्ति, शासितुं), अनुशास्, दण्ड् (c. 10. दण्डयति -यितुं), वियत् (c. 10. -यातयति -यितुं), दण्डं प्रणी (c. 1. -णयति -णेतुं).

CHASTISED, *p. p.* शिष्टः -ष्टा -ष्टं, शासितः -ता -तं, दण्डितः -ता -तं, ताडितः -ता -तं, दुःखितः -ता -तं.

CHASTISEMENT, *s.* शिष्टिः *f.*, शास्तिः *f.*, दण्डः, साहसं, अनुशासनं, निग्रहः.—(Of a pupil) शिष्यशिष्टिः *f.*

CHASTISER, *s.* शासिता *m.* (तृ), शास्ता *m.* (स्तृ), दण्डप्रणेता *m.* (तृ), साहसकृत्.

CHASTITY, *s.* उपस्थनिग्रहः, उपस्थसंयमः, इन्द्रियनिग्रहः, जितेन्द्रियत्वं, यतेन्द्रियत्वं, निष्कामता, ब्रह्मचर्य्यं.—(In a woman) सतीत्वं, साध्वीत्वं, पातिव्रत्यं, कुलवधूत्वं; 'a sage of perfect chastity,' ऊर्द्धमन्थी *m.* (न्).

To CHAT, *v. n.* संलप् (c. 1. -लपति -लपितुं), कथोपकथनं कृ, वृथाकथां कृ, आलस्यवचनं कृ, सम्भाष् (c. 1. -भाषते -भाषितुं).

CHAT, *s.* कथोपकथनं, संलापः, वृथाकथा, अनर्थककथा, सम्भाषः, सङ्कथा, कथायोगः, सम्ववदनं, आलस्यवचनं.

CHATELLANY, *s.* दुर्गाधिकाराधीनं भूमिमण्डलं, दुर्गाधीनो भूमिप्रदेशः.

CHATTELS, *s. pl.* अस्थावरधनं, द्रव्यं, विभवः, सामग्री -ग्र्यं.

To CHATTER, *v. n.* (To talk idly) जल्प् (c. 1. जल्पति, जल्पितुं), प्रलप् (c. 1. -लपति -लपितुं, c. 10. -लापयति -यितुं), विलप्, कथोपकथनं कृ, वृथाकथां कृ.—(To make a noise as a jay, &c.) किकि or चटचट or चित् शब्दं कृ, चटचट (nom. चटचटायते), कै c. 1. (कायति, कातुं), कूज् (c. 1. कूजति, कूजितुं).—(To make a noise by colliding the teeth) कटकट (nom. कटकटापयति -यितुं), दन्तैर् दन्तान् निष्पिष् (c. 7. -पिनष्टि -पेष्टुं).

CHATTER OR CHATTERING, *s.* (Idle prate) वृथाकथा, प्रलापः, विप्रलापः, विलपनं, जल्पनं, प्रजल्पः, वाक्चापल्यं, अतिकथा, इतिकथा, निरर्थककथा, कलना.—(Noise of a jay, &c.) चटचट *ind.*, रुक् *f.* (च्), किकि शब्दः, चित् शब्दः.

CHATTERER, *s.* जल्पकः, जल्पाकः, उपजल्पी *m.* (न्), वाचालः, गायनः, वावदूकः.

CHATTY, *a.* संलापी -पिनी -पि (न्) or प्रलापी, कथोपकथनकृत् *m. f. n.*

CHAUNT, *s.* *See* CHANT.

To CHAW, *v. a.* अवे (c. 1. अवेति, अवितुं, c. 10. अवेयति -यितुं).

CHAWDRON, *s.* अन्त्रं, पुरीतत् *m. n.*, नाडिः *f.*, डी, धमनी.

CHEAP, *a.* अल्पमूल्यः -ल्या -ल्यं, अल्पापेः -पैः -पैं, सुमूल्यः -ल्या -ल्यं, सुलभः -भा -भं, अल्पमूल्येन क्रेयः -या -यं or लभ्यः -भ्या -भ्यं, न्यूनः -ना -नं.

To CHEAPEN, *v. a.* (To bid for, attempt to purchase) अमुकमूल्यं दित्सामीति वद् (c. 1. वदति -दितुं); न्यूनमूल्यं दा in des. (दित्सति -त्सितुं).—(To lessen value) मूल्यं न्यूनीकृ or अल्पीकृ.

CHEAPLY, *adv.* अल्पमूल्येन, अल्पार्घेण, सुमूल्येन, सुलभं.

CHEAPNESS, *s.* सुमूल्यं, अल्पमूल्यता, अल्पार्घित्वं, मूल्यन्यूनता, सुलभता.

To CHEAT, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, छल् (c. 10. छलयति -यितुं).

CHEAT, *s.* (Fraud) छलं, वञ्चनं, कपटः.—(Cheater) वञ्चकः, छली *m.* (न्), धूर्त्तः, प्रतारकः, कूटकः, कपटिकः, कपटी *m.* (न्), कितवः, कूटकारः, दाम्भिकः, कुहकः, उपधिकः.

CHEATED, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, मुषितः -ता -तं, अतिसंहितः -ता -तं.

CHEATING, *s.* वञ्चनं, छलनं, प्रतारणं -णा, कपटः -टं, व्याजः, कैतवं, अतिसन्धिः *m.*, अतिसन्धानं, कूटः -टं.

To CHECK, *v. a.* यम् (c. 1. यच्छति, यन्तुं), संयम्, नियम्, विनियम्, निग्रह् (c. 9. -गृह्णाति -ह्लीते -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, वृ in caus. (-वारयति -यितुं), निवृ, निरुध् (c. 9. -रुणद्धि -रोद्धुं), अवरुध्, सन्निरुध् प्रतिषिध् (c. 1. -षेधति -षेद्धुं), विधृ in caus. (-धारयति -यितुं), स्तम्भ् in caus. (स्तम्भयति -यितुं), विष्टम्भ्.

CHECK, *s.* संयमः, निग्रहः, निवारः -रणं, यन्त्रणं, निरोधः, विरोधः, संरोधः, प्रतिषेधः, यन्त्रा -त्री -त्रु (त्रु).—(As of the perspiration) विष्टम्भः.

CHECKED, *p. p.* संयमितः -ता -तं, संयतः -ता -तं, नियमितः -ता -तं, रुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, संरुद्धः -द्धा -द्धं, निवारितः -ता -तं, नियन्त्रितः -ता -तं.

To CHECKER OR CHEQUER, *v. a.* अष्टापदप्रकारेण व्यत्यस्तरेखा लिखित्वा चित्रविचित्रीकृ or चित्र् (c. 10. चित्रयति -यितुं) or द्विरङ्गीकृ or नानारङ्गीकृ or कर्बुरीकृ.

CHECKERED, *p. p.* चित्रविचित्रः -त्रा -त्रं, अष्टापदप्रकारेण चित्रितः -ता -तं, कर्बुरितः -ता -तं, द्विरङ्गीकृतः -ता -तं, नानावर्णः -र्णा -र्णं.

CHECKERWORK, *s.* अष्टापदप्रकारेण चित्रविचित्रकर्म्म *n.* (न्), चित्रविचित्रकार्य्यं.

CHECKMATE, *s.* जयकारी शारिपरीणायः, शारिपरीणायो येन परः स्वशारीन् परिणेतुम् अक्षमः सन् पराजितो भवति.

CHEEK, *s.* गण्डः -ण्डं, कपोलः, कन्दलः, गण्डस्थलः -ली, गल्लः; 'the two cheeks,' गण्डौ; 'colour in the cheek,' कपोलरागः.

CHEEKBONE, *s.* कपोलफलकः, गण्डफलकः -कं.

CHEER, *s.* (Provisions, entertainment) आहारः, भोजनं, भोज्यं, सत्कारः.—(Heart, courage) धीर्यं, धैर्य्यं, स्थैर्य्यं, स्थिरता, तेजः *n.* (स्); 'be of good cheer,' समाश्वसिहि.—(Air of countenance) वदनं, मुखं, आकारः.—(Shout of joy) प्रणादः, जयशब्दः, जयध्वनिः *m.*, जयकोलाहलः, धन्यवादः.

To CHEER, *v. a.* (Incite) प्रोत्सह् in caus. (-साहयति -यितुं), प्रचुद् (c. 10. -चोदयति -यितुं).—(Gladden) हृष् in caus. (हर्षयति -यितुं), परिहृष्, प्रहृष्, ह्लाद् in caus. (ह्लादयति -यितुं), आह्लाद्, प्रह्लाद्, नन्द् in caus. (नन्दयति -यितुं), उल्लस् in caus. (-लासयति -यितुं).—(Comfort) आश्वस् in caus. (-श्वासयति -यितुं), समाश्वस्, विश्वस्, सान्त्व् (c. 10. सान्त्वयति -यितुं).

To CHEER-UP, *v. n.* प्रत्याश्वस् (c. 2. -श्वसिति -श्वसितुं), आश्वस्, समुत्थ (c. 1. -तिष्ठति -स्थातुं), हृष् (c. 4. हृष्यति, हर्षितुं), प्रतिसंहृष्, आनन्द् (c. 1. -नन्दति -नन्दितुं), ह्लाद् (c. 1. ह्लादते, ह्लादितुं); 'cheer up!' समाश्वसिहि, साहसं कुरु, सुस्थिरो भव.

CHEERED, *p. p.* प्रहर्षितः -ता -तं, समाश्वासितः -ता -तं, आश्वासितः -ता -तं.

CHEERER, *s.* आश्वासकः, हर्षकरः, आनन्ददः, प्रह्लादकः, प्रहर्षकः.

CHEERFUL, *a.* आनन्दी -न्दिनी -न्दि (न्), सानन्दः -न्दा -न्दं, हृष्टः -ष्टा -ष्टं, प्रहृष्टः -ष्टा -ष्टं, हर्षयुक्तः -क्ता -क्तं, हृष्टहृदयः -या -यं, हृष्टमानसः -सी -सं, हर्षमाणः -णा -णं, प्रफुल्लः -ल्ला -ल्लं, प्रमनाः -नाः -नः (स्), उल्लसः -सा -सं -सितः -ता -तं, उल्लासितः -ता -तं, विकुड्डीणः -णा -णं.—(Having a cheerful countenance) प्रफुल्लवदनः -ना -नं or फुल्लवदनः, सुहसाननः -ना -नं, प्रसन्नवदनः -ना -नं, सदैव प्रहसितवदनः -ना -नं.

CHEERFULLY, *adv.* सहर्षं, सानन्दं, हृष्टमनसा, हृष्टवत्, प्रसन्नचेतसा.

CHEERFULNESS, *s.* हर्षः, हृष्टिः *f.*, आनन्दः, आह्लादः, प्रफुल्लता, चित्तप्रसन्नता, उल्लासः.

CHEERLESS, *a.* निरानन्दः -न्दा -न्दं, अहर्षः -र्षा -र्षं, हर्षरहितः -ता -तं.

CHEERLESSLY, *adv.* अहर्षं -र्षितं, निरानन्दं, आनन्दं विना.

CHEESE, *s.* किलाटः -टी, दधिजं, मन्थजं, क्षीरविकृतिः *f.*

CHEESECAKE, *s.* किलाटपिष्टकः, दधिनवनीतादिमयो मोदकविशेषः.

CHEESE-CURDS, *s.* दधि *n.*, किलाटः, पयस्यं, क्षीरजं, आमिक्षा.

CHEESE-MONGER, *s.* किलाटविक्रेता *m.* (तृ), दधिजविक्रयी *m.* (न्), किलाटविक्रयोपजीवी *m.* (न्).

CHEESE-PRESS, *s.* दधिसम्पीडनयन्त्रं येन किलाटः सम्पद्यते.

CHEESY, *adv.* किलाटमयः -यी -यं, किलाटगुणोपेतः -ता -तं.

CHELY, *s.* कर्कटनखः, कुलीरादिनखः, कुलीराङ्घ्रिः *m.*, कर्कटपाणिः *m.*

CHEMISE, *s.* स्त्रीलोकभृतम् अन्तरीयं or अधोवसनं.

CHEMISTRY, *s.* रसायनं. *See* CHYMISTRY.

To CHERISH, *v. a.* पुष् (c. 1. पोषति, c. 9. पुष्णाति, पोषितुं, c. 10. पोषयति -यितुं), परिपुष्, पाल् (c. 10. पालयति -यितुं), संवृध् in caus. (-वर्धयति -यितुं), भृ (c. 1. भरति -ते, भर्त्तुं), भज् (c. 1. भजति -ते, भक्तुं), उपास् (c. 2. -आस्ते -आसितुं), दय् (c. 1. दयते, दयितुं), लल् (c. 10. लालयति -यितुं).

CHERISHED, *p. p.* पालितः -ता -तं, पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, संवर्द्धितः -ता -तं, भर्त्रिमः -मा -मं, अभीष्टः -ष्टा -ष्टं, हृद्यः -द्या -द्यं, हृन्नतः -ता -तं, दयितः -ता -तं, हृदिम्मृक् (ज्), लालितः -ता -तं.

CHERISHER, *s.* पोष्टा *m.* (ष्टृ), पोषकः, पालकः, पालयिता *m.* (तृ), भर्त्ता *m.* (र्त्तृ).

CHERISHING, *s.* पोषः -षणं, पालनं, भरणं, भरिमा *m.* (न्).

CHERRY, *s.* अश्मिगर्भः क्षुद्रफलविशेषः.

CHERRY-ORCHARD, *s.* वक्ष्यमाणवृक्षवाटिका or -वाटी.

CHERRY-TREE, *s.* पूर्व्वोक्तफलविशिष्टो वृक्षभेदः.

CHERSONESE, *s.* द्वीपः, अन्तरीपः -पं.

CHERUB, *s.* स्वर्गी *m.* (न्), स्वर्गदूतः, स्वर्गीयजनः, दिव्यदूतः, देवदूतः. Modern scholars coin the word किरूवः.

CHERUBIC, *a.* स्वर्गीयः -या -यं, दिव्यः -व्या -व्यं, स्वर्ग्यः -र्ग्या -र्ग्यं.

To CHERUP, *v. n.* किल्ल or चिल्ल शब्दं कृ. *See To* CHIRP.

CHERVIL, *s.* ओषधिभेदो यस्मिन् एककाण्डाग्राद् अनेकमञ्जरय आतपत्ररूपेण प्ररोहन्ति.

CHESS, *s.* चतुरङ्गं; 'moving a piece at chess,' परीणायः.

CHESS-BOARD, *s.* अष्टापदं, शारिफलकं, पञ्चनी, पञ्चमी, पञ्चारी, नयपीठी.

CHESSMAN, *s.* नक्षत्रपुत्तकः, सारः, शारः, शारिः *m.*, सारिः *m* -री *f.*, सारिका, खेलिनी, खेलनी.

CHEST, *s.* (The breast) उरः *n.* (स्), वक्षः *n.* (स्), भुजान्तरं, क्रोडं -डा; 'broad-chested,' उरस्वान् -स्वती -स्वत् (त्), उरस्कः -स्का -स्कं, उरस्विलः.—(A box) भाण्डं, सम्पुटः -टकः, समुद्गः, भाजनं.

CHESTNUT OR CHESNUT, *s.* श्यावफलविशेषः; 'a chestnut horse,' शोणः, उक्तनाहः.

CHEVALIER, *s.* सादी *m.* (न्), अश्वारोही *m.* (न्), रथी *m.* (न्), महारथः, महाधीरः, राजर्षिः *m.*, मानसूचका ख्यातिः.

CHEVAUX DE FRISE, *s.* नागदन्तयन्त्रं प्राचीरं, युद्धसमये पारक्याश्ववेधनार्थं शितशल्ययुक्तम् अवरोधकं.

CHEVERIL, *s.* (A kid) छागशावकः, अजशावकः.—(Kid leather) अजचर्म्म *n.* (न्).

To CHEW, *v. a.* चर्व् (c. 1. चर्वति, चर्वितुं, c. 10. चर्वयति -यितुं), दन्तैः पिष् (c. 7. पिनष्टि, पेष्टुं), विदंश् (c. 1. -दशति -दंष्टुं); 'to chew the cud,' रोमन्थ (nom. रोमन्थायते).

CHEWED, *p. p.* चर्वितः -ता -तं, अवलीढः -ढा -ढं, दन्तैः पिष्टः -ष्टा -ष्टं.

CHEWING, *s.* चर्वणं, दन्तपेषणं, रोमन्थः.

CHICANE, *s.* (Prolonging a judicial contest) विवादिभिर् मिथ्योत्तरद्वारा or असम्बद्धोद्ग्राहद्वारेण अर्थनिर्णयविलम्बनं, मिथ्याप्रौढिः *f.*, मिथ्यापत्तिः *f.*—(Artifice in general) छद्म *n.* (न्), छलं, व्यपदेशः, अपदेशः, कपटः.

To CHICANE, *v. n.* विवादसमये मिथ्योत्तरद्वारा or असम्बद्धोद्ग्राहद्वारेण अर्थनिर्णयविलम्बनं कृ.

CHICANER, *s.* मिथ्याविवादी *m.* (न्), मिथ्यातार्किकः, चाङ्गिकः, मिथ्योत्तरवादी *m.* (न्), असम्बद्धोद्ग्राहकृत्, जल्पकः.

CHICANERY, *s.* मिथ्याविवादः, हेत्वाभासः, पक्षाभासः, मिथ्यावादः, मिथ्यातर्कः, मिथ्याहेतुः, वाक्छलं, मिथ्याप्रौढिः *f.*, जल्पः, कपटः.

CHICK OR CHICKEN, *s.* कुक्कुटशावकः, पक्षिशावकः.

CHICKEN-HEARTED, *a.* भीरुहृदयः -या -यं, हरिणहृदयः -या -यं

CHICKEN-POX, *s.* रक्तवटीविशिष्टो बालानां रोगः.

CHICK-PEAS, *s.* चणकः, हरिमन्थः -न्थकः.

CHICK-WEED, *s.* पक्षिभक्तः क्षुद्रौषधिभेदः.

CHIDDEN, *p. p.* निन्दितः -ता -तं, निर्भर्त्सितः -ता -तं, धिक्कृतः -ता -तं.

To CHIDE, *v. a* निन्द् (c. 1. निन्दति, निन्दितुं), प्रतिनिन्द्, विनिन्द्, भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), गर्ह् (c. 1. गर्हते, गर्हितुं), धिक्कृ, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

To CHIDE, *v. n.* (Clamour) उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), प्रक्रुश्, विक्रुश्.—(Quarrel) विवद् (c. 1. -वदते -वदितुं), विप्रवद्, वाक्कलहं कृ.

CHIDER, *s.* निन्दकः, धिक्कर्त्ता *m.* (र्त्तृ), परिवादकः, आक्रोशकः.

CHIDING, *s.* निन्दा, परिभाषणं, परीवादः, जुगुप्सा, उपक्रोशः, तिरस्कारः, उपालम्भः, निर्भर्त्सनं, धिक्कारः, धिक्क्रिया, विप्रलापः, वाग्युद्धं.

CHIEF, *a.* परमः -मा -मं, परः -रा -रं, उत्तमः -मा -मं, मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, अग्यः -ग्या -ग्र्यं, अग्र्यः -ग्र्या -ग्र्यं, प्राग्र्यः -ग्र्या -ग्र्यं, अग्रीयः -या -यं, अग्रियः -या -यं, प्रधानः -ना -नं, शिष्टः -ष्टा -ष्टं, विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, पारमिकः -की -कं, वर्य्यः -र्य्या -र्य्यं, प्रवरः -रा -रं, वरेण्यः -ण्या -ण्यं, पुरोगमः -मा -मं, प्रवरेः -रा -रं, पराङ्गेः -ङ्गी -ङ्गं, अनवराङ्गेः -ङ्गी -ङ्गं, वृन्दारकः -का -कं, प्रष्ठः -ष्ठा -ष्ठं, इन्द्रः -न्द्रा -न्द्रं in comp., पुङ्गवः -वा -वं in comp., ऋषभः -भा -भं in comp.; 'chief minister,' प्रधानमन्त्री *m.* (न्); 'chief priest,' प्रधानयाजकः; 'chief justice,' धर्म्माधिकारी *m.* (न्), धर्म्माध्यक्षः 'chief seat,' अग्रासनं; 'chief of sages,' देवर्षिः *m.*; 'chief person,' आदिपुरुषः.

CHIEF, *s.* पतिः *m.*, ईश्वरः, ईशः, नायकः, मुखरः, पुरोगः, अग्रगः, अधिपः, अधिपतिः *m.*, अधिष्ठाता *m.* (तृ), अध्यक्षः, श्रेष्ठी *m.* (न्), शिष्टः, गणपतिः, प्रष्ठः, उद्वहः, शिरोवर्त्ती *m.* (न्), वृन्दारकः.—(Military chief) सेनापतिः, सेनाग्रगः, सेनानीः *m.*

CHIEFLESS, *a.* अनायकः -का -कं, अनाथ्वरः -रा -रं, अराजकः -का -कं.

CHIEFLY, *adv.* प्रधानतस्, प्राधान्यतस्, मुख्यशस्, विशेषतस्, परमं.

CHIEFTAIN, *s.* (Leader) मुखरः, पुरोगः, अग्रगः, नायकः, पतिः *m.*, ईश्वरः.—(Commander) सेनापतिः, सेनानीः *m.*—(Head of a clan) गणपतिः, सामन्तः.

CHIEFTAINSHIP, *s.* मुख्यता, गाणपत्यं, सैनापत्यं, ऐश्वर्यं.

CHILBLAIN, *s.* पादस्फोटः, पाददारी *f.*, शिशिरजातं क्षतं.

CHILD, *s.* बालः -ला, बालकः, शिशुः *m.*, वत्सः -त्सा -त्सकः, सुतः, पुत्रः, शावकः, सन्तानः, सन्ततिः *f.*, अपत्यं, बालापत्यं, दारकः, तोकं, अर्भः, अर्भकः, माणवकः.—(The compellation of an old to a young man) वत्स.—(To be with child) गर्भवती or सञ्जातगर्भा भू.

CHILDBEARING, *s.* प्रसवः, सवनं, भूः *f.*; 'past childbearing,' विगतार्त्तवा, निष्कला; 'capable of childbearing,' सरजस्का.

CHILDBED, *s.* प्रसवावस्था, प्रसवकालः, प्रसववेदना, गर्भवेदनावस्था.

CHILDBIRTH, *s.* प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, जननं; 'the pains of childbirth,' प्रसववेदना, गर्भवेदना; 'to suffer the pains of childbirth,' प्राप्तप्रसववेदना भू.

CHILDERMAS-DAY, *s.* हेरोद्नाम्नो यिहुदीयराज्ञ आज्ञया अपापशिशूनां वधमुद्दिश्य पर्व्व *n.* (न्).

CHILDHOOD, *s.* बाल्यं, शैशवं, शिशुत्वं, बालकत्वं, बालभावः, कौमारं, शैशवकालः, बाल्यकालः, बाल्यावस्था, अपत्यता, अर्भत्वं.

CHILDISH, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं; 'childish prattle,' बालवचनं; 'childish understanding,' बालबुद्धिः.

CHILDISHLY, *adv.* बालवत्, शिशुवत्, बालकवत्, बालरूपेण.

CHILDISHNESS, *s.* बालिश्यं, बालेयत्वं, बालकीयता, बालरूपत्वं.

CHILDLESS, *a.* अपुत्रः -त्रा -त्रं -त्रकः -का -कं, निष्पुत्रः -त्रा -त्रं, असुतः -ता -तं, अप्रसुतः -ता -तं, पुत्ररहितः -ता -तं, पुत्रशून्यः -न्या -न्यं, अनपत्यः -त्या -त्यं, असन्तानः -ना -नं, निःसन्तानः -ना -नं, अप्रजः -जा -जं, निरन्वयः -या -यं, निर्वंशः -शा -शं; 'a childless woman,' वन्ध्या, अशिष्वी; 'the state of being childless,' आनपत्यं.

CHILDLIKE, *a.* बालोपमः -मा -मं, बालसदृशः -शी -शं, बालेयः -या -यं.

CHILIAEDRON, *s.* सहस्रभुजः, सहस्रकोणः, सहस्रास्रं.

CHILIFACTORY, *a.* रक्तजनकः -का -कं. *See* CHYLIFACTORY.

To CHILL, *v. a.* शीतीकृ, शीतलीकृ.—(Check the perspiration) स्वेदं विष्टम्भ् in caus. (-स्तम्भयति -यितुं).—(Discourage) निर्वीर्यं -र्यां -र्यं कृ, तेजोहीनं -नां -नं कृ.

CHILL, *a.* शीतलः -ला -लं, शिशिरः -रा -रं, शीतः -ता -तं.

CHILL, *s.* शीतं, शीतता, हिमं; 'a check to the perspiration,' स्वेदविष्टम्भः.

CHILLED, *p. p.* शीतीकृतः -ता -तं, हिमाक्तः -क्ता -क्तं, हततापः -पा -पं.

CHILLINESS, *s.* शीतता, शीतलता, शैत्यं, शीतीभावः, शिशिरत्वं.

CHILLY, *a.* शिशिरः -रा -रं, ईषच्छीतः -ता -तं, आशीतलः -ला -लं.

CHIME, *s.* नानावादित्राणाम् एकतालः or एकतानः or तालैक्यं, अनेकवाद्यानाम् तानैक्यं or तौर्य्यैक्यं, शब्दैक्यं.—(Of bells) अनेकघण्टानां तालैक्यं, ताम्रमानानाम् अनेकघण्टानां सुस्वरशब्दः, घण्टाशिञ्जितं.

To CHIME, *v. a.* यथा स्वरैक्यं or तालैक्यं जायते तथा नानावादित्राणि वद् in caus. (वादयति -यितुं) or तड् (c. 10. ताडयति -यितुं); घण्टां तड्.

To CHIME, *v. n.* (To agree) संवद् (c. 1. -वदति -वदितुं), अनुवद्, एकीभू, अनुगुणः -णा -णं भू, अनुरूपः -पा -पं भू.

CHIMERA, *s.* वृथावासना, असम्भवकल्पना, अनर्थकवासना, मिथ्यावासना, दुर्वासना, अनर्थकचिन्ता, अनर्थकभावना, मनोरथसृष्टिः *f.*, आभासः, मृषार्थकं, शशविषाणं, कूर्म्मलोमतनुत्राणं.

CHIMERICAL, *a.* काल्पनिकः -की -कं, मानसिकः -की -कं, मनोरथसृष्टः -ष्टा -ष्टं, वासनाकल्पितः -ता -तं, अमूलकः -का -कं.

CHIMNEY, *s.* धूमरन्ध्रं, धूमपथः, धूमनिर्गमः.—(Fire-place) चुल्लिः *f.*, -ल्ली जातिः *f.*, तेमनी, अग्निकुण्डं.

CHIMNEY-CORNER, *s.* चुल्लिपार्श्वः, चुल्लेरुपान्तं, चुल्लिपार्श्वे आसनं.

CHIMNEY-PIECE, *s.* चुल्लिशीर्षं, चुल्लिशिला, चुल्लेरुपरि प्रस्तरः.

CHIMNEY-SWEEPER, *s.* धूमरन्ध्रसम्मार्ज्जकः, चुल्लिसम्मार्ज्जकः.

CHIN, *s.* चिबुकं, चिबुः *m.*, हनुः *m. f.*, चिविः *m.*, पीचं, जम्भ.

CHIN-COUGH, *s.* बालानाम् आक्षेपकः कासः, महाकासः.

CHINA, *s.* (Porcelain) कौलालकं, मृन्मयं भाण्डं, मार्त्तिकं भाण्डं.—(The country) चीनः; 'China-cloth,' चीनांशुकं; 'China-rose,' ओड्रपुष्पं, जवा.

CHINE, *s.* सपृष्ठास्थि पृष्ठमांसं, सर्वशः पृष्ठभागः, पृष्ठं, कशेरुका.

To CHINE, *v. a.* पृष्ठास्थिरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं), पृष्ठवंशानुलोमं छिद्.

CHINK, *s.* (Aperture) छिद्रं, रन्ध्रं, सन्धिः *m.*—(Sound) शिञ्जितं, क्वणितं.

To CHINK, *v. n.* (To open in gaps) स्फुट् (c. 6. स्फुटति, स्फुटितुं), विदृ in pass. (-दीर्य्यते), फल् (c. 1. फलति, फलितुं).—(To ring as metal) क्वण् (c. 1. क्वणति, क्वणितुं), शिञ्ज् (c. 2. शिञ्जे, शिञ्जितुं).

CHINKY, *a.* छिद्रपूर्णः -र्णा -र्णं, छिद्रितः -ता -तं, बहुरन्ध्रवान् -वती -वत् (त्).

CHINTZ, *s.* चित्रितपटं, चित्रकार्पासं, पटी, पटोलं, चीनांशुकं.

CHIP, *s.* विदलं, तष्टं, भिन्नं, भित्तिः *f.*, भिन्नं, खण्डं, शकलं; 'a chip of wood,' काष्ठखण्डं.

To CHIP, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), विदलीकृ, खण्डीकृ.

CHIP-AXE, *s.* तक्षणी, छिदिः *f.*, तङ्कः, वृक्षभिद्.

CHIPPINGS, *s. pl.* विदलानि, भिन्नानि, खण्डानि, तष्टानि.

CHIRAGRA, *s.* वातरोगविशेषो यत्र करमात्रम् उपहतं, हस्तशोथः.

CHIROGRAPHER, *s.* हस्तलेखकः, लिपिकरः, कायस्थः, अक्षरजीवकः.

CHIROGRAPHY, *s.* हस्तलेखनं, लेखनविद्या, लिपिः *f.*, लिखनं.

CHIROMANCER, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शकः, हस्तरेखाविज्ञाज्ञः.

CHIROMANCY, *s.* हस्तरेखालक्षणात् शुभाशुभदर्शनं, हस्तरेखाविद्या, अङ्गविद्या.

To CHIRP, *v. n.* पक्षिवत् कूज् (c. 1. कूजति, कूजितुं), अनुकूज्, विकूज्, क्विन्न or चिन्न शब्दं कृ, मुरारिं कृ.

CHIRPING, *s.* कूजितं, रावः, मुरारिः *m.*, वाशितं, रुतं, काकली -लिः

CHIRURGEON, *s.* कायशल्यादिभिषक् *m.* (ज्). *See* SURGEON.

CHISEL, *s.* व्रश्चनः, तक्षणी, तङ्कः, वृक्षभेदी *m.* (न्), वृक्षादनः, शिलाभेदः, शिलाकुट्टकः, शैलभित्तिः *f.*

To CHISEL, *v. a.* तक्ष् (c. 1. तक्षति, तक्षितुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं).

CHIT, *s.* (A child) बालः -ला, बालकः, शिशुः *m.*, शावकः.—(A freckle) तिलः -लकः, जटुलः.

CHIT-CHAT, *s.* विश्रम्भालापः, विश्रम्भकथितं, वृथाकथा, सङ्कथा, जल्पः.

CHITTERLINGS, *s. pl.* पशुनाड्यः *f. pl.*, पशुनाड्यः *f. pl.*, पुरीतत् *m. n.*

CHITTY, *a.* बालकीयः -या -यं, बालेयः -यी -यं, बालिशः -शा -शं.

CHIVALROUS, *a.* सुविक्रान्तः -न्ता -न्तं, महावीर्य्यः -र्य्या -र्य्यं, धामवान् -वती -वत् (त्).

CHIVALRY, *s.* (Knighthood) क्षादिपदं, रथिपदं, महारथत्वं.—(Prowess) सुविक्रमः, सुवीर्य्यं, धाम *n.* (न्), पौरुषं, कर्म्मोदारं, रणोत्साहः.

CHIVES, *s.* पुष्पकेशरायं, पुष्पपक्षाग्राणि *n. pl.*

CHOCOLATE, *s.* आमेरिकादेशीयवृक्षफलं, तत्फलनिर्द्दितं पानीयं.

CHOICE, *s.* (The act) वरणं, वृतिः *f.*, वरः.—(The power of choice

between two things) विकल्पः -ल्पकः; 'choice of a husband by a bride,' स्वयंवरः; 'the best of any thing,' उत्तमभागः, परभागः, उत्तमांशः, रत्नं in comp.; 'of one's own choice,' कामतस्, इच्छातस्, यथेप्सितं, यथेष्टं, यथाकामं.

CHOICE, *a.* उत्तमः -मा -मं, सर्वोत्तमः -मा -मं, विशिष्टः -ष्टा -ष्टं, शिष्टः -ष्टा -ष्टं, अनुत्तमः -मा -मं, मनोनीतः -ता -तं, विशेषः -षा -षं, सारः -रा -रं, सारवान् -वती -वत् (न्), उत्कृष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, प्रशस्तः -स्ता -स्तं, भद्रतमः -मा -मं, सर्वश्रेष्ठः -ष्ठा -ष्ठं; 'choice food,' भोजनविशेषः, विशिष्टान्नं

CHOICELESS, *a.* अविकल्पः -ल्पा -ल्पं, अवैकल्पिकः -की -कं.

CHOICELY, *adv.* विशिष्टप्रकारेण, सविशेषं, उत्तमप्रकारेण, प्रशस्तं.

CHOICENESS, *s.* उत्कृष्टता, प्रकृष्टत्वं, वैशिष्ट्यं, विशिष्टता, श्रेष्ठता, प्राशस्त्यं, औत्कर्ष्यं.

CHOIR, *s.* गायकचक्रं, गाथकचक्रं, गाथकसमूहः, चाक्रिकगणः.—(Part of a church) पूजाशालायाः सङ्गीतैनयोग्यं मध्यमस्थलं.

To CHOKE, *v. a.* (To suffocate) कण्ठं सम्पीड् (c. 10. -पीडयति -यितुं) or ग्रस् (c. 1. ग्रसति, ग्रसितुं), गलहस्त (nom. गलहस्तयति -यितुं), गलग्रहं कृ, श्वासावरोधं कृ, श्वासवारणं कृ.—(To obstruct) रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्, संरुध्; प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं).

CHOKED, *p. p.* अवरुद्धश्वासः -सा -सं, सन्नकण्ठः -ण्ठा -ण्ठं, निरुद्धः -द्धा -द्धं.

CHOKER, *s.* (Argument that stops the mouth) गलग्रहः.

CHOLAGOGUES, *s.* पित्तद्रावनं, पित्तद्रावकः, पित्तघ्नं, पित्तनाशनं.

CHOLER, *s.* (Bile) पित्तं.—(Rage) क्रोधः, कोपः, रोषः, अमर्षः.

CHOLERA, *s.* विसूचिका, विषूचिका, महामारी.

CHOLERIC, *a.* पित्तवेगी -गिनी -गि (न्), क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), चण्डः -ण्डा -ण्डं; 'choleric constitution,' पित्तप्रकृतिः.

CHOLIC, *s.* शूलः -लं, पक्तिशूलं. *See* COLIC.

To CHOOSE, *v. a.* (Select) वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति, वरितुं, वरीतुं), वावृ, प्रवृ; or in caus. (वरयति -यितुं), अनुरुच् in caus. (-रोचयति -यितुं), वावृत् (c. 4. वावृत्यते).—(Take) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

To CHOOSE, *v. n.* (To be willing) इष् (c. 6. इच्छति, एषितुं), रुच् (c. 1. रोचते) used impersonally. न प्रत्याख्या (c. 2. -ख्याति -ख्यातुं), अभिरुच् in caus. (-रोचयते -यितुं).

To CHOP, *v. a.* (To cut into pieces) खण्डं खण्डं कृ or खण्डशः कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), शकलीकृ, विदलीकृ.

CHOP, *s.* खण्डं, शकलं, भिन्नं, भित्तिः, विदलं.—(Of meat) मांसखण्डं.—(A mutton chop) औरभ्रखण्डं.

CHOP-HOUSE, *s.* पक्वमांसविक्रयस्थानं, पाकशाला.

CHOPPING, *a.* हृष्टपुष्टः -ष्टा -ष्टं, मांसलः -ला -लं, स्थूलः -ला -लं.

CHOPPING-KNIFE, *s.* मांसच्छेदनार्थं छुरिका, मांसखण्डनी छुरिका.

CHOPS, *s.* (Mouth) मुखं, आननं, आस्यं.—(Of a river) सम्भेदः.

CHORAL, *a.* सङ्गीतिकः -की -कं, गानीयः -या -यं, चाक्रिकः -की -कं.

CHORD, *s.* (A string) गुणः. *See* CORD.—(Of an instrument) तन्त्री *f.*—(Of arc) ज्या, ज्या, ज्यका, जीवा.

CHORDED, *p. p.* तन्त्री -न्त्रिणी -न्त्रि (न्).

CHORIAMBUS, *s.* (In prosody) चियप्रः.

CHORION, *s.* गर्भकोशः, गर्भवेष्टनं, गर्भाशयः, गर्भावरणं चर्म्म.

CHORISTER, *s.* प्रधानमन्दिरस्य गायकः or गायकः, चाक्रिकः, तालावचरः, किन्नरः, किन्नरपुरुषः.

CHOROGRAPHER, *s.* देशविवरणकृत्, देशदर्शनकृत्, देशपर्य्यन्तलेखकः.

CHORUS, *s.* (Number of singers) गायकगणः, गाथकसमूहः.—(Dramatic) पार्श्वस्थः, पारिपार्श्विकः.—(Of a song) ध्रुवकः, ध्रुवः, अनुपदं.

CHOSEN, *p. p.* मनोनीतः -ता -तं, वृतः -ता -तं, वृत्तः -त्ता -त्तं, वावृत्तः -त्ता -त्तं.

CHOUGH, *s.* काकजातीयः समुद्रवेलासेवी पक्षिभेदः.

To CHOUSE, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं).

CHOUSE, *s.* (Trick) छलं, कूटः -टं, व्याजः.—(A cheater) वञ्चकः.

CHOWRIE, *s.* (Tail used to drive away flies) चामरं, अवचूलकं, रोमगुच्छः, रोमकेशरं.

CHRISM, *s.* अभ्यञ्जनं, अञ्जनं, अभिषेकः -षेचनं.

CHRIST, *s.* (The anointed) अभिषिक्तः.—(The anointed Saviour) अभिषिक्तत्राता *m.* (तृ). Modern scholars coin the word खृष्टः.

To CHRISTEN, *v. a.* (To baptize) जलसंस्कारेण खृष्टीयं -यां -यं कृ, जलसंस्कारेण खृष्टीयमतधारिणं or खृष्टीयानां मध्ये प्रविश् in caus. (-वेशयति -यितुं).—(To name) नाम कृ, नाम दा (c. 3. ददाति, दातुं).

CHRISTENDOM, *s.* खृष्टीयमतधारिणां कृत्स्नसमूहः, खृष्टीयदेशसाम्यं, ये केचिद् देशाः खृष्टीयमतं धारयन्ति तत्साकल्यं.

CHRISTENING, *s.* जलसंस्कारः, जलसंस्कारेण खृष्टीयानां मध्ये प्रवेशनं.—(Naming) नामकरणं.

CHRISTIAN, *s* खृष्टीयः, खृष्टीयमतधारी *m.* (न्), खृष्टीयमतावलम्बी *m.* (न्).

CHRISTIAN-NAME, *s.* जलसंस्कारकाले दत्तं नाम *n.* (न्), नाम, गुप्तनाम, राशिनाम.

CHRISTIANITY, *s.* खृष्टीयमतं, खृष्टीयानां मतं, खृष्टीयधर्म्मः.

CHRISTIANLY, *adv.* खृष्टीयवत्, खृष्टीयधर्म्मानुसारेण.

CHRISTMAS-BOX, *s.* खृष्टजन्मोत्सवकाले दत्तं (or देयं) पारितोषिकं.

CHRISTMAS-DAY, *s.* खृष्टजन्मदिवसमुद्दिश्य महोत्सवः, खृष्टजन्मपर्व्व *n.* (न्).

CHROMATIC, *a.* (Relating to colour) वर्णसम्बन्धी -न्धिनी -न्धि (न्), रङ्गी -ङ्गिणी -ङ्गि (न्).—(In music) ग्रामीणः -णा -णं, ग्रामिकः -की -कं.

CHRONIC or CHRONICAL, *a.* कालिकः -की -कं, दीर्घकालीनः -ना -नं, अविसर्गी -र्गिणी -र्गि (न्); 'chronical distemper,' दीर्घरोगः, दीर्घव्याधिः *m.*

CHRONICLE, *s.* इतिहासः, पुरावृत्तविवरणं, वृत्तविवरणं or -रणपुस्तकं, पुरावृत्ताख्यानं, पुरावृत्तग्रन्थः, समाचारग्रन्थः, शिष्टसमाचारः.

To CHRONICLE, *v. a.* इतिहासपुस्तकेषु समारुह् in caus. (-रोपयति -यितुं) or अभिलिख् (c. 6. -लिखति -लेखितुं), यथाक्रमं वृत्तविवरणं कृ or वृत्तानि रच् (c. 10. रचयति -यितुं).

CHRONICLER, *s.* ऐतिहासिकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तविवरणकृत्, शिष्टसमाचाररचकः.

CHRONOGRAM, *s.* यथा अक्षरविन्यासात् संवच्छरादिकालो निर्णेतुं शक्यते तथा प्रस्तरादौ लिखितम् अमुकप्रसिद्धवृत्तविवरणं.

CHRONOLOGIST, *s.* कालगणकः, कालगणनाविद्याज्ञः, कालज्ञः, यथाकालं or कालक्रमेण पुरावृत्तरचकः, वृत्तकालनिरूपकः, गतकालनिर्णेता *m.* (तृ).

CHRONOLOGICAL, *a.* कालगणनाविषयकः -का -कं, कालिकः -की -कं.

CHRONOLOGICALLY, *adv.* यथाकालं, कालक्रमेण, कालक्रमानुसारेण.

CHRONOLOGY, *s.* कालगणनाविद्या, कालनिरूपणविद्या, कालनिर्णयविद्या, कालक्रमेण पुरावृत्तरचना.

CHRONOMETER, *s.* कालपरिमाणार्थं यन्त्रं, घटी, यामनाली.

CHRYSALIS, *s.* कोशस्थः, कोशवासी *m.* (न्), कोषकारः, डिम्भः, गडिका.

CHRYSOLITE, *s.* चन्द्रकान्तः, हरिताश्म *n.* (न्), पीतमणिः *m.*

CHUB, *s.* स्थूलशिरस्को नादेयमत्स्यभेदः.

CHUBBED, *a.* स्थूलशिरस्कः -स्का -स्कं, स्थूलमस्तकः -का -कं.

CHUBBY-FACED, *a.* स्थूलास्यः -स्या -स्यं, स्थूलाननः -नी -नं.

CHUCK, *s.* (The cry of a hen) कुक्कुटीरावः, कुक्कुटीनादः.—(A term of endearment) प्रिये voc. c. *f.*, वत्स voc. c. *m.*, वत्से voc. c. *f.*

To CHUCK, *v. n.* (To call as a hen) कुक्कुटीवद् रु (c. 2. रौति, रवितुं).—(To give a gentle blow under the chin) वात्सल्यात् परचिबुकम् ईषत्प्रहारेण उन्नम् in caus. (-नमयति -यितुं).

CHUFF, *s.* (A loutish clown) ग्राम्यजनः, ग्रामिकः, ग्रामबुद्धिः, स्थूलबुद्धिः, असभ्यः, जडः.

CHUFFY, *a.* ग्राम्यः -म्या -म्यं, मन्दमतिः -तिः -ति, स्थूलः -ला -लं.

CHUM, *s.* वयस्यः, सहवासी *m.* (न्), सङ्गी *m.* (न्), प्रियमित्रं, संसर्गी *m.* (न्).

CHUMP, *s.* स्थूलकाष्ठं, स्थूलदारुः *m.*, वृहत्काष्ठखण्डं.

CHURCH, *s.* (Place of worship) मन्दिरं, पूजाशाला, भजनभवनं, भजनगृहं, प्रासादः, मण्डपः.—(The body of Christians) खीष्टमतधारिणां कृत्स्नसमूहः, मण्डली -लं, समाजः.

To CHURCH, *v. a.* प्रसवसमुत्थितां स्त्रीं परमेश्वरस्य धन्यवादं कृ in caus. (कारयति -यितुं).

CHURCHMAN, *s.* पुरोहितः, याजकः, धर्म्माध्यापकः.

CHURCHWARDEN, *s.* मन्दिररक्षकः, भजनगृहपालकः, पूजाशालाध्यक्षः.

CHURCHYARD, *s.* श्मशानं, प्रेतवनं, पितृवनं, शवनिखननस्थानं; 'churchyard flowers,' पितृवनसुमनः *n.* (स्).

CHURL, *s.* (A rustic) ग्राम्यजनः, ग्रामजः, ग्रामी *m.* (न्), असभ्यः.—(A rude man) कुशीलः, दुःशीलः, वामशीलः.—(A miser) कृपणः, कदर्य्यः, मृष्टेरुकः.

CHURLISH, *a.* दुराचारः -रा -रं, दुष्प्रकृतिः -तिः -ति, अविनयः -या -यं, अशिष्टः -ष्टा -ष्टं, अश्लीलः -ला -लं, क्रूराचारः -रा -रं, खलः -ला -लं, कदर्य्यः -र्य्या -र्य्यं.

CHURLISHLY, *adv.* असभ्यवत्, कदर्य्यवत्, कृपणं, अश्लीलं.

CHURLISHNESS, *s.* कुशीलता, अश्लीलता, अशिष्टता, अविनयः, असभ्यता.

CHURN, *s.* मन्थनी, मन्थिनी, गर्गरी, मन्थनघटी, जालगर्गिका.

To CHURN, *v. a.* मथ् (c. 1. मथति, मथितुं) or मन्थ् (c. 1. मन्थति, c. 9. मथ्नाति, मन्थितुं), उन्मन्थ्, निर्मन्थ्, खज् (c. 1. खजति, खजितुं), समालुड् (c. 1. -लोडति -लोडितुं, c. 10. -लोडयति -यितुं).

CHURNED, *p. p.* मथितः -ता -तं, प्रमथितः -ता -तं, आलोडितः -ता -तं, दण्डाहतः -ता -तं, व्याघट्टितः -ता -तं, कोथः -था -थं.

CHURNING, *s.* मन्थः, मन्थनं, मथनं, आलोडनं, समालोडा, खजा, कोथः.

CHURN-STAFF, *s.* मन्थः, मन्था *m.* (मथिन्), मन्थदण्डकः, मन्थानः, दधिचारः, वैशाखः, खजकः.

CHYLE, *s.* अन्नरसः, धातुपः, रसः, भोज्यसम्भवः, असमातृका, अन्नसारः.

CHYLIFACTORY, *a.* धातुपकारी -रिणी -रि (न्), अन्नरसोत्पादकः -का -कं.

CHYLOUS, *a.* अन्नरसमयः -यी -यं, धातुपरूपः -पा -पं.

CHYMIC or CHYMICAL, *a.* रसायनविद्यासम्बन्धी -न्धिनी -न्धि (न्), रसायनजः -जा -जं.

CHYMICALLY, *adv.* रसायनविद्यानुसारात्, रसायनविद्यानुरूपेण.

CHYMIST, *s.* रसायनविद्याज्ञः, रसज्ञः, रसायनः.

CHYMISTRY, *s.* रसायनं, रसायनविद्या, रसविद्या, रसज्ञता.

CIBARIOUS, *a.* अन्नमयः -यी -यं, भोज्यः -ज्या -ज्यं, आद्यः -द्या -द्यं.

CICATRICE, *s.* सिध्म *n.* (न्), सिध्मं, शुष्कव्रणः, रूढक्षतचिह्नं, रूढक्षतं.

CICATRIZATION, *s.* व्रणविशोषणं, व्रणशोधनं, रोपणं, व्रणरोपणं, समुत्थानं, प्रतिसारणं, प्रतिसरः.

To CICATRIZE, *v. a.* क्षतं रुह् in caus. (रोपयति -यितुं) or शुष् in caus. (शोषयति -यितुं) or शुष्कीकृ, प्रतिसृ in caus. (सारयति -यितुं).

CICATRIZED, *p. p.* रूढः -ढा -ढं, रोपितः -ता -तं, शुष्कः -ष्का -ष्कं, समुत्थितः -ता -तं, प्रतिसारितः -ता -तं.

To CICURATE, *v. a.* दम् in caus. (दमयति -यितुं), वशीकृ, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

CIDER, *s.* अम्लरसः पानीयविशेषः, अम्लफलनिर्द्रुतो मद्यविशेषः.

CILIARY, *a.* नेत्रच्छदसम्बन्धी -न्धिनी -न्धि (न्), वर्त्मसम्बन्धी &c.

CILICIOUS, *a.* लोममयः -यी -यं, लोमशः -शा -शं.

CIMETER, *s.* वक्रखड्गः, चन्द्रहासः, मण्डलाग्रः, खड्गः, निस्त्रिंशः, कृपाणः -णकः, असिरिष्टिः *m.*

CINCTURE, *s.* मेखला, कटिसूत्रं, रसना, काञ्ची, वस्त्रनं.

CINDER, *s.* अग्नेरुच्छिष्टं, तमाङ्गारोच्छिष्टं, अङ्गारः -रं, भस्म *n.* (न्).

CINERATION, *s.* भस्मीकरणं, भस्मसात्करणं.

CINERITIOUS, *a.* भास्मनः -नी -नं, भस्मरूपः -पा -पं.

CINNABAR, *s.* रससिन्दूरं, रसस्थानं, रक्तपारदं.

CINNAMON, *s.* दारुगन्धः, तिक्तवल्कलं, सुगन्धत्वक् *f.* (च्), गन्धवल्कलं.

CINNAMON-TREE, *s.* पूर्व्वोक्ततिक्तवल्कलविशिष्टः सिंहलद्वीपरोही क्षुद्रवृक्षः

CINQUE, *s.* (A five) पञ्चकः, पञ्चत्वं.

CINQUEFOIL, *s.* पञ्चपर्णी, पञ्चपत्री, पञ्चदली.

CINQUE-SPOTTED, *a.* पञ्चचिह्नविशिष्टः -ष्टा -ष्टं, पञ्चतिलवान् -वती -वत् (त्).

CION, *s.* पल्लवं, नवपल्लवं, किसलः -लं, किसलयः -यं.

CIPHER, *s.* (An arithmetical character) अङ्कः, गुणनिका.—(Character in general) अक्षरं, वर्णः.—(Mark standing for nothing) शून्यं, विन्दुः *m.*, वटः, हः, ठः, खं.—(Occult character in writing) बीजाक्षरं, बीजं.

To CIPHER, *v. a.* (To practise arithmetic) अङ्कविद्याम् अभ्यस् (c. 4. -अस्यति -असितुं) or शिक्ष् (c. 1. शिक्षते, शिक्षितुं).—(To write in occult characters) बीजाक्षरैर् अङ्क् (c. 10. अङ्कयति -यितुं) or लिख् (c. 6. लिखति, लेखितुं).

CIPHERING, *s.* अङ्कनं, गणितं, अङ्कविद्या, गणनविद्या, पाटीगणितं.

CIRCLE, *s.* (A round line) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वृत्तं, गोलः -लं, निधः, चन्द्रकः, वटः, वर्णकः, वलयः -यं.—(Circuit, circumference) परिणाहः, परिधिः *m.*, परिवेष्टनं, वृत्तिः *f.*, परिवेशः; 'the circle of the earth,' भूपरिधिः *m.*, भूमण्डलं.—(A circle of people, assembly) मण्डलं, परिषद् *f.*, पंक्तिः *f.*—(Circle on the forehead) तिलकः -कं, तमालपत्रं, चित्रकं, विशेषकं; 'segment of a circle,' वृत्तखण्डं, खण्डमण्डलं; 'area of a circle,' फलं.

To CIRCLE, *v. a.* (To surround) परिवेष्ट् (c. 1. -वेष्टते -वेष्टितुं), परिवृ (c. 5. वृणोति -वरितुं -वरीतुं), परिष्ठा (c. 1. -तिष्ठति, -ष्ठातुं), मण्डल (nom. मण्डलयति -यितुं).

To CIRCLE, *v. n.* (To move circularly) चक्रवत् परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), or व्यावृत् or परिभ्रम् (c. 1. -भ्रमति, c. 4. -भ्राम्यति -भ्रमितुं), मण्डल (nom. मण्डलायते).

CIRCLED, *p. p.* मण्डलितः -ता -तं, परिमण्डलितः -ता -तं, वलयितः -ता -तं.—(Having the form of a circle) मण्डली -लिनी -लि (न्), मण्डलाकारः -रा -रं, चक्राकारः -रा -रं.

CIRCUIT, *s.* (Compass, circumference) मण्डलं, परिमण्डलं, परिधिः *m.*, परिमाणं, परिणाहः, परीणाहः, परिवेष्टनं.—(Act of moving round) परिवर्त्तनं, आवर्त्तः, आवृत्तिः *f.*, आवर्त्तनं, विवर्त्तः भ्रमणं, परिभ्रमः, घूर्णिः *f.*—(Visitation of a judge) धर्म्माध्यक्षाभ्यागमनं, प्राड्विवाकभ्रमणं.

To CIRCUIT, *v. n.* परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं),

CIRCUITOUS, *a.* चक्रः -क्रा -क्रं, कुटिलगामी -मिनी -मि (न्), सुदीर्घः -र्घा -र्घं.

CIRCULAR, *a.* वर्त्तुलः -ला -लं, मण्डली -लिनी -लि (न्), चाक्रिकः -की -कं, चक्राकारः -रा -रं, चक्राकृतिः -तिः -ति, चक्री -क्रिणी -क्रि (न्), चक्रवान् -वती -वत् (त्), चाक्रेयः -यी -यं, वटी -टिनी -टि (न्), निघः -घा -घं, विष्वक्समः -मा -मं.

CIRCULARITY, *s.* मण्डलता, परिमण्डलता, वर्त्तुलत्वं, चक्राकारता, गोलाकारत्वं.

CIRCULARLY, *adv.* चक्रवत्, चक्ररूपेण, गोलवत्, मण्डलवत्, मण्डलतस्.

To CIRCULATE, *v. n.* प्रचल् (c. 1. -चलति -चलितुं), प्रचर् (c. 1. -चरति -चरितुं), परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), सम्परिवृत्, विपरिवृत्, विवृत्.

To CIRCULATE, *v. a.* परिवृत् in caus. (-वर्त्तयति -यितुं), प्रचल् in caus. (-चलयति -यितुं).

CIRCULATED, *p. p.* प्रचलितः -ता -तं, परिवर्त्तितः -ता -तं, प्रचारितः -ता -तं, व्यावर्त्तकः -का -कं.

CIRCULATING, *a.* प्रचलः -ला -लं, परिवर्त्ती -र्त्तिनी -र्त्ति (न्), व्यावर्त्तकः -का -कं.

CIRCULATION, *s.* परिवर्त्तः -र्त्तनं, व्यावर्त्तः, प्रचारः, प्रचलनं, प्रचरः, भ्रमणं, परिभ्रमणं, चलनं, प्राचुर्य्यं.—(Of the blood) रक्तचलनं, रक्तवहनं.

CIRCULATORY, *a.* वर्त्तुलः -ला -लं, चाक्रिकः -की -कं, मण्डली -लिनी -लि (न्).

CIRCUMAMBIENCY, *s.* परिवेष्टनं, व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, परिगमनं.

CIRCUMAMBIENT, *a.* परिवेष्टकः -का -कं, व्यापकः -का -कं, परिगतः -ता -तं.

To CIRCUMAMBULATE, *v. n.* परिक्रम् (c. 1. -क्रामति -क्रमितुं), परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं).

CIRCUMAMBULATION, *s.* परिक्रमः, परिभ्रमणं, परिसर्य्या, परीसारः, पर्य्यटनं.—(Reverential) प्रदक्षिणः -णा -णं.

To CIRCUMCISE, *v. a.* त्वचं छिद् (c. 7. छिनत्ति, छेत्तुं), लिङ्गाग्रचर्म्म छिद्, परिच्छिद्, परिकृत् (c. 6. -कृणति -कर्त्तितुं).—(A circumcised man) दुश्चर्म्मा *m.* (न्), वराटः, वराटः, दुर्वेलः, छिन्नत्वकः.

CIRCUMCISION, *s.* त्वक्छेदनं, लिङ्गाग्रचर्म्मछेदनं, दौश्चर्म्म्यं, परिकर्त्तनं.

To CIRCUMDUCT, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), व्यथीकृ, मोघीकृ, निष्फलीकृ.

CIRCUMDUCTION, *s.* लोपः, अनिष्पादनं, मोघीकरणं, व्यर्थीकरणं.

CIRCUMFERENCE, *s.* परिधिः *m.*, मण्डलं, परीणाहः, परिणाहः, परिमाणं, वृत्तिः *f.*, चक्रवालं, पालिः *f.*, परिवेशः -षः, परिवेष्टनं.—(Of a wheel) चक्रपरिधिः *m.*, नेमिः *f.*, प्रधिः *m.*, प्रधिमण्डलं, नीव्रं, नीव्रः.—(Of the earth) भूपरिधिः *m.*

CIRCUMFLEX, *s.* (Accent) स्वरितः, तृतीयम् उच्चारणचिह्नं.

CIRCUMFLUENCE, *s.* परिस्रवः, परिस्रवः, परिवाहः, परिस्यन्दनं, परिगलनं.

CIRCUMFLUENT OR CIRCUMFLUOUS, *a.* परिसृतः -ता -तं, परिसारी -रिणी -रि (न्), परिस्यन्दी -न्दिनी -न्दि (न्), परिस्यन्नः -न्ना -न्नं, परिगलितः -ता -तं.

CIRCUMFORANEOUS, *a.* गृहान्गृहम् अटमानः -ना -नं, अटाट्यमानः -ना -नं.

To CIRCUMFUSE, *v. a.* परिप्लु in caus. (-प्लावयति -यितुं), समाप्लु.

CIRCUMFUSED, *p. p.* परिप्लुतः -ता -तं, समाप्लुतः -ता -तं, परिगलितः -ता -तं, परिगतः -ता -तं, व्याप्तः -प्ता -प्तं, समाक्रान्तः -न्ता -न्तं.

CIRCUMFUSILE, *a.* परिस्रावी -विनी -वि (न्), व्यापकः -का -कं, व्यसुवानः -ना -नं.

CIRCUMFUSION, *s.* परिस्रावः, परिस्रवः, व्याप्तिः *f.*, व्यापकत्वं, परिगलनं.

To CIRCUMGYRATE, *v. n.* परिवृत् (c. 1. -वर्त्तते -वर्त्तितुं), व्यावृत्, घूर्ण् (c. 1. घूर्णते, घूर्णितुं), परिघूर्ण्, व्याघूर्ण्.

CIRCUMGYRATION, *s.* चक्रावर्त्तः, आवर्त्तः, परिवर्त्तः, आवृत्तिः *f.*, घूर्णिः *f.*

CIRCUMJACENT, *a.* पर्य्यन्तस्थः -स्था -स्थं, सामन्तस्थः -स्था -स्थं, उपान्तिकः -की -कं.

To COBBLE, *v. a.* (To mend shoes) जीर्णपादुकाः सूच्या समाधा (c. 3. -दधाति -धातुं) or सन्धा.—(To make any thing clumsily) आदाक्ष्येण किञ्चित् कृ or निर्म्मा (c. 2. -माति -मातुं).

COBBLER, *s.* (A mender of old shoes) जीर्णपादुकासन्धाता *m.* (तृ). —(A clumsy workman) अदक्षः शिल्पी *m.* (न्), अनिपुणः, अनभिज्ञः.

COBIRON, *s.* मांससंस्कारे प्रयुक्तः स्थूलाग्रो लोहशूलः.

COBISHOP, *s.* धर्म्माध्यक्षसहायः, धर्म्माधिपतेः सहकारी *m.* (न्).

COBRA CAPELLO, *s.* (Snake) फणकरः, फणी *m.* (न्). फणवान् *m.* (त्), नागः.

COBWEB, *s.* ऊर्णनाभजालः, जालः -लं, मर्कटवासः, मर्कटजालः, आशावन्धः, सन्तानिका, लूतातन्तुवितानं.

COCCIFEROUS, *a.* गुटिकाकारफलविशिष्टः -ष्टा -ष्टं.

COCHINEAL, *s.* (Insect) लाक्षा, जतु *n.* -तुकं, तित्तिभः, क्रिमिः *m.*

COCHLEARY OR COCHLEATED, *a.* आवर्त्ती -र्त्तिनी -र्त्ति (न्), परिवर्त्तिकः -का -कं.

COCK, *s.* (The male to the hen) कुक्कुटः, चरणायुधः, नखायुधः, स्वर्णचूडः, ताम्रचूडः, ताम्रशिखी *m.* (न्), शिखी *m.* (न्), शिखण्डी *m.* (न्) -ण्डिकः, कृकवाकुः *m.*, कलधिकः, कालज्ञः, उषाकालः, निशावेदी *m.* (न्), रात्रिवेदी *m.* (न्), यामघोषः, रसाखनः, सुपर्णः, पूर्णकः; 'relating to a cock,' काक्कुटकः -टी -टं; 'cock's comb,' चूडा, शिखा; 'a cock-sparrow,' चटकः.—(Weathercock) प्रासादशृङ्गाग्रे स्थापितं कुक्कुटाकारं वातस्कन्धलक्षणं, वायुलक्षणं, वायुध्वजः, वायुस्कन्धलक्ष्यं.—(Spout to let out water at will) सपिधानं जलनिर्गमरन्ध्रं, प्रणाली, जलनिर्गमः, जलस्रावणयन्त्रं.—(Notch of an arrow) बाणाग्रभागे अवच्छेदः.—(Cock of a gun) आग्नेयनाडिसम्बन्धी सूक्ष्ममुद्गरविशेषो यद्द्वारेण अन्तःस्थपूर्णौ संज्वाल्यते.—(A leader) मुख्यः, मुखरः, पुरोगः. —(Heap of hay) शुष्कतृणचितिः *f.*, तृणोत्करः.—(Form of a hat) शिरस्कसंस्कारः, शिरस्त्राकारः; 'cock a hoop,' जयी *m.* (न्), दृप्तः, दर्पध्मातः, गर्व्वोद्धतः; 'cock and a bull story,' वृथाकथा; शशविषाणधनुर् अस्य इति मृषार्थकम् आख्यानं.

To COCK, *v. a.* (To set erect) उन्नम् in caus. (-नामयति -नमयति -यितुं), उच्छ्रि (c. 1. -श्रयति -यितुं), उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उद्भन् (c. 2. -हन्ति -हन्तुं); 'to cock the ears,' कर्णौ स्तब्धीकृ; 'the tail,' उत्पुच्छ (nom. उत्पुच्छयते -यितुं).—(To put hay into cocks) शुष्कतृणम् उत्करीकृ.—(To cock a gun) आग्नेयनाडिसन्धिनं पूर्व्वोक्तसूक्ष्ममुद्गरम् उन्नम् in caus. (-नमयति -यितुं).

To COCK, *v. n.* कुक्कुटवत् खेलगत्या चल् (c. 1. चलति -लितुं), दृप् (c. 4. दृप्यति -दृप्तुं), गर्व्वेण चल्.

COCKED, *p. p.* उन्नतः -ता -तं, समुन्नतः -ता -तं, उच्छ्रितः -ता -तं, उत्क्षिप्तः -प्ता -प्तं; 'with tail cocked,' समुद्भतलाङ्गूलः -ला -लं.

COCKADE, *s.* राजव्यापृतस्य सेवकेन शिरस्कोपरि धृता चूडा, कुक्कुटचूडाकारो मस्तकालङ्कारः.

COCKATRICE, *s.* अजगरः, वाहसः, कुक्कुटाण्डजः सर्पः or व्यालः.

COCKBOAT, *s.* उपनौका, क्षुद्रनौका, क्षुद्रपोतः, उपतरिः *f.*

COCKCHAFER, *s.* पिङ्गशरीरो ध्वनमोदी भ्रमरभेदः.

COCKCROWING, *s.* कुक्कुटरवः -वणं, चरणायुधशब्दः.—(Morning) प्रभातकालः, प्रातःकालः.

To COCKER, *v. a.* (To fondle) कोमलं or कोमलप्रकारेण पुष् (c. 9. पुष्णाति, c. 1. पोषति -षितुं), or संवृध् in caus. (-वर्धयति -यितुं), अनुरुध् (c. 4. -रुध्यते -रोद्धुं), क्रोडीकृ.

COCKEREL, *s.* (Young cock) कुक्कुटशावकः, चरणायुधशावकः.

COCKERING, *s.* पोषणं, संवर्धनं, अनुरोधः, छन्दोनुवृत्तं, कोमलता.

COCKET, *s.* शौल्किकमुद्रा, शुल्कस्थाने द्रव्यनिक्षेपाननारं शौल्किकसकाशात् प्रत्ययपत्रं.

COCKFIGHT, *s.* प्राणिद्यूतं, समाह्वयः, साह्वयः, कौलीनं.

COCKHORSE, *a.* अश्वारूढः -ढा -ढं, जयी -यिनी -यि (न्), दर्पध्मातः -ता -तं.

COCKLE, *s.* (Shell-fish) दुर्नामा *m.* -मी *f.* (न्) दीर्घकोषिका, सितालिका, शुक्तिः *f.*—(Weed growing in corn) कक्षः, शस्यक्षेत्ररुह ओषधिभेदः.

COCKLED, *a.* दुर्नामाकारः -रा -रं, शौक्तिकः -की -कं, आवर्त्ती -र्त्तिनी -र्त्ति (न्).

COCKLOFT, *s.* कूटागारं, क्षौमः -मं, चूला, चन्द्रशालिका, गृहस्य उपरिस्थः प्रकोष्ठः.

COCKMASTER, *s.* चरणायुधपालकः, युद्धकुक्कुटपोषकः.

COCKMATCH, *s.* कुक्कुटयुद्धं, चरणायुधसमाह्वयः, कौलीनं.

COCKNEY, *s.* नागरजनः, पुरवासी *m.* (न्), नगरवासी *m.*, प्राकृतजनः, पृथग्जनः.

COCKPIT, *s.* (Area where cocks fight) कुक्कुटयुद्धभूमिः.—(In a man of war) बृहद्युद्धनौकाया अधोभागे कायशल्यादिचिकित्सायोग्या कुटी.

COCKROACH, *s.* परोष्णी, खलाधारा, तैलपा *f.*—पायिका, चारिका, पिङ्गकपिशा.

COCK'S-COMB, *s.* *See* COXCOMB.

COCKSURE, *a.* सुनिश्चितः -ता -तं, निःसन्देहः -हा -हं, असन्दिग्धः -ग्धा -ग्धं.

COCKSWAIN, *s.* उपनौकाकर्णधारः, क्षुद्रनौकापतिः *m.*

COCOA-NUT, *s.* नारिकेलः, नालिकेरः, नारिकेरः, नाडिकेलः, नारिकेली, पयोधरः, कौशिकफलं, स्वादूदकः, पुटोरकः, दाक्षिणात्यः.—(The tree) तृणद्रुमः, फलकेशरः, दृढफलः, मुण्डफलः, सदाफलः, शिरःफलः, सदापुष्पः, दृढमूलः, सुतुङ्गः, सुभङ्गः, लाङ्गली.—(The juice) नारिकेलरसः.

COCOON, *s.* (Of the silk worm) कृमिकोषः, कीटकोषः, गुटिका.

COCTION, *s.* निष्क्वाथः, क्वाथः, क्वथनं, पाचनं.

COD OR COD-FISH, *s.* स्थूलशिरस्कः समुद्रीयमत्स्यभेदः.

COD, *s.* (Seed-vessel, pod) बीजकोशः, बीजगुप्तिः *f.*, शमी, पुटः.

CODDED, *p. p.* कोशस्थः -स्था -स्थं, कोषगुप्तः -प्ता -प्तं.

To CODDLE, *v. a.* (Parboil) ईषत्क्वथ् (c. 1. -क्वथति -यितुं), शनैः स्वाल्पं पच् (c. 1. पचति, पक्तुं) or तप् in caus. (तापयति -यितुं), कोष्णजलेन कोमलीकृ.—(Breed up tenderly) कोमलतया or सौकुमार्य्येण पुष् (c. 1. पोषति -षितुं).

CODE, *s.* (Of laws) धर्म्मसंहिता, स्मृतिशास्त्रं, धर्म्मशास्त्रं, स्मृतिः *f.*, व्यवहारविधिः *m.*

CODICIL, *s.* मूलपुञ्जनपत्रस्य अनुबन्धः or उपलेख्यं or उपाङ्गं or उत्तरखण्डं.

CODLING, *s.* भोजनात्पूर्व्वम् ईषत्क्वथनीय आपक्वः काम्रफलभेदः.

COEFFICACY OR COEFFICIENCY, *s.* सहकारिणाम् अनेकहेतुकानां प्रभावः, सहकारिता, संयोगिता, सम्प्रयोगिता, सम्प्रतिपत्तिः *f.*, सम्भूतिः *f.*

Coefficient, *s.* (In arithmetic) वर्णः, प्रकृतिः *f.*, गुणः.

Coemption, *s.* पूर्वक्रयः, प्रख्यातभाण्डक्रयः, अवच्छेदावच्छेदक्रयः, समुदयक्रयः.

Cœnobite, *s.* सङ्घसामान्यो विभवो यस्य सौभात्रमध्याद् एकभाता *m.* (तृ).

Coequal, *a.* अन्येन समः -मा -मं or समानः -ना -नं or तुल्यः -ल्या -ल्यं, समानपदस्थः -स्था -स्थं, समानजातीयः -या -यं, समभावः -वी -वं, सहधर्म्मी -र्म्मिणी -र्म्मि (न्), सधर्म्मा -र्म्मी -र्म्म (न्).

Coequality, *s.* अन्येन समता or समानता or तुल्यता, समानावस्था.

To coerce, *v. a.* बलात्कारेण यम् (c. 1. यच्छति, यन्तुं), नियम्, संयम्, विनियम्; or निग्रह् (c. 9. -गृह्णाति -ह्णीते -ग्रहीतुं) or शास् (c. 2. शास्ति, शासितुं), अनुशास्; यन्त्र् (c. 10. यन्त्रयति -यितुं), निरुध् (c. 7. -रुणद्धि -रोद्धुं), निषिध् (c. 1. -सेधति -धितुं).

Coerced, *p. p.* बलात्कारेण निगृहीतः -ता -तं, संयतः -ता -तं, निरुद्धः -द्धा -द्धं, संरुद्धः -द्धा -द्धं, यन्त्रितः -ता -तं, प्रत्याहृतः -ता -तं.

Coercible, *a.* निग्रहीतव्यः -व्या -व्यं, नियन्तव्यः -व्या -व्यं, यन्त्रणीयः -या -यं.

Coercion, *s.* संयमः -मनं, नियमनं, निग्रहः -हणं, निगृहीतिः *f.*, यन्त्रणं, प्रत्याहरणं.

Coercive, *a.* बलात्कारी -रिणी -रि (न्), प्रतिरोधी -धिनी -धि (न्), नियामकः -का -कं.

Coessential, *a.* समभावः -वी -वं, सहभावी -विनी -वि (न्).

Coessentiality, *s.* समभावः or भावसमानता, सहभावित्वं.

Coetaneous, *a.* समानवयस्कः -स्का -स्कं. *See* Coeval.

Coeternal, *a.* अन्येन सह नित्यकालस्थायी -यिनी -यि (न्) or अनन्त-कालस्थायी or आद्यनहीनः -ना -नं or सनातनः -ना -नं.

Coeternity, *s.* समनित्यता, समाननन्तता, समाननित्यता.

Coeval, *a.* समानवयस्कः -स्का -स्कं, समवयस्कः -स्का -स्कं, समानवयाः -याः -यः (स्) or तुल्यवयाः or सवयाः, समानकालीनः -ना -नं, एककालीनः -ना -नं, समानजन्मा -न्मा -न्म (न्).

Coeval, *s.* वयस्यः, सहभावी *m.* (न्), सवयाः *m.* (स्), तुल्यवयाः.

To coexist, *v. n.* सम्भू (c. 1. -भवति -वितुं), सह or एककाले वृत् (c. 1. वर्त्तते -र्त्तितुं) or स्था (c. 1. तिष्ठति, स्थातुं) or जीव् (c. 1. जीवति -वितुं).

Coexistence, *s.* एककाले वर्त्तनं or जीवनं, सहवर्त्तनं, सहजीवनं.

Coexistent, *a.* सहवर्त्ती -र्त्तिनी -र्त्ति (न्) or एककाले वर्त्ती, सहजीवी -विनी -वि (न्) or एककाले जीवी, सहजः -जा -जं.

To co-extend, *v. n.* अन्येन समं व्याप् (c. 5. -आप्नोति -आप्तुं) or विस्तृ in pass. (-स्तीर्य्यते).

Co-extension, *s.* समव्याप्तिः *f.*, अभिव्याप्तिः *f.*, समविस्तारः, सम्मूर्च्छनं.

Coffee, *s.* यवनदेशीयक्षुद्रफलनिर्हृतः कृष्णवर्णः पानीयविशेषः, यावनपानं.

Coffee-house, *s.* पूर्व्वोक्तपानीयविक्रयस्थानं, यावनपानशाला.

Coffee-pot, *s.* पूर्व्वोक्तपानीयाधारः, यावनपानभाजनं, यावनपानपात्रं.

Coffer, *s.* मुद्राधारः, मुद्राकोषः, धनाधारः, धनभाण्डं, दीनारभाण्डं.

To coffer, *v. a.* मुद्राधारे or धनभाण्डे निधा (c. 3. -दधाति -धातुं).

Coffin, *s.* शवाधारः, मृतशरीराधारः, शवभाजनं.

To coffin, *v. a.* शवाधारे or शवभाजने निधा (c. 3. -दधाति -धातुं) or निविश caus. (-वेशयति -यितुं).

To cog, *v. a.* and *n.* (Flatter, wheedle) लल् (c. 10. लालयति -यितुं), चाटूक्त्या सान्त्व् (c. 10. सान्त्वयति -यितुं).—(Cog a die) कूटाक्षं or दुरक्षं कृ.—(Fix cogs to a wheel) चक्रनेमिं सदन्तां कृ.

Cog, *s.* (Tooth of a wheel) चक्रदन्तः, नेमिदन्तकः, प्रधिदन्तः.

Cogency, *s.* बलं, सामर्थ्यं, समर्थता, प्रभावः, शक्तिः *f.*, अवश्यकता.

Cogent, *a.* बली -लिनी -लि (न्), बलवान् -वती -वत् (त्) प्रबलः -ला -लं, शक्तिमान् -मती -मत् (त्), अवश्यकः -का -कं, अवश्यकर्त्तव्यः -व्या -व्यं, निरुत्तरः -रा -रं; 'a cogent reason,' बलवद्धेतुः *m.*, विशिष्टहेतुः.

Cogently, *adv.* बलात्, बलेन, बलवत्, अवश्यकं, निरुत्तरं.

Cogger, *s.* लाली *m.* (न्), चाटुकारः, सान्त्वनकृत् सान्त्ववादः.

Cogglestone, *s.* क्षुद्रशर्करा, चूर्णखण्डः, अश्मीला.

Cogitable, *a.* ध्यानीयः -या -यं, ध्येयः -या -यं, चिन्तनीयः -या -यं.

Cogitate, *v. n.* ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, प्रध्यै, सन्ध्यै, चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त्, सञ्चिन्त्, विचर् in caus. (-चारयति -यितुं), आलोच् (c. 10. -लोचयति -यितुं), भू in caus. (भावयति -यितुं), सम्भू, वितर्क् (c. 10. -तर्कयति -यितुं), अनुतर्क्, विमृश् (c. 6. -मृशति -ष्टुं), अनुमृश्, प्रविमृश्.

Cogitated, *p. p.* चिन्तितः -ता -तं, ध्यातः -ता -तं, आलोचितः -ता -तं.

Cogitation, *s.* चिन्ता, ध्यानं, विचारः -रणं, आलोचनं, चर्चा, भावना, मनःकल्पना, सङ्कल्पः, मनोगतं.

Cogitative, *a.* चिन्तापरः -रा -रं, ध्यानपरः -रा -रं, मानसिकः -की -कं.

Cognate, *a.* सहजः -जा -जं, सम्बन्धी -न्धिनी -न्धि (न्), समानजातीयः -या -यं, सजातिः -तिः -ति, सगोत्रः -त्रा -त्रं.

Cognation, *s.* (Relationship) बन्धुता, बान्धवत्वं, ज्ञातित्वं, ज्ञातिभावः, सजातित्वं, सम्बन्धः, सम्बन्धित्वं, सम्पर्कः, अनुषङ्गः.

Cognition, *s.* ज्ञानं, विज्ञानं, परिज्ञानं, प्रज्ञानं, स्वीकारः.

Cognitive, *a.* ज्ञानी -निनी -नि (न्), ज्ञानवान् -वती -वत् (त्), or प्रज्ञावान्.

Cognizable, *a.* ज्ञेयः -या -यं, विज्ञेयः -या -यं, बोध्यः -ध्या -ध्यं, ग्राह्यः -ह्या -ह्यं.—(By law) अभियोक्तव्यः -व्या -व्यं, विचार्य्यः -र्य्या -र्य्यं, विचारार्हः -र्हा -र्हं.

Cognizance, *s.* (Judicial notice) विचारः -रणा, अनुसन्धानं, जिज्ञासा, चर्च्चा, परीक्षा, अनुयोगः, निर्णयः, निरूपणं.—(Badge) संज्ञा, लिङ्गं, चिह्नं, लक्षणं, अभिज्ञानं.—(To take cognizance) ज्ञा (c. 9. जानाति, ज्ञातुं), ज्ञा in des. (जिज्ञासते -सितुं), विचर् (c. 10. -चारयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), अनुयुज् (c. 7. -युनक्ति -योक्तुं), निरूप् (c. 10. -रूपयति -यितुं).

Cognominal, *a.* एकनामकः -का -कं, एकसंज्ञकः -का -कं, समसंज्ञावान् -वती -वत् (त्).

Cognomination, *s.* पद्धतिः *f.* -तिः, उपपदं, उपाधिः *m.*, कौलिकोपाधिः *m.*

Cognoscible, *a.* ज्ञातव्यः -व्या -व्यं, ज्ञेयः -या -यं, बोध्यः -ध्या -ध्यं.

To cohabit, *v. n.* (Dwell with another) सह वस् (c. 1. वसति वस्तुं), एकत्र वस्, सङ्गम् (c. 1. -गच्छति गन्तुं), संसर्गं कृ—(As the sexes) स्त्रीपुरुषवत् सम्भोगं कृ.

Cohabitant, *s.* सहवासी *m.* (न्), एकपुरनिवासी *m.*, एकस्थानवासी *m.*

Cohabitation, *s.* सहवासः, एकत्र वासः, संसर्गः, सङ्गमः.—(Sexual) सम्भोगः, स्त्रीपुरुषसङ्गमः, औपस्थ्यं, उपभोगः.—(Cohabitation with men) पुंयोगः.—(With women) स्त्रीसङ्गः.

Coheir, *s.* समांशी *m.* (न्), समांशहारी *m.* (न्), अंशहारी *m.*, अंशभाक् *m.* (ज्), अंशी *m.* (न्), अंशकः, समाधिकारी *m.* (न्), दायादः, ऋक्थभागी *m.* (न्), विभागकर्त्ता *m.* (र्तृ), बन्धुः.

Coheiress, *s.* समांशिनी, समांशहारिणी, समाधिकारिणी.

To cohere, *v. n.* (Stick together) संसञ्ज् in pass. (-सज्यते or -सज्जते), संश्लिष् in pass. (-श्लिष्यते), संलग्नीभू or संलग्नः -ग्ना -ग्नं अस्, संयुज् in pass. (-युज्यते), संहन् in pass. (-हन्यते).—(Agree, suit) युज् in pass. (युज्यते), सम्बन्ध् in pass. (-बध्यते), योग्यः -ग्या -ग्यं अस्.

Coherence, *s.* संसक्तिः *f.*, संश्लेषः, संलग्नत्वं, संहतिः *f.*, संयोगः, समासञ्जनं, सम्पर्कः.—(Connexion) सम्बन्धः, प्रबन्धः, अन्वयः, समन्वयः, अनुषङ्गः, सन्दर्भः.—(Consistency) अविरोधः, अनुसारित्वं.

COHERENT, *a.* संसक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, सुश्लिष्टः -ष्टा -ष्टं, संलग्नः -ग्ना -ग्नं, दृढसन्धिः -न्धिः -न्धि, संहतः -ता -तं, सुसंहतः -ता -तं.—(Consistent, adapted) अविरुद्धः -द्धा -द्धं, उपयुक्तः -क्ता -क्तं, अनुरूपः -पा -पं, अनुसारी -रिणी -रि (न्).—(Connected) सम्बद्धः -द्धा -द्धं, अनुसम्बद्धः -द्धा -द्धं, सान्वयः -या -यं, अन्वितः -ता -तं.

COHESION, *s.* संलग्नत्वं, संश्लेषः, संसक्तिः, संयोगः, समासज्जनं, सङ्घट्टनं.

COHESIVE, *a.* संलग्नशीलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, श्यानः -ना -नं, स्निग्धः -ग्धा -ग्धं.

COHESIVENESS, *s.* संलग्नशीलत्वं, सान्द्रता, श्यानता, स्निग्धता, स्नैग्ध्यं.

To COHIBIT, *v. a.* यम् (c. 1. यच्छति, यन्तुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

To COHOBATE, *v. n.* पुनः सन्धा (c. 3. -दधाति -धातुं), द्विःसन्धानं कृ.

COHORT, *s.* सैन्यगुल्मः, सैन्यव्यूहः, सैन्यदलं, पञ्चशतसैन्यदलं, गणः.

COHORTATION, *s.* सुस्थिरो भवेति समाश्वासनं, प्रचोदनं, प्रोत्साहः.

COIF or COIFFURE, *s.* मस्तकाभरणं, शिरोवेष्टः -ष्टनं, शिरस्त्रं, मुकुटं.

COIFED, *a.* मुकुटी -टिनी -टि (न्), मुकुटधारी -रिणी -रि (न्), कृतमस्तकाभरणः -णा -णं.

To COIL, *v. a.* मण्डलीकृ, वर्तुलीकृ, मण्डलाकारेण पुटीकृ.

COIL, *s.* मण्डलं, मण्डलायितं, वृत्तं, व्यावर्त्तः -र्त्तनं.—(Tumult) तुमुलं, वैक्लव्यं, व्यस्तता, व्यग्रत्वं.

COILED, *p. p.* मण्डली -लिनी -लि (न्), मण्डलीकृतः -ता -तं, वर्तुलीकृतः -ता -तं.

COIN, *s.* (Stamped money) मुद्रा, टङ्कः, टङ्ककः, नाणकं, निष्कः -ष्कं; 'gold coin,' सुवर्णमुद्रा, सुवर्णः; 'silver coin,' रूप्यमुद्रा; 'copper coin,' ताम्रमुद्रा, पणः; 'base coin,' कूष्मनाणकं.—(Corner) कोणः.

To COIN, *v. a.* (To stamp metals for money) सुवर्णरूप्यादि मुद्रीकृ or मुद्र् (nom. मुद्रयति -यितुं) or मुद्रया अङ्क् (c. 1. अङ्कयति -यितुं) or आहन् (c. 2. -हन्ति -हन्तुं).—(Forge, invent) कॢप् (c. 10. कल्पयति -यितुं), घट् (c. 1. घटते -टितुं), सृज् (c. 6. सृजति, स्रष्टुं).

COINAGE, *s.* मुद्राङ्कनं.—(Money coined) मुद्रा.—(Invention) कल्पना, वासना, सृष्टिः.

COINED, *p. p.* मुद्राङ्कितः -ता -तं, मुद्रितः -ता -तं, आहतः -ता -तं.—(Invented) कल्पितः -ता -तं, काल्पनिकः -की -कं, कृत्रिमः -मा -मं, सृष्टः -ष्टा -ष्टं.

To COINCIDE, *v. n.* (Agree in opinion) सम्मन् (c. 4. -मन्यते -मन्तुं), अनुमन्, स्वीकृ, एकचित्तीभू, एकमतीभू, अनुवद् (c. 1. -वदति -दितुं).—(Fall or meet together) सम्पत् (c. 1. -पतति -तितुं), सन्निपत्, सङ्गम् (c. 1. -गच्छति -गन्तुं).—(Be consistent, fitting) युज् in pass. (युज्यते), अनुरूपः -पा -पं or सदृशः -शी -शम् अस्, अनुसृ (c. 1. -सरति -सर्त्तुं), अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), न विरुध् in pass. (-रुध्यते).

COINCIDENCE, *s.* (Falling or meeting together) सन्निपातः, सम्पातः, सङ्गमः, सङ्गतिः *f.*, समागतिः *f.*—(Coincidence of opinion) ऐकमत्यं, एकचित्तता, सम्मतिः *f.*—(Accident) दैवयोगः, सङ्गतं, घटनं -ना, दैवघटनं; 'by an unlucky coincidence,' दुर्दैवात्, दैवदुर्घटनात्.

COINCIDENT, *a.* सन्निपतितः -ता -तं, सम्पाती -तिनी -ति (न्), सङ्गामी -मिनी -मि (न्).—(In time) समानकालीनः -ना -नं.—(Consistent) अविरुद्धः -द्धा -द्धं, अनुसारी -रिणी -रि (न्), सदृशः -शी -शं.

COINDICATION, *s.* एककारणमुद्दिश्य लक्षणबाहुल्यं.

COINER, *s.* (A minter) मुद्राङ्कः, टङ्काङ्कयिता *m.* (तृ), मुद्राकारः, नाणककृत्, नैष्किकः.—(Inventor) कल्पकः, स्रष्टा *m.* (ष्टृ), कारकः.

COISTREL, *s.* कापुरुषः, हतकः, भीरुः *m.*, युद्धपराङ्मुखः.

COITION, *s.* मैथुनं, रतं, सुरतं, अङ्गसङ्गः, औपस्थ्यं, सम्भोगः, संयोजनं, रतिक्रिया, रतिकर्म्म *n.* (न्).

COKE, *s.* अर्द्धदग्धाङ्गारोच्छिष्टं, तमःकृष्णमृत्तिकोच्छिष्टं.

COLANDER, *s.* चालनं -नी, सम्मार्ज्जनयन्त्रं, शोधनी, शोधनयन्त्रं.

COLATION, *s.* (The act of straining) शोधनं, सम्मार्ज्जनं, चालनं.

COLD, *a.* शीतः -ता -तं, शीतलः -ला -लं, शिशिरः -रा -रं, हिमः -मा -मं, हिमवान् -वती -वत् (त्), अनुष्णः -ष्णा -ष्णं, अतप्तः -प्ता -प्तं; 'suffering from cold,' शीतार्त्तः -र्त्ता -र्त्तं, हिमार्त्तः -र्त्ता -र्त्तं; 'a cold wind,' शीतलवातः; 'cold weather,' शीतकालः -लं.—(Indifferent, cold in disposition) विरक्तः -क्ता -क्तं, उदासीनः -ना -नं, जलाशयः -या -यं, निरीहः -हा -हं.—(Wanting in affection) निःस्नेहः -हा -हं.—(Cold-blooded) रक्तहीनः -ना -नं.

COLD, *s.* शीतं, शीतता, शैत्यं, शीतलं -लता, शिशिरः, हिमं; 'cold weather,' शीतकालः -लं, शिशिरकालः -लं; 'cold season,' हिमागमः, शिशिरं, शीतकः.—(Disease caused by cold) पीनसः, प्रतिश्यायः, काशः, कफः, श्लेष्म *n.* (न्); 'having a cold,' काशी -शिनी -शि (न्), पीनसी -सिनी -सि (न्), कफी -फिनी -फि (न्).

COLDISH, *a.* शीतलः -ला -लं, ईषच्छीतः -ता -तं, आशीतः -ता -तं.

COLDLY, *adv.* शीतं, शीतलं, शैत्येन, शिशिरं.—(Indifferently) विरक्तं, विरक्त्या, निःस्नेहं, स्नेहं विना, स्नेहव्यतिरेकेण.

COLDNESS, *s.* शीतता, शैत्यं, शीतं, शीतलता, हिमं, हैमं, शीतीभावः.—(Want of affection) नैःस्नेह्यं, निःस्नेहता.—(Indifference) विरक्तिः *f.*, वैराग्यं, औदास्यं, निरीहता.

COLE or COLEWORT, *s.* शाकः, हरितकं, शूरणं, शियुः *m.*

COLIC, *s.* शूलं, वातशूलं, पक्तिशूलं, आमशूलं, जठरव्यथा, जठरज्वाला, उदरवेदना, वातफुल्लान्त्रं.—(Having the colic) शूली -लिनी -लि (न्).

COLIC, *a.* उदरवेदनाजनकः -का -कं, जठरव्यथाकरः -रा -रं.

To COLLAPSE, *v. n.* (Fall together) सम्पत् (c. 1. -पतति -तितुं), सन्निपत्.—(Shrink) सङ्कुच् in pass. (-कुच्यते), शॄ in pass. (शीर्य्यते), सङ्कोचम् इ (c. 2. एति, एतुं), संक्षिप् in pass. (-क्षिप्यते), संहृ in pass. (-ह्रियते), संहन् in pass. (-हन्यते), संश्यानीभ्.

COLLAPSED, *p. p.* सङ्कुचितः -ता -तं, शीर्णः -र्णा -र्णं, संहतः -ता -तं, संहृतः -ता -तं, संक्षिप्तः -प्ता -प्तं, संवृतः -ता -तं, संश्यानः -ना -नं, सन्नः -न्ना -न्नं.

COLLAR, *s.* ग्रैवं -वेयं -वेयकं, गलमेखला, कण्ठभूषा, कण्ठलता, माला, ग्रीवाभरणं, माला.—(Halter for the neck) कण्ठपाशकः, कण्ठतलासिका.

To COLLAR, *v. a.* ग्रैवेयके धृ (c. 1. धरति, धर्त्तुं) or हस्तं दा (c. 3. ददाति, दातुं).

COLLAR-BONE, *s.* जत्रु *n.*, ग्रीवास्थि *n.*, कण्ठास्थि *n.*; 'the collar bones,' जत्रुणी *n. du.*

COLLARED, *p. p.* ग्रैवेयके or ग्रीवायां धृतः -ता -तं.

To COLLATE, *v. a.* (Compare one thing with another) उपमा (c. 2. -माति, c. 3. -मिमीते -मातुं), सम्प्रधृ in caus. (-धारयति -यितुं), with 2 acc.; साधारणीकृ.—(Collate books) गुणनीं कृ, शुध् in caus. (शोधयति -यितुं).—(Place in a benefice, confer) धर्म्माध्यापकाय वृत्तिं प्रतिपद् in caus. (-पादयति -यितुं) or प्रदा (c. 3. -ददाति -दातुं).

COLLATED, *p. p.* उपमितः -ता -तं, शोधितः -ता -तं, प्रदत्तः -त्ता -त्तं.

COLLATERAL, *a.* (Parallel, side to side) पार्श्वापार्श्विभूतः -ता -तं, पार्श्वापार्श्विगतः -ता -तं.—(Not direct) प्रासङ्गिकः -की -कं, आनुषङ्गिकः -की -कं, वक्रः -क्रा -क्रं, विलोमः -मा -मं, असरलः -ला -लं.—(Concurrent) अनुवादकः -का -कं.—(Sprung from a common ancestor) सगोत्रः -त्रा -त्रं, सपिण्डः, समानोदकः.

COLLATERALLY, *adv.* पार्श्वापार्श्वि.—(Indirectly) प्रसङ्गक्रमेण, वक्रं, असरलं.

COLLATION, *s.* (Comparison of one thing with another) उपमानं, उपमितिः *f.*—(Of books) गुणनी, शोधनं.—(Act of bestowing) प्रदानं, प्रतिपादनं.—(To a benefice) धर्म्माध्यापकाय वृत्तिप्रतिपादनं.

or वृत्तिप्रदानं.—(A cold repast) पूर्व्वेद्युःसिद्धानां फलादिखाद्यान्नानां सम्भारः.

Collator, *s.* (One that compares books) गुणनीकर्त्ता *m.* (र्त्तृ), ग्रन्थशोधनकृत्.—(One that confers a benefice) धर्म्माध्यापकवृत्तिप्रदाता *m.* (तृ).

Colleague, *s.* सहकारी *m.* (न्), सम्भूयकारी *m.* (न्), तुल्यवृत्तिः *m.*, तुल्यव्यापारी *m.* (न्), एकविषयी *m.* (न्), सहायः, सङ्गी *m.* (न्).

To collect, *v. a.* (Gather together) चि (c 5. चिनोति, चेतुं), अवचि, समाचि, आचि, प्रचि, सञ्चि, ममानी (c. 1. -नयति -नेतुं), समुपानी, सम्भृ (c. 1. -भरति, c. 3. -बिभर्त्ति -भर्त्तुं), समादा (c. 3. -ददाति -दातुं), समाक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), संहन् (c. 2. -हन्ति -हन्तुं), समाहृ (c. 1. -हरति -हर्त्तुं), उपसंहृ, समूह् (c. 1. -ऊहते -हितुं), सङ्गृह् (c. 9. -गृह्णाति -ग्रहीतुं), एकीकृ, एकत्र कृ.—(Collect into a heap) राशीकृ, पिण्ड् (c. 10. पिण्डयति -यितुं), पिण्डीकृ, पूगीकृ, एकौघीकृ.—(Collect themselves, assemble) समे (*i.e.* सम् and आ with rt. इ, समैति, समेतुं), सङ्गम् (c. 1. -गच्छति -गन्तुं), समागम्, एकत्र मिल् (c. 6. मिलति, मेलितुं).—(Collect taxes) करान् or शुल्कान् ग्रह्.—(Infer) अनुमा (c. 2. -माति c. 3. -मिमीते -मातुं), ऊह्, अवगम् (c. 1. -गच्छति -गन्तुं). (Collect one's self, recover one's self) मनः or चेतः समाधा (c. 3. -दधाति -धत्ते -धातुं), संज्ञां लभ् (c. 1. लभते, लब्धुं), स्वप्रकृतिम् आपद् (c. 4. -पद्यते -पत्तुं), or प्रतिपद्.

Collect, *s.* खृष्टीयानां रविवारादिविशिष्टपर्व्वाण्युद्दिश्य प्रार्थना, सांक्षेपिकप्रार्थना, ऋक् *f.* (च्).

Collected, *p. p.* सञ्चितः -ता -तं, उपचितः -ता -तं, समुपचितः -ता -तं, समूढः -ढा -ढं, सङ्गूढः -ढा -ढं, सम्भृतः -ता -तं, सम्भूतः -ता -तं, एकीकृतः -ता -तं, एकस्थः -स्था -स्थं, सन्निपतितः -ता -तं, संहतः -ता -तं, समवेतः -ता -तं, सङ्कलितः -ता -तं.—(Heaped) राशीभूतः -ता -तं, पूगीकृतः -ता -तं, पुञ्जितः -ता -तं, एकौघभूतः -ता -तं, एकराशिभूतः -ता -तं.—(In mind) समाहितः -ता -तं, लब्धचेताः -ताः -तः (स्), लब्धसंज्ञः -ज्ञा -ज्ञं, निराकुलः -ला -लं, प्रकृतिमापन्नः -न्ना -न्नं, अव्यस्तः -स्ता -स्तं, अव्यग्रः -ग्रा -ग्रं.

Collectible, *a.* चयनीयः -या -यं, चेयः -या -यं, चेतव्यः -व्या -व्यं, सञ्चेयः -या -यं, उपचेयः -या -यं, समूह्यः -ह्या -ह्यं.

Collection, *s.* सञ्चयः, चयः, समुच्चयः, निचयः, प्रचयः, समूहः, सङ्ग्रहः -हणं, सन्निपातः, सङ्घातः, सङ्घः, संहतिः *f.*, ओघः समुदायः, वृन्दं, समवायः, संहारः, समाहारः, सन्नयः, चायः, सङ्गः, जहिणी, राशिः *m. f.*, पुञ्जः, पिण्डः, पूगः, विन्यासः, सङ्कलः, ग्रामः in comp.; 'collection of people,' जनसमूहः, जननिवहः, जनौघः, जनसमागमः; 'of clouds,' घनचयः, घनौघः, जलदसंहतिः *f.*—(Raising money) एकैकस्मात् किञ्चित्किञ्चिद्धनग्रहणं, धनोल्लोलनं.

Collective, *a.* समवायी -यिनी -यि (न्), सञ्चयी -यिनी -यि (न्), साङ्कलः -ली -लं, उपचितः -ता -तं, गणीभूतः -ता -तं, सामान्यः -न्या -न्यं, साधारणः -णी -णं.

Collectively, *adv.* (Generally) साधारण्येन, साकल्येन.—(In a mass) सङ्घशस्, अपृथक्, समूह्य, ओघशस्.

Collector, *s.* सञ्चेता *m.* (तृ), सञ्चयी *m.* (न्), सङ्गृहीता *m.* (तृ), सङ्ग्राहकः.—(A tax-gatherer) करग्रहः, शुल्कग्राही *m.* (न्).

College, *s.* (For learning) विद्यालयः, विद्यावेश्म *n.* (न्), चतुष्पाठी, पाठशाला, छात्रादिनिलयः, अवसथः -थ्यः.—(For religion) मठः, आश्रमः, विहारः, वीहारः.—(A community of persons) श्रेणिः *m. f.*, जनसमूहः, पंक्तिः *f.*, गणः.

Collegian, *s.* छात्रः, विद्यार्थी *m.* (न्), विद्यालयस्थः, अन्तेवासी *m.* (न्).

Collegiate, *a.* विद्यालयसम्बन्धी -न्धिनी -न्धि (न्), आश्रमिकः -की -कं, आश्रमी -मिनी -मि (न्), मठसम्बन्धीयः -या -यं.

Collet, *s.* (Collar) ग्रैवेयकं, ग्रीवाभरणं.—(Of a ring) अङ्गुरीयकभागो यत्र मणिः प्रणिधीयते.

To collide, *v. a.* संहन् (c. 2. -हन्ति -हन्तुं), समाहन्, सङ्घट्ट् (c. 10. -घट्टयति -यितुं), मृद् (c. 9. मृद्नाति, मर्द्दितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), घृष् (c. 1. घर्षति -र्षितुं).

Collied, *p. p.* अङ्गारमलिनितः -ता -तं, मलीमसः -सा -सं, अङ्गारितः -ता -तं.

Collier, *s.* अङ्गारखनकः, कृष्णभूमिखनकः, अङ्गाराखनिकः, अङ्गारविक्रेता *m.* (तृ).

Colliery, *s.* अङ्गारखानिः *f.*, अङ्गारोत्पत्तिस्थानं, कृष्णभूमिखननस्थानं.

Colliflower, *s.* शाकः, हरितकं, शूरणं, पोतकी.

Colligation, *s.* सम्बन्धनं, एकत्र बन्धनं, संश्लेषणं, संयोजनं.

Collimation or collineation, *s.* सन्धानं, अभिसन्धानं, लक्ष्यीकरणं.

Colliquable, *a.* द्राव्यः -व्या -व्यं, गलनीयः -या -यं.

To colliquate, *v. a.* विली in caus. (-लापयति -लाययति -यितुं), द्रवीकृ.

Colliquation, *s.* विलयनं, गलनं, द्रवीकरणं, विद्रावणं.

Colliquative, *a.* विद्रावकः -का -कं, विलयनकारी -रिणी -रि (न्), गलनकृत्.

Collision, *s.* सङ्घट्टः -ट्टनं, परस्परसमाघातः, समाघातः, प्रतिघातः, सम्मर्द्दः, घर्षणं, घनाघनः, स्खलनं.

To collocate, *v. a.* स्था in caus. (स्थापयति -यितुं), अवस्था, प्रतिष्ठा, धा (c. 3. दधाति, धातुं), आधा, न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, सृ in caus. (सर्पयति -यितुं), नियुज् (c. 7. -युनक्ति -योक्तुं), निविश् in caus. (-वेशयति -यितुं).

Collocated, *p. p.* स्थापितः -ता -तं, प्रतिष्ठापितः -ता -तं, आहितः -ता -तं, विनिवेशितः -ता -तं, न्यस्तः -स्ता -स्तं, अर्पितः -ता -तं, रोपितः -ता -तं.

Collocation, *s.* स्थापनं, प्रतिष्ठापनं, न्यसनं, निवेशनं, अर्पणं, प्रयोगः.

Collocution, *s.* सम्भाषणं, आभाषणं, सम्प्रवदनं, कथायोगः, कथाप्रसङ्गः.

To collogue, *v. n.* लल् in caus. (लालयति -यितुं), चाटूक्त्या सान्त्व् (c. 10. सान्त्वयति -यितुं).

Collop, *s.* (Of meat) मांसखण्डं, आमिषखण्डं, मांसलवः.

Colloquial, *a.* संलापी -पिनी -पि (न्); 'colloquial style,' कथोपकथनयोग्यो वाग्व्यापारः.

Colloquy, *s.* सम्भाषा, संलापः, सङ्कथा, संवादः, कथोपकथनं.

To collude, *v. a.* पक्षपातं कृ, गणतां कृ, कूटसंविदं कृ, अङ्गाङ्गिभू.

Collusion, *s.* पक्षपातः -तिता, गणता, कूटगणता, अङ्गाङ्गिभावः, कूटसंविद्, प्रतारणा, कूटता, कापट्यं, शठता.

Collusive, *a.* पक्षपाती -तिनी -ति (न्), पक्षपातघटितः -ता -तं, कौटिकः -की -कं.

Collusively, *adv.* पक्षपातेन, कूटगणतापूर्ब्बकं, अङ्गाङ्गि.

Colly, *s.* अङ्गारमलं, अङ्गारकिट्टं, अङ्गारकल्कं.

To colly, *v. a.* अङ्गारेण कृष्णीकृ or कृष्ण (nom. कृष्णायते) or मलीमसीकृ.

Collyrium, *s.* अञ्जनं, रसाञ्जनं, नेत्ररञ्जनं, दार्व्विका, कज्जलं, कर्पूरी, खर्पूरी, तुत्थं, रसगर्भं, ताक्ष्यशैलं.

Colocynth, *s.* अरुणा, इन्द्रवारुणिका, दाला, जलङ्गः, काकमर्द्दः, पिटङ्काकी, सुफला, विषघ्नी.

Colon, *s.* (A point used to mark a pause) वाक्यपरिमापकं द्विबिन्दुचिह्नं, द्विबिन्दुः *m.*—(The great intestine) महापुरीतत् *m.*, महदन्त्रं, महानाली.

Colonel, *s.* व्यूहपतिः *m.*, गुल्मपतिः, सैन्यदलाध्यक्षः, सैन्याधिपतिः *m.*

Colonelship, *s.* व्यूहपतित्वं, गुल्मपतिपदं, सैन्यदलाध्यक्षत्वं.

Colonial, *a.* नवीनवसतिस्थानसम्बन्धी -न्धिनी -न्धि (न्), प्रादेशिकः -की -कं.

Colonist, *s.* स्वदेशत्यागानन्तरं देशान्तरवासी *m.* (न्), अधिवासी *m.* (न्).

प्रदेशवासी, दूरवासी, प्रदेशस्थः.

Colonization, *s.* स्वदेशं त्यक्तुकामानां दूरदेशाधिवासनं, देशान्तराधिवासनं, प्रदेशवासनं.

To colonize, *v. a.* स्वदेशं त्यक्तुकामान् प्रदेशे वस् in caus. (वासयति -यितुं) or अधिवस्, अध्यास् in caus. (-आसयति -यितुं).

Colonized, *p. p.* अधिवासितः -ता -तं, अध्युषितः -ता -तं, वासितः -ता -तं, अध्यासितः -ता -तं.

Colonnade, *s.* मण्डलरूपेण विन्यस्ता स्तम्भश्रेणी, स्तम्भपंक्तिपरिवेष्टितश् छन्नपथः, स्तम्भपंक्तिः *f.*

Colony, *s.* (The country planted) स्वदेशत्यागिभिर् वासितः प्रदेशः, नवीनवसतिस्थानं, प्रदेशः.—(The people) प्रदेशवासिनः *m. pl.*, अधिवासिनः *m. pl.*, नवीनवासिनः.

Colophony, *s.* अरालः, रालः, धूपनः, सर्ज्जरसः, अग्निवल्लभः. *See* Resin.

Coloquintida, *s.* अरुणा, दाला, जलङ्कः, काकमर्दकः. *See* Colocynth.

Colorate, *a.* रागी -गिणी -गि (न्), सरागः -गा -गं, रङ्गी -ङ्गिनी -ङ्गि (न्).

Coloration, *s.* रञ्जनं, वर्णनं.—(The state) रागः.

Colorific, *a.* रङ्गी -ङ्गिनी -ङ्गि (न्), रागदः -दा -दं, वर्णदः -दा -दं.

Colossal or colossean, *a.* वृहत्कायः -या -यं, वृहच्छरीरः -रा -रं, अतिमानुषाकारः -रा -रं, भीमविग्रहः -हा -हं, दानवाकारः -रा -रं, असम्भवमूर्त्तिः -र्त्तिः -र्त्ति.

Colossus, *s.* वृहत्प्रतिमा -प्रतिमानं, वृहत्प्रतिच्छन्दकं, वृहत्सूर्म्मी, अतिमानुषपरिमाणा मूर्त्तिः.

Colour, *s.* (Hue, dye, tint) रागः, रङ्गः, वर्णः; 'of one colour,' एकवर्णः -र्णा -र्णं; 'of the same colour,' सवर्णः -र्णा -र्णं, समवर्णः -र्णा -र्णं; 'of various colours,' नानावर्णः -र्णा -र्णं; 'of lasting colour,' स्थिररङ्गः -ङ्गा -ङ्गं; 'to change colour,' विवर्णीभू; 'that has lost its colour,' वीतरागः -गा -गं.—(Paint) रङ्गः, वर्णकः -का, लेपः; 'a picture in colours,' चित्रलेखा, चित्रलिखितं, चित्रं.—(Complexion, colour in the cheek) कपोलरागः; 'of a ruddy colour,' अरुणवदनः -ना -नं, लोहिताननः -नी -नं; 'without colour,' विवर्णवदनः -ना -नं.—(Colours of a regiment) पताका, ध्वजः, वैजयन्ती.—(Pretext) अपदेशः, व्यपदेशः, छद्म *n.* (न्); 'under colour of a vow,' व्रतव्यपदेशेन.

To colour, *v. a.* रञ्ज् in caus. (रञ्जयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), चित्र् (c. 10. चित्रयति -यितुं), सरागं -गां -गं कृ.—(Excuse, palliate) व्यपदिश् (c. 6. -दिशति -देष्टुं), अपदिश्, शम् in caus. (शमयति -यितुं), छद् (c. 10. छादयति -यितुं).—(Make plausible) सत्यसङ्काशं -शां -शं कृ, सुदृश्यं -श्यां -श्यं कृ.

To colour, *v. n.* (Take a colour) रञ्ज् in pass. (रज्यते), संरञ्ज्.—(Blush) सलज्जत्वाद् रक्तवदनः -नी -नं भू, लज्ज् (c. 1. लज्जते -ज्जितुं), व्रीड् (c. 4. व्रीड्यति, व्रीडितुं).

Colourable, *a.* सत्यसङ्काशः -शा -शं, सुदृश्यः -श्या -श्यं, सम्भावनीयः -या -यं.

Colourably, *adv.* सत्यसङ्काशं, सत्यसन्निभं, सत्यसदृशं, सुदृश्यतया.

Coloured, *p. p.* रञ्जितः -ता -तं, रक्तः -क्ता -क्तं, रागी -गिणी -गि (न्), सरागः -गा -गं, रागान्वितः -ता -तं, वर्णितः -ता -तं, वर्णगतः -ता -तं; 'many-coloured,' नानावर्णः -र्णा -र्णं.

Colouring, *s.* वर्णनं, रञ्जनं, चित्रकरणं.—(The art of colouring or painting) चित्रविद्या, चित्रकर्म्म *n.* (न्), आलेख्यकरणं.—(Rhetorical ornament) अलङ्कारः, वर्णनं.

Colourist, *s.* रञ्जकः, रङ्गाजीवः, चित्रकरः, वर्णी *m.* (न्), वर्णोचारकः, तौलिकः.

Colourless, *a.* अवर्णः -र्णा -र्णं, विवर्णः -र्णा -र्णं, वर्णहीनः -ना -नं, नीरक्तः -क्ता -क्तं, वीतरागः -गा -गं, रागहीनः -ना -नं.

Colt, *s.* किशोरः, अश्वशावः -वकः, बालः, अश्वतरीषः, पोटकवत्सः.—(A young foolish fellow) किशोरः, चपलः, प्रमादी *m.* (न्).

Coltsfoot, *s.* कासनाशिनी, कासघ्नी, कासमर्दः.

Colt's-tooth, *s.* किशोरदन्तः, अश्वशावकदन्तः.

Colter, *s.* लाङ्गलदन्तः, हलदन्तः, फालः, कृन्तत्रं, हलकीलः.

Coltish, *a.* चपलः -ला -लं, प्रकृतितरलः -ला -लं, चञ्चलः -ला -लं.

Columbary, *s.* (Dove-cot) कपोतपालिका, कपोतागारं, विटङ्कः.

Columbine, *s.* (A plant) वनीयौषधिभेदः.—(Female character in a pantomime) रङ्गावतारिणी.

Column, *s.* (A pillar) स्तम्भः, स्थूणा, यूपः -पं, यष्टिः *f.*—(An array of troops in column) भोगव्यूहः, सूचिव्यूहः.—(Half a page) अर्द्धपृष्ठं, अर्द्धपत्रं, अर्द्धफलकः.

Columnar, *a.* स्तम्भाकारः -रा -रं, स्तम्भाकृतिः -तिः -ति.

Coma, *s.* अतिशयनिद्रालक्षितो रोगविशेषः.

Comate, *s.* सहायः, सङ्गी *m.* (न्), सहवासी *m.*(न्), सहचरी *m.* (न्).

Comatose, *s.* अतिशयनिद्राग्रस्तः -स्ता -स्तं, अतिनिद्रातुरः -रा -रं.

Comb, *s.* कङ्कतः -ती -तं -तिका, केशमार्जकः -र्जनं -र्जनी, प्रसाधनी -नं, मार्जनी, दन्ती *m.* (न्).—(Crest of a cock) कुक्कुटचूडा, कुक्कुटशिखा.—(A valley) दरी, कन्दरी.—(Instrument for carding wool) ऊर्णामार्जनी.—(Honey-comb) मधुकोषः, करण्डः.

To comb, *v. a.* केशान् मृज् (c. 2. मार्ष्टि, मार्ष्टुं) or सम्मृज् or विजटीकृ or निर्घृष् (c. 1. -घर्षति -र्षितुं), वितूस्त (nom. वितूस्तयति -यितुं).

Comb-maker, *s.* केशमार्जनकारः, कङ्कतकृत्, कङ्कतिकाविक्रयी *m.* (न्).

To combat, *v. n.* युध् (c. 4. युध्यते, योद्धुं), विग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सङ्ग्राम् (c. 10. सङ्ग्रामयति -यितुं), सङ्ग्रामं कृ.

To combat, *v. a.* (Oppose in fight) प्रतियुध् (c. 4. -युध्यते -योद्धुं or in caus. -योधयति -यितुं) with acc., प्रतिरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(In argument) विवद् (c. 1. -वदते -दितुं) with instr.; 'to combat one's passions,' इन्द्रियाणि निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं).

Combat, *s.* युद्धं, युत् *f.* (ध्), रणः -णं, सङ्ग्रामः, समरः -रं, विग्रहः, कलहः, संयुगः, संख्यं, आहवः, आयोधनं, सङ्करः, समाघातः, सम्परायः, जन्यं, मृधं, सम्प्रहारः, अभिसम्पातः, अभ्यागमः; 'hand to hand, combat,' बाहुयुद्धं; 'single combat,' द्वन्द्वयुद्धं; 'mingled combat,' तुमुलं, रणसङ्कुलं.

Combatant, *s.* योद्धा *m.* (ह्), योधः, युध्वा *m.* (न्), युयुत्सुः *m.*, प्रयुयुत्सुः, युधानः, प्रहर्त्ता *m.* (र्त्तृ).—(Duellist) द्वन्द्वयुद्धकृत्.—(Warrior) वीरः, सुभटः, भटः.

Comber, *s.* ऊर्णामार्जकः, ऊर्णासम्मार्जनकृत्, ऊर्णानिर्घर्षणकः.

Combinable, *a.* सन्धेयः -या -यं, सम्भाव्यः -व्या -व्यं, अविरुद्धः -द्धा -द्धं.

Combination, *s.* योगः, संयोगः, सन्धिः *m.*, सन्धानं, संसर्गः, संश्लेषः, श्लेषः, सङ्गः -ङ्गमः, साहित्यं, संहतिः *f.*, सङ्घातः, संहतत्वं, सहायता, साहाय्यं, साद्यं, मेलकः, सम्भूतिः *f.*, संव्यूहः, समासक्तिः *f.*, आसक्तिः *f.*, समासज्जनं, प्रसक्तिः.—(Commixture) सम्मिश्रणं, प्रक्षेपः; 'combination of letters,' सन्धिः *m.*—(Joint execution of work) सम्भूयकारित्वं, सम्भूयसमुत्थानं; 'in combination with his brethren,' भ्रातृसङ्घातवान् *m.* (त्).

To combine, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं or caus. -योजयति -यितुं), सन्धा (c. 3. -दधाति -धातुं), उपसन्धा, संहन् (c. 2. -हन्ति -हन्तुं), संश्लिष् in caus. (-श्लेषयति -यितुं), सङ्गम् in caus. (गमयति -यितुं), सम्मिश्र्

(c. 10. -मिश्रयति -यितुं), संलग्नीकृ, एकीकृ, एकत्र कृ.

To COMBINE, *v. n.* संयुज् in pass. (-युज्यते), सन्धा in pass. (-धीयते), संश्लिष् in pass. (-श्लिष्यते), सम्मिल् (c. 6. -मिलति -मेलितुं), संसृज् in pass. (-सृज्यते), सम्भू (c. 1. -भवति -वितुं), सङ्गम् (c. 1. -गच्छति -गन्तुं), संहन् in pass. (-हन्यते), संसञ्ज् in pass. (-सज्यते or -सज्जते), सम्मिश्रीभू, एकीभू, एकत्र मिल्.

COMBINED, *p. p.* संयुक्तः -क्ता -क्तं, संयोजितः -ता -तं, समायुक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, संहतः -ता -तं, सङ्घातवान् -वती -वत् (त्), सन्धितः -ता -तं, संहितः -ता -तं, रून्धानितः -ता -तं, सहितः -ता -तं, सहगतः -ता -तं, संसृष्टः -ष्टा -ष्टं, कृतसंसर्गः -र्गा -र्गं, सम्मिश्रः -श्रा -श्रं, मिश्रितः -ता -तं, सम्पृक्तः -क्ता -क्तं, मिलितः -ता -तं, संसक्तः -क्ता -क्तं, समासक्तः -क्ता -क्तं, समस्तः -स्ता -स्तं; 'having combined,' सम्भूय, मिलित्वा.

COMBLESS, *a.* चूडाहीनः -ना -नं, शिखाहीनः -ना -नं, चूडारहितः -ता -तं.

COMBUST, *a.* सूर्य्यस्य समीपवर्त्तिनी तारा.

COMBUSTIBLE, *a.* दहनीयः -या -यं, दाह्यः -ह्या -ह्यं, ज्वलनीयः -या -यं, दीपनीयः -या -यं, दीप्यः -प्या -प्यं, ज्वलनशीलः -ला -लं, ज्वलनार्हः -र्हा -र्हं.

COMBUSTIBLE, *s.* (A combustible) अग्निवल्लभः, शीघ्रं ज्वलनीयं किञ्चिद्वस्तु.

COMBUSTIBLENESS, *s.* दहनीयता, दाह्यत्वं, ज्वलनशीलत्वं.

COMBUSTION, *s.* (Burning) दाहः -हनं, ज्वलनं, दीपनं, तापः, ओघः, प्रोषः, प्रोषः.—(Tumult) तुमुलं, व्यस्तता, विप्लवः, वैक्लव्यं, कोलाहलः, आहवः.

To COME, *v. n.* आगम् (c. 1. -गच्छति -गन्तुं), अभ्यागम्, उपागम्, समुपागम्, अभिगम्, उपगम्; आया (c. 2. -याति -यातुं), समाया, उपाया, अभिया; उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था; इ (*i.e.* आ with rt. इ, c. 2. ऐति, एतुं), आव्रज् (c. 1. -व्रजति -व्रजितुं), अभिपद् (c. 4. -पद्यते -पत्तुं), अभ्भू (c. 1. -भवति -भवितुं), उपक्रम् (c. 1. -क्रामति -क्रमितुं), अभिवृत् (c. 1. -वर्त्तते -र्त्तितुं), अभ्यावृत्; 'whence have you come,' कुतः समागतोऽसि.—(Come to, arrive at) प्राप् (c. 5. -आप्नोति -आप्तुं).—(Come and go) गमनागमनं कृ, गतागतं कृ, यातायातं कृ.—(Come about, come to pass) सम्पद्, संवृत्, सम्भू, उपस्था, निपत् (c. 1. -पतति -पितुं), आपत्.—(Come after) पश्चाद् आया, अन्वागम्, अन्वास्था.—(Come away) अपगम्, व्यपगम्, अपया, व्यपया.—(Come again) पुनर् आगम्, प्रत्यागम्, प्रत्यावृत्.—(Come behind) पृष्ठतः or पृष्ठेन आगम्.—(Come between) अन्तरागम्, अन्तर्वृत्, अन्तःस्था.—(Come back) प्रत्यागम्, प्रत्याया.—(Come down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं).—(Come forth, come out) बहिर् आगम्, निर्गम्, निःसृ (c. 1. -सरति -सर्त्तुं). *See To* APPEAR.—(Come forward) अग्रतः स्था, सम्प्रस्था; 'in learning,' विद्यागमं कृ. *See To* ADVANCE.—(Come hither) अत्र आगम्.—(Come in). *See To* ENTER, ARRIVE, COMPLY.—(Come into) प्रविश् (c. 6. -विशति -वेष्टुं); 'be involved,' सम्बन्ध् in pass. (-बध्यते); 'come into trouble,' विपद्ग्रस्तः -स्ता -स्तं भू.—(Come near). *See To* APPROACH.—(Come out). *See To* APPEAR.—(Come to). *See To* AMOUNT, COST; 'that will come to a large sum of money,' तद् बहुधनव्ययसाध्यं.—(Come to one's self) संज्ञां or चेतनां लभ् (c. 1. लभते, लब्धुं) or प्राप् (c. 5. -आप्नोति, आप्तुं), स्वप्रकृतिम् आपद्.—(Come to an end) निवृत्, विनिवृत्. *See To* END.—(Come to life) उज्जीव् (c. 1. -जीवति -वितुं).—(Come to an agreement) संविदम् उपगम्.—(Come short) न्यूनीभू.—(Come together) समागम्, समे.—(Come upon) आक्रम्.

To COME, *adv.* (The time to come) भविष्यत्कालः, भविष्यत् *n.*, आगामिकालः, उत्तरकालः; 'generations to come,' पुत्रपौत्राः *m. pl.*

COME, *interj.* आगच्छ, एहि, आयाहि, यातु.—(Be quick) त्वरतां.—(Come up, said to horses) वहत वहत.

COME, *p. p.* आगतः -ता -तं, आयातः -ता -तं, उपस्थितः -ता -तं.—(Come to pass) सम्भूतः -ता -तं, समापन्नः -न्ना -न्नं, जातः -ता -तं, वृत्तः -त्ता -त्तं, संवृत्तः -त्ता -त्तं, उपावृत्तः -त्ता -त्तं.—(Come back) प्रत्यागतः -ता -तं.

COMEDIAN, *s.* (A comic actor) वैहासिकः.—(Stage-player) नटः, नाटकः, कुशीलवः, चारणः, रङ्गाजीवः, रङ्गावतारी *m.* (न्), अभिनेता *m.* (तृ), शैलालौ *m.* (न्), नर्त्तकः.

COMEDY, *s.* नाटकः, नाटिका, भाणिका, प्रहसनं, दुर्मल्लिका.

COMELINESS, *s.* सुदृश्यता, सौन्दर्य्यं, सुन्दरत्वं, लावण्यं, सुरूपता, रूपं.

COMELY, *a.* सुदृश्यः -श्या -श्यं, सुन्दरः -रा -री -रं, चारुः -रुी -रु, रूपवान् -वती -वत् (त्), सुरूपः -पी -पं, अभिरूपः -पी -पं, सौम्यः -म्या -म्यं, अभिरामः -मा -मं.

COMER, *s.* आगन्ता *m.* (तृ), आगामी *m.* (न्), आयायी *m.* (न्); 'a new-comer,' आगन्तुः *m.* -न्तुकः, अभ्यागतः, आवेशिकः.

COMET, *s.* केतुतारा, धूमकेतुः *m.*, केतुः *m.*, अग्न्युत्पातः, शिखावज् ज्योतिः *n.* (स्), उत्पातः, उपग्रहः, उल्का.

COMETARY, *a.* धूमकेतुसम्बन्धी -न्धिनी -न्धि (न्), औत्पातिकः -की -कं.

To COMFIT, *v. a.* मोदकं कृ, मिष्टीकृ, मधुशर्करादिना उपस्कृ.

COMFIT or COMFITURES, *s. pl.* मोदकं -कः, मिष्टं, मिष्टान्नं, खण्डमोदकः, मधुमस्तकं, गुडकः, लड्डुकं, उपस्करः.

To COMFORT, *v. a.* आश्वस् in caus. (-श्वासयति -यितुं), सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, उपसान्त्व्, परिशान्त्व्, सन्तुष् in caus. (-तोषयति -यितुं), आप्यै in caus. (-प्याययति -यितुं).—(Gladden) नन्द् in caus. (नन्दयति -यितुं), हृष् in caus. (हर्षयति -यितुं).

COMFORT, *s.* (Ease) सुखं, सन्तोषः, सुस्थता, सौख्यं, सम्पत्तिः *f.*—(Consolation) आश्वासनं, सान्त्वनं -ना, शान्त्वं, उपशान्तिः *f.*, सन्तोषणं, शोकापनोदः, विनोदः, प्रबोधः.—(Of mind) मनःसन्तोषः.

COMFORTABLE, *a.* सुखमयः -यी -यं, सुखदः -दा -दं, स्वस्थः -स्था -स्थं, सुस्थः -स्था -स्थं, सन्तोषकः -का -कं, स्वास्थ्यजनकः -का -कं.—(Consolatory) आश्वासकः -सिका -कं, शान्तिदः -दा -दं, क्लेशापहः -हा -हं, शोकापहारकः -का -कं.

COMFORTABLENESS, *s.* स्वास्थ्यं, सुस्थता, सौख्यं, हृष्टपुष्टता.

COMFORTABLY, *adv.* सुखेन, सुखं, यथासुखं, मनःसन्तोषेण, अनायासेन, सानन्दं.

COMFORTED, *p. p.* आश्वासितः -ता -तं, सन्तोषितः -ता -तं, आप्यायितः -ता -तं, सन्तुष्टमनाः -नाः -नः (स्), गतोद्वेगः -गा -गं, प्रबोधितः -ता -तं, आनन्दितः -ता -तं.

COMFORTER, *s.* आश्वासकः, सन्तोषदः, सान्त्ववादः, शोकापनुदः, आश्वासशीलः, शोकापहर्त्ता *m.* (र्त्तृ), प्रबोधयिता *m.* (तृ).

COMFORTLESS, *a.* निरानन्दः -न्दा -न्दं, सन्तोषहीनः -ना -नं, अनाश्वासनीयः -या -यं.

COMIC or COMICAL, *a.* हासकरः -री -रं, हास्यः -स्या -स्यं, उपहास्यः -स्या -स्यं, हास्योत्पादकः -का -कं, कौतुकी -किनी -कि (न्).—(Odd, uncouth) अपरूपः -पा -पं, असङ्गतः -ता -तं.—(Relating to a comedy) प्रहसननाटकसम्बन्धी -न्धिनी -न्धि (न्).

COMICALLY, *adv.* यथा हास उत्पाद्यते तथा, हास्यप्रकारेण, असङ्गतं.

COMICALNESS, *s.* हास्यत्वं, उपहास्यता, कौतुकं, अपरूपता.

COMING, *s.* आगमः -मनं, अभिगमः -मनं, उपगमः, उपस्थितिः *f.*, उपस्थानं, उपसत्तता; 'coming and going,' गतागतं, गमनागमनं; 'coming on of night,' रात्रियोगः.

COMING, *a.* (Ready) उद्यतः -ता -तं, सुप्रस्तुतः -ता -तं.—(Future, to

come) आगामी -मिनी -मि (न्), अनागतः -ता -तं, भावी -विनी -वि (न्), भविष्यन् -ष्यन्ती -ष्यत् (त्), उत्तरकालीनः -ना -नं.

COMING-IN, *s.* (Income) आयः, आगमः, धनागमः.—(Submission) परवशगमनं.

COMITY, *s.* अनुनयः, अनुकूलता, प्रश्रयः, अनुरोधः, सौजन्यं.

COMMA, *s.* पदविच्छेदचिह्नं, पदावच्छेदचिह्नं, वाक्यविच्छेदचिह्नं.

To COMMAND, *v. a.* (Give orders, enjoin) आज्ञा in caus. (-ज्ञापयति -यितुं), समाज्ञा, आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, सन्दिश्, व्यादिश्, प्रतिसन्दिश्, चुद् (c. 10. चोदयति -यितुं), अभिचुद्, प्रकॢप् (c. 10. -कल्पयति -यितुं).—(Govern, hold in subjection) शास् (c. 2. शास्ति, शासितुं), ईश् (c. 2. ईष्टे, ईशितुं), वशीकृ, अभिभू, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं); 'to command one's passions,' इन्द्रियाणि संयम् (c. 1. -यच्छति -यन्तुं).—(Have authority over any thing) अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Overlook) अवलोक् (c. 10. -लोकयति -यितुं), निरीक्ष् (c. 1. -ईक्षते -क्षितुं).

COMMAND, *s.* (Order) आज्ञा, आदेशः, आज्ञप्तिः, निदेशः, निर्देशः, नियोगः, शासनं, शास्तिः *f.*, शिष्टिः *f.*, चोदनं, वचनं, प्रयुक्तिः *f.*, नियमः, प्रेरणं -णा, मतं, अववादः; 'obedient to commands,' आज्ञाकरः -री -रं; 'word of command,' निदेशः.—(Authority, power, right of commanding) अधिकारः, अधिकारित्वं, प्रभावः, प्रभुत्वं, आधिपत्यं, अध्यक्षता, अधिष्ठातृत्वं.—(Subjection) वशं, अधीनता.—(Command of an army) सैनापत्यं; 'under one's command,' वशीकृतः -ता -तं, वशीभूतः -ता -तं, वशङ्गतः -ता -तं, स्वाधीनः -ना -नं; 'to bring any thing under one's command,' आत्मवशं नेतुं; 'self-command,' आत्मसंयमः, अन्तर्यमनं. Particles of command, परं, परमं.

COMMANDANT, *s.* अधिकारी *m.* (न्), अधिकृतः, अधिष्ठाता *m.* (तृ), अध्यक्षः.

COMMANDED, *p. p.* आज्ञापितः -ता -तं, आज्ञप्तः -प्ता -प्तं, आज्ञातः -ता -तं, आदिष्टः -ष्टा -ष्टं, समादिष्टः -ष्टा -ष्टं, दत्ताज्ञः -ज्ञा -ज्ञं, चोदितः -ता -तं, प्रचोदितः -ता -तं, प्रेरितः -ता -तं, विहितः -ता -तं.

COMMANDER, *s.* (One who orders) आज्ञापकः, आदेशी *m.* (न्), आदेष्टा *m.* (ष्टृ)—(Chief) अधिपतिः *m.*, पतिः *m.*, अधिष्ठाता *m.* (तृ), अधिकारी *m.* (न्), अधिकृतः, अध्यक्षः.—(Of an army) सेनानीः, सेनापतिः, सेनाग्रगः, सेनाध्यक्षः, योधमुख्यः.

COMMANDMENT, *s.* आज्ञा, आदेशः, विधिः *m.*, सूत्रं.—(Of God) ईश्वराज्ञा.

COMMANDRESS, *s.* अधिकारिणी, अधिष्ठात्री, आधिपत्यकारिणी.

COMMATERIAL, *a.* एकमूर्त्तिः -र्त्तिः -र्त्ति, एकवस्तुः -स्तुः -स्तु, एकभावः -वा -वं.

To COMMEMORATE, *v. a.* किञ्चित्स्मरणीयकर्म्मोद्दिश्य उत्सवं कृ or सेव् (c. 1. सेवते -वितुं) or आचर् (c. 1. -चरति -रितुं) or समाचर्, किञ्चित्कर्म्मस्मरणार्थं पर्व्व पालय् (c. 10. पालयति -यितुं), or विधिवत् कृ.—(Cause to remember) स्मृ in caus. (स्मारयति -यितुं).—(Celebrate in words) अनुवर्ण् (c. 10. -वर्णयति -यितुं), संवर्ण्, कृत् (c. 10. कीर्त्तयति -यितुं).

COMMEMORATED, *p. p.* स्मारितः -ता -तं, पालितः -ता -तं, अभ्युदितः -ता -तं.

COMMEMORATION, *s.* (Causing to remember) स्मारणं.—(Of a festival) किञ्चित्स्मरणीयकर्म्मोद्दिश्य उत्सवकरणं, उत्सवपालनं, उत्सवसेवनं, उत्सवाचरणं, अभ्युदयपालनं; 'in commemoration of,' उद्दिश्य, समुद्दिश्य.

COMMEMORATIVE, *a.* स्मारणः -णा -णं, स्मरणकृत्, उद्देशकः -का -कं.

To COMMENCE, *v. a.* and *n.* आरभ् (c. 1. -रभते -रब्धुं), समारभ्, अभ्यारभ्, प्रारभ्; प्रक्रम् (c. 1. -क्रमते -क्रमितुं), उपक्रम्, समुपक्रम्; प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं); प्रस्तु (c. 2. -स्तौति -स्तुते -स्तोतुं); प्रकृ, सम्प्रकृ.—(Set about) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) व्यवसो (c. 4. -स्यति -सातुं); 'she commenced weeping,' रोदितुं प्रवृत्ता.

COMMENCED, *p. p.* आरब्धः -ब्धा -ब्धं, प्रारब्धः -ब्धा -ब्धं, समारब्धः -ब्धा -ब्धं, प्रक्रान्तः -न्ता -न्तं, उपक्रान्तः -न्ता -न्तं, प्रवृत्तः -त्ता -त्तं, प्रस्तुतः -ता -तं, अनुष्ठितः -ता -तं.

COMMENCEMENT, *s.* आरम्भः, प्रारम्भः, समारम्भः, प्रारब्धिः *f.*, उपक्रमः, प्रक्रमः, अभ्यादानं, समुद्यमः, आदरः, आमुखं.—(Prelude) प्रस्तावना, प्रकरणं.—(Setting about) अनुष्ठानं; 'from the commencement,' आदितस्.

COMMENCER, *s.* प्रक्रान्ता *m.* (न्तृ), उपक्रन्ता *m.* (न्तृ), आरम्भकः, आरब्धा *m.* (ब्धृ).

To COMMEND, *v. a.* प्रशंस् (c. 1. -शंसति -सितुं), स्तु (c. 2. स्तौति, स्तोतुं), अभिष्टु, संस्तु, श्लाघ् (c. 1. श्लाघते -घितुं, or in caus. श्लाघयति -यितुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुरागं कृ, रुच् in caus. (रोचयति -यितुं), अनुरुच्.—(Entrust) समृ in caus. (-अर्पयति -यितुं).—(Set off) प्रकाश् in caus. (-काशयति -यितुं).

COMMENDABLE, *a.* प्रशंसनीयः -या -यं, प्रशस्यः -स्या -स्यं, श्लाघ्यः -घ्या -घ्यं, स्तुत्यः -त्या -त्यं, वन्द्यः -न्द्या -न्द्यं, ईड्यः -ड्या -ड्यं, विकत्थनीयः -या -यं, कीर्त्तनीयः -या -यं.

COMMENDABLY, *adv.* प्रशस्तं, प्रशस्यं, प्रशंसनीयप्रकारेण, श्लाघ्यवत्.

COMMENDATION, *s.* प्रशंसा -सनं, श्लाघा, गुणश्लाघा, स्तुतिः *f.*, गुणस्तुतिः, स्तुतिवादः, ईडा.

COMMENDATORY, *a.* प्रशंसाकरः -री -रं, स्तुतिमयः -यी -यं, गुणप्रकाशकः -का -कं.

COMMENDED, *p. p.* प्रशंसितः -ता -तं, प्रशस्तः -स्ता -स्तं, श्लाघितः -ता -तं.

COMMENDER, *s.* प्रशंसकः, प्रशंसाकृत्, स्तावकः, स्तोता *m.* (तृ).

COMMENSALITY, *s.* सहभोजित्वं, गणान्नभोजित्वं.

COMMENSURABLE or COMMENSURATE, *a.* (Reducible to a common measure) सापवर्त्तः -र्त्ता -र्त्तं.—(Proportionate) अनुसारी -रिणी -रि (न्), अनुरूपः -पा -पं, अनुगुणः -णा -णं, सदृशः -शी -शं, समः -मा -मं; 'commensurable with one's strength,' आत्मशक्तिसमः -मा -मं.

COMMENSURABLENESS, *s.* अनुरूपता, अनुसारित्वं, सादृश्यं, समता.

COMMENSURABLY or COMMENSURATELY, *adv.* अनुरूपं -पेण, अनुसारेण -सारतस्.

To COMMENSURATE, *v. a.* (Reduce to a common measure) अपवृत् in caus. (-वर्त्तयति -यितुं).—(Make proportionable) अनुरूपं -पां -पं कृ, अनुगुणं -णां -णं कृ.

To COMMENT, *v. n.* (Expound) टीकां लिख् (c. 6. लिखति, लेखितुं), टीकाद्वारेण व्याख्या (c. 2. -ख्याति -ख्यातुं) or व्याकृ or व्याचक्ष् (c. 2. -चष्टे) or व्याहृ (c. 1. -हरति -हर्त्तुं) or प्रकाश् (c. 10. -काशयति -यितुं) or स्पष्टीकृ.—(Make remarks) प्रवद् (c. 1. -वदति -दितुं), चर्चां कृ, निरूप् (c. 10. -रूपयति -यितुं), अनुयुज् (c. 7. -युनक्ति -योक्तुं).

COMMENT or COMMENTARY, *s.* (Exposition, annotation) टीका, भास्यं, भाष्यं, टिप्पनी, व्याख्या, व्याकरणं, निबन्धः, वार्त्तिकं, सूत्रव्याख्या; 'having a commentary,' सटीकः -का -कं.—(Remarks, observations) प्रवादः, चर्चा, निरूपणं, अनुयोगः.

COMMENTATOR or COMMENTER, *s.* टीकालेखकः, भाष्यकृत्, भास्यकरः, निबन्धा *m.* (न्धृ), प्रवक्ता *m.* (क्तृ), प्रकाशकः, व्याख्याता *m.* (तृ), वाचकः, चूर्णिकृत् *m.*

COMMENTED, *p. p.* व्याकृतः -ता -तं, व्याख्यातः -ता -तं, निरूपितः -ता -तं.

COMMENTITIOUS, *a.* कल्पितः -ता -तं, काल्पनिकः -की -कं, कृत्रिमः -मा -मं.

COMMERCE, *s.* (Traffic) वाणिज्यं -ज्या, वणिक्पथं, वणिग्भावः, क्रयविक्रयः, सत्यानृतं, निगमः, पणाया, पाणः, महाजनकर्म्म *n.* (न्).—(Inter-

course of society) लोकव्यवहारः, लोकसंसर्गः, लोकयात्रा, गमनागमनं, आनुगत्यं; 'of sexes,' मिथुनीभावः, स्त्रीपुरुषसङ्गः.

To COMMERCE, *v. n.* वाणिज्यं कृ, पण् (c. 1. पणायति -यितुं), उपक्रीय विक्री (c. 9. -क्रीणाति -क्रेतुं).

COMMERCIAL, *a.* वाणिजः -जी -जं -जिकः -की -कं, वाणिज्यसम्बन्धी -न्धिनी -न्धि (न्), महाजनसम्बन्धी &c.

To COMMIGRATE, *v. n.* बहुजनैः सह देशं त्यक्त्वा देशान्तरं गम् (c. 1. गच्छति, गन्तुं).

COMMIGRATION, *s.* बहुजनैर् देशं त्यक्त्वा देशान्तरगमनं, सहोत्क्रमणं.

COMMINATION, *s.* (Curse, threat) शापः, अभिशापः, अवक्रोशः, भर्त्सनं, तर्जनं.—(Recital of God's threatenings on stated days) निरूपितदिवसे परमेश्वरशापख्यापनं.

COMMINATORY, *a.* शापकः -का -कं, आभिशापिकः -की -कं, सशापः -पा -पं, आक्रोशकः -की -कं, सभर्त्सनः -ना -नं, सतर्जनः -ना -नं.

To COMMINGLE, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, विमिश्र्, मिश्रीकृ; सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), संयुज् (c. 7. -युनक्ति -योक्तुं), एकीकृ, एकत्र कृ.

COMMINGLED, *p. p.* सम्मिश्रः -श्रा -श्रं -श्रितः -ता -तं, संसृष्टः -ष्टा -ष्टं, कृतसंसर्गः -र्गा -र्गं, सम्पृक्तः -क्ता -क्तं, संश्लिष्टः -ष्टा -ष्टं, संयुक्तः -क्ता -क्तं, सन्निपतितः -ता -तं.

COMMINUIBLE, *a.* चूर्णनीयः -या -यं, मर्द्दनीयः -या -यं, खण्डनीयः -या -यं, चूर्णयितुं शक्यः -क्या -क्यं, छेद्यः -द्या -द्यं, पेषणीयः -या -यं.

To COMMINUTE, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, मृद् (c. 9. मृद्नाति, मर्द्दितुं), अवमृद्, विमृद्, प्रमृद्, अभिमृद् or in caus. (मर्दयति -यितुं), पिष् (c. 7. पिनष्टि, पेष्टुं), निष्पिष्, विनिष्पिष्, प्रतिपिष्, उत्पिष्, खण्ड् (c. 10. खण्डयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), खण्डशः कृ.

COMMINUTED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, सञ्चूर्णितः -ता -तं, खण्डितः -ता -तं, मर्द्दितः -ता -तं, पिष्टः -ष्टा -ष्टं, निष्पिष्टः -ष्टा -ष्टं.

COMMINUTION, *s.* चूर्णनं, सञ्चूर्णनं, चूर्णीकरणं, चूर्णता, पेषणं, मर्द्दनं, खण्डनं.

COMMISERABLE, *a.* अनुकम्प्यः -म्प्या -म्प्यं, दयार्हः -र्हा -र्हं, कृपार्हः -र्हा -र्हं.

To COMMISERATE, *v. a.* अनुकम्प् (c. 1. -कम्पते -म्पितुं) समनुकम्प्, दय् (c. 1. दयते -यितुं) with gen., करुण (nom. करुणायते), कृपा (nom. कृपायते), अनुकृपा; दयां कृ.

COMMISERATED, *p. p.* अनुकम्पितः -ता -तं, दयितः -ता -तं, कृतानुकम्पः -म्पा -म्पं.

COMMISERATION, *s.* कारुण्यं, करुणा: -णा, कृपा, दया, अनुकम्पा.

COMMISERATIVE, *a.* अनुकम्पकः -का -कं, दयाकरः -री -रं, दयालुः -लुः -लु, दयाशीलः -ला -लं, कृपामयः -यी -यं, करुणार्द्रः -र्द्रा -र्द्रं, करुणात्मकः -का -कं.

COMMISSARIAT, *s.* (The office) भोजनाधिकारः -रित्वं.—(The officers) भोजनाधिकृताः *m. pl.*

COMMISSARY, *s.* (A delegate) नियोगी *m.* (न्), नियुक्तः.—(Of provisions) भोजनाधिकारी *m.* (न्), सैन्यानां भोजनादिपरिकल्पकः.

COMMISSION, *s.* (Employment, charge, appointment) नियोगः, नियोजनं, नियुक्तिः *f.*, अधिकारः, प्रस्थापनं, प्रयोगः.—(Trust) निक्षेपः, न्यासः.—(A warrant, order) प्रत्ययपत्रं, आज्ञापत्रं, आदेशः, समादेशः, शासनं, शासनपत्रं, सङ्क्रामिताक्षरं.—(Employment) व्यापारः.—(Power of buying or selling for another) परस्य कृते क्रयशक्तिः or विक्रयशक्तिः *f.*—(Allowance made to the buyer or seller) शुल्कः -ल्कं.—(Act of committing or perpetrating) करणं, आचरणं, समाचरणं.—(Number of persons appointed to any office) कस्मिंश्चित् कार्य्ये नियुक्तो जनसमूहः.—(Commission in the army) सेनायाम् अधिकारः or पदं.

To COMMISSION, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं or caus. -योजयति -यितुं), विनियुज्, सन्नियुज्; प्रस्था in caus. (-स्थापयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्, अधिकृ, प्रकृ.

COMMISSIONED, *p. p.* नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, प्रस्थापितः -ता -तं, प्रहितः -ता -तं, अधिकृतः -ता -तं, अधिकारवान् -वती -वत् (त्).

COMMISSIONER, *s.* नियोगी *m.* (न्), नियुक्तः, अधिकारी *m.* (न्), अधिकारवान् *m.* (त्), राजकर्म्मनिर्व्वाहणे नियुक्तो जनः.

COMMISSURE, *s.* (Joint) सन्धिः *m.*, सन्धिस्थानं, सेवनं, ग्रन्थिः *m.*

To COMMIT, *v. a.* (Give in trust) ऋ in caus. (अर्पयति -यितुं), समृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, नियुज् (c. 7. -युनक्ति -योक्तुं or caus. -योजयति -यितुं), प्रतिपद् in caus. (-पादयति -यितुं), परिदा (c. 3. -ददाति -दातुं), समादिश् (c. 6. -दिशति -देष्टुं), प्रतिसन्दिश्, न्यासीकृ.—(Perpetrate) कृ, आचर् (c. 1. -चरति -रितुं), विधा (c. 3. -दधाति -धातुं).—(Imprison) कारागारे प्रविश् in caus. (-वेशयति -यितुं), आसिध् (c. 1. -सेधति -सेद्धुं).—(Expose to hazard) संशयस्थं -स्थां -स्थं कृ.—(Commit to writing) लेख्ये आरुह् in caus. (c. 1. -रोपयति -यितुं).—(To memory) अभ्यस् (c. 4. -अस्यति -असितुं), कण्ठस्थं -स्थां -स्थं कृ.

COMMITMENT, *s.* आसेधः, स्थानासेधः, कारागारप्रवेशनं, कारागृहप्रवेशः, निरोधनं, रोधः, प्रतिबन्धनं.

COMMITTED, *p. p.* अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, न्यासीकृतः -ता -तं, प्रतिपादितः -ता -तं.—(Perpetrated, done) कृतः -ता -तं.—(Imprisoned) कारागुप्तः -प्ता -प्तं, कारागारप्रवेशितः -ता -तं, आसिद्धः -द्धा -द्धं.—(Committed to writing) लेख्यारूढः -ढा -ढं, पत्रे निवेशितः -ता -तं.—(To memory) अभ्यस्तः -स्ता -स्तं.

COMMITTEE, *s.* कस्मिंश्चित् कार्य्ये नियुक्ताः जनाः *m. pl.*, कार्य्यसम्पादने नियुक्तो जनसमूहः, कर्म्मसम्पादिका सभा.

COMMITTER, *s.* कर्त्ता *m.* (र्त्तृ), कृत् or करः in comp., कारः, विधायी *m.* (न्).

To COMMIX, *v. a.* सम्मिश्र् (c. 10. -मिश्रयति -यितुं), मिश्रीकृ, सम्मिश्रीकृ, एकीकृ.

COMMIXTURE, *s.* सम्मिश्रणं, मिश्रणं, सम्पर्कः, सन्निपातः, संयोजनं, संयोगः, संसर्गः, प्रक्षेपः, अनुषङ्गः.

COMMODE, *s.* स्त्रीजनभृतं मस्तकाभरणं or मुकुटं or उष्णीषं.

COMMODIOUS, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, उपयोगी -गिनी -गि (न्), उचितः -ता -तं, समुचितः -ता -तं, यथायोग्यः -ग्या -ग्यं, क्षमः -मा -मं, हितः -ता -तं, सोपकारः -रा -रं, उपपन्नः -न्ना -न्नं.

COMMODIOUSLY, *adv.* योग्यं, उपयुक्तं, यथायोग्यं, यथोचितं, युक्तं.

COMMODIOUSNESS, *s.* योग्यत्वं, युक्तता, उपयोगिता, उपयोगः, सोपकारत्वं.

COMMODITY, *s.* (Ware, merchandise) पण्यं, पणः, पणसः, द्रव्यं, भाण्डं; 'price of a commodity,' पण्यमूल्यं.—(Profit, advantage) वृद्धिः *f.*, विवृद्धिः *f.*, अर्थः, लाभः, फलं, फलोदयः, प्राप्तिः *f.*, योगक्षेमः.

COMMODORE, *s.* युद्धनौकाधिपतिः, बृहन्नौकासमूहपतिः, जलयोधाध्यक्षः.

To DECEASE, *v. n.* मृ (c. 6. म्रियते, मर्त्तुं), प्रे (c. 2. एति -तुं, with प्र, प्रैति), देहं or जीवनं त्यज् (c. 1. त्यजति, त्यक्तुं) or उत्सृज् (c. 6. -सृजति -स्रष्टुं),

DECEASED, *p. p.* मृतः -ता -तं, प्रेतः -ता -तं, प्रेतीभूतः -ता -तं, अतीतः -ता -तं, व्यतीतः -ता -तं, संस्थितः -ता -तं, विपन्नः -न्ना -न्नं, प्रमीतः -ता -तं.

DECEIT, *s.* कपटः -टं, छलं -लना, वञ्चनं -ना, प्रवञ्चना, व्याजः. कैतवं, माया, कूटः -टं; कौटं, छद्म *n.* (न्), दम्भः, प्रलम्भः, विप्रलम्भः, अतिसन्धानं, अभिसन्धिः *m.* -न्धानं, प्रपञ्चः, प्रतारणं -णा, कुहकः, उपधिः *m.*, व्याकृतिः *f.*, दगडाजिनं, संश्रत् *n.*, संश्रत् *n.*, निमीलिका.

DECEITFUL, *a.* कपटी -टिनी -टि (न्), कापटिकः -की -कं, छली -लिनी -लि (न्), छलनापरः -रा -रं, वञ्चकः -का -कं, वञ्चनः -ना -नं, प्रवञ्चकः -का -कं, मायी -यिनी -यि (न्), मोही -हिनी -हि (न्), मायान्वितः -ता -तं, कौटिकः -की -कं, प्रतारकः -का -कं, छाद्मिकः -की -कं, दाम्भिकः

-की -कं, प्रलम्भकः -का -कं, विप्रलम्भकः -का -कं, कृतकपटः -टा -टं, सव्याजः -जा -जं, विवञ्चिषुः -षुः -षु, विजिह्मः -ह्मा -ह्मं, उपधिकः -का -कं, दाशाजिनिकः -की -कं, तकिलः -ला -लं, वञ्चनशीलः -ला -लं, शठः -ठा -ठं, भ्रान्तिजनकः -का -कं.

Deceitfully, *adv.* सकपटं, सव्याजं, सकैतवं, छलेन, समायं, मायया, प्रलम्भात्, विप्रलम्भेन, दम्भात्, वञ्चनार्थं, धूर्त्तवत्, कितववत्, सकूटं.

Deceitfulness, *s.* कपटता, कापट्यं, कूटता, वञ्चकत्वं, शठता, सव्याजता.

Deceivable, *a.* वञ्चनीयः -या -यं, प्रतारणीयः -या -यं, मोहनीयः -या -यं.

To deceive, *v. a.* वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्, प्रवञ्च्; प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्; छल् (c. 10. छलयति -यितुं), प्रतृ in caus. (-तारयति -यितुं), मुह् in caus. (मोहयति -यितुं), भ्रम् in caus. (भ्रमयति -यितुं), भ्रान्तिं जन् in caus. (जनयति -यितुं), प्रलुभ् in caus. (-लोभयति -यितुं), अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, विनिकृ, व्यच् (c. 6. विचति, व्यचितुं), दम्भ् (c. 5. दभ्नोति, दम्भितुं).

Deceived, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं, प्रपञ्चितः -ता -तं, मोहितः -ता -तं, विमोहितः -ता -तं, अतिसंहितः -ता -तं, प्रलोभितः -ता -तं, विलोभितः -ता तं.

Deceiver, *s.* वञ्चकः, प्रतारकः, प्रवञ्चकः, विप्रलम्भकः, कपटी *m.* (न्), मायी *m.* (न्), दम्भी *m.* (न्), दम्भकः, कितवः, कूटकारः, कुहकः, नारकीटः, दाम्भिकः.

December, *s.* आग्रहायणः -णिकः, अग्रहायणः, मार्गशीर्षं, मार्गशिरः, मार्गः -र्गकः, मृगः, सहाः *m.* (स्), शोभनमासः, पौषः, सहस्यः, तैषः, वत्सरस्य द्वादशमासः or शेषमासः.

Decempedal, *a.* दशपादपरिमाणः -णा -णं.

Decemvirate, *s.* वक्ष्यमाणदशजनानाम् अधिकारः or आधिपत्यं.

Decemviri, *s.* पूर्व्वकाले रोमीयदेशाधिष्ठातारो दशजनाः *m. pl.*, राज्यधुर्व्वहा दशशासितारः *m. pl.*

Decence, decency, *s.* विनयः, विनीतत्वं -ता, मर्य्यादा, लज्जा, अनतिक्रमः, इतिकर्त्तव्यता, युक्तिः *f.*, उपपत्तिः *f.*, सामञ्जस्यं, याथातथ्यं, उपयुक्तता, याथार्थ्यं, औचित्यं, शिष्टता, संस्था, स्थितिः *f.*, अभेषः, अभंशः, शालीनत्वं, शिष्टाचारानुसारः.

Decennial, *a.* दशवर्षीयः -या -यं, दशवर्षीणः -णा -णं, दशवत्सरी -रिणी -रि (न्), दशवार्षिकः -की -कं, दशाब्दिकः -की -कं, दशवर्षस्थायी -यिनी -यि (न्), दशवत्सरवर्त्ती -र्त्तिनी -र्त्ति (न्).

Decent, *a.* विनीतः -ता -तं, विनयवान् -वती -वत् (त्), विनयोपेतः -ता -तं, अनतिक्रान्तमर्य्यादः -दा -दं, इतिकर्त्तव्यः -व्या -व्यं, सविनयः -या -यं, समर्य्यादः -दा -दं, सलज्जः -ज्जा -ज्जं, लज्जान्वितः -ता -तं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, उचितः -ता -तं, समुचितः -ता -तं, सम्भाव्यः -व्या -व्यं, उपपन्नः -न्ना -न्नं, शिष्टाचारानुसारी -रिणी -रि (न्), शिष्टः -ष्टा -ष्टं.

Decently, *adv.* सविनयं, विनीतवत्, विनयतस्, विनयात्, समर्य्यादं, युक्तं, उपयुक्तं, यथोचितं, समुचितं, सलज्जं, शिष्टाचारानुसारात्, लज्जापूर्ब्बं.

Deceptible, *a.* वञ्चनीयः -या -यं, प्रतारणीयः -या -यं, प्रलभ्यः -भ्या -भ्यं.

Deception, *s.* वञ्चनं -ना, प्रवञ्चना, छलना, प्रतारणं -णा, प्रलम्भः, विप्रलम्भः, कपटः -टं, छलं, व्याजः, माया, छद्म *n.* (न्), दम्भः, कूटः -टं.

Deceptious, deceptive, *a.* मायी -यिनी -यि (न्), मोही -हिनी -हि (न्), वञ्चकः -का -कं, भ्रान्तिजनकः -का -कं, ऐन्द्रजालिकः -की -कं, धिष्णुः -ष्णुः -ष्णु. *See* Deceitful.

Decerpt, *a.* अवच्छिन्नः -न्ना -न्नं, अवकर्त्तितः -ता -तं, अवलूनः -ना -नं.

Decerptible, *a.* अवच्छेद्यः -द्या -द्यं, अवकर्त्तनीयः -या -यं, लाव्यः -व्या -व्यं.

Decerption, *s* अवच्छेदः -दनं, अवकर्त्तनं, अवचयः, अवलूनिः *f.*, लावः.

Decession, *s.* अपगमः, व्यपगमः, गमनं, अपासरणं, विगमः, अपायः.

To decharm, *v. a.* मन्त्रं or अभिचारं प्रतिकृ, विमन्त्र् (c.10. विमन्त्रयति -यितुं).

To decide, *v. a.* and *n.* निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -र्णयति -र्णेतुं), व्यवसो (c. 4. -स्यति -सातुं), व्यवस्था in caus. (-स्थापयति -यितुं), साध् in caus. (साधयति -यितुं), सिद्धीकृ, निष्पद् in caus. (-पादयति -यितुं), निष्पत्तिं कृ, निश्चयं कृ, निर्णयं कृ, तीर् (c. 10. तीरयति -यितुं), विचर् in caus. (-चारयति -यितुं).

Decided, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, सिद्धः -द्धा -द्धं, निष्पन्नः -न्ना -न्नं, व्यवसितः -ता -तं, नियतः -ता -तं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं, तीरितः -ता -तं, विचारितः -ता -तं.

Decidence, *s.* पतनशीलत्वं, पातः, अवपातः, निपातः, पतनं, विध्वंसः.

Decider, *s.* निर्णेता *m.* (तृ), निश्चायकः, निश्चयकारी *m.* (न्), निर्णयकृत्, विचारकर्त्ता *m.* (र्त्तृ), प्रमाणपुरुषः, मध्यस्थः, निष्पत्तिकारकः.

Deciduous, *a.* पतयालुः -लुः -लु, पातुकः -का -कं, पतनशीलः -ला -लं, क्षयी -यिणी -यि (न्), एकवर्षस्थायी -यिनी -यि (न्) or अचिरस्थायी or अस्थायी, विध्वंसी -सिनी -सि (न्); 'an annual plant,' ओषधिः *f.* -धी.

Decimal, *a.* दशकः -का -कं, दशगुणितः -ता -तं, दशसंख्यकः -का -कं.

To decimate, *v. a.* (Take the tenth) दशभागं or दशमभागं or दशमांशं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or हृ (c. 1. हरति, हर्त्तुं).—(Select by lot every tenth soldier for punishment) गुटिकापातपूर्ब्बं सर्ब्बसैन्यमध्याद् दशमं दशमं सैनिकं बधार्थम् उद्धृ (c. 1. -हरति -हर्त्तुं).

Decimation, *s.* दशमभागग्रहणं, दशमांशहरणं, यथोक्तं सर्ब्बसैन्यमध्याद् दशके दशके एकसैनिकोद्धारः.

To decipher, *v. a.* (Explain occult characters) गूढाक्षराणि or बीजाक्षराणि व्याख्या (c. 2. -ख्याति -तुं) or व्याकृ or व्याहृ (c. 1. -हरति -हर्त्तुं) or व्याचक्ष् (c. 2. -चष्टे) or प्रकाश् in caus. (-काशयति -यितुं) or स्पष्टीकृ or परिशुध् in caus. (-शोधयति -यितुं), स्पष्ट (nom. स्पष्टयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं).

Decipherer, *s.* व्याख्याता *m.* (तृ), स्पष्टीकर्त्ता *m.* (र्त्तृ), विवरणकृत्, निरूपकः.

Deciphering, *s.* व्याख्यानं, व्याकरणं, विवृतिः *f.*, स्पष्टीकरणं, निरूपणं.

Decision, *s.* निश्चयः, निर्णयः -यणं, निश्चितं, निष्पत्तिः *f.*, सिद्धिः *f.*, व्यवसायः, व्यवस्थितिः *f.*, व्यवस्थापनं, सम्प्रधारणा, तीरणं, तीरितं.

Decisive, decisory, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्णयनः -ना -नं, निष्पत्तिकारकः -का -कं, साधकः -का -कं, सिद्धीकरणः -णा -णं, प्रमाणीकारकः -का -कं, विचारकः -का -कं, निर्द्देशकः -का -कं, निष्पादकः -का -कं.

Decisively, *adv.* निश्चितं, सुनिश्चितं, सनिश्चयं, निर्णयपूर्ब्बं, सनिर्णयं.

Decisiveness, *s.* निश्चायकत्वं, निर्णायकत्वं, साधकत्वं, विचारकता, निष्पादकता.

To deck, *v. a.* (Cover) छद् (c. 10. छादयति -ते -यितुं), आछद्, आस्तृ (c. 9. -स्तृणाति -स्तरितुं -रीतुं); 'to deck a ship,' नौकां काष्ठफलकैर् आस्तृ.—(Adorn) भूष् (c. 1. भूषति -षितुं, c. 10. भूषयति -यितुं), विभूष्, परिभूष्; शुभ् in caus. (शोभयति -यितुं), अलङ्कृ, समलङ्कृ, परिष्कृ, मण्ड् (c. 10. मण्डयति -यितुं).

Deck, *s.* (Of a ship) नौकापृष्ठं, नौपृष्ठं, नौकास्तरणं, नौकातलं, नौतलं, नौफलकं.—(Pack of cards) द्यूतपत्रराशिः *m. f.*

Decked, *p. p.* भूषितः -ता -तं, अलङ्कृतः -ता -तं, शोभितः -ता -तं.

To declaim, *v. n.* विस्मयोत्पादनार्थं or इन्द्रियमोहकरणार्थम् अलङ्कारमयं वाक्यं वद् (c. 1. वदति -दितुं), रसिकवाक्यं or शब्दालङ्कारपूर्ब्बं वाक्यं ब्रू (c. 2. ब्रवीति, वक्तुं), वर्ण् (c. 10. वर्णयति -यितुं); 'to declaim

against,' सवाक्यालङ्कारम् अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

DECLAMATION, *s.* विस्मयोत्पादनार्थं वाक्यं, इन्द्रियमोहनार्थं वाक्यं, अलङ्कारमयं वाक्यं, रसिकवाक्यं, वर्णनवाक्यं, भारती, करुणावाक्यं, वक्तृत्वं, शब्दचातुर्य्यं, सुप्रलापः, सारस्वतवाक्यं.

DECLAMATOR, DECLAIMER, *s.* वक्ता *m.* (क्तृ), वाक्पटुः *m.*, वागीशः, वाग्विदग्धः, प्रवचनपटुः *m.*, वर्णनकृत्, वाक्यङ्कारेण विस्मयोत्पादकः or इन्द्रियमोहकः.

DECLAMATORY, *a.* वागलङ्कारमयः -यी -यं, वाङ्मयः -यी -यं.—(Appealing to the passions) विस्मयोत्पादकः -का -कं, इन्द्रियमोहकः -का -कं.

DECLARABLE, *a.* आख्येयः -या -यं, अभिधेयः -या -यं.—(Capable of proof) साध्यः -ध्या -ध्यं, सूच्यः -च्या -च्यं, प्रमेयः -या -यं.

DECLARATION, *s.* आख्यानं, ख्यापनं, निवेदनं, आवेदनं, ज्ञापनं, विज्ञापनं, विज्ञप्तिः *f.*, बोधनं, अभिधानं, अभिहितत्वं, प्रवचनं, वचनं, वादः, कथनं, कीर्त्तनं, अनुकीर्त्तनं, प्रकीर्त्तनं, प्रकाशनं, घोषणा, प्रतिज्ञा; 'repeated declaration,' वचनशतं; 'declaration of war,' प्रत्युत्क्रमः -मणं, प्रत्युत्क्रान्तिः *f.*

DECLARATIVE, DECLARATORY, *a.* ख्यापकः -का -कं, ज्ञापकः -का -कं, विज्ञापकः -का -कं, बोधकः -का -कं, आवेदकः -का -कं, निवेदकः -का -कं, वाचकः -का -कं, अभिधायिकः -का -कं, प्रकाशकः -का -कं, कथकः -का -कं.

DECLARATORILY, *adv.* प्रवचनपूर्व्वं, निवेदनपूर्व्वं, व्यक्तं, सुव्यक्तं.

To DECLARE, *v. a.* (Tell, make known) आख्या (c. 2. -ख्याति -तुं), समाख्या; ख्या in caus. (ख्यापयति -यितुं), ज्ञा in caus. (ज्ञापयति -यितुं), विज्ञा, विद् in caus. (वेदयति -यितुं), निविद्, आविद्, समाविद्, विनिविद्; कथ् (c. 10. कथयति -यितुं), वद् (c. 1. वदति -दितुं), प्रवच् (c. 2. -वक्ति -क्तुं), अभिधा (c. 3. -दधाति -धातुं), सूच् (c. 10. सूचयति -यितुं).—(Proclaim) प्रख्या in caus., कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, परिकृत्, अनुकृत्, घुष् in caus. (घोषयति -यितुं), विघुष्, आघुष्, उच्चर् in caus. (-चारयति -यितुं), प्रकाश् in caus. (-काशयति -यितुं), प्रकटीकृ, व्यक्तीकृ.

To DECLARE, *v. n.* निवेदनं कृ, मतं or अभिप्रायं or सङ्कल्पं ज्ञा in caus. (ज्ञापयति -यितुं), साक्ष्यं or प्रमाणं दा, स्वीकृ.

DECLARED, *p. p.* ख्यातः -ता -तं, आख्यातः -ता -तं, प्रोक्तः -क्ता -क्तं, उक्तः -क्ता -क्तं, आवेदितः -ता -तं, निवेदितः -ता -तं, कथितः -ता -तं, सूचितः -ता -तं, ज्ञापितः -ता -तं, विज्ञप्तः -प्ता -प्तं, अभिहितः -ता -तं, कीर्त्तितः -ता -तं, प्रकीर्त्तितः -ता -तं, परिकीर्त्तितः -ता -तं, विघुष्टः -ष्टा -ष्टं, आघोषितः -ता -तं, उच्चारितः -ता -तं, उदितः -ता -तं, प्रकाशितः -ता -तं, निरूपितः -ता -तं, व्यवस्थितः -ता -तं.

DECLENSION, *s.* (Falling off) भंशः, ध्वंसः, विध्वंसः, सादः, क्षयः, च्युतिः *f.*—(Inflexion of nouns) विभक्तिः *f.*, रूपं, रूपकरणं, शब्दविकारः, पदसाधनं, शब्दाख्यानं.

DECLINABLE, *a.* वाच्यः -च्या -च्यं, विकार्य्यः -र्य्या -र्य्यं, आख्येयः -या -यं.

DECLINATION, *s.* (Falling off, decay, descent) च्युतिः *f.*, भंशः, क्षयः, अवसादः, विसंसा, अवपातः, अवतारः, अधोगतिः *f.*, अवनतिः *f.*—(Obliquity) वक्रता.—(Deviation) उत्क्रमः, भेदः, विक्रिया.—(In astronomy) क्रान्तिः *f.*, क्रान्तः, अपमः.

DECLINE, *s.* क्षयः, परिक्षयः, उपक्षयः, अवक्षयः, क्षिया, भंशः, सादः, अवसादः, ध्वंसः, विध्वंसः, अपचयः, ह्रासः, विसंसा, व्ययः, अधःपतनं, अवपातः, च्युतिः *f.*, न्यूनता, अत्ययः, व्यसनं, ग्लानिः *f.*, ग्लानिः *f.*—(Consumption) देहक्षयः, क्षयरोगः, क्षयथुः *m.*, क्षयकासः, कफक्षयः, शरीरपाकः, शरीरशोषः.—(Decline of the sun, or of good fortune, &c.) अस्तः; 'decline of life,' जीवितक्षयः.

To DECLINE, *v. a.* (Bend downwards) नम् in caus. (नामयति -यितुं), अवनम्; अवपीड् (c. 10. -पीडयति -यितुं), अपकृष् (c. 1. -कर्षति -क्रष्टुं), पत् in caus. (पातयति -यितुं).—(Refuse, shun) प्रत्याख्या (c. 2. -ख्याति -तुं), अनाख्या, अतिख्या, अपलप् (c. 1. -लपति -पितुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपह्नु (c. 2. -हुते -होतुं), निह्नु, अस्वीकृ; निरस् (c. 4. -अस्यति -असितुं), अपास्; वृज् in caus. (वर्ज्जयति -यितुं), परिहृ (c. 1. -हरति -हर्त्तुं).—(In grammar) आख्या (c. 2. -ख्याति -तुं), रूप् (c. 10. रूपयति -यितुं), शब्दरूपं कृ.

To DECLINE, *v. n.* (Lean downwards) नम् (c. 1. नमति, नन्तुं), अवनम्, आनम्, नम्रीभू; 'as the sun,' अस्तं गम् (c. 1. गच्छति, गन्तुं), लघ् (c. 1. लघते -घितुं); 'declining towards the south,' दक्षिणाप्रवणः -णा -णं, दक्षिणादिगवनतः -ता -तं.—(Deviate) भंश् (c. 4. भश्यति, भंशितुं), च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), पत् (c. 1. पतति -तितुं).—(Avoid) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, हा (c. 3. जहाति, हातुं).—(Desist from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Decay) क्षि in pass. (क्षीयते), परिक्षि, सद् (c. 6. सीदति, सत्तुं), अवसद्; भंश्; ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्, विसंस् (c. 1. -संसते -सितुं), अपचि in pass. (-चीयते), म्लै (c. 1. म्लायति, म्लातुं), ह्रस् (c. 1. ह्रसति -सितुं), व्ययीभू, न्यूनीभू, विशृ in pass. (-शीर्य्यते).

DECLINED, *p. p.* (Refused) प्रत्याख्यातः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, अस्वीकृतः -ता -तं.—(Deviated) भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, पतितः -ता -तं.—(Decayed) क्षीणः -णा -णं, सन्नः -न्ना -न्नं, अवसन्नः -न्ना -न्नं, म्लानः -ना -नं, अस्तगतः -ता -तं, अपचितः -ता -तं, विशीर्णः -र्णा -र्णं.—(Inflected) आख्यातः -ता -तं.

DECLIVITY, *s.* पातुकः, पातुकभूमिः *f.*, प्रवणभूमिः, प्रवः, उत्सङ्गः, निम्नता.

DECLIVOUS, *a.* क्रमशः पातुकः -की -कं or प्रवणः -णा -णं.

To DECOCT, *v. a.* क्वथ् (c. 1. क्वथति -यितुं), निष्क्वथ्; पच् (c. 1. पचति, पक्तुं), निष्पच्.

DECOCTED, *p. p.* निष्पक्वः -क्वा -क्वं, क्वथितः -ता -तं, निष्क्वथितः -ता -तं.

DECOCTION, *s.* (Act of) क्वाथः, क्वथनं, निष्क्वाथः, पाचनं.—(Preparation made by decocting) निर्य्यासः, निर्य्यूहः, कषायः -यं, घनरसः, फाण्टं.

DECOLLATION, *s.* शिरश्छेदनं, शीर्षच्छेदः, मस्तकच्छेदः, शीर्षघातः.

To DECOMPOSE, *v. a.* (Analyze a compound body) समस्तद्रव्यं पृथक्कृ or व्याकृ, विली in caus. (-लाययति -लापयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), पिश् in caus. (पेशयति -यितुं), उपोद्घातं कृ.

DECOMPOSED, *p. p.* व्याकृतः -ता -तं, विद्रावितः -ता -तं, विलीनः -ना -नं.

DECOMPOSITE, *a.* (Twice compounded) द्विमिश्रितः -ता -तं, पुनर्मिश्रितः.

DECOMPOSITION, *s.* (Compounding twice) द्विमिश्रणं, पुनर्मिश्रणं.—(Resolution of parts, dissolution) उपोद्घातः, पृथक्करणं, विद्रावणं, विलयः, प्रलयः, परिक्षयः.

To DECOMPOUND, *v. a.* (Compound a second time) पुनर् or द्विवारं मिश्र् (c. 10. मिश्रयति -यितुं) or सम्मिश्र्.—(Resolve into parts). *See* DECOMPOSE.

To DECORATE, *v. a.* भूष् (c. 10. भूषयति -यितुं), विभूष्; अलङ्कृ, परिष्कृ, समलङ्कृ, संस्कृ; मण्ड् (c. 10. मण्डयति -यितुं); शुभ् in caus. (शोभयति -यितुं), उपशुभ्, परिकर्म्म (nom. परिकर्म्मयति -यितुं).

DECORATED, *p. p.* भूषितः -ता -तं, विभूषितः -ता -तं, अलङ्कृतः -ता -तं, परिष्कृतः -ता -तं, संस्कृतः -ता -तं, मण्डितः -ता -तं, शोभितः -ता -तं, सालङ्कारः -रा -रं, कृतालङ्कारः -रा -रं, कृताभरणः -णा -णं, कृतशोभः

-भा -भं, सवेशः -शा -शं, रचितः -ता -तं, प्रसाधितः -ता -तं.

DECORATION, *s.* अलङ्कारः, अलङ्क्रिया, भूषणं, विभूषणं, भरणं, आभरणं, प्रसाधनं, परिष्कारः, परिष्कृतिः *f.*, परिकर्म्म *n.* (न्), प्रतिकर्म्म, संस्कारः, भङ्गनं, शोभा -भनं, रञ्जनं, कल्पना, तन्त्रं, सज्जा, वेशः; 'stage decorations,' नेपथ्यं, आहार्य्यः.

DECORATOR, *s.* प्रसाधकः, भूषकः, शोभाकारी *m.* (न्), अलङ्कारकल्पकः.

DECOROUS, *a.* विनीतः -ता -तं, विनयी -यिनी -यि (न्), सविनयः -या -यं, अनतिक्रान्तः -न्ता -न्तं, अनतिक्रान्तमर्य्यादः -दा -दं, समर्य्यादः -दा -दं, शिष्टाचारानुसारी -रिणी -रि (न्), सुशीलः -ला -लं, युक्तः -क्ता -क्तं, उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, यथायोग्यः -ग्या -ग्यं, उचितः -ता -तं, यथोचितः -ता -तं, समञ्जसः -सा -सं.

DECOROUSLY, *adv.* सविनयं, समर्य्यादं, अनतिक्रान्तं, युक्तं, यथोचितं.

To DECORTICATE, *v. a.* त्वच (nom. त्वचयति -यितुं), निस्त्वच; निस्त्वचीकृ; निर्वल्क (nom. निर्वल्कयति -यितुं); निस्तुष (nom. निस्तुषयति -यितुं), तुषीकृ, निस्तुषीकृ; त्वक्ष् (c. 1. त्वक्षति -क्षितुं), वल्कलं or त्वचम् उत्कृष् (c. 1. -कर्षति -क्रष्टुं) or निष्कृष्.

DECORTICATION, *s.* निस्त्वचीकरणं, निस्तुषीकरणं, त्वक्परिपुटनं, निर्वल्कलीकरणं.

DECORUM, *s.* विनयः, विनीतता -त्वं, मर्य्यादा, अनतिक्रमः, शिष्टाचारानुसारः, सदाचारता, सुशीलता, सभ्यता, शिष्टता, सुरीतिः *f.*, सुनीतिः *f.*, शुचरित्रं, सच्चरित्रं, युक्तता, उपयुक्तत्वं, औचित्यं, न्यायः -यता.

To DECOY, *v. a.* छलेन or कौटेन प्रलुभ् in caus. (-लोभयति -यितुं) or आकृष् (c. 1. -कर्षति -क्रष्टुं) or प्रवञ्च् in caus. (-वञ्चयते -यितुं) or प्रतॄ in caus. (-तारयति -यितुं).—(Entrap) जाले बन्ध् (c. 9. बध्नाति, बन्धुं).

DECOYED, *p. p.* प्रलोभितः -ता -तं, जालबद्धः -द्धा -द्धं, पाशबद्धः -द्धा -द्धं.

DECOY-BIRD, *s.* आकर्षकपक्षी *m.* (न्), शाकुनिकैर् अन्यपक्षिप्रलोभने शिक्षितः पक्षी.

To DECREASE, *v. n.* क्षि in pass. (क्षीयते), परिक्षि, परिहा in pass. (-हीयते), ह्रस् (c. 1. ह्रसते -सितुं), अल्पीभू, न्यूनीभू, ऊनीभू, अवसद् (c. 6. -सीदति -सत्तुं).

To DECREASE *v. a.* अल्पीकृ, ह्रस् in caus. (ह्रासयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), न्यूनीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), क्षि in caus. (क्षपयति -यितुं).

DECREASE, DECREMENT, *s.* क्षयः, क्षिया, क्षितिः *f.*, ह्रासः, न्यूनत्वं -ता, न्यूनीभावः, अवसादः, अपचयः, हानिः *f.*; 'of the moon,' इन्दुक्षयः.

To DECREE, *v. n.* व्यवस्थाद्वारेण or आज्ञापत्रद्वारेण निष्पन्नं or सिद्धं or निर्णीतं कृ, व्यवस्थां कृ, आज्ञां कृ or दा, शासनं कृ, निष्पत्तिं कृ, निश्चयं कृ.

To DECREE, *v. a.* व्यवस्था in caus. (-स्थापयति -यितुं), प्रणी (c. 1. -णयति -णेतुं), आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), समादिश्, निर्दिश्, विधा (c. 3. -दधाति -धातुं), प्रकॢप् (c. 10. -कल्पयति -यितुं).

DECREE, *s.* व्यवस्था, व्यवस्थापत्रं, शासनं, शासनपत्रं, आज्ञापत्रं, राजाज्ञा, आज्ञा, विधानं, नियमः, नियोगः, निदेशः, आदेशः.

DECREED, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, प्रणीतः -ता -तं, विहितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, प्रकल्पितः -ता -तं, आज्ञप्तः -प्ता -प्तं.

DECREPIT, *a.* जरी -रिणी -रि (न्), जीर्णः -र्णा -र्णं, जरातुरः -रा -रं, जरायस्तः -स्ता -स्तं, जरापरिणतः -ता -तं, जरणः -र्णा -र्णं, अतिवृद्धः -द्धा -द्धं.

DECREPITATION, *s.* मूषानिवेशितलवणस्य वह्निसम्पर्कात् स्फुत्कारशब्दः.

DECREPITUDE, *s.* जरा, जीर्णिः *f.*, जीर्णता, जरावस्था, जरठः, जीर्णावस्था, अतिवृद्धभावः, अतिवार्धक्यं, विसंज्ञा, ज्यानिः *f.*, प्रातिक्या.

DECRESCENT, *a.* क्षयी -यिणी -यि (न्), क्षीयमाणः -णा -णं, अपचीयमानः -ना -नं,

DECRETAL, *a.* व्यवस्थाविषयः -या -यं, व्यवस्थापकः -का -कं, नैयमिकः -की -कं.

DECRETAL, *s.* (Body of laws or edicts) धर्म्मसंहिता, व्यवस्थासङ्ग्रहः. —(Collection of the pope's decrees) रोमनगरे महाधर्म्माध्यक्षप्रकाशितानां शासनपत्राणां संहिता.

DECRETORY, *a.* विचारकः -का -कं, प्रणयनः -ना -नं, निश्चायकः -का -कं.

DECRIAL, *s.* अपवादः, परीवादः, उपक्रोशः, उच्चैःस्वरेण कृता निन्दा.

To DECRY, *v. a.* अपवद् (c. 1. -वदति -दितुं), परिवद्, उच्चैःस्वरेण निन्द् (c. 1. निन्दति -न्दितुं) or अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or तिरस्कृ or दोषीकृ.

DECUMBENCE, *s.* शयनं, शय्यागमनं, पतनं, संवेशः, उपवेशनं.

DECUMBENT, *a.* शयानः -ना -नं, शयने संविष्टः -ष्टा -ष्टं, शयितः -ता -तं, निषण्णः -ण्णा -ण्णं, निलीनः -ना -नं, उपविष्टः -ष्टा -ष्टं.

DECUMBITURE, *s.* रोगार्त्तस्य शय्यावस्थानकालः, रोगावधिर् यत्पर्य्यन्तं शयने वर्त्तते रोगी.

DECUPLE, *a.* दशगुणः -णा -णं, दशगुणीकृतः -ता -तं, दशविधः -धा -धं.

DECURION, *s.* दशाध्यक्षः, दशसैन्याधिपतिः *m.*, दशयोधनायकः.

DECURSION, *s.* अधःपतनं, अधोगमनं, अवतरणं, अवधावनं, अधोद्रावः.

DECURTATION, *s.* उच्छेदः -दनं, विच्छेदः, ह्रस्वीकरणं, संक्षेपः -पणं.

DECUSSATION, *s.* अन्तर्लेखकरेखाव्यत्यासः, कोणाकोणि छेदनं.

To DEDECORATE, *v. a.* अकीर्त्तिं or अपयशः कृ, सापमानं -नां -नं कृ, कुख्यातिं जन् (c. 10. जनयति -यितुं), कलङ्क (nom. कलङ्कयति -यितुं).

DEDECORATION, *s.* अकीर्त्तिकरणं, अपयशस्करणं, कलङ्ककरणं, अपमानं.

DEDECOROUS, *a.* अकीर्त्तिकरः -री -रं, अयशस्यः -स्या -स्यं, कलङ्करः -री -रं, लज्जाकरः -री -रं, अपमानजनकः -का -कं, वाच्यः -च्या -च्यं.

To DEDICATE, *v. a.* (Appropriate to a sacred use) धर्म्मार्थं प्रयुज् (c. 7. -युनक्ति -योक्तुं) or विनियुज् or निर्दिश् (c. 6. -दिशति -देष्टुं), धर्म्मनुद्दिश्य दा or उत्सर्गं कृ.—(Consecrate) प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), संस्कृ, अभिसंस्कृ, प्रणी (c. 1. -णयति -णेतुं), उपकॢप् in caus. (-कल्पयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), निविद् in caus. (-वेदयति -यितुं), समृ in caus. (-अर्पयति -यितुं), अभिमन्त्र् (c. 10. -मन्त्रयति -यितुं), सङ्कल्पं कृत्वा दा.—(Dedicate a book) उपकारकजनस्य प्रथमपत्रे नामलिखनात् सचाटुवादं ग्रन्थं समृ in caus., or निविद् in caus. or सनाथीकृ.

DEDICATED, *p. p.* प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, विनियोजितः -ता -तं, प्रणीतः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, निर्दिष्टः -ष्टा -ष्टं, उपकॢप्तः -प्ता -प्तं, संस्कृतः -ता -तं, अभिसंस्कृतः -ता -तं, कृतसङ्कल्पः -ल्पा -ल्पं, निवेदितः -ता -तं, समर्पितः -ता -तं.—(As a book) उपकारकजनस्य प्रथमपत्रे नामलिखनात् समर्पितः -ता -तं or निवेदितः -ता -तं, उपकारकजननामसंज्ञितः -ता -तं, सनाथीकृतः -ता -तं.

DEDICATION, *s.* प्रतिष्ठा, सुप्रतिष्ठा, प्रतिष्ठाकरणं, निवेदनं, समर्पणं, विनियोगः, उत्सर्गः, सङ्कल्पकरणं, संस्कारः; 'of a book,' उपकारकजनस्य प्रथमपत्रे नामलिखनाद् ग्रन्थनिवेदनं, ग्रन्थस्य निवेदनपत्रं; 'of a temple,' प्रासादप्रतिष्ठा; 'of one's person,' आत्मनिवेदनं, देहविनियोगः.

DEDICATOR, *s.* उपकारकजनस्य प्रथमपत्रे नाम लिखित्वा ग्रन्थनिवेदकः or ग्रन्थसमर्पकः, अनुग्राहकजनद्वारा ग्रन्थप्रकाशकः, प्रतिष्ठाकारी *m.* (न्).

DEDICATORY, *a.* निवेदनपत्रलिखनविषयः -या -यं, ग्रन्थानुग्राहकगुणप्रकाशकः -का -कं, ग्रन्थोपकारकप्रशंसाकरः -री -रं, स्तुतिमयः -यी -यं.

DEDITION, *s.* समर्पणं, उत्सर्जनं, प्रदानं, प्रोत्सारणं, वितरणं, त्यागः.

To DEDUCE, *v. a.* अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते), ऊह् (c. 1. ऊहते -हितुं), अपोह्; निर्णी (c. 1. -णयति -णेतुं), अवगम् (c. 1. -गच्छति -गन्तुं) समधिगम्, अपवह् (c. 1. -वहति -वोढुं).

DEDUCED, *p. p.* अनुमितः -ता -तं, निर्णीतः -ता -तं, अवगतः -ता -तं, समधिगतः -ता -तं, अपोढः -ढा -ढं, अपोहितः -ता -तं.

DEDUCEMENT, *s.* अनुमानं, अनुमितिः *f.*, ऊहनं, निर्णयः, अपवाहः, अपोहः -हनं.

DEDUCIBLE, *a.* अनुमेयः -या -यं, ऊहनीयः -या -यं, आनुमानिकः -की -कं, उपलक्ष्यः -क्ष्या -क्ष्यं, अवगम्यः -म्या -म्यं, समधिगम्यः -म्या -म्यं, यौक्तिकः -की -कं.

To DEDUCT, *v. a.* उद्धृ (c. 1. -हरति -हर्तुं), व्यवकल् (c. 10. -कलयति -यितुं), ऊन् (c. 10. ऊनयति -यितुं), अवलिख् (c. 7. -लिनक्ति -लेक्तुं), पृथक्कृ.

DEDUCTED, *p. p.* उद्धृतः -ता -तं, व्यवकलितः -ता -तं, अवलिप्तः -प्ता -प्तं; 'having a part deducted,' उद्धृतोद्धारः -रा -रं.

DEDUCTION, *s.* (Inference, consequence) अनुमा -मानं -मितिः *f.*, ऊहनं, ऊहा, अपवाहः, अपोहः -हनं, अभ्यूहः, उपलक्ष्यः, युक्तिः *f.*, प्रयुक्तिः *f.*, अन्वयः, अनुषङ्गः, अनुभवः, निर्णयः, परामर्शः.—(Part deducted) उद्धारः, उद्धृतभागः.

DEDUCTIVE, *a.* आनुमानिकः -की -कं, आनुषङ्गिकः -की -कं, यौक्तिकः -की -कं.

DEDUCTIVELY, *adv.* प्रयोगतस्, प्रयुक्तेः, अनुमानतस्, अनुषङ्गेण.

DEED, *s.* (Action) कर्म्म *n.* (न्), क्रिया, कार्य्यं, कृतं, कृत्यं, कृत्या, चेष्टा, प्रवृत्तिः *f.*, विधानं.—(Exploit) चेष्टितं, विचेष्टितं, चरित्रं, अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म *n.*—(Written evidence of any legal act) लेखपत्रं, लेखप्रमाणं, लिखितं, साधनपत्रं; 'deed of conveyance,' दानपत्रं; 'deed of sale,' विक्रयपत्रं, क्रयलेख्यं; 'title-deed,' आगमः, पट्टोल्लिका, पांशुकूलं, कूटकीला.—(Fact) वस्तु *n.*, भूतं, अर्थः, तत्त्वं; 'indeed,' तत्त्वतस्, सत्यं, वस्तुतस्, अवश्यं, अर्थतस्, परमार्थतस्; 'in very deed,' सत्यमेव.

To DEEM, *v. a.* and *n.* मन् (c. 4. मन्यते, मन्तुं), विचर् in caus. (-चारयति -यितुं), सम्भू in caus. (-भावयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं), अनुमा (c. 2. -माति -तुं), अवगम् (c. 1. -गच्छति -गन्तुं), निर्णी (c. 1. -णयति -णेतुं).

DEEMED, *p. p.* मतः -ता -तं, स्मृतः -ता -तं, अवगतः -ता -तं, अनुमितः -ता -तं.

DEEP, *a.* (Having length downwards, profound) गम्भीरः -रा -रं, गभीरः -रा -रं, अगाधः -धा -धं, दीर्घः -र्घा -र्घं, गहनः -ना -नं, गाढः -ढा -ढं, अवगाढः -ढा -ढं, अधोगतः -ता -तं.—(Low) निम्नः -म्ना -म्नं, नीचः -चा -चं.—(Excessive) गाढः -ढा -ढं; 'deep grief,' गाढशोकः.—(Entering deep) मर्म्मभेदी -दिनी -दि (न्).—(Not obvious) गम्भीरार्थः -र्था -र्थं or निगूढार्थः, परमगहनः -ना -नं, अगम्यः -म्या -म्यं, दुर्ज्ञेयः -या -यं, रहस्यः -स्या -स्यं.—(Sagacious) गम्भीरबुद्धिः -द्धिः -द्धि, विदग्धः -ग्धा -ग्धं, दीर्घदृष्टिः -ष्टिः -ष्टि, अर्थज्ञः -ज्ञा -ज्ञं.—(Full of contrivance) उपायज्ञः -ज्ञा -ज्ञं.—(Grave in sound) गम्भीरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं or आमन्द्रः, घनः -ना -नं, धीरः -रा -रं; 'a deep sound,' गभीरध्वनिः *m.*, गम्भीरशब्दः, घनध्वनिः.—(Dark coloured) घनः -ना -नं; 'deep red,' घनारुणः -णा -णं, सुरक्तः -क्ता -क्तं; 'deep blue,' घननीलः -ला -लं.—(Very deep) अतलस्पर्शः -र्शा -र्शं, अस्थागः -गा -गं, अस्थाघः -घा -घं, अस्थानः -ना -नं, अस्थारः -रा -रं; 'deep sleep,' सुषुप्तिः *f.*, सुनिद्रा, सुषुप्त्यवस्था, अघोरनिद्रा, साधिका; 'deep darkness,' घनान्धकारः, अन्धतमसं; 'deep sigh,' दीर्घनिश्वासः; 'knee-deep,' जानुदघ्नः -घ्ना -घ्नं, जानुद्वयसः -सा -सं, जानुमात्रः -त्रा -त्रं.

DEEP, *s.* (The sea) समुद्रः, सागरः, महोदधिः *m.*, महार्णवः, जलधिः *m.*, पयोनिधिः *m.*, असुराशिः *m. f.*, वारिराशिः; 'deep of night,' निशीथः, महारात्रः, गभीररात्रः, घोररात्रं.

To DEEPEN, *v. a.* गम्भीरीकृ, अधिकगभीरं -रां -रं कृ, अगाधीकृ, घनतरं -रां -रं कृ, निम्नीकृ.—(Darken) तिमिर (nom. तिमिरयति -यितुं).

DEEPLY, *adv.* गम्भीरं, गभीरं, गाढं, प्रगाढं, निर्भरं, अत्यन्तं, नितान्तं, भृशं, दीर्घं; 'deeply grieving,' शोकमग्नः -ग्ना -ग्नं, शोकसागरमग्नः -ग्ना -ग्नं, शोकावगाढः -ढा -ढं; 'deeply sighing,' दीर्घनिश्वस्य; 'deeply rooted,' बद्धमूलः -ला -लं or दीर्घमूलः.

DEEP-MOUTHED, *a.* गभीरनादी -दिनी -दि (न्), घनध्वनिः -निः -नि.

DEEP-MUSING, *a.* चिन्तापरः -रा -रं, ध्यानमग्नः -ग्ना -ग्नं, चिन्ताकुलः -ला -लं.

DEEP-READ, *a.* सद्वैशास्त्रपारगः -गा -गं, स्वधीतः -ता -तं, सद्वैविषयज्ञः -ज्ञा -ज्ञं, सद्वैशास्त्रनिष्ठितः -ता -तं.

DEEPNESS, *s.* (Profundity) गम्भीरता, गाम्भीर्य्यं, अगाधता, निम्नता, अधोगतत्वं, घनता, गाढता, नीचत्वं. (Craft) विदग्धता, वैदग्ध्यं.

DEER, *s.* मृगः, हरिणः, कृष्णसारः, एणः, कुरङ्गः -ङ्गकः -ङ्गमः, रुरुः *m.*, रोहितः, रोहित् *m.*, पृषतः, पृषन् *m.* (त्), समूरुः *m.*, चमूरुः *m.*, चमरः, ऋश्यः, रिश्यः, रिष्यः, रङ्कुः *m.*, न्यङ्कुः *m.*, रौहिषः, सक्वरः, शक्वरः, समीची, चीनः, कदली, कन्दली, प्रियकः, मृडीकः, गोकर्णः, भीतहृदयः, व्याधभीतः, पङ्गवादः, वातायुः *m.*—(Deer-skin) मृगाजिनं, मृगचर्म्म *n.* (न्).—(Deer-killer) मृगवधाजीवः, मृगयुः *m.*

To DEFACE, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्; उद्धृ (c. 1. -हरति -हर्तुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप् in caus. (-लोपयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं), अपमृज् (c. 2. -मार्ष्टि -मार्ष्टुं), प्रमृज्, दुष् in caus. (दूषयति -यितुं), विरूपीकृ, विकृ.

DEFACED, *p. p.* विनाशितः -ता -तं, उच्छिन्नः -न्ना -न्नं, लुप्तः -प्ता -प्तं.

DEFACEMENT, *s.* लोपः, विलोपनं, उच्छेदः, दूषणं, विनाशः, व्यामर्षः.

DEFACER, *s.* दूषकः, विनाशकः, उद्धर्त्ता *m.* (र्त्तृ), उन्मूलकः, उत्पाटकः.

To DEFALCATE, *v. a.* उद्धृ (c. 1. -हरति -हर्तुं), ऊन् (c. 10. ऊनयति -यितुं), न्यूनीकृ, ह्रस् in caus. (ह्रासयति -यितुं), अल्पीकृ, लोपं कृ.

DEFALCATION, *s.* न्यूनता, हीनता, हानिः *f.*, उद्धारः, लोपः, ह्रासः, क्षीणता, अल्पत्वं, अपचयः, विच्छित्तिः *f.*, अवच्छेदः, उत्कर्त्तनं.

DEFAMATION, *s.* अपवादः, परिवादः, अभिशंसनं, अभिशापः, आक्षेपः, पिशुनवाक्यं, कलङ्कः, कलङ्ककरणं, असूया, निन्दा, परिभाषणं, वाग्दोषः, मौखर्य्यं, अकीर्त्तिकरणं, अयशस्करणं.

DEFAMATORY, *a.* अपवादकः -का -कं, अभिशस्तकः -का -कं, कुवादः -दा -दं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, वाग्दुष्टः -ष्टा -ष्टं, पिशुनः -ना -नं, अभ्यसूयकः -का -कं, गुणापवादकः -का -कं, मुखरः -रा -रं.

To DEFAME, *v. a.* अपवद् (c. 1. -वदति -दितुं), परिवद्, परगुणान् अपवद्, अभिशंस् (c. 1. -शंसति -सितुं), कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), अपयशः कृ, अकीर्त्तिं कृ.

DEFAMER, *s.* अपवादी *m.* (न्), परिवादी *m.*, गुणापवादकः, असूयकः, अभ्यसूयकः, गुणघाती *m.* (न्), कलङ्ककरः, कुवादः, अभिशस्तकः, परुषवादी *m.* (न्), पिशुनः, सूचकः, आक्षेपकः.

To DEFATIGATE, *v. a.* खिद् in caus. (खेदयति -यितुं), श्रम् in caus. (श्रामयति -यितुं), श्रान्तीकृ, श्रमार्त्तं -र्त्तां -र्त्तं कृ, क्लान्तं -न्तां -न्तं कृ.

DEFATIGATION, *s.* श्रान्तिः *f.*, क्लान्तिः *f.*, श्रमः, परिश्रमः, ग्लानिः *f.*, खेदः.

DEFAULT, *s.* (Omission) परित्यागः, अननुष्ठानं, परिलोपः, भंशः.—(Want, failure) अभावः, असम्भवः, अविषयः, विरहः, अप्राप्तिः *f.*, न्यूनता.—(Defect) दोषः, अगुणः, वैकल्यं, व्यतिक्रमः.—(Non-appearance) अदर्शनं, अनुपस्थानं; 'in default of evidence,' साक्ष्याभावे.

DEFAULTER, *s.* नियमव्याभिचारी *m.* (न्), नियमलङ्घी *m.* (न्), रुद्धः, ऋणशोधनार्थं निरूपितदिवसे विचारसभायाम् अनुपस्थायी *m.* (न्).

DEFEASANCE, *s.* अनुशयः, विप्रतिपत्तिः *f.*, लोपः, नियमभङ्गः, नियमलोपः.

DEFEASIBLE, *a.* अनुशयितव्यः -व्या -व्यं, लोप्यः -प्या -प्यं, लोपनीयः -या -यं.

DEFEAT, *s.* पराजयः, पराभवः, परिभवः, अभिभवः, अभिभूतिः *f.*, अपजयः, व्यसनं, बलव्यसनं, भङ्गः, भेदः, नाशः, विनाशः, ध्वंसः.

To DEFEAT, *v. a.* (Overthrow) जि (c. 1. जयति, जेतुं), पराजि, विजि; अभिभू (c. 1. -भवति -वितुं), पराहन् (c. 2. -हन्ति -नुं), परास् (c. 4. -अस्यति -असितुं), विद्रु in caus. (-द्रावयति -यितुं), धृष् (c. 10. धर्षयति -यितुं), प्रधृष्; पर्यामृश् (c. 6. -मृशति -मर्ष्टुं), वशीकृ.—(Frustrate) व्याहन्, स्खद् (c. 10. स्खदयति -यितुं). वृथाकृ, विफलीकृ.

DEFEATED, *p. p.* जितः -ता -तं, पराजितः -ता -तं, पराभूतः -ता -तं, अभिभूतः -ता -तं, पराहतः -ता -तं, परास्तः -स्ता -स्तं, कृतध्वंसः -सा -सं.

DEFECATE, *a.* अपकर्षितमलः -ला -लं, शोधितः -ता -तं, हृतमलः -ला -लं, निर्म्मलीकृतः -ता -तं, पवित्रीकृतः -ता -तं, परिष्कृतः -ता -तं.

To DEFECATE, *v. a.* मलं हृ (c. 1. हरति, हर्त्तुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं), निर्म्मलीकृ, विमलीकृ, शुध् in caus. (शोधयति -यितुं), पवित्रीकृ, परिष्कृ.

DEFECATION, *s.* मलापकर्षणं, निर्म्मलीकरणं, विमलीकरणं, शोधनं.

DEFECT, *s.* (Fault) दोषः, अपराधः, छिद्रं, अगुणः, कलङ्कः, दूषणं, वैकल्यं, मन्तुः *m.*—(Want) अभावः, विरहः, न्यूनता.

DEFECTIBILITY, *s.* न्यूनता, वैकल्यं, हीनता, दोषित्वं, ह्रासता, अपूर्णित्वं.

DEFECTIBLE, *a.* न्यूनः -ना -नं, दोषिकः -की -कं, अपूर्णः -र्णा -र्णं.

DEFECTION, *s.* त्यागः, परित्यागः, च्युतिः *f.*, भंशः, भ्रष्टता, पतनं, परिवर्त्तः.

DEFECTIVE, *a.* न्यूनः -ना -नं, विकलः -ला -लं, दोषी -षिणी -षि (न्), दोषवान् -वती -वत् (त्), सदोषः -षा -षं, हीनः -ना -नं, सापराधः -धा -धं, सच्छिद्रः -द्रा -द्रं, कलङ्की -ङ्किनी -ङ्कि (न्), अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असम्पूर्णः -र्णा -र्णं, अपर्य्याप्तः -प्ता -प्तं, अङ्गहीनः -ना -नं, अल्पोनः -ना -नं, ऊनः -ना -नं, असमग्रः -ग्रा -ग्रं.

DEFECTIVENESS, *s.* न्यूनता, हीनत्वं, असम्पूर्णत्वं, असमग्रता, वैकल्यं.

DEFENCE, *s.* (Protection) रक्षणं, रक्षा, त्राणं, पालनं, रक्षणः, शरणं, आश्रयः, संश्रयः, गुप्तिः *f.*, गोपनं, अभ्युपपत्तिः *f.*, अवनं.—(Apology) उत्तरं, प्रतिवादः, व्यपदेशः, छन्नकरणं, शुद्धिः *f.*, शोधनं.—(In law) उत्तरं, प्रत्युत्तरं, निवेदनं.

DEFENCELESS, *a.* अरक्षितः -ता -तं, रक्षाहीनः -ना -नं, अशरणः -णा -णं, निराश्रयः -या -यं, अनाश्रयः -या -यं, अप्रतिकारः -रा -रं.—(Unarmed) निरायुधः -धा -धं, अस्त्रहीनः -ना -नं, विशस्त्रः -स्त्रा -स्त्रं.

To DEFEND, *v. a.* (Protect) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्; त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै; पा or पाल् in caus. (पालयति -यितुं or c. 2. पाति -तुं), अनुपा, परिपा, प्रतिपा, सम्पा, अभिपा; गुप् (c. 1. गोपायति, गोप्तुं or caus. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, अभिसङ्गुप्; अव् (c. 1. अवति -वितुं), पर्याप् in des. (-ईप्सति -प्सितुं), परिप्राप् in des.—(Vindicate) रक्ष्, अनुपाल्, उत्तरं दा, पक्षपातं कृ; 'defend another,' परस्य सपक्षो भू, परार्थम् उत्तरं वद् (c. 1. वदति -दितुं).—(Prohibit) निवृ in caus. (-वारयति -यितुं), निषिध् (c. 1. -षेधति -षेद्धुं).

DEFENDABLE, *a.* रक्षणीयः -या -यं, रक्ष्यः -क्ष्या -क्ष्यं, गोपनीयः -या -यं, गोप्यः -प्या -प्यं, पालनीयः -या -यं, अवनीयः -या -यं.

DEFENDANT, *s.* (Person sued) अभियुक्तः, प्रत्यर्थी *m.* (न्), प्रतिपक्षः, कार्य्यी *m.* (न्).—(Advocate) प्रतिवादी *m.* (न्), उत्तरवादी *m.* (न्), पक्षपाती *m.* (न्).

DEFENDED, *p. p.* रक्षितः -ता -तं, अभिरक्षितः -ता -तं, पालितः -ता -तं, उपपालितः -ता -तं, गुप्तः -प्ता -प्तं, त्रातः -ता -तं, अवितः -ता -तं, गोपायितः -ता -तं.

DEFENDER, *s.* रक्षकः, रक्षिता *m.* (तृ), रक्षी *m.* (न्), परिरक्षी *m.*, पालकः, पालः -ली *m.* (न्), पः in comp., त्राता *m.* (तृ), गोपः -पकः, गोपायकः, गोपी *m.* (न्), गोपिलः.

DEFENSIBLE, *a.* रक्षणीयः -या -यं, अनुपालनीयः -या -यं, परिशुद्धिक्षमः -मा -मं.

DEFENSIVE, *a.* रक्षकः -का -कं, पालकः -का -कं, पाली -लिनी -लि (न्), वारकः -का -कं, प्रतिघाती -तिनी -ति (न्).

DEFENSIVE, *s.* आत्मरक्षा, रक्षावस्था, प्रतिघातः, परित्राणं, सावधानता.—(In war) शत्रुवारणं, युद्धनिवारणमात्रं, शत्रोः or युद्धात् सावधानता.

To DEFER, *v. a.* (Put off, delay) विलस् (c. 1. -लसते -सितुं), आकालान्तरात् कार्य्यं त्यज् (c. 1. त्यजति, त्यक्तुं) or या in caus. (यापयति -यितुं).—(Refer to another) कार्य्यनिर्णयं परस्मिन् सृ in caus. (-सर्पयति -यितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or न्यस् (c. 4. -अस्यति -असितुं).

To DEFER, *v. n.* (Delay) विलस् (c. 1. -लसते -सितुं), मन्द् (nom. मन्दायते), चिर् (nom. चिरयति -रायति -यितुं), कालं या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं).—(Pay regard to another's opinion) परमतम् आश्रि (c. 1. -श्रयति -यितुं) or आदृ (c. 6. -द्रियते -दर्त्तुं) or प्रती (प्रति with इ, प्रत्येति -तुं) or उपगम् (c. 1 -गच्छति -गन्तुं).

DEFERENCE, *s.* (Regard) आदरः, समादरः, अनुनयः, मानं, सम्मानं, मान्यत्वं, आग्रहः, प्रश्रयः, प्रणयः, प्रतीतिः *f.*, अनुवर्त्तनं.—(Submission) अधीनता, वश्यता, नम्रता.

DEFERRED, *p. p.* विलसितः -ता -तं, आकालान्तरात् त्यक्तः -क्ता -क्तं.

DEFERRING, *s.* विलसः -सनं, यापनं, कालयापः, आकालान्तरात् कार्य्यत्यागः.

DEFIANCE, *s.* युद्धार्थम् आह्वानं, समाह्वयः -ह्वानं, क्रन्दनं, क्रन्दितं, स्पर्द्धा, आस्पर्द्धा, हूतिः *f.*, हवः, अभिग्रहः, नासीरं, योधसंरावः.

DEFICIENCE, DEFICIENCY, *s.* न्यूनता, हीनता -त्वं, हानिः *f.*, अभावः, विरहः, रहितत्वं, अपूर्णता, असम्पूर्णत्वं, ह्रासः, ह्रसितत्वं, अल्पत्वं, क्षीणता, वैकल्यं, लोपः, लुप्तत्वं.—(Defect) दोषः, छिद्रं; 'deficiency of intellect,' बुद्धिहीनत्वं; 'of any organ of sense,' इन्द्रियवैकल्यं.

DEFICIENT, *a.* न्यूनः -ना -नं, हीनः -ना -नं, विकलः -ला -लं, अपूर्णः -र्णा -र्णं, असम्पूर्णः -र्णा -र्णं, असमग्रः -ग्रा -ग्रं, क्षीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, लुप्तः -प्ता -प्तं, ह्रसितः -ता -तं, ऊनः -ना -नं; 'deficient in intellect,' न्यूनधीः -धीः -धि, विकलान्तःकरणः -णा -णं, अल्पधीः -धीः -धि; 'in any organ of sense,' न्यूनेन्द्रियः -या -यं or विकलेन्द्रियः.

DEFIED, *p. p.* आहूतः -ता -तं, समाहूतः -ता -तं, स्पर्द्धितः -ता -तं.

DEFIER, *s.* आह्वायकः, समाह्वाता *m.* (तृ), आस्पर्द्धी *m.* (न्), कृताह्वानः.

To DEFILE, *v. a.* दुष् in caus. (दूषयति -यितुं), प्रतिदुष्, सन्दुष्; मलिन (nom. मलिनयति -यितुं), मलिनीकृ, कलुष (nom. कलुषयति -यितुं), अपवित्रीकृ, अमेध्यं -ध्यां -ध्यं कृ, लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), आविल (nom. आविलयति -यितुं), मलीमसीकृ; 'defile a virgin,' कन्यां दुष्.

To DEFILE, *v. n.* (March file by file) दण्डव्यूहेन or श्रेणीव्यूहेन यात्रां कृ.

DEFILE, *s.* (Narrow passage) सङ्कटं, सङ्कटपथः, दुर्गमार्गः, दुर्गं, सञ्चरः, सञ्चारः, कन्दरः -री, व्यायामः, घर्घरः, रन्ध्रं, गुहा, पर्व्वतमध्ये सङ्कीर्णपथः.

DEFILED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं, मलिनितः -ता -तं, कलुषितः

-ता -तं, मलदूषितः -ता -तं, मलीमसः -सा -सं, अमेध्याक्तः -क्ता -क्तं, अमेध्यलिप्तः -प्ता -प्तं; 'virgin,' क्षतयोनिः, दूषिता.

DEFILEMENT, *s.* (The act) दूषणं.—(The state) मालिन्यं, मलिनत्वं, मलं, समलता, अशुचित्वं, अशौचं -चत्वं, अपवित्रता, कलुषं, कल्मषं, अमेध्यत्वं, दुष्टता.

DEFILER, *s.* दूषकः, दूषणः, कलुषकारी *m.* (न्), मलावहः, अशौचकृत्.

DEFINABLE, *a.* निर्वचनीयः -या -यं, निरूपणीयः -या -यं, निर्देष्टव्यः -व्या -व्यं, उद्देश्यः -श्या -श्यं, व्याख्येयः -या -यं, निर्धारणीयः -या -यं.

To DEFINE, *v. a.* (Explain a thing by its qualities) लक्षणानि or गुणान् व्याख्या (c. 2. -ख्याति -तुं) or निरूप् (c. 10. -रूपयति -यितुं) or निर्दिश् (c. 6. -दिशति -देष्टुं) or समुद्दिश् or निर्वच् (c. 2. -वक्ति -क्तुं).—(Circumscribe) परिमा (c. 2. -माति -तुं).—(Mark out) लक्ष् (c. 10. लक्षयति -यितुं), लक्षीकृ, चिह्न् (c. 10. चिह्नयति -यितुं).—(Determine) निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), निधृ in caus. (-धारयति -यितुं).

DEFINED, *p. p.* निरुक्तः -क्ता -क्तं, निरूपितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, कृतलक्षणः -णा -णं, लक्षीकृतः -ता -तं, व्याख्यातः -ता -तं, परिमितः -ता -तं.

DEFINER, *s.* निर्वक्ता *m.* (क्तृ), निर्देष्टा *m.* (ष्टृ), लक्षणव्याख्याता *m.* (तृ), गुणनिरूपकः.

DEFINITE, *a.* (Settled, determined) नियतः -ता -तं, निश्चितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, निबद्धः -द्धा -द्धं, निर्णीतः -ता -तं, निर्धारितः -ता -तं, व्यवस्थापितः -ता -तं, सिद्धः -द्धा -द्धं.—(Limited) मितः -ता -तं, परिमितः -ता -तं, समर्य्यादः -दा -दं, सावधिकः -का -कं.

DEFINITION, *s.* लक्षणं, निर्वचनं, निरुक्तिः *f.*, निर्देशः, निदेशः, समुद्देशः, व्याख्या, लक्षणव्याख्या, गुणनिरूपणं.

DEFINITIVE, *a.* नियतः -ता -तं, निश्चायकः -का -कं, निर्णायकः -का -कं, लाक्षणिकः -की -कं, आवश्यकः -का -कं or अवश्यकः.

DEFINITIVELY, *adv.* नियतं, अवश्यमेव, निश्चितं, सुनिश्चितं, व्यक्तं, सुव्यक्तं.

DEFLAGRABLE, *a.* दाह्यः -ह्या -ह्यं, दहनीयः -या -यं, ज्वलनीयः -या -यं.

DEFLAGRATION, *s.* दाहः -हनं, अग्निदाहाद् अशेषेण विनाशः.

To DEFLECT, *v. a.* च्यु (c. 1. च्यवते, च्योतुं), विच्यु; भंश् (c. 4. भ्रश्यति, भंशितुं); पत् (c. 1. पतति -तितुं), विचल् (c. 1. -चलति -लितुं), व्यभिचर् (c. 1. -चरति -रितुं).

DEFLECTION, *s.* च्युतिः *f.*, भंशः, विचलनं, व्यभिचारः, उत्क्रमः, भ्रंषः, भ्रमः, विपथगमनं, विमार्गगमनं, उत्पथगमनं, सत्पथत्यागः.

To DEFLOUR, *v. a.* (A virgin) कुमारीं धृष् (c. 10. धर्षयति -यितुं) or अभिगम् (c. 1. -गच्छति -गन्तुं), सतीत्वं or कुमारीत्वं हृ (c. 1. हरति, हर्तुं) or नश् in caus. (नाशयति -यितुं), योनिक्षतिं कृ, भ्रष्टां कृ.—(Take away the beauty of any thing) शोभां or कान्तिं हृ or नश्.

DEFLOURED, *p. p.* (Virgin) क्षता, क्षतयोनिः *f.*, धर्षिता, सङ्कारी, प्रमादिका.

DEFLOURER, *s.* कुमारीगामी *m.* (न्), सतीत्वनाशकः, कन्याप्रमाथी *m.* (न्).

DEFLUOUS, *a.* अभिष्यन्दी -न्दिनी -न्दि (न्) or अवस्यन्दी, अधःप्रसारी -रिणी -रि (न्).

DEFLUXION, *s.* अभिष्यन्दः, अवस्यन्दः, प्रसवणं, अधःप्रवाहः, क्षरणं.

DEFŒDATION, *s.* दूषणं, मलकरणं, अशौचकरणं, अपवित्रीकरणं.

To DEFORM, *v. a.* विरूप् (c. 10. -रूपयति -यितुं), विरूपीकृ, अपरूपीकृ, कुरूपीकृ, विकलीकृ, विकृ, कदाकारीकृ, व्यङ्गीकृ.

DEFORMED, *p. p.* विरूपः -पा -पी -पं, कुरूपः -पी -पं, अपरूपः -पी -पं, विकृतः -ता -तं, विकृताङ्गः -ङ्गी -ङ्गं, विकृताकारः -रा -रं, विकृताकृतिः -तिः -ति, विकलाङ्गः -ङ्गी -ङ्गं, व्यङ्गः -ङ्गी -ङ्गं, व्याकारः -रा -रं, कदाकारः -रा -रं, कुननुः -न्वी -नु, कुवेरः -रा -रं, पोगण्डः -ण्डा -ण्डं or अपोगण्डः, कुब्जः -ब्जा -ब्जं

DEFORMATION, *s.* विरूपकरणं, अपरूपीकरणं, विकलीकरणं. अङ्गीकरणं,

DEFORMEDLY, *adv.* कुरूपेण, विकृतरूपेण, कदाकारेण, विकलं.

DEFORMITY, *s.* विरूपता, वैरूप्यं, कुरूपता, अपरूपता, वैकृत्यं, वैकृत, व्याकारः, व्यङ्गता, कुदृश्यत्वं, पोगण्डत्वं, कुत्सितत्वं.

To DEFRAUD, *v. a.* (Cheat) वञ्च् in caus. (वञ्चयते -ति -यितुं), परिवञ्च्; प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ in caus. (-तारयति -यितुं), छल् (c. 10. छलयति -यितुं), अन्यायं कृ.—(Deprive by fraud) छलेन or अन्यायेन or प्रतारणाद्वारा हृ (c. 1. हरति, हर्तुं) or स्वत्वलोपं कृ.

DEFRAUDATION, *s.* छलेन or अन्यायेन or प्रतारणापूर्व्वं हरणं or स्वत्वलोपः.

DEFRAUDED, *p. p.* वञ्चितः -ता -तं, परिवञ्चितः -ता -तं, अतिसंहितः -ता -तं.

DEFRAUDER, *s.* वञ्चकः, वञ्चुकः, प्रतारकः, अन्यायकृत्, छली *m.* (न्).

To DEFRAY, *v. a.* धनव्ययं or व्ययशोधनं or व्यायापाकरणं स्वीकृ, परार्थं धनव्ययं कृ or व्ययशोधनं कृ, व्ययम् उपगम् (c. 1. -गच्छति -गन्तुं) or शुध् in caus. (शोधयति -यितुं) or अपाकृ or साध् in caus. (साधयति -यितुं).

DEFRAYER, *s.* व्ययशोधकः, व्यायापाकर्त्ता *m.* (र्त्तृ), परार्थं व्ययस्वीकारी *m.* (न्).

DEFRAYMENT, DEFRAYING, *s.* व्ययशोधनं, व्ययस्वीकारः, व्यायापाकरणं, व्ययमुक्तिः *f.*, व्ययमोक्षः, व्यायापनयनं, व्ययसिद्धिः *f.*, व्ययोपगमः.

DEFT, *a.* (Neat) विनीतः -ता -तं.—(Dexterous) दक्षः -क्षा -क्षं.

DEFTLY, *adv.* विनीतं, सदाक्ष्यं, सूक्ष्मं, क्षिप्रं, चतुरं, युक्तिपूर्व्वं.

DEFUNCT, *a.* मृतः -ता -तं, प्रेतः -ता -तं, परेतः -ता -तं, अतीतः -ता -तं, अपगतः -ता -तं, संस्थितः -ता -तं, विपन्नः -न्ना -न्नं, त्यक्तजीवितः -ता -तं.

DEFUNCTION, *s.* मरणं, मृतुः *m.*, अपगमः, देहत्यागः, संस्थितिः *f.*, विपत्तिः *f.*

To DEFY, *v. a.* युद्धार्थम् आह्वे (c. 1. -ह्वयते -ते -ह्वातुं), समाह्वे; स्पर्ध् (c. 1. स्पर्धते -र्धितुं), आक्रन्द् (c. 1. -क्रन्दति -न्दितुं), अभियुज् (c. 7. -युनक्ति -योक्तुं).—(Disdain, slight) अवज्ञा (c. 9. -जानाति -ज्ञातुं), कदर्थीकृ, पराकृ, लघूकृ, निराकृ.

DEFY, *s.* आह्वानं, युद्धार्थं समाह्वानं, समाह्वयः, क्रन्दितं.

DEFYER, *s.* युद्धार्थम् आह्वायकः, समाह्वाता *m.* (तृ), अभियोक्ता *m.* (क्तृ).

DEGENERACY, DEGENERATENESS, *s.* क्षीणपुण्यत्वं, कुलधर्म्मभंशः, पैतृकधर्म्मच्युतिः *f.*, कुलाचारत्यागः, कुलमर्य्यादाभ्रष्टता, मर्य्यादाहानिः *f.*, सन्मार्गापगमः, धर्म्मत्यागः, दुष्टता.

DEGENERATE, *a.* क्षीणपुण्यः -ण्या -ण्यं, क्षीणधर्म्मः -र्म्मा -र्म्मं or नष्टधर्म्मः, कुलधर्म्मभ्रष्टः -ष्टा -ष्टं, त्यक्तकुलमर्य्यादः -दा -दं, पैतृकाचारच्युतः -ता -तं, धर्म्मविप्लुतः -ता -तं, धर्म्मपतितः -ता -तं, परिभ्रष्टः -ष्टा -ष्टं, दुष्टः -ष्टा -ष्टं.

To DEGENERATE, *v. n.* कुलधर्म्माद् भंश् (c. 4. भ्रश्यति, भंशितुं) or च्यु (c. 1. च्यवते, च्योतुं) or पत् (c. 1. पतति -तितुं), दुष् (c. 4. दुष्यति, दोषितुं).

DEGLUTITION, *s.* गरणं, निगरणं, निगारः, गरा, गीर्णिः *f.*, गिरिः *f.*, ग्रसनं.

DEGRADATION, *s.* (Deprivation or loss of office, disgrace) पदभंशः, पदच्युतिः *f.*, अधिकारभंशः, अधिकारनिराकरणं, अधिकारच्युतिः *f.*, पदलोपः, स्थानप्रभंशः, स्थानापकर्षः, अपकर्षः, अपमानं, अपध्वंसः, पतितत्वं, पातित्यं.—(Degeneracy, baseness) भ्रष्टता, अपकृष्टता, मर्य्यादाक्षयः, मर्य्यादानाशः, दुष्टता, वृषलत्वं, अधोगतिः *f.*, निष्क्रमः.

To DEGRADE, *v. a.* पदात् or अधिकाराद् भंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or निराकृ or अपकृष् (c. 1. -कर्षति -क्रष्टुं).—(Lessen the value) मूल्यं or अर्घम् अल्पीकृ or कन (nom. कनयति -यितुं) or ह्रस् in caus. (ह्रासयति -यितुं) or लघ (nom. लघयति -यितुं), लघूकृ, खलीकृ.

DEGRADED, *p. p.* (Dismissed from office, disgraced) पदभ्रष्टः -ष्टा -ष्टं, पदच्युतः -ता -तं, अधिकारपतितः -ता -तं, पतितः -ता -तं, स्थानभ्रष्टः -ष्टा -ष्टं, अवज्ञोपहतः -ता -तं, खलीकृतः -ता -तं.—(Dege-

nerate) भ्रष्टः -ष्टा -ष्टं, परिभ्रष्टः -ष्टा -ष्टं, अपकृष्टः -ष्टा -ष्टं, निकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, नीचः -चा -चं, निर्विशः -शा -शं.

DEGRADING, *a.* लाघवकारी -रिणी -रि (न्) or अपमानकारी, अकीर्त्तिकरः -रा -रं, अपयशस्करः -री -रं.

DEGREE, *s.* (Station, rank) पदं, स्थानं, आस्पदं, पदवि: *f.* -वी, वृत्ति: *f.*, प्रतिपत्ति: *f.*; 'high degree,' परमपदं.—(State in which a thing is) अवस्था, भाव:, दशा, स्थिति: *f.*, वृत्ति: *f.*, गति: *f.*—(Step to any thing) क्रम:, पदं.—(Order of lineage) आवलि: *f.*, श्रेणी; 'of high degree,' महाकुलप्रसूत:.—(Measure, extent) परिमाणं, प्रमाणं, पर्य्येनं, मात्रं; 'to what degree'? कियत् प्रमाणं, कियत् पर्य्येनं, किं पर्य्येनं; 'in some degree,' किञ्चित्, ईषत्, कतिपयेन -यात्.—(Class, order) गण:, पंक्ति: *f.*, श्रेणी, वर्ग:.—(Degree of latitude, &c.) भाग:, अंश:, अक्षभाग:, अक्षांश:.—(In arithmetic) अङ्कत्रयं.—(By degrees) क्रमशस्, क्रमेण, क्रमे क्रमे, पदे पदे, पदशस्, प्रतिपदं, अनुपदं, पदात्पदं, शनै:, शनै: शनै:.

To DEHORT, *v. a.* उपदेशपूर्ब्बं or प्रत्यादेशपूर्ब्बं भयहेतुं सूचयित्वा निवृत् in caus. (-वर्त्तयति -यितुं), मैवं कार्षी: or मैवं कृथा इति मन्त्रं कृ, विपरीतम् उपदिश् (c. 6. -दिशति -देष्टुं), प्रत्यादिश्, अन्त:ख्या (c. 2. -ख्याति -तुं).

DEHORTATION, *s.* विपरीतमन्त्रणं, प्रत्यादेशपूर्ब्बं निवर्त्तनं, मैवं कार्षीर् इति मन्त्रकरणं, उद्यमभङ्गसार्थ: प्रबोध:, निषेधार्थक: परामर्श:.

DEHORTATORY, *a.* प्रत्यादेशक: -का -कं, निषेधार्थक: -का -कं, मैवं कार्षीर् इत्युपदेशक: -का -कं, निवृत्तिकारक: -का -कं.

DEHORTER, *s.* प्रत्यादेशपूर्ब्बं निवर्त्तयिता *m.* (तृ), प्रत्यादेष्टा *m.* (ष्टृ).

To DEJECT, *v. a.* (Cast down) पत् in caus. (पातयति -यितुं), अध:पत् in caus.—(Dispirit, make sad) अवसद् in caus. (-सादयति -यितुं), विषण्णीकृ, अवसन्नीकृ, विषादं जन् in caus. (जनयति -यितुं), म्लानीकृ, पीड् (c. 10. पीडयति -यितुं), व्यथ् in caus. (व्यथयति -यितुं).

DEJECT, DEJECTED, *a.* विषण्ण: -ण्णा -ण्णं, अवसन्न: -न्ना -न्नं, विषादी -दिनी -दि (न्), अवसादित: -ता -तं, उद्विग्नमना: -नाः -नः (स्) or दीनमना: or विमना: or दुर्मना: or अन्तर्मना:, अवनत: -ता -तं, निर्विश: -शा -शं, दीनमनस्क: -स्का -स्कं, दीनचेतन: -ना -नं, ग्लाना: -ना -नं, म्लान: -ना -नं, म्लान: -ना -नं.—(In countenance) अधोमुख: -खी -खं or नतमुख:, विषण्णवदन: -ना -नं.

DEJECTEDLY, *adv.* सविषादं, सावसादं, विषण्णं, सोद्वेगं, उद्विग्नमनसा.

DEJECTEDNESS, DEJECTION, *s.* विषाद:, अवसाद:, *विषण्णता, अवसन्नता, उद्वेग:, निर्विण्णता, ग्लानि: *f.*, ग्लानि: *f.*, दीनता.

DEJECTURE, *s.* उच्चार:, उच्चरितं, अवस्कर:, शोधनं, शकृत् *m.*, पूरीषं.

DEIFICATION, *s.* (Union with Brahma) ब्रह्मत्वं, ब्रह्मभूयं, ब्रह्मनिर्व्वाणं, ब्रह्मसायुज्यं.—(Inferior deification) देवत्वं, देवभूयं, सुरभूयं.—(Act of making a god) देवकरणं, देवत्वदानं.

DEIFIED, *p. p.* देवभूत: -ता -तं, सुरभूत: -ता -तं, ब्रह्मभूत: -ता -तं, प्राप्तदेवत्व: -त्वा -त्वं, देवत्वमापन्न: -न्ना -न्नं.

DEIFORM, *a.* देवरूपी -पिणी -पि (न्), देवाकार: -रा -रं, देवाकृति: -ति: -ति.

To DEIFY, *v. a.* देवं कृ, देवीकृ, देवं ज्ञात्वा पूज् (c. 10. पूजयति -यितुं).

To DEIGN, *v. n.* (Vouchsafe) अर्ह् (c. 1. अर्हति -र्हितुं); as, 'Deign thou to enter my house,' त्वं मम गृहं प्रवेष्टुम् अर्हसि; प्रसद् (c. 6. -सीदति -सत्तुं) or प्रसादं कृ or प्रसन्नो भूत्वा कृ; as, 'deign to cast a look on us,' प्रसीद नो दृष्टिञ्च कुरु or दृष्टिप्रसादं कुरु or प्रसन्नो भूत्वा दृष्टिं कुरु.

To DEIGN, *v. a.* अनुदा (c. 3. -ददाति -दातुं), प्रदा, अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अनुमन् (c. 4. -मन्यते -मन्तुं).

To DEINTEGRATE, *v. a.* साकल्याद् उद्भृ (c. 1. -हरति -हर्त्तुं) or अपनी (c. 2. -नयति -नेतुं), ह्रस् in caus. (ह्रासयति -यितुं), न्यूनीकृ.

DEISM, *s.* आस्तिकता, आस्तिक्यं, अद्वैतं, अद्वैतवाद:, एकात्मवाद:.

DEIST, *s.* आस्तिक:, अद्वैतवादी *m.* (न्), अद्वयवादी *m.*, एकात्मवादी.

DEITY, *s.* (A god) देव:, देवता, सुर:, विबुध:, ठक्कुर:, पूजिल:, नभ:सद् *m.*, नाकसद् *m.*, नाकी *m.* (न्), सुचिरायू: *m.* (स्), अस्वप्न:, अनिमिष:, दैत्यारि: *m.*, दानवारि: *m.*, गीर्व्वाण:, निर्लिम्प:.—(Divine state) देवत्वं -ता.

DELACERATION, *s.* दारणं, विदारणं, खण्डं खण्डं करणं or छेदनं or कर्त्तनं.

DELACTATION, *s.* (Weaning) स्तन्यत्यागः, स्तन्यपानत्यागकरणं.

DELAPSED, *p. p.* अध:पतित: -ता -तं, अवपतित: -ता -तं, सृत: -ता -तं.

To DELATE, *v. a.* वह् (c. 1. वहति, वोढुं), अभिवह्, आनी (c. 1. -नयति -नेतुं).—(Accuse) अभियुज् (c. 7. -युनक्ति -योक्तुं).

DELATION, *s.* वाहनं, आनयनं.—(Accusation) अभियोग:.

DELATOR, *s.* अभियोगी *m.* (न्) -योक्ता *m.* (क्तृ), अपवादक:, सूचक:.

To DELAY, *v. a.* विलस् (c. 1. -लसते -सितुं), चिर (nom. चिरयति -यितुं or caus. -लसयति -यितुं), आकालान्तरात् त्यज् (c. 1. त्यजति, त्यक्तुं) or या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or अपनुद् in caus. (-नोदयति -यितुं), स्थगितं -तां -तं कृ, दीर्घीकृ.—(Hinder) रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, वृ in caus. (वारयति -यितुं), निवृ; बाध् (c. 1. बाधते -धितुं), स्तम्भ् in caus. (स्तम्भयति -यितुं), विघ्नय्.

To DELAY, *v. n.* विलस् (c. 1. -लसते -सितुं), मन्द् (nom. मन्दायते), चिर (nom. चिरयति -यितुं or चिरायति), कालं या in caus. (यापयति -यितुं) or क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विकॢप् (c. 1. -कल्पते -क्लृप्तुं), विचर् in caus. (-चारयति -यितुं), दीर्घीभू; 'he delays coming,' विलम्बेन or विलम्बाद् आगच्छति.

DELAY, *s.* विलस: -सनं, कालयाप:, कालक्षेप:, क्षेप:, विकल्प:, दीर्घसूत्रता, दीर्घीकरणं; 'a short delay,' क्षणक्षेप:.—(Stay, stop) स्तम्भ:, अन्तराय:, व्याघात:, बाधा; 'without delay,' अविलम्बितं, अविलम्बं -म्बेन, अचिरं -रात् -रेण, माचिरं.

DELAYED, *p. p.* विलम्बित: -ता -तं, चिरायित: -ता -तं, यापित: -ता -तं.

DELAYER, *s.* विलम्बी *m.* (न्), विलम्बकारी *m.* (न्), कालयापक:, कालक्षेपक:.

DELECTABLE, *a.* रमणीय: -या -यं, रम्य: -म्या -म्यं, सुभग: -गा -गं, मनोहर: -रा -रं, मनोरम: -मा -मं, मनोज्ञ: -ज्ञा -ज्ञं, कमनीय: -या -यं, मनआय: -या -यं, अभिराम: -मा -मं, हृद्य: -द्या -द्यं, सुनन्द: -न्दा -न्दं, मोदक: -का -कं, आह्लादजनक: -का -कं, अभिलषणीय: -या -यं, कान्त: -न्ता -न्तं.

DELECTABLENESS, *s.* रमणीयता, रम्यत्वं, कमनीयता, मनोरमत्वं, सुनन्दत्वं.

DELECTABLY, *adv.* रमणीयं, रम्यं, कमनीयं, सुभगं, मनोरमं.

DELECTATION, *s.* आह्लाद:, प्रह्लाद:, आनन्द:, हर्ष:, प्रमोद:, अभिरुचि: *f.*

To DELEGATE, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं or caus. -योजयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्, प्रतिसन्दिश्. प्रस्था in caus. (-स्थापयति -यितुं); प्रेर् (c. 10. -ईरयति -यितुं), न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्; प्रतिपद् in caus. (-पादयति -यितुं), भू in caus. (अपयति -यितुं), सम् in caus.; परिदा.

DELEGATE, *s.* नियोगी *m.* (न्), नियुक्त:, अधिकारवान् *m.* (त्), प्रतिपुरुष:, प्रतिनिधि: *m.*, प्रतिभू:.

DELEGATED, *s.* कार्य्यनिर्व्वाहणे नियुक्त: -क्ता -क्तं or अधिकृत: -ता -तं, प्रेरित: -ता -तं, समादिष्ट: -ष्टा -ष्टं.

DELEGATION, *s.* नियोजनं, प्रेरणं, प्रस्थापनं, समादेश:, समर्पणं.

To DELETE, *v. a.* अपमृज् (c. 2. -मार्ष्टि -र्ष्टुं), व्यामृज्, निमृज्, लोपं कृ

DELETERIOUS, DELETORY, *a.* विनाशकः -का -कं, नाशी -शिनी -शि (न्) or प्रणाशी, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, क्षयकरः -री -रं, सूदनः -नी -नं, हिंस्रः -स्रा -स्रं, शारुकः -का -कं.

DELETION, *s.* व्यापत्तिः, लोपः, विलोपनं, उच्छेदः, विनाशः, नाशः.

DELF, DELFE, *s.* (Mine) आकरः, खनिः *f.*, खानिः *f.*—(Earthenware) मृण्मयभाण्डं, मृद्भाण्डं, कौलालकं, माङ्गिकभाण्डं, मृण्मयद्रव्यं.

To DELIBERATE, *v. n.* मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), सम्मन्त्र्, विचर् in caus. (-चारयति -यितुं), मनसा विचर्, चिन्त् (c. 10. चिन्तयति -यितुं), सञ्चिन्त्, विचिन्त्; विगण् (c. 10. -गणयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं); विमृश् (c. 6. -मृशति -मर्ष्टुं), परामृश्, विकॢप् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), विनिश्चि (c. 5. -चिनोति -चेतुं), सम्भू in caus. (-भावयति -यितुं), मनसा विवेचनं कृ.

DELIBERATE, *a.* विमृश्यकारी -रिणी -रि (न्) or समीक्ष्यकारी or अक्षिप्रकारी, स्ववहितः -ता -तं, कृतावधानः -ना -नं, काय्यैचित्तकः -का -कं, अव्यग्रः -ग्रा -ग्रं, अप्रमत्तः -त्ता -त्तं, अत्वरितः -ता -तं, अतुरः -रा -रं, परिणामदर्शी -र्शिनी -र्शि (न्).

DELIBERATED, *p. p.* चिन्तितः -ता -तं, सञ्चिन्तितः -ता -तं, सुचिन्तितः -ता -तं, मन्त्रितः -ता -तं, विचारितः -ता -तं, विगणितः -ता -तं, मथितः -ता -तं.

DELIBERATELY, *adv.* विमृश्य, समीक्ष्य, सुविमृश्य, मन्त्रतस्, अवधानतस्, अवेक्षया, अत्वरितं, अव्यग्रं, असहसा, अप्रमत्तं, बुद्धिपुरःसरं, मनःपूर्वकं, बुद्धिपूर्वकं, बुद्ध्या, मतिपूर्वं; 'walking deliberately,' मितक्रमः.

DELIBERATENESS, *s.* समीक्ष्यकारित्वं, विमृश्यकारित्वं, अक्षिप्रकारिता, सावधानता, विचारशीलता, सतर्कता, अव्यग्रता, अप्रमादः, परिणामदर्शनं.

DELIBERATION, *s.* मन्त्रणं -णा, सम्मन्त्रणं, विचारः -रणं -णा, सुविचारः, चिन्ता, सुचिन्ता, सञ्चिन्तनं, विमर्शः, परामर्शः, विवेचना -नं, वितर्कः -र्कणं, समीक्षा -क्षणं, प्रसमीक्षा, चर्चा, विगणनं, सम्प्रधारणा, भावना, विकल्पः, समर्थनं.

DELIBERATIVE, *a.* विचारकः -का -कं, विचारी -रिणी -रि (न्), चिन्तकः -का -कं, विमर्शी -र्शिनी -र्शि (न्), मन्त्रकरः -री -रं, विचारशीलः -ला -लं.

DELICACY, *s.* (Daintiness) स्वादुता, सुस्वादुत्वं, सुरसत्वं, सौरस्यं, सुखाद्यत्वं, मिष्टता.—(Softness) सौकुमार्य्यं, सुकुमारत्वं, कोमलता, मृदुता.—(Elegance) लालित्यं, लौल्यं, लावण्यं, विलासः.—(Nicety) सूक्ष्मत्वं -ता, मौक्ष्म्यं, शुद्धता, स्वच्छता.—(Slenderness, tenuity) तनुता, लघुता, लाघवं, अस्थूलता, क्षीणता.—(Scrupulousness, politeness) आदरः, सभ्यता, विनयः, सुशीलता.—(Weakness of constitution) शरीरमृदुता, अङ्गमृदुता, प्रकृतिदौर्बल्यं.—(Choice food) स्वाद्वन्नं, विशिष्टान्नं, भोजनविशेषः, सुग्रासः.

DELICATE, *a.* (Dainty, of an agreeable taste) स्वादुः -दुः -द्वी -दु or सुस्वादुः, सुरसः -सा -सं, मिष्टः -ष्टा -ष्टं, सुखाद्यः -द्या -द्यं, स्वादुकारः -री -रं.—(Elegant) ललितः -ता -तं, चारुः -रुः -रु.—(Soft) सुकुमारः -रा -रं, कोमलः -ला -लं, मृदुः -दुः -दु.—(Nice, slender, fine, not coarse) सूक्ष्मः -क्ष्मा -क्ष्मं, तनुः -नुः -न्वी -नु or वितनुः or प्रतनुः, लघुः -घुः -घ्वी -घु, श्लक्ष्णः -क्ष्णा -क्ष्णं, पेलवः -वा -वं, क्षीणः -णा -णं, अस्थूलः -ला -लं, विरलः -ला -लं.—(Choice) विशिष्टः -ष्टा -ष्टं, उत्कृष्टः -ष्टा -ष्टं, उत्तमः -मा -मं.—(Polite) सभ्यः -भ्या -भ्यं, विनीतः -ता -तं.—(Weak in constitution) मृदङ्गः -ङ्गी -ङ्गं, मृदुशरीरः -रा -रं, जन्मरोगी -गिणी -गि (न्); 'a delicate woman,' तन्वी, लघ्वी, सुमध्यमा.

DELICATELY, *adv.* ललितं, सलालित्यं, सुकुमारं, कोमलं, मृदु, अनु.

DELICATES, *s.* स्वाद्वन्नं, स्वादुभोजनं, मिष्टान्नं, सुग्रासः, विशिष्टान्नं.

DELICIOUS, *a.* स्वादुः -दुः -द्वी -दु or सुस्वादुः, मधुरः -रा -रं, मिष्टः -ष्टा -ष्टं, सुस्वास्वादः -दा -दं, सुरसः -सा -सं, मनोहरः -रा -रं, मनोरमः -मा -मं, रम्यः -म्या -म्यं, रमणीयः -या -यं, मोदकः -का -कं, सुभगः -गा -गं, कमनीयः -या -यं.

DELICIOUSLY, *adv.* सुस्वादु, मधुरं, मनोरमं, रमणीयं, सुभगं.

DELICIOUSNESS, *s.* सुस्वादुता, माधुर्य्यं, सौरस्यं, रम्यता, रमणीयता.

DELIGHT, *s.* हर्षः, आनन्दः, आह्लादः, प्रह्लादः, ह्लादः, मुदा, मुद् *f.*, प्रमोदः, मोदः, आमोदः, प्रीतिः *f.*, तृप्तिः *f.*, सुखं, सौख्यं, नन्दः, नन्दथुः *m.*, मदः, प्रमदः, मादः, रतिः *f.*, परितोषः, सन्तोषः, रभसः, अभिरुचिः *f.*, कुतूहलं, चित्तप्रसन्नता, महोत्सवः; 'thrill of delight,' रोमहर्षणं, पुलकः, रोमाञ्चः.—(That which gives delight) नन्दनः -नं, आनन्दनं, आनन्ददः, हर्षकः, हर्षकरः, प्रीतिदः

To DELIGHT, *v. a.* नन्द् in caus. (नन्दयति -यितुं), आनन्द्, अभिनन्द्; हृष् in caus. (हर्षयति -यितुं), प्रहृष्, परिहृष्; ह्लाद् in caus. (ह्लादयति -यितुं), प्रह्लाद्, आह्लाद्; सुख् (c. 10. सुखयति -यितुं), रम् in caus. (रमयति -यितुं), प्रमुद् in caus. (-मोदयति -यितुं), परितुष् in caus. (-तोषयति -यितुं), सन्तुष्; तृप् in caus. (तर्पयति -यितुं), प्री (c. 9. प्रीणाति or caus. प्रीणयति -यितुं), उल्लस् in caus. (-लासयति -यितुं), हर्षं कृ, आनन्दं दा.

To DELIGHT, *v. n.* नन्द् (c. 1. नन्दति -न्दितुं), आनन्द्, अभिनन्द्, विनन्द्; हृष् (c. 4. हृष्यति, हर्षितुं), प्रहृष्, संहृष्, सम्प्रहृष्; ह्लाद् (c. 1. ह्लादते -दितुं), रम् (c. 1. रमते, रन्तुं), अभिरम्, आरम्, संरम्, उपारम्, प्री (c. 4. प्रीयते), मुद् (c. 1. मोदते -दितुं), प्रमुद्; तुष् (c. 4. तोष्यति, तोष्टुं), परितुष्, प्रतुष्, सन्तुष्; रुच् (c. 1. रोचते -चितुं), अभिरुच्, उल्लस् (c. 1. -लसति -सितुं), विलस्; तृप् (c. 4. तृप्यति, तर्प्तुं).

DELIGHTED, *p. p.* हृष्टः -ष्टा -ष्टं, हर्षितः -ता -तं, आह्लादितः -ता -तं, प्रह्लादितः -ता -तं, ह्लादितः -ता -तं, आनन्दितः -ता -तं, आनन्दी -न्दिनी -न्दि (न्), प्रमोदितः -ता -तं, प्रमोदी -दिनी -दि (न्), मुदान्वितः -ता -तं, प्रीतिमान् -मती -मत् (त्), सन्तुष्टः -ष्टा -ष्टं, उल्लसितः -ता -तं or उल्लासितः, अभिरुचितः -ता -तं, प्रीतः -ता -तं, सुखी -खिनी -खि (न्), प्रहृष्टमनाः -नाः -नः (स्) or प्रीतमनाः, हृष्टचित्तः -त्ता -त्तं, सानन्दः -न्दा -न्दं; 'exquisitely delighted,' पुलकितः -ता -तं, परमहृष्टः -ष्टा -ष्टं, तोषरोमाञ्चितः -ता -तं.

DELIGHTFUL, *a.* रम्यः -म्या -म्यं, रमणीयः -या -यं, मनोरमः -मा -मं, मनोहरः -रा -रं, सुभगः -गा -गं, हर्षकः -का -कं, हर्षकरः -री -रं, हर्षणः -णा -णी -णं, नन्दकः -का -कं, नन्दनः -ना -नं, आनन्दनः -ना -नं, आनन्ददः -दा -दं, प्रीतिदः -दा -दं, मोदकः -का -कं, प्रमोदी -दिनी -दि (न्), रमणः -णा -णं, आनन्दमयः -यी -यं, सुखी -खिनी -खि (न्), सुखदः -दा -दं, परितोषजनकः -का -कं, रामणीयकः -का -कं, कमनीयः -या -यं, रुचिरः -रा -रं.

DELIGHTFULLY, *adv.* रम्यं, रमणीयं, मनोरमं, सुभगं, सुखेन, कमनीयं.

DELIGHTFULNESS, *s.* रम्यता, रमणीयता, मनोरमत्वं, कमनीयता, सञ्जीवकता.

To DELINEATE, *v. a.* (Sketch) लिख् (c. 6. लिखति, लेखितुं), आलिख्, विलिख्; रूप् (c. 10. रूपयति -यितुं); अङ्क् (c. 10. अङ्कयति -यितुं).—(Paint) चित्र् (c. 10. चित्रयति -यितुं).—(Describe) वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्.

DELINEATED, *p. p.* आलिखितः -ता -तं, चित्रलिखितः -ता -तं, चित्रगतः -ता -तं, चित्रितः -ता -तं, वर्णितः -ता -तं, निरूपितः -ता -तं.

DELINEATION, *s.* आलेख्यं, आलेखनं, चित्रं, चित्रारम्भः, पाण्डुलेख्यं, वर्णनं -ना, उपवर्णनं, अङ्कनं, आदर्शः.

DELINQUENCY, *s.* दोषः, अपराधः, पापं, व्यतिक्रमः, अपक्रिया, अपकर्म्म *n.* (न्), अपचारः, दुष्कर्म्म *n.* (न्), दुष्कृतं, कुकर्म्म *n.*, दुश्चरितं, पापकर्म्म *n.*, पापकृत्.

DELINQUENT, *s.* पापी *m.* (न्), पापकारी *m.* (न्), पापकृत्, अपराधी *m.* (न्), दोषी *m.* (न्), कृतापराधः, कुकर्म्मकारी *m.* (न्), दुष्कृती *m.* (न्).

To DELIQUATE, *v. n.* विलो (c. 4. -लीयते -लेतुं -लातुं), प्रविली; विद्रु (c. 1. -द्रवति -द्रोतुं), द्रवीभू, विगल् (c. 1. -गलति -लितुं), परिगल्.

DELIQUATION, *s.* द्रवः -वणं -वत्वं, विलयः -यनं, द्रवीकरणं, गलनं.

DELIQUIUM, *s.* मूर्च्छा -र्च्छनं -ना, प्रलयः, प्रमोहः, नष्टचेष्टता, निर्वेशः.

DELIRIOUS, *s.* चैतन्यरहितः -ता -तं, भ्रान्तचित्तः -त्ता -त्तं, नष्टचेतनः -ना -नं, रोगोपहतज्ञानः -ना -नं, चित्तविभ्रमात् प्रलापकारी -रिणी -रि (न्).

DELIRIUM, *s.* चित्तविभ्रमः, ज्ञानभ्रान्तिः *f.*, चैतन्यनाशः, अचैतन्यं, चित्तविप्लवः, चित्तवैकल्यं, प्रलापः.

To DELIVER, *v. a.* (Consign) प्रतिपद् in caus. (-पादयति -यितुं), क्ष्णु in caus. (अर्पयति -यितुं), समृ, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, न्यासीकृ; निविद् in caus. (-वेदयति -यितुं), सङ्क्रम् in caus. (-क्रामयति -यितुं), प्रतिष्ठा in caus. (-स्थापयति -यितुं), आरुह् in caus (-रोपयति -यितुं), समाविश् in caus. (-वेशयति -यितुं).—(Give up, yield) प्रदा (c. 3. -ददाति -दातुं c. 1. -यच्छति), परिदा, सम्प्रदा, उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रोत्सृ in caus. (-सारयति -यितुं), वितॄ (c. 1. -तरति -रितुं -रीतुं).—(Release, rescue) मुच् (c. 6. मुञ्चति, मोक्तुं or caus. मोचयति -यितुं), विमुच्, प्रविमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ; निस्तॄ in caus. (-तारयति -यितुं), सन्तॄ, उत्तॄ; त्रै (c. 1. त्रायते, त्रातुं), परित्रै, सन्त्रै; रक्ष् (c. 1. रक्षति -क्षितुं).—(Utter, pronounce) वाक्यम् ईर् (c. 10. ईरयति -यितुं), उदीर्, उच्चर् in caus. (-चारयति -यितुं), उदाहृ (c. 1. -हरति -हर्त्तुं), व्याहृ, वद् (c. 1. वदति -दितुं).—(Deliver a message, &c.) निविद् in caus. (-वेदयति -यितुं), विज्ञा in caus. (-ज्ञापयति -यितुं), आख्या (c. 2. -ख्याति -तुं).—(Assist in childbirth) सू in caus. (सावयति -यितुं), प्रसवं कृ in caus. (कारयति -यितुं).

DELIVERED, *p. p.* (Consigned) प्रतिपादितः -ता -तं, अर्पितः -ता -तं, समर्पितः -ता -तं, निक्षिप्तः -प्ता -प्तं, न्यस्तः -स्ता -स्तं, प्रणिहितः -ता -तं.—(Given up) प्रदत्तः -त्ता -त्तं, उत्सृष्टः -ष्टा -ष्टं, निसृष्टः -ष्टा -ष्टं, प्रोत्सारितः -ता -तं, वितीर्णः -र्णा -र्णं.—(Released, rescued) मुक्तः -क्ता -क्तं, मोचितः -ता -तं, उद्धृतः -ता -तं, समुद्धृतः -ता -तं, रक्षितः -ता -तं, त्रातः -ता -तं, त्राणः -णा -णं, निस्तारितः -ता -तं, उत्तीर्णः -र्णा -र्णं,—(Uttered) उच्चारितः -ता -तं.—(As a message) निवेदितः -ता -तं, निरादिष्टः -ष्टा -ष्टं.—(Of a child) प्रसूता.

DELIVERANCE, *s.* (Rescue, release) रक्षा -क्षणं, परिरक्षणं, त्राणं, परित्राणं, उद्धारः, उद्धरणं, निस्तारः, निस्तरणं, तारणं, मुक्तिः *f.*, मोक्षः, मोचनं, मोक्षणं, परिमोक्षणं.

DELIVERER, *s.* (Rescuer) त्राता *m.* (तृ), रक्षकः, मोचकः, मोक्षकः, मुक्तिदाता *m.* (तृ), उद्धर्त्री *m.* (त्रि), समुद्धर्त्री *m.*, निस्तारकः, निस्तारयिता *m.* (तृ), तारकः.—(Announcer) निवेदकः, निवेदनकृत् *m.*, आख्यायकः, विज्ञापकः.

DELIVERY, *s.* (Rescue) मुक्तिः *f.*, त्राणं, रक्षणं. *See* DELIVERANCE.—(Consignment, giving up) अर्पणं, समर्पणं, प्रतिपादनं, निवेदनं, न्यसनं, उपन्यासः, आरोपणं, प्रदानं, परिदानं, सम्प्रदानं, विधायकत्वं.—(Of a message, &c.) निवेदनं, निरादेशः, विज्ञापनं.—(Utterance) उच्चारणं, उदाहरणं, व्याहरणं, व्याहारः.—(Childbirth) प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, सूः *f.*, प्रसवकरणं, गर्भच्युतिः *f.*, जातकर्म्म *n.* (न्); 'a woman near her delivery,' आसन्नप्रसवा.

DELL, *s.* दरी -रा, कन्दरः -रा, दरीभूः *f.*, द्रोणी, अद्रिद्रोणी, गुहा.

DELUDABLE, *a.* मोहनीयः -या -यं, प्रवञ्चनीयः -या -यं, प्रतारणीयः -या -यं.

To DELUDE, *v. a.* मुह् in caus. (मोहयति -यितुं), सम्मुह्, व्यामुह्, वञ्च् in caus. (वञ्चयते -यितुं), प्रवञ्च्, परिवञ्च्; प्रलभ् (c. 1. -लभते -लब्धुं)-प्रतॄ in caus. (-तारयति -यितुं), प्रलुभ् in caus. (-लोभयति -यितुं).

DELUDED, *p. p.* मोहितः -ता -तं, सम्मोहितः -ता -तं, विमोहितः -ता -तं, वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं, प्रलोभितः -ता -तं.

DELUDER, *s.* मोही *m.* (न्), वञ्चकः, प्रवञ्चकः, प्रतारकः, भ्रामकः.

DELUGE, *s.* भूतसम्प्लवः, जलाप्लावनं, जलप्लावनं, आप्लावः, जलप्रलयः, जलवेगः, तोयविप्लवः, सलिलोपप्लवः, परिप्लवः, जलोच्छ्वासः, परिवाहः, वन्या, ओघः.—(Universal deluge) एकार्णवं.—(Of rain) धारासारः, धारासम्पातः, अतिवृष्टिः *f.*, महती वृष्टिः.—(Overflow of a river) वानं.—(Sudden calamity) उत्पातः, विनिपातः.

To DELUGE, *v. a.* प्लु in caus. (प्लावयति -यितुं), आप्लु, परिप्लु, सम्प्लु; मज्ज् in caus. (मज्जयति -यितुं), निमज्ज्; 'This place is deluged by the tide,' एतत् स्थानं समुद्रवेलया प्लाव्यते.

DELUGED, *p. p.* आप्लावितः -ता -तं, आप्लुतः -ता -तं, परिप्लुतः -ता -तं, सम्प्लुतः -ता -तं, अभिप्लुतः -ता -तं, अभिपरिप्लुतः -ता -तं, समभिप्लुतः -ता -तं.

DELUSION, *s.* (Illusion, error) मोहः, माया, भ्रमः, भ्रान्तिः *f.*, व्यामोहः, विभ्रमः, मतिविभ्रमः, परिभ्रमः, आभासः, प्रपञ्चः, इन्द्रजालं, मिथ्यामतिः *f.*, विवृत्तिः, आवरणं.—(Cheating, beguiling) वञ्चना, मोहनं, प्रलोभनं, विलोभः, कूटः -टं, प्रतारणा.

DELUSIVE, DELUSORY, *a.* मोही -हिनी -हि (न्), मायी -यिनी -यि (न्), मायिकः -की -कं, मायामयः -यी -यं, जाली -लिनी -लि (न्), भ्रान्तिजनकः -का -कं, इन्द्रजालिकः -की -कं or ऐन्द्रजालिकः, भङ्गुरः -रा -रं.

To DELVE, *v. a.* खन् (c. 1. खनति -नितुं), अभिखन्, खनित्रेण गर्त्तं कृ.

DELVE, *s.* खातं -तकं, खातभूः *f.*, खेयं, गर्त्तः, विवरं, बिलं, अवटः.

DELVER, *s.* खनिता *m.* (तृ), खातकः, आखनिकः, खनकः.

DEMAGOGUE, *s.* प्राकृतजननायकः, अन्यलोकनेता *m.* (तृ), पृथग्जनपुरोगमः, प्रजानायकः, प्रजोपकारकः, हीनवर्णसपक्षः, अधमवर्णपक्षपाती, उत्तमाधमवर्णमध्ये कलहकारी *m.* (न्).

DEMAIN, DEMESNE, *s.* स्वाधीना भूमिः *f.*

DEMAND, *s.* (Claim) अभियोगः, प्रार्थना, अभ्यर्थना, अर्थना, अभिमानं, याच्ञा, याचना, मार्गणं; 'false demand,' मिथ्याभियोगः.—(Question) अनुयोगः, पर्य्यनुयोगः, प्रश्नः, सम्प्रश्नः, पृच्छा, जिज्ञासा, अन्वेषणा, अनुसरणं.—(Calling for in order to purchase) क्रयार्थम् अन्वेषणा.

To DEMAND, *v. a.* (Claim) याच् (c. 1. याचति -चितुं), अर्थ् (c. 10. अर्थयति -ते -यितुं), प्रार्थ्; ममेति or मदीयमिति or मम दातव्यमिति वद् (c. 1. वदति -दितुं), स्वाधिकारं ज्ञा in caus. (ज्ञापयति -यितुं), अभियोगं कृ, स्वीकृ.—(Question) अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), ज्ञा in des. (जिज्ञासते -सितुं), प्रच्छ् (c. 6. पृच्छति, प्रष्टुं).

DEMANDABLE, *a.* अभियोक्तव्यः -व्या -व्यं, याचनीयः -या -यं, प्रार्थनीयः -या -यं.

DEMANDANT, *s.* अभियोक्ता *m.* (क्तृ), अर्थी *m.* (न्), प्रार्थयिता *m.* (तृ).

DEMANDED, *p. p.* याचितः -ता -तं, प्रार्थितः -ता -तं, अभियुक्तः -क्ता -क्तं, अनुयुक्तः -क्ता -क्तं, पृष्टः -ष्टा -ष्टं, जिज्ञासितः -ता -तं, मार्गितः -ता -तं.

DEMANDER, *s.* अभियोगी *m.* (न्), याचिता *m.* (तृ), प्रार्थकः, प्रष्टा *m.* (ष्टृ).

DEMARCATION, *s.* सीमा, परिसीमा, मर्य्यादा, अवच्छेदः, विच्छेदः.

To DEMEAN ONE'S SELF, *v. n.* व्यवह् (c. 1. -हरति -ते -हर्त्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), चर् (c. 1. चरति -रितुं), आचर्, समाचर्; वृत्तिम् अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

DEMEANOUR, *s.* वृत्तिः *f.*, व्यवहारः, आचारः, आचरणं, गतिः *f.*, स्थितिः *f.*, चलनं, रीतिः *f.*, चरितं, चरित्रं, चेष्टितं.

To DEMENTATE, *v. a.* उन्मद् in caus. (-मादयति -यितुं), मुह् in caus. (मोहयति -यितुं).

DEMENTATE, *a.* उन्मत्तः -त्ता -त्तं, नष्टचित्तः -त्ता -त्तं, मूढसंज्ञः -ज्ञं.

DIMENTATION, *s.* उन्मत्तीकरणं, मोहनं, वातुलीकरणं, भ्रान्तिकरणं.

DEMERIT, *s.* अगुणः -णता, वैगुण्यं, निर्गुणत्वं, दोषः, अपुण्यं, गुणाभावः.

To DEMERIT, *v. a.* दोषं कृत्वा निन्दां or दण्डम् अर्ह् (c. 1. अर्हति -र्हितुं).

DEMI, *a.* अर्द्धः -र्द्धा -र्द्धं, आर्द्धिकः -की -कं, सामि indec.

DEMI-DEVIL, *s.* अर्द्धपिशाचः, नरपिशाचः, अर्द्धेन भूतोऽर्द्धेन पिशाचः.

DEMI-GOD, *s.* नरदेवः, देवनारकः, देवयोनिः *m.*, उपदेवता, अर्द्धदेवः.

The following are different sorts of demi-gods or superhuman beings: यक्षः, सिद्धः, पिशाचः, किन्नरः, विद्याधरः, रक्षः *n.* (स्), गन्धर्वः, गुह्यकः.

DEMI-MAN, *s.* अर्द्धनरः, अर्द्धपुरुषः, अर्द्धमानुषः, किन्नरः.

DEMIGRATION, *s.* देशत्यागः, स्थानत्यागः, उत्क्रमणं, देशान्तरगमनं.

DEMISE, *s.* (Of a king) राजमृत्युः, राजमरणं, उपरमः, उपरतिः *f.*

To DEMISE, *v. a.* मरणकाले नियमपत्रेण प्रदा (c. 1. -यच्छति, c. 3. -ददाति -दातुं) or समृ in caus. (-अर्पयति -यितुं) or प्रतिपद् in caus. (-पादयति -यितुं).

DEMISSION, *s.* अपकर्षः -र्षणं, अधःपातनं, अधोगतिः *f.*, अवसादनं, भङ्गः.

DEMOCRACY, *s.* सर्व्वप्रजाधिपत्यं, सर्व्ववर्णप्रभुत्वं, प्रजाप्रभुत्वं, प्रजापालितं राज्यं, राज्यविशेषो यत्र साधारण्येन सर्व्वलोकेषु न्यस्तो राज्यभारः.

DEMOCRAT, *s.* प्रजाप्रभुत्वावलम्बी *m.* (न्), प्रजाधिपत्योपकारकः, प्रजाधिपत्यानुग्राही *m.* (न्), प्रजोपकारकः, प्रजानायः.

DEMOCRATICAL, *a.* प्रजाप्रभुत्वसम्बन्धी -न्धिनी -न्धि (न्), सार्व्वलौकिकः -की -कं, सार्व्ववर्णिकः -की -कं.

To DEMOLISH, *v. a.* नश् in caus. (नाशयति -यितुं), विनश्, उद्ध्वंस् (c. 1. -ध्वंसते -सितुं), संदृ; ध्वंस् in caus. (ध्वंसयति -यितुं), प्रध्वंस्, विध्वंस्; अधःपत् in caus. (-पातयति -यितुं); उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उन्मूल् (c. 10. -मूलयति -यितुं), साध् in caus. (साधयति -यितुं), अवसद् in caus. (-सादयति -यितुं), उत्सद्.

DEMOLISHED, *p. p.* नाशितः -ता -तं, विनाशितः -ता -तं, उद्धृतः -ता -तं, संहृतः -ता -तं, उच्छिन्नः -न्ना -न्नं, उन्मूलितः -ता -तं, भग्नः -ग्ना -ग्नं, सादितः -ता -तं, मूदितः -ता -तं, विघटितः -ता -तं, विघाटितः -ता -तं.

DEMOLISHER, *s.* विनाशकः, विनाशकारी *m.* (न्), ध्वंसकारी, प्रलयकारी, उच्छेदकः, उन्मूलकः.

DEMOLITION, *s.* नाशः, विनाशः, प्रलयः, ध्वंसः, प्रध्वंसः, उच्छेदः, समुच्छेदः, उद्धरणं, संहारः, समूलोद्धरणं, उत्पाटनं.

DEMON, *s.* पिशाचः, भूतः, राक्षसः, असुरः, दानवः, निशाटः, निशाचरः, यज्ञारिः *m.*, यातुः *m.*, यातुधानः, विधुरः, कव्वेरः, कर्बुरः, कर्बूरः, प्रेतः, उपपादुकः.

DEMONIAC, *s.* भूताविष्टः, भूतग्रस्तः, भूतोपहतः, प्रेतवाहितः.

DEMONIAC, DEMONIACAL, *a.* भौतः -ती -तं, भौतिकः -की -कं, पैशाचः -ची -चं-चिकः -की -कं, आसुरः -री -रं, राक्षसः -सी -सं; 'demoniacal possession,' भूतावेशः.

DEMONOLOGY, *s.* भूतप्रेतादिविषया विद्या, वेतालपिशाचादिविषयका विद्या.

DEMONSTRABLE, *a.* साध्यः -ध्या -ध्यं, उपपादनीयः -या -यं, सूच्यः -च्या -च्यं, प्रतिपादनीयः -या -यं, प्रमेयः -या -यं, मीमांस्यः -स्या -स्यं.

DEMONSTRABLY, *adv.* प्रत्यक्षतस् -क्षेण, सुस्पष्टं, सुव्यक्तं, कोऽत्र सन्देहः.

To DEMONSTRATE, *v. a.* साध् in caus. (साधयति -यितुं), उपपद् in caus. (-पादयति -यितुं), प्रमाणीकृ, प्रमाण (nom. प्रमाणयति -यितुं) भू in caus. (भावयति -यितुं), विभू, सूच् (c. 10. सूचयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), प्रदिश्, विनिर्दिश्, निर्णी (c. 1. -णयति -णेतुं); दृश् in caus. (दर्शयति -यितुं).

DEMONSTRATED, *p. p.* सिद्धः -द्धा -द्धं, साधितः -ता -तं, उपपादितः -ता -तं, उपपन्नः -न्ना -न्नं, प्रतिपादितः -ता -तं, प्रमाणितः -ता -तं, प्रमाणीकृतः -ता -तं, विभावितः -ता -तं.

DEMONSTRATION, *s.* सिद्धिः *f.*, साधनं, सिद्धसाध्यं, उपपत्तिः *f.*, उपपादनं, सिद्धान्तः, राद्धान्तः, प्रमाणं, प्रामाण्यं, निर्देशः, निर्णयः, निर्णेतृत्वं; 'ocular demonstration,' प्रत्यक्षप्रमाणं, चाक्षुषज्ञानं; 'written,' लेखप्रमाणं.

DEMONSTRATIVE, *a.* निर्णायकः -का -कं, निश्चायकः -का -कं, निर्देशकः -का -कं, प्रामाणिकः -की -कं, सिद्धान्तकरणः -णा -णं, उपपादकः -का -कं, विभावकः -का -कं.

DEMONSTRATIVELY, *adv.* सप्रमाणं, सिद्धिपूर्व्वं, मुख्यक्कं, निर्व्विवादं.

DEMONSTRATOR, *s.* निर्देष्टा *m.* (ष्टृ), सिद्धान्ती *m.* (न्) प्रमाणकर्त्ता *m.* (र्त्तृ).

DEMORALIZATION, *s.* धर्म्मभ्रष्टता, धर्म्मविप्लवः, आचारदुष्टता, व्यवहारदुष्टता.

To DEMORALIZE, *v. a.* आचारान् or व्यवहारान् दुष् in caus. (दूषयति -यितुं); धर्म्माद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं), भ्रष्टीकृ, दुर्व्वृत्तं -त्तां -त्तं कृ.

DEMULCENT, *a.* शमकः -का -कं, शान्तिकः -की -कं, उपशायी -यिनी -यि (न्), स्निग्धः -ग्धा -ग्धं, स्नेहवान् -वती -वत् (त्), चिक्कणः -णा -णं.

To DEMUR, *v. a.* or *n.* विलस् (c. 1. -लसते -सितुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), विशङ्क्, आशङ्क्; विचर् in caus. (-चारयति -यितुं), विकल्प् (c. 1. -कल्पते -ल्पितुं or caus. -कल्पयति -यितुं), चिर (nom. चिरयति -यितुं), सन्दिह् (c.2. -देग्धि -ग्धुं), मनसा आन्दोल (nom. आन्दोलयति -यितुं).

DEMUR, *s.* विलसः, सन्देहः, संशयः, विकल्पः, शङ्का, आशङ्का, वितर्कः, विचारणं; 'without demur,' अविचारितं, अविलम्बितं.

DEMURE, *a.* एकान्तविनीतः -ता -तं, अतिविनयवान् -वती -वत् (त्), सगौरवः -वा -वं, गम्भीरः -रा -रं, धीरः -रा -रं, शान्तः -न्ता -न्तं, व्रीडितः -ता -तं, लज्जितः -ता -तं, ह्रीमान् -मती -मत् (त्), मन्दास्यः -स्या -स्यं.

DEMURELY, *adv.* सविनयं, सगौरवं, एकान्तविनयेन, सलज्जं, सव्रीडं.

DEMURENESS, *s.* विनयः, अतिविनयः, गौरवं, गाम्भीर्य्यं, धीरता, धैर्य्यं, मन्दता, शान्तिः *f.*, लज्जा, सव्रीडता, त्रपा, शालीनत्वं.

DEMURRAGE, *s.* नौकाम् विहितकालादवीक् खाते or तीरोपान्ते धृत्वा वाणिजेन नौपतये दत्तं पारितोषिकं.

DEMURRER, *s.* सशल्ये विषये विलसः or विरामः or विरतिः *f.*, अर्थनिर्णये प्राड्विवाकैर् आशल्यच्छेदनाद् विचारणत्यागः.

DEN, *s.* विवरं, बिलं, श्वभ्रं, गह्वरं, कन्दरः -रा, गर्त्तः, रन्ध्रं, कुहरं, गुहा, गुहागृहं, खातं, दरी, निर्द्दरिः *m.*

DENIABLE, *a.* प्रत्याख्येयः -या -यं, अस्वीकार्य्यः -र्य्या -र्य्यं, खण्डनीयः -या -यं.

DENIAL, *s.* अपह्नवः, अपह्नुतिः *f.*, निह्नवः, निह्नुतिः *f.*, प्रत्याख्यानं, अपवादः, अपलापः, प्रत्यादेशः, निरसनं, निषेधः, प्रतिषेधः, अवधीरणा, प्रणयविहतिः *f.*, व्यपाकृतिः *f.*, अस्वीकारः, अननुज्ञा; 'self-denial,' आत्मपरित्यागः, संयमः, संयमनं.

DENIED, *p. p.* अपह्नुतः -ता -तं, निह्नुतः -ता -तं, प्रत्याख्यातः -ता -तं, अपवादितः -ता -तं, प्रत्यादिष्टः -ष्टा -ष्टं, निरस्तः -स्ता -स्तं, अननुज्ञातः -ता -तं.

DENIER, *s.* अपह्नोता *m.* (तृ), निह्नोता *m.*, अपलापी *m.* (न्), अपवादी *m.* (न्).

To DENIGRATE, *v. a.* कृष्ण (nom. कृष्णायते, कृष्णायति -यितुं), कृष्णीकृ, श्यामीकृ.

DENIGRATION, *s.* कृष्णीकरणं, श्यामीकरणं, कालीकरणं.

DENIZEN, *s.* नगरस्थः, पौरः, पौरजनः, नागरः, नगरजनः, नगरवासी *m.* (न्), स्वाधीनः, स्वतन्त्रः, स्ववशः, मुक्तः, नगरस्थ सामाजिकजनः.

To DENIZEN, *v. a.* पौरीकृ, नागरीकृ, स्वाधीनीकृ, स्वतन्त्रीकृ, स्ववशीकृ.

To DENOMINATE, *v. a.* अभिधा (c. 3. -दधाति -धातुं), आख्या (c. 2. -ख्याति -तुं), कृत् (c. 10. कीर्त्तयति -यितुं), प्रकृत्, सङ्कृत्; प्रचक्ष् (c. 2.

-चष्टे), उदाहृ (c. 1. -हरति -हर्तुं), भण् (c. 1. भणति -णितुं), नाम कृ.

DENOMINATED, *p. p.* प्रोक्तः -क्ता -क्तं, अभिहितः -ता -तं, संज्ञितः -ता -तं, स्मृतः -ता -तं, उदाहृतः -ता -तं, परिकीर्त्तितः -ता -तं, आख्यातः -ता -तं, अनूक्तः -क्ता -क्तं. The following occur at the end of compounds: अभिधः -धा -धं, अभिधानः -ना -नं, नामा -मा -म (न्), नामधेयः -या -यं, आख्यः -ख्या -ख्यं.

DENOMINATION, *s.* नाम *n.* (न्), नामधेयः -यं, अभिधा -धानं -धेयं, संज्ञा, आख्या, अभिख्या, अधिवचनं, लक्षणं, उपाधिः *m.*, ख्यातिः *f.*

DENOMINATIVE, *a.* अभिधायी -यिनी -यि (न्) -यिकः -का -कं, अभिधेयः -या -यं, नामकारी -रिणी -रि (न्), आख्यायकः -का -कं, संज्ञादायकः -का -कं.

DENOMINATOR, *s.* (Giver of a name) नामदाता *m.* (तृ), नामकृत्.—(Of a fraction) हरः, हारः -रकः, हारकाङ्कः; 'reduced to a common denominator,' सवर्णितः -ता -तं.

DENOTATION, *s.* निर्देशः -शनं, सूचनं, संसूचनं, उपलक्षणं, चिह्नकरणं.

To DENOTE, *v. a.* सूच् (c. 10. सूचयति -यितुं), संसूच्; निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, विनिर्दिश्; लक्ष् (c. 10. लक्षयति -यितुं), लक्षीकृ, दृश् in caus. (दर्शयति -यितुं).

DENOTED, *p. p.* सूचितः -ता -तं, संसूचितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, दर्शितः -ता -तं, प्रदर्शितः -ता -तं.

DENOTING, DENOTATIVE, *a.* सूचकः -का -कं, दर्शकः -का -कं, वाचकः -का -कं.

DENOUEMENT, *s.* (Of a drama) कार्य्यं, निर्व्रहणं, निष्ठा.

To DENOUNCE, *v. a.* प्रकाशं भर्त्स् (c. 10. भर्त्सयति -यितुं), घोषणापूर्व्वं तर्ज् (c. 1. तर्जति -र्जितुं) or आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं) or अभिशप् (c. 1. -शपति -शप्तुं); अमङ्गलं प्रकाश् in caus. (-काशयति -यितुं); अनिष्टं ख्या in caus. (ख्यापयति -यितुं) or विद् in caus. (वेदयति -यितुं).

DENOUNCEMENT, *s.* प्रकाशभर्त्सनं, प्रकाशतर्ज्जनं, घोषणापूर्व्वं तर्ज्जनं or आक्रोशनं or अभिशापः, अनिष्टख्यापनं, अमङ्गलघोषणा.

DENOUNCER, *s.* अनिष्टवेदकः, अनिष्टख्यापकः, अमङ्गलप्रकाशकः, प्रकाशं भर्त्सयिता *m.* (तृ) or तर्ज्जनकृत् or अभिशापकः.

DENSE, *a.* घनः -ना -नं, स्थूलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, पीवरः -रा -रं, सुसंहतः -ता -तं, अविरलः -ला -लं, निविडः -डा -डं, निरन्तरः -रा -रं -रालः -ला -लं, अनन्तरः -रा -रं, दृढसन्धिः -न्धिः -न्धि, निर्व्विवरः -रा -रं, दृढः -ढा -ढं.

DENSITY, *s.* घनता -त्वं, स्थूलता, स्थौल्यं, सान्द्रता, पीवरत्वं, संहतत्वं, निविडत्वं, नैविड्यं, नैरन्तर्य्यं, दृढता, दार्ढ्यं.

DENT, *s.* प्रहारचिह्नं, आघातचिह्नं, भङ्गः, जर्म्मिः *f.* *See* DINT.

DENTAL, *a.* दन्त्यः -न्त्या -न्त्यं, दान्तः -न्ती -न्तं, दन्ती -न्तिनी -न्ति (न्).—(Letter) दन्त्यं, दन्तद्वारा उच्चारितम् अक्षरं.

DENTATED, DENTED, DENTICULATED, *a.* दन्ती -न्तिनी -न्ति (न्), दन्तुरः -रा -रं, अनुक्रकचः -चा -चं, भङ्गुरः -रा -रं.

DENTIFRICE, *s.* दन्तपवनं, दन्तशोधनं, दन्तधावनं, दन्तशाणं, माधवी, मिशिः *f.*

DENTIST, *s.* दन्तचिकित्सकः, दन्तवैद्यः, दन्तचिकित्साजीवी *m.* (न्), दन्तरोगविद्.

DENTITION, *s.* दन्तोद्भेदः, दन्तोद्भेदकालः, दन्तवृद्धिः *f.*

To DENUDATE or DENUDE, *v. a.* नग्नीकृ, विवस्त्र (nom. विवस्त्रयति -यितुं), विकोष (nom. विकोषयति -यितुं), उच्छद् (c. 10. -छादयति -यितुं) हृ (c. 1. हरति, हर्त्तुं), शून्यीकृ, रिक्तीकृ; 'a tree of its leaves,' निष्पत्र (nom. निष्पत्रयति -यितुं).

DENUDATION, *s.* नग्नीकरणं, विवस्त्रीकरणं, विकोषीकरणं, हरणं.

DENUDED, *p. p.* नग्नीकृतः -ता -तं, विकोषः -षा -षं, हृतः -ता -तं.

DENUNCIATION, DENUNCIATOR, *s.* *See* DENOUNCEMENT, DENOUNCER.

To DENY, *v. a.* निह्नु (c. 2. -हुते -होतुं), अपह्नु, प्रत्याख्या (c. 2. -ख्याति -तुं), अनाःख्या, अतिख्या; अपवद् (c. 1. -वदति -दितुं), अपलप् (c. 1. -लपति -पितुं), अपवच् (c. 2. -वक्ति -क्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निरस् (c. 4. -अस्यति, असितुं), अपज्ञा (c. 9. -जानीते -ज्ञातुं), अधरीकृ.

To DEOBSTRUCT, *v. a.* प्रतिबन्धान् हृ (c. 1. हरति, हर्त्तुं) or विनी (c. 1. -नयति -नेतुं), निर्विघ्न (nom. निर्विघ्नयति -यितुं), निर्विघ्नीकृ, मुच् (c. 6. मुञ्चति, मोक्तुं), विशुध् in caus. (-शोधयति -यितुं).

DEODAND, *s.* ईश्वराय देयं, देवदेयं, देवोपहारः, अपमृत्युप्रायश्चित्तं.

To DEOPPILATE, *v. a.* प्रतिबन्धं or नाहं हृ (c. 1. हरति, हर्त्तुं), विशोधनं कृ.

DEOPPILATION, *s.* प्रतिबन्धहरणं, नाहहरणं, विशोधनं, निबन्धनाशनं.

DEOPPILATIVE, *a.* नाहघ्नः -घ्नी -घ्नं, प्रतिबन्धहारी -रिणी -रि (न्).

DEOSCULATION, *s.* चुम्बनं, परिरिंसा, निक्षणं, निमित्तकं.

To DEPAINT, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), चित्र् (c. 10. चित्रयति -यितुं).

To DEPART, *v. n.* (Go away) अपगम् (c. 1. -गच्छति -गन्तुं), व्यपगम्, गम्; अपया (c. 2. -याति -तुं), व्यपया, प्रया, अपे (c. 2. -एति -तुं with अप, अपेति -तुं), व्यपे, विप्रे, वी (व्येति -तुं), अपसृ (c. 1. -सरति -सर्त्तुं), अपक्रम् (c. 1. -क्रामति -क्रमितुं), व्यपक्रम्, उत्क्रम्, अपसृप् (c. 1. -सर्पति -सप्तुं), चल् (c. 1. चलति -लितुं), प्रस्था (c. 1. -तिष्ठति -स्थातुं), विप्रस्था, सम्प्रस्था, दूरीभू, उच्छ् (c. 6. उञ्छति -ञ्छितुं).—(Desist from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं).—(Die) प्रे (c. 2. -एति -तुं with प्र, प्रेति -तुं), देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), शरीराद् अपगम्, वियद् (c. 4. -पद्यते -पत्तुं), लोकान्तरं गम्.

To DEPART, *v. a.* उत्सृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं).—(Separate, distribute) वियुज् (c. 7. -युनक्ति -योक्तुं), विभज् (c. 1. -भजति -भक्तुं).

DEPART, *s.* अपगमः, व्यपगमः, विगमः, प्रयाणं.—(Death) अपगमः, संस्थितिः *f.*

DEPARTED, *p. p.* गतः -ता -तं, अपगतः -ता -तं, व्यपगतः -ता -तं, निर्गतः -ता -तं, अपेतः -ता -तं, व्यपेतः -ता -तं, प्रयातः -ता -तं, प्रस्थितः -ता -तं, अपसारितः -ता -तं, अपासृतः -ता -तं; 'one who has departed from virtue,' धर्म्मैर्व्यपेतः -ता -तं.—(Dead) प्रेतः -ता -तं, प्रमीतः -ता -तं, व्यतीतः -ता -तं, संस्थितः -ता -तं, निर्वाणः -णा -णं, लोकान्तरगतः -ता -तं, अपविद्धलोकः -का -कं.

DEPARTER, *s.* पृथक्करणद्वारा धातुशोधकः, परिच्छेदेन धातुपरीक्षकः.

DEPARTMENT, *s.* (Allotment, division) विभागः, प्रविभागः, परिच्छेदः, विच्छेदः, भागः.—(Division of science, literature, &c.) देशः, अङ्गं, विषयः, प्रकरणं.—(Office, business) अधिकारः, नियोगः, कर्म्म *n.* (न्).—(Province) देशः, विषयः, मण्डलं, ग्रामशतं.

DEPARTURE, *s.* अपगमः, व्यपगमः, विगमः, गमनं, अपायः, प्रयाणं, अपयानं, प्रस्थानं, सम्प्रस्थानं, अपासरणं, अपसरणं, अपक्रमः -मणं, उत्क्रमणं, अत्ययः, निर्गमः, विसर्गः, वियोगः.—(Death) अपगमः, अत्ययः, संस्थितिः *f.*, तनुत्यागः, जीवोत्सर्गः, प्रयाणं.—(Abandonment) त्यागः, निवृत्तिः *f.*, प्रोञ्छनं.

To DEPASTURE, *v. a.* सम्भक्ष् (c. 10. -भक्षयति -यितुं), संखाद् (c. 1. -खादति -दितुं).

To DEPAUPERATE, *v. a.* दरिद्रीकृ, कृपणीकृ, क्रश् (nom. क्रशयति -यितुं), कृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणीकृ, दीनं -नां -नं कृ.

DEPECTIBLE, *a.* श्यानः -ना -नं, सान्द्रः -न्द्रा -न्द्रं, दुःखछेद्यः -द्या -द्यं.

To DEPEND, *v. n.* (Hang from) लम्ब् (c. 1. लम्बते -म्बितुं), अवलम्ब्, प्रलम्ब्.—(Be dependent on, rest on, rely on) अवलम्ब्, समालम्ब्; आश्रि (c. 1. -श्रयति -ते -श्रयितुं), संश्रि, समाश्रि, उपाश्रि; अधीनः -ना -नं or आयत्तः -त्ता -त्तम् अस्, वशीभू; 'The mind depends on the body,' बुद्धिः शरीरम् आश्रयति.—(Be connected with)

सञ्जन्ध् in pass. (-बध्यते).—(Depend on another for support) उपजीव् (c. 1. -जीवति -वितुं), अनुजीव्.—(Be in suspense) दोल (nom. दोलायते), विलम्ब्; 'I depend entirely on you,' सर्व्वं त्वयि समर्पयामि.

DEPENDANCE, DEPENDENCE, *s.* (Reliance) आश्रयः, उपाश्रयः, संश्रयः, समाश्रयः, अयणं, आयः, अवलम्बनं, निष्ठा, तत्परता, आशयः, विश्वासः, प्रत्ययः, विश्रम्भः, समाश्वासः; 'mutual dependence,' अन्योन्याश्रयः.—(State of being at the disposal of another) पराधीनता, परायत्तत्वं, पराश्रितत्वं, परवशित्वं, परवत्ता, परतन्त्रत्वं, पारतन्त्र्यं, अस्वातन्त्र्यं, भक्तिः *f.*—(Connexion) सञ्जन्धः -न्धित्वं, अभिसञ्जन्धः, प्रबन्धः, प्रसङ्गः, प्रसक्तिः *f.*, अनुषङ्गः, समन्वयः, सम्पर्कः.—(Persons or things of which one has the disposal) भृत्यः, उपजीवी *m.* (न्), स्वद्रव्यं, स्वं.

DEPENDANT, DEPENDENT, *a.* (Depending on) आश्रितः -ता -तं, संश्रितः -ता -तं, उपाश्रितः -ता -तं, अवलम्बी -म्बिनी -म्बि (न्), अवलम्बितः -ता -तं, अधीनः -ना -नं, अभ्यधीनः -ना -नं, आयत्तः -त्ता -त्तं, वशः -शा -शं, तत्परः -रा -रं, निमग्नः -ग्ना -ग्नं, सञ्जद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं; 'dependent on kings,' राजसंश्रयः -या -यं; 'dependent on riches,' अर्थैर्निबन्धनः -ना -नं; 'a king's fortune is dependent on his minister,' सचिवायत्ता राजश्रीः.—(At the disposal of another) पराधीनः -ना -नं, पराश्रितः -ता -तं, परायत्तः -त्ता -त्तं, परतन्त्रः -त्रा -त्रं, परवशः -शा -शं, परवान् -वती -वत् (त्), उपजीवी -विनी -वि (न्), नाथवान् -वती -वत् (त्), गृह्यकः -का -कं, अस्वतन्त्रः -त्रा -त्रं.—(Hanging down) लम्बितः -ता -तं, प्रलम्बः -म्बा -म्बं, विलम्बमानः -ना -नं.

DEPENDANT, *s.* आश्रितः, अनुजीवी *m.* (न्), उपजीवी *m.*, भाक्तिकः, भृत्यः, सभ्याश्यः, परिवारः, परायत्तजनः.

DEPERDITION, *s.* नाशः, विनाशः, क्षयः, अपायः, अपचयः, क्षतिः *f.*, ध्वंसः.

To DEPICT, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्; विलिख् (c. 6. -लिखति -लेखितुं), आलिख्; निर्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्.

DEPICTED, *p. p.* वर्णितः -ता -तं, आलिखितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

DEPILATION, *s.* लोमहरणं, रोमहरणं, निष्केशीकरणं, उल्लुञ्चनं.

DEPILATORY, *a.* लोमहृत् *m. f. n.*, रोमहारी -रिणी -रि (न्), केशनाशकः -का -कं.

DEPILOUS, *a.* रोमहीनः -ना -नं, लोमरहितः -ता -तं, अकेशः -शा -शं.

DEPLETION, *s.* शून्यीकरणं, शून्यत्वं -ता, रिक्तता, अपूर्णता, अपूरणं.

DEPLORABLE, *a.* शोचनीयः -या -यं, शोच्यः -च्या -च्यं, विलपनीयः -या -यं, अनुकम्प्यः -म्प्या -म्प्यं, क्रन्दनीयः -या -यं, शोकमयः -यी -यं, दैवोपहतः -ता -तं.

DEPLORABLENESS, *s.* शोचनीयता, शोच्यत्वं, दौर्गत्यं, दैवोपहतत्वं.

DEPLORABLY, *adv.* शोचनीयं, अनुकम्पनीयं, शोच्यप्रकारेण, कृपणं.

DEPLORATION, *s.* शोचनं, विलपनं, परिदेवनं, क्रन्दनं, रोदनं, क्रुष्टं.

To DEPLORE, *v. a.* शुच् (c. 1. शोचति -चितुं), अनुशुच्; विलप् (c. 1. -लपति -पितुं), परिदेव् (c. 1. -देवति -ते -वितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्; रुद् (c. 2. रोदिति -तुं), अभिक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).

DEPLORER, *s.* अनुशोचकः, विलापकारी *m.* (न्), परिदेवकः, रोदनकृत्.

To DEPLOY, *v. a.* (Troops) सैन्यव्यूहान् विस्तृ in caus. (-स्तारयति -यितुं).

DEPLUMATION, *s.* पक्षोत्पाटनं, पर्णोत्पाटनं, पक्षहरणं, निष्पक्षीकरणं.

To DEPLUME, *v. a.* पक्षान् or पर्णान् उत्पद् in caus. (-पाटयति -यितुं) or हृ (c. 1. हरति, हर्त्तुं), निष्पक्षीकृ, पक्षोल्लुञ्चनं कृ.

To DEPONE, *v. a.* न्यस् (c. 4. -अस्यति -असितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

DEPONENT, *s.* (In law) साक्षी *m.* (न्), प्रमाता *m.* (तृ).—(Verb) अकर्त्तरि क्रिया, अकर्म्मक्रिया, आत्मनेपदे क्रिया.

To DEPOPULATE, *v. a.* निर्जनीकृ, विजनीकृ, शून्यं कृ, अरण्यं कृ, शून्यारण्यं कृ, नरशून्यं -न्यां -न्यं कृ, उपपीड् (c. 10. -पीडयति -यितुं), बाध् (c. 1. बाधते -धितुं), प्रबाध्, निर्दह् (c. 1. -दहति -दग्धुं), अभिमृद् (c. 1. -मर्दति -र्दितुं).

DEPOPULATION, *s.* निर्जनीकरणं, नरशून्यकरणं, अरण्यकरणं, विप्लवः, उपप्लवः, उपपीडनं, अवमर्दः, उच्छेदनं.

DEPOPULATOR, *s.* उपपीडकः, बाधकः, विप्लवकारी *m.* (न्), उच्छेदकः.

To DEPORT ONE'S SELF, *v. a.* चर् (c. 1. चरति -रितुं), आचर्, व्यवहृ (c. 1. -हरति -हर्त्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), वृत्तिम् अनुष्ठा (-तिष्ठति -ष्ठातुं).

DEPORT, DEPORTMENT, *s.* वृत्तिः *f.*, व्यवहारः, आचारः, आचरणं, रीतिः *f.*, गतिः *f.*, स्थितिः *f.*, चेष्टितं, चरित्रं, चरितं, उत्साहः.

DEPORTATION, *s.* प्रवासनं, विवासनं, विवासकरणं, प्रव्राजनं.

DEPOSAL, *s.* राज्यभंशः, राज्यप्रभंशः, राज्यभङ्गः, राज्यपातनं.

To DEPOSE, *v. a.* (Lay down) न्यस् (c. 4. -अस्यति -असितुं), निधा (c. 3. -दधाति -धातुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).—(Degrade from a high station) पदात् or अधिकाराद् भ्रंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or पत् in caus. (पातयति -यितुं).—(In law) स्वयं वद् (c. 1. वदति -दितुं), साक्ष्यं दा (c. 3. ददाति, दातुं), प्रमाणं दा.

DEPOSED, *p. p.* भ्रष्टराज्यः -ज्या -ज्यं, राज्यभ्रष्टः -ष्टा -ष्टं, राज्यच्युतः -ता -तं.

To DEPOSIT, *v. a.* न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, सन्न्यस्, प्रतिन्यस्; निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), उपनिक्षिप्, विनिक्षिप्; निधा (c. 3. -दधाति -धातुं), आधा, पण् (c. 1. पणते -णितुं), ऋ in caus. (अर्पयति -यितुं), स्था in caus. (स्थापयति -यितुं), न्यासीकृ, आधीकृ.

DEPOSIT, *s.* न्यासः, निक्षेपः, उपन्यासः, उपनिक्षेपः, उपनिधिः *m.*, उपनिधानं, औपनिधिकं, आधिः *m.*, आधानं, अन्वाधिः *m.*, विन्यासः, पणः; 'return of a deposit,' प्रतिदानं.—(Sediment) खलं, किट्टं, शेषः.—(Of a river) कालुष्यं.

DEPOSITARY, *s.* न्यासधारी *m.* (न्), न्यासग्राही *m.* (न्), निक्षेपधारी *m.*—(Object of trust) विश्वासस्थानं, विश्वासपात्रं, विश्वासभूमिः *f.*

DEPOSITED, *p. p.* न्यस्तः -स्ता -स्तं, निक्षिप्तः -प्ता -प्तं, उपन्यस्तः -स्ता -स्तं, विन्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, उपनिहितः -ता -तं, आहितः -ता -तं, उपहितः -ता -तं, अर्पितः -ता -तं, स्थापितः -ता -तं, अधिश्रितः -ता -तं, आधीकृतः -ता -तं.

DEPOSITION, *s.* (In law) स्वयमुक्तिः *f.*, साक्ष्यं, साक्षित्वं, प्रमाणं.—(Degradation from sovereignty, &c.) राज्यभंशः, छत्रभङ्गः, राज्यच्युतिः *f.*, पदात् or अधिकाराद् प्रभंशनं or पातनं.

DEPOSITOR, *s.* निक्षेप्ता *m.* (तृ), न्यासकर्त्ता *m.* (र्त्तृ), आधीकर्त्ता *m.*, स्थापकः.

DEPOSITORY, *s.* आधारः, निधिः *m.*, निधानं, आशयः, आस्पदं, अधिश्रयः.

DÉPÔT, *s.* आगारं, युद्धसामग्र्यागारं, सैन्यागारं, सैन्यनिवासस्थानं.

DEPRAVATION, *s.* (Act of depraving) दूषणं, भ्रष्टीकरणं.—(State) दुष्टता.

To DEPRAVE, *v. a.* दुष् in caus. (दूषयति -यितुं), सन्दुष्, प्रतिदुष्; नश् in caus. (नाशयति -यितुं), भ्रंश् in caus. (भंशयति -यितुं), भ्रष्टीकृ; च्यु in caus. (च्यावयति -यितुं), शठीकृ, विकृ; 'to become depraved,' दुष् (c. 4. दुष्यति).

DEPRAVED, *p. p.* दुष्टः -ष्टा -ष्टं, अनादुष्टः -ष्टा -ष्टं, विप्रदुष्टः -ष्टा -ष्टं, भ्रष्टः -ष्टा -ष्टं, दुष्टभावः -वा -वं, दुष्टमतिः -तिः -ति, दुराचारः -रा -रं, दुरात्मा -त्मा -त्म (न्), पापचेताः -ताः -तः (स्), नष्टधीः -धीः -धि, शठः -ठा -ठं, खलः -ला -लं.

DEPRAVER, *s.* दूषकः, प्रतिदूषकः, दूषणः, नाशकः, भंशकारी *m.* (न्).

DEPRAVITY, DEPRAVEDNESS, *s.* दुष्टता, विप्रदुष्टता, अनादुष्टता, दुष्टभावता,

दौरात्म्यं, भ्रष्टता, दुराचारत्वं, शाठ्यं, शठता, कुमतिः *f.*, नष्टत्वं, दौर्जन्यं, स्वभावदौर्जन्यं, अधमाचारत्वं.

To DEPRECATE, *v. a.* प्रार्थनाद्वारेण निवृ in caus. (-वारयति -यितुं) or अपवृत् in caus. (-वर्त्तयति -यितुं) or निवृत् in caus.; मा भूयात् or मा भूद् इति प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अमुकदुःखाद् मुक्तिर् भूयाद् इति प्रार्थ्.—(Beg for pardon) मे क्षन्तुम् अर्हसीति प्रार्थ्

DEPRECATION, *s.* (Prayer against evil) दुःखनिवारणार्थं प्रार्थना or याच्ञा, मा भूदिति प्रार्थना.—(Begging pardon) क्षमस्व or क्षमेष इति प्रार्थना.

DEPRECATIVE, DEPRECATORY, *a.* दुःखनिवारणार्थप्रार्थनविशिष्टः -ष्टा -ष्टं, मा भूद् इत्यर्थप्रार्थनाकारी -रिणी -रि (न्), अनिष्टनिवारकः -का -कं.

To DEPRECIATE, *v. a.* अपकृष् (c. 1. -कर्षति -क्रष्टुं), अवमन् (c. 4. -मन्यते -मन्तुं), लघु मन्, लघूकृ, मूल्यं न्यूनीकृ or न्यून (c. 10. -ऊनयति -यितुं) or कन (nom. कनयति -यितुं), or अल्पीकृ, अल्पमूल्यं -ल्यां -ल्यं कृ.

DEPRECIATION, *s.* अपकर्षः -र्षणं, लघूकरणं, न्यूनीकरणं, अवमानं, ह्रासः.

To DEPREDATE, *v. a.* उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, उपप्लु (c. 1. -प्लवते -प्लोतुं), विप्लु, अपहृ (c. 1. -हरति -हर्त्तुं), लुण्ट् (c. 1. लुण्टति -ण्टितुं c. 10. लुण्टयति -यितुं), लुठ् (c. 10. लोठयति -यितुं), लोभ्रं हृ.

DEPREDATION, *s.* उपद्रवः, विप्लवः, उपप्लवः, अपहारः, हरणं, लोभ्रग्रहणं.

DEPREDATOR, *s.* उपद्रवी *m.* (न्), विप्लवकारी *m.* (न्), अपहारकृत्, हारकः.

To DEPREHEND, *v. a.* (Catch) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्त्तुं), अकस्माद् आसद् (c. 10. -सादयति -यितुं) or उपस्था (c. 1. -तिष्ठति -स्थातुं).—(Find out) ज्ञा (c. 9. जानाति, ज्ञातुं), विद् (c. 2. वेत्ति, वेदितुं), निरूप् (c. 10. -रूपयति -यितुं).

DEPREHENSIBLE, *a.* ग्रहणीयः -या -यं, धरणीयः -या -यं, धीगम्यः -म्या -म्यं.

DEPREHENSION, *s.* अकस्माद्धरणं, अकस्माद्ग्रहणं, अकस्मादासादनं.

To DEPRESS, *v. a.* अवनम् in caus. (-नामयति -यितुं), अपकृष् (c. 1. -कर्षति -क्रष्टुं), अवपीड् (c. 10. -पीडयति -यितुं), पत् in caus. (पातयति -यितुं), अधःपत्; अवसद् in caus. (-सादयति -यितुं), भंश् in caus. (भंशयति -यितुं), अवध्वंस् in caus. (-ध्वंसयति -यितुं), अधःकृ, नम्रीकृ.—(Dispirit) विषण्णीकृ, म्लानीकृ, विषद् in caus.

DEPRESSED, *p. p.* अपकृष्टः -ष्टा -ष्टं, अवनामितः -ता -तं, अवसादितः -ता -तं, पातितः -ता -तं, अवगाढः -ढा -ढं, निम्नः -म्ना -म्नं.—(In spirits) विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, विषादी -दिनी -दि (न्), खिन्नः -न्ना -न्नं, दीनमनस्कः -स्का -स्कं.

DEPRESSION, *s.* अपकर्षः -र्षणं, अवनामः, पातनं, अधःपातनं, अपध्वंसः. अवपीडनं.—(Of spirits) विषादः, अवसादः, अवसन्नता, उद्वेगः, खेदः, ग्लानिः *f.*, ग्लानिः *f.*, औत्सुक्यं.

DEPRESSOR, *s.* अवनामकः, अपकर्षकः, अवसादकः, अवपीडकः, पातकः.

DEPRIVATION, *s.* हरणं, अपहारः, वियोगः, लोपः, भंशः, हानिः *f.*, अपायः, क्षतिः *f.*, क्षयः, उपक्षयः, अपचयः, च्युतिः *f.*, ध्वंसः, परित्यागः, नाशः.

To DEPRIVE, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ; भंश् in caus. (भंशयति -यितुं) with abl. of the thing. च्यु in caus. (च्यावयति -यितुं) with abl. c., वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with abl. c.; अपनी (c. 1. -नयति -नेतुं), लुप् (c. 6. लुम्पति, लोप्तुं, caus. लोपयति -यितुं), विनाकृ; 'to be deprived of,' हा in pass. (हीयते), परिहा in pass. with inst. c., भंश् (c. 4. भ्रश्यति, भंशितुं) with abl. c., च्यु (c. 1. च्यवते, च्योतुं) with abl. c., वियुज् in pass. (-युज्यते) with inst. c.

DEPRIVED, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, हीनः -ना -नं, परिहीणः -णा -णं, प्रहीणः -णा -णं, वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, रहितः -ता -तं, विरहितः -ता -तं, वर्ज्जितः -ता -तं, विनाकृतः -ता -तं, परित्यक्तः -क्ता -क्तं; 'deprived of one's right,' हृताधिकारः -रा -रं; 'deprived of reason,' नष्टबुद्धिः -द्धिः -द्धि, अपहृतविज्ञानः -ना -नं, लुप्तप्रतिभः -भा -भं; 'deprived of life,' प्रहीणजीवितः -ता -तं.

DEPTH, *s.* गम्भीरता -त्वं, गाम्भीर्य्यं, गभीरता, अगाधता -त्वं, निम्नता, अधोगतत्वं, घनता, नीचता.—(Deep place) गम्भीरस्थानं, नीचपदं, अगाधः, उदरं, गह्वरं; 'depth of hell,' पातालोदरं.—(Abyss) अगाधदरी, अतलस्पर्शरन्ध्रं, नरकः.—(Deep sea) महोदधिः *m.*—(In measurement) वेधः -धनं; 'mean depth,' समवेधः.—(Depth of winter) शिशिरमध्यं, मध्यशिशिरं; 'in the depth of winter,' शीतकालमध्ये.

To DEPURATE, DEPURE, *v. a.* निर्म्मलीकृ, विमलीकृ, शुध् in caus. (शोधयति -यितुं), पू (c. 9. पुनाति, पवितुं), पवित्रीकृ, शुचीकृ, परिष्कृ.

DEPURATE, *a.* निर्म्मलः -ला -लं, विमलः -ला -लं, पूतः -ता -तं, पवित्रः -त्रा -त्रं, शोधितः -ता -तं, शूचिः -चिः -चि, धूतकल्मषः -षा -षं.

DEPURATION, *s.* निर्म्मलीकरणं, मलापकर्षणं, पवित्रीकरणं, शोधनं.

DEPUTATION, *s.* (Act of deputing) नियोजनं, विनियोगः, प्रेरणं.—(Persons deputed) नियोगिनः *m. pl.*, नियुक्ताः *m. pl.*, नियोगिनां समूहः or गणः.

To DEPUTE, *v. a.* नियुज् (c. 7. -युनक्ति -योक्तुं caus. -योजयति -यितुं), विनियुज्, प्रेर् (c.10.-ईरयति -यितुं), समादिश् (c. 6. -दिशति -देष्टुं), व्यादिश्.

DEPUTED, *p. p.* नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विनियुक्तः -क्ता -क्तं, विनियोजितः -ता -तं, प्रेरितः -ता -तं, समादिष्टः -ष्टा -ष्टं.

DEPUTY, *s.* प्रतिनिधिः *m.*, प्रतिपुरुषः, नियोगी *m.* (न्), नियुक्तः, प्रतिहस्तः -स्तकः.

To DERACINATE, *v. a.* उन्मूल् (c. 10. -मूलयति -यितुं), उत्पट् (c. 10. -पाटयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उत्खन् (c. 1. -खनति -नितुं), समूलोद्धरणं कृ.

To DERAIGN, *v. a.* प्रमाणीकृ, सत्याकृ, स्थिरीकृ, दृढीकृ, उपपद् in caus. (-पादयति -यितुं).

DERAIGNMENT, *s.* प्रमाणीकरणं, सत्यापनं, उपपादनं.—(Apostacy) धर्म्मत्यागः.

To DERANGE, *v. a.* पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षुभ् in caus. (-क्षोभयति -यितुं), क्रमं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or उपहन् (c. 2. -हन्ति -न्तुं) or विलुप् (c. 6. -लुम्पति -लोप्तुं), सङ्करीकृ, आकुलीकृ, विभ्रम् in caus. (-भ्रमयति -यितुं).

DERANGED, *p. p.* व्यस्तः -स्ता -स्तं, विक्षिप्तः -प्ता -प्तं, असंस्थितः -ता -तं, अनवस्थितः -ता -तं, अव्यवस्थितः -ता -तं, व्यापन्नः -न्ना -न्नं, भग्नक्रमः -मा -मं, अस्वस्थः -स्था -स्थं, अस्तव्यस्तः -स्ता -स्तं.—(In mind) विपरीतचेताः -ताः -तः (स्), भ्रान्तमनाः -नाः -नः (स्), उन्मत्तः -त्ता -त्तं.

DERANGEMENT, *s.* उत्क्रमः, व्युत्क्रमः, भग्नप्रक्रमः, अक्रमः, असंस्थानं, अव्यवस्था, अनवस्थितत्वं, वैलक्षण्यं, व्यस्तता, विसूत्रता, विप्लवः, विक्षिप्तता.—(Of mind) चित्तविप्लवः, चित्तविभ्रमः, मतिविपर्य्ययः.

DERELICTION, *s.* त्यागः, परित्यागः, उत्त्यागः, विरहः, उत्सर्जनं, अपायः.

To DERIDE, *v. a.* अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्; अपहासास्पदीकृ, अवहासभूमिं कृ; भर्त्स् (c. 10. भर्त्सयते -ति -यितुं), उत्स्मि (c. 1. -स्मयते -स्मेतुं), अवगृह् (c. 1. -गृहते -ग्रहीतुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

DERIDED, *p. p.* उपहसितः -ता -तं, अवहसितः -ता -तं, विगर्हितः -ता -तं.

DERIDER, *s.* उपहासकः, परिहासकर्त्ता *m.* (र्त्तृ), अवक्षेपकः.

DERIDINGLY, *adv.* परिहासेन, उपहासेन, सावज्ञेपं, हास्यपुरःसरं.

DERISION, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवज्ञेपः, उत्त्रासनं, अवज्ञा, अवहेला, अवमानं, व्यञ्जना, व्यङ्ग्यः.

DERISIVE, *a.* परिहासकः -का -कं, हासकरः -रा -रं, अवज्ञेपकः -का -कं.

DERIVABLE, *a.* प्रापणीयः -या -यं, आनयनीयः -या -यं, उत्पादनीयः -या -यं, व्युत्पादनीयः -या -यं, निष्पादनीयः -या -यं, यौक्तिकः -की -कं.

DERIVATION, *s.* आनयनं, उत्पत्तिः *f.*, व्युत्पत्तिः *f.*, निष्पत्तिः *f.*, अपवाहः. —(Origin) योनिः *f.*, उद्भवः, सम्भवः, प्रभवः, निर्गमः, मूलं.—(Of a word) शब्दोत्पत्तिः *f.*, धातुव्युत्पत्तिः, शब्दयोनिः *f.*

DERIVATIVE, *a.* व्युत्पन्नः -न्ना -न्नं, यौक्तिकः -की -कं, औत्सर्गिकः -की -कं.

DERIVATIVE, *s.* व्युत्पन्नशब्दः, उत्पन्नशब्दः, मूलाद् आनीतं यत्किञ्चित्.

To DERIVE, *v. a.* मूलाद् आनी (c. 1. -नयति -नेतुं) or निर्णी or नी or अपवह् (c. 1. -वहति -वोढुं), निष्कृष् (c. 1. -कर्षति -क्रष्टुं); उत्पत्तिं कृ, व्युत्पत्तिं कृ; निर्गम् in caus. (-गमयति -यितुं), उद्भू in caus. (-भावयति -यितुं), सम्भू in caus.; निःसृ in caus. (-सारयति -यितुं), जन् in caus. (जनयति -यितुं).—(Communicate by transmission) सञ्चर् in caus. (-चारयति -यितुं).

To DERIVE, *v. n.* उत्पद् (c. 4. -पद्यते -पत्तुं), व्युत्पद्, समुत्पद्; जन् (c. 4. जायते, जनितुं), प्रजन्; प्रभू (c. 1. -भवति -वितुं), उद्भू, सम्भू; प्रसृ (c. 1. -सरति -सर्तुं), उद्गम् (c. 1. -गच्छति -गन्तुं), निर्गम्.

DERIVED, *p. p.* उत्पन्नः -न्ना -न्नं, व्युत्पन्नः -न्ना -न्नं, आनीतः -ता -तं.

DERIVER, *s.* व्युत्पत्तिकारकः, आनयनकर्त्री *m.* (र्त्तृ), जन्मदाता *m.* (तृ).

To DEROGATE, *v. a.* न्यूनीकृ, ऊन् (c. 10. ऊनयति -यितुं), अल्पीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं), असूय (nom. असूयति -यितुं).

DEROGATION, *s.* न्यूनीकरणं, अल्पीकरणं, लघूकरणं, ह्रासः, अपचयः, असूया, अभ्यसूया, अपवादः, विगानं.

DEROGATORILY, *adv.* असूयया, अभ्यसूयया, सापवादं, अकीर्त्तिकरं.

DEROGATORY, *a.* लघूकारकः -का -कं, असूयकः -का -कं, अभ्यसूयकः -का -कं, अपवादकः -का -कं, अपयशस्करः -री -रं, अकीर्त्तिकरः -रा -रं, ह्रासकः -का -कं.

DERVISE, DERVISH, *s.* तुरुष्कदेशीयः सन्यासी or योगी *m.* (न्).

DESCANT, *s.* (Song) विगीतं, सङ्गीतं, गीतं.—(Discourse) वादः, वाक्यं, प्रवादः, प्रवचनं, वचनं, अनुकथनं, सङ्कथा, वचनक्रमः, भाषितं.

To DESCANT, *v. n.* (Sing) विगै (c. 1. -गायति -गातुं), अनुगै, सङ्गै.—(Discourse at large) सुविस्तरेण वद् (c. 1. वदति -दितुं) or प्रवद्, सुविस्तरं व्याख्या (c. 2. -ख्याति -तुं) or विवरणं कृ.

To DESCEND, *v. n.* (Come down) अवरुह् (c. 1. -रोहति -रोढुं), अवतॄ (c. 1. -तरति -रितुं -रीतुं), अवया (c. 2. -याति -तुं), अधो या, अवपत् (c. 1. -पतति -तितुं), अधो गम् (c. 1. गच्छति, गन्तुं).—(Fall) पत्, निपत्, प्रपत्, च्यु (c. 1. च्यवते, च्योतुं), प्रच्यु.—(Make hostile incursion) आक्रम् (c. 1. -क्रामति -क्रमितुं), आसद् (c. 10. -सादयति -यितुं), अभिद्रु (c. 1. -द्रवति -द्रोतुं), अभिधाव् (c. 1. -धावति -वितुं).—(Arrive, enter) आगम्, अभिगम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं).—(Be derived from) उत्पद् (c. 4. -पद्यते -पत्तुं), प्रसृ (c. 1. -सरति -सर्तुं), प्रभू, निर्गम्.—(Devolve by inheritance) वंशक्रमेण or अन्वयक्रमेण आगम् or आया, पितृसकाशात् प्राप् in pass. (-आप्यते -आप्तुं).—(Descend into particulars) विस्तरशः or विभागशः or उपवर्णेन वद् (c. 1. वदति -दितुं), विस्तीर्णविवरणं कृ, समुद्देशं कृ.

To DESCEND, *v. a.* (Make to come down) अवतॄ in caus. (-तारयति -यितुं), अवरुह् in caus. (-रोहयति -यितुं), अवपत् in caus. (-पातयति -यितुं); 'he descends the tree,' द्रुमात् or तरोर् अवतरति or अवरोहति.

DESCENDANT, *s.* सन्तानः -नं, सन्ततिः *f.*, अपत्यं, प्रवरं, प्रजा, सूनुः *m.*, प्रसवः, प्रसूतिः *f.*, तनुः *m.*; 'descendants,' पुत्रपौत्राः *m. pl.*, कुलसन्ततिः *f.*, अपत्यानि *n. pl.*, कुलं, वंशः; 'male descendant,' पुत्रसन्तानः.

DESCENDED, *p. p.* अवतीर्णः -र्णा -र्णं, अवरूढः -ढा -ढं, अधोगतः -ता -तं; 'lineally descended or inherited,' वंशक्रमागतः -ता -तं or क्रमागतः, क्रमायातः -ता -तं, पितृप्राप्तः -प्ता -प्तं, अन्वयागतः -ता -तं.

DESCENDENT, *a.* अवरोही -हिणी -हि (न्), अधोगामी -मिनी -मि (न्), नीचगः-गा-गं, पातुकः-का-कं, अधःपाती-तिनी-ति (न्), नीचाभिमुखः -खा -खं.

DESCENSION, *s.* अवपातः, अधोगतिः *f.*, पातः, पतनं, अधःपतनं, अधःसरणं.

DESCENT, *s.* (Going downwards) अधोगतिः *f.*, अधोगमः -मनं, अवपातः, अवतारः, अवपतनं, अवतरणं, अवरोहः -हणं, अधोयानं.—(Hostile incursion) अभिक्रमः, अवस्कन्दः, आक्रान्तिः *f.*, प्रयाणं, अभिनियाणं. —(Transmission by succession) क्रमागमः, वंशक्रमागमः, क्रमागतत्वं, अन्वयागमः.—(Birth extraction) जन्म *n.* (न्), उत्पत्तिः *f.*, उद्भवः, सम्भवः, वंशः.—(Lineage) सन्ततिः *f.*, अन्वयः, आवलिः *f.*; 'consanguineous descent,' एकशरीरान्वयः, एकशरीरावयवत्वं.

DESCRIBABLE, *a.* वर्णनीयः -या -यं, निर्देश्यः -श्या -श्यं, निर्वचनीयः -या -यं, व्याख्येयः -या -यं, वर्णयितुं शक्यः -क्या -क्यं.

To DESCRIBE, *v. a.* वर्ण् (c. 10. वर्णयति -यितुं), अनुवर्ण्, उपवर्ण्, संवर्ण्; निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, समुद्दिश्; विवृ (c. 5. -वृणोति -वरितुं -रीतुं), कथ् (c. 10. -कथयति -यितुं), सङ्कथ्; कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्; निर्वच् (c. 2. -वक्ति -वक्तुं); व्याख्या (c. 2. -ख्याति -तुं), विब्रू (c. 2. -ब्रवीति -वक्तुं), निरूप् (c. 10. -रूपयति -यितुं).

DESCRIBED, *p. p.* वर्णितः -ता -तं, उपवर्णितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः -ष्टा -ष्टं, समुद्दिष्टः -ष्टा -ष्टं, निरुक्तः -क्ता -क्तं, व्याख्यातः -ता -तं, कथितः -ता -तं, निरूपितः -ता -तं, विवृतः -ता -तं.

DESCRIPTION, *s.* वर्णनं -ना, उपवर्णनं, विवरणं, विवृतिः *f.*, निर्देशः, समुद्देशः, निरुक्तिः *f.*, निर्वचनं, व्याख्या-ख्यानं, निरूपणं, कथनं, यथार्थकथनं.

DESCRIPTIVE, *a.* निर्देशकः -का -कं, समुद्देशकः -का -कं, वर्णनकृत् *m. f. n.*, वाचकः -का -कं, विवरणकारी -रिणी -रि (न्), यथार्थकथकः -का -कं.

To DESCRY, *v. a.* (Perceive at a distance, see) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक्, दृश् (c. 1. पश्यति, द्रष्टुं), अनुदृश्, प्रदृश्, परिदृश्; ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, अभिवीक्ष्, प्रेक्ष्, वीक्ष्, निर्वर्ण् (c. 10. -वर्णयति -यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), उपलक्ष्.—(Find out, discover) ज्ञा (c. 9. जानाति, ज्ञातुं), अवगम् (c. 1. -गच्छति -गन्तुं), निरूप् (c. 10. -रूपयति -यितुं), सूच् (c. 10. सूचयति -यितुं).

DESCRY, *s.* दूराद् आलोकितं यत्किञ्चिद्, दूरादृष्टं वस्तु.

To DESECRATE, *v. a.* प्रतिष्ठालोपं कृ, संस्कारदूषणं कृ, संस्कारहीनं -नां -नं कृ, अपुण्यं -ण्यां -ण्यं कृ, अपवित्रीकृ, पुण्यत्वं लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), दुष् in caus. (दूषयति -यितुं), व्यभिचर् (c. 1. -चरति -रितुं), कलङ्क (nom. कलङ्कयति -यितुं), मलिनीकृ.

DESECRATED, *p. p.* लुप्तप्रतिष्ठः -ष्ठा -ष्ठं, भग्नसंस्कारः -रा -रं, भ्रष्टपुण्यत्वः -त्वा -त्वं.

DESECRATION, *s.* प्रतिष्ठालोपः, संस्कारदूषणं, पुण्यत्वदूषणं, अपवित्रीकरणं, व्यभिचारः, कलङ्ककरणं, अपुण्यकरणं.

DESERT, *s.* (A wilderness) मरुः *m.*, मरुस्थलं -ली, मरुभूमिः *f.*, जङ्गलं, अरण्यं, वनं, ईरिणं, इरिणं, धन्वा *m.* (न्), रोषणं, विदभैः, वल्लुरं -ल्लूरं.

DESERT, *a.* (Wild) आरण्यः -ण्यी -ण्यं -ण्यकः -का -कं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं, वन्यः -न्या -न्यं, इरिणः -णा -णं, ईरिणः -णा -णं, निर्जनः -ना -नं, निर्जलः -ला -लं, निरालयः -या -यं, शून्यः -न्या -न्यं, खिलः -ला -लं.

DESERT, *s.* (Merit or demerit) गुणागुणं, पुण्यापुण्यं, अर्हत्वं, धर्म्माधर्म्मं. —(Excellence, right to reward) गुणः, पुण्यं, श्रेयः *n.* (स्), सुकृतं, उपयोगः, उपयुक्तता, योग्यत्वं, पात्रता, कृतित्वं, उत्कर्षः, शस्यं, प्रशस्यं.

To DESERT, *v. a.* त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्, सन्त्यज्; हा (c. 3. जहाति, हातुं), अपहा, प्रहा, विहा, अपाहा; रह् (c. 10. रहयति -यितुं), विरह्; उत्सृज् (c. 6. -सृजति -स्रष्टुं), विसृज्, अतिसृज्, उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्; परिहृ (c. 1. -हरति -हर्त्तुं).

To DESERT, *v. n.* (From the army) सेनां त्यक्त्वा परिवृत् (c. 1. -वर्त्तते -र्त्तितुं) or पलाय् (c. 1. पलायते -यितुं) or विपलाय्.

DESERTED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः -क्ता -क्तं, उत्त्यक्तः -क्ता -क्तं, रहितः -ता -तं, विरहितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, विसर्ज्जितः -ता -तं, हीनः -ना -नं, परिहीणः -णा -णं, वर्जितः -ता -तं, शून्यः -न्या -न्यं, उज्झितः -ता -तं, प्रोज्झितः -ता -तं, विनाकृतः -ता -तं, लुप्तः -प्ता -प्तं, अपविद्धः -द्धा -द्धं.

DESERTER, *s.* त्यागी *m.* (न्), त्यक्ता *m.* (क्तृ), सेनात्यागी *m.*, विपलायी *m.* (न्), पलायी *m.* (न्), परिवत्तीं *m.* (न्), परिवत्तृकः, युद्धत्यागी, युद्धपराङ्मुखः.

DESERTION, *s.* (Abandonment) त्यागः, परित्यागः, उत्त्यागः, विरहः, प्रोज्झनं, उत्सर्ज्जनं, विसर्ज्जनं, विसृष्टिः *f.*, परिवत्तिः.—(From the army) सेनात्यागः, युद्धत्यागः, युद्धपलायनं, विपलायनं.

DESERTLESS, *a.* निर्गुणः -णा -णं, अनर्हः -र्हा -र्हं, अनुपयुक्तः -क्ता -क्तं.

To DESERVE, *v. a.* and *n.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or उचितः -ता -तं or योग्यः -ग्या -ग्यम् अस् or भू; 'he deserves honour,' मानम् अर्हति; 'he deserves punishment,' दण्डम् अर्हति; 'he deserves to drink soma juice,' सोमं पातुम् अर्हति; 'does he deserve so large a salary or not?' किम् उपयुक्तोऽयम् एतावद् वत्तनं गृह्णात्य् अनुपयुक्तो वा; 'he deserves death,' वधार्होऽस्ति, मरणोचितोऽस्ति. The future pass. part. may sometimes be used in this sense; as, 'he deserves death,' वध्योऽस्ति; 'he deserves honour,' मान्योऽस्ति, पूजनीयोऽस्ति.

DESERVEDLY, *adv.* अर्हं, उपयुक्तं, योग्यं, उचितं, अर्हत्वेन, न्यायतस्.

DESERVER, *s.* अर्हः; 'good deserver,' सत्पात्रं; 'best deserver,' अर्हत्तमः.

DESERVING, *a.* (Worthy of) अर्हः -र्हा -र्हं, उपयुक्तः -क्ता -क्तं, उचितः -ता -तं, योग्यः -ग्या -ग्यं.—(Meritorious) गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं.

DESERVING, *s.* गुणः, उपयोगः, पुण्यं, अर्हत्वं, धर्म्मः, पात्रता, शस्यं.

DESICCANTS, *a.* व्रणशोषकाः *m. pl.*, क्षतशोषणार्थम् उपनाहः or उपदेहः.

To DESICCATE, *v. a.* शुष् in caus. (शोषयति -यितुं), उच्छुष्, उपशुष्, विशुष्, संशुष्.

To DESICCATE, *v. n.* शुष् (c. 4. शुष्यति, शोष्टुं), विशुष्, शोष् (c. 1. शोषति -षितुं).

DESICCATION, *s.* शोषणं, परिशोषः, उच्छोषणं, शुष्ककरणं, शुष्कत्वं.

DESICCATIVE, *a.* शोषकः -का -कं, उच्छोषणः -णी -णं, शुष्ककृत् *m. f. n.*

To DESIDERATE, *v. a.* अप्रत्यक्षं or अविषयं किञ्चिद्वस्तु इष् (c. 6. इच्छति, एषितुं) or उत्कण्ठ् (c. 1. -कण्ठते -ण्ठितुं) or अभ्याप् in des. (-ईप्सति -प्सितुं).

DESIDERATUM, *s.* अविद्यमानं किञ्चिद् अभीष्टं वस्तु, अवर्त्तमानो वाञ्छनीयविषयः.

To DESIGN, *v. a.* (Purpose, intend) कृ in des. (चिकीर्षति -र्षितुं), अभिप्रे (rt. इ with अभि, प्र; अभिप्रैति -तुं), उपलक्ष् (c. 10. -लक्षयति -यितुं); उद्दिश् (c. 6. -दिशति -देष्टुं), अभिसन्धा (c. 3. -दधाति -धातुं), मनः or मतिं or बुद्धिं कृ or प्रकृ with loc. or abl. case; as, 'he designs a crime,' मनः पापे करोति; 'he designs the death of the king,' राज्ञो विनाशाय मतिं करोति.—(Plan, meditate) चिन्त् (c. 10. चिन्तयति -यितुं), प्रचिन्त्, मन्त्र् (c. 10. मन्त्रयति -यितुं), घट् (c. 1. घटते -टितुं), कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यवसो (c. 4. -स्यति -सातुं).—(Devote to, apply to a particular purpose) प्रयुज् (c. 7. -युंक्ते -योक्तुं), उपयुज्, विनियुज्; as, 'to religious purposes,' धर्म्मार्थम् उपयुज्. —(Draw) आलिख् (c. 6. -लिखति -लेखितुं), सूत्रपातं कृ, संस्कारं कृ, संस्कृ.

DESIGN, *s.* (Intention, purpose) चिकीर्षा -र्षितं, अभिप्रायः, अभिप्रेतं, आशयः, अर्थः, आकूतं, तात्पर्य्यं, आकांक्षा, छन्दः, छन्दः *n.* (स्), सङ्कल्पः, उद्देशः, मतिः *f.*, मतं, कार्य्यं, उपयोगः, प्रयोजनं, उपलक्षितं, अभिसन्धिः *m.*—(Plan, scheme) चिन्ता, उपायः, व्यवसितं, व्यवसायः, प्रक्रान्तं, अनुसन्धानं, कल्पना, घटनं, विधानं.—(Drawing, impression) संस्कारः, आलेख्यं, सूत्रं, सूत्रपातः; 'with the design of,' अर्थं; 'one who has not effected his design,' अकृतार्थः.

To DESIGNATE, *v. a.* (Mark out, indicate) चिह्न् (c. 10. चिह्नयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), उपलक्ष्, विशिष् in caus. (-शेषयति -यितुं), प्रदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, सूच् (c. 10. सूचयति -यितुं).—(Appoint) नियुज् (c. 10. -योजयति -यितुं), परिकॢप् (c. 10. -कल्पयति -यितुं).

DESIGNATED, *p. p.* चिह्नितः -ता -तं, लक्षितः -ता -तं, विशेषितः -ता -तं.

DESIGNATION, *s.* लक्षणं, उपलक्षणं, संलक्षणं, चिह्नं, विशेषणं, संज्ञा, अभिज्ञानं, अभिधानं, आख्या, निर्देशः, सूचनं.

DESIGNED, *p. p.* चिकीर्षितः -ता -तं, अभिप्रेतः -ता -तं, उपलक्षितः -ता -तं, उद्दिष्टः -ष्टा -ष्टं, अर्थवान् -वती -वत् (त्), व्यवसितः -ता -तं, घटितः -ता -तं.

DESIGNEDLY, *adv.* इच्छातस्, मन्त्रतस्, कामतस्, प्रकामं, यथाकामं, मतिपूर्व्वकं, बुद्धिपूर्व्वं, बुद्धिपुरःसरं, मनोपूर्व्वकं, मत्या, बुद्ध्या, तात्पर्य्यतस्, यथाकल्पं.

DESIGNER, *s.* (Contriver) चिन्तकः, उपायचिन्तकः, परिकल्पकः, व्यवसायी *m.* (न्).—(Drawer) आलेखकः, संस्कारलेखकः, सूत्रपातकः.

DESIGNING, *a.* विदग्धः -ग्धा -ग्धं, छली -लिनी -लि (न्), मायी -यिनी -यि (न्), कापटिकः -की -कं, वञ्चनशीलः -ली -लं, प्रतारकः -का -कं, सव्याजः -जा -जं.

DESIGNLESS, *a.* अभिप्रायहीनः -ना -नं, निरर्थकः -का -कं, निष्प्रयोजनः -ना -नं.

DESIGNMENT, *s.* अभिप्रायः, चिकीर्षा, आशयः, अर्थः, अर्थवत्ता, अर्थत्वं, अभिसन्धिः *m.*

DESIRABLE, *a.* स्पृहणीयः -या -यं, स्पृह्यः -ह्या -ह्यं, अभिलषणीयः -या -यं, वाञ्छनीयः -या -यं, कमनीयः -या -यं, काम्यः -म्या -म्यं, लोभ्यः -भ्या -भ्यं, आकांक्षणीयः -या -यं, एषणीयः -या -यं, प्रार्थनीयः -या -यं, अपेक्षणीयः -या -यं, गम्यः -म्या -म्यं; 'a desirable gift,' काम्यदानं.

DESIRABLENESS, *s.* स्पृहणीयता, वाञ्छनीयत्वं, कमनीयता, काम्यत्वं, इष्टत्वं.

DESIRE, *s.* इच्छा, अभिलाषः, अभिलषितं, स्पृहा, वाञ्छा, ईहा, कामः, कामना, कांक्षा, आकांक्षा, अभिकांक्षा, मनोरथः, अभिमतं, समीहितं, लोभः, आशा, तृषा, तृष्णा, इच्छत्वं, इष्टिः *f.*, इष्टं, अभीष्टं, छन्दः *n.* (स्), छन्दं, रुचिः *f.*, अभिरुचिः *f.*, मनस्कामना, मनोभिमतं, अभीप्सा, लिप्सा, औत्सुक्यं, औत्कण्ठ्यं, वशः, लालसा, कौतूहलं, कान्तिः *f.*, वसारं; 'one's desire,' स्वेच्छा; 'according to one's desire,' स्वेच्छातस्, स्वेच्छया, स्ववाञ्छया, स्वरुच्या, यथेष्टं, यथाभिमतं, स्वच्छन्दं. OBS. The noun formed from the desid. base often expresses 'desire'; as, 'desire to drink,' पिपासा; 'desire to burn,' दिधक्षा.

To DESIRE, *v. a.* इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति, c. 4. -लष्यति -लषितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), अभिवाञ्छ्, संवाञ्छ्; कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, अनुकांक्ष्, अभिकांक्ष्; स्पृह् (c. 10. स्पृहयति -यितुं), काम् (c. 10. कामयते -यितुं), ईह् (c. 1. ईहते -हितुं), समीह्, लुभ् (c. 4. लुभ्यति, लोभुं), अभिरुच् in caus. (-रोचयति -यितुं), आप् in des. (ईप्सति -प्सितुं), अभ्याप्, पर्याप्; लभ् in des. (लिप्सते -प्सितुं), अभिलभ्; आशंस् (c. 1. -शंसते -सितुं), गृध् (c. 4. गृध्यति, गर्धितुं), वश् (c. 2. वष्टि, वशितुं).—(Ask, beg for) अर्थ् (c. 10. अर्थयते -ति -यितुं), प्रार्थ्, याच् (c. 1. याचति -चितुं), वृ (c. 9. वृणीते, वरितुं -रीतुं) with 2 acc., निविद् in caus. (-वेदयति -यितुं).

DESIRED, *p. p.* इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं, अभिलषितः -ता -तं, वाञ्छितः -ता -तं, कांक्षितः -ता -तं, आकांक्षितः -ता -तं, अभिकांक्षितः -ता -तं, अभिमतः -ता -तं, ईहितः -ता -तं, समीहितः -ता -तं, ईप्सितः -ता -तं, अभीप्सितः -ता -तं, लिप्सितः -ता -तं, सङ्कल्पितः -ता -तं, हृद्यः -द्या -द्यं.

DESIROUS, *a.* इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, इच्छकः -का -कं, इच्छावान् -वती -वत् (त्), इच्छान्वितः -ता -तं, अभिलाषी -षिणी -षि (न्) -षुकः -का -कं, वाञ्छी -ञ्छिनी -ञ्छि (न्), आकांक्षी -क्षिणी -क्षि (न्) or अभिकांक्षी, एषी -षिणी -षि (न्), अर्थी -र्थिनी -र्थि (न्), कामी -मिनी -मि (न्), कामुकः -का -कं, कामवान् -वती -वत् (त्), कामयानः -ना -नं, लोभी -भिनी -भि (न्), लुब्धः -ब्धा -ब्धं, स्पृहयालुः -लुः -लु, जातस्पृहः -हा -हं, सस्पृहः -हा -हं, साकांक्षः -क्षा -क्षं, ईप्सुः -प्सुः -प्सु or अभीप्सुः or प्रेप्सुः or परिप्रेप्सुः, इष्टी -ष्टिनी -ष्टि (न्), जिघृक्षुः -क्षुः -क्षु, आशंसुः -सुः -सु, आशायुक्तः -क्ता -क्तं, लालसी -सिनी -सि (न्), तृष्णकः -का -कं, कक्षः -क्षा -क्षं. 'Desirous' is sometimes expressed by काम affixed to the infinitive, the final of which is rejected; as, 'desirous to do,' कर्त्तुकामः -मा -मं; 'desirous to go,' गन्तुकामः -मा -मं; or by the adj. formed from the desid. base; as, 'desirous of drinking,' पिपासुः -सुः -सु; 'desirous of taking,' आदित्सुः -त्सुः -त्सु.

To DESIST, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निवृत्, विनिवृत्; शम् (c. 4. शाम्यति, शमितुं), विगस् (c. 1. -गच्छति -गन्तुं), विच्छिद् in pass. (-छिद्यते), विश्रम् (c. 4. -श्राम्यति -श्रमितुं), अपया (c. 2. -याति -तुं); 'he desists from wickedness,' पापाद् विरमति or निवर्त्तते.

DESISTANCE, *s.* विरतिः *f.*, विरामः, निवृत्तिः *f.*, निवर्त्तनं, निवृत्तिः *f.*, उपशमः.

DESISTED, *p. p.* निवृत्तः -त्ता -त्तं, विरतः -ता -तं, उपरतः -ता -तं, शान्तः -न्ता -न्तं, प्रशान्तः -न्ता -न्तं, विगतः -ता -तं, विच्छिन्नः -न्ना -न्नं.

DESK, *s.* लिखनफलकं, लिपिफलकं, लिपिसज्जाधारः, लेखसाधनाधारः.

DESOLATE, *a.* (Solitary, uninhabited) शून्यः -न्या -न्यं, शून्याकारः -रा -रं, विविक्तः -क्ता -क्तं, निर्जनः -ना -नं, निर्मनुष्यः -ष्या -ष्यं, पुरुषवर्जितः -ता -तं, अप्रजः -जा -जं, विलोकः -की -कं, निःशलाकः -का -कं, निरालयः -या -यं, वसतिहीनः -ना -नं.—(Laid waste) उच्छिन्नः -न्ना -न्नं, प्रबाधितः -ता -तं, उपपीडितः -ता -तं.

To DESOLATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं), प्रबाध् (c. 1. -बाधते -धितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), शून्यीकृ, निर्जनीकृ, निर्दह् (c. 1. -दहति -दग्धुं), वसतौ नश् in caus. (नाशयति -यितुं).

DESOLATION, *s.* (Destruction of inhabitants) शून्यीकरणं, निर्जनीकरणं, वसतिनाशः, उच्छेदः, उपपीडनं.—(State of destitution) शून्यता, निर्जनत्वं, विविक्तता, रहितत्वं, विषादः, विपन्नता.

DESPAIR, *s.* निराशा, नैराश्यं, आशाहीनता, दौर्मनस्यं, वैक्लव्यं, विषादः; 'in despair,' त्यक्ताशः, आशाहीनः, गताशः.

To DESPAIR, *v. n.* आशां हा (c. 3. जहाति, हातुं) or त्यज्, आशया हा in pass. (हीयते), नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; निराशीभू, सङ्कुच् (c. 6. -कुटति -टितुं).

DESPAIRINGLY, *adv.* आशां विना, आशया विना, सनैराश्यं, नैराश्यात्.

To DESPATCH, *v. a.* (Send away hastily) सत्वरं प्रस्था in caus. (-स्थापयति -यितुं) or प्रेर् (c. 10. -ईरयति -यितुं) or प्रेष् in caus. (प्रेषयति -यितुं, rt. इष्), सम्प्रेष्, परिप्रेष्, or प्रहि (c. 5. -हिणोति -हेतुं) or प्रया in caus. (-यापयति -यितुं) or चुद् (c. 10. चोदयति -यितुं), or प्रणुद् (c. 6. -णुदति -णोत्तुं).—(Hasten, perform quickly) त्वर् in caus. (त्वरयति -यितुं), सन्त्वर्; त्वरितं कृ or सम्पद् in caus. (-पादयति -यितुं) or प्रवृत् in caus. (-वर्त्तयति -यितुं).—(Kill) व्यापद् in caus. (-पादयति -यितुं), लोकान्तरं प्राप् in caus. (-आपयति -यितुं) or प्रेर्.

DESPATCH, *s.* (Hasty execution) क्षिप्रकारित्वं, शीघ्रनिर्वाहः, त्वरा, तूर्णिः *f.*, आवेगः, अदीर्घसूत्रता.—(Official message) वाचिकं, वाचिकपत्रं, राजकीयपत्रं, राजलेखः -लेख्यं.—(Hasty messenger) धावकः, वेगी *m.* (न्), प्रजवी *m.* (न्), लेखहारी *m.* (न्), वार्त्ताहरः, दूतः.

DESPATCHED, *p. p.* (Sent) प्रस्थापितः -ता -तं, प्रेरितः -ता -तं, प्रेषितः -ता -तं, प्रहितः -ता -तं, प्रयापितः -ता -तं, दूतः -ता -तं, प्रतिसृष्टः -ष्टा -ष्टं, नुन्नः -न्ना -न्नं, प्रणुन्नः -न्ना -न्नं, गमितः -ता -तं, प्रतिक्षिप्तः -प्ता -प्तं.

DESPATCHFUL, *a.* शीघ्रकारी -रिणी -रि (न्) or क्षिप्रकारी, अविलम्बी -म्बिनी -म्बि (न्), अदीर्घसूत्रः -त्रा -त्रं, त्वरायुक्तः -क्ता -क्तं, त्वराशीलः -ला -लं.

DESPERADO, *s.* साहसी *m.* (न्), साहसिकः, अत्याहितकर्म्मी *m.* (न्), आततायी *m.* (न्).

DESPERATE, *a.* (Without hope) निराशः -शा -शं, आशाहीनः -ना -नं, आशारहितः -ता -तं, गताशः -शा -शं, त्यक्ताशः -शा -शं, निःप्रत्याशः -शा -शं.—(Daring) साहसिकः -की -कं -सी -सिनी -सि (न्).—(Fearless) निर्भयः -या -यं, अकुतोभयः -या -यं.—(Irretrievable) निरुपायी -यिनी -यि (न्), अप्रतिकारः -रा -रं or अशक्यप्रतिकारः.—(Furious) उग्रः -ग्रा -ग्रं, संरब्धः -ब्धा -ब्धं.—(Excessive) अत्यन्तः -न्ता -न्तं, अति or सु prefixed; 'a desperate fool,' अतिमूढः; 'a desperate act,' अत्याहितं, साहसकल्पः, आततायिता.

DESPERATELY, *adv.* (Furiously) उन्मत्तवत्, साहसेन -सात्, उग्रं, संरब्धं.—(In a great degree) सु or अति prefixed; अत्यन्तं, भृशं, तीव्रं.

DESPERATENESS, *s.* (Fury, daringness) उन्मादः, संरम्भः, उग्रत्वं, साहसिकत्वं.

DESPERATION, *s.* नैराश्यं, आशाहीनता, आशारहित्यं, निराशा.

DESPICABLE, *a.* अवमाननीयः -या -यं, अवमान्यः -न्या -न्यं or अपमान्यः, अवमन्तव्यः -व्या -व्यं, अवज्ञेयः -या -यं, अवज्ञातव्यः -व्या -व्यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हणीयः -या -यं, गर्हितः -ता -तं, अवगर्हितः -ता -तं, अतिगर्हितः -ता -तं, निन्द्यः -न्द्या -न्द्यं, निन्दनीयः -या -यं, निन्दार्हः -र्हा -र्हं, दूष्यः -ष्या -ष्यं, तुच्छः -च्छा -च्छं, कुत्सितः -ता -तं, क्षुद्रः -द्रा -द्रं, अपकृष्टः -ष्टा -ष्टं.

DESPICABLENESS, *s.* अवमान्यता, गर्ह्यत्वं, निन्द्यता, तुच्छत्वं, दूष्यता.

DESPICABLY, *adv.* गर्हणीयं, गर्हितं, कुत्सितं, अपकृष्टं, तुच्छं.

To DESPISE, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), तृणाय मन्, अभ्यवमन्, परिमन्, गर्ह् (c. 1. गर्हते -र्हितुं), विगर्ह्, कुत्स् (c. 10. कुत्सयति -यितुं), निन्द् (c. 1. निन्दति -न्दितुं), परिभू (c. 1. -भवति -वितुं), अवधीर् (c. 10. अवधीरयति -यितुं), गुप् in des. (जुगुप्सते -प्सितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवध्यै (c. 1. -ध्यायति -ध्यातुं), बाध् in des. (बीभत्सते -त्सितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं),

कदर्थ् (c. 10. -अर्थयते -यितुं), कदर्थीकृ, तुच्छीकृ, लघूकृ.

DESPISED, *p. p.* अवमतः -ता -तं, अवमानितः -ता -तं, विमानितः -ता -तं, अपमानितः -ता -तं, अवज्ञातः -ता -तं, परिभूतः -ता -तं, गर्हितः -ता -तं, विगर्हितः -ता -तं, अवधीरितः -ता -तं, कदर्थितः -ता -तं, अवध्यातः -ता -तं, निन्दितः -ता -तं, उपेक्षितः -ता -तं, अवगणितः -ता -तं.

DESPISER, *s.* अवमन्ता *m.* (न्तृ), अवज्ञाता *m.* (तृ), अवमानकर्त्ता *m.* (र्त्तृ), निन्दकः.

DESPITE, *s.* (Malice) द्वेषः, द्रोहः, मात्सर्य्यं, ईर्ष्या, अभ्यसूया, दुर्बुद्धिः *f.*, नृशंस्यं, दौर्जन्यं, दंशः.—(Opposition) प्रतिरोधः, विरोधः, प्रतियोगः, प्रतिकारः, प्रतिकूलता; 'in despite,' अनिच्छया, विरुद्धं, प्रातिकूल्येन, or expressed by the gen. c. of the pres. part. of the root दृश् 'to see,' or मिष्; 'in despite of thee,' पश्यतस् तव; 'in despite of the princes,' मिषतां पार्थिवानां.

To DESPITE, *v. a.* कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), तप् in caus. (तापयति -यितुं), सन्तप्; क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), व्यथ् in caus. (व्यथयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं).

DESPITEFUL, *a.* द्रोही -हिणी -हि (न्), द्रोहबुद्धिः -द्धिः -द्धि or दुर्बुद्धिः, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), सासूयः -या -यं, विषहृदयः -या -यं, नृशंसः -सा -संं, मत्सरः -रा -रं, द्वेषी -षिणी -षि (न्), अहितेच्छुः -च्छुः -च्छु, हिंसाशीलः -ला -लं.

DESPITEFULLY, *adv.* सद्रोहं, सद्वेषं, हिंसापूर्व्वं, नृशंसं, साभ्यसूयं.

DESPITEFULNESS, *s.* द्रोहः, द्वेषः, मात्सर्य्यं, नृशंस्यं, दंशः, दौर्जन्यं.

To DESPOIL, *v. a.* हृ (c. 1. हरति, हर्त्तुं), अपहृ, विमुच् (c. 6. -मुञ्चति -मोक्तुं), वियुज् in caus. (-योजयति -यितुं), विप्रयुज् with inst. c.; 'despoil of leaves,' निष्पत्रीकृ.

DESPOILED, *p. p.* हृतः -ता -तं, अपहृतः -ता -तं, वियुक्तः -क्ता -क्तं, वियोजितः -ता -तं; 'despoiled of all possessions,' हृतसर्व्वस्वः -स्वा -स्वं.

DESPOILER, *s.* हर्त्ता *m.* (र्त्तृ), हारकः, अपहारकः, अपहारकृत्, लुण्टाकः.

DESPOLIATION, *s.* हरणं, अपहारणं, अभिहारः, अभ्याहारः, अभिग्रहणं.

To DESPOND, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्; निर्वेदं or विषादं or नैराश्यम् उपगम् (c. 1. -गच्छति -गन्तुं) or गम्; आशां हा (c. 3. जहाति, हातुं) or त्यज् (c. 1. त्यजति, त्यक्तुं), निर्विण्णीभू, निर्विद् (c. 4. -विद्यते -वेत्तुं), सङ्कुच् (c. 6. -कुटति -टितुं).

DESPONDENCY, *s.* विषादः, निर्वेदः, विषण्णता, निर्विण्णता, नैराश्यं, निराशा, अवसन्नता, उद्वेगः, दौर्मनस्यं, ग्लानिः *f.*, क्लान्तिः *f.*

DESPONDENT, *a.* विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), निर्विण्णः -ण्णा -ण्णं, निराशः -शा -शं, आशाहीनः -ना -नं, त्यक्ताशः -शा -शं, अवसन्नः -न्ना -न्नं, उद्विग्नमनाः -नाः -नः (स्) or दुर्मनाः or अन्तर्मनाः, ग्लानः -ना -नं.

DESPONDINGLY, *adv.* सनिर्वेदं, सविषादं, निर्वेदात्, सनैराश्यं.

To DESPONSATE, *v. a.* वाग्दत्तां कृ, वाग्दानेन विवाहार्थं प्रतिज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), कन्यां प्रदा, प्रतिज्ञाविवाहितां कृ.

DESPONSATION, *s.* वाग्दानं, कन्याप्रदानं, विवाहार्थं प्रतिज्ञानं.

DESPOT, *s.* सम्राट् *m.* (ज्), अधिराजः, चक्रवर्त्ती *m.* (न्), सर्व्वेश्वरः, राजाधिराजः, एकराजः, स्वाधीनराजः, स्वयम्प्रभुः.

DESPOTIC, DESPOTICAL, *a.* अनधीनः -ना -नं, अनायत्तः -त्ता -त्तं, अधिराजकः -का -कं, स्वयम्प्रभुः -भुः -भु, साम्राजिकः -की -कं, स्वयम्प्रभुत्वकारी -रिणी -रि (न्).

DESPOTICALLY, *adv.* अधिराजवत्, अनायत्तं, स्वेच्छातस्, स्वकामतस्, स्वच्छन्दं.

DESPOTISM, *s.* साम्राज्यं, अधिराज्यं, ऐकपत्यं, स्वेच्छाप्रभुत्वं, अनधीनत्वं.

To DESPUMATE, *v. n.* फेन (nom. फेनायते), उत्सेचनं कृ, मण्ड (nom. मण्डायते).

DESPUMATION, *s.* फेनोत्सेचनं, मण्डोत्सेचनं, उत्सेचनं, उत्पीडः.

DESQUAMATION, *s.* त्वक्परिपुटनं, अस्थिपरिपुटनं, अध्यस्थिपरिपुटनं.

DESSERT, *s.* भोजनान्ते परिवेशितं फलमोदकादिखाद्यं, फलाहारः.

DESTINATION, *s.* (Purpose for which any thing is intended) अर्थः, अर्थत्वं, प्रयोगः, उपयोगः, प्रयोजनं, उद्देशः, आशयः, अभिप्रायः, तात्पर्य्यं.—(Place of destination) अग्रभूमिः *f.*, अग्रस्थानं, अग्रं. निरूपितस्थानं.

To DESTINE OR DESTINATE, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), प्रकॢप् (c. 10. -कल्पयति -यितुं), परिकॢप्, निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, प्रदिश्, समादिश्; नियुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), प्रयुज्, उपयुज्, विनियुज्, प्रस्था in caus. (-स्थापयति -यितुं), अभिसन्धा (c. 3. -दधाति -धातुं).

DESTINED, *p. p.* निरूपितः -ता -तं, परिकल्पितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं.

DESTINY, *s.* दैवं, भाग्यं, भागधेयं, कृतान्तः, विधिः *m.*, विधाता *m.* (तृ), भवितव्यता, दैविकं, अदृष्टं, नियतिः *f.*, कालनियोगः, कालधर्म्मः, दिष्टं, प्राक्तनं.

DESTITUTE, *a.* (Poor, abject, friendless) निर्धनः -ना -नं, अर्धहीनः -ना -नं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं, दुर्गतः -ता -तं, निःस्वः -स्वा -स्वं, निराश्रयः -या -यं, अपाश्रयः -या -यं, अशरणः -णा -णं, बन्धुहीनः -ना -नं.—(Deprived of, in want of) हीनः -ना -नं, विहीनः -ना -नं, परिहीणः -णा -णं, रहितः -ता -तं, विरहितः -ता -तं, वर्जितः -ता -तं, विवर्जितः -ता -तं, शून्यः -न्या -न्यं, विनाकृतः -ता -तं, वियुक्तः -क्ता -क्तं, लुप्तः -प्ता -प्तं, हृतः -ता -तं, अपेतः -ता -तं; 'destitute of fruit,' फलहीनः -ना -नं or फलरहितः -ता -तं or फलापेतः -ता -तं or हृतफलः -ला -लं; 'destitute of means,' असाधनः -ना -नं.

DESTITUTION, *s.* (State of being deprived) हीनत्वं, रहितत्वं, शून्यता.—(Absence of a thing) अभावः, असम्भवः, विरहः.—(Want of money, &c., poverty) धनाभावः, वर्त्तनाभावः, निष्किञ्चनत्वं, अकिञ्चनं, दारिद्र्यं, बन्धुहीनता, असहायता, अभूमिः *f.*

To DESTROY, *v. a.* (Put an end to, ruin) नश् in caus. (नाशयति -यितुं), विनश्, प्रणश्; साध् in caus. (साधयति -यितुं), संसाध्; क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षययति, क्षपयति -यितुं), सद् in caus. (सादयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं or caus. लोपयति -यितुं), विलुप्; ध्वंस् in caus. (ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्; उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निर्दह् (c. 1. -दहति -दग्धुं), ग्रस् (c. 1. ग्रसते -सितुं).—(Kill) हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं), व्यापद् in caus. (-पादयति -यितुं), मृ in caus. (मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), अभिसूद्, निसूद्, विनिसूद्, सन्निसूद्; शद् in caus. (शातयति -यितुं), प्रमी in caus. (-मापयति -यितुं), क्षण् (c. 8. क्षणोति -णितुं).

DESTROYED, *p. p.* नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः -ता -तं, प्रणष्टः -ष्टा -ष्टं, सादितः -ता -तं, सूदितः -ता -तं, हतः -ता -तं, घातितः -ता -तं, ध्वंसितः -ता -तं, उच्छिन्नः -न्ना -न्नं, भग्नः -ग्ना -ग्नं, व्यापादितः -ता -तं.

DESTROYER, *s.* विनाशकः, नाशी *m.* (न्), नाशकारी *m.* (न्), विनाशकारी, हन्ता *m.* (न्तृ), निहन्ता, घाती *m.* (न्), क्षयकरः, अन्तकः, अन्तकृत्, ध्वंसकः, ध्वंसकारी *m.* (न्), प्रलयकर्त्ता *m.* (र्त्तृ), सूदनः, अपहः; 'destroying angel,' कृतान्तः.

DESTRUCTIBLE, *a.* नाशनीयः -या -यं, नाश्यः -श्या -श्यं, विनश्वरः -रा -रं, ध्वंसनीयः -या -यं, अवसेयः -या -यं, क्षयी -यिणी -यि (न्).

DESTRUCTION, *s.* नाशः, विनाशः, विनष्टिः *f.*, प्रणाशः, क्षयः, ध्वंसः, प्रध्वंसः, सादनं, सूदनं, प्रलयः, संहारः, अपायः, अत्ययः, विलोपनं, लोपः, समुच्छेदः, उद्दलनं, उत्पाटनं, क्षैण्यं.—(Murder) घातः -तनं, मारणं, बधः, निहननं, प्रमापणं.—(Of the world) प्रलयः, कल्पान्तः, जहानकः, जिहानकः, संवर्त्तः, क्षयः.

DESTRUCTIVE, *a.* नाशी -शिनी -शि (न्) or प्रणाशी, विनाशकः -का -कं, क्षयकरः -री -रं, घाती -तिनी -ति (न्) or विघाती, घातुकः -का -कं, प्रध्वंसी -सिनी -सि (न्) or परिध्वंसी, अनकरः -री -रं, सूदनः -नी -नं, प्रमापी -पिणी -पि (न्), आत्ययिकः -की -कं, निधनकारी -रिणी -रि(न्), नाश्यः -श्या -श्यं, प्राणहरः -रा -रं, अपकारकः -का -कं, पांसनः -ना -नं, अभिमर्शनः -ना -नं, क्रूरः -रा -रं, अपहः -हा -हं or हः हा हं or घ्नः घ्ना घ्नं in comp.

DESTRUCTIVELY, *adv.* सनाशं, विनाशेन, विनाशकप्रकारेण, आत्ययिकं.

DESTRUCTIVENESS, *s.* नाशकत्वं, नाशित्वं, घातुकत्वं, अपकारकता.

DESUETUDE, *s.* विरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, निवर्त्तनं, विच्छेदः.

DESULTORY, *a.* चञ्चलः -ला -लं, अस्थिरः -रा -रं, लोलः -ला -लं, तरलः -ला -लं, चपलः -ला -लं, सङ्कुसुकः -का -कं, अधीरः -रा -रं, उच्छृङ्खलः -ला -लं.

To DETACH, *v. a.* (Separate) भिद् (c. 7. भिनत्ति, भेत्तुं), विभिद्, वियुज् (c. 7. -युनक्ति -योक्तुं), विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवच्छिद्, विश्लिष् in caus. (-श्लेषयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं), पृथक्कृ.—(Send out a party from the main army) सर्व्वसैन्यमध्यात् कतिपयसैन्यान् इमरकरणार्थं प्रस्था in caus. (-स्थापयति -यितुं).

DETACHED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विच्छिन्नः -न्ना -न्नं, अवच्छिन्नः -न्ना -न्नं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, असक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, गतसङ्गः -ङ्गा -ङ्गं, निर्युक्तिकः -का -कं.

DETACHMENT, *s.* (Act of detaching) वियोगः, विप्रयोगः, विभेदः, विच्छेदः, अवच्छेदः, विश्लेषः, व्यासङ्गः, अनभिष्वङ्गः.—(Body of troops sent out for petty warfare) इमरकरणार्थं प्रस्थापितः सैन्यगुल्मः, सैन्यदलं.

DETAIL, *s.* विवरणं, विस्तारः, विस्तरः, वाग्विस्तारः, उपवर्णः -र्णनं, वृत्तान्तविवरणं, सर्व्ववृत्तान्तव्याख्या; 'in detail,' विस्तरेण, विस्तरशस्, सुविस्तरं, उपवर्णेन, विभागशस्.

To DETAIL, *v. a.* सुविस्तरेण कथ् (c. 10. कथयति -यितुं) or आख्या (c. 2. -ख्याति -तुं), सर्व्ववृत्तान्तं विवृ (c. 5. -वृणोति -वरितुं -रीतुं) or व्याख्या; उपवर्ण् (c. 10. -वर्णयति -यितुं), वृत्तान्तविवरणं कृ.

DETAILED, *p. p.* and *a.* उपवर्णितः -ता -तं, सविस्तरः -रा -रं, विस्तीर्णः -र्णा -र्णं.

To DETAIN, *v. a.* (Keep what belongs to another) परद्रव्यं धृ (c. 1. धरति, धर्त्तुं or caus. धारयति -यितुं) or सन्धृ or परिभुज् (c. 7. -भुंक्ते -भोक्तुं).—(Keep back, withhold) निवृ in caus. (-वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विधृ in caus., उपसंहृ (c. 1. -हरति -हर्त्तुं) संहृ.—(Restrain from departure) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं) अवरुध्.—(Hold in confinement) कारायां निरुध् or आसिध् (c. 1. -सेधति -सेद्धुं) or बन्ध् (c. 9. बध्नाति, बन्धुं).

DETAINED, *p. p.* धृतः -ता -तं, निरुद्धः -द्धा -द्धं, निवारितः -ता -तं.

DETAINER, *s.* धारकः, धर्त्ता *m.* (र्त्तृ), परिभोक्ता *m.* (क्तृ), निरोधकः.

To DETECT, *v. a.* ज्ञा (c. 9. जानाति, ज्ञातुं), विज्ञा, परिज्ञा, अभिज्ञा, निरूप् (c. 10. -रूपयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अधिगम्, अध्यागम्, धृ (c. 1. धरति, धर्त्तुं), आसद् (c. 10. -सादयति -यितुं), प्रोत्सद्, अनुसन्धा (c. 3. -दधाति -धातुं), व्यञ्ज् in caus. (-अञ्जयति -यितुं), व्यक्तीकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं).

DETECTED, *p. p.* ज्ञातः -ता -तं, विज्ञातः -ता -तं, अभिज्ञातः -ता -तं, अवगतः -ता -तं, निरूपितः -ता -तं, धृतः -ता -तं, निर्णीतः -ता -तं, व्यञ्जितः -ता -तं, व्यक्तीकृतः -ता -तं; 'in a crime,' दृष्टदोषः -षा -षं.

DETECTION, *s.* ज्ञानं, परिज्ञानं, विज्ञानं, निरूपणं, निर्णयः, धरणं, अवगमः, अनुसन्धानं, व्यक्तीकरणं, विवृतिः *f.*

DETENTION, *s.* धरणं, धारणं, सन्धारणं, निग्रहः, निवारणं, संहरणं, संरोधः, अमुक्तिः *f.*, अमोक्षः.—(Confinement) रोधः, निरोधः -धनं, आसेधः, स्थानासेधः, सम्प्रतिरोधकः.—(Forcible detention of a debtor) बलात्कारः.

To DETER, *v. a.* भयहेतुं दर्शयित्वा निवृत् in caus. (-वर्त्तयति -यितुं) or निवर्त्तय् in caus., or विरम् in caus. (-रमयति -यितुं) or निवृ in caus. (-वारयति -यितुं), विभी in caus. (-भाययति -यितुं), अवभर्त्स् in caus. (-भर्त्सयति -ते -यितुं).

To DETERGE, *v. a.* मलम् अपमृज् (c. 1. -मार्ष्टि -ष्टुं), परिमृज्, परिष्कृ.

DETERGENT, *a.* परिमार्ज्जकः -का -कं, परिमार्ष्टृकः -ष्ट्री -ष्टृ, शोधकः -का -कं.

To DETERIORATE, *v. n.* क्षि in pass. (क्षीयते), ह्रस् (c. 1. ह्रसते -सितुं), दुष् (c. 4. दुष्यति, दोष्टुं), भंश् (c. 4. भ्रश्यति, भ्रंशितुं), विकृतीभू, अन्यथाभू, विकलीभू.

To DETERIORATE, *v. a.* दुष् in caus. (दूषयति -यितुं), किकलीकृ, विकृ, अपकृष् (c. 1. -कर्षति -क्रष्टुं), ह्रस् in caus. (ह्रासयति -यितुं).

DETERIORATED, *p. p.* क्षीणः -णा -णं, परिभ्रष्टः -ष्टा -ष्टं, विकलः -ला -लं.

DETERIORATION, *s.* (Growing worse) विकारः, विकृतिः *f.*, ह्रासः, अपचयः, क्षयः, क्षीणता, भ्रष्टता, दुष्टता, अधोगतिः *f.*, अन्यथाभावः.—(Making worse) अपकर्षः -र्षणं, विकलीकरणं.

DETERMENT, *s.* निवर्त्तनं, निवृत्तिः *f.*, उद्योगभङ्गः, उद्यमव्याघातः, विघ्नः.

DETERMINABLE, *a.* निर्णेयः -या -यं, विवेचनीयः -या -यं, निर्धारणीयः -या -यं, निर्धार्य्यः -र्य्या -र्य्यं, अवधारणीयः -या -यं, अवधार्य्यः -र्य्या -र्य्यं.

DETERMINATE, *a.* (Settled, definite) निश्चितः -ता -तं, निर्णीतः -ता -तं, नियतः -ता -तं, निर्धारितः -ता -तं, सिद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, निर्दिष्टः -ष्टा -ष्टं, व्यवस्थापितः -ता -तं, व्यवस्थितः -ता -तं.—(Decisive) निश्चायकः -का -कं, निर्णायकः -का -कं.—(Resolved) व्यवसितः -ता -तं, कृतनिश्चयः -या -यं.

DETERMINATELY, *adv.* निश्चितं, सनिश्चयं, सनिर्णेयं, निर्णेयपूर्व्वं, सङ्कल्पपूर्व्वं.

DETERMINATION, *s.* निश्चयः, निर्णेयः, सङ्कल्पः, व्यवसायः, कल्पः, सम्प्रधारणा, निर्धारणं, अवधारणं, सिद्धिः *f.*, निष्पत्तिः *f.*, व्यवस्थितिः *f.*, विचारः, विवेचना; 'firm determination,' दृढनिश्चयः.—(Persevering direction to an end) अभिनिवेशः, निर्बन्धः, अध्यवसायः.

DETERMINATIVE, *a.* निश्चायकः -का -कं, निर्णायकः -का -कं, निर्धारकः -का -कं.

To DETERMINE, *v. a.* (Fix, settle) स्था in caus. (स्थापयति -यितुं), अवस्था, व्यवस्था; सिध् in caus. (साधयति -यितुं), स्थिरीकृ, सिद्धीकृ, परिकल्प् (c. 10. -कल्पयति -यितुं).—(Decide) निश्चि (c. 5. -चिनोति -चेतुं), निर्णी (c. 1. -णयति -णेतुं), विचर् in caus. (-चारयति -यितुं).—(Resolve) व्यवसो (c. 4. -स्यति -सातुं), अध्यवसो, सङ्कल्प्, मनो निविश् in caus. (-वेशयति -यितुं).—(Ascertain) निरूप् in caus. (-रूपयति -यितुं), अवधृ in caus. (-धारयति -यितुं), सम्प्रधृ, निर्धृ.—(Define) निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष् (c. 10. लक्षयति -यितुं).—(Confine) परिमा (c. 2. -माति -तुं).—(Direct, influence the choice) उद्दिश्; प्रेर् in caus. (-ईरयति -यितुं), प्रयुज् in caus. (-योजयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं).

To DETERMINE, *v. n.* (Come to a decision) निश्चयं कृ, निर्णेयं कृ, सङ्कल्पं कृ.—(End, come to a conclusion) सिध् in pass. (सिध्यते or c. 4. सिध्यति), सम्पद् (c. 4. -पद्यते -पत्तुं), अवसो (c. 4. -स्यति -सातुं), व्यवसो; 'I am determined to do that,' तत् कर्त्तुं व्यवसितोऽस्मि.

DETERMINED, *p. p.* निश्चितः -ता -तं, निर्णीतः -ता -तं, कृतनिश्चयः -या -यं,

व्यवसितः -ता -तं, सिद्धः -द्धा -द्धं, व्यवस्थितः -ता -तं, निर्धारितः -ता -तं, अवधारितः -ता -तं, नियतः -ता -तं, प्रयतितः -ता -तं, निर्दिष्टः -ष्टा -ष्टं, विचारितः -ता -तं, सङ्कल्पितः -ता -तं.—(Resolute) साङ्कल्पिकः -की -कं, व्यवसायी -यिनी -यि (न्), सुस्थिरः -रा -रं, स्थिरमतिः -तिः -ति, अभिनिविष्टः -ष्टा -ष्टं; 'determined to sacrifice life,' प्राणांस् त्यक्तुं सुनिश्चितः or व्यवसितः.

DETERMINEDLY, *adv.* सुस्थिरं, स्थिरचेतसा, सुनिश्चितं, बुद्धिपुरःसरं, बुद्धा.

DETERMINER, *s.* निर्णेता *m.* (तृ), निश्चयकारी *m.* (न्), सङ्कल्पकृत्.

DETERSIVE, *a.* अपमार्ज्जकः -का -कं, शोधकः -का -कं, परिष्कारकः -का -कं.

To DETEST, *v. a.* द्विष् (c. 2. द्वेष्टि -ष्टुं), प्रद्विष्, विद्विष्, गर्ह् (c. 1. गर्हते -र्हितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), अभिद्रुह्, बाध् in des. (बीभत्सते -त्सितुं) घृण् (c. 1. घृणते -णितुं).

DETESTABLE, *a.* द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, गर्हणीयः -या -यं, गर्ह्यः -र्ह्या -र्ह्यं, गर्हितः -ता -तं, घृणार्हः -र्हा -र्हं, अश्लिगतः -ता -तं.

DETESTABLY, *adv.* गर्हणीयं, गर्हितं, द्वेषणीयं, विद्विष्टं, घृणार्हं.

DETESTATION, *s.* द्वेषः, विद्वेषः, विद्विष्टता, गर्हा -र्हणं, बीभत्सः, घृणा.

DETESTED, *p. p.* द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, गर्हितः -ता -तं, घृणितः -ता -तं, ख्यातगर्हणः -णा -र्णं, अवगीतः -ता -तं.

DETESTER, *s.* द्वेषी *m.* (न्), विद्वेषी *m.*, विद्वेष्टा *m.* (ष्टृ), गर्हाकारी *m.* (न्).

To DETHRONE, *v. a.* राज्यात् or सिंहासनात् पत् in caus. (पातयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or भ्रंश् in caus. (भ्रंशयति -यितुं) or उत्पट् in caus. (-पाटयति -यितुं).

DETHRONED, *p. p.* राज्यभ्रष्टः -ष्टा -ष्टं, भ्रष्टराज्यः -ज्या -ज्यं, राज्यात्प्रभंशितः -ता -तं, राज्यप्रच्युतः -ता -तं, सिंहासनात्पातितः -ता -तं, राज्यादुत्पाटितः -ता -तं.

DETHRONEMENT, *s.* राज्यभ्रंशः, राज्यात्प्रभंशनं, राज्यात्पातनं, राज्यादुत्पाटनं.

To DETONATE, *v. n.* स्तन् (c. 1. स्तनति -नितुं), स्फूर्ज् (c. 1. स्फूर्जति -र्जितुं), तीक्ष्णशब्दं कृ.

DETONATION, *s.* स्तनितं, स्तननं, स्फूर्जनं, विस्फूर्जितं, तीक्ष्णशब्दः, आस्फोटनशब्दः.

To DETORT, *v. a.* विकृ, साचीकृ, वक्रीकृ, विरूप् (c. 10. -रूपयति -यितुं).

To DETRACT, *v. a.* (Take away from) अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्, अपहृ (c. 1. -हरति -हर्तुं), अपनी (c. 1. -नयति -नेतुं).—(Diminish, lessen the value) अल्पीकृ, न्यूनीकृ, कन (nom. कनयति -यितुं), लघ (nom. लघयति -यितुं), लघूकृ, ह्रस् in caus. (ह्रासयति -यितुं).—(Disparage, calumniate) असूय (nom. असूयति -ते -यितुं), अभ्यसूय, अपवद् (c. 1. -वदति -दितुं), परिवद्; निन्द् (c. 1. निन्दति -न्दितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेपुं), आक्षिप्.

DETRACTION, *s.* (Taking away, diminishing) अपकर्षः -र्षणं, अपनयनं, अपहरणं, अल्पीकरणं, न्यूनीकरणं, लघूकरणं, ह्रासः.—(Disparagement, calumny) असूया -यनं, अभ्यसया, असूयुः *m.*, अपवादः, परिवादः, गणापवादः, गुणनिन्दा, गुणघातः, परगुणमत्सरः, परदोषवादः, परदोषाभिधानं, दोषाविष्करणं, पिशुनवाक्यं, पैशुन्यं, कौलीनं, विगानं, आक्षेपः, कलङ्कः, वाग्दोषः.

DETRACTOR, *s.* असूयकः, अभ्यसूयकः, अपवादी *m.* (न्), गुणापवादकः, परिवादी *m.* (न्), गुणघाती *m.* (न्), परगुणासहनः, निन्दकः, आक्षेपकः, सूचकः, खलः.

DETRACTORY, DETRACTIVE, *a.* असूयकः -का -कं, अभ्यसूयकः -का -कं, असूकः -का -कं, अपवादकः -का -कं, गुणघाती -तिनी -ति (न्), परिवादी -दिनी -दि (न्), लाघवकारी -रिणी -रि (न्), पिशुनः -ना -नं, कलङ्ककरः -री -रं, अकीर्त्तिकरः -री -रं.

DETRACTRESS, *s.* अपवादिनी, परिवादिनी, अभ्यसूयका, निन्दाकारिणी.

DETRIMENT, *s.* क्षतिः *f.*, अपायः, हानिः *f.*, अपकारः, अपचयः, हिंसा, द्रोहः, अनिष्टं, नाशः, विनाशः, विरोधः, क्षतं, अपकृतं, अपचितिः *f.*, अपहारः, क्षयः, उपक्षयः, दोषः, बाधः, भंशः, ध्वंसः, प्रध्वंसः, व्ययः.

DETRIMENTAL, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), घातुकः -का -कं, उपघातकः -का -कं, हिंस्रः -स्रा -स्रं, हिंसकः -का -कं, विरोधी -धिनी -धि (न्), क्षतिकारकः -का -कं, हानिजनकः -का -कं, द्रोही -हिणी -हि (न्).

To DETRUDE, *v. a.* निपत् in caus. (-पातयति -यितुं), अधःपत् in caus. or अधोऽधः पत्, अधःक्षिप् (c. 6. -क्षिपति -क्षेपुं), अधःकृ, प्रभंश् in caus. (-भंशयति -यितुं).

To DETRUNCATE, *v. a.* अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवकृत् (c. 6. -कृन्तति -कर्त्तितुं).

DETRUNCATION, *s.* छेदः, कर्त्तनं, अवच्छेदः, अवकर्त्तनं, लोपः -पनं.

DETRUSION, *s.* निपातनं, अधःपातनं, अधोऽधःपातनं, अधःक्षेपणं.

DEUCE, *s.* (Two) द्विः, द्वयं, द्विकं.—(Devil) पिशाचः, वेतालः, भूतः.

DEUTERONOMY, *s.* ईश्वरीयव्यवस्थाया द्वितीयविवरणं, मूसालिखितं पञ्चमपुस्तकं.

To DEVASTATE, *v. a.* उपपीड् (c. 10. -पीडयति -यितुं); बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्; उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिमृद् (c. 1. -मर्दति -र्दितुं), अवमृद्, उपप्लु (c. 1. -प्लवते -प्लोतुं), दह् (c. 1. दहति, दग्धुं), निर्दह्.

DEVASTATED, *p. p.* पीडितः -ता -तं, विप्लुतः -ता -तं, उपद्रुतः -ता -तं.

DEVASTATION, *s.* विप्लवः, उपप्लवः, उपपीडनं, पीडनं, उपद्रवः, अवमर्दः, बाधा, प्रबाधा, उच्छेदः, विनाशः, अभिसम्पातः.

To DEVELOP, *v. a.* विवृ (c. 5. -वृणोति -णुते -वरितुं -रीतुं), अपावृ; प्रकाश् in caus. (-काशयति -यितुं), विकाश्, प्रकटीकृ, उत्पट् in caus. (-पादयति -यितुं), विस्तृ in caus. (-स्तारयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), विप्रथ् in caus. (-प्रथयति -यितुं), व्याकृ.

DEVELOPED, *p. p.* विवृतः -ता -तं, विकाशितः -ता -तं, उत्पादितः -ता -तं.

DEVELOPMENT, *s.* विवृतिः *f.*, विवरणं, विकाशनं, प्रकाशनं, प्रसारणं, उत्पत्तिः *f.*, उत्पादनं, विस्तृतिः *f.*, विस्तारणं, प्रकटीकरणं, व्याकरणं.

DEVERGENCE, *s.* अधःपतनं, अधोगतिः *f.*, च्युतिः *f.*, भंशः, उत्क्रमः, वक्रता.

To DEVIATE, *v. n.* भ्रंश् (c. 4. भ्रश्यति, भ्रंशितुं), विभ्रंश्, च्यु (c. 1. च्यवते, च्योतुं), विच्यु, विचल् (c. 1. -चलति -लितुं), उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), व्यभिचर् (c. 1. -चरति -रितुं) all with abl. c., त्यज (c. 1. त्यजति, त्यक्तुं) with acc. c.

DEVIATED, *p. p.* भ्रष्टः -ष्टा -ष्टं, च्युतः -ता -तं, विचलितः -ता -तं.

DEVIATION, *s.* भंशः, च्युतिः *f.*, विचलनं, उत्क्रमः, व्यभिचारः, भ्रान्तिः *f.*, भ्रमः, भ्रेषः, विक्रिया, त्यागः.—(From the right way) सत्पथभंशः, सत्पथत्यागः, उत्पथगमनं, विमार्गगमनं, कुपथगमनं, यथोचिताद्भ्रंशः.

DEVICE, *s.* (Contrivance) उपायः, व्यपदेशः, अपदेशः, व्यवसायः, प्रयोगः, कैतवप्रयोगः, प्रयुक्तिः *f.*, युक्तिः *f.*, कल्पना, चेष्टा, साधनं, प्रोत्साहनं, मन्त्रणा, छलं, माया, विधः; 'a good device,' सुयुक्तिः *f.*—(Project) अभिप्रायः, आशयः, चिन्ता.—(Emblem) चिह्नं, अङ्कः, कुलीनपदचिह्नं.

DEVIL, *s.* पिशाचः, भूतः, वेतालः, अपदेवता. *See* DEMON. The translators of the Bible have coined the word शैतान् from the Arabic.

DEVILISH, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतः -ती -तं -तिकः -की -कं

DEVILISHLY, *adv.* पिशाचवत्, वेतालवत्.—(Greatly) अत्यर्थं, भृशं.

DEVIOUS, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं, व्यभिचारी -रिणी -रि (न्), अनाचारी -रिणी -रि (न्), भ्रमी -मिणी -मि (न्).

To DEVISE, *v. a.* प्रचिन्, (c. 10. -चिन्तयति -यितुं), परिचिन्, मनसा कॢप् (c. 10. कल्पयति -यितुं) or परिकॢप्, अनुसन्धा (c. 3. -दधाति -धातुं), विधा, घट् (c. 1. घटते -टितुं), मन्त्र् (c. 10. मन्त्रयति -यितुं), व्यवसो (c. 4. -स्यति -सातुं), आलोच् (c. 10. -लोचयति -यितुं).—(Grant by will) दानपत्रेण स्वरिक्थं दायादादिभ्यः प्रदा (c. 1. -यच्छति -दातुं) or समृ in caus. (-अर्पयति -यितुं).

To DEVISE, *v. n.* उपायप्रयोगं कृ, उपायचिन्तां कृ, व्यपदेशं कृ.

DEVISE, *s.* (Bequeathing by will) दानपत्रेण दायादिभ्यो रिक्थप्रदानं.

DEVISED, *p. p.* प्रचिन्तितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं, परिकल्पितः -ता -तं; 'well-devised,' सुघटितः -ता -तं.

DEVISEE, *s.* धनहारी *m.* (न्), धनाधिकारी *m.* (न्), अधिकारी, दानपात्रं.

DEVISER, *s.* (Contriver) उपायचिन्तकः, उपायज्ञः, उपेता *m.* (तृ), उपायी *m.* (न्), प्रयोजकः, परिकल्पकः, व्यवसायी *m.* (न्).

DEVISOR, *s.* दानपत्रेण रिक्थप्रदाता *m.* (तृ), सम्प्रदाता *m.*

DEVOID, *a.* (Empty) शून्यः -न्या -न्यं.—(Free from) हीनः -ना -नं, विहीनः -ना -नं, रहितः -ता -तं, विरहितः -ता -तं, शून्यः -न्या -न्यं, वर्जितः -ता -तं, विवर्जितः -ता -तं, उज्झितः -ता -तं, वीतः -ता -तं, गतः -ता -तं, or by निर्, वि and अ prefixed; as, 'devoid of fruit,' फलहीनः -ना -नं, फलरहितः -ता -तं, फलशून्यः -न्या -न्यं, वीतफलः -ला -लं, निष्फलः -ला -लं, विफलः -ला -लं, अफलः -ला -लं.

DEVOIR, *s.* सत्कारः, सत्कृतं, सत्कृतिः *f.*, आदरकर्म्म *n.* (न्), समादरः, सम्मानं, पूजा, अर्चनं -ना, स्वकर्त्तव्यं, कर्त्तव्यता, व्रतं.

To DEVOLVE, *v. a.* (Roll down) प्रवह् in caus. (-वाहयति -यितुं), प्रसृ in caus. (-सारयति -यितुं), प्रवृत् in caus. (-वर्त्तयति -यितुं), अनुवृत्, प्रपत् in caus. (-पातयति -यितुं).—(Deliver over) न्यस् (c. 4. -अस्यति -असितुं), सन्न्यस्, उपन्यस्, भृ in caus. (अर्पयति -यितुं), समृ, प्रतिपद् in caus. (-पादयति -यितुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आरुह् in caus. (-रोपयति -यितुं), संक्रम् in caus. (-क्रामयति -यितुं).

To DEVOLVE, *v. n.* (Fall into new hands, be delivered over) आगम् (c. 1. -गच्छति -गन्तुं), आया (c. 2. -याति -तुं), संक्रम् (c. 1. -क्रमते -मितुं), न्यस् in pass. (-अस्यते). सन्न्यस् in pass., समृ in caus. pass. (-अर्प्यते), न्यस्तः -स्ता -स्तं भू.—(Roll down, fall down) अधो वृत् (c. 1. वर्त्तते -र्त्तितुं), अधो पत्, प्रपत् (c. 1. -पतति -तितुं).

DEVOLUTION, *s.* अधःपतनं, प्रवर्त्तनं, न्यसनं, सन्न्यसनं, आरोपणं.

To DEVOTE, *v. a.* (Appropriate to any use, dedicate, consecrate) विनियुज् (c. 7. -युनक्ति -योक्तुं), प्रयुज्, समृ in caus. (-अर्पयति -यितुं), निविद् in caus. (-वेदयति -यितुं), उत्सृज् (c. 6. -सृजति -स्रष्टुं), प्रणी (c. 1. -णयति -णेतुं), उपकॢप् (c. 10. -कल्पयति -यितुं), प्रतिष्ठा in caus. (-ष्ठापयति -यितुं), सङ्कल्पं कृत्वा दा or समृ, वितॄ (c. 1. -तरति -रितुं -रीतुं).—(Addict one's self to any thing) आसञ्ज् in pass. (-सज्यते or -सज्जते -सक्तुं) with loc., भज् (c. 1. भजति -ते, भक्तुं), आसेव् (c. 1. -सेवते -वितुं), मनो निविश् in caus. (-वेशयति -यितुं), अनुरञ्ज् in pass. (-रज्यते), समायत् (c. 1. -यतते -तितुं), आसक्तः -क्ता -क्तं भू; 'he is devoted to his wife,' भार्य्यायाम् अनुरज्यते.—(Doom to destruction) नरकं गम्या इति शप्तं कृ.

DEVOTED, *p. p.* भक्तः -क्ता -क्तं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, व्यासक्तः -क्ता -क्तं, सक्तः -क्ता -क्तं, रतः -ता -तं, निरतः -ता -तं, आरूढः -ढा -ढं, आस्थितः -ता -तं, समायत्तः -त्ता -त्तं, दृढभक्तिः -क्तिः -क्ति, भक्तियुक्तः -क्ता -क्तं, सक्तिमान् -मती -मत् (त्); 'devoted to one's master,' प्रभुभक्तः; 'to Krishna,' कृष्णाश्रितः or कृष्णंश्रितः; 'a devoted wife,' पतिव्रता, एकपत्नी, पतिसेविनी; 'a devoted husband,' पत्नीसेवी *m.* (न्), भार्य्यानुकूलः; 'a devoted friend,' स्थितप्रेमा *m.* (न्).

DEVOTEDNESS, *s.* (Dedication, consecration) समर्पणं, उत्सर्गः, निवेदनं, विनियोगः, सङ्कल्पकरणं, प्रतिष्ठा, वितरणं.—(Addiction) भक्तिः *f.*, आसक्तिः *f.*, रक्तिः *f.*, उपसेवनं, निवेशः, अभिनिवेशः, निविष्टता. परायणता, उपासकता.

DEVOTEE, *s.* योगी *m.* (न्), सन्न्यासी *m.* (न्), तपस्वी *m.* (न्), तापसः, यती *m.* (न्), महाव्रती *m.* (न्), वैखानसः, मुनिः *m.*, निर्ग्रन्थः -न्थकः, धर्म्मनिबन्धी *m.* (न्), धर्म्मनिरतः, धर्म्मनिविष्टः.

DEVOTION, *s.* (Devoted attachment) भक्तिः *f.*, भक्तत्वं, अनुरागः, आसक्तिः *f.*, प्रसक्तिः *f.*, सक्तिः *f.*, अनुरक्तिः *f.*, योगः, सेवा, उपासना, उपसेवनं.—(Piety) ईश्वरभक्तिः *f.*, भजनशीलता, धर्म्मित्वं, ईश्वरसेवा, उत्सर्गः.—(Act of worship) नियमः, धर्म्मक्रिया, धर्म्मकृत्यं, तपः *n.* (स्); 'to perform austere devotion,' तपस् (nom. तपस्यति) or तपस् तप् in pass. (तप्यते); 'self-devotion,' आत्मपरित्यागः; 'devotion to a husband,' पतिसेवा, पातिव्रत्यं.

DEVOTIONAL, *a.* (Relating to religion) धर्म्मविषयकः -का -कं, ईश्वरपूजाविषयः -या -यं, तपोमयः -यी -यं.—(Religious) धर्म्मपरः -रा -रं, ईश्वरभावनः -ना -नं, भजनशीलः -ला -लं, औपासनः -नी -नं, नियमनिष्ठः -ष्ठा -ष्ठं.

To DEVOUR, *v. a.* ग्रस् (c. 1. ग्रसते -सितुं), उपग्रस्, भक्ष् (c. 10. भक्षयति -यितुं), सम्भक्ष्, खाद् (c. 1. खादति -दितुं), संखाद्, समद् (c. 2. -अत्ति -त्तुं), समश् (c. 9. -अश्नाति -अशितुं), पर्य्येश्, जक्ष् (c. 2. जक्षिति -तुं) घस् (c. 1. घसति, घस्तुं).—(Swallow up) गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, सङ्गॄ, ग्रस्.—(Consume) उपयुज् (c. 7. -युंक्ते -योक्तुं), नश् in caus. (नाशयति -यितुं).

DEVOURED, *p. p.* ग्रस्तः -स्ता -स्तं, जग्धः -ग्धा -ग्धं, भक्षितः -ता -तं, खादितः -ता -तं.

DEVOURER, *s.* भक्षकः, खादकः, भक्षयिता *m.* (तृ), ग्रसनकारः, ग्रसिष्णुः *m.*

DEVOUT, *a.* भक्तः -क्ता -क्तं, भक्तिमान् -मती -मत् (त्), भजनशीलः -ला -लं, धर्म्मी -र्म्मिणी -र्म्मि (न्), धार्म्मिकः -की -कं, धर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्मात्मा -त्मा -त्म (न्) or पुण्यात्मा or प्रयतात्मा, पूजकः -का -कं, व्रती -तिनी -ति (न्) or महाव्रती, ईश्वरभावनः -ना -नं, आर्द्धः -र्द्धी -र्द्धं, पुण्यशीलः -ला -लं, तपस्वी -स्विनी -स्वि (न्), ईश्वरनिष्ठः -ष्ठा -ष्ठं, श्रद्धान्वितः -ता -तं, परमेश्वरे सदाभक्तिः -क्तिः -क्ति.

DEVOUTLY, *adv.* ईश्वरभक्तिपूर्ब्बं, ईश्वरभक्तत्वात्, श्रद्धापूर्ब्बं.

DEVOUTNESS, *s.* ईश्वरभक्तत्वं, ईश्वरनिष्ठत्वं, नियमनिष्ठता, श्रद्धावत्त्वं.

DEW, *s.* नीहारः, तुषारः, शिशिरः, प्रालेयं, अवश्यायः, रजनीजलं, रात्रिजलं, निशाजलं, खजलं, खवारि *n.*, अवश्यायजलं, अवश्यायसलिलं, निशापुष्पं, खवाष्पः, हिमः -मं, दसं.

To DEW, *v. a.* नीहारेण or शिशिरेण क्लिद् in caus. (क्लेदयति -यितुं) or सिच् (c. 6. सिञ्चति, सेक्तुं) or प्रोक्ष् (c. 1. -उक्षति -क्षितुं) or आर्द्रीकृ.

DEW-BESPRENT, *a.* शिशिराक्तः -क्ता -क्तं, नीहारोक्षितः -ता -तं, तुषारक्लिन्नः -न्ना -न्नं, अवश्यायावसिक्तः -क्ता -क्तं.

DEW-DROP, *s.* तुषारकणः, नीहारबिन्दुः *m.*, शिशिरबिन्दुः, अवश्यायबिन्दुः, हिमकणः, तुषारशीकरः.

DEW-LAP, *s.* गलकम्बलः, कम्बलः, साक्ना, वृषगलस्य लोलितमांसं.

DEWY, *a.* तुषारमयः -यी -यं, नीहारसिक्तः -क्ता -क्तं, सशिशिरः -रा -रं.

DEXTERITY, *s.* दक्षता, दाक्ष्यं, हस्तकौशल्यं, करदक्षता, हस्तलाघवं, हस्तपादादिक्षिप्रता, चातुर्य्यं, नैपुण्यं, युक्तिः *f.*, सुप्रयोगः -गता, पटुता, सत्वरता.

DEXTEROUS, *a.* दक्षः -क्षा -क्षं, करदक्षः -क्षा -क्षं, लघुहस्तः -स्ता -स्तं, कृतहस्तः -स्ता -स्तं, चतुरः -रा -रं, निपुणः -णा -णं, क्षिप्रः -प्रा -प्रं, युक्तिमान् -मती -मत् (त्), सुप्रयोगवान् -वती -वत् (त्), पेशलः -ला -लं,

पटुः -टुः -टु, सूत्थानः -ना -नं, उद्यतः -ता -तं.

DEXTEROUSLY, *adv.* सदाक्ष्यं, सलाघवं, युक्त्या, सचातुर्य्यं, सपाटवं.

DEXTRAL, *a.* दक्षिणः -णा -णं, दाक्षिणः -णी -णं, अपसव्यः -व्या -व्यं, वामेतरः-रा-रं,अवामः-मा-मं,दक्षिणस्थः-स्था-स्थं,दक्षिणपार्श्वस्थः-स्था-स्थं.

DHANWANTARI, *s.* (The physician of the gods) धन्वन्तरिः *m.*, काशिराजः.

DIABETES, *s.* बहुमूत्रमेहः, बहुमूत्ररोगः, इक्षुमेहः, प्रमेहः.

DIABOLIC, DIABOLICAL, *a.* पैशाचः -ची -चं -चिकः -की -कं, भौतिकः -की -कं, पिशाचोपमः -मा -मं, वैतालिकः -की -कं, दारुणः -णा -णं.

DIABOLICALLY, *adv.* पिशाचवत्, भूतवत्, वेतालवत्, दारुणं.

DIACOUSTICS, *s.* श्रवणविद्या, शब्दनिर्णयविद्या, ध्वनिविद्या.

DIADEM, *s.* किरीटः, मुकुटं, मौलिः *m.* -ली, वेष्टनं, शिरोवेष्टनं, अवतंसः, तिरीटं, बन्धुरं, चूडा, मस्तकाभरणं.

DIADEMED, *a.* किरीटी -टिनी -टि (न्), किरीटधारी -रिणी -रि (न्).

DIÆRESIS, *s.* स्वरविच्छेदः,पदविभेदः,अक्षरविच्छेदः,असन्धिः,यथा तितउ शब्दे.

DIAGNOSTIC, *s.* रोगलक्षणं, रोगचिह्नं, विसूचिका, प्रज्ञानं, उपसर्गः.

DIAGONAL, *a.* एककोणाद् अन्यकोणपर्य्यन्तम् अङ्कितः -ता -तं, कोणाकोणि लिखितः -ता -तं.

DIAGONAL, *s.* कर्णः, श्रुतिः *f.*, श्रवणः, एककोणाद् अन्यकोणपर्य्यन्तम् अङ्किता रेखा, कोणाकोणि लिखिता रेखा यया चतुरस्रं द्विसमीकृतं.

DIAGONALLY, *adv.* कोणाकोणि, आरारि, असासि.

DIAGRAM, *s.* मण्डलकं, चक्रं, कूर्म्मचक्रं, क्षेत्रं, अङ्कः, चित्रं.

DIAL, DIAL-PLATE, *s.* मुहूर्त्तदण्डादिपरिमापकं मण्डलं, अङ्कचिह्निता घटी यया मयूखद्वारेण कालः सूच्यते, इन्द्रः, यामघोषा; 'pin of a dial,' मयूखः, कीलः; 'sun-dial,' सूर्य्यघटी, प्रतोदः.

DIALECT, *s.* (Subdivision of a language) विभिन्नभाषा, देशभाषा.—(Language, speech) भाषा, भाषितं -षणं, वचनं, वाक्यं, वाक् *f.* (च्), उक्तिः *f.*; 'foreign dialect,' म्लेच्छभाषा.

DIALECTIC, *s.* (Logic) तर्कः, तर्कविद्या,न्यायः,आन्वीक्षिकी,अनुमानोक्तिः *f.*

DIALECTICAL, *a.* तार्किकः -की -कं, न्यायी -यिनी -यि (न्), प्रोहः -हा -हं.

DIALECTICALLY, *adv.* न्यायतस्, तर्कविद्यानुसारेण, तर्कशास्त्रवत्.

DIALECTICIAN, *s.* तर्की *m.* (न्),न्यायविद्,नैयायिकः,आक्षपादः,सांवादिकः.

DIALLING, *s.* (Science of shadow) छायाविद्या.—(Dial making) घटीनिर्म्माणं, पूर्व्वोक्तमण्डलनिर्म्माणशिल्पं.

DIALOGIST, *s.* कथोपकथकः, सांवादिकः, सम्भाषकः, उत्तरप्रत्युत्तरकृत्, प्रश्नोत्तरक्रमेण कथोपकथनरचकः.

DIALOGUE, *s.* कथोपकथनं, संलापः, सम्भाषा -षणं, संवादः, द्वयोः संवादः, सङ्कथा, सम्प्रवदनं, उत्तरप्रत्युत्तरं, प्रश्नोत्तरं, उक्तिप्रत्युक्तिः *f.*, परस्परालापः, वीथ्यङ्गं.

To DIALOGUE, *v. n.* सम्भाष् (c. 1. -भाषते -षितुं), संवद् (c. 1. -वदति -दितुं), संलप् (c. 1. -लपति -पितुं), संवच् (c. 2. -वक्ति -क्तुं), कथोपकथनं कृ.

DIAMETER, *s.* (Of a circle) व्यासं, विष्कम्भः, विस्तारः, विसृतिः *f.*

DIAMETRAL, DIAMETRICAL, *a.* व्यासक्रमेण विपरीतगतः -ता -तं, अभिमुखगतः -ता -तं.

DIAMETRICALLY, *adv.* व्यासक्रमेण विपरीतं, अभिमुखं, प्रतिकूलं, मुखामुखि.

DIAMOND, *s.* हीरं -रकः, वज्रः -ज्रं, वरारकं, अविकं, अशिरं, दधीच्यस्थि *n.*, दृढाङ्गं, लोहजित्, सूचीमुखं, रत्नमुख्यं, भार्गवप्रियः; 'diamond-mine,' वज्राकरः.

DIAMOND-CUTTER, *s.* हीरकारः, हीरकच्छिद्, हीरमार्जकः, हीरपरिष्कारकः.

DIAPASON, *s.* स्वराष्टकं, अष्टस्वराः *m. pl.*, स्वरग्रामः, विरिआष्टकं.

DIAPER, *s.* पुष्पादिसंस्कारालङ्कृतः क्षौमपटः, चित्रपटः, वरकं.

To DIAPER, *v. a.* क्षौमपटं पुष्पादिसंस्कारेण सलङ्कृ,चित्र् (c. 10. चित्रयति -यितुं)

DIAPHANEITY, *s.* स्वच्छता, अच्छता, प्रसन्नता, प्रसन्निः *f.*, वैशद्यं.

DIAPHANIC, DIAPHANOUS, *a.* स्वच्छः -च्छा -च्छं, अच्छः -च्छा -च्छं, प्रसन्नः -न्ना -न्नं,विशदः -दा -दं,विमलः -ला -लं,विशुद्धः -द्धा -द्धं,स्फटिकप्रभः -भा -भं.

DIAPHORETIC, *a.* स्वेदकरः -री -रं, स्वेदनः -ना -नं, स्वेदजनकः -का -कं, घर्म्मोत्पादकः -का -कं, प्रस्वेदितवान् -वती -वत् (त्); 'a diaphoretic,' स्वेदनं.

DIAPHRAGM, *s.* शरीरस्य मध्यदेशः, उदरवक्षःस्थलमध्ये शरीरभागः.

DIARRHŒA, *s.* अतिसारः, सारणः, प्रवाहिका, ग्रहणीरुक् *f.* (ज्), ग्रहणी, विरेकः, प्रस्कन्दनं -न्दिका, वसनः.

DIARRHŒTIC, *a.* रेचकः -की -कं, सारकः -का -कं, अधोभागहरः -रा -रं.

DIARY, *s.* आह्निकव्यवहारपुस्तकं, दैनिकवृत्तान्तपुस्तकं, आह्निकचरित्रलिखनं, पुस्तकं यस्मिन् दैनिकचेष्टितानि समारोप्यन्ते, पदभङ्गिका, पञ्जिका.

DIASTOLE, *s.* रूपकविशेषो येन ह्रस्वस्वरो दीर्घीक्रियते.

DIATESSERON, *s.* गान्धर्वविद्यायां स्वरचतुष्टयं.

DIBBLE, *s.* लघुखनित्रं, क्षुद्रखात्रं, बीजारोपणे प्रयुक्तो तीक्ष्णाग्रो दण्डः.

DICACITY, *s.* वावदूकता, अतिशयोक्तिः *f.*, जल्पः, वाचालता, अविनयः.

DICE, *s.*, *pl.* of DIE. अक्षाः *m. pl.*, पाशकाः *m. pl.*, देवनाः *m. pl.*; 'loaded dice,' कूटाक्षाः *m. pl.*; 'player with dice,' अक्षदेवी *m.* (न्).

To DICE, *v. n.* अक्षैर् दिव् (c. 4. दीव्यति -ते, देवितुं) or प्रदिव् or प्रतिदिव् or क्रीड् (c. 1. क्रीडति -डितुं); ग्रह् (c. 1. गृह्णते -हितुं), अक्षक्रीडां कृ.

DICE-BOARD, *s.* पाशकपीठः, नयपीठी, अष्टापदं, शारिफलं.

DICE-BOX, *s.* अक्षाधारः, पाशकभाण्डं, अक्षभाजनं, अक्षसम्पुटकः.

DICER, *s.* अक्षदेवी *m.* (न्), अक्षद्यूतः -द्यूः, अक्षक्रीडकः; 'player with unfair dice,' कूटाक्षदेवी *m.* (न्).

To DICHOTOMIZE, *v. a.* द्विधा कृ or छिद् (c. 7. छिनत्ति, छेत्तुं), पृथक्कृ.

DICKER, *s.* (Of leather) दशचर्म्मणि *n. pl.*, चर्म्मदशकं.

To DICTATE, *v. a.* आज्ञा in caus. (-ज्ञापयति -यितुं), आदिश् (c. 6. -दिशति -देष्टुं), निर्दिश्, शास् (c. 2. शास्ति, शासितुं), चुद् in caus. (चोदयति -यितुं), अभिचुद्, प्रेर् in caus. (-ईरयति -यितुं), प्रकॢप् in caus. (-कल्पयति -यितुं).

DICTATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियमः, नियोगः, शासनं, चोदनः, विधिः *m.*, विधानं, प्रेरणं, वचनं, प्रयुक्तिः *f.*

DICTATED, *p. p.* आदिष्टः -ष्टा -ष्टं, आज्ञापितः -ता -तं, चोदितः -ता -तं.

DICTATION, *s.* आदेशः, आज्ञापनं, निर्देशः, निदेशः, नियोजनं, विज्ञापनं, चोदना.

DICTATOR, *s.* आपाततः or विनिपातसमये सर्व्वसम्मत्या परमाधिकारयुक्तो जनः, अनन्याधीनः शासिता *m.* (तृ), परमशासिता, परमप्रभुः, एकप्रभुः, एकाधिपतिः *m.*

DICTATORIAL, *a.* आज्ञापकः -का -कं, निर्देशकः -का -कं, धृष्टः -ष्टा -ष्टं.

DICTATORSHIP, *s.* पूर्व्वोक्तशासितुः पदं or अधिकारः, एकपत्यं, एकाधिपत्यं.

DICTION, *s.* वाग्व्यापारः, वाक्यव्यापारः, वाग्रीतिः *f.*, वाक्यं, उक्तिः *f.*, वचनं, भाषा, वाणी, व्याहारः, वचः *n.* (स्).

DICTIONARY, *s.* कोषः, शब्दकोषः, शब्दसङ्ग्रहः, अभिधानं, शब्दग्रन्थः, शब्दजालं, निर्वचनं, निघण्टुः *m.*; 'a dictionary compiler,' कौशिकः.

DICTUM, *s.* (Authoritative saying) वचनं, आदेशः, वक्तव्यं.

DIDACTIC, DIDACTICAL, *a.* उपदेशकः -का -कं, निर्देशकः -का -कं, शिक्षकः -का -कं, शिक्षाकरः -रा -रं, वैधिकः -की -कं, मौत्रः -त्री -त्रं.

DIDAPPER, *s.* (A diving bird) प्लवः, प्लावी *m.* (न्).

DIE, *s.* (To play with) अक्षः, पाशकः, देवनः, नयः, विन्दुतन्तः, दुन्दुभिः *f.* -भी, जयपुत्रकः, शारिशुक्लला, अष्टाङ्गं; 'a loaded die,' कूटाक्षः,

दुरक्षं.—(Chance) दैवं.—(Stamp used in coinage) मुद्रा.

To DIE, *v. a.* (Colour, stain). *See To* DYE.

To DIE, *v. n.* (Lose life) मृ (c. 6. म्रियते, मर्त्तुं), सम्मृ, प्रे (c. 2. -एति -तुं, with प्र, प्रैति), परे, अती (अत्येति), व्यती; जीवनं or देहम् उत्सृज् (c. 6. -सृजति -स्रष्टुं), तनुं or शरीरं त्यज् (c. 1. त्यजति, त्यक्तुं) or न्यस् (c. 4. -अस्यति -असितुं), प्राणत्यागं कृ, प्रमी (c. 4. -मीयते), विपद् (c. 4. -एद्यते -पत्तुं), व्यापद्; पञ्चत्वं गम् (c. 1. गच्छति, गन्तुं), देहाद् अपगम्, लोकान्तरं गम् or प्राप् (c. 5. -आप्नोति -आप्तुं), संस्था (c. 1. -तिष्ठते -स्थातुं), प्रेतीभू.—(Perish, be lost) नश् (c. 4. नश्यति, नशितुं), प्रणश्, विनश्; प्रली (c. 4. -लीयते -लेतुं), क्षि in pass. (क्षीयते), प्रक्षि, संक्षि, ध्वंस् (c. 1. ध्वंसते -सितुं), विध्वंस्.—(Sink. faint) सद् (c. 1. सीदति, सत्तुं), अवसद्, विषद्; ग्लै (c. 1. ग्लायति, ग्लातुं), मुर्छ् (c. 1. मूर्च्छति -र्च्छितुं).—(Wither) विश in pass. (-शीर्य्यते).

DIER, *s.* (One who colours) वस्त्ररागकृत्. *See* DYER.

DIET, *s.* (Food) अन्नं, आहारः, खाद्यद्रव्यं, भोजनं, भक्ष्यं, भोज्यं; 'change of diet,' अन्नपरिवृत्तिः.—(Food regulated by the rules of medicine) पथ्यं, पथ्यान्नं, पथ्यापथ्यं.—(Assembly of princes) राजसभा, शिष्टसभा, मण्डलेश्वरसभा.

To DIET, *v. a.* (Feed by the rules of medicine) पथ्यापथ्यं निर्दिश् (c. 6. -दिशति -देष्टुं), पथ्यान्नं or पथ्यान्नेन भुज् in caus. (भोजयति -यितुं), पथ्यान्नं दा.—(Feed) भुज् in caus., पुष् (c. 10. पोषयति -यितुं), भृ (c. 3. बिभर्त्ति, भर्त्तुं).

To DIET, *v. n.* पथ्यान्नं भुज् (c. 7. भुंक्ते, भोक्तुं) or अश् (c. 9. अश्नाति, अशितुं).

DIET-DRINK, *s.* औषधीयजलं, पथ्यपानीयं, सिद्धजलं.

To DIFFER, *v. n.* (Be distinguished from) विशिष् in pass. (-शिष्यते), भिद् in pass. (भिद्यते), विभिद्, प्रभिद्, all with abl. c.; as, 'the son differs from the father,' पितुर् भिद्यते कुमारः.—(Contend, be at variance) विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).—(Dissent) विपरीतं मन् (c. 4. मन्यते, मन्तुं), न सम्मन्, अन्यथा मन्, असम्मतिं कृ, विवद् (c. 1. -वदते -दितुं), न स्वीकृ, भिन्नमतः -ता -तं भू.

DIFFERENCE, *s.* (Distinction from something else) भेदः, विभेदः, प्रभेदः, भिदा, विशेषः, विशिष्टता, वैशिष्ट्यं, अन्तरं -रितं, भिन्नता, विभिन्नता, पृथक्त्वं, पार्थक्यं, अवच्छेदः, अन्यथात्वं, परत्वं, इतरत्वं.—(Contrariety) विपरीतता, वैपरीत्यं, विरोधः, विरुद्धता, विपर्य्ययः, वैलक्षण्यं, विप्रतिपत्तिः *f.*, द्वैधं, द्वैविध्यं.—(Difference of opinion, dispute) मतिप्रभेदः, मतिविपर्य्ययः, विमतिः *f.*, वैमत्यं, विवादः, विसंवादः, द्वैधं, कलहः, कलिः *m.*—(Difference of meaning) अर्थभेदः, अर्थान्तरं.—(Difference in quantity) तारतम्यं, वैषम्यं.—(Dissimilarity) असाम्यं, असादृश्यं.

To DIFFERENCE, *v. a.* विशिष् in caus. (-शेषयति -यितुं), भिद् in caus. (भेदयति -यितुं), पृथक्.

DIFFERENT, *a.* (Distinct) भिन्नः -न्ना -न्नं, प्रभिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, अन्यः -न्या -न्यत्, अन्यतरः -रा -रत्, इतरः -रा -रं, परः -रा -रं, विपरीतः -ता -तं, विविक्तः -क्ता -क्तं, व्यतिरिक्तः -क्ता -क्तं, विशिष्टः -ष्टा -ष्टं, त्वः त्वा त्वं.—(Dissimilar) असदृशः -शी -शं, असमानः -ना -नं, असमः -मा -मं, विषमः -मा -मं.—(Various) विविधः -धा -धं, पृथग्विधः -धा -धं, नानाविधः -धा -धं, बहुविधः -धा -धं; 'by a different road,' भिन्नमार्गेण; 'in a different way,' अन्यथा; 'different state of the case,' अन्यथात्वं. Sometimes expressed by अन्तरं affixed; as, 'a different meaning,' अर्थान्तरं

DIFFERENTIAL, *a.* भेदकरः -री -रं, विशेषकः -का -कं.—(Differential series, dependence of larger numbers on smaller) तारतम्यं.

DIFFERENTLY, *adv.* अन्यथा, इतरथा, परतस्, अन्यतस्, इतरतस्, पृथक्, भिन्नरूपेण, अन्यप्रकारेण, विपरीतं, पृथक्त्वेन.

DIFFICULT, *a.* (Hard, not easy) कठिनः -ना -नं, दुष्करः -रा -री -रं, दुःसाध्यः -ध्या -ध्यं, दुष्करः -रा -रं, दुर्निवहः -हा -हं, असुकरः -री -रं, असुगमः -मा -मं, विषमः -मा -मं, कष्टः -ष्टा -ष्टं, कष्टकरः -री -रं, आयासी -सिनी -सि (न्); 'difficult to be understood,' दुर्ज्ञेयः -या -यं; 'difficult to be got,' दुर्लभः -भा -भं, दुःप्राप्यः -प्या -प्यं, दुःखलभ्यः -भ्या -भ्यं, दुःखेन प्राप्यः -प्या -प्यं, दुरापः -पा -पं; 'difficult to be overcome,' दुरतिक्रमः -मा -मं; 'difficult to be cut,' दुःखच्छेद्यः -द्या -द्यं; 'difficult to be joined,' दुःसन्धानः -ना -नं; 'difficult of digestion,' दुर्जरः -रा -रं; 'difficult of ascent,' दुरारोहः -हा -हं; 'a difficult case,' सशल्योधीः; 'difficult march,' सङ्क्रमः, दुर्गसञ्चरः.—(Peevish, morose) वक्रभावः -वा -वं, दुर्धीः -धीः -धीं.

DIFFICULTLY, *adv.* दुःखेन, कष्टेन, कृच्छ्रेण, कृच्छ्रात्, कष्टं, आयासेन, कठिनं, विषमं, दुर् prefixed; as, 'difficultly attainable,' दुःप्राप्यः -प्या -प्यं.

DIFFICULTY, *s.* (Hardness, that which is hard to effect) काठिन्यं, कठिनता, दुःखं, कृच्छ्रं, कष्टं, आयासः, दुष्करत्वं, असौकर्य्यं, विषमं, वैषम्यं, दुर्गं, शल्यं, संशयः; 'difficulties,' दुर्गाणि; 'beset with difficulties,' सशल्यः -ल्या -ल्यं, सकण्टकः -का -कं; 'overcoming difficulties,' दुर्गलङ्घनः -नी -नं; 'cut with difficulty,' दुःखच्छेद्यः -द्या -द्यं or दुःखेन छेद्यः; 'without difficulty,' अनायासं -सेन; 'obtained with difficulty,' कृच्छ्राप्तः -प्ता -प्तं.—(Distress, opposition) क्लेशः, दुःखं, बाधः, विरोधः, प्रातिकूल्यं.—(Perplexity) व्यग्रता, वैक्लव्यं, विप्लवः.—(Objection) बाधा, उद्ग्राहः.

To DIFFIDE, *v. n.* शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, न विश्वस् (c. 2 -श्वसिति -तुं).

DIFFIDENCE, *s.* (Want of confidence in others) अविश्वासः, अप्रत्ययः, शङ्का.—(In one's self) ह्रीः, लज्जा, व्रीडा, अप्रागल्भ्यं, आशङ्का.

DIFFIDENT, *a.* (Distrustful) अविश्वासी -सिनी -सि (न्), अप्रत्ययी -यिनी -यि (न्), शङ्काशीलः -ला -लं, साशङ्कः -ङ्का -ङ्कं, सशङ्कः -ङ्का -ङ्कं.—(Modest, reserved) ह्रीमान् -मती -मत् (त्), लज्जावान् -वती -वत् (त्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं.

DIFFIDENTLY, *adv.* शङ्कया, शङ्कापूर्व्वं, लज्जया, अप्रगल्भं, अधृष्टं.

DIFFLUENCE, DIFFLUENCY, *s.* विद्रुतत्वं, द्रुतता, द्रवत्वं, द्राव्यत्वं, विलीनता, तरलता.

DIFFLUENT, *a.* विद्रुतः -ता -तं, द्रवः -वा -वं, विलीनः -ना -नं, तरलः -ला -लं.

To DIFFUSE, *v. a.* (Pour out) प्रसु in caus. (-स्रावयति -यितुं), प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पत् in caus. (पातयति -यितुं).—(Spread, scatter, extend) विस्तृ in caus. (-स्तारयति -यितुं), संस्तृ, परिस्तृ, प्रसृ in caus. (-सारयति -यितुं), विसृ, अतिसृ in caus., विसृप् in caus. (-सर्पयति -यितुं), प्रचर् in caus. (-चारयति -यितुं), विद्रु in caus. (-द्रावयति -यितुं), विकॄ (c. 6. -किरति -करितुं -रीतुं), प्रथ् in caus. (प्रथयति -यितुं), तन् (c. 8. तनोति -नितुं), वितन्, वृध् in caus. (-वर्धयति -यितुं), प्रवृध्, विकाश् in caus. (-काशयति -यितुं), प्रपच् (c. 10. -पञ्चयति -यितुं).—(Diffuse itself, be diffused) व्याप् (c. 5. -आप्नोति -आप्तुं), विस्तृ in pass. (-स्तीर्य्यते), विरुह् (c. 1. -रोहति -रोढुं), प्रवृध् (c. 1. -वर्धते -र्धितुं), सर्व्वत्र गम् (c. 1. गच्छति, गन्तुं), व्यश् (c. 5. -अश्नुते -अशितुं), विगाह् (c. 1. -गाहते -हितुं), प्रविश् (c. 6.

-विशति -वेष्टुं).

DIFFUSE, *s.* Not concise, prolix) विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, आयतः -ता -तं, अतिक्रान्तः -न्ता -न्तं, प्रपञ्चितः -ता -तं, दीर्घसूत्रः -त्रा -त्रं, असंक्षिप्तः -प्ता -प्तं, असामासिकः -की -कं.

DIFFUSED, *p. p.* व्याप्तः -प्ता -प्तं, विस्तीर्णः -र्णा -र्णं, विस्तृतः -ता -तं, प्रसारितः -ता -तं, विसारितः -ता -तं, प्रसृतः -ता -तं, विसृतः -ता -तं, विकीर्णः -र्णा -र्णं, प्रकीर्णः -र्णा -र्णं, प्रचारितः -ता -तं, प्रकाशितः -ता -तं, प्रथितः -ता -तं, प्रवृद्धः -द्धा -द्धं, ततः -ता -तं, वितनः -ता -तं, आततः -ता -तं, प्रवितनः -ता -तं, प्रपञ्चितः -ता -तं, सर्वगतः -ता -तं, सर्वत्रगतः -ता -तं, परिगतः -ता -तं, द्रुतः -ता -तं.

DIFFUSELY, *adv.* विस्तरशस्, विस्तरेण, सुविस्तरं, प्रपञ्चेन, वाग्विस्तारेण, असंक्षेपतस्, असमासतस्, असंक्षिप्तं, दीर्घसूत्रतया.

DIFFUSION, *s.* व्याप्तिः *f.*, व्यापनं, व्यापकत्वं, विस्तारः, विस्तृतिः *f.*, विस्तरः, विस्तीर्णता, प्रसारणं, प्रसरः -रणं, परिसरः, प्रततिः *f.*, विततिः *f.*, सन्ततिः *f.*, तानः, प्रतानः, प्रपञ्चः, प्रकाशः -शनं, विकाशः -शनं, व्यासः, परिक्षेपः, तन्तिः *f.*, विग्रहः.

DIFFUSIVE, *a.* व्यापकः -का -कं, व्यापी -पिनी -पि (न्), व्याप्तिमान् -मती -मत् (त्), विस्तरणशीलः -ला -लं, विस्तृतः -ता -तं, व्यश्नुवानः -ना -नं, प्रतानी -निनी -नि (न्), विसारी -रिणी -रि (न्) or प्रसारी, सान्तानिकः -की -कं, क्षिपण्युः -ण्वुः -ण्यु.

DIFFUSIVELY, *adv.* विस्तीर्णं, सुविस्तरं, व्याप्तं, सामान्यतस्, सर्वत्र, सुपर्य्याप्तं.

DIFFUSIVENESS, *s.* विस्तारः, विस्तीर्णता, विस्तृतिः *f.*, व्याप्तिः *f.*, व्यापकत्वं.—(Prolixity of style) वाग्विस्तारः, विस्तरः, प्रपञ्चः, दीर्घसूत्रता.

To DIG, *v. a.* and *n.* खन् (c. 1. खनति -ते -नितुं), अभिखन्, आखन्; 'dig with a spade,' खनित्रेण खन् or खनित्रेण भूमिं भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ in caus. (दारयति -यितुं) or गर्तं कृ.—(Dig up) उत्खन्, प्रोत्खन्.—(Pierce) निखन्, निर्भिद्, छिद्र् (c. 10. छिद्रयति -यितुं), छिद् (c. 7. छिनत्ति, छेत्तुं), व्यध् (c. 4. विध्यति, व्यद्धुं).

DIGERENT, *a.* अग्निवर्द्धकः -का -कं, पाचकः -का -कं, परिपाकी -किणी -कि (न्).

DIGEST, *s.* स्मृतिसंहिता, स्मृतिसङ्ग्रहः, धर्म्मशास्त्रसंहिता, स्मृतिशास्त्रं, स्मृतिसारः.—(Any compilation) सङ्ग्रहः, संहिता, समाहारः, संक्षेपः.

To DIGEST, *v. a.* (Concoct in the stomach) जठरे or उदरे जॄ in caus. (जरयति -यितुं), पच् (c. 1. पचति, पक्तुं), परिपच्, क्षप् (c. 1. क्षपति -पितुं), दह् (c. 1. दहति, दग्धुं).—(Soften by heat) निष्क्वथ्, सिद्धीकृ.—(Arrange, methodise) क्रमेण रच् (c. 10. रचयति -यितुं), विरच्, श्रेणीक्रमेण लिख् (c. 6. लिखति, लेखितुं) or ग्रन्थ् (c. 1. ग्रन्थति -न्थितुं), सङ्ग्रहं कृ.—(Prepare in the mind) मनसा विचर् in caus. (-चारयति -यितुं).—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

To DIGEST, *v. n.* जठरे or उदरे जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं).—(Suppurate) पूय् (c. 1. पूयते -यितुं), पूयं जन् (c. 10. जनयति -यितुं).

DIGESTED, *p. p.* जीर्णः -र्णा -र्णं, पक्वः -क्वा -क्वं, क्षपितः -ता -तं, परिपक्वः -क्वा -क्वं, दग्धः -ग्धा -ग्धं, रुचितः -ता -तं, सिद्धः -द्धा -द्धं.

DIGESTER, *s.* (That which strengthens digestion) जारणं, पाचकं, पाचनं, अग्निवर्धनः, रोचकः, रोचनः.—(A vessel) निष्क्वथनयन्त्रं.

DIGESTIBLE, *a.* पक्तव्यः -व्या -व्यं, पचनीयः -या -यं, क्षपनीयः -या -यं.

DIGESTION, *s.* पाकः, परिपाकः, विपाकः, पचनं, जीर्णिः *f.*, जरणं, परिपक्वता, पुटपाकः, अग्निः *m.*, वह्निः *m.*, जठराग्निः, उदराग्निः, जठरानलः, कायाग्निः *m.*, कोष्ठाग्निः; 'slowness of digestion,' अग्निमान्द्यं; 'having a weak digestion,' मन्दाग्निः -ग्निः -ग्नि; 'having a good digestion,' दीप्ताग्निः -ग्निः -ग्नि.—(Suppuration) पूयत्वं, पाकः.

DIGESTIVE, *a.* पाचकः -का -कं, पाचनः -ना -नं, परिपाकी -किणी -कि (न्), अग्निवर्द्धकः -का -कं, अग्निदः -दा -दं, वह्निकरः -री -रं, आग्नेयः -यी -यं, रुचकः -का -कं, रोचकः -का -कं, रोचनः -ना -नं.—(Suppurative) पाकलः -ला -लं.

DIGGER, *s.* खनकः, खनिता *m.* (तृ), खननकारी *m.* (न्), खातकः, आखनिकः.

To DIGHT, *v. a.* भूष् (c. 10. भूषयति -यितुं), अलङ्कृ, परिधा (c. 2. -धत्ते -धातुं).

DIGIT, *s.* (Of the moon) कला, इन्दुलेखा, इन्दुरेखा, शशाङ्कलेखा, इन्दुदलः.—(Arithmetical character) अङ्कः, गुणनिका.

DIGITATED, *a.* शाखी -खिनी -खि (न्), अङ्गुलिवद् विभिन्नः -न्ना -न्नं.

DIGLADIATION, *s.* असियुद्धं, खड्गयुद्धं, युद्धं, कलिः *m.*, कलहः.

DIGNIFIED, *a.* उदारचरितः -ता -तं, उदारवृत्तिः -त्तिः -त्ति, मानी -निनी -नि (न्), गर्वितः -ता -तं, महाशयः -या -यं, महानुभावः -वा -वं, प्रतापी -पिनी -पि (न्), महाप्रतापः -पा -पं, प्रौढः -ढा -ढं, आयतिमान् -मती -मत् (त्).—(Invested with some dignity) उत्कृष्टपदयुक्तः -क्ता -क्तं, प्रवर्द्धितः -ता -तं, प्रतिपत्तिमान् -मती -मत् (त्).

To DIGNIFY, *v. a.* (Prefer) पदं वृध् in caus. (वर्धयति -यितुं), उत्कृष्टपदे नियुज् (c. 7. -युंक्ते -योक्तुं) or प्रतिपद् in caus. (-पादयति -यितुं).—(Honour, adorn) मन् in caus. (मानयति -यितुं), सम्मन्, भूष् (c. 10. भूषयति -यितुं), शुभ् in caus. (शोभयति -यितुं).

DIGNITARY, *s.* उत्कृष्टपदयुक्तः पुरोहितः, प्रतिपत्तिमान् *m.* (त्), मान्यलोकः.

DIGNITY, *s.* (Nobleness of mind) माहात्म्यं, औदार्य्यं, उदारता.—(Dignity of mien) प्रतापः, तेजः *n.* (स्), अनुभावः, प्रभावः, आयतिः *f.*—(Dignity of sentiments) गर्वः, मानं, अभिमानं, मानिता, सम्मानं, दर्पः.—(Elevation, honourable rank) उत्कृष्टता, उत्कर्षः, औत्कर्षं, अभिजातता, आभिजात्यं, प्रतिपत्तिः *f.*, उत्कृष्टपदं, परमपदं, प्रधानता, उन्नतिः *f.*, अधिष्ठानं, स्थितिः *f.*, मान्यता, महार्घ्यता, मर्य्यादा.

To DIGRESS, *v. n.* (Turn aside out of the road) उत्क्रम् (c. 1. -क्रामति -क्रमितुं), व्युत्क्रम्, विचल् (c. 1. -चलति -लितुं), विच्यु (c. 1. -च्यवते -च्योतुं), पार्श्वं गम् (c. 1. गच्छति, गन्तुं).—(Depart from the tenour of a discourse) वचनक्रमं or वाक्यप्रसङ्गं or कथायोगं त्यज् (c. 1. त्यजति, त्यक्तुं), प्रस्तुतं or प्रकृतं or मूलविषयं or प्रधानविषयं त्यक्त्वा प्रासङ्गिकम् अभिधा (c. 3. -दधाति -धातुं).

DIGRESSION, *s.* (From the tenour of a discourse) प्रस्तुतत्यागः, वचनक्रमत्यागः, वाक्यप्रसङ्गत्यागः, वाक्यक्रमभङ्गः, मूलविषयत्यागः, प्रासङ्गिकवाक्यं, प्रसङ्गः, वाक्यान्तरं, मूलविषयवहिर्गमनं.—(Deviation) उत्क्रमः, विचलनं, वक्रगमनं.

DIGRESSIVE, *a.* निर्विषयः -या -यं, अनन्वितः -ता -तं, अप्रस्तुतः -ता -तं.

To DIJUDICATE, *v. a.* विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), तीर् (c. 10. तीरयति -यितुं), परिच्छेदं कृ.

DIJUDICATION, *s.* निर्णयः, विचारः -रणं, निश्चयः, परिच्छेदः.

DIKE, *s.* (Channel) कुल्या, उपकुल्या, परिखा, अखातं, खातं, नालः, प्रणालः, आधारः.—(Mound) सेतुः *m.*, सेतुबन्धः, जलसेतुः *m.*, जलबन्धकः, कूलकं, पालिः *f.*, पिण्डलः, पिण्डिलः, धरणः, संवरः, हिता.

To DILACERATE, *v. a.* विदृ (c. 9. -दृणाति -दरितुं -रीतुं, or caus. -दारयति -यितुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), निर्भिद्, विदलीकृ.

DILACERATION, *s.* विदारः -रणं, विदरः, विदलीकरणं, भिदा.

To DILAPIDATE, *v. n.* जॄ (c. 4. जीर्य्यति, जरितुं -रीतुं), उत्सद् (c. 6. -सीदति -सत्तुं), भंश् (c. 4. भश्यति, भंशितुं), नश् (c. 4. नश्यति, नशितुं), क्षि in pass. (क्षीयते).

To DILAPIDATE, *v. a.* नश् in caus. (नाशयति -यितुं), उत्सद् in caus. (-सादयति -यितुं), ध्वंस् in caus. (ध्वंसयति -यितुं), दुष् in caus. (दूषयति -यितुं).

DILAPIDATED, *p. p.* उत्सन्नः -न्ना -न्नं, जीर्णः -र्णा -र्णं, कृतध्वंसः -सा -सं.

DILAPIDATION, *s.* क्षयः, भङ्गः, प्रभङ्गः, ध्वंसः, नाशः, क्षतिः *f.*, दूषणं.

DILATABILITY, *s.* विवारणीयत्वं, विवारक्षमता, विकाशनीयत्वं, विस्तारणीयत्वं.

DILATABLE, *a.* विवारणीयः -या -यं, विवारक्षमः -मा -मं, विकाशनीयः -या -यं, विस्तारयितुं शक्यः -क्या -क्यं, वितततीकरणीयः -या -यं.

DILATATION, *s.* विवारः, विवृतिः *f.*, विकाशः -शनं, विस्तारः, विस्तृतिः *f.*, वितनिः *f.*, वितततीकरणं, प्रततिः *f.*, व्यादानं, विसरणं, प्रसारणं, उत्फुल्लता, विपुलता, विजृम्भणं.

To DILATE, *v. a.* (Extend) विस्तृ in caus. (-स्तारयति -यितुं), वितन् (c. 8. -तनोति -नितुं), व्यातन्, वितततीकृ, विवृ (c. 5. -वृणोति -वरितुं -रीतुं or caus. -वारयति -यितुं), विकाश् in caus. (-काशयति -यितुं), विसृ in caus. (-सारयति -यितुं), व्यादा (c. 3. -ददाति -दातुं), द्राघ् (nom. द्राघयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं).—(Tell diffusely) सुविस्तरेण वद् (c. 1. वदति -दितुं), सुविस्तरं व्याख्या (c. 2. -ख्याति -तुं), विवरणं कृ, अत्युक्तिं कृ.

To DILATE, *v. n.* वितन् in pass. (-तन्यते), वितततीभू, विस्तृ in pass. (-स्तीर्य्यते), विजृम्भ् (c. 1. -जृम्भते -म्भितुं), विवृ in caus. pass. (-वार्य्यते), विवारम् इ (c. 2. एति -तुं).

DILATED, *p. p.* विवृतः -ता -तं, वितनः -ता -तं, वितततीकृतः -ता -तं, विजृम्भितः -ता -तं, उज्जृम्भितः -ता -तं, व्याप्तः -प्ता -प्तं, उत्फुल्लः -ल्ला -ल्लं or फुल्लः, विकाशी -शिनी -शि (न्), विस्तृतः -ता -तं, आयतः -ता -तं, विसारितः -ता -तं, विसृतः -ता -तं, प्रवृद्धः -द्धा -द्धं.

DILATOR, *s.* विवारकृत्, विकाशकः, वितततिकारः, विस्तारकः, व्यादाता *m.* (तृ).

DILATORILY, *adv.* सविलम्बं, विलम्बेन, कालक्षेपेण, मन्दं मन्दं.

DILATORINESS, *s.* दीर्घसूत्रता, चिरकारिता, अक्षिप्रकारित्वं, विलम्बः, विलम्बित्वं, कालक्षेपः, क्षेपः, मन्दः, मन्दता, मान्द्यं.

DILATORY, *a.* चिरकारी -रिणी -रि (न्) or अक्षिप्रकारी, चिरक्रियः -या -यं, दीर्घसूत्रः -त्रा -त्रं, विलम्बी -म्बिनी -म्बि (न्), मन्दः -न्दा -न्दं, मन्दायमानः -ना -नं, मन्थरः -रा -रं, दीर्घकालीनः -ना -नं, जडक्रियः -या -यं, प्रलम्बः -म्बा -म्बं, मनाक्करः -री -रं, कालक्षेपकः -का -कं.

DILECTION, *s.* स्नेहः, प्रीतिः *f.*, प्रेमा *m.* (न्), अनुरक्तिः *f.*, अनुग्रहः.

DILEMMA, *s.* उभयसम्भवः, सन्देहः.—(Doubtful choice) विकल्पः.

DILIGENCE, *s.* उद्योगः, उद्यमः, व्यवसायः, अभ्यासः, अभ्यासता, अभ्यसनं, प्रसक्तिः *f.*, अभिनिवेशः, मनोनिवेशः, अध्यवसायः, उत्साहः, यत्नः, प्रयत्नः, दीर्घप्रयत्नः, प्रवृत्तिः *f.*, अभियुक्तता, योग्यता, व्यवस्थितिः *f.*, अप्रमादः, समुत्थानं, शुश्रूषा, अनलसता.

DILIGENT, *a.* उद्योगी -गिनी -गि (न्), उद्यमी -मिनी -मि (न्), उद्युक्तः -क्ता -क्तं, व्यवसायी -यिनी -यि (न्), उत्साही -हिनी -हि (न्), सोद्योगः -गा -गं, आसक्तः -क्ता -क्तं, प्रसक्तः -क्ता -क्तं, अभिनिविष्टः -ष्टा -ष्टं, परायणः -णा -णं, प्रयत्नवान् -वती -वत् (त्), महोद्यमः -मा -मं, महोत्साहः -हा -हं, अनलसः -सा -सं, प्रसितः -ता -तं, कृतश्रमः -मा -मं.

DILIGENTLY, *adv.* प्रयत्नतस्, सोद्योगं, सव्यवसायं, मनोनिवेशेन, प्रसक्तं.

DILL, *s.* सालेयः, शालेयः, शीतशिवः, मिशी, मधुरिका, शतपुष्पा, शताह्वा.

DILUCID, *a.* (Clear) स्वच्छः -च्छा -च्छं, विमलः -ला -लं.—(Not obscure) स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, भिन्नार्थः -र्था -र्थं.

To DILUCIDATE, *v. a.* स्पष्टीकृ, व्यक्तीकृ, व्याख्या (c. 2. -ख्याति -तुं), व्याकृ.

DILUCIDATION, *s.* स्पष्टीकरणं, व्यक्तीकरणं, व्याख्या, विशुद्धिः *f.*

DILUENT, *a.* विलयनः -ना -नं, क्षीणकारी -रिणी -रि (न्), तनूकरणः -णा -णं.

DILUENT, *s.* विलयनं, विद्रावणं, विलयकृत्, तनूकृत्, सूक्ष्मकृत्.

To DILUTE, *v. a.* (Attenuate) तनूकृ, क्षीणीकृ, सूक्ष्मीकृ, कृश (nom. कृशयति -यितुं), विलीनं -नां -नं कृ.—(Dilute with water) जलेन संसृज् (c. 6. -सृजति -स्रष्टुं) or मिश्र् (c. 10. मिश्रयति -यितुं).

DILUTED, *p. p.* (With water) जलसंसृष्टः -ष्टा -ष्टं, जलघटितः -ता -तं, जलमिश्रितः -ता -तं.—(Attenuated) तनूकृतः -ता -तं, प्रकृशितः -ता -तं, विलीनः -ना -नं; 'diluted decoction,' अनायासकृतं, फाण्टं.

DILUTER, *s.* जलेन मिश्रयति यो जनः, तनूकारी *m.* (न्), क्षीणकारी.

DILUTION, *s.* (Act of making thin or weak) तनूकरणं, क्षीणकरणं, कृशीकरणं, विलयनं.—(With water) जलसंसर्गः, जलमिश्रणं.

DILUVIAN, *s.* जलप्रलयसम्बन्धी -न्धिनी -न्धि (न्), जलाप्लावनविषयः -या -यं.

DIM, *a.* (Somewhat dark, obscure) मन्दच्छायः -या -यं, मन्दकान्तः -न्ता -न्तं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, निष्प्रभः -भा -भं, अप्रभः -भा -भं, अतेजाः -जाः -जः (स्) or निस्तेजाः, अन्धकः -का -कं, सतिमिरः -रा -रं, अप्रकाशः -शा -शं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, दुर्दृष्टः -ष्टा -ष्टं, दुर्दर्शः -र्शा -र्शं, हतज्योतीः -तीः -तिः (स्), दुरालोकः -का -कं.—(Not seeing clearly) अस्पष्टदृक् (श्), हतदृष्टिः -ष्टिः -ष्टि.—(Dull of apprehension) मन्दबुद्धिः -द्धिः -द्धि, स्थूलधीः -धीः -धि, जडमतिः -तिः -ति, अन्धधीः -धीः -धि.

To DIM, *v. a.* तिमिर (nom. तिमिरयति -यितुं), अन्धीकृ, निष्प्रभीकृ, मलिन (nom. मलिनयति -यितुं), अस्पष्टीकृ, मलिनीकृ.

DIMENSION, *s.* परिमाणं, प्रमाणं, मात्रं, मात्रा, मानं, विस्तारः, परिसरः, प्रसरः, पर्य्येतं, प्रपञ्चः, विशालता, विपुलता, सन्ततिः *f.*, विषयः, द्राघिमा *m.* (न्), दैर्घ्यं, आयतिः *f.*, आयामः, प्रयामः. The three dimensions are, 'length,' दैर्घ्यं; 'breadth,' विस्तारः; 'depth,' वेधः.

To DIMINISH, *v. a.* अल्पीकृ, न्यूनीकृ, ऊन् (c. 10. ऊनयति -यितुं), कन (nom. कनयति -यितुं), ह्रस् in caus. (ह्रासयति -यितुं). लघ (nom. लघयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं).

To DIMINISH, *v. n.* अल्पीभू, न्यूनीभू, ऊनीभू, ह्रस् (c. 1. ह्रसते -सितुं), क्षि in pass. (क्षीयते), परिक्षि, अपचि in pass. (-चीयते).

DIMINISHED, *p. p.* अल्पीकृतः -ता -तं, अल्पीभूतः -ता -तं, क्षीणः -णा -णं, ह्रसितः -ता -तं, न्यूनीभूतः -ता -तं, अपचितः -ता -तं, लुप्तः -प्ता -प्तं.

DIMINUTION, *s.* (Act of making less) न्यूनीकरणं, अल्पीकरणं, ह्रासः, लोपः.—(State of growing less) क्षयः, न्यूनत्वं -ता, अल्पत्वं, अपचयः, क्षिया, क्षितिः *f.*, ह्रासः, हानिः *f.*, अवसादः.

DIMINUTIVE, *a.* अल्पः -ल्पा -ल्पं, अल्पकः -का -कं, क्षुद्रः -द्रा -द्रं, कणीकः -का -कं, स्तोकः -का -कं, सूक्ष्मः -क्ष्मा -क्ष्मं.—(In body) अल्पतनुः -नुः -नु, स्तोककायः -यी -यं, अल्पमूर्त्तिः -र्त्तिः -र्त्ति.

DIMINUTIVENESS, *s.* अल्पता, क्षुद्रता, सूक्ष्मता, सौक्ष्म्यं, स्तोकता, अणिमा *m.* (न्), लघुता, लाघवं, क्षोदिमा *m.* (न्).

DIMISH, *a.* ईषन्मलिनः -ना -नं, ईषदन्धः -न्धा -न्धं, अस्पष्टः -ष्टा -ष्टं.

DIMISSORY, *s.* गमनानुज्ञापकः -का -कं, प्रेरकः -का -कं, प्रस्थापकः -का -कं; 'letters dimissory,' अन्यधर्म्माध्यक्षाधीनदेशे गमनानुज्ञापकं पत्रं.

DIMITY, *s.* सूक्ष्मकार्पासं, सूक्ष्मतूलावस्त्रं, कार्पासाक्षरं, फालवस्त्रं.

DIMLY, *adv.* अस्पष्टं, अप्रकाशं, अव्यक्तं, निष्प्रभं, अस्फुटं, मलिनं.

DIMMED, *p. p.* हतप्रभः -भा -भं, हततेजाः -जाः -जः (स्) or क्षततेजाः, हतज्योतीः -तीः -तिः (स्), हततेजाः -जाः -जः (स्) or क्षततेजाः, मलिनितः -ता -तं.

DIMNESS, *s.* अस्पष्टता, निष्प्रभता, तिमिरं, अन्धकता, अप्रकाशत्वं, दुर्दर्शत्वं, दुरालोकता, प्रभाहानिः *f.*, प्रतिभाहानिः *f.*—(Stupidity) बुद्धिमान्द्यं, स्थूलता.

DIMPLE, *s.* कपोलभङ्गः, गण्डतरङ्गः, चिबुकरेखा, हनुभङ्गः, त्वग्भ्रिमिका.

DIMPLY, *a.* भङ्गुरः -रा -रं, ऊर्म्मिमान् -मती -मत् (त्).

DIN, *s.* कोलाहलः, तुमुलं, घुष्टं, घोषः, उच्चैःस्वरः, झम्झा, झम्झनं, रासः, स्तनितं, ध्वनितं, क्वणितं, निःस्वनः, उद्रावः, चीत्कारः, निनादः, डिण्डिम शब्दः.

To DIN, *v. a.* डिण्डिम शब्देन or कोलाहलेन or उच्चैःशब्देन कर्णौ उपहन् (c. 2. -हन्ति -न्तुं).

To DINE, *v. n.* आहारं कृ, भोजनं कृ, मध्याह्नभोजनं कृ, माध्याह्निकाहारं कृ; 'one who has dined,' कृताहारः -रा -रं, कृतभोजनः -ना -नं.

To DINE, *v. a.* (Give a dinner to) भुज् in caus. (भोजयति -यितुं), अश् in caus. (आशयति -यितुं), प्राश्, माध्याह्निकभोजनं कृ in caus. (कारयति -यितुं).

To DING, *v. a.* (Dash) प्रसभं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or पत् in caus. (पातयति -यितुं) or अभिहन् (c. 2. -हन्ति -न्तुं) or प्रतिहन्.

To DING, *v. n.* शब्द् (nom. शब्दायते), भर्त्स् (c. 10. भर्त्सयते -यितुं).

DING-DONG, *s.* घण्टाशब्दः, घण्टास्वनः, घण्टानादः.

DINGLE, *s.* दरी -रा, दरीभूः *f.*, कन्दरः -री, अद्रिद्रोणी, प्रान्तरं.

DINING-ROOM, *s.* भोजनशाला, भोजनगृहं, भोजनस्थानं, आहारस्थानं.

DINNER, *s.* मध्याह्नभोजनं, माध्याह्निकाहारः, भोजनं, आहारः; 'a dinner party,' सहभोजनं, सम्भोजनं, सन्धिः *f.*; 'invited to dinner,' भोजनार्थं निमन्त्रितः; 'to serve up dinner,' भोजनं परिविश् in caus. (-वेशयति -यितुं).

DINNER-TIME, *s.* भोजनकालः, मध्याह्नभोजनकालः, आहारकालः.

DINT, *s.* (Blow) आघातः, प्रहारः, आहतिः *f.*, अभिघातः, पातः.—(Mark made by a blow) आघातचिह्नं, भङ्गः.—(Force) बलं, शक्तिः *f.*, प्रभावः; 'by dint of,' बलेन, प्रभावात्; 'by dint of penance,' तपःप्रभावात्.

To DINT, *v. a.* आघातेन चिह्न् (c. 10. चिह्नयति -यितुं) or अङ्क् (c. 10. अङ्कयति -यितुं).

DIOCESAN, *s.* प्रधानधर्म्माध्यक्षः, धर्म्माधिपतिः *m.*, प्रधानधर्म्मोपदेशकः.

DIOCESE, *s.* प्रधानधर्म्माध्यक्षाधीनो देशः or -देशः.

DIOPTRICAL, *a.* दूरदर्शनोपकारकः -का -कं, दूरदृष्टिप्रयोजकः -का -कं.

DIOPTRICS, *s. pl.* दूरस्थवस्तुदृष्टिविषयकं चाक्षुषशास्त्रप्रकरणं.

DIORTHOSIS, *s.* वक्राङ्गचिकित्सा, भग्नाङ्गसमाधानं, वक्राङ्गस्य ऋजूकरणं.

To DIP, *v. a.* (Immerge) मज्ज् in caus. (मज्जयति -यितुं), निमज्ज्, प्रमज्ज्, अवगाह् in caus. (-गाहयति -यितुं); आप्लु in caus. (-प्लावयति -यितुं).—(Moisten) क्लिद् in caus. (क्लेदयति -यितुं), सिच् (c. 6. सिञ्चति, सेक्तुं).—(Engage in) व्यापॄ (c. 6. -प्रियते -पर्तुं), वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, आस्था (c. 1. -तिष्ठति -स्थातुं).—(Dip into a book) शास्त्रं चुष् (c. 1 चुषति -षितुं) or ईषन्मनोयोगेन अधी (c. 2. अधीते, अधेतुं).

To DIP, *v. n.* (Immerge one's self) मज्ज् (c. 6. मज्जति, मंक्तुं), निमज्ज्, अवगाह् (c. 1. -गाहते -हितुं), व्यवगाह्, विगाह्, प्लु in caus. pass. (प्लाव्यते), आप्लु (c. 1. -प्लवते -प्लोतुं).—(Enter) विश् (c. 6. विशति, वेष्टुं), प्रविश्, निविश्.—(Be engaged in) व्यापॄ (c. 6. -प्रियते), व्यापृतः -ता -तं भू, निष्ठा (c. 1. -तिष्ठति -ष्ठातुं), प्रवृत्तः -त्ता -त्तं भू, आरूढः -ढा -ढं भू.—(Choose by chance) दैवम् आस्थाय ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), दैवात् or अकस्माद् ग्रह्.

DIP, *s.* निमज्जनं, अवगाहः, अवनतिः *f.*, अधोगतिः *f.*, पतनं, आनतिः *f.*, नम्रता.

DIPHTHONG, *s.* द्विस्वरः, युक्तस्वरः, स्वरद्वयं, सन्ध्यक्षरं.

DIPLOMA, *s.* पददायकं or अधिकारदायकं or ख्यातिदायकं पत्रं, अधिकारपत्रं.

DIPLOMACY, *s.* (State of acting under a diploma) प्रामाधिकारस्य पदं or अवस्था.—(Privileges or customs of ambassadors) दूताधिकारः, राजदूतव्यवहारः.—(Body of ambassadors) दूतसमूहः, राजदूतमण्डलं.—(Business of an ambassador) राजदूतव्यापारः, राजप्रतिनिधिकर्म्म *n.* (न्), दौत्यकर्म्म.—(Dexterity in negotiation) माया.

DIPLOMATIC, *a.* दौत्यिकः -की -कं, दूतव्यवहारसम्बन्धी -न्धिनी -न्धि (न्), राजप्रतिनिधिकर्म्मविषयकः -का -कं.

DIPPER, *s.* मज्जयिता *m.* (तृ), निमज्जयिता, आप्लावकः.—(Ladle) स्रजः.

DIRE, *a.* दारुणः -णा -णं, घोरः -रा -रं, उग्रः -ग्रा -ग्रं, भयानकः -का -कं, भयङ्करः -रा -रं, भैरवः -वी -वं, रौद्रः -द्री -द्रं, रौद्रदर्शनः -ना -नं, भीषणः -णा -णं, क्रूरः -रा -रं, भीरुमयः -यी -यं.

DIRECT, *a.* (Not crooked, not oblique) अवक्रः -क्रा -क्रं, अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं, ऋजुः -जुः -जु, अनुलोमः -मा -मं, अञ्जसः -सा -सं, अविलोमः -मा -मं; 'a direct flight,' अविडीनं.—(Not collateral) क्रमागतः -ता -तं.—(Express, plain) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, अव्यञ्जनः -ना -नं.

To DIRECT, *v. a.* (Aim at, point towards) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्; 'to direct a weapon at any one,' अमुकमुद्दिश्य अस्त्रं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or प्रेर् (c. 10. -ईरयति -यितुं); 'he performed a penance directed to the deity,' देवमुद्दिश्य तपस् तेपे.—(Regulate) शास् (c. 2. शास्ति, शासितुं), अनुशास्, प्रशास्; विधृ in caus. (-धारयति -यितुं), विनियम् (c. 1. -यच्छति -यन्तुं), विधा (c. 3. -दधाति -धातुं).—(Guide, lead) नी (c. 1. नयति, नेतुं), दृश् in caus. (दर्शयति -यितुं), दिश्, प्रदिश्.—(Prescribe, point out) निर्दिश्, प्रदिश्, विनिर्दिश्; सूच् (c. 10. सूचयति -यितुं).—(Order, instruct) आदिश्, उपदिश्, आज्ञा in caus. (-ज्ञापयति -यितुं), चुद् in caus. (चोदयति -यितुं).

DIRECTED, *p. p.* (Aimed at) उद्दिष्टः -ष्टा -ष्टं, उद्दिश्य indecl., अभिसंहितः -ता -तं.—(Regulated) शासितः -ता -तं, अनुशासितः -ता -तं, विनियतः -ता -तं, व्यवस्थितः -ता -तं.—(Prescribed) निर्दिष्टः -ष्टा -ष्टं, प्रदिष्टः -ष्टा -ष्टं, देशितः -ता -तं, सूचितः -ता -तं.—(Ordered, instructed) आदिष्टः -ष्टा -ष्टं, उपदिष्टः -ष्टा -ष्टं, प्रचोदितः -ता -तं, प्रेरितः -ता -तं.—(Applied) प्रयुक्तः -क्ता -क्तं, अर्पितः -ता -तं; 'well-directed,' सुप्रयुक्तः -क्ता -क्तं.

DIRECTION, *s.* (Aim, tendency) सन्धानं, अभिसन्धानं, उद्देशः.—(Order, command) आदेशः, निदेशः, निर्देशः, आज्ञा, शासनं, शास्तिः *f.*, चोदनं, प्रेरणा, प्रयुक्तिः *f.*, मतं, वचनं.—(Management) नयः, नायः, प्रणयनं, नेतृत्वं, अधिकारः, अधिष्ठातृत्वं, सम्पादनं, निर्देशः. (Address of a letter) पत्रसंज्ञा, पत्रादेशः, पत्रोद्देशः.—(Place of abode) वासस्थानं; 'in three directions,' त्रेधा; 'in every direction,' सप्तदिपीनः -ना -नं, चतुर्दिक्षु; 'following the natural direction,' अनुलोमनं.

DIRECTIVE, *a.* देशकः -का -कं, उद्देशकः -का -कं, आदेशी -शिनी -शि (न्), निर्देशकः -का -कं, दर्शकः -का -कं, सूचकः -का -कं.

DIRECTLY, *adv.* सद्यस्, अधिरात्, अचिरेण, सपदि, झटिति, अनन्तरं, तत्क्षणात्, क्षणान्तरे, आशु, अविलम्बितं, शीघ्रं, क्षिप्रं, तत्काले.

DIRECTOR, *s.* नायकः, अधिष्ठाता *m.* (तृ), शासिता *m.* (तृ), अनुशासकः, अध्यक्षः, आदेष्टा *m.* (ष्टृ), निर्देष्टा *m.*, आदेशी *m.* (न्), अधिकारी *m.* (न्), ईशिता *m.* (तृ), सम्पादकः, अवेक्षिता *m.* (तृ).

DIREFUL, *a.* दारुणः -णा -णं, घोरः -रा -रं, भीरुमयः -यी -यं. *See* DIRE.

DIREFULNESS, DIRENESS. *s.* दारुणत्वं, दारुणं, घोरता, उग्रता, भयानकत्वं, भीमता, क्रूरता, रौद्रता.

DIREPTION, *s.* हरणं, अपहारः, अपहरणं, अभिग्रहः, अभिहारः, विलोपनं.

DIRGE, *s.* करुणं, करुणार्थकं गीतं, कारुणिकगीतं, करुणमयं गीतं.

DIRK, *s.* कट्टारः, कृपाणी, छुरिका, शङ्कुः *m.*, कत्तरी, असिपुत्रिका.

DIRT, *s.* (Mud, filth) मलं, पङ्कः, कुपङ्कः, अमेध्यं, कर्दमः, कल्कं, जञ्जालः -लं, कलुषं.—(Sordidness) कदर्य्यत्वं, मालिन्यं.

To DIRT, *v. a.* मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन or पङ्केन दुष् in caus. (दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

DIRTIED, *p. p.* मलिनितः -ता -तं, मलदूषितः -ता -तं, पङ्कदूषितः -ता -तं, अमेध्यलिप्तः -प्ता -प्तं, अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं.

DIRTILY, *adv.* समलं, मलिनं, सकर्दमं, सकल्कं, मलीमसं, समालिन्यं.

DIRTINESS, *s.* मालिन्यं, समलता, मलवत्त्वं, अमेध्यता -त्वं, कलुषत्वं, अशुद्धता.

DIRTY, *a.* (Filthy) मलिनः -ना -नं, समलः -ला -लं, मलवान् -वती -वत् (त्), मलदूषितः -ता -तं, मलीमसः -सा -सं, पङ्की -ङ्किनी -ङ्कि (न्) or मलपङ्की, पङ्किलः -ला -लं, कलुषः -षा -षं -षी -षिणी -षि (न्), सकर्दमः -मा -मं, कार्दमः -मी -मं, कल्की -ल्किनी -ल्कि (न्), कल्मषः -षा -षं, सजञ्जालः -ला -लं, कश्मलः -ला -लं, आविलः -ला -लं, मलीयान् -यसी -यः (स्) अशुद्धः -द्धा -द्धं.—(Mean, base) नीचः -चा -चं, खलः -ला -लं, कदर्य्यः -र्य्या -र्य्यं, कुत्सितः -ता -तं; 'dirty clothes,' धरासी.

To DIRTY, *v. a* मालेन (nom मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), मलेन or अमेध्येन or पङ्केन दुष् in caus. (दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं) or अभ्र् (c. 7. अनक्ति, अंक्तुं), मलिनीकृ, समलं -लां -लं कृ, अमेध्यं -ध्यां -ध्यं कृ, कलङ्क (nom. कलङ्कयति -यितुं).

DIRUPTION, *s.* स्फोटनं, स्फुटनं, भेदः, विभेदः, विभङ्गः, विदारणं.

DISABILITY, *s.* अशक्तिः *f.*, असामर्थ्यं, अक्षमता, दौर्बल्यं, शक्तिहीनता, अयोग्यता, अनुपयुक्तता, निषेधः.

To DISABLE, *v. a.* अशक्तं -क्तां -क्तं कृ, अशक्तीकृ, असमर्थं -र्थां -र्थं कृ, अक्षमं -मां -मं कृ, दुर्बलीकृ, बलं or शक्तिं हृ (c. 1. हरति, हर्त्तुं), विकलीकृ, विहस्तीकृ, उपहन् (c. 2. -हन्ति -न्तुं).

DISABLED, *p. p.* हृतशक्तिः -क्तिः -क्ति or उपहतशक्तिः, विहस्तीकृतः -ता -तं.

To DISABUSE, *v. a.* (Undeceive) भ्रमं or भ्रान्तिं or मोहं or मिथ्यामतिं छिद् (c. 7. छिनत्ति, छेत्तुं) or अपनी (c. 1. -नयति, नेतुं) or हृ (c. 1. हरति, हर्त्तुं), भ्रान्तेर् मुच् (c. 6. मुञ्चति, मोक्तुं), मुक्तभ्रान्तिं कृ, विगतमोहं -हां -हं कृ.

To DISACCUSTOM, *v. a.* अव्यवहारितं -तां -तं कृ, व्यवहारं or अभ्यासं लुप् (c. 6. लुम्पति, लोप्तुं) or निवृत् in caus.

DISADVANTAGE, *s.* अनर्थः, अलाभः, अहितं, अनिष्टं, अफलं, अपायः, अपचयः, अपकारः, अपचितिः *f.*, अपकृतं, अप्राप्तिः *f.*, क्षतिः *f.*, हानिः *f.*, हिंसा, क्षयः, उपक्षयः, अपहारः, नाशः, विरोधः, व्याघातः, बाधः, अनुपकारः.

To DISADVANTAGE, *v. a.* अपकृ, अपायं or अनर्थं जन् in caus. (जनयति -यितुं), अहिताय or अलाभाय भू, विरुध् (c. 7. -रुणद्धि -रोद्धुं), हिंस् (c. 1. हिंसति -सितुं).

DISADVANTAGEOUS, *a.* अपकारकः -का -कं -री -रिणी -रि (न्), अहितः -ता -तं, अनर्थः -र्था -र्थं -र्थकः -का -कं; निरर्थकः -का -कं, अफलः -ला -लं, विरोधी -धिनी -धि (न्), प्रतिकूलः -ला -लं, अनुपकारकः -का -कं, अनिष्टजनकः -का -कं, क्षतिकारकः -का -कं, उपघातकः -का -कं, हिंसकः -का -कं, अमङ्गलः -ला -लं, सापकारः -रा -रं.

DISADVANTAGEOUSLY, *adv.* अहितं, अनिष्टं, अलाभाय, अहिताय, विरोधेन, विरुद्धं, प्रतिकूलं, प्रातिकूल्येन, अनर्थकं, अमङ्गलं, सापकारं.

To DISAFFECT, *v. a.* (Cause disaffection) विरञ्ज् in caus. (-रञ्जयति -यितुं), विरक्तीकृ. वैरक्त्यं जन् (c. 10. जनयति -यितुं), उपजप् (c. 1. -जपति -पितुं), कर्णे जप् or उपजप्, भेदं or वैरं कृ.

DISAFFECTED, *p. p.* विरक्तः -क्ता -क्तं, अहितः -ता -तं, विप्रियः -या -यं, अहितैषी -षिणी -षि (न्) or अप्रियेषी, क्षीणभक्तिः -क्तिः -क्ति, अभक्तः -क्ता -क्तं. अभक्तिमान् -मती -मत् (त्), अहितबुद्धिः -द्धिः -द्धि, अहितकारी -रिणी -रि (न्).

DISAFFECTEDLY, *adv.* विरक्तं, अहितं, सवैरक्त्यं, सवैराग्यं, विप्रियं.

DISAFFECTION, *s.* विरक्तिः *f.*, वैरक्त्यं, विरागः, वैराग्यं, अपरागः, अभक्तिः *f.*, विप्रियता, अहितत्वं, अभक्तित्वं.

DISAFFIRMANCE, *s.* अपवादः, अपलापः, प्रत्याख्यानं, खण्डनं, अस्वीकारः.

To DISAGREE, *v. n.* (In opinion) विवद् (c. 1. -वदते -दितुं), विसंवद् (-वदति), न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न स्वीकृ, असम्मतः -ता -तं भू, अन्यमतीभू.—(Differ, not to suit) भिद् in pass. (भिद्यते), असदृशः -शी -शं भू, न युज् in pass. (युज्यते).—(Be opposed to) विरुध् (c. 7. -रुणद्धि -रोद्धुं).

DISAGREEABLE, *s.* (Unpleasing) अप्रियः -या -यं, विप्रियः -या -यं, कुप्रियः -या -यं, अनभिमतः -ता -तं, अननुमतः -ता -तं, अरम्यः -म्या -म्यं, अनिष्टः -ष्टा -ष्टं, अहितः -ता -तं, अमनोज्ञः -ज्ञा -ज्ञं, अमनोहरः -रा -रं, अरुचिरः -रा -रं, अप्रीतिकरः -री -रं, अनीहितः -ता -तं, व्यलीकः -का -कं, अलीकः -का -कं, असुखदः -दा -दं, निःसुखः -खा -खं, कष्टः -ष्टा -ष्टं.—(Contrary) विरुद्धः -द्धा -द्धं, विपरीतः -ता -तं, प्रतिकूलः -ला -लं.

DISAGREEABLENESS, *s.* अप्रियता, विप्रियता, अरम्यता, अनिष्टत्वं, व्यलीकता, अलीकता, अनभिमतत्वं, अमनोज्ञत्वं, कष्टता, विरुद्धता, वैपरीत्यं.

DISAGREEABLY, *adv.* अप्रियं, अरम्यं, अनिष्टं, व्यलीकं, अरुचिरं, विरुद्धं.

DISAGREEING, *p. p.* विवदमानः -ना -नं, असम्मतः -ता -तं, परस्परविरुद्धः -द्धा -द्धं.

DISAGREEMENT, *s.* (Difference) भेदः, विभेदः, भिन्नता, असमता, असाम्यं—(Difference of opinion) विमतिः *f.*, वैमत्यं, मतिप्रभेदः, मतिविपर्य्ययः, असम्मतिः *f.*, विसंवादः, अस्वीकारः.—(Quarrel) कलहः, विप्रतिपत्तिः *f.*, विप्रयोगः.—(Contrariety) विरोधः, विरुद्धता, विपरीतता.

To DISALLOW, *v. a.* (Deny) प्रत्याख्या (c. 2. -ख्याति -तुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपलप् (c. 1. -लपति -पितुं), निरस् (c. 4. -अस्यति -असितुं).—(Not to permit) न अनुज्ञा (c. 9. -जानाति -ज्ञातुं), न अनुमन् (c. 4. -मन्यते -मन्तुं), निषिध् (c. 1. -षेधति -षेद्धुं).—(Censure) निन्द् (c. 1. निन्दति -न्दितुं) गर्ह् (c. 1. गर्हते -र्हितुं).

DISALLOWABLE, *a.* प्रत्याख्येयः -या -यं, अननुज्ञेयः -या -यं, अधर्म्यः -र्म्या -र्म्यं.

DISALLOWANCE, *s.* प्रत्याख्यानं, प्रत्यादेशः, निषेधः, प्रतिषेधः, अननुज्ञा, निरसनं.

DISALLOWED, *p. p.* निषिद्धः -द्धा -द्धं, प्रतिषिद्धः -द्धा -द्धं, अननुज्ञातः -ता -तं, प्रत्याख्यातः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं.

To DISANIMATE, *v. a.* निर्जीवीकृ, विषणीकृ, अवसद् in caus. (-सादयति -यितुं).

DISANIMATION, *s.* निर्जीवीकरणं, जीवितनाशः, प्राणहरणं, जीवितहरणं.

To DISANNUL, *v. a.* लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ, खण्ड् (c. 10. खण्डयति -यितुं), मोघीकृ, निष्फल (nom. निष्फलयति -यितुं), अन्यथा कृ.

DISANNULLED, *p. p.* लुप्तः -प्ता -प्तं, मोघीकृतः -ता -तं, अनिष्पन्नः -न्ना -न्नं.

DISANNULMENT, *s.* लोपः, खण्डनं, मोघीकरणं, अन्यथाकरणं.

To DISAPPEAR, *v. n.* अन्तर्धा in pass. (-धीयते), तिरोधा in pass., तिरोभू, तिरस् (nom. तिरस्यति), नश् (c. 4. नश्यति, नशितुं), प्रणश्, तिरोगम् (c. 1. -गच्छति -गन्तुं), विली (c. 4. -लीयते -लेतुं), अप्रत्यक्षीभू, अदृश्यः -श्या -श्यं भू, अस्तं गम्.

DISAPPEARED, *p. p.* अन्तर्हितः -ता -तं, तिरोहितः -ता -तं, तिरोगतः -ता

-तं, नष्टः -ष्टा -ष्टं, अदृष्टः -ष्टा -ष्ट, अदृश्यः -श्या -श्यं, विलीनः -ना -नं, चक्षुरविषयः -या -यं, अप्रत्यक्षः -क्षा -क्षं, अलोकितः -ता -तं, अदृष्टिगोचरः -रा -रं, परोक्षः -क्षा -क्षं, चक्षुरतीतः -ता -तं.

DISAPPEARANCE, *s.* अन्तर्द्धा -र्द्धानं, अन्तर्द्धिः *m.*, तिरोधानं, तिरस्कारः, तिरस्क्रिया, अविषयः, अप्रत्यक्षता, अदर्शनं, अलोकनं, अपवारणं, परोक्षं, अगोचरं, अस्तमयनं, अन्तर्हितत्वं.—(Departure) अपगमः, अपायः.

To DISAPPOINT, *v. a.* आशाः खण्ड् (c. 10. खण्डयति -यितुं), सङ्कल्पं or वाञ्छाः or मनोरथान् हन् (c. 2. हन्ति -न्तुं) or प्रतिहन् or भञ्ज् (c. 7. भनक्ति, भंक्तुं), भग्नाशं -शां -शं कृ, मोघीकृ, व्यर्थीकृ, विफलीकृ, वृथा कृ, मुधा कृ, वञ्च् (c. 10. वञ्चयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्.

DISAPPOINTED, *p. p.* भग्नाशः -शा -शं, हताशः -शा -शं, मनोहतः -ता -तं, खण्डितः -ता -तं, खण्डिताशंसः -सा -सं, भग्नसङ्कल्पः -ल्पा -ल्पं, भग्नोद्यमः -मा -मं, आशाविभिन्नः -न्ना -न्नं, मोघाशः -शा -शं, मोघवाञ्छितः -ता -तं, अनधिगतमनोरथः -था -थं, अलब्धाभीप्सितः -ता -तं, विफलीकृतः -ता -तं, प्रतिहतः -ता -तं, अकृतार्थः -र्था -र्थं, विलक्षितः -ता -तं, प्रतिबद्धः -द्धा -द्धं, विप्रलब्धः -ब्धा -ब्धं, वञ्चितः -ता -तं.

DISAPPOINTMENT, *s.* आशाभङ्गः, आशाखण्डनं, उद्यमभङ्गः, सङ्कल्पभङ्गः, फलखण्डनं, विफलीकरणं, कर्म्मध्वंसः, नैराश्यं, विप्रलम्भः, विषादः, विसंवादः, प्रत्यवायः

DISAPPROBATION, *s.* अप्रसादः, निन्दा, अप्रीतिः *f.*, विमतिः *f.*, विरागः, वैरक्त्यं, विप्रियता, असम्मतिः *f.*, अस्वीकारः, अनिच्छा, गर्हा -र्हणं, जुगुप्सा, घृणा.

To DISAPPROVE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), गर्ह् (c. 1. गर्हते -र्हितुं), न सम्मन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न अभिमन्, न स्वीकृ, न प्रशंस् (c. 1. -शंसति -सितुं), न प्रतिनन्द् (c. 1. -नन्दति -न्दितुं), न रुच् (c. 1. रोचते -चितुं) with dat.; as, 'he disapproves of that,' तत् तस्मै न रोचते.

DISAPPROVED, *p. p.* अनभिमतः -ता -तं, असम्मतः -ता -तं, अमतः -ता -तं, अनिष्टः -ष्टा -ष्टं, अप्रशस्तः -स्ता -स्तं, गर्हितः -ता -तं, निन्दितः -ता -तं, अस्वीकृतः -ता -तं, विद्विष्टः -ष्टा -ष्टं.

To DISARM, *v. a.* शस्त्रं or अस्त्रं हृ (c. 1. हरति, हर्त्तुं), आयुधम् अपनी (c. 1. -नयति -नेतुं), निरायुधं -धां -धं कृ, निःशस्त्रं -स्त्रां -स्त्रं कृ, विशस्त्रीकृ, विसज्जीकृ.

DISARMED, *p. p.* निरायुधः -धा -धं, निरस्त्रः -स्त्रा -स्त्रं, निःशस्त्रः -स्त्रा -स्त्रं, शस्त्रवर्জ্জितः -ता -तं; 'disarmed of resentment,' क्षीणमन्युः -न्युः -न्यु.

To DISARRANGE, *v. a.* क्रमं or पर्य्यायं भञ्ज् (c. 7. भनक्ति, भंक्तुं), पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, विक्षुभ् in caus. (-क्षोभयति -यितुं), आकुलीकृ, सङ्करीकृ.

DISARRANGEMENT, *s.* अक्रमः, उत्क्रमः, व्युत्क्रमः, क्रमभङ्गः, अपर्य्यायः, अपरिपाटिः *f.*, प्रत्यवायः, व्यस्तता, असंस्थानं.

To DISARRAY, *v. a.* (Undress) उच्छद् (c. 10. -छादयति -यितुं), अपनह् (c. 4. -नह्यति -नद्धुं), विवस्त्रीकृ.

DISARRAY, *s.* (Disorder of an army) समुत्पिण्डः, पिण्डलः, व्यूहभङ्गः.

DISASTER, *s.* आपद् *f.*, विपद् *f.*, व्यसनं, विपत्तिः *f.*, व्यापद् *f.*, विप्लवः, उपप्लवः, उपद्रवः, अनिष्टपातः, अत्ययः, दुर्दैवं, दुर्घटना, दौर्गत्यं, दुःखं, क्लेशः.—(From heaven) विनिपातः, उत्पातः, विनिहतः.

To DISASTER, *v. a.* पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, बाध (c. 1. बाधते -धितुं), उपद्रु (c. 1. -द्रवति -द्रोतुं), उपप्लु (c. 1. -प्लवते -प्लोतुं).

DISASTROUS, *a.* आत्ययिकः -की -कं, व्यसनी -निनी -नि (न्), विपद्युक्तः -क्ता -क्तं, आपन्नः -न्ना -न्नं, दुर्गतः -ता -तं, दुर्भाग्यः -ग्या -ग्यं, दैवोपहतः -ता -तं, दुःखी -खिनी -खि (न्), दुरन्तः -न्ता -न्तं, उपाकृतः -ता -तं, दारुणः -णा -णं, अशान्तिकरः -री -रं.

To DISAVOW, *v. a.* प्रत्याख्या (c. 2. -ख्याति -तुं), निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, अपलप् (c. 1. -लपति -पितुं), न स्वीकृ, न अङ्गीकृ.

DISAVOWAL, *s.* प्रत्याख्यानं, निह्नवः, अपह्नवः, निह्नुतिः *f.*, अपलापः, अस्वीकारः.

To DISAUTHORIZE, *v. a.* शक्तिं or प्रामाण्यं or प्रभुत्वं or अधिकारित्वं हृ (c. 1. हरति, हर्त्तुं) or अपहृ, लुप्तप्रमाणं -णां -णं कृ, न अनुज्ञा (c. 9. -जानाति -ज्ञातुं).

To DISBAND, *v. a.* युद्धकर्म्मणो मुच् (c. 6. मुञ्चति, मोक्तुं), सैन्यान् विसृज् (c. 6. -सृजति -स्रष्टुं), सैन्यभङ्गं कृ.

To DISBAND, *v. n.* युद्धकर्म्मणो मुच् in pass. (मुच्यते) or विसृज् in pass. (-सृज्यते).

To DISBARK, *v. a.* नौकाया अवरुह् in caus. (-रोपयति -यितुं) or अवतृ in caus. (-तारयति -यितुं).

DISBELIEF, *s.* अविश्वासः, अप्रत्ययः, अश्रद्धा, अभक्तिः *f.*, अविश्रम्भः, प्रत्ययाभावः.

To DISBELIEVE, *v. a.* न प्रती (c. 2. प्रत्येति -तुं rt. इ), न विश्वस् (c. 2. -श्वसिति -तुं), न श्रद्धा (c. 2. -दधाति -धातुं), न प्रत्ययीकृ.

DISBELIEVER, *s.* अविश्वासी *m.* (न्), अप्रत्ययी *m.* (न्), अश्रद्दधानः, नास्तिकः.

DISBELIEVING, *a.* अश्रद्धालुः -लुः -लु, अश्रद्धावान् -वती -वत् (त्).

To DISBRANCH, *v. a.* शाखां छिद् (c. 7. छिनत्ति, छेत्तुं), निःशाखं -खां -खं कृ.

To DISBURDEN, *v. a.* भारम् उन्नी in caus. (-नाययति -यितुं) or अवतृ in caus., भाराद् मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच्, भारं विनी (c. 1. -नयति -नेतुं) or अपनी, निर्भारं -रां -रं कृ, रिक्तभारं -रां -रं कृ, विशुध् in caus. (-शोधयति -यितुं); 'to disburden the mind,' मनोगतं or अन्तर्गतं मनः परस्मै व्यक्तीकृ or व्याख्या (c. 2. -ख्याति -तुं).

To DISBURSE, *v. a.* व्यय् (c. 1. व्ययति, c. 10. व्यययति -यितुं root इ), व्ययीकृ, विसृज् (c. 6. -सृजति -स्रष्टुं), विनियुज् (c. 7. -युंक्ते -योक्तुं)

DISBURSED, *p. p.* व्ययितः -ता -तं, व्ययीकृतः -ता -तं, व्ययीभूतः -ता -तं, अपचितः -ता -तं, विसर्জ্জितः -ता -तं.

DISBURSEMENT, *s.* व्ययः, धनव्ययः, व्ययीकरणं, विनियोगः, विसर्गः, त्यागः, अपचितिः *f.*, अपचयः; 'receipt and disbursement,' आयव्ययौ.

DISBURSER, *s.* व्ययी *m.* (न्), व्ययकर्त्ता *m.* (र्त्तृ), अपचेता *m.* (तृ).

DISCALCEATED, *p. p.* निष्पादुकः -का -कं, अपपादत्रः -त्रा -त्रं, उपानद्वर्জ্জितः -ता -तं.

To DISCANDY, *v. a.* विली in caus. (-लाययति -यितुं), विद्रु in caus. (-द्रावयति -यितुं).

To DISCARD, *v. a.* अपास् (c. 4. -अस्यति -असितुं), अवमुच् (c. 6. -मुञ्चति -मोक्तुं), अवसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्জ্জयति -यितुं), विसृज्, व्यपसृज्, उत्सृज्; प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अपाहा (c. 3. -जहाति -हातुं), अपहा, विहा; निराकृ, पराकृ; उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, दूरीकृ, खण्ड् (c. 10. खण्डयति -यितुं).

DISCARDED, *p. p.* अपास्तः -स्ता -स्तं, अवमृष्टः -ष्टा -ष्टं, प्रतिक्षिप्तः -प्ता -प्तं, निराकृतः -ता -तं, सम्प्रस्तः -स्ता -स्तं, प्रोज्झितः -ता -तं, अवधूतः -ता -तं.

DISCARNATE, *a.* मांसहीनः -ना -नं, निर्मांसः -सा -सं, अमांसः -सा -सं.

To DISCERN, *v. a.* (Descry, see) दृश् (c. 1. पश्यति, द्रष्टुं), प्रदृश्, सम्प्रदृश्, प्रतिदृश्, परिदृश्, अनुदृश्, विदृश्, सन्दृश्; ईक्ष् (c. 1. ईक्षते -क्षितुं), समीक्ष्, निरीक्ष्, वीक्ष्, प्रेक्ष्, सम्प्रेक्ष्; आलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं), समालोक्, अवलोक्, विलोक्, लक्ष् (c. 10. लक्षयति -यितुं), आलक्ष्, समालक्ष्, संलक्ष्, आलोच् (c. 10.

-लोचयति -यितुं), निर्वर्णं (c. 10. -वर्णयति -यितुं).—(Distinguish, judge) विविच् (c. 7. -विनक्ति -वेक्तुं or caus. -वेचयति -यितुं), विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विचर् in caus. (-चारयति -यितुं), निर्णी (c. 1. -णयति -णेतुं), विभू in caus. (-भावयति -यितुं), परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं).

DISCERNED, *p. p.* दृष्टः -ष्टा -ष्टं, ईक्षितः -ता -तं, विज्ञातः -ता -तं.

DISCERNER, *s.* द्रष्टा *m.* (ष्टृ), ईक्षिता *m.* (तृ), विज्ञः, विवेकदृश्वा *m.* (न्), विवेक्ता *m.* (क्तृ).

DISCERNIBLE, *a.* दृश्यः -श्या -श्यं, दृष्टिगोचरः -रा -रं, विज्ञेयः -या -यं, विवेचनीयः -या -यं, विभाव्यः -व्या -व्यं, विभावनीयः -या -यं, प्रत्यक्षः -क्षा -क्षं.

DISCERNIBLY, *adv.* प्रत्यक्षतस, दृष्टिगोचरं, व्यक्तं, विज्ञेयं, स्पष्टं.

DISCERNING, *a.* विवेकी -किनी -कि (न्), विवेकदृश्वा -श्वा -श्व (न्), विज्ञः -ज्ञा -ज्ञं, अभिज्ञः -ज्ञा -ज्ञं, दीर्घदृष्टिः -ष्टिः -ष्टि or दूरदृष्टिः, मर्म्मज्ञः -ज्ञा -ज्ञं, परिणामदर्शी -र्शिनी -र्शि (न्), बुद्धिमान् -मती -मत् (त्).

DISCERNINGLY, *adv.* सविज्ञानं, सविवेकं, विज्ञवत्, विचारेण, परिच्छेदपूर्व्वं.

DISCERNMENT, *s.* विवेकः -कता, विवेचनं, विवेकृत्वं, विवेकदृश्वत्वं, विज्ञानं, परिच्छेदः, विचारः, परीक्षा, अवबोधः, अधीज्ञानं, विभावनं, अवधारणं, विज्ञिः *f.*, दूरदृष्टिः *f.*, प्रेक्षा.

To DISCERP, *v. a.* व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), खण्ड् (c. 10. खण्डयति -यितुं), खण्डशः कृ, खण्डं खण्डं कृ, लवशः कृ, शकलीकृ, विदृ in caus. (-दारयति -यितुं).

DISCERPTIBLE, *a.* व्यवच्छेद्यः -द्या -द्यं, विभेद्यः -द्या -द्यं, खण्डनीयः -या -यं.

DISCERPTION, *s.* व्यवच्छेदः, विदारणं, विशसनं, शकलीकरणं.

To DISCHARGE, *v. a.* (Unload) भारम् उद्वृ in caus. (-तारयति -यितुं) or विनी or अपनी, भाराद् मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं).—(Set free) मुच्, विमुच्, प्रविमुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमृज् (c. 6. -मृजति -मृष्टुं, c. 10. -मर्ज्जयति -यितुं), निस्तृ in caus.—(From obligation) ऋणाद् उद्वृ or मुच् or शुध् in caus. (शोधयति -यितुं), आनृण्यं दा.—(Pay a debt, &c.) ऋणं शुध् in caus. or अपनी or विनी or अपाकृ or अपवृज् in caus. (-वर्ज्जयति -यितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निरादिश् (c. 6. -दिशति -देष्टुं), आनृण्यं गम् (c. 1. गच्छति, गन्तुं) or उपगम् or आप् (c. 5. आप्नोति, आप्तुं).—(Clear, absolve) शुध् in caus., परिशुध्; पापाद् मुच्.—(Dismiss from service) पदात् or अधिकाराद् अवसृज् or विसृज् or मुच् or निराकृ, or अवरुह् in caus. (-रोपयति -यितुं) or अपास् (c. 4. -अस्यति -असितुं) or च्यु in caus. (च्यावयति -यितुं) or निःसृ in caus. (-सारयति -यितुं) or निष्कस् in caus. (-कासयति -यितुं) or वहिष्कृ.—(Perform) अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आस्था, सम्पद् in caus. (-पादयति -यितुं), विधा (c. 3. -दधाति -धातुं), आचर् (c. 1. -चरति -रितुं), कृ, सञ्जू, निर्वह् in caus. (-वाहयति -यितुं).—(A missile) क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, असू (c. 4. अस्यति, असितुं), प्रास्, मुच्, प्रमुच्, सृज्, ईर् (c. 10. ईरयति -यितुं), उदीर्, पत् in caus. (पातयति -यितुं).—(A gun) लोहगोलान् युद्धनाडेः प्रक्षिप् or निःसृ in caus., युद्धनाडिस्थम् आग्नेयचूर्णं ज्वल् in caus. (ज्वालयति -यितुं).—(Emit, pour forth) उदीर्, मुच्, प्रमुच्, उत्सृज्, उद्वृ (c. 6. -गिरति -गरितुं -रीतुं), उद्गम् (c. 1. -वमति -मितुं), उच्चर् in caus. (-चारयति -यितुं), सु in caus. (स्रावयति -यितुं or c. 1. स्रवति, स्रोतुं), प्रसु, क्षर् (c. 1. क्षरति -रितुं), स्कन्द् in caus. (स्कन्दयति -यितुं).

To DISCHARGE, *v. n.* मुच् in pass. (मुच्यते), सु (c. 1. स्रवति, स्रोतुं), विली (c. 4. -लीयते).

DISCHARGE, *s.* (Unloading) भारावतरणं, उत्तरणं.—(Setting free) मोक्षः, मुक्तिः *f.*, परिमोक्षणं, उत्सर्गः, निस्तारः.—(From obligation) ऋणमोक्षः, ऋणमुक्तिः *f.*, उत्तरणं.—(Payment of a debt) ऋणशोधनं, ऋणापनयनं, ऋणापाकरणं, ऋणसिद्धिः *f.*, आनृण्यं, ऋणापनोदनं, विगणनं, निरादेशः.—(Acquittance) पापमोचनं, परिशोधः, निस्तारः, निष्कृतिः *f.*—(Dismission from office) अधिकाराद् विसर्ज्जनं or निराकरणं or अपासनं or अवरोपणं or वहिष्करणं, पदच्युतिः *f.*—(Performance) अनुष्ठानं, आचरणं, विधानं, करणं, निर्वाहः; 'discharge of one's duties,' कर्म्मानुष्ठानं.—(Voiding, emission) उत्सर्गः, विसर्गः, मोक्षणं, स्रावः, आस्रावः, आस्रवः, उच्चारः, उद्गारः.

DISCHARGED, *p. p.* (Released) मुक्तः -क्ता -क्तं, विमोचितः -ता -तं, मोक्षितः -ता -तं, विसृष्टः -ष्टा -ष्टं, उत्सृष्टः -ष्टा -ष्टं.—(From obligation) उत्तीर्णः -र्णा -र्णं, ऋणमुक्तः -क्ता -क्तं.—(Paid, as a debt) शोधितः -ता -तं, परिशुद्धः -द्धा -द्धं, सिद्धः -द्धा -द्धं, विगणितः -ता -तं, निरादिष्टः -ष्टा -ष्टं.—(Acquitted) शुद्धः -द्धा -द्धं.—(Dismissed) विसर्ज्जितः -ता -तं, विसृष्टः -ष्टा -ष्टं, अवसृष्टः -ष्टा -ष्टं, निराकृतः -ता -तं, अपविद्धः -द्धा -द्धं, अपास्तः -स्ता -स्तं, दूरीकृतः -ता -तं, प्रहितः -ता -तं, अधिकारात्प्रभ्रंशितः -ता -तं, वहिष्कृतः -ता -तं.—(Shot) ईरितः -ता -तं, प्रक्षिप्तः -प्ता -प्तं, मुक्तः -क्ता -क्तं, निःसारितः -ता -तं, निरस्तः -स्ता -स्तं.—(Emitted) उदीरितः -ता -तं, उत्सृष्टः -ष्टा -ष्टं, उच्चारितः -ता -तं, स्कन्दितः -ता -तं.—(Performed) अनुष्ठितः -ता -तं, आचरितः -ता -तं, कृतः -ता -तं.

DISCHARGER, *s.* (Of duty) कर्म्मानुष्ठायी *m.* (न्).—(Of a missile) प्रक्षेपकः.

To DI CIND, *v. a.* द्विधा छिद् (c. 7. छिनत्ति, छेत्तुं), व्यवछिद्, द्विखण्डीकृ.

DISCIPLE, *s.* शिष्यः, अन्तेवासी *m.* (न्), अन्तेवासिजनः, छात्रः, अनुयायी *m.* (न्), विद्यार्थी *m.* (न्), अनुचरः, अनुगतिकः, आश्रितः; 'disciple of a disciple,' प्रशिष्यः.

DISCIPLESHIP, *s.* शिष्यत्वं, छात्रता, अन्तेवासित्वं, विद्यार्थित्वं, अनुयायित्वं.

DISCIPLINABLE, *a.* शासनीयः -या -यं, शास्यः -स्या -स्यं, शिक्षणीयः -या -यं.

DISCIPLINARIAN, *s.* शासिता *m.* (तृ), शिष्टिकत्री *m.* (त्रृ), विनेता *m.* (तृ), नियामकः.

DISCIPLINARY, *a.* वैनयिकः -की -कं, शिष्टिविषयकः -का -कं.

DISCIPLINE, *s.* (Education, instruction) विनयः, शिक्षा, अभ्यासः, शासनं, शिष्टिः *f.*, शास्तिः *f.*, अनुशासनं, उपदेशः, अध्यापनं, अनुनयः, नीतिः *f.*—(Military discipline) व्यायामः, युद्धाभ्यासः, युद्धशिक्षा, युद्धनीतिः *f.*, युद्धव्यवस्था.—(Rule of government) नीतिः *f.*, नयः, राजनीतिः, व्यवस्था, नियमः, विधिः *m.*—(Chastisement) शिष्टिः *f.*, शास्तिः *f.*, शासनं, निग्रहः, साहसं, दण्डः, दमः.—(Subjection) दास्तिः *f.*

To DISCIPLINE, *v. a.* (Educate, instruct) विनी (c. 1. -नयति -नेतुं), शिक्ष् in caus. (शिक्षयति -यितुं), अनुशिक्ष्; शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधी in caus. (अध्यापयति -यितुं).—(Exercise) अभ्यस् (c. 4. -अस्यति -असितुं), व्यायम् (c. 1. -यच्छति -यन्तुं).—(Regulate) विनियम्, नियम्, शास्, अनुशास्, विधृ in caus. (-धारयति -यितुं).—(Punish, chastise) शास्, अनुशास्, दण्ड् (c. 10. दण्डयति -यितुं), दम् (c. 10. दमयति -यितुं).

DISCIPLINED, *p. p.* शिष्टः -ष्टा -ष्टं, शासितः -ता -तं, विनीतः -ता -तं, अनुनीतः -ता -तं, शिक्षितः -ता -तं, कृताभ्यासः -सा -सं, दमितः -ता -तं, उद्यतः -ता -तं.

To DISCLAIM, *v. a.* निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, प्रत्याख्या (c. 2. -ख्याति -तुं), अपवद् (c. 1. -वदति -दितुं), अपलप् (c. 1. -लपति -पितुं), अपज्ञा (c. 9. -जानाति -ज्ञातुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निरस् (c. 4. -अस्यति -असितुं), परित्यज् (c. 1. -त्यजति -त्यक्तुं), न स्वीकृ, न अङ्गीकृ.

DISCLAIMER, *s.* अपह्नोता *m.* (तृ), निह्नोता *m.*, प्रत्यादेशकः, अस्वीकर्त्ता *m.* (र्त्तृ).

To DISCLOSE, *v. a.* (Uncover) विवृ (c. 5. -वृणोति -वृणुते -वरितुं -रीतुं), अपवृ, अपावृ, उच्छद् (c. 10. -छादयति -यितुं).—(Reveal) प्रकाश् in caus. (-काशयति -यितुं), विकाश्, स्पष्टीकृ, प्रकटीकृ, व्यक्तीकृ, व्यञ्ज् (c. 7. -अनक्ति -अञ्जितुं).—(Tell) निविद् in caus. (-वेदयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), सूच् (c. 10. सूचयति -यितुं); disclose a secret,' रहस्यं भिद् (c. 7. भिनत्ति, भेत्तुं).

DISCLOSED, *p. p.* विवृतः -ता -तं, सूचितः -ता -तं, निवेदितः -ता -तं.

DISCLOSURE, *s.* विवृतिः *f.*, विवरणं, प्रकाशः -शनं, स्पष्टीकरणं, व्यक्तीकरणं, प्रकटीकरणं, प्रचारणं, निवेदनं, उद्भेदः, भेदः; 'of a secret,' रहस्यभेदः.

DISCOLORATION, *s.* (The act) विवर्णीकरणं, मलिनीकरणं, कृष्णीकरणं.—(The state) विवर्णीत्वं, वैवर्ण्यं, मालिन्यं, कलुषं, कलङ्कः.

To DISCOLOUR, *v. a.* विवर्णीकृ, विवर्णी (c. 10. -वर्णयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), कृष्णीकृ.

DISCOLOURED, *p. p.* विवर्णः -र्णा -र्णं, दीनवर्णः -र्णा -र्णं, नीरक्तः -क्ता -क्तं; 'having discoloured teeth,' कृष्णदशनः -ना -नं.

To DISCOMFIT, *v. a.* पराजि (c. 1. -जयति -ते -जेतुं), पराहन् (c. 2. -हन्ति -न्तुं), पराम् (c. 4. -अस्यति -असितुं), पराभू, अभिभू, विद्रु in caus. (-द्रावयति -यितुं), व्यूहान् भञ्ज् (c. 7. भनक्ति, भंक्तुं) or भिद् (c. 7. भिनत्ति, भेत्तुं), विध्वंस् in caus. (-ध्वंसयति -यितुं), पिञ्जलीकृ, स्खद् (c. 1. स्खदते -दितुं).

DISCOMFITED, *p. p.* पराजितः -ता -तं, पराभूतः -ता -तं, पराहतः -ता -तं, परास्तः -स्ता -स्तं, प्रपलायितः -ता -तं, विद्रुतः -ता -तं, प्रतिहतोद्यमः -मा -मं, पिञ्जलः -ला -लं, समुत्पिञ्जः -ञ्जा -ञ्जं.

DISCOMFITURE, *s.* पराजयः, अपजगः, पराभवः, व्यसनं, बलव्यसनं, भङ्गः, भेदः, विद्रवः, प्रपलायनं, हारिः *f.*, स्खदनं, पिञ्जलकः, समुत्पिञ्जलकः.

DISCOMFORT, *s.* अस्वास्थ्यं, असुस्थता, दुःखं, असुखं, पीडा, व्यथा, खेदः, कष्टं, कृच्छ्रं, वेदना, चित्तवेदना, उद्वेगः, बाधा, क्लेशः, सन्तापः.

To DISCOMFORT, *v. a.* दुःख् (c. 10. दुःखयति -यितुं), पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), बाध् (c. 1. बाधते -धितुं), परितप् (c. 10. -तापयति -यितुं).

To DISCOMMEND, *v. a.* न प्रशंस् (c. 1. -शंसति -सितुं), निन्द् (c. 1. निन्दति -न्दितुं).

To DISCOMMODE, *v. a.* बाध् (c. 1. बाधते -धितुं), उपरुध् (c. 7. -रुणद्धि -रोद्धुं), क्लिश् (c. 9. क्लिशनाति, क्लेष्टुं), व्यथ् (c. 10. व्यथयति -यितुं).

DISCOMMODIOUS, *a.* अनुपयुक्तः -क्ता -क्तं, कष्टकरः -री -रं, अस्वास्थ्यजनकः -का -कं.

To DISCOMPOSE, *v. a.* क्षुभ् in caus. (क्षोभयति -यितुं), विक्षुभ्, आकुलीकृ, कातरीकृ, व्याकुलीकृ, अस्थिरीकृ, बाध् (c. 1. बाधते -धितुं), मुह् in caus. (मोहयति -यितुं), व्यामुह्, विलुप् (c. 6. -लुम्पति -लोप्तुं).

DISCOMPOSED, *p. p.* क्षोभितः -ता -तं, क्षुभः -भा -भं, आकुलितः -ता -तं. आकुलचित्तः -त्ता -त्तं. व्याकुलः -ला -लं, कातरः -रा -रं, अस्थिरः -रा -रं, अनवस्थितः -ता -तं, अनिवृतः -ता -तं, व्यग्रः -ग्रा -ग्रं, पारिप्लवः -वा -वं, मोहितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, विधुरः -रा -रं.

DISCOMPOSURE, *s.* क्षोभः, आकुलता, व्याकुलत्वं, आकुलचित्तता, कातरत्वं, अस्थिरता, अनिवृतिः *f.*, व्यग्रता, पारिप्लवत्वं, उद्वेगः, वैक्लव्यं, उत्कम्पः, मोहः.

To DISCONCERT, *v. a.* (Frustrate) खण्ड् (c. 10. खण्डयति -यितुं), प्रतिहन् (c. 2. -हन्ति -न्तुं), वृथा कृ.—(Discompose) मुह् in caus. (मोहयति -यितुं), आकुलीकृ, व्यग्रीकृ.

DISCONCERTED, *p. p.* प्रतिहतोद्यमः -मा -मं, खण्डितः -ता -तं, मोहितः -ता -तं, आकुलितः -ता -तं, व्याकुलितः -ता -तं, विलक्षितः -ता -तं.

DISCONFORMITY, DISCONGRUITY, *s.* असादृश्यं, अयोग्यता, असङ्गतिः *f.*, विरुद्धता.

To DISCONNECT, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विश्लिष् (c. 10. -श्लेषयति -यितुं).

DISCONNECTED, *p. p.* विप्रयुक्तः -क्ता -क्तं, असंसक्तः -क्ता -क्तं, असंलग्नः -ग्ना -ग्नं.

DISCONNECTION, *s.* वियोगः, विप्रयोगः, असंयोगः, विश्लेषः, अनभिष्वङ्गः.

DISCONSOLATE, *a.* विषण्णः -ण्णा -ण्णं, विषादी -दिनी -दि (न्), अवसन्नः -न्ना -न्नं, निराशः -शा -शं, हताशः -शा -शं, विमनाः -नाः -नः (स्), or क्लान्तमनाः or दुर्मनाः or अन्तर्मनाः or उद्विग्नमनाः, विमनस्कः -स्का -स्कं, निरानन्दः -न्दा -न्दं, अनाश्वासनीयः -या -यं, खिद्यमानः -ना -नं, खेदान्वितः -ता -तं.

DISCONSOLATELY, *adv.* सविषादं, सखेदं, सोद्वेगं, सनैराश्यं, निरानन्दं.

DISCONTENT, *s.* असन्तोषः, अतुष्टिः *f.*, अपरितोषः, अतृप्तिः *f.*, अरतिः *f.*, अनिर्वृतिः *f.*, अनाह्लादः, अशान्तिः *f.*, असन्तुष्टता, अतृप्तता.

DISCONTENT, DISCONTENTED, *a.* असन्तुष्टः -ष्टा -ष्टं, अतृप्तः -प्ता -प्तं, अतुष्टः -ष्टा -ष्टं, अपरितुष्टः -ष्टा -ष्टं, वितुष्टः -ष्टा -ष्टं, अरतः -ता -तं, अनिर्वृतः -ता -तं, अरतिः -तिः -ति, अशान्तः -न्ता -न्तं, अप्रीतः -ता -तं, निरानन्दः -न्दा -न्दं, अप्रशान्तकामः -मा -मं, अप्रतिलब्धकामः -मा -मं, सासूयः -या -यं.

To DISCONTENT, *v. a.* न सन्तुष् in caus. (-तोषयति -यितुं), न तृप् in caus. (-तर्पयति -यितुं), असन्तोषम् उत्पद् in caus. (-पादयति -यितुं).

DISCONTINUANCE, DISCONTINUATION, *s.* (Want of continuity) विच्छेदः, छेदः, भङ्गः, अन्तरायः, खण्डनं.—(Cessation) विरतिः *f.*, विरामः, अवरतिः *f.*, उपरतिः *f.*, निवृत्तिः *f.*, विनिवृत्तिः *f.*, निर्वृत्तिः *f.*, निवर्त्तनं, विच्छेदः, छेदः, उपशमः, अपशमः, क्षान्तिः *f.*, क्षयः.

To DISCONTINUE, *v. a.* and *n.* (Leave off) विरम् (c. 1. -रमति -रन्तुं), उपरम् with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं), निवृत् with abl. c., शम् (c. 4. शाम्यति, शमितुं), विच्छिद् in pass. (-छिद्यते).—(Cause to cease) निवृत् in caus. (-वर्त्तयति -यितुं), विरम् in caus. (-रमयति -यितुं).—(Abandon) त्यज् (c. 1. त्यजति, त्यक्तुं), उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्.—(Interrupt, break off) विच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विलुप् (c. 10. -लोपयति -यितुं), खण्ड् (c. 10. खण्डयति -यितुं).

DISCONTINUED, *p. p.* विरतः -ता -तं, अवरतः -ता -तं, निवृत्तः -त्ता -त्तं, विच्छिन्नः -न्ना -न्नं, अवसन्नः -न्ना -न्नं, उज्झितः -ता -तं, त्यक्तः -क्ता -क्तं.

DISCORD, DISCORDANCE, *s.* (Disagreement) भेदः, विभेदः, विभिन्नता, विरोधः, परस्परविरोधः, विमतिः *f.*, वैमत्यं, असम्मतिः *f.*, अयोग्यता, विपरीतता, वैपरीत्यं, विसंवादः, प्रातिकूल्यं, वैलक्षण्यं, विरुद्धता; 'causing discord,' भेदकरः -री -रं.—(In music) अपरवः, विस्वरशब्दः, असौम्यस्वरः, अपक्वणः.

To DISCORD, *v. n.* विभिद् in pass. (-भिद्यते), न सम्मन् (c. 4. -मन्यते -मन्तुं), न युज् in pass. (युज्यते), विसंवद् (c. 1. -वदति -दितुं), अन्योन्यं विरुध् (c. 7. -रुणद्धि -रोद्धुं).

DISCORDANT, *a.* (Incongruous) विरुद्धः -द्धा -द्धं, परस्परविरुद्धः -द्धा -द्धं, अयोग्यः -ग्या -ग्यं, विभिन्नः -न्ना -न्नं, असङ्गतः -ता -तं, विसङ्गतः -ता -तं, असम्मतः -ता -तं, विपरीतः -ता -तं, क्लिष्टः -ष्टा -ष्टं.—(In sound) विस्वरः -रा -रं, अस्वरः -रा -रं, असौम्यस्वरः -रा -रं, ककैशस्वनः -ना -नं, वैतालिकः -की -कं.

DISCORDANTLY, *adv.* विरुद्धं, विपरीतं, विस्वरं, विरोधेन, अयोग्यं.

To DISCOVER, *v. a.* (Shew) दृश् in caus. (दर्शयति -यितुं), अभिदृश्, निदृश्, प्रतिदृश्.—(Reveal, make manifest) विवृ (c. 5. -वृणोति -वरितुं -रीतुं), अपवृ, प्रकाश् in caus. (-काशयति -यितुं), स्पष्टीकृ, व्यक्तीकृ, प्रकटीकृ, व्यञ्ज् (c. 7. -अनक्ति -अञ्जितुं, c. 10. -अञ्जयति -यितुं),

आविष्कृ.—(Make known) ज्ञा in caus. (ज्ञापयति -यितुं), निविद् in caus. (-वेदयति -यितुं), सूच् (c. 10. सूचयति -यितुं).—(Find out, detect) विद् १ (c. 10. -रूपयति -यितुं), ज्ञा (c. 9. जानाति -नीते, ज्ञातुं), परिज्ञा, अभिज्ञा, निर्णी (c. 1. -णयति -णेतुं), उपलभ् (c. 1. -लभते -लब्धुं), अवगम् (c. 1. -गच्छति -गन्तुं), अधिगम्, अध्यागम्; आसद् (c. 10. -सादयति -यितुं), प्राप् (c. 5. -आप्नोति -आप्तुं), विद् (c. 6. विन्दति, वेदितुं), अभिविद्, अनुसन्धा (c. 3. -दधाति -धातुं).

Discoverable, *a.* निरूपणीयः -या -यं, ज्ञेयः -या -यं, प्रेक्षणीयः -या -यं.

Discovered, *p. p.* निरूपितः -ता -तं, ज्ञातः -ता -तं, विज्ञातः -ता -तं, अभिज्ञातः -ता -तं, निर्णीतः -ता -तं, अवगतः -ता -तं; 'in a fault,' दृष्टदोषः -षा -षं.

Discoverer, *s.* निरूपकः, निर्णेता *m.* (तृ), परिज्ञानी *m.* (न्), अवगन्ता *m.* (तृ).

Discovery, *s.* (Disclosing, exhibiting) विवृतिः *f.*, दर्शनं, प्रकाशनं, प्रेक्षणं.—(Finding out) ज्ञानं, परिज्ञानं, विज्ञानं, निरूपणं, प्राप्तिः *f.*, उपलब्धिः *f.*, अवगमः, अवगतिः *f.*, निर्णयः, अनुसन्धानं.

Discount, *s.* उद्धारः, उद्धृतभागः, हुण्डिकापवाद् उद्धृतो भागः.

To discount, *v. a.* (Deduct a part) भागम् उद्धृ (c. 1. -हरति -हर्तुं).—(Pay a bill of exchange before hand) भागम् उद्धृत्य प्राग्विहितकालाद् हुण्डिकापत्रं शुध् in caus. (शोधयति -यितुं).

To discountenance, *v. a.* न अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), न अनुपाल् (c. 10. -पालयति -यितुं), न अनुकूल (nom. अनुकूलयति -यितुं), न उपकृ, लज्ज् (c. 10. लज्जयति -यितुं).

To discourage, *v. a.* (Depress, deject) अवसद् in caus. (-सादयति -यितुं), विषद् in caus., विषण्णीकृ, विषादं जन् in caus. (जनयति -यितुं), म्लानीकृ, निर्वेणीकृ; आशाः or मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं) or हन् (c. 2. हन्ति -न्तुं).—(Deter) भयहेतुं दर्शयित्वा निवृत् in caus. (-वर्त्तयति -यितुं) or निवृ in caus. (-वारयति -यितुं).

Discouraged, *p. p.* विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, अवसादितः -ता -तं, निर्वेणः -णा -णं, भग्नोद्यमः -मा -मं, भग्नमनाः -नाः -नः (स्), मनोहतः -ता -तं, हताशः -शा -शं, खिन्नः -न्ना -न्नं, निवर्त्तितः -ता -तं, निवारितः -ता -तं.

Discouragement, *s.* मनोभङ्गः, उद्योगभङ्गः, उद्यमव्याघातः, आशाभङ्गः, निवर्त्तनं, विषादोत्पादनं, अवसादकरणं, अप्रसादः.

Discouraging, *a.* विषादोत्पादकः -का -कं, अवसादजनकः -का -कं.

Discourse, *s.* (Conversation) सम्भाषा -षणं, संलापः, सङ्कथा, आलापः, आभाषणं, संवादः, सम्प्रवदनं, कथोपकथनं, अनुकथनं, कथायोगः.—(Speech, dissertation) वचनं, वाक्यं, वचः *n.* (स्), वादः, प्रवादः, प्रवचनं, भाषितं, भाषणं, लपितं, वचनक्रमः, निगादः.

To discourse, *v. n.* (Talk, converse) भाष् (c. 1. भाषते -षितुं), सम्भाष्, सम्प्रभाष्, प्रभाष्; आलप् (c. 1. -लपति -पितुं), संलप्; वद् (c. 1. वदति -ते -दितुं), संवद्, सम्प्रवद्, वच् (c. 2. वक्ति -क्तुं), संवच्, जल्प् (c. 1. जल्पति -ल्पितुं), सञ्जल्प्.—(Treat of, talk over) व्याख्या (c. 2. -ख्याति -तुं), प्रसङ्गं कृ, कथ् (c. 10. कथयति -यितुं).

Discourser, *s.* वादी *m.* (न्), वक्ता *m.* (तृ), भाषी *m.* (न्), आलापी *m.* (न्), कथकः.

Discoursive, *a.* तर्की -र्किणी -र्कि (न्), ऊही -हिनी -हि (न्), सांवादिकः -की -कं.

Discourteous, *a.* असभ्यः -भ्या -भ्यं, अशिष्टः -ष्टा -ष्टं, दुर्मर्य्यादः -दा -दं, अनार्य्यः -र्य्या -र्य्यं, अविनीतः -ता -तं, अविनयः -या -यं, दुःशीलः -ला -लं, कुशीलः -ला -लं, विनयप्रमाथी -थिनी -थि (न्), अप्रसन्नः -न्ना -न्नं, दुश्चरित्रः -त्रा -त्रं.

Discourteously, *adv.* असभ्यं, अशिष्टं, अविनीतं, अप्रश्रितं, दुःशीलत्वात्.

Discourtesy, *s.* असभ्यता, अशिष्टता, अविनयः, दुःशीलता, अप्रसादः, अप्रश्रयः.

Discredit, *s.* अयशः *n.* (स्), अकीर्त्तिः *f.*, अख्यातिः *f.*, कुख्यातिः *f.*, दुष्कीर्त्तिः *f.*, अपमानं, कलङ्कः, अपकलङ्कः, अप्रतिष्ठा, मर्य्यादा हानिः *f.*

To discredit, *v. a.* (Deprive of credibility) अविश्वास्यः or अश्रद्धेय इति मन् (c. 4. मन्यते, मन्तुं), प्रामाण्यं or गौरवं लघ् (nom. लघयति -यितुं) or लघूकृ, अविश्वस्तं -स्तां -स्तं कृ.—(Not to credit) न प्रती (c. 2. प्रत्येति -तुं), न विश्वस् (c. 2. -श्वसिति -तुं).—(Disgrace) अकीर्त्तिं or अयशः or अपमानं कृ or जन् (c. 10. जनयति -यितुं), लघूकृ, कलङ्कं कृ.

Discreditable, *a.* अकीर्त्तिकरः -री -रं, अयशस्करः -री -रं, अपकलङ्ककरः -रा -रं, अपमान्यः -न्या -न्यं, अमान्यः -न्या -न्यं, अनार्य्यः -र्य्या -र्य्यं, अयशस्यः -स्या -स्यं, मर्य्यादाविरुद्धः -द्धा -द्धं, लोकगर्हितः -ता -तं, अप्रतिष्ठः -ष्ठा -ष्ठं.

Discreet, *a.* विमृश्यकारी -रिणी -रि (न्) or समीक्ष्यकारी, विज्ञः -ज्ञा -ज्ञं, विचक्षणः -णा -णं, विचारणशीलः -ला -लं, स्ववहितः -ता -तं, मनस्वी -स्विनी -स्वि (न्), मतिमान् -मती -मत् (त्), कृतावधानः -ना -नं, विनीतः -ता -तं, परिणामदर्शी -र्शिनी -र्शि (न्).

Discreetly, *adv.* सुविमृश्य, स्ववहितं, सुविचार्य्यं, विचारेण, विज्ञवत्.

Discrepance, discrepancy, *s.* विभेदः, विभिन्नता, भेदः, भिन्नता, विरोधः, विरुद्धता, विप्रतिपत्तिः *f.*, असङ्गतिः *f.*, विपरीतता, वैपरीत्यं, द्वैधं, द्वैधिभ्यं, विसंवादः, प्रातिकूल्यं, वैलक्षण्यं, विगीतिः *f.*

Discrepant, *a.* भिन्नः -न्ना -न्नं, विभिन्नः -न्ना -न्नं, विरुद्धः -द्धा -द्धं, विरोधी -धिनी -धि (न्), विपरीतः -ता -तं, विगीतः -ता -तं, असङ्गतः -ता -तं, विसङ्गतः -ता -तं, विसंवादी -दिनी -दि (न्), विवदमानः -ना -नं, प्रतिकूलः -ला -लं.

Discrete, *a.* भिन्नः -न्ना -न्नं, विविक्तः -क्ता -क्तं, पृथग्भूतः -ता -तं.

Discretion, *s.* (Prudence) विनयः, विनीतता, नीतिः *f.*, सुनीतिः, सुनयः, प्रसमीक्षा, समीक्षणं, समीक्ष्यकारित्वं, विमृश्यकारित्वं, चिन्ता, विज्ञता, विचक्षणता, विवेचना, विचारः.—(Liberty of acting at pleasure) स्वातन्त्र्यं, स्वाच्छन्द्यं, स्वाधीनता.—(Option) विकल्पः, अनुकल्पः; 'at one's own discretion,' स्वेच्छया, स्वरुच्या.

Discretionally, *adv.* स्वेच्छातस्, स्वेच्छानुसारेण, विकल्पतस्, कामं, अनुकामं.

Discretionary, *a.* वैकल्पिकः -की -कं, विकल्पितः -ता -तं, सविकल्पकः -का -कं, आनुकल्पिकः -की -कं, स्वाधीनः -ना -नं, स्वच्छन्दः -न्दा -न्दं, यादृच्छिकः -की -कं.

To discriminate, *v. a.* विज्ञा (c. 9. -जानाति -नीते -ज्ञातुं), विशिष् (c. 7. -शिनष्टि -शेष्टुं, c. 10. -शेषयति -यितुं), विविच् (c. 7. -विनक्ति -वेक्तुं, c. 10. -वेचयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं). परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), विचर् (c. 10. -चारयति -यितुं), पृथक्कृ, विज् (c. 3. वेवेक्ति, विजितुं), विभू (c. 10. -भावयति -यितुं).

Discriminated, *p. p.* विशेषितः -ता -तं, कृतलक्षणः -णा -णं, विविक्तः -क्ता -क्तं, परिच्छिन्नः -न्ना -न्नं, विज्ञातः -ता -तं, पृथक्कृतः -ता -तं, विचारितः -ता -तं.

Discrimination, *s.* (The act) विवेकः, विवेचनं, परिच्छेदः -दनं, विज्ञानं, अर्थविज्ञानं, अर्थज्ञानं, विभावनं, विचारः, व्यवच्छेदः, विज्ञिः *f.*, विवेकदृश्यत्वं, विवेकित्वं, विशेषणं, पृथक्करणं, पृथगात्मता, अवधारणं.—(The state) विशिष्टता, परिच्छिन्नता, विविक्तता; 'discrimination of right and wrong,' सदसद्विवेकः; 'want of discrimination,' अविवेकः -कता.

Discriminating, *a.* विशेषज्ञः -ज्ञा -ज्ञं, विवेकदृश्वा -श्वा -श्व (न्), अर्थज्ञः -ज्ञा -ज्ञं.

Discriminative, *a.* विवेकी -किनी -कि (न्), विशेषकः -का -कं, परिच्छेदकः -का -कं, प्रभेदकारी -रिणी -रि (न्), विभावकः -का -कं, विज्ञिता -त्री -तृ (तृ).

DISCURSIVE, *a.* (Wandering from one topic to another) बहुविषयः -या -यं, नानावस्तुविषयकः -का -कं, अनेकार्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, नानाप्रसङ्गः -ङ्गा -ङ्गं, इतस्ततो भ्रमणशीलः -ला -लं, अस्थिरः -रा -रं, चञ्चलः -ला -लं.—(Argumentative) तार्किकः -की -कं. विचारी -रिणी -रि (न्).

DISCUS, *s.* चक्रं, लौहचक्रं, अट्टनं; 'of Vishnu,' शिवदत्तं.

To DISCUSS, *v. a.* विचर् in caus. (-चारयति -यितुं), वितर्कै (c. 10. -तर्कयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), विमृश् (c. 6. -मृशति -ष्टुं), परिमृश्, समीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्ष्, विभू (c. 10. -भावयति -यितुं), मथ् (c. 1. मथति -थितुं), वादानुवादं कृ.

DISCUSSED, *p. p.* विचारितः -ता -तं, मथितः -ता -तं, विज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं.

DISCUSSION, *s.* विचारः -रणा, वितर्कः -र्कणं, वादानुवादः, वादप्रतिवादः, विमर्शः, परीक्षा, विवेचनं -ना, समीक्षा, प्रसमीक्षा, विभावनं, सम्प्रधारणा; 'topic under discussion,' प्रसङ्गः, प्रस्तावः; 'under discussion,' प्रस्तुतः -ता -तं; 'result of discussion,' मथितार्थः. —(Dispersion) विद्रावणं, विक्षेपः.

DISCUSSING, *a.* विचारकः -का -कं, विभावकः -का -कं, विमर्शी -र्शिनी -र्शि (न्).

DISCUSSIVE, *a.* दुष्टधातुनाशकः -का -कं, दुष्टरसविद्रावकः -का -कं, शोथघ्नः.

DISCUTIENT, *a.* शोथघ्नः -घ्नी -घ्नं, शोथजित्, शोथहृत्, विस्फोटघ्नः -घ्नी -घ्नं.

DISDAIN, *s.* अवज्ञा -ज्ञानं, अवहेला -लनं, उपेक्षा, अवमानं, उन्माथः, गर्हा -र्हणं, घृणा, कुत्सा -त्सनं, हेलनं, निराकरणं, पराकरणं, औद्धत्यं, अवलेपः.

To DISDAIN, *v. a.* अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), कुत्स् (c. 10. कुत्सयति -यितुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), लघूकृ, तुच्छीकृ, पराकृ, निराकृ, कदर्थीकृ, प्रत्याचक्ष् (c. 2. -चष्टे).

DISDAINED, *p. p.* अवज्ञातः -ता -तं, गर्हितः -ता -तं, कुत्सितः -ता -तं, उपेक्षितः -ता -तं, कदर्थितः -ता -तं, पराकृतः -ता -तं, निराकृतः -ता -तं.

DISDAINFUL, *a.* अवमानी -निनी -नि (न्), सावहेलः -ला -लं, सावज्ञः -ज्ञा -ज्ञं, सावलेपः -पा -पं, उपेक्षकः -का -कं, सोन्मादः -दा -दं, घृणी -णिनी -णि (न्).

DISDAINFULLY, *adv.* सावज्ञानं, सोन्मादं, सावहेलं, सावलेपं, अवमानेन, उपेक्षया.

DISDAINFULNESS, *s.* अवलिप्तता, सावलेपत्वं, सोन्मादता, औद्धत्यं.

DISEASE, *s.* रोगः, व्याधिः *m.*, आमयः, पीडा, रुक् *f.* (ज्), रुजा, रुग्नता, गदः, उपतापः, आर्त्तिः *f.*, कष्टं, अस्वास्थ्यं, दुःखं, विकारः, विकृतिः *f.*, विकरः, अमः, अमसः, मृत्युभृत्यः, क्लेशः, तापः.

To DISEASE, *v. a.* रोगेण पीड् (c. 10. पीडयति -यितुं) or व्यथ् (c. 10. व्यथयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं).

DISEASED, *p. p.* or *a.* रोगी -गिणी -गि (न्), रोगवान् -वती -वत् (त्), रोगार्त्तः -र्त्ता -र्त्तं, रोगग्रस्तः -स्ता -स्तं, सरोगः -गा -गं, व्याधितः -ता -तं, सामयः -या -यं, अमी -मिनी -मि (न्), आतुरः -रा -रं, अस्वस्थः -स्था -स्थं, विकारी -रिणी -रि (न्), विकृतः -ता -तं, अभ्यानः -ना -नं, अभ्यमितः -ता -तं, सामयावी -विनी -वि (न्).

To DISEMBARK, *v. a.* उत्तॄ in caus. (-तारयति -यितुं), नौकायाः or पोतात् अवतॄ in caus. or अवरुह् in caus. (-रोपयति -यितुं), उत्कूल (nom. उत्कूलयति -यितुं).

To DISEMBARK, *v. n.* उत्तॄ (c. 1. -तरति -रितुं -रीतुं), प्रत्युत्तॄ, नौकायाः or पोतात् अवतॄ or अवरुह् (c. 1. -रोहति -रोढुं).

DISEMBARKATION, *s.* उत्तरणं, प्रत्युत्तरणं, नौकाया अवतरणं or अवरोहणं.

DISEMBARKED, *p. p.* उत्तीर्णः -र्णा -र्णं, अवतीर्णः -र्णा -र्णं, अवरूढः -ढा -ढं, अतिनौः -नौः -नु, उत्कूलितः -ता -तं.

To DISEMBITTER, *v. a.* तिक्तरसं or तिक्तत्वम् अपनी (c. 1. -नयति -नेतुं) अतिक्तं -क्तां -क्तं कृ, तिक्तवर्ज्जितं -तां -तं कृ, मधुरीकृ, सुरसं -सां -सं कृ.

DISEMBODIED, *p. p.* न्यस्तदेहः -हा -हं, अङ्गहीनः -ना -नं, त्यक्तदेहः -हा -हं, देहातीतः -ता -तं, अशरीरः -रा -रं, विगतदेहः -हा -हं, कायवर्ज्जितः -ता -तं, अनङ्गः -ङ्गा -ङ्गं.

To DISEMBOGUE, *v. a.* सलिलं समुद्रे निर्गम् in caus. (-गमयति -यितुं) or प्रसु in caus. (-सावयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं).

To DISEMBOGUE, *v. n.* निर्गम् (-गच्छति -गन्तुं), निःसृ (c. 1. -सरति -सर्त्तुं), अपसृ, समुद्रं विश् (c. 6. विशति, वेष्टुं) or प्रविश् or निविश्.

To DISEMBROIL, *v. a.* व्यामोहात् or उद्वेगात् or व्यस्तत्वात् उद्धृ (c. 1. -हरति -हर्त्तुं) or मुच् (c. 6. मुञ्चति, मोक्तुं), निरुत्पातं -तां -तं कृ, निरुपद्रवं -वां -वं कृ.

To DISENCHANT, *v. a.* मन्त्रं or अभिचारं or वशक्रियां प्रतिकृ, मन्त्रप्रभावात् or अभिचारवशात् उद्धृ (c. 1. -हरति -हर्त्तुं) or मुच् (c. 6. मुञ्चति, मोक्तुं), अभिचारभङ्गं कृ.

To DISENCUMBER, DISCUMBER, *v. a.* भारात् or विघ्नात् उद्धृ (c. 1. -हरति -हर्त्तुं) or मुच् (c. 6. मुञ्चति, मोक्तुं), प्रतिबन्धान् अपनी (c. 1. -नयति -नेतुं), निर्विघ्नीकृ, निर्विघ्न (nom. निर्विघ्नयति -यितुं), विशुध् in caus. (-शोधयति -यितुं), निष्प्रत्यूहं -हां -हं कृ.

To DISENGAGE, *v. a.* (Separate) वियुज् (c. 7. -युनक्ति -योक्तुं), विश्लिष् in caus. (-श्लेषयति -यितुं).—(Disentangle) मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), विमोक्ष्, उद्धृ (c. 1. -हरति -हर्त्तुं), विशुध् in caus. (-शोधयति -यितुं).—(Withdraw the mind) मनो निवृत् in caus. (-वर्त्तयति -यितुं).

To DISENGAGE, *v. n.* मुच् in pass. (मुच्यते), निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरज् in pass. (-रज्यते), आत्मानं निवृत् in caus. (-वर्त्तयति -यितुं): 'to be disengaged, at leisure,' प्राभावकाशः -शा -शं भू, सावकाशः -शा -शं भू, अवसरं प्राप् (c. 5. -आप्नोति -आप्तुं), कार्य्यरहितः -ता -तं भू, कार्य्यशून्यः -न्या -न्यं भू.

DISENGAGED, *p. p.* (Extricated) मुक्तः -क्ता -क्तं, विमुक्तः -क्ता -क्तं, उत्तीर्णः -र्णा -र्णं, समुद्धृतः -ता -तं.—(At leisure) अवकाशप्राप्तः -प्ता -प्तं, प्राप्तावसरः -रा -रं, व्यापारशून्यः -न्या -न्यं, निर्व्यापारः -रा -रं, निष्क्रियः -या -यं.

To DISENTANGLE, *v. a.* मुच् (c. 6. मुञ्चति, मोक्तुं, c. 10. मोचयति -यितुं), विमुच्, निर्मुच्, विनिर्मुच्, मोक्ष् (c. 10. मोक्षयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), समुद्धृ, उत्तॄ in caus. (-तारयति -यितुं), निस्तॄ, विशुध् in caus. (-शोधयति -यितुं).—(Remove obstacles) विघ्नान् अपनी (c. 1. -नयति -नेतुं) or हृ (c. 1. हरति, हर्त्तुं), निर्विघ्नीकृ, निष्प्रत्यूहं -हां -हं कृ.

To DISENTHRAL, *v. a.* दास्यात् or दासभावात् or परवशात् or पराधीनत्वाद् मुच् (c. 6. मुञ्चति, मोक्तुं) or विमुच् or निस्तॄ in caus. (-तारयति -यितुं) or मोक्ष् (c. 10. मोक्षयति -यितुं).

To DISENTRANCE, *v. a.* निर्भरस्वप्नात् or मूर्च्छनात् प्रबुध् in caus. (-बोधयति -यितुं).

DISESTEEM, *s.* अनादरः, अमाननं, उपेक्षा, अवमानं, अवज्ञा, अवधीरणं, असेवनं.

To DISESTEEM, *v. a.* अवमन् (c. 4. -मन्यते -मन्तुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं), अवधीर् (c. 10. -धीरयति -यितुं), कदर्थ् (c. 10. -अर्थयते -यितुं), लघूकृ, तुच्छीकृ मन्दादरः -रा -रं भू.

DISFAVOUR, *s.* अप्रसादः, अप्रसन्नता, अननुग्रहः, निग्रहः, वैमुख्यं, अदृष्टिः *f.*, अनाश्रयः. विरक्तिः *f.*, वैरक्त्यं, अननुकूलता, अनुरोधाभावः, अनुपकारः.

To DISFAVOUR, *v. a.* न अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) न अनुकूल (nom. अनुकूलयति -यितुं), न प्रसद् (c. 6. -सीदति -सत्तुं), अप्रसन्नः

-त्रा -त्रं भू, अप्रसादं कृ, न उपकृ.

DISFIGURATION, *s.* विरूपकरणं, अपरूपीकरणं, कदाकारकरणं, विकृतिकरणं.

To DISFIGURE, *v. a.* विरूप् (c. 10. -रूपयति -यितुं), विरूपीकृ, अपरूपीकृ, कुरूपीकृ, विकृ, कदाकारीकृ, व्यङ्गीकृ, विकलीकृ.

DISFIGURED, *p. p.* विरूपितः -ता -तं, विरूपः -पा -पी -पं, अपरूपः -पी -पं, कुरूपः -पी -पं, विकृतः -ता -तं, विकृताङ्गः -ङ्गी -ङ्गं, विकृताकारः -रा -रं, विकृताकृतिः -तिः -ति, विकलाङ्गः -ङ्गी -ङ्गं, व्यङ्गः -ङ्गी -ङ्गं.

DISFIGUREMENT, *s.* विरूपता, वैरूप्यं, कुरूपता, अपरूपता, वैकृत्यं, व्यङ्गता.

To DISFRANCHISE, *v. a.* महासभायां प्रतिनिधिप्रेरणाधिकाराद् भंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं), पौरत्वलोपं कृ, अधिकारं हृ (c. 1. हरति, हर्तुं).

DISFRANCHISEMENT, *s.* अधिकारलोपः, अधिकाराद् भंशनं, अधिकारहानिः *f.*

To DISGORGE, *v. a.* उद्गॄ (c. 6. -गिरति -गरितुं -रीतुं), वम् (c. 1. वमति -मितुं), उद्वम्, उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ऊर्द्धं क्षिप्, छर्द् (c. 10. छर्दयति -यितुं).

DISGORGEMENT, *s.* उद्गारः -रणं, उद्गिरणं, वमः -मनं, वान्तिः *f.*, ऊर्द्धशोधनं.

DISGRACE, *s.* अयशः *n.* (स्), अपयशः *n.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, अपमानं, अख्यातिः *f.*, कुख्यातिः, अपध्वंसः, अपकर्षः, अनादरः, कलङ्कः, अपकलङ्कः, मर्य्यादाहानिः *f.*, पराभवः, परिभवः, अभिभवः, अप्रतिष्ठा, अमर्य्यादा; 'disgrace of the family,' कुलकज्जलः, कुलाङ्गारः.

To DISGRACE, *v. a.* (Cause dishonour) अयशः कृ, अकीर्त्तिं कृ, सापमानं -नां -नं कृ, कलङ्कं कृ, कलङ्क (nom. कलङ्कयति -यितुं), कुख्यातिं जन् in caus. (जनयति -यितुं), लज्जां कृ.—(Degrade, put out of favour) पदाद् भंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं) or निराकृ.

DISGRACED, *p. p.* सापमानः -ना -नं, कलङ्कितः -ता -तं, अवज्ञोपहतः -ता -तं.

DISGRACEFUL, *a.* अकीर्त्तिकरः -री -रं, अपयशस्करः -री -रं, अयशस्यः -स्या -स्यं, कलङ्ककरः -री -रं, लज्जाकरः -री -रं, अपमानजनकः -का -कं, कलङ्की -ङ्किनी -ङ्कि (न्), अमर्य्यादाजनकः -का -कं, निन्दाकरः -री -रं.

DISGRACEFULLY, *adv.* सापमानं, अयशस्यं, अकीर्त्तिकरं, लज्जाकरं, गर्हितं.

DISGRACIOUS, *a.* अप्रसन्नः -न्ना -न्नं, अननुकूलः -ला -लं, निरनुरोधः -धा -धं, विमुखः -खी -खं, अप्रीतिकरः -री -रं, असन्तोषजनकः -का -कं.

To DISGUISE, *v. a.* (Conceal by an unusual dress) अन्यवेशेन or वेशान्तरेण छद् (c. 10. छादयति -यितुं), कपटवेशेन or छद्मवेशेन गुह् (c. 1. गूहति -हितुं, c. 10. गूहयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), आकारगोपनं कृ; 'disguise one's self,' अन्यवेशं परिधा (c. 3. -दधाति -धत्ते -धातुं) or धृ in caus. (धारयति -यितुं), स्वाकारगोपनं कृ, आत्मरूपं or आत्मदेहं गुह्, आत्माकारपरिवर्त्तनं कृ.—(Conceal, cloke) छद्, गुप् in des. (जुगुप्सते -प्सितुं), प्रावृ (c. 5. -वृणोति -वरितुं -रीतुं).—(Disfigure) विरूप् (c. 10. -रूपयति -यितुं), विरूपीकृ, विकृ; 'disguise one's intentions,' स्वाभिप्रायगोपनं कृ.

DISGUISE, *s.* (Dress for cor ealing the person) कपटवेशः, छद्मवेशः, अन्यवेशः, वेशान्तरं, कृत्रिमवेशः, वेशः.—(Act of disguising) आकारगोपनं, वेशान्तरधारणं, विडम्बनं, अभिनयः.—(Counterfeit appearance, false show) छद्म *n.* (न्), व्यपदेशः, अपदेशः, व्याजः, छलं, लक्ष्यं, लक्ष्मं.

DISGUISED, *p. p.* वेशधारी -रिणी -रि (न्), कपटवेशी -शिनी -शि (न्) or छद्मवेशी, कपटवेशः -शा -शं, कपटरूपी -पिणी -पि (न्), अलक्ष्यलिङ्गः -ङ्गा -ङ्गं, अलक्षितः -ता -तं; 'disguised as a Brahman,' द्विजरूपी *m.* (न्), द्विजवेशः; 'disguised censure,' व्याजनिन्दा.

DISGUISEMENT, *s.* आकारगोपनं, छद्मवेशधारणं, विडम्बनं, कपटरूपग्रहणं.

DISGUST, *s.* बीभत्सः -त्सं, घृणा, अरुचिः *f.*, गर्हा, कुत्सा, विकृतं, वैकृतं -त्यं, विकारः, अरतिः *f.* वैराग्यं, विरक्तिः *f.*, वैरक्त्यं, निर्वेदः.

To DISGUST, *v. a.* बीभत्सं or अरुचिं कृ or जन् (c. 10. जनयति -यितुं), वैकृत्यम् उत्पद् in caus. (-पादयति -यितुं).

DISGUSTED, *p. p.* जातबीभत्सः -त्सा -त्सं, विकृतः -ता -तं, अरतः -ता -तं.

DISGUSTFUL, DISGUSTING, *a.* बीभत्सजनकः -का -कं, घृणोत्पादकः -का -कं, अरुचिरः -रा -रं, अहृद्यकृत् *m. f. n.*, वैराग्यकृत्, कुत्सितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं.

DISH, *s.* शरावः, पात्रं, भाजनं, भोजनपात्रं, भाण्डं; 'made-dish,' सूदः, सिद्धान्नं.

To DISH UP, *v. a.* पात्रस्थं मांसव्यञ्जनादि परिविष् in caus. (-वेषयति -यितुं).

DISH-CLOUT, *s.* शरावमार्ज्जनः पटः, पात्रसम्मार्ज्जनार्थं चीरं.

DISH-WATER, *s.* भोजनपात्रप्रक्षालनेन घृतस्नेहादिमलिनं जलं.

DISHABILLE, *a.* दुर्वासाः -सा: -सः (स्), कुचेलः -ला -लं, अविनीतवेशः -शा -शं, अनलङ्कृतः -ता -तं, अकृताभरणः -णा -णं, विवस्त्रः -स्त्रा -स्त्रं.

DISHABILLE, *s.* लघुवासः *n.* (स्), शिथिलवस्त्रं, शयनगृहे परिधेयं वसनं.

To DISHABIT, *v. a.* निवेस् in caus. (-वासयति -यितुं), वासस्थानाद् बहिष्कृ.

To DISHEARTEN, *v. a.* आशां or मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), आशाभङ्गं कृ, अवसद् in caus. (-सादयति -यितुं), विषण्णीकृ, निर्विण्णीकृ, विषादं जन् in caus. (जनयति -यितुं), निराशीकृ.

DISHEARTENED, *p. p.* भग्नमनाः -नाः -नः (स्), भग्नाशः -शा -शं, विषण्णः -ण्णा -ण्णं, अवसादितः -ता -तं, दीनचेतनः -ना -नं, दीनमनस्कः -स्का -स्कं, म्लानाशः -शा -शं.

DISHEVELLED, *a.* प्रवितनः -ना -नं, प्रकीर्णः -र्णा -र्णं, स्रथः -था -थं; 'having dishevelled hair,' विगलितकेशः -शी -शं, मुक्तकेशः -शी -शं, विस्रस्तकेशः -शी -शं, ध्वाम्मूर्द्धजः -जा -जं.

DISHONEST, *a.* (Void of probity) असाधुः -धुः -ध्वी -धु, अशुचिः -चिः -चि, अधार्म्मिकः -की -कं, अन्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), अनृजुप्रकृतिः -तिः -ति, वक्रः -क्रा -क्रं, वक्री -क्रिणी -क्रि (न्), जिह्मः -ह्मा -ह्मं, कुटिलः -ला -लं, अभद्रः -द्रा -द्रं, खलः -ला -लं, दुष्टः -ष्टा -ष्टं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, विषमः -मा -मं, छाद्मिकः -की -कं, कौटिकः -की -कं, कौटः -टी -टं, निकृतः -ता -तं, असरलः -ला -लं.—(Unchaste woman) भ्रष्टा, व्यभिचारिणी, असाध्वी, असती.—(Obscene) अशुद्धः -द्धा -द्धं, गर्हितः -ता -तं.

DISHONESTLY, *adv.* असाधु, अशुचि, अन्यायेन, कुटिलं, विषमं, धूर्त्तवत्.

DISHONESTY, *s.* (Want of probity) असाधुत्वं, अशुचित्वं, खलता, दुष्टता, अधर्म्मः, असरलता, असारल्यं, अनृजुता, जिह्मता, वक्रता, कौटिल्यं, कापट्यं, कौटं, अशुद्धता, अदाक्षिण्यं, माया.—(Unchastity in a woman) असतीत्वं, असाध्वीत्वं.

DISHONOUR, *s.* अपमानं, अनादरः, अवमानं -नना, विमानं, अयशः *n.* (स्), अपयशः, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, अमर्य्यादा, अवज्ञा, परिभवः, तिरस्कारः, उपेक्षा, कलङ्कः, अपकलङ्कः, अपध्वंसः, अपकर्षः, अप्रतिष्ठा, अख्यातिः *f.*, मर्य्यादाहानिः *f.*, अङ्कनं.

To DISHONOUR, *v. a.* (Cause disgrace) अपमानं कृ, अयशः कृ, कलङ्कं कृ, कलङ्क (nom. कलङ्कयति -यितुं), अकीर्त्तिं जन् (c. 10. जनयति -यितुं), लज्जां कृ, सापमानं -नां -नं कृ.—(Dishonour a maiden) कन्यां दुष् in caus. (दूषयति -यितुं).—(Treat with dishonour) अवमन् (c. 4. -मन्यते -मनुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवधीर् (c. 10. -धीरयति -यितुं), लघूकृ.

DISHONOURABLE, *a.* अपमान्यः -न्या -न्यं, अवमाननीयः -या -यं, अनार्य्यः -र्य्या -र्य्यं, अपयशस्करः -रा -रं, अकीर्त्तिकरः -री -रं, अपमानजनकः -का -कं, कलङ्ककरः -री -रं.

DISHONOURABLY, *adv.* अनार्य्यं, अनार्य्यवत्, अयशस्यं, अपमान्यप्रकारेण.

DISHONOURED, *p. p.* अपमानितः -ता -तं, अवमानितः -ता -तं, विमानितः -ता -तं, अनर्चितः -ता -तं, अनादृतः -ता -तं, अनपचितः -ता -तं, कात्कृतः -ता -तं.

DISHONOURER, *s.* अपमानकर्त्ता *m.* (र्त्तृ), अनादरकृत्, उपेक्षकः, अवज्ञाता *m.* (तृ).

DISHUMOUR, *s.* प्रकृतिकटुत्वं, प्रकृतिककैशत्वं, स्वभाववक्रता, दुःशीलता, वक्रशीलता, अरुन्तुदत्वं.

DISINCLINATION, *s.* विरक्तिः *f.*, वैरक्त्यं, विमुखता, वैमुख्यं, अनीहा, निरीहता, अनिच्छा, अरुचिः *f.*, विमतिः *f.*, पराङ्मुखता, अप्रीतिः *f.*, निग्रहः, अस्पृहा, अप्रवृत्तिः *f.*, अप्रियत्वं.

To DISINCLINE, *v. a.* विरञ्ज् in caus. (-रञ्जयति -यितुं), वैरक्त्यं or वैमुख्यं or अनिच्छां जन् (c. 10. जनयति -यितुं) or उत्पद् in caus. (-पादयति -यितुं), पराङ्मुखं -खां -खं कृ.

DISINCLINED, *p. p.* पराङ्मुखः -खी -खं, विमुखः -खी -खं, विरक्तः -क्ता -क्तं, विरक्तभावः -वा -वं, विमतः -ता -तं, विपरीतः -ता -तं, अनिच्छुः -च्छुः -च्छु, निरीहः -हा -हं, निःस्पृहः -हा -हं, निरभिलाषः -षा -षं, अप्रवृत्तः -त्ता -त्तं.

DISINGENUOUS, *a.* अनुदारः -रा -रं, असरलः -ला -लं, अदक्षिणः -णा -णं, वक्रभावः -वा -वं, अशुचिः -चिः -चि, सव्याजः -जा -जं, कापटिकः -की -कं, कुटिलस्वभावः -वा -वं, कृपणः -णा -णं, मलार्थकः -का -कं, कदर्य्यः -र्य्या -र्य्यं.

DISINGENUOUSLY, *adv.* अनुदारं, असरलं, अशुचि, सव्याजं, कापट्येन, कुटिलं.

DISINGENUOUSNESS, *s.* अनौदार्य्यं, असारल्यं, अशुचिता, अदाक्षिण्यं, भाववक्रता, कौटिल्यं, सव्याजत्वं, कापट्यं, कार्पण्यं, खलता, दुष्टता, माया.

DISINHERISON, *s.* (Act of disinheriting) पैतृकरिक्थच्छेदः, पैतृकरिक्थलोपः, विभागशून्यकरणं.—(The state) पैतृकाधिकारहानिः *f.*, विभागशून्यता.

To DISINHERIT or DISHERIT, *v. a.* निर्भज् in caus. (-भाजयति -यितुं), विभागशून्यं -न्यां -न्यं कृ, पैतृकधनं or पैतृकरिक्थम् अपहृ (c. 1. -हरति -हर्त्तुं), पैतृकाधिकाराद् भंश् in caus. (भंशयति -यितुं), गोत्ररिक्थलोपं कृ.

DISINHERITED, *p. p.* निर्भाजितः -ता -तं, विभागशून्यः -न्या -न्यं, पैतृकाधिकाराद्भ्रंशितः -ता -तं, पैतृकधनहीनः -ना -नं, अनधिकारः -रा -रं.

To DISINTER, *v. a.* शवं or मृतशरीरम् उत्खन् (c. 1. -खनति -नितुं).

DISINTERRED, *p. p.* उत्खातः -ता -तं, प्रोत्खातः -ता -तं, समाधिवहिष्कृतः -ता -तं.

DISINTERESTED, *a.* निर्ममः -मा -मं, अममः -मा -मं, अमामकः -की -कं, निष्कामः -मा -मं, अकामात्मा -त्मा -त्म (न्), अनात्मनीनः -ना -नं, मुक्तसङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, निजलाभनिवृत्ततृष्णः -ष्णा -ष्णं, स्वार्थनिरपेक्षः -क्षा -क्षं, विमलार्थकः -का -कं, विपक्षपातः -ता -तं, अपक्षपाती -तिनी -ति (न्), निःस्वार्थी -र्थिनी -र्थि (न्) or अस्वार्थार्थी, अस्वार्थैलिप्सुः -प्सुः -प्सु, उदासीनः -ना -नं, अहैतुकः -का -कं, अकिञ्चनः -ना -नं, वृत्तिघ्नानः -ना -नं, निरीहः -हा -हं.

DISINTERESTEDLY, *adv.* निर्ममं, निष्कामं, स्वार्थनिरपेक्षं, निर्ममत्वात्, विपक्षपातं.

DISINTERESTEDNESS, *s.* निर्ममत्वं, अममत्वं -ता, निष्कामत्वं, निःसङ्गत्वं, निरीहता, अस्वार्थार्थित्वं, विपक्षपातत्वं, अपक्षपातिता, उदासीनता, औदास्यं.

To DISJOIN, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विप्रयुज्, विश्लिष् (c. 10. -श्लेषयति -यितुं).

DISJOINED, *p. p.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विनियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, असंसक्तः -क्ता -क्तं, व्यवहितः -ता -तं.

To DISJOINT, *v. a.* (Put out of joint) विसन्धीकृ, सन्धित्रोटनं कृ, सन्धिं भञ्ज् (c. 7. भनक्ति, भंक्तुं), विसन्धा (c. 3. -दधाति -धातुं).—(Separate) वियुज् (c 7. -युनक्ति -योक्तुं), विसंयुज्, विश्लिष् in caus. (-श्लेषयति -यितुं).—(Carve) व्यवछिद् (c. 7. -छिनत्ति -छेत्तुं), निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

To DISJOINT, *v. n.* विसन्धीभू, विसंयुज् in pass. (-युज्यते).

DISJOINTED, *p. p.* विसन्धितः -ता -तं, असंश्लिष्टः -ष्टा -ष्टं, असंहतः -ता -तं.—(Not coherent) असम्बद्धः -द्धा -द्धं, अनन्वितः -ता -तं, निर्युक्तिकः -की -कं.

DISJOINTING, *s.* विसन्धीकरणं, विसन्धानं, विसंयोगः, सन्धिच्छेदः, व्यवछेदः.

DISJUNCT, *a.* वियुक्तः -क्ता -क्तं, विप्रयुक्तः -क्ता -क्तं, विसंयुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, असंलग्नः -ग्ना -ग्नं, पृथग्भूतः -ता -तं.

DISJUNCTION, *s.* वियोगः, विसंयोगः, विप्रयोगः, निर्युक्तिः *f.*, असंयोगः, विश्लेषः, असन्धानं, विभेदः, सङ्गविच्युतिः *f.*, आसङ्गत्यं; 'of letters,' अवसानं.

DISJUNCTIVE, *a.* निर्युक्तिकः -की -कं, वियोगी -गिनी -गि (न्), विभेदकरः -री -रं.

DISJUNCTIVELY, *adv.* वियोगतस्, विसंयोगतस्, विश्लेषेण, विसंयुक्तं, पृथक्.

DISK, *s.* (Of the sun, &c.) बिम्बः -म्बं, मण्डलं, परिधिः *m.*, परिवेशः, उपसूर्य्यकं, सूर्य्यमण्डलं.—(Quoit) चक्रं.

DISLIKE, *s.* अप्रीतिः *f.*, अप्रेम *n.* (न्), अप्रियता -त्वं, विप्रियता -त्वं, विरक्तिः *f.*, वैरक्त्यं, विमतिः *f.*, द्वेषः, निग्रहः, विद्विष्टता, द्वेष्यता, अरुचिः *f.*, असौहृद्यं, विमुखता, पराङ्मुखता, वैमुख्यं, अनिच्छा, अनीहा, विध्वंसः, अनिष्टता.

To DISLIKE, *v. a.* न अभिमन् (c. 4. -मन्यते -मन्तुं), न अनुमन्, न इष् (c. 6. इच्छति, एषितुं), न अभिनन्द् (c. 1. -नन्दति -न्दितुं), न प्रतिनन्द्, न अनुरुध् (c. 4. -रुध्यते -रोद्धुं); द्विष् (c. 2. द्वेष्टि -ष्टुं), विद्विष्, विरञ्ज् in pass. (-रज्यते); न प्री (c. 9. प्रीणाति or c. 4. प्रीयते), न अनुरुच् (c. 10. -रोचयति -यितुं) or expressed by the neut. form रोचते; as, 'he dislikes that,' तत् तस्मै न रोचते.

DISLIKED, *p. p.* अप्रियः -या -यं, विप्रियः -या -यं, द्विष्टः -ष्टा -ष्टं, विद्विष्टः -ष्टा -ष्टं, अनिष्टः -ष्टा -ष्टं, अनभिमतः -ता -तं, अप्रीतिकरः -री -रं.

To DISLIKEN, *v. a.* असमानीकृ, असमीकृ, असदृशं -शीं -शं कृ, अतुल्यीकृ.

DISLIKENESS, *s.* असमानता, असाम्यं, असादृश्यं, अतुल्यता, वैषम्यं.

To DISLOCATE, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, सन्धिं or अस्थिग्रन्थिं त्रुट् (c. 10. त्रोटयते -यितुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं), विसन्धा (c. 3. -दधाति -धत्ते -धातुं), सन्धिम् उत्सृ in caus. (-सारयति -यितुं) or स्थानान्तरीकृ.

DISLOCATED, *p. p.* विसन्धितः -ता -तं, विसन्धीकृतः -ता -तं, त्रुटितः -ता -तं, सन्धिच्युतः -ता -तं, च्युतग्रन्थिः -न्थिः -न्थि.

DISLOCATION, *s.* त्रोटनं, सन्धित्रोटनं, सन्धिभङ्गः, ग्रन्थिभङ्गः, विसन्धानं, विसन्धीकरणं, सन्धिच्युतिः *f.*; 'of hand and foot,' करपादत्रोटनं.

To DISLODGE, *v. a.* (Remove from a habitation) गृहाद् बहिष्कृ or निःसृ in caus. (-सारयति -यितुं), निर्वस् in caus. (-वासयति -यितुं), पिवस्, विप्रवस्, स्थानान्तरीकृ, देशान्तरीकृ.—(Remove, drive away) अपसृ or निःसृ or उत्सृ in caus., निराकृ, दूरीकृ, अपानुद् (c. 6. -नुदति -नोत्तुं), निरस् (c. 4. -अस्यति -असितुं), विचल् in caus. (-चालयति -यितुं).

To DISLODGE, *v. n.* अपसृ (c. 1. -सरति -सर्त्तुं), स्थानान्तरं or देशान्तरं गम् (c. 1. गच्छति, गन्तुं), निवेशनस्थानं त्यज् (c. 1. त्यजति, त्यक्तुं), स्थानान्तरे निविश् (c. 6. -विशति -वेष्टुं).

DISLODGED, *p. p.* अपसारितः -ता -तं, निःसारितः -ता -तं, विवासितः -ता -तं, बहिष्कृतः -ता -तं, निष्कासितः -ता -तं, निरस्तः -स्ता -स्तं, स्थानान्तरं गमितः -ता -तं.

DISLOYAL, *a.* अभक्तः -क्ता -क्तं, अभक्तिमान् -मती -मत् (त्), क्षीणभक्तिः -क्तिः -क्ति, भक्तिहीनः -ना -नं, विश्वासघाती -तिनी -ति (न्) or विश्रम्भघाती or भक्तिघाती, शत्रुसेवी -विनी -वि (न्) or द्विट्सेवी, राजा-

भिद्रोही -हिणी -हि (न्), राजापथ्यकारी -रिणी -रि (न्), राजवैरी -रिणी -रि (न्).—(Not true to marriage) व्यभिचारी *m.* -रिणी *f.* (न्), अननुकूलः *m.*, असाध्वी *f.*, असती *f.*, अभिसारिका *f.*

DISLOYALLY, *adv.* अभक्त्या, भक्तिहीनत्वात्, अभक्तवत्, भक्तिभङ्गात्, राजद्रोहेण.

DISLOYALTY, *s.* अभक्तिः *f.*, अभक्तिमत्त्वं, भक्तिहीनता, भक्तिभङ्गः, भक्तिघातः, विश्वासभङ्गः, शत्रुसेवा, द्विट्सेवा, राजाभिद्रोहः, राजापथ्यकारित्वं.—(In love) व्यभिचारः.

DISMAL, *a.* दारुणः-णा-णं, दुःखी -खिनी -खि (न्), सशोकः -का -कं, सखेदः -दा -दं, खेदजनकः -का -कं, अनिष्टवेदी -दिनी -दि (न्), उग्रः -ग्रा -ग्रं, घोरः -रा -रं, भीरूमयः -यी -यं, रौद्रः -द्री -द्रं, निरानन्दः -न्दा -न्दं.

DISMALLY, *adv.* दारुणं, घोरं, उग्रं, सखेदं, उग्रशोकात्, भयानकं.

DISMALNESS, *s.* दारुणता, सशोकता, उग्रता, घोरत्वं, रौद्रत्वं, भयानकत्वं.

To DISMANTLE, *v. a.* (Strip of dress) विवस्त्र (nom. विवस्त्रयति -यितुं), नग्नीकृ, वस्त्रं हृ (c. 1. हरति, हर्तुं).—(Deprive a ship of rigging) नौकासज्जां or नौकोपकरणं हृ or अपहृ or अपनी (c. 1. -नयति -नेतुं).—(Deprive a town of forts) नगरपरिगतं प्राचीरादि or नगरपरिकूटं or नगरदुर्गं or नगरगुप्तिं नश् in caus. (नाशयति -यितुं).

DISMANTLED, *p. p.* विवस्त्रः -स्त्रा -स्त्रं, हृतोपकरणः -णा -णं, हृतसज्जाः -ज्जा -ज्जं.

To DISMASK, *v. a.* कृत्रिममुखं or कपटवेशं or छद्मवेशान् अवतॄ in caus. (-तारयति -यितुं), अपवृ (c. 5. -वृणोति -वरितुं -रीतुं), अपावृ; उच्छद् (c. 10. -छादयति -यितुं), स्पष्टीकृ.

To DISMAST, *v. a.* कूपकं भञ्ज् (c. 7. भनक्ति, भंक्तुं), गुणवृक्षकम् अपहृ (c. 1. -हरति -हर्तुं).

DISMASTED, *p. p.* भग्नकूपकः -का -कं, हृतगुणवृक्षकः -का -कं, निष्कूपकः -का -कं.

To DISMAY, *v. a.* त्रस् in caus. (त्रासयति -यितुं), वित्रस्, भी in caus. (भाययति or भीषयति -यितुं), विस्मि in caus. (-स्माययति -स्मापयति -यितुं), विस्मयम् उत्पद् in caus. (-पादयति -यितुं), (उद्विज् in caus. (-वेजयति -यितुं).

DISMAY, *s.* विस्मयः, साध्वसं, त्रासः, सन्त्रासः, भयं, भीषणं, उद्वेगः, दरः.

DISMAYED, *p. p.* विस्मितः -ता -तं, सन्त्रस्तः -स्ता -स्तं, भीषितः -ता -तं, त्रासितः -ता -तं, साध्वसोपहतः -ता -तं, विलक्षः -क्षा -क्षं.

To DISMEMBER, *v. a.* अङ्गाद् अङ्गम् अवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), अवयवशो निकृत् (c. 6. -कृन्तति -कर्त्तितुं), गात्राणि पृथक्कृ, व्यङ्गीकृ.

DISMEMBERMENT, *s.* अङ्गव्यवच्छेदः, अवयवशो निकर्त्तनं, गात्राणां पृथक्करणं.

To DISMISS, *v. a.* (Send away) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ in caus. (-सारयति -यितुं), प्रेर् (c. 10. -ईरयति -यितुं), विसृज् (c. 6. -सृजति -स्रष्टुं c. 10. -सर्ज्जयति -यितुं), सम्प्रेष् in caus. (-एषयति -यितुं).—(Give leave of departure) अनुज्ञा, (c. 9. -जानाति -ज्ञातुं).—(Discard) अपास् (c. 4. -अस्यति -असितुं), मुच् (c. 6. मुञ्चति, मोक्तुं), अवमुच्, अवसृज्, व्यपसृज्, उत्सृज्; हा (c. 3. जहाति, हातुं), अपाहा, अपहा, विहा; उज्झ् (c. 6. उज्झति -ज्झितुं), प्रोज्झ्, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निराकृ, पराकृ, दूरीकृ; 'to dismiss from office,' अधिकारात् or पदात् or साचिव्याद् भंश् in caus. (भंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or अवरुह् in caus. (-रोपयति -यितुं) or निराकृ.

DISMISSED, *p. p.* प्रस्थापितः -ता -तं, अपसारितः -ता -तं, सम्प्रेषितः -ता -तं, विसर्ज्जितः -ता -तं, अवसृष्टः -ष्टा -ष्टं, निसृष्टः -ष्टा -ष्टं, अपास्तः -स्ता -स्तं, प्रतिक्षिप्तः -प्ता -प्तं, अपविद्धः -द्धा -द्धं, निष्कासितः -ता -तं, गमितः -ता -तं, निकृतः -ता -तं, दूरीकृतः -ता -तं; 'dismissed from office,' च्युताधिकारः -रा -रं, अधिकारात्भंशितः -ता -तं or निराकृतः -ता -तं; 'one dismissed,' अपविद्धलोकः.

DISMISSION, DISMISSAL, *s.* प्रस्थापनं, प्रेरणं, विसर्ज्जनं, अपसर्ज्जनं, अवसर्ज्जनं, अपासनं, सम्प्रेषः -षणं, खण्डनं; 'from office,' अधिकाराद् भंशनं or निराकरणं or अवरोपणं.

To DISMOUNT, *v. a.* (Throw from a horse) अश्वपृष्ठात् पत् in caus. (पातयति -यितुं) or अवतॄ in caus. (-तारयति -यितुं) or उत्तॄ.—(Throw a cannon from its carriage) युद्धयन्त्रं स्ववाहनाद् अवतॄ in caus.

To DISMOUNT, *v. n.* अश्वाद् अवरुह् (c. 1. -रोहति -रोढुं), अश्वपृष्ठाद् अवतॄ (c. 1. -तरति -रितुं -रीतुं) or उत्तॄ, अवया (c. 2. -याति -तुं), अधो गम् (c. 1. गच्छति, गन्तुं.)

DISMOUNTED, *p. p.* अवतीर्णः -र्णा -र्णं, उत्तीर्णः -र्णा -र्णं, अवरूढः -ढा -ढं.

DISNATURED, *p. p.* वात्सल्यरहितः -ता -तं, अवत्सलः -ला -लं, स्नेहहीनः -ना -नं.

DISOBEDIENCE, *s.* आज्ञाभङ्गः, आज्ञाव्यतिक्रमः, आज्ञालङ्घनं, अननुवर्त्तनं, असेवनं, अमाननं, अशुश्रूषा, प्रतिकूलत्वं, प्रतीपता, अवशत्वं, अननुकूलता, अननुष्ठानं, दुःशीलता.

DISOBEDIENT, *a.* आज्ञाभङ्गकरः -री -रं, आज्ञालङ्घी -ङ्घिनी -ङ्घि (न्), अनादेशकरः -री -रं, अवचनकरः -री -रं, अवचस्करः -रा -रं, अशुश्रूषुः -षुः -षु, अननुवर्त्ती -र्त्तिनी -र्त्ति (न्), अननुकूलः -ला -लं, अवशः -शा -शं, अवशवर्त्ती -र्त्तिनी -र्त्ति (न्) प्रतीपः -पा -पं, अविधायी -यिनी -यि (न्) असेवी -विनी -वि (न्), प्रतिकूलः -ला -लं, दुःशीलः -ला -लं.

To DISOBEY *v. a.* आज्ञां भञ्ज् (c. 7. भनक्ति, भंक्तुं) or लङ्घ् (c. 10. लङ्घयति -यितुं) or न सेव् (c. 1. सेवते -वितुं) or न अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं) or न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) or न श्रु in des. (शुश्रूषते -षितुं) or न प्रतीष् (c. 6. -इच्छति -एषितुं) or न अनुविधा in pass. (-धीयते) or न अभ्युपे (c. 2. अभ्युपैति -तुं); प्रतीप (nom. प्रतीपायते).

DISOBEYED, *p. p.* असेवितः -ता -तं, अशुश्रूषितः -ता -तं, अननुष्ठितः -ता -तं.

DISOBLIGATION, *s.* अप्रियं, विप्रियं, अनुपकारः, अपकारः, अपराधः, विध्वंसः.

To DISOBLIGE, *v. a.* अप्रियं or विप्रियं कृ or आचर् (c. 1. -चरति -रितुं); अपराध् (c. 4. -राध्यति c. 5. -राध्नोति -राद्धुं) with gen.; अपकृ, असन्तोषं जन् (c. 10. जनयति -यितुं), रोषं or मन्युम् उत्पद् in caus. (-पादयति -यितुं).

DISOBLIGING, *a.* अप्रियङ्करः -री -रं or अप्रियकरः, अननुरोधी -धिनी -धि (न्), अननुग्राही -हिणी -हि (न्), अननुकूलः -ला -लं, अनुपकारी -रिणी -रि (न्), अननुविधायी -यिनी -यि (न्), असन्तोषकरः -री -रं, अपकारकः -का -कं, अपराधकारी -रिणी -रि (न्), अलीकः -का -कं.

DISOBLIGINGLY, *adv.* अप्रीत्या, अननुरोधेन, अनुनयाभावात्, दुष्टभावेन.

DISOBLIGINGNESS, *s.* अननुरोधः, अननुग्रहः, अननुकूलता, अप्रियकारित्वं, अनुपकारित्वं.

DISORDER, *s.* (Irregularity, confusion) अक्रमः, उत्क्रमः, व्युत्क्रमः, क्रमभङ्गः, भग्नप्रक्रमः, व्यतिक्रमः, विसूचता, अपरिपाटिः *f.*, असंस्थानं, अव्यवस्था, अविधिः *m.*, अविधानं, अनवस्थितत्वं, व्यस्तता, विक्षिप्तता, सङ्करः, साङ्कर्य्यं, सङ्कीर्णत्वं, सङ्क्षोभः, व्यतिकरः.—(Tumult, disturbance) विप्लवः, तुमुलं, कोलाहलः, क्षोभः.—(Breach of law) व्यवस्थातिक्रमः.—(Disease) रोगः, व्याधिः *m.*, पीडा, व्यापद् *f.*, आमयः, वैकल्यं, अस्वास्थ्यं, असुस्थता; 'disorder of stomach,' अन्नविकारः, जठरामयः.—(Discomposure of mind) आकुलत्वं, व्याकुलत्वं, व्यग्रता, वैक्लव्यं, सम्भ्रमः; 'army in disorder,' समुत्पिण्डः, पिण्डलः.

To DISORDER, *v. a.* (Confuse) पर्य्यस् (c. 4. -अस्यति -असितुं), व्यस्, संक्षुभ् in caus. (-क्षोभयति -यितुं), विक्षुभ्, विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), क्रमं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or विलुप् (c. 6. -लुम्पति -लोप्तुं) or उपहन् (c. 2. -हन्ति -न्तुं), सङ्करीकृ, अस्तव्यस्तीकृ, सङ्कुलीकृ, आकुलीकृ.—(Make sick) अस्वास्थ्यं or रोगं कृ or जन् (c. 10. जनयति

-यितुं), अस्वस्थं -स्थां -स्थं कृ, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), उपहन्, उपतप् (c. 10. -तापयति -यितुं).—(Disturb the mind) व्याकुलीकृ, आकुलीकृ, व्याकुल (nom. व्याकुलयति -यितुं), व्यामुह् (c. 10. -मोहयति -यितुं), विभ्रम् (c. 10. -भ्रमयति -यितुं).

Disordered, *a.* (Deranged) व्यस्तः -स्ता -स्तं, अस्तव्यस्तः -स्ता -स्तं, असंस्थितः -ता -तं, अव्यवस्थितः -ता -तं, अनवस्थितः -ता -तं, भग्नक्रमः -मा -मं, क्रमहीनः -ना -नं, विक्षिप्तः -प्ता -प्तं, सङ्कीर्णीकृतः -ता -तं, सङ्कुलः -ला -लं, सङ्कीर्णः -र्णा -र्णं, व्यापन्नः -न्ना -न्नं, विगलितः -ता -तं.—(In mind) आकुलः -ला -लं, व्याकुलः -ला -लं, सम्भ्रान्तः -न्ता -न्तं, भ्रान्तमनाः -नाः -नः (स्), विपरीतचेताः -ताः -तः (स्), व्यग्रः -ग्रा -ग्रं, पारिप्लवः -वा -वं.—(In body) अस्वस्थः -स्था -स्थं, उपहतः -ता -तं, व्याधितः -ता -तं, पीडितः -ता -तं, आतुरः -रा -रं, विकारी -रिणी -रि (न्).—(As an army) पिञ्जलः -ला -लं.

Disorderly, *a.* (Confused) अस्तव्यस्तः -स्ता -स्तं. *See* Disordered.—(Irregular) विधिभञ्जकः -का -कं, अनवस्थितः -ता -तं, अव्यवस्थितः -ता -तं, अमर्य्यादः -दा -दं, नियमविरुद्धः -द्धा -द्धं, विषमः -मा -मं.—(Lawless, unruly) धर्मरोधी -धिनी -धि (न्), अधर्म्यः -र्म्या -र्म्यं, अवशः -शा -शं, अनियतः -ता -तं, उच्छृङ्खलः -ला -लं.

Disorderly, *adv.* (Confusedly, without order) सङ्कुलं, सङ्कीर्णं, अक्रमेण, क्रमं विना.—(Against rule or law) अविधितस्, अधर्म्मतस्, नियमविरुद्धं.

Disordinate, *a.* अविधिः -धिः -धि, विधिघ्नः -घ्नी -घ्नं, निराचारः -रा -रं, अव्यवस्थितः -ता -तं, व्यभिचारी -रिणी -रि (न्).

Disorganization, *s.* निर्व्यूढिः *f.*, निर्व्यूढता, संस्थानभङ्गः, क्रमभङ्गः, रीतिखण्डनं.

To disorganize, disorganized. *See To* disorder, disordered.

To disown, *v. a.* निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपह्नु, प्रत्याख्या (c. 2. -ख्याति -तुं), अनाख्या, अतिख्या, प्रत्यादिश् (c. 6. -दिशति -देष्टुं), निरस् (c. 4. -अस्यति -असितुं), अपज्ञा (c. 9. -जानीते -ज्ञातुं).

Disowned, *p. p.* निह्नुतः -ता -तं, अपह्नुतः -ता -तं, प्रत्याख्यातः -ता -तं.

To disparage, *v. a.* (Treat with contempt, undervalue) अवज्ञा (c. 9. -जानाति -ज्ञातुं), अपवद् (c. 1. -वदति -दितुं), परिवद्, परिभू, असूय (nom. असूयति -ते -यितुं), अभ्यसूय, उपेक्ष् (c. 1. -ईक्षते -क्षितुं), कदर्थ् (c. 10. -अर्थयते -यितुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निन्द् (c. 1. निन्दति -न्दितुं), लघूकृ, तुच्छीकृ, तृणाय मन् (c. 4. मन्यते, मन्तुं), अवमन्, अपकृष् (c. 1. -कर्षति -क्रष्टुं), व्यपकृष्.—(Match unequally) अयोग्यविवाहेन सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), अनुपयुक्तसम्बन्धं कृ.—(Impair by union with something inferior) अयोग्यसंसर्गेण सारतां अपहृ (c. 1. -हरति -हर्त्तुं) or अपकृष्.

Disparaged, *p. p.* अवज्ञातः -ता -तं, अवमतः -ता -तं, परिभूतः -ता -तं, कदर्थितः -ता -तं, निन्दितः -ता -तं, अपकृष्टः -ष्टा -ष्टं, अवगीतः -ता -तं, लघूकृतः -ता -तं.

Disparagement, *s.* (Detraction, dishonour) असूया -यनं, अभ्यसूया, असूयुः *m.*, अपवादः, परीवादः, परिवादः, अवज्ञा, परिभावणं, अपमानं, निन्दा, अवहेला, परिभवः, परिभूतिः *f.*, अपकर्षः, गुणापवादः, गुणघातः, विगानं, परदोषवादः, परावज्ञा, कलङ्ककरणं, तिरस्कारः.—(Unequal match) अयोग्यसम्बन्धः, अनुपयुक्तविवाहः.

Disparager, *s.* असूयकः, अभ्यसूयकः, अपवादी *m.* (न्) परिवादी *m.* गुणघाती *m.* (न्), निन्दकः; 'self-disparager,' आत्मगुणावमानी *m.* (न्).

Disparity, *s.* असाम्यं, असमता, असमानता, वैषम्यं, विषमता, अतुल्यत्वं, प्रभेदः, विभेदः, भेदः, भिन्नता, प्रभिन्नता, असमञ्जसं, असामञ्जस्यं, अयोग्यता, तारतम्यं, न्यूनाधिकं, न्यूनाधिक्यं, न्यूनातिरेकं; 'in number,' संख्यावैषम्यं, विषमसंख्यत्वं.

To dispark, *v. a.* वाटं सद्वसामान्यं कृ or निरवरोधं कृ or निरावरणं कृ.

To dispart, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विभज् (c. 1. -भजति -भक्तुं), विभिद् (c. 7. -भिनत्ति -भेत्तुं), द्विधा भिद् or कृ, द्वैधीकृ, द्विखण्डीकृ.

Dispassion, *s.* वैराग्यं, वैरागं, विरागः, अरागत्वं, अक्रोधः, शान्तिः, *f.*, शमः, शान्तता, औदास्यं, निरीहता, निरुद्वेगः, धैर्य्यं, जाड्यं.

Dispassionate, *a.* विरागी -गिणी -गि (न्) or अरागी, विरक्तः -क्ता -क्तं, अरागः -गा -गं, वीतरागः -गा -गं, रागहीनः -ना -नं, शान्तः -न्ता -न्तं, समचित्तः -त्ता -त्तं, समबुद्धिः -द्धिः -द्धि, उदासी -सिनी -सि (न्), उदासीनः -ना -नं, निरञ्जनः -ना -नं, अक्रोधः -धा -धं, अपक्षपाती -तिनी -ति (न्).

Dispassionately, *adv.* शान्त्या, शान्तचेतसा, समबुद्धा, असम्भ्रमं, असहसा.

Dispatch, *s. See* Despatch.

To dispel, *v. a.* अपनुद् (c. 6. -नुदति -नोत्तुं), अपानुद्, व्यपानुद्; निरस् (c. 4. -अस्यति -असितुं), व्यस्, अपास्, अपसृ (c. 10. -सारयति -यितुं), निःसृ, उत्सृ; निराकृ, बहिष्कृ, दूरीकृ, विचल् (c. 10. -चालयति -यितुं), विनी (c. 1. -नयति -नेतुं), अपनी, विधू (c. 5. -धूनोति -धवितुं), निर्धू, अपोह् (c. 1. -ऊहते -हितुं), विध्मा (c. 1. -धमति -ध्मातुं), हृ (c. 1. हरति, हर्त्तुं), अपहृ, परिहृ, हन् (c. 2. हन्ति -न्तुं), नश् (c. 10. नाशयति -यितुं); 'dispelling darkness,' तमोनुदः -दा -दं; 'dispelling fever,' ज्वरघ्नः -घ्नी -घ्नं, ज्वरनाशकः -का -कं, ज्वरापहः -हा -हं, ज्वरान्तकः -का -कं, 'dispelling poison,' विषघ्नी -घ्नी -घ्नि (न्); 'dispelling obstacles,' विघ्नहरः -रा -रं, विघ्नविनायकः -का -कं.

Dispelled, *p. p.* निरस्तः -स्ता -स्तं, व्यस्तः -स्ता -स्तं, अपास्तः -स्ता -स्तं, निराकृतः -ता -तं, दूरीकृतः -ता -तं, अपनोदितः -ता -तं, अपसारितः -ता -तं, निर्धूतः -ता -तं, विधूतः -ता -तं, अपनीतः -ता -तं, व्यपोढः -ढा -ढं, अपहृतः -ता -तं.

Dispelling, *s.* अपनुत्तिः *f.*, अपनोदः, अपसारणं, निःसारणं, निरसनं, निराकरणं.

To dispend, *v. a.* व्यय् (c. 10. व्ययति -यितुं c. 1. व्ययति, rt. इ), व्ययीकृ.

Dispensary, *s.* औषधागारं, औषधसंस्कारशाला, औषधपरिकल्पनगृहं, औषधमिश्रणस्थानं.

Dispensation, *s.* (Distribution) प्रणयनं, वितरणं, विभागकल्पना, परिकल्पनं, वण्टनं, प्रविभागः, कृप्तिः *f.*, परिनिवेपणं, संशनं.—(Permission to break a law) नियमभङ्गानुमतिः *f.*, विधानलङ्घनानुमतिः, व्यवस्थाभङ्गानुज्ञा, व्यवहारभङ्गानुमतिः *f.*, व्यवस्थावशाद् विमुक्तिः *f.*, आचारभङ्गोपेक्षा, मुक्तिः *f.*, विनिर्मोकः, क्षमा, मोक्षः.—(The dealing of God with men) मनुष्यान् प्रति परमेश्वरस्य गतिः *f.* or व्यवहारः or प्रवृत्तिः *f.* or क्रियाविधिः *m.*

Dispensator, *s.* विभागकल्पकः, परिकल्पकः, प्रणेता *m.* (तृ), वितरणकृत्, वण्टनकृत्.

Dispensatory, *s.* औषधसंस्कारविषयो ग्रन्थः, वैद्यशास्त्रं.

To dispense, *v. a.* कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, पृथक् पृथग् विभज् (c. 1. -भजति -ते -भक्तुं) or प्रविभज् or वितॄ (c. 1. -तरति -रितुं -रीतुं), निन्यस् (c. 4. -अस्यति -असितुं), विधा (c. 3. -दधाति -धातुं), व्यंस् (c. 10. -संसयति -यितुं), वण्ट् (c. 10. वण्टयति -यितुं); 'to dispense justice, punishment, &c.' प्रणी (c. 1. -णयति -णेतुं) सम्प्रणी.

To dispense with, *v. a.* अवसृज् (c. 6. -सृजति -स्रष्टुं), त्यज् (c. 1. त्यजति, त्यक्तुं), मुच् (c. 6. मुञ्चति, मोक्तुं), क्षम् (c. 1. क्षमते, क्षन्तुं), अनुज्ञा (c. 9. -जानाति -ज्ञातुं), अनुमन् (c. 4. -मन्यते -मन्तुं), उपेक्ष् (c. 1. -ईक्षते -क्षितुं).

Dispensed, *p. p.* परिकल्पितः -ता -तं, प्रविभक्तः -क्ता -क्तं, प्रणीतः -ता -तं.

DISPENSE, *s.* नियमभङ्गानुमतिः *f.*, विधानलङ्घनक्षमा, व्यवस्थावशाद् विनिमोकः.

DISPENSER, *s.* परिकल्पकः, प्रणेता *m.* (तृ), वितरणकारी *m.* (न्).

To DISPEOPLE, *v. a.* निर्जनीकृ, विजनीकृ, नरशून्यं -न्यां -न्यं कृ, शून्यारण्यं कृ, निर्मनुष्यं -ष्यां -ष्यं कृ, अरण्यमिव कृ.

DISPEOPLER, *s.* नरशून्यकारी *m.* (न्), उच्छेदकः, निर्मनुष्यकारी *m.*, निर्जनकृत्.

To DISPERSE, *v. a.* विकॄ (c. 6. -किरति -किरितुं -रीतुं), इतस्ततः or बहुधा or नानादिक्षु विद्रु in caus. (-द्रावयति -यितुं), विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), व्यस् (c. 4. -अस्यति -असितुं), विधू (c. 5. -धूनोति -धवितुं), निर्धू, इतस्ततो विचल् in caus. (-चालयति -यितुं) or विस्तॄ in caus. (-स्तारयति -यितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निरस् or गम् in caus. (गमयति -यितुं) or विसृ in caus. (-सारयति -यितुं) or प्रसृ or विध्मा (c. 1. -धमति -ध्मातुं) or अपध्मा; 'dispersing darkness,' तमोनुदः -दा -दं, तमोपहः -हा -हं, तमोहरः -रा -रं. *See* DISPERSER; 'dispersing to different quarters,' अपदिश्य.

DISPERSED, *p. p.* विकीर्णः -र्णा -र्णं, विद्रुतः -ता -तं, विक्षिप्तः -प्ता -प्तं, विगलितः -ता -तं, व्यस्तः -स्ता -स्तं, सुव्यस्तः -स्ता -स्तं, बहुधागतः -ता -तं, विधूतः -ता -तं, विनिर्धूतः -ता -तं, विभिन्नः -न्ना -न्नं, विच्छन्नः -न्ना -न्नं, प्रमृतः -ता -तं, प्रवृद्धः -द्धा -द्धं.

DISPERSEDLY, *adv.* विद्रुतं, असंहतं, सुव्यस्तं, सुविस्तरं, बहुधा, पृथक्.

DISPERSER, *s.* विद्रावयिता *m.* (तृ), विकिरणकृत्; 'a disperser of doubt,' संशयोच्छेदकः; also expressed by नुदः, घ्नः, घातौ *m.* (न्), अपहः, नाशकः, हरः, हारी *m.* (न्), अनकः in comp.

DISPERSION, *s.* विद्रावणं, विक्षेपः -पणं, परिक्षेपः, विकिरः -रणं, प्रसारणं, विसारणं, विभेदः, बहुधागमनं.

To DISPIRIT, *v. a.* उत्साहं or मनो भञ्ज् (c. 7. भनक्ति, भंक्तुं), उत्साहभङ्गं कृ, साहसभङ्गं कृ, आशाभङ्गं कृ, मनोभङ्गं कृ, विषद् in caus. (-पादयति -यितुं), विषण्णीकृ, तेजो हृ (c. 1. हरति, हर्त्तुं), म्लानीकृ, खिद् in caus. (खेदयति -यितुं).

DISPIRITED, *p. p.* भग्नोत्साहः -हा -हं, भग्नमनाः -नाः -नः (स्), भग्नसाहसः -सा -सं, विषण्णः -ण्णा -ण्णं, निरुत्साहः -हा -हं, म्लानतेजाः -जाः -जः (स्) or निस्तेजाः, दीनमनस्कः -स्का -स्कं, दीनचेतनः -ना -नं, खिन्नः -न्ना -न्नं.

To DISPLACE, *v. a.* (Move out of place) स्वस्थानाद् विचल् in caus. (-चालयति -यितुं) or चल् in caus. or अपसृ in caus. (-सारयति -यितुं) or निःसृ in caus. or निरस् (c. 4. -अस्यति -असितुं) or अपनुद् (c. 6. -नुदति -नोत्तुं) or निराकृ or व्यपोह् (c. 1. -ऊहते -हितुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं), स्थानान्तरीकृ.—(Remove from office) पदात् or अधिकाराद् भंश् in caus. (-भंशयति -यितुं) or च्यु in caus. (-आवयति -यितुं) or निराकृ.

DISPLACED, *p. p.* स्थानभ्रष्टः -ष्टा -ष्टं, स्थानच्युतः -ता -तं, पदनिराकृतः -ता -तं.

DISPLACING, *s.* स्वस्थानाद् अपसारणं or अपनुत्तिः *f.*, or निरसनं or निराकरणं.

To DISPLANT, *v. a.* (Remove a plant) उन्मूल् (c. 10. -मूलयति -यितुं), उत्पद् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं).—(Eject a people) निर्वस् in caus. (-वासयति -यितुं), विवस्, वासस्थानाद् निरस् (c. 4. -अस्यति -असितुं).

To DISPLAY, *v. a.* (Spread wide) विस्तॄ in caus. (-स्तारयति -यितुं), परिस्तॄ, विकाश् in caus. (-काशयति -यितुं), वितन् (c. 8. -तनोति -नितुं), प्रसृ in caus. (-सारयति -यितुं), प्रपञ्च् (c. 10. -पञ्चयति -यितुं).—(Exhibit) प्रकाश् in caus., दृश् in caus. (दर्शयति -यितुं), प्रत्यक्षीकृ, व्यक्तीकृ, प्रकटीकृ, स्पष्टीकृ, स्फुटीकृ, व्यञ्ज् (c. 7. -अनक्ति c. 10. -अञ्जयति -यितुं), विवृ (c. 5. -वृणोति -वरितुं -रीतुं), आविष्कृ, प्रादुष्कृ, प्रकट (nom. प्रकटयति -यितुं).—(Exhibit ostentatiously) सगर्व्वं or सदम्भं दृश् in caus.

DISPLAY, *s.* प्रकाशनं, विकाशनं, दर्शनं, प्रपञ्चः, प्रत्यक्षीकरणं, प्रकाशीकरणं, प्रकटीकरणं, व्यञ्जनं, व्यक्तिः *f.*, विवरणं, प्रादुष्करणं, आविष्करणं.

DISPLAYED, *p. p.* प्रकाशितः -ता -तं, प्रकाशीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रत्यक्षीकृतः -ता -तं, दर्शितः -ता -तं, विवृतः -ता -तं, व्यक्तीकृतः -ता -तं.

To DISPLEASE, *v. a.* (Offend any one) कस्यापि विप्रियं or अप्रियं or व्यलीकं कृ, असन्तोषं or अतुष्टिं जन् (c. 10. जनयति -यितुं), वितुष् in caus. (-तोषयति -यितुं), रोषम् उत्पद् in caus. (-पादयति -यितुं), कुप् in caus. (कोपयति -यितुं), रुष् in caus. (रोषयति -यितुं), अपराध् (c. 4. -राध्यति c. 5. -राध्नोति -राद्धुं).

DISPLEASED, *p. p.* वितुष्टः -ष्टा -ष्टं, असन्तुष्टः -ष्टा -ष्टं, अप्रसन्नः -न्ना -न्नं, कृतरुषः -षा -षं, रुष्टः -ष्टा -ष्टं, परिकोपितः -ता -तं, कुपितः -ता -तं, कृतव्यलीकः -का -कं, कृतमन्युः -न्युः -न्यु, आगतमन्युः -न्युः -न्यु, जातामर्षः -र्षा -र्षं.

DISPLEASING, *a.* अप्रियः -या -यं, विप्रियः -या -यं, व्यलीकः -का -कं, विरुद्धः -द्धा -द्धं, अतुष्टिकरः -री -रं, अप्रसादजनकः -का -कं, अप्रीतिकरः -री -रं, अमुखावहः -हा -हं.

DISPLEASURE, *s.* (Offence, anger) अतुष्टिः *f.*, असन्तोषः, अप्रीतिः *f.*, अप्रसादः, कोपः, रोषः, मन्युः *m.*, क्रोधः, अमर्षः.—(Pain) दुःखं, असुखं, उद्वेगः.

To DISPLODE, *v. a.* महाशब्दपूर्व्वं स्फुट् in caus. (स्फोटयति -यितुं) or विदृ in caus. (-दारयति -यितुं).

DISPLOSION, *s.* महाशब्दपूर्व्वं स्फोटनं or विदारणं, अकस्माद् भञ्जनं.

DISPORT, *s.* क्रीडा, विहारः, केलिः *m. f.*, देवनं, विलासः, विलसितं, खेला.

To DISPORT, *v. a.* विनुद् in caus. (-नोदयति -यितुं); 'disport one's self,' विहृ (c. 1. -हरति -हर्त्तुं), विलस् (c. 1. -लसति -सितुं), क्रीड् (c. 1. क्रीडति -डितुं), दिव् (c. 4. दीव्यति, देवितुं), खेला (nom. खेलायति -यितुं).

DISPOSAL, DISPOSE, *s.* (Orderly arrangement) विन्यासः, व्यूहनं, व्यूढिः *f.*, प्रतिविधानं, संविधानं, विधानं, रचना, विरचनं, व्यवस्थापनं, व्यवस्थितिः *f.*, क्रमेण or यथाक्रमं स्थापनं, पर्य्यायः, परिपाटिः *f.*—(Regulation) विनियमः, नियमकरणं.—(Distribution) परिकल्पनं, कल्पना, कॢप्तिः *f.*, परिनिर्व्वपणं, प्रविभागः, वण्टनं.—(Bestowing) विनियोगः, वितरणं, परहस्ते समर्पणं.—(Power of distribution, right of bestowing) परिकल्पनशक्तिः *f.*, विनियोगाधिकारः.—(Control) अधीनता, वशं, वशता, अधिकारः.—(Divine disposal) परमेश्वरेच्छा; 'all this kingdom is at your disposal,' सर्व्वम् इदं राज्यं युष्मदायत्तं; 'this is at my disposal,' इदं ममाधीनं.

To DISPOSE, *v. a.* (Employ to various purposes) विनियुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), नियुज्, प्रयुज्, उपयुज्.—(Give, bestow) दा (c. 3. ददाति, दातुं), वितॄ (c. 1. -तरति -रितुं -रीतुं), निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), समृ in caus. (-सर्पयति -यितुं), निधा (c. 3. -दधाति -धातुं).—(Turn to any particular purpose) अमुककर्म्मणि प्रयुज् or विनियुज् or उपयुज्.—(Adapt) युज् in caus. (योजयति -यितुं), नियुज्, प्रयुज्, कॢप् in caus. (कल्पयति -यितुं).—(Incline, give a propension) प्रवृत् in caus. (-वर्त्तयति -यितुं), प्रयुज् in caus., चेष्ट् in caus. (चेष्टयति -यितुं), प्रोत्सह् in caus. (-साहयति -यितुं).—(Regulate, arrange, adjust) विन्यस् (c. 4. -अस्यति -असितुं), विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा, व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), क्रमेण स्था in caus. (स्थापयति -यितुं), परिकॢप्.

To DISPOSE OF, *v. a.* (Apply to any purpose) प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विनियुज्, नियुज्, उपयुज्.—(Transfer to any other person, sell to another) परहस्ते समृ in caus. (-सर्पयति -यितुं), विक्री (c. 9. -क्रीणीते -क्रेतुं); 'to dispose of one's daughter in

marriage,' कन्यादानं कृ, दारिकादानं कृ, दुहितरं दा.

DISPOSED, *p. p.* (Arranged, regulated) विन्यस्तः -स्ता -स्तं, प्रतिविहितः -ता -तं, विहितः -ता -तं, व्यूढः -ढा -ढं, व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, परिपाटीकृतः -ता -तं.—(Inclined) प्रवर्त्तितः -ता -तं, प्रयोजितः -ता -तं; 'disposed to take,' गृह्यालुः -लुः -लु, ग्रहीता -त्री -तृ; 'disposed to fall,' पतयालुः -लुः -लु, पिपतिषुः -षुः -षु; or expressed by शील affixed; as, पतनशीलः -ला -लं.

DISPOSER, *s.* (Distributer, bestower) परिकल्पकः, दाता *m.* (तृ), प्रदाता, विनियोगकृत्.—(Regulator, director) विधाता *m.* (तृ), विनियन्ता *m.* (न्तृ), अधिष्ठाता *m.* (तृ).

DISPOSITION, *s.* (Orderly arrangement) विन्यासः, व्यूहनं, व्यूढिः *f.* प्रतिविधानं, विधानं, संविधानं, विरचनं, व्यवस्थापनं, पर्य्यायः, क्रमेण स्थापनं.—(Temper, natural state) भावः, स्वभावः, शीलः, शीलता -त्वं, प्रकृतिः *f.*, अन्तःकरणं; 'good disposition,' सद्भावः, साधुशीलत्वं; 'bad disposition,' असद्भावः; 'an easy contented disposition,' सुखिस्वभावः; 'of a virtuous disposition,' साधुशीलः, पुण्यशीलः, सत्वशीलः; 'disposition of body,' देहस्वभावः.—(Inclination, tendency) प्रावण्यं, प्रवृत्तिः *f.*, प्रवाहः, or expressed by शीलता -त्वं or आलुता -त्वं affixed; as, 'disposition to fall,' पतनशीलता or पतयालुत्वं.

To DISPOSSESS, *v. a.* अधिकारात् or स्वत्वाद् भ्रंश् (c. 10. भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or पत् in caus. (पातयति -यितुं) or निराकृ, अधिकारं or स्वत्वं हृ (c. 1. हरति, हर्त्तुं) or अपहृ.

DISPOSSESSED, *p. p.* भ्रंशितः -ता -तं, निराकृतः -ता -तं, बहिष्कृतः -ता -तं; 'dispossessed of one's right,' हृताधिकारः -रा -रं, अधिकारभ्रष्टः -ष्टा -ष्टं.

DISPOSURE, *s.* (Disposal, power) शक्तिः *f.*, अधिकारः, परिकल्पनशक्तिः *f.*, विनियोगशक्तिः *f.*—(Posture) स्थितिः *f.*, भूमिः *f.*

DISPRAISE, *s.* निन्दा, अपवादः, अप्रशंसा, तिरस्कारः, उपालम्भः, अयशः *n.* (स्).

To DISPRAISE, *v. a.* निन्द् (c. 1. निन्दति -न्दितुं), तिरस्कृ, उपालभ् (c. 1. -लभते -लब्धुं), न प्रशंस् (c. 1. -शंसते -सितुं), अपवद् (c. 1. -वदति -दितुं).

To DISPREAD, *v. a.* बहुधा or इतस्ततः or नानादिक्षु विस्तृ in caus. (-स्तारयति -यितुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or विद्रु in caus. (-द्रावयति -यितुं).

DISPROOF, *s.* अनिश्चयः, अनिर्णयः, अप्रामाण्यं, अप्रमाणं, अनुपपत्तिः *f.*, खण्डनं, बाधर्षणं, पक्षाघातः, निरासः, बाधः, बाधा, अधरीकरणं, अपवादः, वितण्डा, उपमर्दः.

DISPROPORTION, *s.* असाम्यं, असमता, असमानता, वैषम्यं, अतुल्यत्वं, अयोग्यता, अनुपयुक्तता, असमञ्जसं, असामञ्जस्यं.

To DISPROPORTION, *v. a.* अयुक्तं सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), असमञ्जसं संयुज् (c. 7. -युनक्ति -योक्तुं), अयोग्यसम्बन्धं कृ.

DISPROPORTIONABLE, DISPROPORTIONATE, *a.* असमः -मा -मं, अयोग्यः -ग्या -ग्यं, असमानः -ना -नं, अतुल्यः -ल्या -ल्यं, अयुक्तः -क्ता -क्तं, असमञ्जसः -ञ्जसा -ञ्जसं, अनुपयुक्तः -क्ता -क्तं, विषमः -मा -मं.

DISPROPORTIONABLENESS, DISPROPORTIONATENESS, *s.* असाम्यं, अयोग्यता, अतुल्यता.

DISPROPORTIONABLY, DISPROPORTIONATELY, *adv.* असमं, विषमं, अतुल्यं, अयोग्यं, अयोग्यतस्, अनुपयुक्तं, असमञ्जसं, असमानतस्.

To DISPROVE, *v. a.* खण्ड् (c. 10. खण्डयति -यितुं), संसूच् (c. 10. -सूचयति -यितुं), अधरीकृ, निरस् (c. 4. -अस्यति -असितुं), आधृष् (c. 10. -धर्षयति -यितुं), बाध् (c. 1. बाधते -धितुं), निराकृ, अपवद् (c. 1. -वदति -दितुं).

DISPROVED, *p. p.* खण्डितः -ता -तं, आधर्षितः -ता -तं, अधरीकृतः -ता -तं, बाधितः -ता -तं, निरस्तः -स्ता -स्तं, निराकृतः -ता -तं, प्रत्याख्यातः -ता -तं, असिद्धः -द्धा -द्धं.

DISPROVER, *s.* खण्डनकृत्, आधर्षणकृत्, वितण्डाकृत्, उपमर्दकारी *m.* (न्).

DISPUTABLE, *a.* विवदनीयः -या -यं, विचारणीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, वितर्क्यः -र्क्या -र्क्यं, वितर्कणीयः -या -यं, प्रत्याख्येयः -या -यं.

DISPUTANT, *s.* तर्की *m.* (न्), विवादी *m.* (न्), वादी *m.*, वादप्रतिवादकृत्, नैयायिकः, विचारणकर्त्ता *m.* (र्त्तृ), प्रोहः, शास्त्रविरोधदर्शी *m.* (न्).

DISPUTATION, *s.* विवादः, वादानुवादः, वादप्रतिवादः, वादः, वितण्डा, तर्कः, वाक्कलहं, वादयुद्धं, वितण्डा, विसंवादः, विरोधोक्तिः *f.* विचारः, हेतुवादः.

DISPUTATIOUS, *a.* विवादार्थी -र्थिनी -र्थि (न्), विवादी -दिनी -दि (न्), वादानुवादशीलः -ला -लं, वितण्डापरः -रा -रं, वितर्कप्रियः -या -यं.

To DISPUTE, *v. a.* and *n.* विवद् (c. 1. -वदते -दितुं), विसंवद्, वादानुवादं कृ, विप्रलप् (c. 1. -लपति -पितुं), वितण्ड् (c. 1. -तण्डते -ण्डितुं), वितण्डां कृ, वितर्क् (c. 10. -तर्कयति -यितुं), कलह (nom. कलहायते), वैर (nom. वैरायते), वाक्कलहं कृ, वाग्युद्धं कृ, व्यवक्रुश् (c. 1. -क्रोशति -क्रोष्टुं).—(In law) व्यवह् (c. 1. -हरति -हर्त्तुं), विवादास्पदीकृ.

DISPUTE, *s.* विवादः, वादानुवादः, वादप्रतिवादः, विसंवादः, विप्रलापः, वाग्युद्धं, वादयुद्धं, वाक्कलहः, वाक्कलिः *m.*, विरोधोक्तिः *f.*, वाक्यविरोधः, वितर्कः, वितण्डा, विप्रतिपत्तिः *f.*, वितण्डा, विचारः, वादः, वाक्यं, कलहः, विग्रहः, द्वैधं, सन्देहः; 'matter of dispute,' विवादास्पदं.

DISPUTED, *p. p.* विचारितः -ता -तं, सन्दिग्धः -ग्धा -ग्धं, व्याहितः -ता -तं.

DISPUTER, *s.* विवादी *m.* (न्), विवादकारी *m.* (न्), विवादकृत् *m.*, विचारकः, तर्की *m.* (न्), वादी *m.* (न्), हेतुवादी *m.* (न्), वितण्डाकारी *m.* (न्), न्यायी *m.* (न्), सांवादिकः.

DISQUALIFICATION, *s.* अयोग्यकरणं, अपात्रीकरणं, अयोग्यत्वं -ता, अयुक्तिः *f.*, विरोधः -धित्वं, असामर्थ्यं.

DISQUALIFIED, *p. p.* अयोग्यः -ग्या -ग्यं, अपात्रीकृतः -ता -तं, विरुद्धः -द्धा -द्धं.

To DISQUALIFY, *v. a.* अपात्रीकृ, अयोग्यं -ग्यां -ग्यं कृ, अनुपयुक्तं -क्तां -क्तं कृ.

DISQUIET, DISQUIETNESS, DISQUIETUDE, *s.* उद्वेगः, चित्तोद्वेगः, चित्तवेदना, व्यथा, अशान्तिः *f.*, कष्टं, मनोदुःखं, अनिवृतिः *f.*, क्लेशः, आधिः *m.*, वैक्लव्यं, मनस्तापः, उत्तापः, व्यामोहः, विडम्बना, औत्सुक्यं, मानसी व्यथा, व्यस्तता, अस्थिरता, चिन्ता.

To DISQUIET, *v. a.* व्यथ् (c. 10. व्यथयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेष्टुं), उद्विज् in caus. (-वेजयति -यितुं), व्याकुलीकृ, आकुल (nom. आकुलयति -यितुं), बाध् (c. 1. बाधते -धितुं), क्षुभ् in caus. (क्षोभयति -यितुं), मुह् in caus. (मोहयति -यितुं), व्यामुह्, विमुह्, परिमुह्.

DISQUIETED, *p. p.* उद्विग्नः -ग्ना -ग्नं, व्यग्रः -ग्रा -ग्रं, व्यथितः -ता -तं, सव्यथः -था -थं, क्लिष्टः -ष्टा -ष्टं, परिक्लिष्टः -ष्टा -ष्टं, अशान्तः -न्ता -न्तं, अनिवृतः -ता -तं, विधुरः -रा -रं, विदुरः -रा -रं, उद्भ्रान्तः -न्ता -न्तं, मोहितः -ता -तं, जातशङ्कः -ङ्का -ङ्कं.

DISQUISITION, *s.* विचारः -रणा, वितर्कः, विमर्शः, विवेचना, परीक्षा, वितण्डा.

To DISRANK, *v. a.* पदात् or अधिकाराद् भ्रंश् in caus. (भ्रंशयति -यितुं) or च्यु in caus. (च्यावयति -यितुं) or अपकृष् (c. 1. -कर्षति -क्रष्टुं).

DISREGARD, *s.* उपेक्षा, अनपेक्षा, निरपेक्षता, अनादरः, अननुष्ठानं, असेवनं, अचिन्ता, अनवधानं, परित्यागः, अवक्रिया, उपात्ययः, उत्प्रेक्षा, उड्डावनं, अदर्शनं.—(Contempt) अवज्ञा, अवमानं, अवधीरणं.

To DISREGARD, *v. a.* उपेक्ष् (c. 1. -ईक्षते -क्षितुं), समुपेक्ष्, उपप्रेक्ष्, अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), अवधीर् (c. 10. -धीरयति -यितुं), न अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), न सेव् (c. 1. सेवते -वितुं), परित्यज् (c. 1. -त्यजति -त्यक्तुं).

DISREGARDED, *p. p.* उपेक्षितः -ता -तं, अनपेक्षितः -ता -तं, समुपेक्षितः -ता -तं, अवज्ञातः -ता -तं, अवधीरितः -ता -तं, अवमतः -ता -तं, अवमानितः -ता -तं, परिभूतः -ता -तं, असेवितः -ता -तं, अवगणितः -ता -तं, उड्डावितः -ता -तं, अननुष्ठितः -ता -तं.

DISREGARDFUL, *a.* उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, निर्व्यवेक्षः -क्षा -क्षं, मन्दादरः -रा -रं, अवमानी -निनी -नि (न्), अनवधानः -ना -नं.

DISREGARDFULLY, *adv.* निरपेक्षं, अनपेक्ष्य, उपेक्षया, अवमानेन, मन्दादरं.

DISRELISH, *s.* अरुचिः *f.*, अनभिरुचिः *f.*, विरक्तिः *f.*, वैरक्त्यं, वैराग्यं, विरागः, अप्रीतिः *f.*, विप्रियता, विमतिः *f.*, विमुखता, अनिच्छा, विध्वंसः.—(Bad taste) कुस्वादः, विस्वादः.

To DISRELISH, *v. a.* न अभिमन् (c. 4. -मन्यते -मन्तुं), विद्विष् (c. 2. -द्वेष्टि -ष्टुं), अरुचिं कृ, न अभिरुच् (c. 10. -रोचयति -यितुं), or expressed by the neut. form रोचते; as, 'he disrelishes that,' तत् तस्मै न रोचते.

DISREPUTABLE, *a.* अनार्य्यः -र्य्या -र्य्यं, अपमान्यः -न्या -न्यं, अयशस्यः -स्या -स्यं, अपयशस्करः -री -रं, अकीर्त्तिकरः -री -रं, अवज्ञेयः -या -यं, अप्रतिष्ठः -ष्ठा -ष्ठं, अख्यातिजनकः -का -कं, अप्रशंसनीयः -या -यं, अभिशस्तः -स्ता -स्तं.

DISREPUTABLY, *adv.* अनार्य्यं, अनार्य्यवत्, अयशस्यं, अप्रशंसनीयं.

DISREPUTATION, DISREPUTE, *s.* अयशः *n.* (स्), अपयशः *n.*, अकीर्त्तिः *f.*, अपकीर्त्तिः *f.*, दुष्कीर्त्तिः *f.*, अख्यातिः *f.*, कुख्यातिः *f.*, अनार्य्यत्वं, वाच्यता, अप्रतिष्ठा, अमर्य्यादा, मर्य्यादाहानिः *f.*, अपमानं.

To HERD, *v. n.* पशुयूथवद् एकत्र मिल् (c. 6. मिलति, मेलितुं), यूथशः सङ्गम् (c. 1.- गच्छति -गन्तुं) or समागम् or समे (c. 2. समेति -तुं, rt. इ), एकीभू, एकत्र भू, एकीभावीभू, समूहीभू, सङ्कुलीभू.

HERDSMAN, *s.* गोपालः, पशुपालः, गोरक्षः -क्षकः, पशुरक्षी *m.* (न्), गोचारकः, यूथपतिः *m.*, गोपः, गोसंख्यः; 'his business,' पाशुपाल्यं, पशुपालनं, पशुरक्षणं; 'herdsman's wife,' गोपी.

HERE, *adv.* (In this place) अत्र, इह, इहस्थाने, अस्मिन् देशे.—(In this world) इह, इहलोके, इहकाले; 'in this world and the next,' इहामुत्र; 'on this occasion,' इहसमये; 'here am I,' सोऽहं, एषोऽस्मि; 'here we are,' इमे स्मः; 'here and there,' इतस्ततस्, इतश्चेतस्. प्रतिदेशं.

HEREABOUTS, *adv.* अत्र, इह, इहसमीपे, इहस्थानसमीपे, अत्रोपान्ते, अत्रान्तिके, इहस्थानोपान्ते.

HEREAFTER, *adv.* अतःपरं, अत ऊर्द्धं, ततः परं, इतःपरं, परं, परम्, परतस्, अपरं, अनन्तरं, एतदनन्तरं, तदनन्तरं, परस्तात्, पश्चात्, तत्पश्चात्, एतत्पश्चात्, उत्तरतस्, उत्तरत्र, परकाले, अपरकाले, अतस्, ततस्, पुरा; 'in the next world,' परत्र, अमुत्र, प्रेत्य, परलोके; 'in the sequel,' अग्रे.

HEREAFTER, *s.* परकालः, अपरकालः, उत्तरकालः, भविष्यत्कालः, भाविकालः, आगामिकालः.

HEREAT, *adv.* अतस्, ततस्, तदनन्तरं, अत्रान्तरे.

HEREBY, *adv.* तेन, एतेन, तद्द्वारा, तद्द्वारेण, तस्मात्.

HEREDITAMENT, *s.* दायः, पैतृकं रिक्थं, गोत्ररिक्थं, अधिकारः.

HEREDITARILY, *adv.* पारम्पर्य्येण, क्रमागतेन, वंशक्रमेण, परम्परतस्, परम्परं.

HEREDITARY, *a.* परम्परीणः -णा -णं, पारम्परीयः -या -यं, परम्परः -रा -रं, परम्परागतः -ता -तं, क्रमागतः -ता -तं, क्रमायातः -ता -तं, पैतृकः -की -कं, कौलिकः -की -कं, कुलजः -जा -जं, परम्परप्राप्तः -प्ता -प्तं.—(As disease) सञ्चारी -रिणी -रि (न्), शुक्रशोणितद्वारेणानुप्रविशन् -शन्ती -शत् (त्); 'hereditary estate,' पैतृकभूमिः *f.*, वंशभोज्यं; 'hereditary succession,' क्रमागतत्वं; 'hereditary servant,' मूलभृत्यः.

HEREFROM, *adv.* अतस्, अतःकारणात्, तस्मात्, अस्य हेतोः.

HEREIN, *adv.* अत्र, इह, इहविषये, अस्मिन् विषये, अस्मिन् अर्थे.

HEREON, *adv.* अत्रोपरि, तत्रोपरि, अतस्, अत्रान्तरे.

HERESIARCH, *s.* विधर्म्मनायकः, वैधर्म्यपतिः *m.*, स्वधर्म्मपरित्यागं कारयित्वा परधर्म्मावलम्बनं कारयति यो जनः, धर्म्मत्यागप्रवर्त्तकः.

HERESY, *s.* विधर्म्मः, वैधर्म्यं, उपधर्म्मः, विधर्म्मसेवा, अपथः, विपथः, अपथगमनं, मिथ्यादृष्टिः *f.*, कुदृष्टिः *f.*, स्वधर्म्मपरित्यागपूर्व्वं परधर्म्मावलम्बनं or परधर्म्माश्रयः or परमतग्रहणं or मतान्तरप्रवेशः, नास्तिक्यं, नास्तिकता, देवनिन्दा, असच्छास्त्रानुष्ठानं.

HERETIC, *s.* पाषण्डः -ण्डकः -ण्डी *m.* (न्), अपथगामी *m.* (न्), अपथवर्त्ती *m.* (न्), विधर्म्मसेवी *m.* (न्), उपधर्म्मसेवी *m.*, उपधर्म्मः, विधर्म्मावलम्बी *m.* (न्), परधर्म्मावलम्बी *m.*, स्वधर्म्मभ्रष्टः, स्वधर्म्मच्युतः, मतान्तरावलम्बी *m.*, नास्तिकः, देवनिन्दकः, वृषिः *m.*

HERETICAL, *a.* वैधर्म्मिकः -की -कं, पाषण्डधर्म्मी -र्म्मा -र्म्म (न्), अपथगामी -मिनी -मि (न्), विपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), धर्म्मविरुद्धः -द्धा -द्धं.

HERETICALLY, *adv.* पाषण्डवत्, नास्तिकवत्, धर्म्मविरुद्धं, देवनिन्दकवत्.

HERETOFORE, *adv.* पूर्व्वं, पूर्व्वे, पूर्व्वकाले, प्राक्काले, पूर्व्वतस्, पुरा, प्राक्, भूतकाले, अतीतकाले, गतकाले, वर्त्तमानकालात् पूर्व्वं, इहसमयात् पूर्व्वं, इतःप्राक्.

HEREUPON, *adv.* अतस्, ततस्, अत्रोपरि, तत्रोपरि, अत्रान्तरे.

HEREWITH, *adv.* अनेन सह, एतेन सह, तेन सह, एतत्सहितं, एतेन समं.

HERIOT, *s.* भूस्वामिने देयो दण्डः or शुल्कविशेषः.

HERIOTABLE, *a.* पूर्व्वोक्तशुल्काधीनः -ना -नं.

HERITABLE, *a.* पितृप्राप्यः -प्या -प्यं, औद्धारिकः -की -कं, दायायोग्यः -ग्या -ग्यं.

HERITAGE, *s.* पैतृकधनं, पैतृकं रिक्थं, अधिकारः, पैतृकाधिकारः, दायः,

दायत्वं, गोत्ररिक्थं, पैतृकं, औद्धारिकं.

HERMAPHRODITE, *s.* षण्ढः, शण्ढः, पण्डः, क्लीवः, अर्द्धेन पुरुषोऽर्द्धेन स्त्री.

HERMETICAL, *a.* रसायनीयः -या -यं, रसायनजः -जा -जं.

HERMETICALLY, *adv.* रसायनानुसारात्, रसायनरीत्यनुसारेण.—(Closely) सुदृढं, अतिदृढं, सुगाढं.

HERMIT, *s.* अरण्यवासी *m.* (न्), वनवासी *m.* (न्), वनस्थायी *m.* (न्), वनस्थः, वानप्रस्थः, योगी *m.* (न्), यती *m.* (न्), तपस्वी *m.* (न्), मुनिः *m.*, सन्न्यासी *m.* (न्), यतिः *m.*, वैखानसः, वनी *m.* (न्), उदासीनः, संसारत्यागी *m.* (न्), लोकत्यागी *m.*

HERMITAGE, *s.* आश्रमः, मुनिवासः, मुनिस्थानं, अरण्यवासः, पर्णशाला.

HERNIA, *s.* अन्त्रवृद्धिः *f.*, अन्त्रवृद्धिरोगः; 'umbilical hernia,' नाभिवर्द्धनः, नाभिगुडकः, नाभिगोलकः.

HERO, *s.* वीरः, शूरः, विक्रान्तः, महावीरः, प्रवीरः, दृढायुधः, युद्धवीरः, भटः, सुभटः, महौजाः *m.* (स्), औजसिकः, अतिरथः, रथी *m.* (न्), रथारोही *m.* (न्), युयुत्सुः *m.*, प्रयुत्सुः *m.*, शौटीरः, गण्डीरः, जेता *m.* (तृ), दमनः, चारभटः, वागरः, पत्तिः *m.*, त्यागी *m.* (न्), जजः.—(Of a drama, &c.) नायकः.

HEROIC, HEROICAL, *a.* वीर्य्यवान् -वती -वत् (त्), महावीर्य्यः -र्य्या -र्य्यं, वीरः -रा -रं, शूरः -रा -रं, प्रवीरः -रा -रं, विक्रान्तः -न्ता -न्तं, पराक्रान्तः -न्ता -न्तं, शौर्य्यवान् -वती -वत् (त्), शूरयोग्यः -ग्या -ग्यं, धामवान् &c., साहसिकः -की -कं; 'heroic poem,' वीरचरित्रविषयं काव्यं.

HEROICALLY, *adv.* शूरवत्, वीरवत्, सवीर्य्यं, महावीर्य्येण, शौर्य्येण, सशौर्य्यं, सपराक्रमं, सविक्रमं.

HEROINE, *s.* वीरा, शूरा, विक्रान्ता स्त्री, पराक्रान्ता स्त्री, वीर्य्यवती.—(Of a poem, &c.) नायिका, दिव्यादिव्या.

HEROISM, *s.* वीर्य्यं, शौर्य्यं, वीरत्वं, सुवीर्य्यं, शूरत्वं -ता, प्रवीरत्वं, विक्रमः, सुविक्रमः, पराक्रमः, वीर्य्यवत्त्वं, धाम *n.* (न्), वीरश्रीः *f.*, शौटीर्य्यं, शुटीर्य्यं, प्राधानिकं, प्राधान्यं, पौरुषं, साहसं, रणोत्साहः, जजौजस् *n.*, उत्साहवर्धनः, वीरः.

HERON, *s.* क्रौञ्चः, कङ्कः, कङ्कपक्षी *m.* (न्), वकः, दीर्घपाद् *m.*, आमिषप्रियः, लोहपृष्ठः, मत्स्याहारी *m.* (न्), प्रेयोपत्यः.

HERRING, *s.* हेरिङ्गनामा समुद्रीयमत्स्यभेदः.

HERS, *pron.* तस्याः gen. c. (तद्), अस्याः gen. c. (इदं), तदीयः -या -यं, or expressed by स्व in comp.

HERSELF, *pron.* सा एषा.

HESITANCY, *s.* सन्देहः, संशयः, विकल्पः, शङ्का, आशङ्का, चित्तास्थैर्य्यं, चलचित्तता.

To HESITATE, *v. n.* विकल्प् (c. 1. -कल्पते -ल्पितुं, c. 10. -कल्पयति -यितुं), शङ्क् (c. 1. शङ्कते -ङ्कितुं), अभिशङ्क्, आशङ्क्, विशङ्क्, परिशङ्क्, विलस् (c. 1. -लसते -सितुं), विचर् (c. 10. -चारयति -यितुं), मनसा दोल् (nom. दोलायते -यितुं) or आन्दोल् (आन्दोलयति -यितुं), चिर (nom. चिरायति -ते, चिरयति -यितुं), सन्देहं कृ.

HESITATION, *s.* विकल्पः, शङ्का, सन्देहः, संशयः, आशङ्का, विकल्पितं, विचारणं, वितर्कः, चिन्ता, विशयः, द्वैधं, विचिकित्सा.—(In speaking) स्वरभेदः, स्वरभङ्गः, वाक्यस्खलनं, स्खलद्वाक्यं, गद्गदवाक् *f.*, गद्गदपदं, अस्पष्टवचनं; 'having a hesitation in the speech,' स्खलितवाक् *m. f. n.* (च्), स्खलितवाक्यः -क्या -क्यं, स्खलद्वाक्यः -क्या -क्यं, भिन्नस्वरः -रा -रं, भग्नस्वरः -रा -रं.

HETEROCLITE, *a.* भिन्नविभक्तिः -क्तिः -क्ति, साधारणनियमबहिर्भूतः -ता -तं, विधिनिपातितः -ता -तं, साधारणविधिविपरीतः -ता -तं.

HETERODOX, *a.* विधर्म्मी -र्म्मिणी -र्म्मि (न्), वैधर्म्मिकः -की -कं, धर्म्मविपरीतः -ता -तं, धर्म्मविरुद्धः -द्धा -द्धं, सच्छास्त्रविरुद्धः -द्धा -द्धं, सत्पथविपरीतः -ता -तं, भिन्नधर्म्मा -र्म्मा -र्म्म (न्), भिन्नमतः -ता -तं, अशास्त्रीयः -या -यं, अवैधः -धी -धं, अपथगामी -मिनी -मि (न्), विपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), वृषिणः -णिः -णि.

HETERODOXY, *s.* कुदृष्टिः *f.*, मिथ्यादृष्टिः *f.*, कुपथः, विपथः, अपथः, कापथः, विधर्म्मः, असच्छास्त्रं.

HETEROGENEITY, *s.* विजातीयता, जातिभेदः, गुणविभिन्नता, वैवर्ण्यं, वैविध्यं.

HETEROGENEOUS, *a.* विजातीयः -या -यं, भिन्नजातीयः -या -यं, विविधः -धा -धं, नानाविधः -धा -धं, पृथग्विधः -धा -धं, विवर्णः -र्णा -र्णं.

To HEW, *v. a.* छिद् (c. 7. छिनत्ति, छेत्तुं), अवछिद्, कृत् (c. 6. कृन्तति, कर्त्तितुं), निकृत्, विकृत्, लू (c. 9. लुनाति, लवितुं), विशस् (c. 1. -शसति -सितुं); 'to hew in pieces,' खण्डं खण्डं छिद्, खण्डशः कृ or छिद्.

HEWED, *p. p.* छिन्नः -न्ना -न्नं, छिद्यमानः -ना -नं, छिन्नभिन्नः -न्ना -न्नं, व्यवछिन्नः -न्ना -न्नं, विशसितः -ता -तं, खनितः -ता -तं.

HEWER, *s.* छेत्ता *m.* (तृ), छेदी *m.* (न्), छेदकरः, विशसिता *m.* (तृ), छिद् in comp.; 'hewer of wood,' वनछिद्, काष्ठछिद् *m.*

HEXAGON, *s.* षट्कोणं -णः, षड्भुजः, षडस्रं -स्री, षट्कोणा मूर्त्तिः.

HEXAGONAL, *a.* षड्भुजः -जा -जं, षट्कोणः -णा -णं, षडस्रः -स्रा -स्रं.

HEXAMETER, *s.* षट्पदी श्लोकः, षट्पदविशिष्टः श्लोकः.

HEY, *interj.* किं, किमुत, किंस्वित्, ननु, स्वित, अहो, आहा, हा.

HEYDAY, *interj.* हा, हाहा, आहा, अहो, अ, अहह.

HEYDAY, *s.* (Joy, hilarity) उल्लसता, परिहासः, हासिका, मुदा; 'heyday of youth,' यौवनप्रौढिः *f.*, अक्षतयौवनं, नवयौवनं.

HIATUS, *s.* विच्छेदः, छेदः, छिद्रं, भेदः, भङ्गः, अन्तरं.

HIBERNAL, *a.* हैमनः -नी -नं -निकः -की -कं, हैमनः -नी -नं, शीतकालसम्बन्धी -न्धिनी -न्धि (न्).

HICCOUGH OR HICCUP, *s.* हेक्का, हिक्का, प्राणन्ती, श्वासकाशः, हृल्लासः, यमला, गम्भीरा, अनुबन्धी.

To HICCOUGH OR HICCUP, *v. n.* हिक्क् (c. 1. हिक्कति -ते -क्कितुं), हेक्कां कृ, हिक्कां कृ.

HID, HIDDEN, *p. p.* गुप्तः -प्ता -प्तं, गूढः -ढा -ढं, निगूढः -ढा -ढं, छन्नः -न्ना -न्नं, प्रच्छन्नः -न्ना -न्नं, छादितः -ता -तं, अन्तर्हितः -ता -तं, अन्तरितः -ता -तं, अपवारितः -ता -तं, निवारितः -ता -तं, निभृतः -ता -तं, स्थगितः -ता -तं, संवृतः -ता -तं, तिरोहितः -ता -तं, तिरस्कृतः -ता -तं; 'to be hidden,' गुह् in pass. (गुह्यते), गुप् in pass. (गुप्यते), तिरस्कृ in pass. (-क्रियते), रहस् (nom. रहायते); 'hidden behind the bushes,' विटपान्तरितः -ता -तं.

To HIDE, *v. a.* गुह् (c. 1. गूहति -ते, गूहितुं, गोढुं), निगुह्, विनिगुह्, छद् (c. 10. छादयति -यितुं), अवछद्, समाछद्, प्रछद्, प्रतिछद्, सञ्छद्, गुप् (c. 1. गोपायति, गोप्तुं or in des. जुगुप्सते -प्सितुं), स्थग् (c. 10. स्थगयति -यितुं), अन्तर्धा (c. 3. -दधाति -धातुं), तिरोधा, अपिधा, पिधा, उपनिधा, अपवृ (c. 10. -वारयति -यितुं), संवृ, गोपनं कृ, निह्नु (c. 2. -ह्नुते -ह्नोतुं).

To HIDE, *v. n.* गुप्तः -प्ता -प्तं भू, अन्तरितः -ता -तं भू, गुप् in pass. (गुप्यते), तिरस्कृ in pass. (-क्रियते); 'he hides behind the bushes,' विटपान्तरितो भवति.

HIDE, *s.* (Skin of an animal) चर्म्म *n.* (न्), अजिनं, दृतिः *m.*, कृत्तिः *f.*, त्वक् *f.* (च्), पशुत्वक् *f.*, पशुचर्म्म *n.* (न्), पशुलोम *n.* (न्).

HIDE-AND-SEEK, *s.* बालानां क्रीडाविशेषो यत्र एकतमे गुप्तशरीरे सति तदन्वेषणार्थं बालकगण इतस्ततो धावति.

HIDE-BOUND, *a.* (Niggardly) दृढमुष्टिः -ष्टिः -ष्टि, गाढमुष्टिः -ष्टिः -ष्टि, स्वल्पव्ययी -यिनी -यि (न्), कृपणः -णा -णं.—(Harsh, untractable) कर्कशः -शा -शं, कठिनः -ना -नं, प्रतीपः -पा -पं, अवश्यः -श्या -श्यं.

HIDEOUS, *a.* करालवदनः -ना -नं, करालमुखः -खी -खं, करालाननः -ना -नं, कराल: -ला -लं, उग्रदर्शनः -ना -नं, उग्रम्पश्यः -श्या -श्यं, भीमदर्शनः -ना -नं, घोरदर्शनः -ना -नं, घोराकृतिः -तिः -ति, घोररूपः -पी -पं, रौद्रदर्शनः -ना -नं, कुत्सितः -ता -तं, दुर्दर्शनः -ना -नं, कुरूपः -पी -पं, कदाकारः -रा -रं.

HIDEOUSLY, *adv.* सकरालवदनं, घोररूपेण, उग्ररूपेण, उग्रं.

HIDEOUSNESS, *s.* करालता, उग्रता, घोरत्वं, रौद्रता, कुत्सितत्वं.

HIDER, *s.* गोपनकर्त्ता *m.* (र्त्तृ), गोपः -पकः, गोप्ता *m.* (प्तृ), छादयिता *m.* (तृ).

HIDING, *s.* गोपनं, गुप्तिः *f.*, सङ्गोपनं, छादनं, प्रच्छादनं, अन्तर्धानं, तिरोधानं, स्थगनं, अपवारणं, अपिधानं, पिधानं.

HIDING-PLACE, *s.* गुप्तिः *f.*, गुप्तिस्थानं, निभृतस्थानं, गूढस्थानं.

To HIE, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सत्वर्, सत्वरं गम् (c. 1. गच्छति, गन्तुं) or आश्रि (c. 1. -श्रयति -ते -श्रयितुं), अभिश्रि, संश्रि.

HIERARCH, *s.* पौरोहितवर्गाधिपतिः *m.*, आचार्य्यवर्गाधिपतिः *m.*, पुरोहितगणपतिः *m.*, पुरोहितेश्वरः.

HIERARCHICAL, *a.* पुरोहिताधिपत्यसम्बन्धी -न्धिनी -न्धि (न्), पुरोहिताधिकारसम्बन्धी &c.

HIERARCHY, *s.* पुरोहिताधिपत्यं, पुरोहिताधिकारः, आचार्य्याधिपत्यं, धर्म्माध्यापकैश्वर्य्यं.

HIEROGLYPHIC, *s.* गूढाक्षरं, निगूढाक्षरं, बीजाक्षरं, गूढवर्णः, शब्दसूचकं निगूढचिह्नं.

HIEROGLYPHICAL, *a.* गूढाक्षरसम्बन्धी -न्धिनी -न्धि (न्), गूढाक्षरीयः -या -यं.

HIEROPHANT, *s.* महापुरोहितः, महायाजकः, महागुरुः *m.*, आचार्य्यः.

To HIGGLE, *v. n.* (Chaffer) पण् (c. 1. पणते -णितुं or पणायति -यितुं), पणं कृ, पणीकृ, तुच्छप्रकारेण क्रयविक्रयं कृ, क्षुद्रवाणिज्यं कृ.—(Hang back in bargaining) नैतावद् दित्सामीति क्रयसमये विलस् (c. 1. -लसते -सितुं).

HIGGLEDY-PIGGLEDY, *adv.* अस्तव्यस्तः -स्ता -स्तं, अधरोत्तरः -रा -रं, क्षिप्तविक्षिप्तः -प्ता -प्तं, आदिपश्चात्.

HIGGLER, *s.* क्षुद्रवाणिज्यकारी *m.* (न्), क्षुद्रवणिक् *m.* (ज्), दरिद्रमार्गवाहः.

HIGH, *a.* (Lofty) उच्चः -च्चा -च्चं, उन्नतः -ता -तं, उच्छ्रितः -ता -तं, समुन्नतः -ता -तं, समुच्छ्रितः -ता -तं, अभ्युच्छ्रितः -ता -तं, सोच्छ्रायः -या -यं, उच्छ्रायी -यिणी -यि (न्), प्रांशुः -शुः -शु, तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः -ङ्गा -ङ्गं, उदग्रः -ग्रा -ग्रं, उन्नतः -ता -तं, उन्नसः -सा -सं, ऊर्द्धः -र्द्धा -र्द्धं, उत्तरः -रा -रं, उत्तमः -मा -मं, दीर्घः -र्घा -र्घं; 'a high tree,' उच्चतरुः *m.*, दीर्घतरुः.—(Elevated in rank) उत्कृष्टः -ष्टा -ष्टं, उत्कृष्टपदस्थः -स्था -स्थं, प्रतिपत्तिमान् -मती -मत् (त्), उत्तमपदस्थः -स्था -स्थं, अनवमः -मा -मं, अनीचः -चा -चं.—(Noble, of high family) महाकुलः -ला -लं -लीनः -ना -नं.—(Haughty) गर्व्वी -र्व्विणी -र्व्वि (न्), गर्व्वोद्धतः -ता -तं, उन्नतचेताः -ताः -तः (स्), उन्नद्धचेताः &c., उद्धतः -ता -तं, समुद्धतः -ता -तं, उत्सिक्तः -क्ता -क्तं.—(Capital, great, chief) उत्तमः -मा -मं, परमः -मा -मं, मुख्यः -ख्या -ख्यं, श्रेष्ठः -ष्ठा -ष्ठं, प्रधान in comp., महा in comp.—(As sound) उदात्तः -त्ता -त्तं, उच्चालः -ला -लं, कलोच्चालः -ला -लं; 'a high tone,' उदात्तः, उच्चस्वरः, तारः; 'in a high tone,' उदात्तस्वरेण, उच्चैःस्वरेण; 'high and low,' उच्चनीचः -च्ची -चं, उत्कृष्टापकृष्टः -ष्टा -ष्टं, उत्तराधरः -रा -रं, उच्चावचः -चा -चं, उन्नतानतः -ता -तं, निम्नोन्नतः -ता -तं; 'the high and low,' उच्चनीचौ *m.* du., उत्कृष्टापकृष्टौ *m.* du.; 'very high,' अत्युच्चः -च्चा -च्चं; 'higher and higher,' उत्तरोत्तरं; 'highest,' उत्तमः -मा -मं, परमः -मा -मं; 'a high price,' दुर्मूल्यं; 'a high wind,' प्रबलवायुः *m.*, प्रचण्डवायुः, अतिवातः; 'high ground,' उन्नतभूभागः; 'as high as an elephant,' गजद्वयसः -सी -सं, गजमात्रः -त्री -त्रं, गजदघ्नः -घ्नी -घ्नं, गजपरिमाणः -णा -णं.

HIGH, *adv.* उच्चैस्, उच्चकैस्, उच्चैस्तमां, उच्चं; 'on high,' ऊर्द्धं, ऊर्द्ध्वं, उपरि; 'from on high,' उपरिष्टात्; 'to carry one's self high,' दृप् (c. 4. दृप्यति, दृप्तुं).

HIGH-BIRTH, *s.* कुलोत्कर्षः, कुलौत्कर्षं, कुलीनता, अभिजातता, आभिजात्यं.

HIGH-BLEST, *a.* अतिपुण्यवान् -वती -वत् (त्), अतिधन्यः -न्या -न्यं, महाभागः -गा -गं, परमसुखी -खिनी -खि (न्), सौभाग्यवान् &c.

HIGH-BLOWN, *a.* अत्याध्मातः -ता -तं, अतिस्फीतः -ता -तं, अत्युच्छूनः -ना -नं.

HIGH-BORN, *a.* महाकुलजः -जा -जं, महाकुलप्रसूतः -ता -तं, सत्कुलजातः -ता -तं, सत्कुलीनः -ना -नं, कुलीनः -ना -नं, विशुद्धकुलभवः -वा -वं, श्रेष्ठकुलोद्भूतः -ता -तं, कुलश्रेष्ठी -ष्ठिनी -ष्ठि (न्), सद्वंशः -शा -शं, सद्वंशजातः -ता -तं, प्रधानवंशोद्भवः -वा -वं, महावंशीयः -या -यं, उत्तमवंशजातः -ता -तं, अभिजातः -ता -तं, अभिजनवान् -वती -वत् (त्).

HIGH-BUILT, *a.* उच्चैर्निर्म्मितः -ता -तं, उच्छ्रायी -यिणी -यि (न्).

HIGH-COLOURED, *a.* अतिरागी -गिणी -गि (न्), अतिरञ्जितः -ता -तं.

HIGH-DAY, *s.* उत्सवदिनं, उद्धर्षदिनं, शुभदिनं, पर्व्वाहः, सुदिनं.

HIGH-FED, *a.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः -ष्टा -ष्टं, हृष्टपुष्टः -ष्टा -ष्टं.

HIGH-FLOWN, *a.* अतिगर्व्वितः -ता -तं, महागर्व्वी -र्व्विणी -र्व्वि (न्), स्फीतः -ता -तं.

HIGH-FLYING, *a.* अपरिमितः -ता -तं, अतिक्रान्तमर्य्यादः -दा -दं.

HIGH-HEAPED, *a.* अतिसञ्चितः -ता -तं, अत्याचितः -ता -तं, महाराशीभूतः -ता -तं.

HIGH-HUNG, *a.* ऊर्द्ध्वबद्धः -द्धा -द्धं, उच्चैर्बद्धः -द्धा -द्धं.

HIGH-METTLED, *a.* अदीनसत्त्वः -त्त्वा -त्त्वं, महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जा: -जः (स्), तेजोवान् -वती -वत् (त्), गर्व्वितः -ता -तं, अतिमादवान् &c.

HIGH-MINDED, *a.* महामनाः -नाः -नः (स्), महामनस्कः -स्का -स्कं, महात्मा -त्मा -त्म (न्), महामतिः -तिः -ति, उदारचेताः -ताः -तः (स्), उदारचरितः -ता -तं, गर्व्वी -र्व्विणी -र्व्वि (न्).

HIGH-PRIEST, *s.* महायाजकः, महापुरोहितः.

HIGH-PRINCIPLED, *a.* धर्म्मशीलः -ला -लं, पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्).

HIGH-PRIZED, *a.* महामूल्यः -ल्या -ल्यं, महार्घः -र्घा -र्घं, बहुमतः -ता -तं.

HIGH-RED, *a.* अतिरक्तः -क्ता -क्तं, घनरक्तः -क्ता -क्तं घनारुणः -णा -णं.

HIGH-ROAD, *s.* महापथः, महामार्गः, राजमार्गः, रथ्या, घण्टापथः.

HIGH-SEASONED, *a.* सुवासितः -ता -तं, सुप्रयस्तः -स्ता -स्तं, सुसंस्कृतः -ता -तं.

HIGH-SPIRITED, *a.* अदीनसत्त्वः -त्त्वा -त्त्वं, महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जाः -जः (स्), महेच्छः -च्छा -च्छं, ऊर्ज्जिताश्रयः -या -यं; 'high-spirited speech,' ऊर्ज्जिताश्रयं वचनं.

HIGH-STREET, *s.* राजमार्गः, महामार्गः, प्रतोली, रथ्या, विशिखा; 'a town having a high street,' प्रतोलीकः.

HIGH-TREASON, *s.* राजशरीराभिद्रोहः, राजापथ्यकारित्वं.

HIGH-WROUGHT, *a.* महायत्नेन संस्कृतः -ता -तं or परिष्कृतः -ता -तं or कल्पितः -ता -तं.

HIGHEST, *a.* (Most lofty) उच्चतमः -मा -मं.—(Greatest) परमः -मा -मं, उत्तमः -मा -मं; 'a criminal in the highest degree,' महापातकी *m.* (न्).

HIGHLAND, *s.* पर्व्वतीयदेशः, अधित्यका, उन्नतदेशः.

HIGHLAND, *a.* पर्व्वतीयः -या -यं, पार्व्वतः -ती -तं.

HIGHLANDER, *s.* पार्व्वतीयजनः, पर्व्वतवासी *m.* (न्), पर्व्वतीयः.

HIGHLY, *adv.* (With elevation) उच्चैस्, उच्चं.—(In a great degree, very) परमं, परं, भृशं, अत्यन्तं, अतीव, अति or सु prefixed; 'highly indignant,' अत्यमर्षी -र्षिणी -र्षि (न्); 'highly delighted,' परमानन्दी -न्दिनी -न्दि (न्); 'highly respectable,' परममान्य: -न्या -न्यं.

HIGHMOST, *a.* उत्तम: -मा -मं, उच्चतम: -मा -मं, उच्चैस्तम: -मा -मं, सर्व्वोपरिस्थ: -स्था -स्थं.

HIGHNESS, *s.* (Elevation) उच्चता, उन्नति: *f.*, ऊर्द्धत्वं.—(A title, your highness) भवान् *m.* (त्), भगवान् *m.* (त्), कुमार:.

HIGHWAY, *s.* राजमार्ग:, राजपथ:, महापथ:, महामार्ग:, नरपतिपथ:, महावर्त्म *n.* (न्), वर्त्म *n.*, रथ्या, विशिखा, संसरणं, साधारणपथ:, घण्टापथ:; 'highway police,' मार्गपाल:.

HIGHWAYMAN, *s.* परिपन्थी *m.* (न्), पारिपन्थिक:, सारणिकघ्न:, पादविकघ्न:, दस्यु: *m.*, होडा *m.* (ड्).

HIJJAL, *s.* (Tree) निचुल:, हिज्जल:, इज्जल:, अम्बुज:.

HILARITY, *s.* आह्लाद:, उल्लसता, उल्लास:, हर्ष:, प्रहर्ष:, आनन्द:, सानन्दता, प्रफुल्लता, मुदा, प्रहसनं, हासिका, आमोद:, कौतुकं, उत्सव:.

HILL, *s.* पर्व्वत:, गिरि: *m.*, शैल:, अद्रि: *m.*, भूधर:, अचल:, महीधर:, सानुमान् *m.* (त्); 'hill near a mountain,' पाद:, प्रत्यन्तपर्व्वत:.

HILLOCK, *s.* क्षुद्रपर्व्वत:, वल्मीकं, वप्र: -प्री, मृत्तिकाचय:, वामलूर:, नाकु: *m.*, उन्नतभूभाग:.

HILLY, *a.* पर्व्वतीय: -या -यं, पार्व्वतीय: -यी -यं, सपर्व्वत: -ता -तं, सगिरि: -रि: -रि, उच्चनीच: -चा -चं, विषम: -मा -मं.

HILT, *s.* (Of a sword, &c.) त्सरु: *m.*, मुष्टि: *m.*, खड्गमुष्टि:, तल:, ताल:, वारङ्ग:.

HILTED, *a.* त्सरुमान् -मती -मत् (त्), मुष्टिविशिष्ट: -ष्टा -ष्टं, दृढमुष्टि: -ष्टि: -ष्टि.

HIM, *pron.* तं acc. *m.* (तद्), एतं acc. *m.* (एतद्), एनं acc. *m.* (इदं).

HIMÁLAYA, *s.* (Mountain) हिमालय:, हिमाद्रि: *m.*, हिमवान् *m.* (त्), हिमप्रस्थ:, हिम:, तुषाराद्रि: *m.*, उदगद्रि: *m.*, गिरीश:, तुहिनशैल:.

HIND, *s.* (Female of a deer) मृगी, हरिणी, कुरङ्गी, एणी, मृगवधू: *f.*, समीची, रोहित् *f.*, पृषती.—(A boor) ग्राम्यजन:, वृषल:.—(A servant) दास:, भृत:.

HIND, HINDER, *a.* पश्चिम: -मा -मं, जघन्य: -न्या -न्यं, अवर: -रा -रं, अपर: -रा -रं, पाश्चात्य: -त्या -त्यं, पश्चातीय: -या -यं.—(The hinder part) पृष्टदेश:, पश्चाद्देश:, पश्चाद्भाग:, पश्चिमभाग:, पृष्ठं, नितम्ब:; 'in the hinder part,' पश्चाद्भागे, अवरतस्, अवरस्तात्; 'hind quarter of an elephant,' अपरं; 'of a ship,' नाव: पश्चिमभाग: or पश्चाद्भाग:.

To HINDER, *v. a.* वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, प्रतिवृ, आवृ, रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्; बाध् (c. 1. बाधते -धितुं), विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, विघ्न (nom. विघ्नयति -यितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं), विष्टम्भ्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्द्धुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं).

HINDERANCE, *s.* विघ्न:, प्रत्यूह:, अन्तराय:, व्याघात:, विघात:, बाध: -धा, बाधक: -कता, विरोध:, अवरोध:, निरोध:, संरोध:, प्रतिरोध:, उपरोध:, रोध: -धनं, वारणं, निवारणं, आवरणं, स्तम्भ: -म्भनं, विष्टम्भ:, प्रतिष्टम्भ:, प्रतिबन्ध: -न्धकं -न्धकता, विष्कम्भ:, प्रतिषेध:, हेट:.

HINDERED, *p. p.* वारित: -ता -तं, निवारित: -ता -तं, रुद्ध: -द्धा -द्धं, विरुद्ध: -द्धा -द्धं, निरुद्ध: -द्धा -द्धं, उपरुद्ध: -द्धा -द्धं, अवरुद्ध: -द्धा -द्धं, बाधित: -ता -तं, विघ्नित: -ता -तं, विहत: -ता -तं, व्याहत: -ता -तं, प्रतिहत: -ता -तं, पराहत: -ता -तं, स्तम्भित: -ता -तं, स्तब्ध: -ब्धा -ब्धं, विष्टब्ध: -ब्धा -ब्धं, प्रतिबद्ध: -द्धा -द्धं, प्रतिषिद्ध: -द्धा -द्धं, सागैल: -ला -लं.

HINDERER, *s.* विरोधी *m.* (न्), वारक:, निवारक:, बाधक:, विघ्नकारी *m.* (न्), प्रतिबन्धक:, स्तम्भकर: -कारी *m.*, प्रतिबन्धक:.

HINDERING, *part* रुन्धन् -न्धती -न्धत् (त्), विरुन्धान: -ना -नं, रोधन: -नी -नं.

HINDERMOST, *a.* पश्चिम: -मा -मं, जघन्य: -न्या -न्यं, पाश्चात्य: -त्या -त्यं, पश्चातीय: -या -यं, अवर: -रा -रं, अवरतम: -मा -मं, अवरतस् indec., अवरस्तात् indec.

HINDRANCE, *s.* *See* HINDERANCE.

HINGE, *s.* द्वारसन्धि: *m.*, सन्धि: *m.*, द्वारग्रन्थि: *m.*, केन्द्रं.

To HINT, *v. a.* इङ्गितं कृ, सङ्केतं कृ, उद्दिश् (c. 6. -दिशति -देष्टुं), समुद्दिश्, सूच् (c. 10. सूचयति -यितुं), आकूतं कृ.—(Suggest) उपन्यस् (c. 4. -अस्यति -असितुं).

HINT, *s.* इङ्गितं, इङ्ग:, सङ्केत:, आकार:, आकूतं, मीलितं, अङ्गविकृतं, भाव:, सूचना, सूचितं.—(Suggestion) उपन्यास:; 'understanding a hint,' इङ्गितकोविद:.

HINTED, *p. p.* उद्दिष्ट: -ष्टा -ष्टं, सूचित: -ता -तं.

HIP, *s.* (Joint of the thigh) कटि: *m.* -टी, कट:, श्रोणि: *f.* -णी, श्रोणिफलकं, कलत्रं, अङ्ग:, जघनं, प्रोथ:, कोल:, पालि: *f.*, वरारोहा, ककुद्मती, मेखलापदं.—(Lowness of spirits) विषाद:, अवसाद:.

HIPPISH, *a.* विषादी -दिनी -दि (न्), विषण: -णा -णं, दुर्मना: -ना: -न: (स्).

HIPPOGRIFF, *s.* कविकल्पित: पक्षवान् अश्वविशेष:.

HIPPOPOTAMUS, *s.* विदु: *m.*, करियादस् *n.*, शुण्डा, ग्राह:, अवहार:.

HIPSHOT, *s.* चुटितश्रोणि: -णि: -णि, विसन्धितकटि: -टि: -टि.

To HIRE, *v. a.* निरूपितकालं यावद् वेतनेन or मूल्येन ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), मूल्यं or वेतनं दत्त्वा सन्दिष्टकालं यावद् ग्रह् or प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपभुज् (c. 7. -भुनक्ति -भुंक्ते -भोक्तुं) or सेव् (c. 1. सेवते -वितुं), भट् (c. 1. भटति, टितुं), भृ (c. 1. भरति -ते, भर्त्तुं), भाटक (nom. भाटकयति -यितुं), परिक्री (c. 9. -क्रीणाति -क्रेतुं), आनिर्दिष्टकालाद् भृतिं दा.—(Hire labourers) मूल्यं दत्त्वा or प्रतिज्ञाय आविहितकालात् कर्म्मणि नियुज् or प्रयुज् or व्यापृ (c. 10. -पारयति -यितुं), कर्म्मकरान् उपनी (c. 1. -नयते -नेतुं).

HIRE, *s.* (Act of hiring) निरूपितकालं यावद् वेतनेन or मूल्येन ग्रहण, मूल्यं दत्त्वा आसन्दिष्टकालाद् ग्रहणं, प्रयोग:, वेतनदानं.—(Wages) भृति: *f.*, भृत्या, भरणं, भरण्यं, भाटि: *f.*, भाटक:, वेतनं, मूल्यं, निर्वेश:, कर्म्मण्या, वस्नं, निष्क्रय:, भर्म्म *n.* (न्), भर्म्मं, विधा, विष्टि: *f.*, पण:, हार्त्रं, विरहिणी, वेचा; 'for hire,' निरूपितमूल्येन ग्रहणीय: -या -यं or प्रयोज्य: -ज्या -ज्यं, पण्य: -ण्या -ण्यं, साधारण: -णी -णं; 'working for hire,' भृतिभुक् *m. f. n.*, भरण्यभुक्.

HIRED, *p. p.* आनिरूपितकालाद् वेतनेन गृहीत: -ता -तं, भृत: -ता -तं, कृतवेतन: -ना -नं, प्रकल्पितवेतन: -ना -नं, भाटकित: -ता -तं, भाटकीय: -या -यं; 'hired labourer,' भृतक:, भृतिभुक् *m.* (ज्); 'teacher,' भृतकाध्यापक:.

HIRELING, *s.* भृतक:, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, भृत्य:, वैतनिक:, वेतनार्थी *m.* (न्), वस्निक:, कर्म्मकर:.

HIRER, *s.* भृतिदाता *m.* (तृ), वेतनदाता *m.* (तृ), मूल्यदाता *m.*

HIRSUTE, *a.* प्रचुरलोमा -मा -म (न्), बहुलोमा -मा -म (न्), लोमश: -शा -शं.

HIS, *pron. poss.* तस्य gen. c. (तद्), अस्य gen. c. (इदं), तदीय: -या -यं or expressed by स्व in comp.; as, 'his house,' स्वगृहं.

To HISS, *v. a.* and *n.* (As a serpent, &c.) सर्पवत् श्वस् (c. 2. श्वसिति -तुं), सर्पनादं कृ, सर्पशब्दं कृ, सीत्कारं कृ, शीशशब्दं कृ.—(Hiss off, show disapprobation by hissing) ककैशशब्देन अप्रसादं सूच् (c. 10. सूचयति -यितुं) or अवज्ञास्पदं कृ.

HISS, HISSING, *s.* श्वास:, सर्पश्वास:, सर्पनाद:, सर्पशब्द:, ककैशशब्द:, सीत्कार:, सीत्कृतं, शीशशब्द:, ककैशशब्देन अप्रसादसूचनं.

HIST, *adv.* तूष्णीं भव, मौनीभव, नि:शब्दो भव, वाचं यम.

HISTORIAN, *s.* ऐतिहासिकः, इतिहासरचकः, इतिहासलेखकः, पुरावृत्तरचकः, वृत्तरचकः, भूतरचकः, पुराभूतलेखकः, पुराणरचकः, पुराणोपाख्यानरचकः, शिष्टसमाचाररचकः, चरित्रलेखकः.

HISTORIC, HISTORICAL, *a.* ऐतिहासिकः -की -कं, इतिहासविषयः -या -यं, इतिहाससम्बन्धी -न्धिनी -न्धि (न्), पुरावृत्तविषयः -या -यं, वृत्तरचनासम्बन्धी &c., शिष्टसमाचारसम्बन्धी &c., पौराणिकः -की -कं.

HISTORICALLY, *adv.* इतिहासक्रमेण. इतिहासानुसारेण, पुराणोपाख्यानक्रमेण.

To HISTORIFY, *v. a.* इतिहासं लिख् (c. 6. लिखति, लेखितुं) or रच् (c. 10. रचयति -यितुं), पुरावृत्तानि रच्.

HISTORIOGRAPHER, *s.* इतिहासरचकः, इतिहासलेखकः, पुराणोपाख्यानरचकः, पुरावृत्तरचकः.

HISTORY, *s.* इतिहासः, पुरावृत्तं, उपाख्यानं, पुराणोपाख्यानं, पुरावृत्तोपाख्यानं, शिष्टसमाचारः, उदन्तः; 'writing of history,' इतिहासरचना, पुरावृत्तरचना, पुराभूतविवरणं, शिष्टसमाचारविरचना, उपाख्यानरचना, चरित्रलिखनं.

HISTRIONIC, HISTRIONICAL, *a.* नाटकीयः -या -यं, नाट्यसम्बन्धी -न्धिनी -न्धि (न्), रङ्गसम्बन्धी &c., रङ्गयोग्यः -ग्या -ग्यं, नाट्यशालायोग्यः -ग्या -ग्यं.

HIT, *s.* (Blow, stroke) आघातः, घातः, अभिघातः, प्रहारः, हतिः *f.*, आहतिः *f.*, ताडनं, पातः.—(Chance) दैवं, भङ्गतिः *f.*; 'good hit,' सुदैवं, शुभगतिः *f.*, सौभाग्यं, सम्पद् *f.*

To HIT, *v. a.* तड् (c. 10. ताडयति -यितुं), वितड्, प्रह (c. 1. -हरति -हर्तुं), हन् (c. 2. हन्ति -न्तुं), अभिहन्, निहन्, विहन्, आहन्, समाहन्, अभ्याहन्, तुद् (c. 6. तुदति -ते, तोत्तुं), आतुद्, वितुद्, व्यध् (c. 4. विध्यति -ते, व्यद्धुं), प्रतिव्यध्; 'to hit the mark,' लक्ष्यं व्यध्.—(Attain) प्राप् (c. 5. -आप्नोति -आप्तुं), गम् (c. 1. गच्छति, गन्तुं), या (c. 2. याति -तुं), इ (c. 2. एति -तुं), स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), आविश् (c. 6. -विशति -वेष्टुं); 'to hit upon,' आसद् (c. 10. -सादयति -यितुं), उपगम्, उपागम्.

To HIT, *v. n.* (Clash) परस्परं सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), परस्परसमाघातं कृ.—(Succeed) सिध् (c. 4. सिध्यति, सेद्धुं), सम्पद् (c. 4. -पद्यते -पत्तुं)

HIT, *p. p.* ताडितः -ता -तं, हतः -ता -तं, आहतः -ता -तं, समाहतः -ता -तं, अभिहतः -ता -तं, प्रहतः -ता -तं; 'hit upon,' आसादितः -ता -तं, विहितः -ता -तं; 'hit off,' उपपन्नः -न्ना -न्नं.

To HITCH, *v. n.* (Lay hold) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), धृ (c. 1. धरति, धर्तुं), अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आकृष् (c. 1. -कर्षति -क्रष्टुं).—(Be caught, held) धृतः -ता -तं भू, रुद्धः -द्धा -द्धं भू, बन्ध् in pass. (बध्यते), अनुबन्ध्, बद्धः -द्धा -द्धं भू, स्तम्भितः -ता -तं भू.

HITHE, *s.* घट्टः, उमः, गुल्मः, तरस्थानं, उत्तरणस्थानं.

HITHER, *adv.* इतस्, अत्र, इह, इहस्थाने, अस्मिन् देशे; 'come hither,' उपैहि, इत इतस्; 'hither and thither,' इतस्ततस्, इतश्चेतस्.

HITHER, *a.* ऐहिकः -की -कं, ऐहस्थानिकः -की -कं, उपस्थः -स्था -स्थं, उपगः -गा -गं, आसन्नतरः -रा -रं, नेदीयान् -यसी -यः (स्).

HITHERMOST, *s.* आसन्नतमः -मा -मं, समीपतमः -मा -मं, निकटस्थः -स्था -स्थं, सन्निहितः -ता -तं, अन्तिकः -का -कं, उपस्थः -स्था -स्थं, नेदिष्ठः -ष्ठा -ष्ठं.

HITHERTO, *adv.* अद्य यावत्, अद्यपर्य्यन्तं, तत्कालपर्य्यन्तं एतत्कालपर्य्यन्तं, वर्त्तमानकालपर्य्यन्तं, आवर्त्तमानकालात्, तत्क्षणपर्य्यन्तं, एतत्क्षणपर्य्यन्तं, अद्यावधि.

HITHERWARD, *adv.* इतस्, इह, अत्र, इहस्थानं प्रति.

HIVE, *s.* मधुकोषः, करण्डः, छत्रकः, चषालः, मधुमक्षिकाधारः, मधुकरवासः, मधुकरालयः, मधुकरपोषणस्थान.

To HIVE, *v. a.* मधुकोषे निविश् (c. 10. -वेशयति -यितुं), करण्ड (nom. करण्डयति -यितुं).

To HIVE, *v. n.* मधुकोषं निविश् (c. 6. -विशति, वेष्टुं), सङ्घशः करण्डं निविश्.

HO, HOA, *interj.* हो, अहो, हंहो, हं, हे, हौ, होहौ, है, अरे, अरेरे.

HOAR, *a.* धवलः -ला -लं, शुक्लः -क्ला -क्लं, श्वेतः -ता -तं, शुभ्रः -भ्रा -भ्रं, गौरः -रा -री -रं, विशदः -दा -दं.

HOARD, *s.* अतिसञ्चयः, निभृतसञ्चयः, गूढसञ्चयः, सञ्चयः, निचयः, चयः, प्रचयः, समुच्चयः, समुदायः, सङ्घातः, सन्नयः, पुञ्जः, पूगः, गणः, समूहः, संहारः, सङ्ग्रहः, समाहारः, निर्हारः, निधानं, निधिः *m.*, राशिः *m.*; 'hoard of barbarians,' म्लेच्छगणः.

To HOARD, *v. a.* निभृतं सञ्चि (c. 5. -चिनोति -चेतुं) or समाचि, गूढमञ्चयं कृ, अतिसञ्चयं कृ, पुञ्जीकृ, राशीकृ.

HOARDED, *p. p.* सञ्चितः -ता -तं, समाचितः -ता -तं, पुञ्जीकृतः -ता -तं.

HOARDER, *s.* सञ्चयी *m.* (न्), अतिसञ्चयकारी *m.* (न्), गूढचयकारी *m.*

HOAR-FROST, *s.* नीहारः, तुषारः, तुषारकणः, प्रालेयं, हिमं, हिमानी, हैमं, तुहिनं, खजलं, खवाष्पः.

HOARINESS, *s.* धावल्यं, धवलता, शुक्लता, गौरता, वैशद्यं, शुक्लिमा *m.* (न्); 'of the hair,' केशधावल्यं, केशशुक्लता, केशपक्वता, पलितं, पलितत्वं.

HOARSE, *a.* रूक्षस्वरः -रा -रं, रूक्षाभिभाषी -षिणी -षि (न्) स्वरभग्नः -ग्ना -ग्नं, भग्नस्वरः -रा -रं, गम्भीरस्वरः -रा -रं, कलः -ला -लं.

HOARSELY, *adv.* रूक्षस्वरेण, गम्भीरस्वरेण, भग्नस्वरेण, रूक्षं, गभीरं.

HOARSENESS, *s.* स्वररूक्षता, स्वरगम्भीरता, स्वरभङ्गः, स्वरभग्नता, स्वरभेदः, कलत्वं -ता.

HOARY, *a.* शुक्लः -क्ला -क्लं, धवलः -ला -लं, श्वेतः -ता -तं, गौरः -रा -री -रं, शुभ्रः -भ्रा -भ्रं, विशदः -दा -दं.—(Gray-haired) पलितः -ता -लिन्नी -तं, पलितकेशः -शी -शं, शुक्लकेशः -शी -शं, धवलकेशः -शी -शं, पक्वकेशः -शी -शं.

HOAX, *s.* वञ्चनं -ना, प्रवञ्चना, छद्म *n.* (न्), कपटः -टं, प्रतारणं -णा.

To HOAX, *v. a.* वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रवञ्च्, प्रलभ् (c. 1. -लभते -लब्धुं), छल् (c. 10. छलयति -यितुं), प्रतॄ, c. 10. (-तारयति -यितुं), व्यपदिश (c. 6. -दिशति -देष्टुं).

HOAXED, *p. p.* वञ्चितः -ता -तं, विप्रलब्धः -ब्धा -ब्धं, मोहितः -ता -तं.

HOB, *s.* (A clown) वृषलः, ग्राम्यजनः, प्राकृतजनः, जानपदः.

To HOBBLE, *v. n.* (Limp) खञ्ज् (c. 1. खञ्जति -ञ्जितुं), लङ्ग् (c. 1. लङ्गति -ङ्गितुं), वङ्क् (c. 1. वङ्कति -ङ्कितुं), खोर् (c. 1. खोरति -रितुं), खोल् (c. 1. खोलति -लितुं), खोड् (c. 1. खोडति -डितुं), खोद् (c. 1. खोदति -दितुं), गतिविकलः -ला -लं भू.

HOBBLE *s.* (Limping) लङ्गः, खञ्जता, पङ्गुता.—(Evil plight) दुर्दशा.

HOBBLER, *s.* खञ्जः, लङ्गगतिः, लङ्गगामी *m.* (न्), गतिविकलः.

HOBBLING, *s.* खञ्जत्वं, पङ्गुता, खोरता, लङ्गः, गतिवैकल्यं.

HOBBLINGLY, *adv.* खञ्जवत्, पङ्गुवत्, खोरवत्, लङ्गगत्या.

HOBBY, *s.* (Species of hawk) श्येनभेदः, उत्क्रोशभेदः.—(Fancy) छन्दस् *n.*, चापलं, बुद्धिचापल्यं, निर्बन्धः, लहरी, अखट्टिः *m.*, रुचिः *f.*, अभिरुचिः *f.*, मनोरथः, प्रियद्रव्यं, प्रियवस्तु *n.*—(A stupid fellow) मूढः, मूर्खः, जडः, स्थूलजनः.

HOBBY-HORSE, *s.* क्रीडामृगः, क्रीडाश्वः, चर्म्ममृगः, क्रीडनकं, क्रीडाद्रव्यं.

HOBGOBLIN, *s.* रात्रिचरः, रात्रिञ्चरः, रजनीचरः, क्षणदाचरः, नक्तचरः -चरी *m.* (न्), निशाटः, भूतः, वेतालः, प्रेतः, पिशाचः, राक्षसः, असुरः, क्रव्याद् *m.*, कबुरः, अपदेवता.

HOBNAIL, *s.* अश्वपादुकाकीलः, अश्वपादुकाशङ्कुः *m.*, बृहत्कीलः

HOBSON'S CHOICE, *s.* विकल्पाभावः, अविकल्पः, विकल्पं विना.

HOCK, *s.* (Kind of wine) मद्यविशेषः.—(Of quadrupeds) चतुष्पदानां पश्चिमजङ्घाया मध्यसन्धिः or अरलिरूपः सन्धिः

To HOCK, *v. a.* पूर्वोक्तसन्धिशिरां छिद् (c. 7. छिनत्ति, छेत्तुं), पश्चिमजङ्घा-शिरां छिद्.

HOCUS-POCUS, *s.* तन्त्रमन्त्र, माया, कुहकः, जालं, मूलकर्म्म *n.* (न्).

HOD, *s.* लेपकारिभिः स्कन्धेन धृतं काष्ठमयं लेपपात्रं, लेपाधारः, विलेपभाजनं.

HODGE-PODGE, *s.* सन्निपातः, प्रकीर्णकं, सङ्कीर्णकं, नानाद्रव्यसमूहः.

HODIERNAL, *a.* अद्यतनः -नी -नं, वर्त्तमानदिवसीयः -या -यं.

HOE, *s.* खनित्रं, खात्रं, स्तम्बघ्नः, स्तम्बघनः, स्तम्बघातः, स्तम्बहननं -नी, स्तम्बहा *m.* (न्), आखनः -निकः, आखानं.

To HOE, *v. a.* खनित्रेण खन् (c. 1. खनति -ते -नितुं), खात्रेण भूमिं भिद् (c. 7. भिनत्ति, भेत्तुं) or दृ (c. 10. दारयति -यितुं), खनित्रेण कक्षान् उद्धृ (c. 1. -हरति -हर्त्तुं) or उत्खन्.

HOG, *s.* शूकरः, सूकरः, वराहः, कोलः, दंष्ट्री *m.* (न्), वक्रदंष्ट्रः, चक्रदंष्ट्रः, चक्ररदः, वक्रवक्त्रः, पोत्री *m.* (न्), स्थूलनासः, दीर्घरदः, मुखलाङ्गलः, भूदारः, किरः, किरिः *m.*, किटिः *m.*, बहुप्रजः, बद्धपत्यः, धृष्टिः *m.*, गृष्टिः *m.*, घोणी *m.* (न्), स्तम्बरोमा *m.* (न्), क्रोडः; 'village hog,' ग्राम्यः, विट्चरः.

HOG-HERD, *s.* शूकरपालः -लकः, शूकरपोषकः, वराहरक्षी *m.* (न्).

HOGGISH, *a.* शूकरीयः -या -यं, सौकरः -री -रं, वाराहः -ही -हं, शूकरोपमः -मा -मं, शूकरसगुणः -णा -णं, वराहसगुणः -णा -णं.

HOGGISHNESS, *s.* शूकरीयता, सौकर्य्यं, शौकर्य्यं, पशुत्वं, अतिलोभः.

HOGO, *s.* अतिस्वादः, तीक्ष्णस्वादः, सूक्ष्मस्वादः.

HOGSHEAD, *s.* द्रवद्रव्याणां परिमाणविशेषः.

HOGSTY, *s.* शूकरस्थानं, शूकरालयः, शूकरगृहं, शूकरवासः.

HOGWASH, *s.* शूकरखाद्यं भुक्तावशेषं or उच्छिष्टान्नं.

HOGWEED, *s.* पुनर्नवा, शोथघ्नी.

HOIDEN, *s.* प्रगल्भा स्त्री, निर्लज्जा स्त्री, पुंश्चली, स्वैरिणी, बन्धकी, असभ्या स्त्री, ग्रामिणी.

To HOIDEN, *v. n.* पूर्वोक्ता स्त्री यत्प्रकारेण तत्प्रकारेण चर् (c. 1. चरति -रितुं) or आचर् or वृत् (c. 1. वर्त्तते -र्त्तितुं).

To HOIST, *v. a.* उन्नुल् (c. 10. -नोलयति -यितुं), तुल्, उद्धृ (c. 1. -हरति -हर्त्तुं), उन्नी (c. 1. -नयति -नेतुं), उद्वह् (c. 10. -वाहयति -यितुं), उच्छ्रि (c. 1. -च्छ्रयति -यितुं, rt. श्रि), उद्यम् (c. 1. -यच्छति -यन्तुं), उत्था in caus. (-थापयति -यितुं, rt. स्था), उच्चीकृ, ऊर्द्ध्वीकृ.

HOISTED, *p.p.* उन्नोलितः -ता -तं, उद्धृतः -ता -तं, उच्छ्रितः -ता -तं, उद्वहितः -ता -तं, उद्वाहितः -ता -तं, उन्नाटितः -ता -तं, उद्यतः -ता -तं.

To HOLD, *v. a.* (Keep) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), धा (c. 3. धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं); 'hold in the hand,' हस्तेन धृ.—(Maintain) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), धृ, सन्धृ, पाल् (c. 10. पालयति -यितुं); 'hold an opinion,' मतं धृ (c. 10. धारयति), मतम् अवलम्ब् (c. 1. -लम्बते -म्बितुं) or समालम्ब्.—(Possess) धा (c. 3. दधाति, धत्ते, धातुं), विधा, आधा, भृ, धृ (c. 10.), शील् (c. 10. शीलयति -यितुं), आप् (c. 5. आप्नोति, आप्तुं).—(Esteem) मन् (c. 4. मन्यते, मन्तुं); 'hold in high estimation,' बहु मन्; 'hold in contempt,' अवमन्, तृणाय मन्, लघूकृ, तुच्छीकृ, कदर्थीकृ.—(Detain) धृ, सन्धृ, रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, अवरुध्.—(Hold in confinement) कारायां निरुध् or बन्ध् (c. 9. बध्नाति, बन्धुं) or धृ.—(Hold back, withhold) निवृ (c. 10. -वारयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, उपसंहृ (c. 1. -हरति -हर्त्तुं), संहृ, विधृ.—(Contain) धा, आधा, धृ, भृ, आदा (c. 3. -ददाति -दत्ते -दातुं), ग्रह्, परिग्रह्; 'room to hold all,' सर्वेषां धारणे स्थानं.—(Take hold, lay hold) ग्रह्, परिग्रह्, सङ्ग्रह्, हस्तेन ग्रह्, धृ, हस्तेन धृ, परामृश् (c. 6. -मृशति -मर्ष्टुं), हस्तेन अवलम्ब् (c. 1. -लम्बते -म्बितुं) or समालम्ब्.—(Celebrate as a festival) सेव् (c. 1. सेवते -वितुं), विधिवत् कृ, यथाविधि अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) or पाल्.—(Carry on, perform) कृ, विधा, सम्पद् (c. 10. -पादयति -यितुं), निर्वह् (c. 10. -वाहयति -यितुं), अनुष्ठा.—(Hold out, extend) प्रसृ (c. 10. -सारयति -यितुं), प्रग्रह्.—(Hold out, offer) प्रयम् (c. 1. -यच्छति -यन्तुं), उपनी (c. 1. -नयति -नेतुं), उपन्यस् (c. 4. -अस्यति -असितुं), उपस्था in caus. (-स्थापयति -यितुं), उपह्.—(Hold up, raise aloft) उच्चीकृ, उच्चैः कृ, ऊर्द्ध्वीकृ, उन्नम् (c. 10. -नमयति -यितुं), उच्छ्रि (c. 1. -च्छ्रयति -यितुं), उद्यम्.—(Hold up, sustain) धृ, सन्धृ, आलम्ब् (c. 1. -लम्बते, c. 10. -लम्बयति -यितुं), अवलम्ब्, समवलम्ब्, उत्तम्भ् (c. 10. -तम्भयति -यितुं, rt. स्तम्भ्), भृ.—(Hold one's tongue) जिह्वां रक्ष् or धृ.

To HOLD, *v. n.* (Stand, remain firm) स्था (c. 1. तिष्ठति, स्थातुं), स्थिरीभू.—(Last, endure) स्था, संस्था, चिरस्थायी -यिनी -यि भू, ध्रुवीभू.—(Refrain) आत्मानं संयम् (c. 1. -यच्छति -यन्तुं), आत्मानं यम्, विरम् (c. 1. -रमति -रन्तुं) with abl. c., निवृत् (c. 1. -वर्त्तते -र्त्तितुं) with abl. c., परिहृ (c. 1. -हरति -हर्त्तुं), संहृ.—(Adhere) अनुबन्ध् (c. 9. -बध्नाति -बन्धुं or in pass. -बध्यते), अनुलग्नीभू, संलग्नीभू, अवलम्ब् (c. 1. -लम्बते -म्बितुं), अवलम्बी -म्बिनी -म्बि भू.—(Be dependent on) अधीनः -ना -नं भू, आश्रितः -ता -तं भू, अवलम्ब्.—(Hold off) विलम्ब्.—(Hold on) संस्था, पर्यवस्था, निर्बन्धं कृ.—(Hold out, resist) चिरेण सह् (c. 1. सहते, सोढुं), चिरकालेन प्रतिकृ.—(Hold together) संलग्नीभू, सम्बन्ध् in pass. (-बध्यते).

HOLD, *s.* (Act of holding) धृतिः *f.*, धरणं, धारणं, ग्रहणं, आग्रहः, सङ्ग्राहः.—(Taking hold) ग्रहणं, सङ्ग्रहणं, सङ्ग्राहः, ग्रहः, हस्तेन ग्रहणं, हस्तेन धृतिः *f.* or धरणं; 'letting go the hold,' स्रस्तहस्तः -स्ता -स्तं.—(Place of holding) वारङ्गः.—(Place of custody) कारा, कारागारं, बन्धनस्थानं, निरोधस्थानं, गुप्तिः *f.*—(Fortified place) दुर्गं, कोटिः *f.*—(Support) आलम्बः -म्बनं, अवलम्बनं, धारणं, आधारः, उपस्तम्भः, आग्रहः, सङ्ग्रहः.—(Influence) अधिकारः, भारः, गौरवं, वशः -शं.—(Hold of a ship) गुप्तिः *f.*, नौगुप्तिः *f.*, नौकोदरं, नौकाधोभागः.

HOLDER, *s.* धारी *m.* (न्), धारकः, धरः, धारणकर्त्ता *m.* (र्त्तृ), धारयः, ग्राहकः, ग्राही *m.* (न्).

HOLDFAST, *s.* (Any thing that takes hold) ग्राहकः -कं, ग्रहणी, धरः -री -रं, बन्धनी, कुडुपः.—(Parsimonious man) दृढमुष्टिः *m.*, गाढमुष्टिः *m.*, बद्धमुष्टिः *m.*, अमुक्तहस्तः

HOLPING, *s.* धरणं, धारणं, ग्रहणं, आधानं, आदानं, रक्षणं.

HOLDING, *part.* धारी -रिणी -रि (न्), धारयन् -यन्ती -यत् (न्), धरः -रा -री -रं, आददानः -ना -नं, आदधानः -ना -नं; 'holding' may be expressed by हस्त in comp.; as, 'holding a stick,' दण्डहस्तः -स्ता -स्तं; 'holding a sword,' खड्गहस्तः -स्ता -स्तं.

HOLE, *s.* विवरं, बिलं, गर्त्तः, रन्ध्रं, छिद्रं, कुहरं, शुषिरं, शुषिः *f.* -षी, कूपः, अवटः -टिः *m.*, गुहा, विरोकं, रोकं, रुहकं, रोपं, सङ्कुः *m.*, मकरा, भूकं, दूकं, निर्व्यथनं.—(Cave) गह्वरं, कन्दरः -रां दरी, खातं, निर्दरिः *m.*, गुहा, शैलरन्ध्रं.—(Of a beast) अभ्रं, विवरं; 'of a serpent,' सर्पविवरं; 'rat-hole,' मूषिकविवरं; 'full of holes,' अनेकरन्ध्रः -न्ध्रा -न्ध्रं, सरन्ध्रः &c., बहुविवरः -रा -रं, बहुबिलः -ला -लं; 'one who picks holes in the character of others,' छिद्रान्वेषी -षिणी -षि (न्), छिद्रानुसारी -रिणी -रि (न्).

HOLIDAY, *s.* *See* HOLYDAY

HOLILY, *adv.* पुण्यं, पुण्यवत्, पुण्यशीलवत्, पवित्रं, पवित्रवत्, धर्म्मशी-

लवत्, शुचिवत्, शौचेन.

HOLINESS, *s.* पुण्यता -त्वं, पुण्यशीलता, पवित्रता -त्वं, शुचिता -त्वं, शौचं, धर्म्मशीलता, साधुत्वं -ता, धर्म्मित्वं -ता, देवभक्तिः *f.*, पुण्यवत्त्वं, ब्रह्मवर्च्चसं, ब्रह्मण्यता, वृत्ताध्ययनर्द्धिः *f.*; 'his holiness,' भगवान् *m.* (त्).

HOLLO, *interj.* भो, भोः, भोस्, भोभो, हलहला, हे, है, अहो, हं, हंहो.

To HOLLO, *v. n.* हे, है, भो, हलहला इत्यादिशब्दान् कृ or इत्यादिशब्दैर् दूरस्थजनम् आह्वे (c. 1. -ह्वयति -ह्वातुं), उच्चैःस्वरेण दरस्थं कञ्चिज्जनम् आह्वे, हलहला (nom. हलहलायते).

HOLLAND, *s.* (Country) हल्लण्डमंज्ञको देशः.

HOLLANDER, *s.* हल्लण्डीयः, हल्लण्डीयजनः, हल्लण्डदेशजः.

HOLLANDS, *s.* (Spirits) शुण्डा, सुरा -री, वारुणी, हाला.

HOLLOW, *a.* (Empty within) शून्यः -न्या -न्यं, शून्यमध्यः -ध्या -ध्यं, शून्यगर्भः -र्भा -र्भं, शून्योदरः -रा -रं, शुषिरः -रा -रं, रिक्तमध्यः -ध्या -ध्यं, रिक्तगर्भः -र्भा -र्भं, उत्तानः -ना -नं, वितानः -ना -नं, पुटाकारः -रा -रं, गर्भाकारः -रा -रं, उदराकृतिः -तिः -ति.—(In sound) मन्दः -न्दा -न्दं, मन्थरः -रा -रं, मन्द्रः -न्द्रा -न्द्रं, गभीरः -रा -रं, गम्भीरः -रा -रं.—(Worthless, unsubstantial) निःसारः -रा -रं, असारः -रा -रं, सारहीनः -ना -नं, निःसत्त्वः -त्त्वा -त्त्वं.—(Vain) मोघः -घा -घं, निरर्थकः -का -कं.—(False) असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं, वितथः -था -थं, कृत्रिमः -मा -मं, मिथ्या in comp.; 'a hollow reed,' शून्या.

HOLLOW, *s.* (Cavity, hole) विवरं, बिलं, कुहरं, गर्त्तः, कोष्टः, शुषिरं, शून्यः, अवटः -टिः *m.*, कूपः, गुहा.—(Inner part) गर्भः, उदरं, अभ्यन्तरं, क्रोडं.—(Hollow ground) दरा -री, दरीभूः *f.*, कन्दरः -री, निम्नभूमिः *f.*, द्रोणी, अद्रिद्रोणी.—(Excavation) खातं, खातभूः *f.*—(Natural hollow) देवखातं.—(Cavern) गह्वरं, कन्दरः, गुहा, कुहरं.—(Canal) कुल्या, प्रणाली, सारणिः *f.*—(Hollow of a tree) कोटरः -रं, वृक्षभवनं, तरुक्रोडं, प्रान्तरं, निर्गूढः, चत्वालः, निष्कुहः; 'hollow of the hand,' पुटः, पुटितं, करकोषः; 'hollow of the ear,' कृपणः; 'hollow of the loins,' गर्त्तः, जघनकूपकौ *m.* du.; 'hollow of a boiler,' स्थालीविलं.

To HOLLOW, *v. a.* शून्यीकृ, शुषिरीकृ, खन् (c. 1. खनति -ते -नितुं), उत्खन्, पुट् (c. 10. पुटयति -यितुं), पुटीकृ.

HOLLOWED, *p. p.* खातः -ता -तं, उत्खातः -ता -तं, पुटितः -ता -तं, शून्यीकृतः -ता -तं, शुषिरीकृतः -ता -तं.

HOLLOWNESS, *s.* शून्यता -त्वं, शुषिरता -त्वं, रिक्तता.—(Of sound) मन्दता, मन्द्रता, गभीरता, गम्भीरता -त्वं, गाम्भीर्य्यं.—(Worthlessness) निःसारता, असारता, मोघता, फल्गुता.—(Falsity) असत्यता, निःसत्यता, कृत्रिमता, कूटता, कापट्यं.

HOLLY, *s.* कण्टकितपत्रविशिष्टः सदाहरितो गुल्मभेदः.

HOLLYHOCK, *s.* नानावर्णपुष्पविशिष्ट ओषधिभेदः.

HOLM-OAK, *s.* चिरस्थायी महावृक्षभेदः.

HOLOCAUST, *s.* होमः, हुतं, हव्यं, हुतहोमं, आहुतं, आहवनीयं.

HOLPEN, *p. p.* उपकृतः -ता -तं, कृतोपकारः -रा -रं, कृतसाहाय्यः -य्या -य्यं.

HOLY, *a.* पुण्यः -ण्या -ण्यं, पुण्यवान् -वती -वत् (त्), पुण्यशीलः -ला -लं, पुण्यात्मा -त्मा -त्म (न्), पवित्रः -त्रा -त्रं, धर्म्मशीलः -ला -लं, शुचिः -चिः -चि, शुचिमनाः -नाः -नः (स्), शुचिव्रतः -ता -तं, विमलः -ला -लं, अमलात्मा -त्मा -त्म (न्), निर्म्मलान्तःकरणः -णा -णं, शुद्धमतिः -तिः -ति, पवित्रमतिः -तिः -ति, शुद्धात्मा &c., शुद्धहृदयः -या -यं, धार्म्मिकः -की -कं, साधुः -धुः -ध्वी -धु; 'holy land,' पुण्यभूमिः *f.*, पुण्यभूः *f.*; 'holy writ,' श्रुतिः *f.*; 'holy place of pilgrimage,' तीर्थः -र्थं, पुण्यतीर्थं, क्षेत्रं, पुण्यस्थानं.

HOLYDAY, *s.* (Sacred day) पुण्याहं, पुण्यदिनं, पुण्यदिवसः.—(Festival) उत्सवः, उत्सवदिनं, पर्व्वाहः, उद्धर्षदिनं, आनन्ददिवसः, यात्रा, रासेरसः.—(Day on which there is intermission of study) अनध्यायः अनध्यायदिवसः, अनध्यायमहोत्सवः, अस्वाध्यायतिथिः *m. f.*, विश्रामदिवसः; 'holyday folk,' यात्राजनः, यात्रालोकः.

HOLY-WATER, *s.* पुण्यजलं, पुण्योदकं, पुण्यासु *n.*, पुण्यवारि *n.*

HOMAGE, *s.* पूजा, प्रणामः, प्रणतिः *f.*, प्रणिपातः -पतनं, अर्चनं -ना, अर्चा, अभ्यर्चा, अभ्यर्चनं, नमस्कारः, मानं, सम्मानं, सत्कारः, पादवन्दनं, सेवा, सेवाञ्जलिः *m.*, आदरः, भक्तिः *f.*, प्रभुभक्तिः *f.*, प्रतीतिः *f.*, विनीतिः *f.*, उपासना, शेवं.

To HOMAGE, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), प्रणिपत् (c. 1. -पतति -तितुं), उपस् (c. 2. -आस्ते -आसितुं), प्रणम् (c. 1 -णमति -णन्तुं), सत्कृ; 'he paid homage,' प्रणतवान्.

HOMAGER, *s.* पूजकः, प्रणामकृत् *m.*, प्रणिपातकारी *m.* (न्), सम्मानकृत् *m.*

HOME, *s.* स्वगृहं, गृहं, स्वस्थानं, स्वदेशः, स्ववासः, स्वविषयः, स्वगेहः, स्ववेश्म *n.* (न्), निजगृहं, निजालयः, निजगेहः, स्वभवनं, स्वनिलयः; 'devoted to home,' गृहारूढचेताः -ताः -तः (स्).

HOME, *adv.* गृहं प्रति, स्वगृहं प्रति; 'he went home,' गृहं ययौ.—(Close) निकटे; 'speech that strikes home,' सङ्गतवाक्यं, हृदयङ्गमवाक्यं.

HOME-BORN, *a.* गृहजातः -ता -तं, स्वगृहजः -जा -जं, स्वदेशजः -जा -जं; 'home-born slave,' गृहजातो दासः, ज्ञातिदासः.

HOME-BRED, *a.* गृहजः -जा -जं, गृह्यः -ह्या -ह्यं, आन्तर्वेश्मिकः -की -कं.

HOME-FELT, *a.* अन्तरस्थः -स्था -स्थं, अन्तरतमः -मा -मं, अन्तर्भूतः -ता -तं.

HOMELESS, *a.* निरालयः -या -यं, निरास्पदः -दा -दं, निराश्रयः -या -यं.

HOMELINESS, *s.* ग्राम्यता, ग्रामीयत्वं, गृह्यता, असभ्यता, नीचता, अश्लीलता, अशुद्धत्वं, अशिष्टत्वं.

HOMELY, *a.* ग्राम्यः -म्या -म्यं, ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्रामीणः -णा -णं, गृह्यः -ह्या -ह्यं, गृहजः -जा -जं, प्राकृतः -ती -तं, असभ्यः -भ्या -भ्यं, अश्लीलः -ला -लं, नीचः -चा -चं, अधमः -मा -मं, अशुद्धः -द्धा -द्धं, अशिष्टः -ष्टा -ष्टं, असंस्कृतः -ता -तं, अपरिष्कृतः -ता -तं; 'homely speech,' ग्राम्यं.

HOMELY, *adv.* ग्राम्यं, ग्राम्यप्रकारेण, असभ्यं, नीचं, गृह्यतस्.

HOME-MADE, *a.* गृहनिर्म्मितः -ता -तं, गृहकृतः -ता -तं, गृहोत्पन्नः -न्ना -न्नं.

HOME-SPUN, *a.* गृहजातः -ता -तं, गृहजः -जा -जं, गृह्यः -ह्या -ह्यं.

HOME-STALL or HOME-STEAD, *s.* गृहं, वासस्थानं, वसतिः *f.*, आवासः

HOMEWARD, *adv.* गृहं प्रति, स्ववासं प्रति, स्वस्थानं प्रति.

HOMICIDAL, *a.* नृहत्याकारी -रिणी -रि (न्), मनुष्यघाती -तिनी -ति (न्).

HOMICIDE, *s.* नृहत्या, मनुष्यहत्या, मनुष्यवधः, मनुष्यघातः.—(One who kills a man) नृहन्ता *m.* (न्तृ), मनुष्यघातकः.

HOMILY, *s.* पूजाशालासु आवर्णीयं धर्म्मविषयं वाक्यं.

HOMOGENEAL, HOMOGENEOUS, *a.* समानजातीयः -या -यं, सजातीयः -या -यं, समानजातिः -तिः -ति, सजातिः -तिः -ति, समभावः -वा -वं, समानभावः -वा -वं, समधर्म्मा -र्म्मा -र्म्म (न्), एकजातिः -तिः -ति, एकधर्म्मा &c., स्वभावीयः -या -यं.

HOMOGENEALNESS, HOMOGENEITY, HOMOGENEOUSNESS, *s.* समानजातिता, सजातिता, भावसमता, भावसमानता, जातिसमता.

HOMOLOGOUS, *a.* तुल्याकारः -रा -रं, तुल्यपरिमाणः -णा -णं, समपरिमाणः -णा -णं.

HOMONYMOUS, *a.* भिन्नार्थः -र्था -र्थं, सन्दिग्धार्थः -र्था -र्थं, द्व्यर्थः -र्था -र्थं.

समसंज्ञकः -का -कं, समनामा -मा -म (न्).

HOMONYMY, *s.* भिन्नार्थता, विभिन्नार्थता, अर्थभेदः, द्व्यर्थता, नाममत्ता.

HONE, *s.* शाणः -णी, शाणाश्म *n.* (न्), शानः, क्षुरधारातेजनप्रस्तरः.

HONEST, *a.* (Upright, just) सरलः -ला -लं, दक्षिणः -णा -णं, शुचिः -चिः -चि, न्यायाचारः -रा -रं, न्यायवर्त्ती -र्त्तिनी -र्त्ति (न्), न्याय्यः -य्या -य्यं, ऋजुः -जुः -जु, सच्चरितः -ता -तं, साच्चिकः -की -कं, शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), अजिह्मः -ह्मा -ह्मं, अकुटिलः -ला -लं, अशठः -ठा -ठं, अशठधीः -धीः -धि, मायाहीनः -ना -नं, अमायः -या -यं -यिकः -की -कं, अकपटः -टा -टं, निष्कपटः -टा -टं, कपटहीनः -ना -नं, निर्व्याजः -जा -जं, विमलात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, अवक्रः -क्रा -क्रं, धार्म्मिकः -की -कं, दम्भरहितः -ता -तं, धर्म्मकारी -रिणी -रि (न्), भद्रः -द्रा -द्रं, साधुः -धुः -ध्वी -धु, सन् सती -सत् (त्), उत्तमः -मा -मं, सरलयायी -यिनी -यि (न्), श्लक्ष्णः -क्ष्णा -क्ष्णं, प्राञ्जलः -ला -लं, प्रगुणः -णा -णं.—(True) सत्यः -त्या -त्यं, सत्यकः -का -कं, सत्यशीलः -ला -लं, सत्यवृत्तः -त्ता -त्तं, सत्यवादी -दिनी -दि (न्).

HONESTLY, *adv.* सरलं, साररूपेण, न्यायेन, न्यायतस्, न्याय्यं, निष्कपटं, कपटं विना, निर्व्याजं, निर्व्यलीकं, अमायया, मायां विना, सरलवत्, शुचिवत्, आर्जवं, सदाक्षिण्यं.

HONESTY, *s.* सारत्यं, सरलता, दाक्षिण्यं, शुचिता -त्वं, ऋजुता, आर्जवं, अमाया, मायाहीनता, अकपटः, अकापट्यं, कपटहीनता, अव्याजः, न्यायिता, न्यायाचारता, अजिह्मता, अकौटिल्यं, अशठता, निर्व्यलीकता, अवक्रता, अस्तेयं, अपैशुनं, भद्रता, साधुता, शुद्धत्वं, धार्म्मिकत्वं, सत्यता, सत्यशीलता, सत्यवादित्वं, नैर्मल्यं, विमलता, अदत्तानुपादानं.

HONEY, *s.* मधु *n.*, क्षौद्रं, पुष्पनिर्य्यासः, पुष्परसः, पुष्पसारः, पुष्पासवं, कुसुमासवं, माक्षिकं, क्षात्रं -त्रकं, सार्घ्यं, कापिशायनं; 'honey of flowers,' सवं; 'become honey,' मधुसाद्भूतः -ता -तं.

To HONEY, *v. n.* मधुरवचोभिः or मधुरवाक्यैः सान्त्व् (c. 10. सान्त्वयति -यितुं).

HONEY-COMB, *s.* मधुकोषः, मधुवासः, मधुचक्रं, माक्षिकाश्रयं, मधुक्रमः, करगः.

HONEY-MOON, *s.* आनन्दमासः, विवाहात् परं प्रथममासो यस्मिन् स्त्रीपुरुषौ प्रेममात्रं कुरुतः.

HONEY-SUCKLE, *s.* सुरभिगन्धविशिष्टो लताविशेषः.

HONEY-SWEET, *a.* मधुरः -रा -रं, मधुवत् स्वादुः -दुः -दुः -दुी -दु, मधुसात् ind.

HONEY-TONGUED, *a.* मधुरभाषी -षिणी -षि (न्), मधुरवादी -दिनी -दि (न्).

HONIED, *a.* मधुमान् -मती -मत् (त्), मधुमयः -यी -यं, मधुरः -रा -रं.

HONORARY, *a.* सम्मानकरः -रा -रं, मानदः -दा -दं, यशस्यः -स्या -स्यं, यशस्वी -स्विनी -स्वि (न्), कीर्त्तिकरः -रा -रं, यशस्करः.—(Conferring honour only, without gain) सम्मानमात्रदः -दा -दं, कीर्त्तिमात्रकरः -री -रं अलाभकरः -री -रं.

HONOUR, *s.* (Fame, reputation) कीर्त्तिः *f.*, यशस् *n.*, ख्यातिः *f.*, सुख्यातिः *f.*, विख्यातिः *f.*, प्रतिष्ठा, विश्रुतिः *f.*, समाख्या, प्रतिपत्तिः *f.*—(Reverence) सम्मानं, मानं, पूजा, अर्चनं -ना, अर्चा, अभ्यर्चा -र्चनं, नमस्कारः, सेवा, सहा, अर्हणं -णा, आदरः, सम्भावना, सत्कारः, आराधनं, पुरस्कारः, सम्भ्रमः, श्राद्धा.—(Dignity, honourable rank) उत्कर्षः, उत्कृष्टता, उत्कृष्टपदं, कुलीनपदं, प्रतिपत्तिः *f.*, प्रधानपदं, प्रधानता, प्राधान्यं, श्रेष्ठत्वं, उन्नतिः *f.*, मर्य्यादा, अभिजातता, पूज्यता, मान्यता -त्वं, अभ्यर्हणीयता.—(Family honour) मर्य्यादा, कुलमर्य्यादा.

To HONOUR, *v. a.* पूज् (c. 10. पूजयति -यितुं), सम्पूज्, अभिपूज्, मन् (c. 10. मानयति -यितुं), सम्मन्, प्रतिमन्, अर्च् (c. 1. अर्चति -र्चितुं, c. 10. अर्चयति -यितुं), अभ्यर्च्, समभ्यर्च्, समर्च्, सेव् (c. 1. सेवते -वितुं, c. 10. सेवयति -यितुं), अर्ह् (c. 10. अर्हयति -यितुं), सम्भू (c. 10. -भावयति -यितुं), आदृ—(c. 6. -द्रियते -र्द्दितुं), नमस्कृ, सत्कृ, पुरस्कृ, आराध् (c. 10. -राधयति -यितुं), श्रु in des. (शुश्रूषते -षितुं), श्रद्ध् (c. 1. श्रद्धति -द्धितुं), मह् (c. 1. महति -हितुं), अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), पूजां कृ, सम्मानं कृ.—(Accept a bill) लेख्यपत्रं ग्रह् or स्वीकृ or आदृ

HONOURABLE, *a.* पूज्यः -ज्या -ज्यं, पूजनीयः -या -यं, पूजयितव्यः -व्यं, सम्पूजनीयः -या -यं, सम्मान्यः -न्या -न्यं, मान्यः -न्या -न्यं, -निनी -नि (न्), पूजार्हः -र्हा -र्हं, अर्चार्हः -र्हा -र्हं, अर्ह्यः -र्ह्या -र्ह्यं, अर्हणीयः -या -यं, श्राद्धयः -द्धया -द्धयं, आदरणीयः -या -यं, पुरस्करणीयः -या -यं, मर्य्यादावान् -वती -वत् (त्), मर्य्यादान्वितः -ता -तं.—(Illustrious) ख्यातः -ता -तं, सुख्यातः -ता -तं, यशस्वी -स्विनी -स्वि (न्), महायशाः -शाः -शः (स्), कीर्त्तिमान् -मती -मत् (त्), प्रतिपन्नः -न्ना -न्नं, -मती -मत् (त्), विश्रुतः -ता -तं, प्रसिद्धः -द्धा -द्धं.—(Conferring honour) कीर्त्तिकरः -री -रं, यशस्करः -री -रं, यशस्यः -स्या -स्यं.—(Upright, equitable) सच्चरितः -ता -तं, न्यायाचारः -रा -रं, धार्म्मिकः -की -कं, शुचिः -चिः -चि, दक्षिणः -णा -णं, साच्चिकः -की -कं, शुद्धात्मा -त्मा -त्म (न्), निर्व्यलीकः -का -कं, निष्कपटः -टा -टं, विमलात्मा -त्मा -त्म (न्), अवक्रः -क्रा -क्रं, ऋजुः -जुः -जु, साधुः -धुः -ध्वी -धु.—(Noble) कुलीनः -ना -नं, उदारः -रा -रं, उदारचेताः -ताः -तः (स्).

HONOURABLY, *adv.* समानं, सम्मानपूर्व्वं, शुचिवत्, धार्म्मिकवत्, साधुवत्, उदारवत्, सौदार्य्यं, सत्कारपूर्व्वं, नमस्कारपूर्व्वं, श्राद्धप्रकारेण, सुकीर्त्तिपूर्व्वं, सुयशसा, निर्व्यलीकं, सम्पूजनीयं.

HONOURED, *p. p.* पूजितः -ता -तं, सम्पूजितः -ता -तं, अर्चितः -ता -तं अभ्यर्चितः -ता -तं, सम्मानितः -ता -तं, पुरस्कृतः -ता -तं, सेवितः -ता -तं, अर्हितः -ता -तं, सेव्यमानः -ना -नं, निषेव्यमाणः -णा -णं, आदृतः -ता -तं, अर्चितः -ता -तं, सत्कृतः -ता -तं, महितः -ता -तं, आराधितः -ता -तं, शुश्रूषितः -ता -तं, अनिन्दितः -ता -तं.—(Accepted as a bill) गृहीतः -ता -तं, स्वीकृतः -ता -तं, आदृतः -ता -तं; 'to be honoured,' पूज् in pass. (पूज्यते), मह् (nom. महीयते).

HOOD, *s.* स्त्रीवस्त्रानुबद्धं मस्तकाच्छादनं or मस्तकावरणं or मस्तकपिधानं, फणाकारं मस्तकाच्छादनं, शिरस्कं, शिरस्त्रं -स्त्राणं, शिरोवस्त्रं; 'of a snake,' फणः -णा -णं, भोगः, स्फोटा.

To HOOD, *v. a.* पूर्व्वोक्तपिधानेन मस्तकम् आछद् (c. 10. -छादयति -यितुं), मस्तकावरणेन पिधा (c. 3. -दधाति -धातुं).

To HOODWINK, *v. a.* चक्षुषी वस्त्रेण रुध् (c. 7. रुणद्धि, रोद्धुं), नयने पिधानेन आवृ (c. 5. -वृणोति -वरितुं -रीतुं) or आछद् (c. 10. -छादयति -यितुं), नयनरोधं कृ.

HOOF, *s.* खुरः, क्षुरः, शफः -फं, वज्रकः -का, निघृष्वः, घुटः, विह्वः, रिह्वः; 'hoof of a cow,' गोक्षुरं, गोष्पदं; 'mark of a hoof,' खुरपदवी, खुरचिह्नं.

HOOFED, *a.* खुरी -रिणी -रि (न्), क्षुरी -रिणी -रि (न्), खुरयुक्तः -क्ता -क्तं.

HOOK, *s.* (Any thing bent that catches hold) आकर्षी -र्षिणी, अङ्कुशः, आकर्षणार्थं वक्रयन्त्रं or वक्रलोहः, ग्रहणी, धरणी.—(Fish-hook) वडिशं -शा -शी, वरिशी, वलिशं -शी, मत्स्यवेधनं -नी.—(Hook for driving an elephant) अङ्कुशः -शं, अङ्कूपः -पं, शृणिः *f.*—(Bill-hook) दात्रं.

To HOOK, *v. a.* (Fish) वडिशेन मत्स्यान् व्यध् (c. 4. विध्यति, व्यद्धुं) or धृ (c. 1. धरति, धर्त्तुं) or ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), धरणं कृ, ग्रहणं कृ.

HOOKED, *a.* (Bent in the form of a hook) वक्रः -क्रा -क्रं, अङ्कुशाकारः -रा -रं, अङ्कुशी -शिनी -शि (न्), अनृजुः -जुः -जु, कुब्जितः -ता -तं.

HOOP, *s.* (Any thing circular) चक्रं, चक्रवालं, वलयः -यं.—(For playing with) क्रीडाचक्रं, क्रीडावलयः.

To HOOP, *v. a.* (Bind with hoops) लोहवलयान् बन्ध् (c. 9. बध्नाति, बन्द्धुं), लोहचक्रादिभिर् युज् (c. 10. योजयति -यितुं).—(Shout out) चित्कारं कृ, चित्कारशब्दं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं).

HOOPER, *s.* (A cooper) लोहवलयबन्धा *m.* (न्), काष्ठभाण्डकारः.

HOOPING-COUGH, *s.* आक्षेपककाशः, हूपशब्दपूर्व्वकः काशः, बालकानां काशः.

To HOOT, *v. n.* रू (c. 2. रौति, रवितुं), विरू, दीर्घरुतं कृ, दीर्घरावं कृ, घूत्कृ, घूत्कारं कृ, चित्कारं कृ, उच्चैःस्वरेण उद्घुष् (c. 10. -घोषयति -यितुं); 'to hoot at,' हे, रे, अरे, धिक्, हूम्, घूत् इत्यादिशब्दैर् अवमानं or अवज्ञां or अप्रसादं सूच् (c. 10. सूचयति -यितुं) or इत्यादिशब्दैर् अवज्ञास्पदं कृ.

HOOT, HOOTING, *s.* दीर्घरुतं, दीर्घरावः, रावः, घूत्कारः, घूत्कृतं, चित्कारः, हे, रे, धिक्, घूत् इत्यादिशब्दैर् अवमानसूचनं or अप्रसादसूचनं.

To HOP, *v. n.* प्लु (c. 1. प्लवते, प्लोतुं), वल्ग् (c. 1. वल्गति -लितुं), नृत् (c. 4. नृत्यति, नर्त्तितुं), एकपादेन प्लु or वल्ग्.

HOP, *s.* (The plant) लताविशेषो यस्य पुष्पाणि यवरसेन सह संमृज्यन्ते तेन च यवसुरा उत्पद्यते.—(Jump) प्लवः, प्लुतं, वल्गितं, झम्पः, नृत्यं, नर्त्तनं, एकपादेन प्लुतं, वल्गितं.

IMPASSIONED, *p. p.* संरक्तः -क्ता -क्तं, रागवान् -वती -वत् (त्), रागी -र्गिणी -र्गि (न्), रागान्वितः -ता -तं, सरागः -गा -गं, सानुरागः -गा -गं, अनुरागी -र्गिणी -र्गि (न्), सरसः -सा -सं, रसी -सिनी -सि (न्), रसिकः -का -कं, शृङ्गारी -रिणी -रि (न्), शृङ्गारितः -ता -तं.

IMPATIENCE, *s.* अमर्षः, अक्षमता, अक्षमा, अशान्तिः *f.*, असहिष्णता -त्वं, विमर्षः, असहनं, असहत्वं, अतितिक्षा, अनुत्साहः.

IMPATIENT, *a.* असहिष्णुः -ष्णुः -ष्णु, असहनः -ना -नं, असहः -हा -हं, असहमानः -ना -नं, असहनशीलः -ला -लं, अक्षमः -मा -मं, अशान्तिमान् -मती -मत् (त्), अक्षमी -मिणी -मि (न्), अक्षन्वा -न्वी -न्वृ (न्), अमर्षणः -णा -णं, विमर्षी -र्षिणी -र्षि (न्), जातामर्षः -र्षा -र्षं, अतितिक्षुः -क्षुः -क्षु, उत्सुकः -का -कं, उत्कः -त्का -त्कं.

IMPATIENTLY, *adv.* सामर्षं, सविमर्षं, अमर्षेण, विमर्षेण, असहिष्णुवत्, अक्षान्या, असहनशीलत्वात्, सावेगं.

To IMPAWN, *v. a.* आधीकृ, पण् (c. 1. पणते -णितुं), परिपण्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यस् (c. 4. -अस्यति -असितुं).

To IMPEACH, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायां or व्यवहारानुसारेण अभियुज् or अभिशंस् (c. 1. -शंसति -सितुं) or अभियोगं कृ or अभिशंसनं कृ or अपवद् (c. 1. -वदति -दितुं), दोषीकृ, उपालभ् (c. 1. -लभते -लब्धुं).

IMPEACHABLE, *a.* अभियोक्तव्यः -व्या -व्यं, व्यवहारसभायाम् अभियोज्यः -ज्या -ज्यं.

IMPEACHED, *a.* व्यवहाराभियुक्तः -क्ता -क्तं, अभियुक्तः -क्ता -क्तं, व्यवहाराभिशस्तः -स्ता -स्तं.

IMPEACHER, *s.* अभियोगी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगकृत् *m.*, अपवादकः.

IMPEACHMENT, *s.* अभियोगः, व्यवहाराभियोगः, अभिशंसनं, व्यवहाराभिशंसनं, अपवादः, संशयः.

IMPECCABILITY, *s.* निष्पापत्वं, पापहीनता, पापाभावः, पापाक्षमता.

IMPECCABLE, *a.* अपापः -पा -पं, निष्पापः -पा -पं, पापाक्षमः -मा -मं.

To IMPEDE, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), प्रतिरुध्, निरुध्, उपरुध्, संरुध्, विरुध्; विहन् (c. 2. -हन्ति -न्तुं), व्याहन्, प्रतिहन्, प्रतिबन्ध् (c. 9. -बध्नाति -बन्धुं), वृ (c. 10. वारयति -यितुं), निवृ, विनिवृ, आवृ, समावृ, प्रतिवृ, विघ्न (nom. विघ्नयति -यितुं), बाध् (c. 1. बाधते -धितुं), स्तम्भ् (c. 10. स्तम्भयति -यितुं, c. 9. स्तभ्नाति, स्तम्भितुं), विष्टम्भ्, प्रत्यूहीकृ, निषिध् (c. 1. -षेधति -षेद्धुं).

IMPEDED, *p. p.* रुद्धः -द्धा -द्धं, विरुद्धः -द्धा -द्धं, प्रतिरुद्धः -द्धा -द्धं, निरुद्धः -द्धा -द्धं, उपरुद्धः -द्धा -द्धं, विहतः -ता -तं, प्रतिहतः -ता -तं, पराहतः -ता -तं, वारितः -ता -तं, निवारितः -ता -तं, विघ्नितः -ता -तं, बाधितः -ता -तं, स्तम्भितः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः -ब्धा -ब्धं, अवारितः -ता -तं, सागलः -ला -लं.

IMPEDIMENT, *s.* विघ्नः, व्याघातः, अन्तरायः, प्रत्यूहः, प्रतिबन्धः, विष्टम्भः, प्रतिष्टम्भः, स्तम्भः -म्भनं, रोधः, संरोधः, विरोधः, अवरोधः, उपरोधः, निरोधः, विघातः -तं, विहननं, विहतिः *f.*, बाधा -धकः, वारणं, निवारणं. आवरणं.—(Impediment in speech) वाक्स्खलनं, वाग्भेदः, वाग्वैकल्यं; 'having an impediment in one's speech,' स्खलद्वाक्कः -क्का -क्कं, वाग्विकलः -ला -लं, भिन्नवाक् *m. f. n.*, कड्डदः -दा -दं.

IMPEDIMENTAL, *a.* (Causing impediment) व्याघातकः -का -कं, विघाती -तिनी -ति (न्), विघ्नकरः -री -रं, विघ्नकारी -रिणी -रि (न्), विरोधी -धिनी -धि (न्), प्रतिरोधी &c., औपरोधिकः -की -कं, विष्टम्भी -म्भिनी -म्भि (न्), निवारकः -का -कं.

To IMPEL, *v. a.* (Drive, urge forward) प्रेर् (c. 10. -ईरयति -यितुं),

प्रणुद् (c. 6. -णुदति -णोत्तुं), पचुद् (c. 10. -चोदयति -यितुं), सचुद्, परिचुद्, चुद्, कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्.—(Incite to action) प्रवृत् (c. 10. -वर्त्तयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), नियुज्, उद्युज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्, प्ररुच् (c. 10. -रोचयति -यितुं), चेष्ट् (c. 10. चेष्टयति -यितुं), उत्तप् (c. 10. -तापयति -यितुं),

IMPELLED, *p. p.* प्रेरितः -ता -तं, प्रणोदितः -ता -तं, प्रणुन्नः -न्ना -न्नं, प्रचोदितः -ता -तं, प्रवर्त्तितः -ता -तं, प्रवृत्तः -त्ता -त्तं, नियोजितः -ता -तं, प्रयोजितः -ता -तं, प्रोत्साहितः -ता -तं, प्ररुचितः -ता -तं, समाकृष्टः -ष्टा -ष्टं, आकृष्टः -ष्टा -ष्टं.

IMPELLENT, *s.* प्रेरकः, प्रेरयिता *m.* (तृ), प्रणोदकः, प्रवर्त्तकः, प्रयोजकः, प्रोत्साहकः, प्रचोदकः.

To IMPEND, *v. n.* (Be near) उपस्था (c. 1. -तिष्ठति -ते -स्थातुं), प्रत्युपस्था, समुपस्था, समीपं स्था or वृत् (c. 1. वर्त्तते -वर्त्तितुं), निकटे स्था or वृत्, उपगम् (c. 1. -गच्छति -गन्तुं), उपागम्, समुपगम्, उपनतः -ता -तं भू.—(Hang over) आलस् (c. 1. -लसति -सितुं), प्रलस्, अवलस्, लस्.—(Be about to fall) पत् in des. (पिपतिषति -षितुं, पित्सति -त्सितुं), आपत् (c. 1. -पतति -तितुं).

IMPENDENT, IMPENDING, *a.* उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, उपस्थः -स्था -स्थं, समुपस्थितः -ता -तं, समीपवर्त्ती -र्त्तिनी -र्त्ति (न्), निकटवर्त्ती &c., आसन्नवर्त्ती &c., उपनतः -ता -तं, समुपगतः -ता -तं, पतनोन्मुखः -खा -खं, पिपतिषुः -षुः -षु, पित्सुः -त्सुः -त्सु.

IMPENETRABILITY, *s.* अवेध्यता, अव्यध्यता, अभेद्यता, अछेद्यत्वं, अप्रवेश्यत्वं, वज्रता -त्वं, गहनत्वं; 'impenetrability,' as a property of matter, is expressed in scientific treatises by the word विरोधः.

IMPENETRABLE, *a.* (Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्यध्यः -ध्या -ध्यं, अभेद्यः -द्या -द्यं, अभेदनीयः -या -यं, अछेद्यः -द्या -द्यं, अछेदनीयः -या -यं, अव्याप्यः -प्या -प्यं, अछिद्रणीयः -या -यं, कलिलः -ला -लं.—(Not to be entered) अप्रवेश्यः -श्या -श्यं, अप्रवेष्टव्यः -व्या -व्यं, गहनः -ना -नं.—(Very hard) वज्रमयः -यी -यं, वज्रः -ज्रा -ज्रं.

IMPENETRABLY, *adv.* अभेद्यं, अवेध्यं, अछेदनीयं, गहनं, वज्रवत्.

IMPENITENCE, IMPENITENCY. *s.* अननुतापः, अपश्चात्तापः, पश्चात्तापहीनता, पश्चात्तापाभावः, अननुशोकः, अखेदः, खेदहीनता, खेदराहित्यं, अप्रायश्चित्तं, अननुशयः, स्तब्धचित्तत्वं,

IMPENITENT, *a.* अननुतापी -पिनी -पि (न्), अननुतप्तः -प्ता -प्तं, पश्चात्तापहीनः -ना -नं, अननुतापशीलः -ला -लं, खेदहीनः -ना -नं, खेदरहितः -ता -तं, अननुशयी -यिनी -यि (न्), स्तब्धचित्तः -त्ता -त्तं, कठिनचित्तः -त्ता -त्तं.

IMPERATIVE, *a.* आज्ञापकः -का -कं, आदेशकः -का -कं, आदेशी -शिनी -शि (न्), नियोजकः -का -कं, प्रबोधकः -का -कं, अवश्यकर्त्तव्यः -व्या -व्यं; 'imperative mood,' विधिः *m.*, आज्ञावाचकः -कं.

IMPERCEPTIBLE, *a.* अव्यक्तः -क्ता -क्तं, अप्रत्यक्षः -क्षा -क्षं, अविभाव्यः -व्या -व्यं, अविभावनीयः -या -यं, अगम्यः -म्या -म्यं, अगोचरः -रा -रं.—(To the senses) अतीन्द्रियः -या -यं, इन्द्रियागोचरः -रा -रं, इन्द्रियागम्यः -म्या -म्यं, इन्द्रियातीतः -ता -तं.—(To the eye) परोक्षः -क्षा -क्षं, अलोकनीयः -या -यं नयनागोचरः -रा -रं.—(To the ear) श्रवणागोचरः -रा -रं.

IMPERCEPTIBLY, *adv.* अव्यक्तं अप्रत्यक्षं -क्षेण, अविभावनीयं, अगोचरं; 'going imperceptibly,' अव्यक्तगतिः -तिः -ति.

IMPERFECT, *a.* (Not complete) असम्पूर्णः -र्णा -र्णं, अपूर्णः -र्णा -र्णं, अपरिपूर्णः -र्णा -र्णं, असम्पन्नः -न्ना -न्नं, असमाप्तः -प्ता -प्तं, असिद्धः -द्धा -द्धं, असमग्रः -ग्रा -ग्रं, अनिष्पन्नः -न्ना -न्नं, अपर्य्याप्तः -प्ता -प्तं, अखंडितः -ता -तं, अपक्वः -क्वा -क्वं, खण्ड in comp.—(Defective) न्यूनः -ना -नं, विकलः -ला -लं, हीनः -ना -नं, लुप्तः -प्ता -प्तं, दोषी -षिणी -षि (न्), सच्छिद्रः -द्रा -द्रं, ऊनः -ना -नं.—(Wanting some organ) अङ्गहीनः -ना -नं, न्यूनेन्द्रियः -या -यं, विकलेन्द्रियः -या -यं, विकलाङ्गः -ङ्गा -ङ्गं.—(Tense) अद्यतनभूतः, अनद्यतनः; the grammatical symbols are घी, लङ्; 'imperfect comparison,' लुप्तोपमा.

IMPERFECTION, *s.* (Defect) दोषः, छिद्रं, अगुणः, अपराधः, कलङ्कः, दूषणं, वैकल्यं, हानिः *f.*, हीनता, क्षतिः *f.*, न्यूनता, अपर्य्याप्तिः *f.*, अशुद्धता: 'in a gem,' पुलकः, खण्डः.

IMPERFECTLY, *adv.* असम्पूर्णं, असमग्रं, खण्डशस्, अनिष्पन्नेन, असम्पन्नं, असम्यक्, अपर्य्याप्तं, विकलं, वैकल्येन.

IMPERFECTNESS, *s.* असम्पूर्णता, अपूर्णता, असम्पन्नता, असिद्धिः *f.*, असमग्रता.

IMPERFORATE, *a.* नीरन्ध्रः -न्ध्रा -न्ध्रं, निश्छिद्रः -द्रा -द्रं, अछिद्रितः -ता -तं.

IMPERIAL, *a.* साम्राजिकः -की -कं, आधिराजिकः -की -कं, महाराजकीयः -या -यं, महाराजयोग्यः -ग्या -ग्यं, साम्राजिकः -की -कं, महेश्वरीयः -या -यं.

IMPERIALIST, *s.* महाराजाधीनः, अधिराजाधीनः, महाराजानुचरः, महाराजानुभक्ती *m.* (न्); 'imperialist army,' महाराजसैन्यं.

To IMPERIL, *v. a.* संशयस्थं -स्थां -स्थं कृ, सन्देहस्थं -स्थां -स्थं कृ.

IMPERIOUS, *a.* (Commanding) आज्ञापकः -का -कं, आदेशकः -का -कं.—(Overbearing, haughty) धृष्टः -ष्टा -ष्टं, धर्षी -र्षिणी -र्षि (न्), भर्त्सनकारी -रिणी -रि (न्), उद्धतः -ता -तं, अवलिप्तः -प्ता -प्तं, सावहेलः -ला -लं, सोन्माथः -था -थं, प्रगल्भः -ल्भा -ल्भं, दृप्तः -प्ता -प्तं.

IMPERIOUSLY, *adv.* धर्षेण, प्रगल्भं, सावहेलं, सावलेपं, सोन्माथं, साटोपं.

IMPERIOUSNESS, *s.* धृष्टता, धर्षः, अवलिप्तता, अवलेपः, सावलेपत्वं, अवहेला, उद्धतिः *f.*, चित्तसमुन्नतिः *f.*, प्रगल्भता, प्रागल्भ्यं, उत्सिक्तता, साटोपत्वं.

IMPERISHABLE, *a.* अक्षयः -या -यं, अक्षय्यः -य्या -य्यं, अक्षयी -यिणी -यि (न्), अनश्वरः -रा -रं, अविनश्वरः -रा -रं, अविनाशी -शिनी -शि (न्), अनाश्यः -श्या -श्यं, अव्ययः -या -यं, अजरः -रा -रं, निर्जरः -रा -रं, अजर्य्यः -र्य्या -र्य्यं, अक्षरः -रा -रं, अक्षयणीयः -या -यं.

IMPERISHABLENESS, *s.* अक्षयता -त्वं, अनश्वरता, अनाश्यत्वं, अविनाश्यता, अजरत्वं, निर्जरत्वं, अव्ययीभावः.

IMPERMEABLE, *a.* अव्याप्यः -प्या -प्यं, अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं.

IMPERMEABLENESS, *s.* अव्याप्यता, अप्रवेश्यता, अभेद्यत्वं.

IMPERSONAL, *a.* अकर्त्रृकः -का -कं, कर्त्रृत्वहीनः -ना -नं, अकर्त्रृवाच्यः -च्या -च्यं, भाववाचकः -का -कं; 'impersonal verb,' भाववाच्यं. अकर्त्रृवाचका क्रिया.

IMPERSONALLY, *adv.* अकर्त्रृकं, अकर्त्रृवाच्यक्रमेण, भाववाच्यानुसारेण.

IMPERTINENCE, IMPERTINENCY, *s.* (Rudeness) अविनयः, अविनीतता, अशिष्टता, परुषवचनं, दुरुक्तिः *f.*, वाक्पारुष्यं, कुशीलता, दुःशीलता, अशीलता, वामशीलता, धृष्टता, धर्षः, प्रगल्भता, चापल्यं, क्लेशदायकत्वं, उत्तरदायकत्वं.—(Meddling with others' affairs) पराधिकारचर्च्चा, पराधिकारप्रवेशः.—(State of not relating to the subject) निर्विषयता -त्वं, अप्रासङ्गिकत्वं, अप्रस्तुतत्वं, असम्बन्धः.—(Nonsense) अनर्थकं, अनर्थकता, असम्बद्धत्वं.

IMPERTINENT, *a.* (Rude) अविनीतः -ता -तं, अशिष्टः -ष्टा -ष्टं, धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, दुःशीलः -ला -लं, अशीलः -ला -लं, कुशीलः -ला -लं, वामशीलः -ला -लं, चपलः -ला -लं, परुषवाक् *m. f. n.*, परुषवादी -दिनी -दि (न्), क्लेशदायकः -का -कं; 'giving impertinent answers,' उत्तरदायकः -का -कं.—(Meddling with others' affairs) पराधिकारचर्चकः -का -कं.—(Irrelevant) अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, असम्बन्धी -न्धिनी -न्धि (न्).

असम्बद्धकीयः -या -यं, निष्प्रयोजनः -ना -नं, प्रस्तुतबहिर्भूतः -ता -तं.—(Nonsensical) अनर्थकः -का -कं, असबद्धः -द्धा -द्धं.

Impertinently, *adv.* (Rudely) अविनयेन, अविनीतवत्, धृष्टवत्, प्रगल्भवत्, अशिष्टवत्, कुशीलवत्, परुषोक्त्या.—(Officiously) अतिचपलपूर्वं.—(Irrelevantly) असबद्धं, अप्रस्तुतं, अप्रासङ्गिकं, निष्प्रयोजनं.

Imperturbable, *a.* अक्षोभ्यः -भ्या -भ्यं, अक्षोभणीयः -या -यं, अवस्थितमतिः -तिः -ति, स्थिरमतिः -तिः -ति, समबुद्धिः -द्धिः -द्धि, अनाकुलचित्तः -त्ता -त्तं, अपरिप्लवः -वी -वं, अकातरः -रा -रं, अविखण्डितमनाः -नाः -नः (स्), निर्विकारः -रा -रं.

Imperturbation, *s.* अक्षोभ्यता, अनाकुलचित्तता, अपरिप्लवत्वं, अव्यग्रता.

Impervious, *a.* (Not to be penetrated or entered) अप्रवेश्यः -श्या -श्यं, अप्रवेशनीयः -या -यं, अगम्यः -म्या -म्यं, गहनः -ना -नं, सुगहनः -ना -नं, गहीयः -या -यं, गभीरः -रा -रं, गम्भीरः -रा -रं, कलिलः -ला -लं, सङ्कटः -टा -टं, सघाधः -धा -धं, कष्टः -ष्टा -ष्टं.—(Compact, without interstice) निविडः -डा -डं, अविरलः -ला -लं, निर्विवरः -रा -रं, नीरन्ध्रः -न्ध्रा -न्ध्रं.—(Not to be pierced) अवेध्यः -ध्या -ध्यं, अव्याप्यः -प्या -प्यं, अभेद्यः -द्या -द्यं, अच्छेदनीयः -या -यं.

Imperviousness, *s.* अप्रवेश्यता, गम्भीरत्वं, गहनत्वं, अव्याप्यता, अगम्यता, अवेध्यता, नीरन्ध्रता, नैविड्यं.

Impetrable, *a.* अभ्यर्थनीयः -या -यं, प्रार्थनेन प्राप्यः -प्या -प्यं.

To impetrate, *v. a.* प्रार्थनेन or अभ्यर्थनाद्वारेण प्राप् (c. 5. -आप्नोति -आप्तुं).

Impetration, *s.* प्रार्थनया or याच्ञाद्वारेण प्राप्तिः *f.* or प्रापणं.

Impetuosity, *s.* वेगः, आवेगः, महावेगः, संवेगः, अत्यन्तवेगः, संरम्भः, संरम्भत्वं, आपातः, तीक्ष्णता, तैक्ष्ण्यं, साहसं, उग्रता, उच्चण्डता, अमर्षः, क्षिप्रता, रभसः, कुतूहलं, तीव्रता.

Impetuous, *a.* वेगवान् -वती -वत् (त्), वेगी -गिनी -गि (न्), महावेगः -गा -गं, भीमवेगः -गा -गं, उदीर्णवेगः -गा -गं, संरम्भी -म्भिणी -म्भि (न्), चण्डः -ण्डा -ण्डं, उच्चण्डः -ण्डा -ण्डं, तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णकर्म्मा -र्म्मा -र्म्म (न्), अमर्षी -र्षिणी -र्षि (न्), अमर्षणः -णा -णं, अमर्षवान् -वती -वत् (त्), साहसी -सिनी -सि (न्), साहसिकः -की -कं, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, प्रबलः -ला -लं, रोषणः -णा -णं, कुतूहली -लिनी -लि (न्).

Impetuously, *adv.* महावेगेन, भीमवेगेन, अत्यन्तवेगेन, वेगतस्, सवेगं, संरम्भेण, आपाततस्, तीक्ष्णं, सामर्षं, उच्चण्डं, उग्रं, सरभसं, साहसेन, संरम्भवत्, सकुतूहलं, कौतूहलेन

Impetuousness, *s.* *See* Impetuosity.

Impetus, *s.* वेगः, आवेगः, संवेगः, आपातः, अत्यन्तवेगः, गतिशक्तिः *f.*

Impiety, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, दुष्टता, अपुण्यत्वं, असाधुता, पापिष्टत्वं, सपापत्वं, पापं, दुष्कृतं, कुकर्म्म *n.* (न्).

To impinge, *v. a* आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्, आपत् (c. 1. -पतति -तितुं), प्रपत्, संघट्ट (c. 1. -घट्टते -ट्टितुं).

Impious, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मा -र्म्मं, धर्म्महीनः -ना -नं, धर्म्मलोकः -का -कं, अभक्तः -क्ता -क्तं, देवनिन्दकः -का -कं, भक्तिहीनः -ना -नं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्), पापिष्ठः -ष्ठा -ष्ठं. अनीश्वरोचितः -ता -तं.

Impiously, *adv.* अधर्म्मतस्, अधर्म्मेण, अपुण्यवत्, पापिष्ठवत्, देवनिन्दकवत्.

Impiousness, *s.* *See* Impiety.

Implacability, implacableness, *s.* अशाम्यता, असान्त्वनीयता, अतोषणीयता, अप्रसाद्यत्वं.

Implacable, *a.* अशाम्यः -म्या -म्यं, अतोषणीयः -या -यं, अशमनीयः -या -यं, असान्त्वनीयः -या -यं, अनाराध्यः -ध्या -ध्यं, अप्रसाद्यः -द्या -द्यं, दुःखेन शाम्यः -म्या -म्यं or आराध्यः -ध्या -ध्यं.—(Constant in hatred) दीर्घद्वेषी -षिणी -षि (न्), अतिद्वेषी &c.; 'implacable hatred,' दीर्घद्वेषः, बद्धवैरं.

Implacably, *adv.* अशमनीयं, अशाम्यं, अतोषणीयं, अनाराधनीयं.

To implant, *v. a.* निरूह् in caus. (-रोपयति -यितुं), निष्ठा in caus. (-ष्ठापयति -यितुं), प्रतिष्ठा, निष्ठं -ष्ठां -ष्ठं कृ, निधा (c. 3. -दधाति -धातुं), प्रणिधा, उपनिधा, निखन् (c. 1. -खनति -नितुं).

Implanted, *p. p.* निष्ठः -ष्ठा -ष्ठं, निष्ठितः -ता -तं, प्रतिष्ठितः -ता -तं, सुप्रतिष्ठितः -ता -तं, निरूढः -ढा -ढं, निखातः -ता -तं, निहितः -ता -तं.

To implead, *v. a.* अभियुज् (c. 7. -युनक्ति -योक्तुं), व्यवहारसभायाम् उत्तरप्रत्युत्तरे कृ.

Implement, *s.* यन्त्रं, उपकरणं, साधनं, भाण्डं, कार्य्यसाधनं, सामग्र्यं -ग्री, द्रव्यं, पात्रं, उपस्करः, सम्भारः.

To implicate, *v. a.* सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), अनुबन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संसृज् (c. 6. -सृजति -सृष्टुं); 'he is implicated in many crimes,' बहुपापैः सम्बध्यते.

Implicated, *p. p.* सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, संश्लिष्टः -ष्टा -ष्टं, संसृष्टः -ष्टा -ष्टं, ग्रस्तः -स्ता -स्तं, अनुषक्तः -क्ती -क्तं (न्), लिप्तः -प्ता -प्तं.

Implication, *s.* (Involution, connection) सम्बन्धः, अनुबन्धः, अभिसम्बन्धः, अनुषङ्गः, समन्वयः, सम्यक्कः, संसर्गः.—(Implying) विवक्षा, अर्थापत्तिः *f.*, अनुमानं, अपवादः, उपलक्ष्यः.

Implicit, *a.* अनाशङ्कितः -ता -तं, अवितर्कितः -ता -तं, अवैकल्पिकः -की -कं, अविचार्य्य कृतः -ता -तं, अवितर्क्य कृतः -ता -तं, अशङ्कात्मकः -का -कं, असांशयिकः -की -कं, अखण्डः -ण्डा -ण्डं.

Implicitly, *adv.* अवितर्क्य, अविचार्य्य, अनाशङ्कापूर्वं, अशङ्कया, अवितर्केण, असंशयपूर्वं, अविकल्पेन.

Implied, *p. p.* or *a.* विवक्षितः -ता -तं, अर्थसम्बद्धः -द्धा -द्धं, उपलक्षितः -ता -तं, आनुषङ्गिकः -की -कं; 'implied meaning,' विवक्षितार्थः, फलितार्थः, ध्वनितार्थः, ध्वनिः *m.*

To implore, *v. a.* प्रार्थ् (c. 10. -अर्थयते -ति -यितुं), अभ्यर्थ् सम्प्रार्थ्. अर्थ्, विनयेन or अञ्जलिं कृत्वा प्रार्थ्, कृताञ्जलिः or निर्बन्धेन याच् (c. 1. याचति -चितुं), अभियाच्, संयाच्, प्रयाच्, सम्प्रयाच्, प्रसद् (c. 10. -सादयते -ति -यितुं), विनी (c. 1. -नयति -नेतुं), अनुनी, विनयेन स्तार्थं निविद् (c. 10. -वेदयति -यितुं), नाथ् (c. 1. नाथति -थितुं).

Implored, *p. p.* अञ्जलिकर्म्मपूर्वं प्रार्थितः -ता -तं or अभ्यर्थितः -ता -तं, विनयेन or निर्बन्धेन याचितः -ता -तं or अभियाचितः -ता -तं, प्रसादितः -ता -तं, अनुनीतः -ता -तं.

Implorer, *s.* कृताञ्जलिः प्रार्थकः or प्रार्थयिता *m.* (तृ), निर्बन्धेन याचकः.

To imply, *v. a.* वच् in des. (विवक्षति -क्षितुं), सूच् (c. 10. सूचयति -यितुं), संसूच्. Often expressed by अर्थ in comp., as, 'a speech which implies censure,' निन्दार्थो वादः.

Impolicy, *s.* कुनीतिः *f.*, दुर्नीतिः *f.*, दुर्णयः, अनीतिः *f.*, दुर्नीतं, अनयः.

Impolite, *a.* अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं, अविनीतः -ता -तं, अशीलः -ला -लं, कुशीलः -ला -लं, विशीलः -ला -लं, दुःशीलः -ला -लं, दुर्मेद्यादः -दा -दं, नष्टविनयः -या -यं, ग्राम्यः -म्या -म्यं, असुजनः -ना -नं, अनार्य्यः -र्य्या -र्य्यं.

Impoliteness, *s.* अशिष्टता, असभ्यता, अविनयः, कुशीलता, दुःशीलता.

Impolitic, *a.* (Not acquainted with good policy, not prudent)

अनीतिज्ञः -ज्ञा -ज्ञं, अनीतिविद् *m. f. n.*, अनीतिमान् -मती -मत् (त्), अनीतिकुशलः -ला -लं, दुर्नीतः -ता -तं, अविनीतः -ता -तं, अमतिमान् -मती -मत् (त्), अबुद्धिमान् &c., अबुधः -धा -धं, अविज्ञः -ज्ञा -ज्ञं, अविवेचकः -का -कं, अकोविदः -दा -दं.—(Not politic, adapted to injure the public interest) अहितः -ता -तं, नीतिविरुद्धः -द्धा -द्धं, प्रजार्थविरोधी -धिनी -धि (न्), अर्थविरोधी &c., अनर्थकरः -रा -रं, अनर्थजनकः -का -कं, अनिष्टकरः -री -रं, असमीक्ष्य कृतः -ता -तं, सापकारः -रा -रं, अयौक्तिकः -की -कं.

IMPOLITICLY, *adv.* नीतिविरुद्धं, अहितं -तायं, अर्थविरोधेन, असमीक्ष्य.

IMPONDERABLE, IMPONDEROUS, *a.* निर्भारः -रा -रं, अभारी -रिणी -रि (न्), अतोलनीयः -या -यं, अगुरुः -वी -रु, अतिसूक्ष्मः -क्ष्मा -क्ष्मं, अतिलघुः -घुः -घु.

To IMPORT, *v. a.* (Bring goods from a foreign country) वाणिज्यद्रव्याणि or वाणिज्यवस्तूनि विदेशात् or देशान्तरात् or वहिर्देशाद् आनी (c. 1. -नयति -नेतुं) or उपनी or आवह् (c. 1. -वहति -वोढुं) or उपवह् or आहृ (c. 1. -हरति -हर्तुं).—(Convey a meaning, imply) सूच् (c. 10. सूचयति -यितुं), संसूच्, उद्दिश् (c. 6. -दिशति -देष्टुं), वच् in des. (विवक्षति -क्षितुं), उद्बुध् (c. 10. -बोधयति -यितुं), or expressed by अर्थ in comp.; as, 'a speech which imports censure,' निन्दार्थो वादः.—(Be of weight or consequence) गुर्वर्थः -र्था -र्थं भू.

IMPORT, *s.* (Goods brought from a foreign country) विदेशात् or देशान्तरात् or वहिर्देशाद् आनीतानि वाणिज्यद्रव्याणि *n. pl.* or वाणिज्यवस्तूनि *n. pl.*, विदेशीयवस्तूनि *n. pl.*, विदेशजद्रव्याणि *n. pl.*, वहिर्देशवस्तूनि.—(Meaning) अर्थः, अभिप्रायः, अभिप्रेतं, विवक्षा, उद्देशः, आशयः; 'of like import,' समानार्थः -र्था -र्थं.—(Importance) गौरवं, गुरुत्वं, प्रभावः.

IMPORTABLE, *a.* विदेशाद् आनेयः -या -यं or आनेतव्यः -व्या -व्यं.

IMPORTANCE, *s.* (Consequence) गौरवं, गुरुत्वं -ता, गुर्वर्थत्वं, प्रभावः, भारः; 'of a thing,' द्रव्यगुरुता; 'of an act,' कार्यगुरुता.—(Of a person) उत्कर्षः, औत्कर्षं, प्रधानता, मेय्यता, प्रतिपत्तिः *f.*, प्रागल्भ्यं, गर्धः, मानं.

IMPORTANT, *a.* गुरुः -वी -रु, गुर्वर्थः -र्था -र्थं, बह्वर्थः -र्था -र्थं, महार्थः -र्था -र्थं, परमार्थः -र्था -र्थं, गुरुप्रभावः -वा -वं, महाप्रभावः -वा -वं, बहुप्रभावः -वा -वं, परमप्रभावः -वा -वं, परमः -मा -मं, अलघुः -घुः -घु, महोपकारी -रिणी -रि (न्), भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), आवश्यकः -की -कं; 'important object,' गुर्वर्थः, परमार्थः, महार्थः; 'most important,' गरिष्ठः -ष्ठा -ष्ठं, गुरुतमः -मा -मं; 'more important,' गरीयान् -यसी -यः (स्).

IMPORTANTLY, *adv.* गुरु, परमप्रभावेण, परमं, अलघु.

IMPORTATION, *s.* (Act of bringing from a foreign country) विदेशात् or वहिर्देशात् or देशान्तराद् आनयः -यनं or उपनयः -यनं or आवाहनं or आवहनं or उपवाहनं.—(The commodities imported) विदेशाद् आनीतानि द्रव्याणि, देशान्तराद् आनीतवस्तूनि, विदेशीयवस्तुसमूहः.

IMPORTED, *p. p.* विदेशात् or वहिर्देशाद् आनीतः -ता -तं or उपनीतः -ता -तं.

IMPORTER, *s.* विदेशात् or वहिर्देशाद् वाणिज्यद्रव्यानेता *m.* (तृ).

IMPORTUNACY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, अतिप्रार्थनं -ना, आग्रहः, अतिनिर्बन्धेन याचना or प्रार्थनं, वारं वारं प्रार्थना, नित्यप्रार्थनं, नित्ययाचना, नित्ययाचनेन परोद्वेजनं or परायासकरणं.

IMPORTUNATE, *a.* निर्बन्धशीलः -ला -लं, अतिनिर्बन्धशीलः -ला -लं, आग्रही -हिणी -हि (न्), आग्रहशीलः -ला -लं, अतियाचकः -का -कं, अतिप्रार्थकः -का -कं, निर्बन्धेन याचकः -का -कं, नित्यप्रार्थकः -का -कं, नित्यं याचनेन परोद्वेजकः -का -कं or परायासकरः -री -रं, वारं वारं प्रार्थकः -का -कं; 'importunate solicitation,' निर्बन्धः, आग्रहः.

IMPORTUNATELY, *adv.* निर्बन्धेन, अतिनिर्बन्धेन, आग्रहेण, साग्रहं, प्रसभं, मुहुर्मुहुः, पुनःपुनर्.

IMPORTUNATENESS, *s.* *See* IMPORTUNACY.

To IMPORTUNE, *v. a.* अतिनिर्बन्धेन or निर्बन्धेन प्रार्थ् (c. 10. -अर्थयति -यितुं) or अभ्यर्थ् or याच् (c. 1. याचति -चितुं) or अभियाच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, अतियाचनेन परम् उद्विज् (c. 10. -वेजयति -यितुं), नित्यप्रार्थनेन परम् आयस् (c. 10. -यासयति -यितुं).

IMPORTUNED, *p. p.* निर्बन्धेन प्रार्थितः -ता -तं or याचितः -ता -तं, अतियाचितः -ता -तं.

IMPORTUNER, *s.* अतिप्रार्थकः, अतियाचकः, निर्बन्धेन प्रार्थकः, अतियाच्ञया परोद्वेजकः.

IMPORTUNITY, *s.* निर्बन्धः, अतिनिर्बन्धः, अतियाचना -नं, आग्रहः, वारं वारं प्रार्थना, पुनःपुनः प्रार्थनं, अतियाचनेन परोद्वेजनं. *See* IMPORTUNACY.

To IMPOSE, *v. a.* (Lay on) न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), समाविश्, नियुज् (c. 10. -योजयति -यितुं, c. 7. -युनक्ति -योक्तुं), धा (c. 3. दधाति, धातुं), निधा, विधा, आरुह् in caus. (-रोपयति -यितुं), स्था in caus. (स्थापयति -यितुं), उपस्था, अवस्था.—(Set over) अधिकृ, उपधिकृ, नियुज्, विनियुज्.—(Impose upon, deceive) प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, वञ्च् (c. 10. वञ्चयते -ति -यितुं), परिवञ्च्, छल् (c. 10. छलयति -यितुं), अभिसन्धा, अतिसन्धा, दम्भ् (c. 5. दभ्नोति, दम्भितुं).

IMPOSED, *p. p.* न्यस्तः -स्ता -स्तं, निवेशितः -ता -तं, नियुक्तः -क्ता -क्तं, नियोजितः -ता -तं, विहितः -ता -तं, अधिकृतः -ता -तं; 'imposed upon,' वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, विप्रलब्धः -ब्धा -ब्धं, अतिसंहितः -ता -तं.

IMPOSING, *a.* विस्मयोत्पादकः -का -कं, आश्चर्यकरः -रा -रं, विस्मापकः -का -कं, अद्भुतः -ता -तं, गुरुः -वी -रु, महातेजाः -जाः -जः (स्).

IMPOSITION, *s.* (Act of laying on) न्यासः, न्यसनं, निवेशनं, आरोपणं, स्थापनं; 'of hands,' हस्तन्यासः.—(That which is imposed, a tax) करः, शुल्कः -ल्कं.—(Task given as a punishment) साहसं, व्रतं, शिष्येण दण्डार्थेन अधिकक्लेश्यं किञ्चित्.—(Fraud, deception) दम्भः, वञ्चनं -ना, छलं, प्रलम्भः, विप्रलम्भः अभिसन्धिः *m.*, अतिसन्धानं.

IMPOSSIBILITY, *s.* अशक्यता, असाध्यता, अकर्तव्यता, अकरणीयता, अकार्यता.—(An impossibility, an absurdity) असाध्यं, असम्भवः, मृषार्थकं, शशविषाणं, शशशृङ्गं, खपुष्पं, गगणपुष्पं, गगणकुसुमं; 'impossibilities,' असाध्यानि *n. pl.*

IMPOSSIBLE, *a.* अशक्यः -क्या -क्यं, असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असम्भवः -वा -वं, अकर्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्यः -र्या -र्यं, असङ्गतः -ता -तं, अघटितः -ता -तं, अघटमानः -ना -नं, अघटनीयः -या -यं, अगम्यः -म्या -म्यं, अप्राप्यः -प्या -प्यं, अपार्यः -र्या -र्यं, अपारणीयः -या -यं, अक्षमः -मा -मं.

IMPOST, *s.* करः, शुल्कः -ल्कं, राजकरं, कारः, राजग्राह्यभागः, राजसं, राजदेयं, राजधनं, शालिकः, तारिकं, तार्यं.

IMPOSTHUME, *s.* विद्रधिः *m.*, पूयसम्पूर्णः स्फोटः or विस्फोटः, सपूयव्रणं.

IMPOSTOR, *s.* (Deceiver) दम्भी *m.* (न्), दाम्भिकः, दम्भकः, कुहकः, कूटकारः, कूटकः, वञ्चकः, कपटी *m.* (न्), कापटिकः, धूर्तः, कितवः, प्रतारकः, छद्मवेशी *m.* (न्).—(In religion) धर्मध्वजी *m.* (न्), आर्य-

लिङ्गी *m.* (न्), आर्य्यरूपः, धर्म्मीपधः, पाषण्डः, पाखण्डः, लिङ्गवृत्तिः *m.*, सङ्घलिङ्गी *m.* (न्), छद्मतापसः, कपटधर्म्मी *m.* (न्).

IMPOSTURE, *s.* दम्भः, वञ्चनं -ना, प्रवञ्चना, प्रलम्भः, विप्रलम्भः, कूटः -टं, कपटः -टं, व्याजः, छलं -लना, कैतवं, कौटं, उपधिः *m.*, प्रतारणं -णा, कुहकः, अभिसन्धिः *m.*, अतिसन्धानं, छद्म *n.* (न्).

IMPOTENCE, IMPOTENCY, *s.* (Want of strength or power) वीर्य्यहानिः *f.*, शक्तिहीनता, अशक्तिः *f.*, अशक्तता, अवीर्य्यं, निर्बलता, बलहीनता, सत्त्वहानिः *f.*, निःसत्त्वं, सत्त्वाभावः, वीर्य्याभावः, असामर्थ्यं, असमर्थत्वं, अतेजस् *n.*, तेजोहीनता, क्लीवता, दौर्बल्यं, दुर्बलता, शक्तिवैकल्यं.—(Absence of virility) क्लीवत्वं, क्लैब्यं, अपुंस्त्वं, निष्पुरुषत्वं, अपौरुषं, नपुंसकत्वं, ध्वजभङ्गः, निर्वीजता, निष्फलत्वं, अजनकता.

IMPOTENT, *a.* (Without power) निर्बलः -ला -लं, बलहीनः -ना -नं, शक्तिहीनः -ना -नं, अशक्तः -क्ता -क्तं, अबलः -ला -लं, असमर्थः -र्था -र्थं, सामर्थ्यहीनः -ना -नं, निर्वीर्य्यः -र्य्या -र्य्यं, वीर्य्यहीनः -ना -नं, अवीरः -रा -रं, निःसत्त्वः -त्त्वा -त्त्वं, सत्त्वहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), तेजोहीनः -ना -नं, गततेजाः &c., अकल्यः -ल्या -ल्यं, दुर्बलः -ला -लं, अक्षमः -मा -मं, अपारगः -गा -गं.—(Wanting virility) क्लीवः -वा -वं, पुंस्त्वहीनः -ना -नं, पुंशक्तिहीनः -ना -नं, निष्पुरुषः -षा -षं, पुरुषशक्तिवर्जितः -ता -तं, नपुंसकः -का -कं, निर्वीजः -जा -जं, भग्नध्वजः -जा -जं, निष्फलः -ला -लं.

IMPOTENTLY, *adv.* निर्बलं, अबलं, दुर्बलं, अवीरवत्, निर्वीर्य्यवत्, क्लीववत्, निर्वीर्य्यं, बलं विना, वीर्य्यं विना, निःसत्त्वेन.

To IMPOUND, *v. a.* यूथपरिभ्रष्टपश्वादि अवरोधस्थाने निरुध् (c. 7. -रुणद्धि -रोद्धुं) or रक्ष् (c. 1. रक्षति -क्षितुं).

To IMPOVERISH, *v. a.* दरिद्रीकृ, निर्धनीकृ, क्षीणीकृ, धनं नश् (c. 10. नाशयति -यितुं), क्षीणधनं -नां -नं कृ.—(Enfeeble, exhaust strength) कृश (nom. कृशयति -यितुं), कृशीकृ, तेजः or सत्त्वं or वीर्य्यं हृ (c. 1. हरति, हर्त्तुं) or नश्, दुर्बलीकृ, क्षि in caus. (क्षपयति -यितुं).

IMPOVERISHED, *p. p.* (Reduced to poverty) क्षीणधनः -ना -नं, निर्धनः -ना -नं, दरिद्रितः -ता -तं, दरिद्रीकृतः -ता -तं, दारिद्र्यगतः -ता -तं, धनच्युतः -ता -तं, क्षीणार्थः -र्था -र्थं, नष्टार्थः -र्था -र्थं, नष्टधनः -ना -नं, गतविभवः -वा -वं, प्रचलितविभवः -वा -वं, शिथिलवसुः -सुः -सु, विगतश्रीकः -का -कं, विनष्टलक्ष्मीकः -का -कं, निष्किञ्चनः -ना -नं, अकिञ्चनः -ना -नं.—(Exhausted of energy) क्षीणसत्त्वः -त्त्वा -त्त्वं, कृशीभूतः -ता -तं, गतवीर्य्यः -र्य्या -र्य्यं, च्युतोत्साहः -हा -हं.

IMPOVERISHMENT, *s.* दरिद्रता, दारिद्र्यं, दरिद्रीकरणं, धननाशः, धनहानिः *f.*, धनच्युतिः *f.*, सत्त्वहानिः *f.*, क्षीणता.

IMPRACTICABILITY, *s.* असाध्यता -त्वं, असाधनीयता, अकर्त्तव्यता, अकरणीयता, अकार्य्यता, अशक्यता -त्वं, कर्त्तुम् अशक्यता, असम्भवत्वं, असम्भाव्यता, अनुपपाद्यता, अघटनीयत्वं, अगम्यत्वं, दुष्करत्वं.

IMPRACTICABLE *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अशक्यः -क्या -क्यं, कर्त्तुम् अशक्यः -क्या -क्यं, अकृत्यः -त्या -त्यं, अघटनीयः -या -यं, असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अनुपपाद्यः -द्या -द्यं, दुष्करः -रा -रं, अगम्यः -म्या -म्यं, अपाय्यः -य्यी -य्यं.

IMPRACTICABLY, *adv.* असाधनीयं, अकरणीयं, असम्भवेन, असम्भावनीयं.

To IMPRECATE, *v. a.* शप् (c. 1. शपति -ते, c. 4. शप्यति, शप्तुं), अभिशप्, परिशप्, आक्रुश् (c. 1. -क्रोशति -क्रोष्टुं), अमङ्गलं or अनिष्टम् आशंस् (c. 1. -शंसते -सितुं) or प्रार्थ् (c. 10. -अर्थयते -यितुं), गर्ह् (c. 1. गर्हते -र्हितुं), भर्त्स् (c. 10. भर्त्सयति -यितुं), धिक्कृ.

IMPRECATED, *p. p.* अभिशप्तः -प्ता -प्तं, आक्रुष्टः -ष्टा -ष्टं, धिक्कृतः -ता -तं.

IMPRECATION, *s.* शापः, अभिशापः, आक्रोशनं, आक्रोशः, अभीशङ्कः, अभिमङ्कः, अनिष्टाशंसनं, अनिष्टप्रार्थना, मन्दप्रार्थना, मन्दवाञ्छा, भर्त्सनं, गालिः *m.*, धिक्करणं.

IMPRECATORY, *a.* अभिशापार्थकः -का -कं, आक्रोशकः -की -कं, अनिष्टाशंसकः -का -कं, अनिष्टप्रार्थकः -का -कं.

IMPREGNABLE, *a.* अलङ्घनीयः -या -यं, अलंघ्यः -घ्या -घ्यं, अनाक्रमणीयः -या -यं, अनाक्रम्यः -म्या -म्यं, दुराक्रमः -मा -मं, दुराक्रामः -मा -मं, अगम्यः -म्या -म्यं, दुर्गमः -मा -मं.—(Invincible) अजेयः -या -यं, दुर्जयः -या -यं, अपराजितः -ता -तं.

To IMPREGNATE, *v. a.* (Infuse the principle of conception, make pregnant) सिच् (c. 6. सिञ्चति, सेक्तुं), निषिच्, आसिच्, रेतः सिच्, गर्भं ग्रह् in caus. (ग्राहयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं), गर्भवतीं कृ, ससत्त्वां कृ, आपन्नसत्त्वां कृ, अन्तरापत्यां कृ, सञ्जातगर्भां कृ, गर्भाधानं कृ, निषेकं कृ.—(Infuse particles of one thing into another) प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), निषिच्, प्रक्षेपं कृ, व्याप् (c. 5. -आप्नोति -आप्तुं), व्याप्तं -प्तां -प्तं कृ.

IMPREGNATED, *p. p.* सिक्तः -क्ता -क्तं, गृहीतगर्भा, उत्पन्नगर्भा, ससत्त्वा, आपन्नसत्त्वा, सञ्जातगर्भा.—(Infused) व्याप्तः -प्ता -प्तं.

IMPREGNATING, *part.* गर्भदः -दा -दं, सेचकः -का -कं, गर्भोत्पादकः -का -कं.

IMPREGNATION, *s.* सेकः, सेचनं, निषेकः, आसेकः, आसेचनं, गर्भग्रहणं, गर्भोत्पादनं, गर्भाधानं, गर्भधारणं, भेरुण्डं.

IMPREGNATOR, *s.* सेक्ता *m.* (क्तृ), सेचकः, निषेककारी *m.* (न्), गर्भदः, गर्भोत्पादकः.

To IMPRESS, *v. a.* (Imprint, stamp, make a mark by pressure) मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (nom. चिह्नयति -यितुं), मुद्रितं -तां -तं कृ, लक्ष् (c. 10. लक्षयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं), निपीड् (c. 10. -पीडयति -यितुं) अङ्कितं -तां -तं कृ.—(Fix deep in the mind, &c.) हृदये सुनिष्ठितं -तां -तं कृ, चित्तनिष्ठं -ष्ठां -ष्ठं कृ, हृत्स्थं -त्स्थां -त्स्थं कृ, हृन्नतं -तां -तं कृ, हृदयगतं -तां -तं कृ, हृदये कृ, हृदये निविश् or निष्ठा in caus. (-ष्ठापयति -यितुं); 'to be impressed,' निष्ठा (c. 1. -तिष्ठति -ष्ठातुं).—(Impress seamen) राजाज्ञया बलात्कारेण धृत्वा नाविकादिकर्म्मणि व्यापृ (c. 10. -पारयति -यितुं).

IMPRESS, *s.* मुद्रा, अङ्कः, चिह्नं, न्यासः, लक्षणं; 'having the impress of knowledge) ज्ञानमुद्रः -द्रा -द्रं.

IMPRESSED, *p. p.* (Imprinted) मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, कृतमुद्रः -द्रा -द्रं, मुद्राङ्कितः -ता -तं, अङ्कितः -ता -तं, कृताङ्कः -ङ्का -ङ्कं, चिह्नितः -ता -तं, समुद्रः -द्रा -द्रं, लक्षितः -ता -तं.—(Infixed) निष्ठितः -ता -तं, निष्ठः -ष्ठा -ष्ठं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं; 'in the mind,' हृदयनिष्ठितः -ता -तं, चित्तनिष्ठः -ष्ठा -ष्ठं, हृदयेगतः -ता -तं, हृन्नतः -ता -तं, हृदयनिवेशितः -ता -तं, हृत्स्थः -त्स्था -त्स्थं.

IMPRESSIBLE, *s.* अङ्कनीयः -या -यं, अंक्यः -क्या -क्यं, चिह्नक्षमः -मा -मं.

IMPRESSION, *s.* (Mark, stamp) मुद्रा, अङ्कः, चिह्नं.—(Act of impressing) अङ्कनं.—(Impression on the mind) संस्कारः, चित्तसंस्कारः, मनःसंस्कारः.—(Idea, image in the mind) बुद्धिः *f.*, मतिः *f.*, अनुभवः, मनोगतं, मनसिजं, आभासः, भासः.—(Sensible effect) उत्पत्तिः, निष्पत्तिः, उत्पत्तिः *f.*, सम्पत्तिः.—(Indentation) आघातचिह्नं, अभिघातचिह्नं, भङ्गः, छेदः.—(Number of books printed at once) एकवारे मुद्रितो ग्रन्थसमूहः.

IMPRESSIVE, *a.* हृदयङ्गमः -मा -मं, हृन्नमः -मा -मं, हृदयग्राही -हिणी -हि

(न्), चित्तहारी -रिणी -रि (न्), हृदयस्पृक् *m.f.n.* (श्), मर्म्मस्पृक् *m.f.n.*, विस्मयोत्पादकः -का -कं, हृद्वेदकः -का -कं, भावोत्पादकः &c.

IMPRESSIVELY, *adv.* हृदयङ्गमप्रकारेण, यथा हृदयं स्पृश्यते इति प्रकारेण.

IMPRESSIVENESS, *s.* हृदयङ्गमत्वं, हृद्यत्वं, हृदयस्पृक्त्वं, विस्मयोत्पादकत्वं.

IMPRESSMENT, *s.* राजाज्ञया बलात्कारधरणाननन्तरं नाविकादिकर्म्मणि प्रवर्त्तनं.

To IMPRINT, *v. a.* मुद्र् (nom. मुद्रयति -यितुं), मुद्रीकृ, मुद्रितं -तां -तं कृ, अङ्क् (c. 10. अङ्कयति -यितुं), चिह्न् (nom. चिह्नयति -यितुं), प्रणिधा (c. 3. -दधाति -धातुं), न्यस् (c. 4. -अस्यति -असितुं), निविश् (c. 10. -वेशयति -यितुं); 'on the mind,' हृदयनिष्टं -ष्टां -ष्टं कृ, हृदये मुद्रितमिव किञ्चित् कृ, हृदये निविश्.

IMPRINTED, *p. p.* मुद्रितः -ता -तं, मुद्रीकृतः -ता -तं, अङ्कितः -ता -तं, मुद्राङ्कितः -ता -तं, कृतमुद्रः -द्रा -द्रं.—(Infixed) निष्ठितः -ता -तं, न्यस्तः -स्ता -स्तं, निहितः -ता -तं, प्रणिहितः -ता -तं, निवेशितः -ता -तं; 'on the mind,' हृदयनिष्ठः -ष्ठा -ष्ठं, हृदयगतः -ता -तं, हृद्गतः -ता -तं, हृदयनिवेशितः -ता -तं.

To IMPRISON, *v. a.* कारायां or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or बन्ध् (c. 9. बध्नाति, बन्द्धुं), कारागृहं प्रविश् (c. 10. -वेशयति -यितुं), बन्धनालये रक्ष् (c. 1. रक्षति -क्षितुं) or अवरुध् or आसिध् (c. 1. -सेधति -सेद्धुं), कारागुप्तं -प्तां -प्तं कृ.

IMPRISONED, *p. p.* कारागुप्तः -प्ता -प्तं, कारानिरुद्धः -द्धा -द्धं, कारायां बद्धः -द्धा -द्धं, कारावद्धः -द्धा -द्धं, कारागारप्रवेशितः -ता -तं, अवरुद्धदेहः -हा -हं, निरुद्धः -द्धा -द्धं, आसिद्धः -द्धा -द्धं, प्रतिबद्धः -द्धा -द्धं.

IMPRISONMENT, *s.* कारानिरोधः, निरोधः -धनं, कारावन्धनं, बन्धनं, प्रतिबन्धनं, कारागारप्रवेशनं, कारागृहप्रवेशः, कारागोपनं, कारागृहगुप्तिः *f.*, आसेधः, स्थानासेधः, रोधः, सम्प्रतिरोधकः, ग्रहः.

IMPROBABILITY, *s.* असम्भवः -वता -त्वं, असम्भाव्यता, असम्भावनीयता, असम्भावना, अनुपपत्तिः *f.*, अनुपपाद्यता, असङ्गतिः *f.*, असङ्गतत्वं, अघटनीयता, अभवनीयत्वं, अप्रमेयता, असाध्यता.

IMPROBABLE, *a.* असम्भवः -वा -वं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, असम्भावितः -ता -तं, असङ्गतः -ता -तं, अनुपपन्नः -न्ना -न्नं, असत्यसन्निभः -भा -भं, असत्यसङ्काशः -शा -शं, अभवनीयः -या -यं, असाध्यः -ध्या -ध्यं, अप्रमाधनीयः -या -यं, अघटनीयः -या -यं, अघटितः -ता -तं, अघटमानः -ना -नं, अप्रमेयः -या -यं; 'it is improbable,' न उपपद्यते.

IMPROBABLY, *adv.* असम्भवेन, असम्भावनीयं, असङ्गतं, असाध्यं, अन्यथा.

IMPROBITY, *s.* असाधुत्वं -ता, अशुचित्वं, अधर्म्मः, असरलता, असारल्यं, अनृजुता, अदाक्षिण्यं, अशुद्धता, दुष्टता, अभद्रता, नीचत्वं, खलता, जिह्मता, कौटिल्यं, कापट्यं, कौटं, वक्रता.

IMPROMPTU, *adv.* पूर्व्वचिन्ताम् अकृत्वा, पूर्व्वचिन्तां विना, अचिन्तितं, अनायासेन.

IMPROMPTU, *a.* अचिन्तापूर्व्वः -र्व्वा -र्व्वं, अपूर्व्वचिन्तः -न्ता -न्तं, अयत्नपूर्व्वः -र्व्वा -र्व्वं, आकस्मिकः -की -कं, प्रस्तुतः -ता -तं, पूर्व्वविचारहीनः -ना -नं.

IMPROPER, *a.* अयुक्तः -क्ता -क्तं, अयोग्यः -ग्या -ग्यं, अनुचितः -ता -तं, अन्याय्यः -य्या -य्यं, असङ्गतः -ता -तं, अनुपयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनुपपन्नः -न्ना -न्नं, अनर्हः -र्हा -र्हं, असदृशः -शी -शं, अपथ्यः -थ्या -थ्यं, असमीचीनः -ना -नं, असम्भाव्यः -व्या -व्यं, असम्भावनीयः -या -यं, अपथ्यः -थ्या -थ्यं, अयथार्थः -र्था -र्थं; sometimes expressed by कु prefixed; as, 'an improper marriage,' कुविवाहः.—(Improper to be done) अकर्त्तव्यः -व्या -व्यं, अकरणीयः -या -यं, अकार्य्यः -र्य्या -र्य्यं, अननुष्ठेयः -या -यं, नानुष्ठेयः -या -यं, अननुष्ठातव्यः -व्या -व्यं; 'to be spoken,' अवचनीयः -या -यं.

IMPROPERLY, *adv.* अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुचितं -तेन, असाम्प्रतं -ति, असम्यक्, अन्यायेन, अन्यायतस्, असङ्गतं, अयथार्थं, अयोगतस्, अकार्य्यतस्, दुःधर्म्मं, निःधर्म्मं, असम्भावनीयं; 'acting improperly,' अकृत्यकारी -रिणी -रि (न्), व्यभिचारी &c.

IMPROPRIETY, *s.* अयुक्तिः *f.*, अयुक्तता, निर्युक्तिः *f.*, अन्यायः -यत्वं, अनुपयुक्तता, अविनयः, अविनीतता, आनुचित्यं, अनुचितत्वं, अनौचित्यं, अयोग्यता, असमञ्जसं, असामञ्जस्यं, अनुपपत्तिः *f.*, असङ्गतत्वं, व्यलीकता, असम्यक्त्वं, अयाथार्थ्यं; 'of conduct,' अमर्य्यादा, कुचर्य्या, कुचरितं, कुचेष्टितं, दुश्चरितं, दुश्चेष्टितं, अपचारः, अकार्य्यं, अकर्त्तव्यता, भेषः, व्यभिचारः, अनियमः, मर्य्यादातिक्रमः; 'of speech,' अवचनीयता, अवाच्यता.

IMPROSPERITY, *s.* असमृद्धिः *f.*, अकल्याणं, अकुशलं, अशुभं, असम्पत्तिः *f.*

IMPROSPEROUS, *a.* असमृद्धः -द्धा -द्धं, अकल्याणः -णा -णं, अक्षेमवान् -वती -वत् (त्).

IMPROVABILITY, *s.* वर्धनीयता, संवर्धनीयता, वृंहणीयता, श्रेयस्त्वक्षमता.

IMPROVABLE, *a.* वर्धनीयः -या -यं, संवर्धनीयः -या -यं, वृंहणीयः -या -यं, श्रेयस्त्वक्षमः -मा -मं, भद्रतरभावक्षमः -मा -मं, वृद्धिम् आनेयः -या -यं, भद्रतरीकरणीयः -या -यं.

To IMPROVE, *v. a.* (Make better, advance in good qualities) भद्रतरं -रा -रं कृ, अधिकतरं -रां -रं कृ, भद्रतरीकृ, अधिकीकृ, वृध् (c. 10. वर्धयति -यितुं), संवृध्, परिवृध्, वृंह् (c. 10. वृंहयति -यितुं), वृद्धिं नी (c. 1. नयति, नेतुं) or प्राप् in caus. (-आपयति -यितुं), श्रेयस्त्वं or भद्रतरत्वं or भद्रतरभावं नी or प्राप्, श्रेयांसं -यसीं -यः कृ.—(Make productive, turn to good account) सफलं -लां -लं कृ, सफलीकृ, सु प्रयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं).

To IMPROVE, *v. n.* (Grow better, advance in goodness or any excellence) भद्रतरः -रा -रं भू, भद्रतरीभू, वृध् (c. 1. वर्धते -र्धितुं), अभिवृध्, विवृध्, प्रवृध्, संवृध्, वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), श्रेयान् -यसी -यो भू, अधिकः -का -कं भू, अधिकतरः -रा -रं भू, अधिकीभू, अधिकतरीभू, उपचि in pass. (-चीयते), अभ्युदयं or उपचयं गम् or इ (c. 2. एति -तुं); 'improve in knowledge,' विद्यागमं कृ, विद्याप्राप्तिं कृ, विद्याज्ञानं कृ.

IMPROVED, *p. p.* वर्धितः -ता -तं, प्रवृद्धः -द्धा -द्धं, उपचितः -ता -तं, वृंहितः -ता -तं, परिवृंहितः -ता -तं, भद्रतरीभूतः -ता -तं, अधिकीभूतः -ता -तं, समुत्थितः -ता -तं.—(Employed profitably) सफलीकृतः -ता -तं, सुप्रयुक्तः -क्ता -क्तं.

IMPROVEMENT, *s.* (Advancement in any excellence) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं, उपचयः, समुत्थानं, अभ्युदयः, वृंहणं, परिवृंहणं, आधिक्यं, प्राप्तिः *f.*, आगमः.—(State of being better) श्रेयस्त्वं, भद्रतरत्वं, श्रेष्ठता, श्रैष्ठ्यं.—(Advancement in knowledge) विद्यागमः, विद्याप्राप्तिः *f.*, विद्याज्ञानं.—(Progression) प्रगमनं, अग्रगमनं.—(Employment to beneficial purposes) सुप्रयोगः, सफलीकरणं.

IMPROVIDENCE, *s.* अपूर्व्वदृष्टिः *f.*, अदीर्घदृष्टिः *f.*, अपरिणामदृष्टिः *f.* -दर्शनं, अदूरदृष्टिः *f.*, अपूर्व्वचिन्ता, अपूर्व्वविवेचनं, अपूर्व्वनिरूपणं, अप्रसमीक्षा, असमीक्ष्यकारिता, पूर्व्वविवेचनाभावः, पूर्व्वचिन्ताभावः, अपूर्व्वविचारणं -णा, असावधानता.

IMPROVIDENT, *a.* अदीर्घदर्शी -र्शिनी -र्शि (न्), अदूरदर्शी &c., अपूर्व्वदृष्टिः -ष्टिः -ष्टि, अदीर्घदृष्टिः -ष्टिः -ष्टि, अपरिणामदर्शी &c.. अपूर्व्वविवेकी -किनी -कि (न्), असमीक्ष्यकारी -रिणी -रि (न्), अभविष्यद्दर्शी &c.

IMPROVIDENTLY, *adv.* पूर्व्वचिन्तां विना, अग्रविवेचनां विना, अग्रनिरूपणं विना, पूर्व्वविचारणां विना, अपरिणामदृष्ट्या, असमीक्षापूर्व्वं, अप्रसमीक्ष्य, अप्रविमृश्य.

IMPROVING, *part.* or *a.* (Growing better) वर्धमानः -ना -नं, वर्धी

-धिनी -धि (न्), वर्धनः -नी -नं, उपचीयमानः -ना -नं.—(Making better) वर्धकः -का -कं, वृद्धिकरः -री -रं, बृंहणः -णा -णी -णं.

IMPRUDENCE, *s.* अविनयः, अविनीतता, अनीतिः *f.*, दुर्विनीतता, दुर्नीतिः *f.*, दुर्णयः, असमीक्षा, असमीक्ष्यकारित्वं, अविज्ञता, अप्रज्ञता, अप्राज्ञत्वं, अविवेचना, अविचारः -रणा, अविचक्षणता, अवैचक्षण्यं, असावधानता, अमनस्विता.

IMPRUDENT, *a.* अविज्ञः -ज्ञा -ज्ञं, अप्रज्ञः -ज्ञा -ज्ञं, अविचक्षणः -णा -णं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अनभिज्ञः -ज्ञा -ज्ञं, अनीतिमान् -मती -मत् (त्), अनीतिज्ञः -ज्ञा -ज्ञं, अविमृश्यकारी -रिणी -रि (न्), असमीक्ष्यकारी &c., अमनस्वी -स्विनी -स्वि (न्), अमतिमान् -मती -मत् (त्), अविवेकी -किनी -कि (न्), अविवेचकः -का -कं, अविचारणशीलः -ला -लं, अकार्य्यचिन्तकः -का -कं, अबुधः -धा -धं, असावधानः -ना -नं.

IMPRUDENTLY, *adv.* अविज्ञवत्, अविनीतवत्, अविमृश्य, असमीक्ष्य, असमीक्षापूर्व्वं, अविचारपूर्व्वं, अविचार्य्य, अनालोचितं, अधिचारितं, अबुधवत्.

IMPUDENCE, *s.* निर्लज्जता -त्वं, लज्जाहीनता, प्रलज्जता, अलज्जा, धृष्टता, धार्ष्ट्यं, प्रगल्भता, प्रागल्भ्यं, वैयात्यं, त्रपाहीनता, अनपत्रपत्वं, निस्त्रपत्वं, निरपत्रपत्वं, अव्रीडता, व्रीडाहीनता, अविनयः, अविनीतता.

IMPUDENT, *a.* निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, अलज्जः -ज्जा -ज्जं, विलज्जः -ज्जा -ज्जं, अविनीतः -ता -तं, दुर्विनीतः -ता -तं, धृष्टः -ष्टा -ष्टं, अत्रपः -पा -पं, त्रपाहीनः -ना -नं, निस्त्रपः -पा -पं, निरपत्रपः -पा -पं, अनपत्रपः -पा -पं, वियातः -ता -तं, प्रगल्भः -ल्भा -ल्भं, व्रीडाहीनः -ना -नं, स्वल्पव्रीडः -डा -डं, अल्पलज्जः -ज्जा -ज्जं, अनिभृतः -ता -तं, धर्षितः -ता -तं, धृष्णुक् *m. f. n.* (ज्), धृष्णुः -ष्णुः -ष्णु, त्यक्तलज्जः -ज्जा -ज्जं, प्रौढः -ढा -ढं.

IMPUDENTLY, *adv.* धृष्टवत्, अविनीतवत्, दुर्विनीतवत्, अविनीतं, धार्ष्ट्येन, प्रगल्भं, प्रगल्भवत्, लज्जां विना, वैयात्येन, प्रौढवत्, वियातवत्.

To IMPUGN, *v. a.* विपरीतं वद् (c. 1. वदति -दितुं), अपवद्, विवद्, प्रत्याख्या (c. 2. -ख्याति -तुं), अधरीकृ, विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, प्रतिकूल (nom. प्रतिकूलयति -यितुं).

IMPUGNED, *p. p.* अपवादितः -ता -तं, प्रत्याख्यातः -ता -तं, अधरीकृतः -ता -तं, विरुद्धः -द्धा -द्धं, बाधितः -ता -तं, विप्रतिपन्नः -न्ना -न्नं.

IMPUGNER, *s.* विपरीतवादी *m.* (न्), अपवादकः, प्रतिवादी *m.* (न्),

IMPULSE, *s.* वेगः, आवेगः, मनोवेगः, प्रेरणं -णा, प्रणोदः, प्रवृत्तिः -त्तिनं, प्रोत्साहः -हनं, प्ररोचनं, शक्तिः *f.*—(Motive) हेतुः *m.*, प्रयोगः, प्रयोजनं, निमित्तं, निबन्धनं, कारणं.—(Mental impression) मनःसंस्कारः.

IMPULSION, *s.* प्रेरणं -णा, प्रणोदः -दनं, प्रचोदनं, आकर्षः -र्षणं, प्रवर्त्तनं.

IMPULSIVE, *a.* प्रेरकः -का -कं, प्रणोदकः -का -कं, प्रचोदकः -का -कं.—(Actuated by impulse) वेगी -गिनी -गि (न्), वेगवान् -वती -वत् (त्), वेगशीलः -ला -लं.

IMPUNCTUAL, *a.* असमयपालकः -का -कं, असामयिकः -की -कं, अकालिकः -की -कं.

IMPUNITY, *s.* (Exemption from punishment) अदण्डः -ण्डः, दण्डाभावः, असाहसं, अशिष्टिः *f.*—(Exemption from injury or hurt) अक्षतिः *f.*, अक्षतं, अहिंसा, हिंसाभावः, अपीडा, अनाशः, अनपकारः; 'with impunity to one's self,' स्वयमक्षतेन.

IMPURE, *a.* अशुद्धः -द्धा -द्धं, अशुचिः -चिः -चि, अपवित्रः -त्रा -त्रं, अमेध्यः -ध्या -ध्यं, अपूतः -ता -तं, अशुद्धिः -द्धिः -द्धि, अशौची -चिनी -चि (न्), आशौची &c., अनिर्मलः -ला -लं, समलः -ला -लं, मलवान् -वती -वत् (त्), मलिनः -ना -नं, अपुण्यः -ण्या -ण्यं, अपवनः -ना -नं, शौचहीनः -ना -नं.—(Obscene) गर्हितः -ता -तं, गर्ह्यः -र्ह्या -र्ह्यं, कुत्सितः -ता -तं, अवाच्यः -च्या -च्यं.—(Unchaste) लम्पटः -टा -टं, पांशुलः -ला -लं.

IMPURELY, *adv.* अशुद्धं, अपवित्रं, अपुण्यं, समलं, साशौचं, अशुचिवत्, अमेध्यं, अशुद्धवत्, मलिनं, लम्पटवत्, गर्हितं.

IMPURENESS, IMPURITY, *s.* अशुद्धिः *f.*, अशुद्धत्वं -ता, अशोधनं, अशुचित्वं -ता, अशुचिः *f.*, अशौचं -चत्वं, आशौचं, अपवित्रत्वं -ता, अमेध्यता, अपुण्यता, अपूतता, अपूतिः *f.*, समलता, मलवत्त्वं, मालिन्यं, मलं, कलुषत्वं, कालुष्यं, शौचहीनता, अप्रायत्यं.—(Obscenity) गर्हितत्वं, कुत्सितत्वं, अवाच्यता.—(Unchastity) लम्पटत्वं, लाम्पट्यं, पांशुलता; 'an impure thing,' अपद्रव्यं.

To IMPURPLE, *v. a.* धूम्रीकृ, धूमलीकृ, धूमल (nom. धूमलयति -यितुं). *See* EMPURPLE.

IMPUTABLE, *a.* आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः -या -यं, अभिसम्बन्धनीयः -या -यं.

IMPUTATION, *s.* (Act of imputing) आरोपः -पणं, अध्यारोपः -पणं, अभिसम्बन्धनं, सम्बन्धनं, प्रसङ्गः; 'imputation of a crime,' दोषारोपः, दोषकल्पनं, दोषप्रसङ्गः.—(Charge) अभियोगः, अपवादः, अभिशंसनं, संशयः.—(Reproach) अवक्षेपः, क्षेपः, अभिवादः, परीवादः, दुर्वाक्यं, दुरुक्तं, तिरस्कारवाक्यं, कलङ्कः.

To IMPUTE, *v. a.* (Attribute) आरुह् in caus. (-रोपयति -यितुं), अध्यारुह्, अभिसम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), सम्बन्ध्.—(Impute a crime to any one) कस्मिंश्चिद् दोषम् आरुह् or क्षिप् (c. 6. क्षिपति, क्षेप्तुं), दोषारोपणं कृ, दोषप्रसङ्गं कृ, दोषकल्पनं कृ.—(Cast imputations) अवक्षिप्, अधिक्षिप्, क्षिप्, अपवद् (c. 1. -वदति -दितुं).

IMPUTED, *p. p.* आरोपितः -ता -तं, आरूढः -ढा -ढं, अध्यारोपितः -ता -तं.

IMPUTER, *s.* आरोपकः, आरोपयिता *m.* (तृ), आरोपणकृत् *m.*, अवक्षेपकः.

IN, *prep.* नि prefixed to roots may give the sense of 'in;' as, 'to enter in,' निविश्; 'to dwell in,' निवस्. When 'in' is used for 'within,' or 'in the midst,' it may be expressed by अन्तर्, अन्तरा, अन्तरे, मध्ये. But the most frequent use of 'in' is expressed in Sanskrit by the locative case, without any preposition; as, 'in the city,' नगरे; 'in the night,' रात्रौ; 'a tree planted in the earth,' पृथिव्यां रोपितो वृक्षः; 'confidence in you,' त्वयि विश्वासः; 'engaging in the acquisition of wealth,' अर्थार्जने प्रवृत्तिः *f.*; 'the sun in the east,' प्राचि सूर्य्यः; 'he sinks in the mud,' पङ्के मज्जति; 'he delights in the good of others,' परहिते रमते; 'in the front of the fight,' रणमूर्द्धि. In cases where 'in' refers to any division of time, or the manner in which any thing is done, it is usually expressed in Sanskrit by the instr. case; as, 'in three years,' त्रिभिर् वर्षैः; 'in twelve months,' द्वादशभिर् मासैः; 'in hundreds of years,' वर्षशतैः; 'in an instant,' क्षणेन; 'in process of time,' कालपर्य्यायेण; 'in how long time?' कियता कालेन; 'in a short time,' अचिरेण; 'in this manner,' अनेन प्रकारेण; 'in abundance,' बाहुल्येन; 'in the form of a man,' नररूपेण; 'in joke,' परिहासेन; 'written in Sanskrit,' संस्कृतेन रचितं. Certain adverbial affixes and prefixes may often express 'in;' as, 'in front,' अग्रतस्; 'in the first place,' प्रथमतस्; 'in another place,' अन्यत्र; 'in one place,' एकत्र; 'in many places,' बहुत्र; 'in the next world,' अमुत्र; 'in every way,' सर्व्वथा; 'in another way,' अन्यथा; 'in one way,' एकधा; 'in a hundred ways,' शतधा; 'in many ways,' बहुधा; 'in some way,'

कथञ्चित्, कथञ्चन; 'in small quantities,' अल्पशस्; 'in large quantities,' बहुशस्; 'in proper order,' क्रमशस्, क्रमतस्, अनुक्रमं; 'in every direction,' प्रतिदेशं; 'in three directions,' त्रेधा; 'in like manner,' तथैव, तद्वत्; 'in vain,' वृथा, मुधा. Sometimes 'in' may be expressed by a participle; as, 'he has pleasure in calumniating others,' अन्यान् परिवदन् स तुष्यति or पराभिशंसनं कृत्वा तुष्टो भवति; 'what bravery is there in killing a sleeping man?' किं पौरुषं हत्वा सुप्तं; 'he said that to me in joke,' उपहस्य माम् तद् अवदत्. The sense of 'in,' may be inherent in a noun; as, 'to go in and out,' गमनागमने कृ. 'In as much as,' is expressed by यस्मात्, येन, or by the abl. or instr. case of the abstract noun; as, 'in as much as it is founded on observation,' प्रत्यक्षमूलत्वात् or प्रत्यक्षमूलतया.

Inability, *s.* अशक्तिः *f.*, अशक्तता -त्वं, असामर्थ्यं, असमर्थत्वं, अक्षमता -त्वं, शक्तिहीनता, अबलत्वं, निर्बलत्वं, दौर्बल्यं, बलहीनता, शक्तिवैकल्यं, अयोग्यता -त्वं.

Inabstinence, *s.* असंयमः -मनं, असंयामः, अयतेन्द्रियत्वं, अयताहारत्वं, अनिवृत्तिः *f.*

Inaccessibility, *s.* अगम्यता, अनभिगम्यता, दुर्गम्यता, दौर्ग्यं, अप्राप्यता, अलङ्घनीयत्वं, अलभ्यता, गहनत्वं.

Inaccessible, *a.* अगम्यः -म्या -म्यं, अनभिगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुर्गम्यः -म्या -म्यं, दुर्गमः -मा -मं, दुर्गः -र्गा -र्गं, अप्राप्यः -प्या -प्यं, दुष्प्राप्यः -प्या -प्यं, दुरासदः -दा -दं, दुरारोहः -हा -हं, सुदुरारुहः -हा -हं, दुरुपक्रमः -मा -मं, अलङ्घनीयः -या -यं, गहनः -ना -नं, विषमस्थः -स्था -स्थं.—(Not to be obtained) अलभ्यः -भ्या -भ्यं, दुर्लभः -भा -भं, अप्रापणीयः -या -यं.—(Forbidding access, haughty) दुर्धर्षः -र्षा -र्षं.

Inaccuracy, *s.* अशुद्धिः *f.*, अशुद्धता -त्वं, अशोधनं, अयाथार्थ्यं, असम्यकत्वं, असङ्गतत्वं, अतथ्यं, असामञ्जस्यं, भ्रमः, प्रमादः, अन्यथात्वं.

Inaccurate, *a.* अशुद्धः -द्धा -द्धं, अशोधितः -ता -तं, अयथार्थः -र्था -र्थं, असम्यङ्-मीची -म्यक् (क्), असङ्गतः -ता -तं, अतथ्यः -थ्या -थ्यं, असमञ्जसः -सा -सं, अनञ्जसः -सा -सं, अयाथार्थिकः -की -कं, अनृतः -ता -तं.

Inaccurately, *adv.* अशुद्धं, अयथार्थं, असम्यक्, अतथ्यं, असङ्गतं, असमञ्जसं, अन्यथा, अनञ्जसा, अनृतं.

Inaction, *s.* अकर्म्म *n.* (न्), अक्रिया, अक्रियत्वं -ता, अप्रवृत्तिः *f.*, नैष्कर्म्यं, अचेष्टा, अनुद्योगः, आलस्यं, अलसता, अव्यवसायः, निर्व्यापारः, औदासीन्यं, औदास्यं, निर्वृत्तिः *f.*

Inactive, *a.* अकर्म्मा -र्म्मी -र्म्मि (न्), अकर्म्मकृत् *m. f. n.*, निष्कर्म्मा -र्म्मी -र्म्मि (न्), अक्रियः -या -यं, क्रियाशून्यः -न्या -न्यं, निश्चेष्टः -ष्टा -ष्टं, निरुद्योगः -गा -गं, निरुत्साहः -हा -हं, निरुद्यमः -मा -मं, अप्रवर्त्तकः -का -कं, अयत्नः -त्ना -त्नं, अप्रयत्नः -त्ना -त्नं, प्रयत्नशून्यः -न्या -न्यं, अयत्नकारी -रिणी -रि (न्), अयत्नवान् -वती -वत् (त्), लघुप्रयत्नः -त्ना -त्नं, अव्यवसायी -यिनी -यि (न्), निर्व्यापारः -रा -रं, वृत्तिरहितः -ता -तं, अलसः -सा -सं, उदासीनः -ना -नं, अनुद्यतः -ता -तं; 'to remain inactive,' अलसीभू, अलसो वृत्, उदास् (c. 2. -आस्ते -आसितुं).

Inactively, *adv.* निरुद्योगं, निरुत्साहं, उद्योगम् अकृत्वा, यत्नं विना, प्रयत्नम् अकृत्वा, अलसवत्, उदासीनवत्.

Inactivity, *s.* अक्रिया -त्वं, अकर्म्म *n.* (न्), अनुद्योगः, अनुत्साहः, अप्रवृत्तिः *f.*, अव्यवसायः, अयत्नः, अप्रयत्नता, अचेष्टा, निर्व्यापारः, नैष्कर्म्यं, क्रियाशून्यता, आलस्यं, अलसता, औदासीन्यं, औदास्यं, कार्य्यप्रद्वेषः.

Inadequacy, *s.* अक्षमता -त्वं, असामर्थ्यं, असमर्थता, अयोग्यता, अनुपयुक्तत्वं.

Inadequate, *a.* अक्षमः -मा -मं, असमर्थः -र्था -र्थं, अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अपर्य्याप्तः -प्ता -प्तं, अनुचितः -ता -तं, अप्रभूतः -ता -तं, कार्य्याक्षमः -मा -मं, अनलम् indec.

Inadequately, *adv.* अपर्य्याप्तं, अनुपयुक्तं, अयोग्यं, अनलम्, अक्षमं.

Inadmissible, *a.* अनादेयः -या -यं, अग्राह्यः -ह्या -ह्यं, अग्रहणीयः -या -यं, अनुपादेयः -या -यं, अस्वीकरणीयः -या -यं, अस्वीकार्य्यः -र्य्या -र्य्यं, अमन्तव्यः -व्या -व्यं; 'into society,' अपांक्तेयः -या -यं, अपांक्तः -क्ता -क्तं, अपांक्तः -क्ता -क्तं.

Inadvertence, inadvertency, *s.* प्रमादः, प्रमाद्यं, अनवधानं -नता, असावधानता, अमनोयोगः, अनपेक्षा, अनवेक्षा, उपेक्षा.

Inadvertent, *a.* प्रमादी -दिनी -दि (न्), प्रमादवान् -वती -वत् (त्), प्रमत्तः -त्ता -त्तं, अनवधानः -ना -नं, असावधानः -ना -नं, अनवहितः -ता -तं, उपेक्षकः -का -कं, निरपेक्षः -क्षा -क्षं, अमनोयोगी -गिनी -गि (न्).

Inadvertently, *adv.* प्रमादेन -दात्, प्रमत्तं, सप्रमादं, प्रमाद्यात्, अनवधानेन -नात्, अनवहितं, अमनोयोगात्, अनपेक्षया, निरपेक्षं, असमीक्ष्य.

Inalienable, *a.* अविभेद्यः -द्या -द्यं, अविभेदनीयः -या -यं, अविच्छेदनीयः -या -यं, परवशे कर्त्तुम् अशक्यः -क्या -क्यं, परवशे स्थापयितुम् अशक्यः -क्या -क्यं, अदेयः -या -यं, अनन्यादेयः -या -यं, अनन्यहार्य्यः -र्य्या -र्य्यं, अनन्यसमर्पणीयः -या -यं, परादेयः -या -यं, वंशमात्रोपभोग्यः -ग्या -ग्यं; 'inalienable property,' पराधीनं कर्त्तुं न शक्यते यद् द्रव्यं.

Inalienableness, *s.* अविभेद्यता, अविभेदनीयता, अनन्यादेयता, अनन्यहार्य्यता.

Inalterable, *a.* अविकार्य्यः -र्य्या -र्य्यं, अविकरणीयः -या -यं.

Inamissible, *a.* अहेयः -या -यं, अहार्य्यः -र्य्या -र्य्यं, अत्याज्यः -ज्या -ज्यं, अहरणीयः -या -यं, अनाश्यः -श्या -श्यं, अविनाश्यः -श्या -श्यं.

Inamorata, *s.* प्रिया, कान्ता, कामिनी, अनुरागवती, प्रणयिनी, रागिणी.

Inamorato, *s.* प्रियः, कान्तः, कामी *m.* (न्), अनुरागवान् *m.* (त्), प्रणयी *m.* (न्), रागी *m.* (न्).

Inane, *a.* शून्यः -न्या -न्यं, रिक्तः -क्ता -क्तं, असारः -रा -रं, निःसारः -रा -रं, सारहीनः -ना -नं, वितानः -ना -नं, तुच्छः -च्छा -च्छं.

Inanimate, *a.* निर्जीवः -वा -वं, विचेतनः -ना -नं, अचेतनः -ना -नं, अप्राणी -णिनी -णि (न्), प्राणहीनः -ना -नं, निष्पन्दः -न्दा -न्दं; 'animate and inanimate,' चेतनाचेतनं.

Inanition, *s.* शून्यता, असारता, सारहीनता, अपूर्णता, अवसादः, निरन्नत्वं.

Inanity, *s.* शून्यत्वं, रिक्तता -त्वं, निःसारत्वं, साराभावः, रिक्तं.

Inappetency, *s.* अलोभः, अनभिलाषः, अनभिरुचिः *f.*, अनिच्छा, अवाञ्छा.

Inapplicable, *a.* अयोग्यः -ग्या -ग्यं, अनुपयुक्तः -क्ता -क्तं, अनुपयोगी -गिनी -गि (न्), अनुपपन्नः -न्ना -न्नं, अप्रयोक्तव्यः -व्या -व्यं, अप्रयोज्यः -ज्या -ज्यं.

Inapplication, *s.* अनभिनिवेशः, अमनःप्रवेशः, अमनोयोगः, अनभ्यासः, अनुद्योगः, अप्रवृत्तिः *f.*, अप्रवृत्तत्वं, अव्यवसायः, आलस्यं, अलसता -त्वं.

Inapposite, *a.* अयुक्तः -क्ता -क्तं, असङ्गतः -ता -तं, अयोग्यः -ग्या -ग्यं, प्रस्तुतबहिर्भूतः -ता -तं, प्रस्तुतविरुद्धः -द्धा -द्धं.

Inappositely, *adv.* असङ्गतं, अयुक्तं, अयोग्यं, अनुपयुक्तं, अनुपपन्नं.

Inapprehensible, *a.* अग्राह्यः -ह्या -ह्यं, अगम्यः -म्या -म्यं, अनुपलभ्यः -भ्या -भ्यं.

Inapprehensive, *a.* अशङ्की -ङ्किनी -ङ्कि (न्), अशङ्कान्वितः -ता -तं.

Inapproachable, *a.* अनभिगम्यः -म्या -म्यं, अनुपगम्यः -म्या -म्यं, अगम्यः -म्या -म्यं.

Inappropriate, *a.* अयोग्यः -ग्या -ग्यं, अयुक्तः -क्ता -क्तं, असङ्गतः -ता -तं, असङ्गतार्थः -र्था -र्थं, अनुपयोगी -गिनी -गि (न्), निर्युक्तिकः -की -कं.

Inappropriately, *adv.* अयोग्यं, अयुक्तं, असङ्गतं, अनुपयुक्तं, अस्थाने.

Inaptitude, *s.* अयोग्यता, अनुपयुक्तत्वं, अनुपयोगिता, अपात्रता -त्वं, अयुक्तिः *f.*, निर्युक्तिः *f.*, अनुचितत्वं.

INAPTLY, *adv.* अयुक्तं, अयोग्यं, अनुपयुक्तं, अयुक्त्या, अस्थाने.

INARABLE, *a.* अकर्षणीयः -या -यं, अकृषियोग्यः -ग्या -ग्यं, असीत्यः -त्या -त्यं.

INARTICULATE, *a.* अव्यक्तः -क्ता -क्तं, अस्पष्टः -ष्टा -ष्टं, अव्यक्तपदः -दा -दं, अस्पष्टाक्षरः -रा -रं, सन्दिग्धाक्षरः -रा -रं, अव्यक्ताक्षरः -रा -रं, अव्यक्तध्वनिः -नी -नि, म्लिष्टः -ष्टा -ष्टं, म्लेच्छितः -ता -तं, कद्ददः -दा -दं; 'inarticulate speech,' गद्गदवाक् *f.* (च्), गद्गदपदं, म्लिष्टं, म्लेच्छितं, मीलितं, हिक्का; 'with a voice inarticulate from weeping,' बाष्पसन्दिग्धया गिरा.

INARTICULATELY, *adv.* अव्यक्तं, अस्पष्टं, अस्फुटं, गद्गदवाचा, सन्दिग्धाक्षरया गिरा, सन्दिग्धवाचा, अस्पष्टोच्चारणेन.

INARTICULATENESS, *s.* अव्यक्तता, अस्पष्टता, वागस्पष्टता, उच्चारणास्पष्टत्वं.

INARTIFICIAL, *a.* अकृत्रिमः-मा-मं, अकृतकः-का-कं, अकाल्पनिकः-की-कं.

INARTIFICIALLY, *adv.* अकृत्रिमं, अकृत्रिमप्रकारेण, अकल्पनापूर्वं, अप्रतियत्नपूर्वं, स्वयङ्कृतं.

IN AS MUCH AS, *adv.* यस्मात्, येन. *See* IN.

To INVADE, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अभिक्रम्, अधिक्रम्, उपक्रम्, उपाक्रम्, अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), आस्कन्द्, समास्कन्द्, समवस्कन्द्, आसद् (c. 10. -सादयति -यितुं), समासद्, अभिद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रु, समाद्रु, अभिप्रया (c. 2. -याति -तुं), अभिसृ (c. 1. -सरति -सर्त्तुं), अवस्कन्दं कृ, उपद्रवं कृ, उपप्लवं कृ, अभिनिर्यागं कृ, अभियोगं कृ; 'invade a country,' देशम् आक्रम्, देशाक्रमणं कृ, लोभ्रार्थं or द्रोहकरणार्थं देशं प्रविश् (c. 6. -विशति -वेष्टुं).

INVADED, *p. p.* आक्रान्तः -न्ता -न्तं, उपद्रुतः -ता -तं, कृतावस्कन्दः -न्दा -न्दं, अवस्कन्दितः -ता -तं, उपप्लुतः -ता -तं, कृतोपद्रवः -वा -वं.

INVADER, *s.* आक्रामकः, देशाक्रामकः, आक्रमणकारी *m.* (न्), अवस्कन्दकृत् *m.*

IN VAIN, *adv.* वृथा, मृषा. *See* VAINLY.

INVALESCENSE, *s.* स्वास्थ्यं, स्वस्थता, आरोग्यं, शरीरकुशलं.

INV

INVALID, *a.* (Of no force) निर्बलः -ला -लं, बलहीनः -ना -नं, शक्तिहीनः -ना -नं, अनिष्पन्नः -न्ना -न्नं, व्यर्थः -र्थी -र्थं, मोघः -घा -घं, निष्फलः -ला -लं, विफलः -ला -लं, अप्रमाणः -णा -णं, निष्प्रमाणः -णा -णं, निष्प्रभावः -वा -वं, प्रभावहीनः -ना -नं, निस्तेजाः -जाः -जः (स्), लुप्तः -प्ता -प्तं, लघुः -घुः -घु, लघुप्रमाणः -णा -णं.

INVALID, *s.* (A sick or infirm person) रोगी *m.* -गिणी *f.*, रोगवान् *m.* -वती *f.*, रोगार्त्तः -र्त्ता, सरोगः -गा, अस्वस्थशरीरः -रा, अस्वस्थः -स्था, जन्मरोगी *m.* -गिणी, जरी *m.* -रिणी.

To INVALIDATE, *v. a.* अधरीकृ, मोघीकृ, व्यर्थीकृ, निष्फलीकृ, निष्फल (nom. निष्फलयति -यितुं), लुप् (c. 6. लुम्पति, लोप्तुं, c. 10. लोपयति -यितुं), मुधा कृ, वृथा कृ, मुधा विधा (c. 3. -दधाति -धातुं), निर्बलीकृ, निष्प्रभावीकृ, लघूकृ.

INVALIDATED, *p. p.* अधरीकृतः -ता -तं, अनिष्पन्नः -न्ना -न्नं, निर्बलीकृतः -ता -तं.

INVALIDITY, *s.* निर्बलता, बलहीनता, अनिष्पत्तिः *f.*, अनिष्पन्नता, व्यर्थता, मोघता, निष्फलता, विफलता, निष्प्रभावत्वं, प्रभावहीनता, शक्तिहीनता, दुर्बलता, दौर्बल्यं, अप्रामाण्यं, लघुत्वं, लाघवं.

INVALUABLE, *a.* अनर्घ्यः -र्घ्या -र्घ्यं, अमूल्यः -ल्या -ल्यं, अनर्घः -र्घा -र्घं, मूल्यातीतः -ता -तं, मूल्यातिगः -गा -गं, अतिमूल्यः -ल्या -ल्यं, अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, बहुमूल्यकः -का -कं.

INVALUABLENESS, *s.* अनर्घ्यता -त्वं, अमूल्यता -त्वं, अनर्घत्वं, अत्युत्कृष्टत्वं.

INVARIABLE, *a.* अविकार्यः -र्य्या -र्य्यं, निर्विकारः -रा -रं, अविकारः -रा -रं, अविक्रियः -या -यं, नित्यः -त्या -त्यं, नैत्यिकः -की -कं, स्थिरः -रा -रं, सुस्थिरः -रा -रं, नियतः -ता -तं, अचलः -ला -लं, अचञ्चलः -ला -लं, अविकल्पः -ल्पा -ल्पं, निर्विकल्पः -ल्पा -ल्पं, अवस्थितः -ता -तं, धृतिमान् -मती -मत् (त्), अपरिवर्त्तनीयः -या -यं.

INVARIABLENESS, *s.* अविकार्य्यता -त्वं, निर्विकारत्वं, अविकारत्वं, नित्यता, नैत्यिकत्वं, स्थिरता, सुस्थैर्य्यं, सुस्थिरता.

INVARIABLY, *adv.* नित्यं, नित्यदा, सर्व्वदा, सततं, नियतं, निर्विकारं, सुस्थिरं.

INVASION, *s.* आक्रमणं, आक्रमः, अभिक्रमः -मणं, अधिक्रमः -मणं, आक्रान्तिः *f.*, अवस्कन्दः, अभिमर्द्दः, उपद्रवः, उपप्लवः, अभिनिर्यायणं, प्रयाणं, अभियोगः, दिग्विजयक्रमः; 'of a country,' देशाक्रमणं.

INVASIVE, *a.* आक्रामकः -का -कं, अभिक्रामकः &c., उपद्रवी -विणी -वि (न्).

INVECTIVE, *s.* क्षेपः, अवक्षेपः, आक्षेपः, निन्दोक्तिः *f.*, निन्दावाक्यं, निन्दा, भर्त्सनवाक्यं, भर्त्सना, निर्भर्त्सनं -ना, अपवादः, परीवादः, परिभाषणं, दुर्वाक्यं, वाक्पारुष्यं, धिक्कारपारुष्यं, धिक्क्रिया, दुरुक्तं, तिरस्कारवाक्यं, तिरस्कारः, कुत्सावाक्यं, गर्हा, कटुवाक्यं, प्रतिकूलार्थं वचः.

INVECTIVE, *a.* निन्दकः -का -कं, निन्दामयः -यी -यं, निन्दाकरः -री -रं, निन्दात्मकः -का -कं, कुत्सावादी -दिनी -दि (न्), अपवादी &c., अपवादकः -का -कं.

To INVEIGH, *v. a.* अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), अधिक्षिप्, परिक्षिप्, आक्षिप्, क्षिप्, निन्द् (c. 1. निन्दति -न्दितुं), प्रणिन्द्, विनिन्द्, अपवद् (c. 1. -वदति -ते -दितुं), परिवद्, भर्त्स् (c. 10. भर्त्सयति -यितुं), निर्भर्त्स्, अवभर्त्स्, अवगुर् (c. 6. -गुरते -रितुं), अभिशप् (c. 1. -शपति -शप्तुं), परिशप्, गर्ह् (c. 1. गर्हते -र्हितुं, c. 10. गर्हयति -ते -यितुं), विगर्ह्, परिगर्ह्, तिरस्कृ, धिक्कृ, दुर्वाक्यं वद्, निन्दावाक्यं वद्, उपालभ् (c. 1. -लभते -लब्धुं).

To INVEIGLE, *v. a.* प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्, लुभ्, लल् (c. 10. लालयति -यितुं), मधुरवचोभिः or चाटूक्त्या or चाटुकारेण प्रलुभ् or लल् or सान्त्व् (c. 10. सान्त्वयति -यितुं) or आकृष् (c. 1. -कर्षति, c. 6. -कृषति -क्रष्टुं) or प्रलभ् (c. 1. -लभते -लब्धुं) or मुह् (c. 10. मोहयति -यितुं), लालनं कृ, वञ्च् (c. 10. वञ्चयति -यितुं).

INVEIGLED, *p. p.* लालितः -ता -तं, प्रलोभितः -ता -तं, चाटुकारेणाकृष्टः -ष्टा -ष्टं.

INVEIGLER, *s.* प्रलोभकः, विलोभकः, लाली *m.* (न्), लालनकारी *m.* (न्), आकर्षकः, मोही *m.* (न्), विमोही *m.*, मोहकः, लोभदर्शकः, प्रलम्भकारी *m.*

INVEIGLING, INVEIGLEMENT, *s.* प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, लालनं, मोहनं, विमोहनं, लोभदर्शनं, वञ्चनं -ना, प्रवञ्चना, प्रतारणा, प्रलम्भः.

To INVENT, *v. a.* कॢप् (c. 10. कल्पयति -यितुं), परिकॢप्, रच् (c. 10. रचयति -यितुं), विरच्, सृज् (c. 6. सृजति, स्रष्टुं), विधा (c. 3. -दधाति -धातुं), घट् (c. 10. घटयति -यितुं), निर्मा (c. 2. -माति, c. 3. -मिमीते -मातुं), विनिर्मा, परिकल्पनां कृ.—(In the mind) मनसा कॢप् or परिकॢप् or सृज्, स्वमनसा कॢप्.—(Devise a plan) उपायं प्रचिन्त् (c. 10. -चिन्तयति -यितुं) or परिचिन्त्.—(Fabricate falsely) मिथ्या कॢप् or सृज्.—(Find out) निरूप् (c. 10. -रूपयति -यितुं).

INVENTED, *p. p.* कल्पितः -ता -तं, परिकल्पितः -ता -तं, कॢप्तः -प्ता -प्तं, मनःकल्पितः -ता -तं, मनःसृष्टः -ष्टा -ष्टं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, निर्मितः -ता -तं.—(Devised) प्रचिन्तितः -ता -तं, घटितः -ता -तं.—(Fabricated, factitious) मिथ्याकल्पितः -ता -तं, काल्पनिकः -की -कं, कृत्रिमः -मा -मं, कृतकः -का -कं.—(Found out) निरूपितः -ता -तं.

INVENTION, *s.* (The act) कल्पना -नं, परिकल्पना -नं, कॢप्तिः *f.*, रचना, विरचना, सृष्टिः *f.*, निर्माणं, घटनं, निरूपणं.—(Power of invention, ingenuity) कल्पनाशक्तिः *f.*, कल्पना, युक्तिः *f.*, सुयुक्तिः *f.*, उपायज्ञानं, उपायज्ञत्वं.—(That which is invented) कल्पितं, परिकल्पितं, कल्पना, कॢप्तिः *f.*—(Fabrication, fiction) मिथ्याकल्पना, मिथ्याकल्पितं, मनःकल्पितं, मनःसृष्टिः *f.*; 'invention of one's own brain,' स्वकपोलकल्पितं.

INVENTIVE, *a.* कल्पकः -का -कं, उपायज्ञः -ज्ञा -ज्ञं, उपायी -यिनी -यि (न्), युक्तिमान् -मती -मत् (त्), चतुरः -रा -रं, कुशलः -ला -लं, उपायकुशलः -ला -लं, सुप्रयोगवान् &c.

INVENTIVENESS, *s.* उपायज्ञत्वं, युक्तिः *f.*, युक्तिमत्त्वं, सुयुक्तिः *f.*

INVENTOR, *s.* कल्पकः, परिकल्पकः, कल्पयिता *m.* (तृ), स्रष्टा *m.* (ष्टृ), निर्माता *m.* (तृ), विधायी *m.* (न्), विधाता *m.* (तृ), रचकः, विरचकः, निरूपकः, निरूपयिता *m.* (तृ).

INVENTORY, *s.* गृहोपस्करपरिसंख्या, गृहभाण्डपरिगणना, अस्थावरद्रव्यसंख्यापत्रं, अस्थावरवस्तुगणनापत्रं, गृहवस्तुपरिसंख्या, गृहसामग्र्यपरिगणना.

To INVENTORY, *v. a.* गृहोपस्करादि परिसंख्या (c. 2. -ख्याति -तुं) or परिगण् (c. 10. -गणयति -यितुं).

INVENTRESS, *s.* कल्पिका, परिकल्पिका, कल्पयित्री, निरूपयित्री.

INVERSE, *a.* व्यस्तः -स्ता -स्तं, विपरीतः -ता -तं, विपर्य्यस्तः -स्ता -स्तं, पर्य्यस्तः -स्ता -स्तं, ध्वस्तः -स्ता -स्तं, विलोमः -मा -मं, प्रतिलोमः -मा -मं, व्यतिक्रान्तः -न्ता -न्तं, प्रतिकूलः -ला -लं, प्रतीपः -पा -पं, विप्रतीपः -पा -पं, प्रसव्यः -व्या -व्यं, अपसव्यः -व्या -व्यं; 'Rule of three inverse,' विलोमत्रैराशिकं, व्यस्तत्रैराशिकं; 'in inverse ratio,' विपर्य्ययेण.

INVERSELY, *adv.* विपर्य्ययेण, व्यत्यासेन, व्युत्क्रमेण, विपरीतं, पर्य्यासेन.

INVERSION, *s.* विपर्य्ययः, विपर्य्यायः, व्यत्यासः, विपर्य्यासः, पर्य्यासः, व्युत्क्रमः, व्यतिक्रमः, विपरीतता, वैपरीत्यं, प्रतिकूलता, प्रातिकूल्यं, विलोमता, प्रतिलोमता, प्रातिलोम्यं, व्यत्ययः, व्यत्यस्तता, ध्वस्तता, विप्रतीपता, प्रतीपता, प्रपञ्चः, प्रसव्यत्वं; 'rule of inversion in arithmetic,' विलोमक्रिया, व्यस्तविधिः *m.*

To INVERT, *v. a.* विपर्यस् (c. 4. -अस्यति -असितुं), पर्यस्, व्यत्यस्, विप-

रीतीकृ, वैपरीत्यं कृ, विपर्य्ययं कृ, व्यत्यस्तं -स्तां कृ, विपर्य्यस्तं -स्तां कृ, प्रतिकूलीकृ, विलोमीकृ.—(Turn upside down) अधोमुखीकृ, अधोमुखं -खां कृ, अधःकृ, अधरोत्तरीकृ, ऊर्द्धाधरीकृ, अपवृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्; 'invert the glass in water,' पात्रम् अधोमुखं जले स्थापय.

INVERTED, *p. p.* विपर्य्यस्तः -स्ता -स्तं, व्यत्यस्तः -स्ता -स्तं, पर्य्यस्तः -स्ता -स्तं, ध्वस्तः -स्ता -स्तं, विपरीतः -ता -तं, व्यतिक्रान्तः -न्ता -न्तं, व्युत्क्रान्तः -न्ता -न्तं, विलोमः -मा -मं, प्रतिलोमः -मा -मं, प्रतिकूलः -ला -लं, प्रसव्यः -व्या -व्यं, प्रतिसव्यः -व्या -व्यं.—(Turned upside down) अधोमुखीकृतः -ता -तं, अधोमुखः -खा -खं, अधःकृतः -ता -तं, अधरोत्तरः -रा -रं, अपवृत्तः -त्ता -त्तं.

To INVEST, *v. a.* (Dress, clothe) वेष्ट् (c. 1. वेष्टते -ष्टितुं), परिवेष्ट्, प्रवेष्ट्, आच्छद् (c. 10. -छादयति -यितुं), प्रवृ (c. 5. -वृणोति -वरितुं -रीतुं), संव्ये (c. 1. -व्ययति -व्यातुं), परिव्ये, परिधा in caus. (-धापयति -यितुं), वस् (c. 10. वासयति -यितुं), विवस्.—(Invest with office) अधिकारे नियुज् (c. 7. -युनक्ति -युंक्ते, c. 10. योजयति -यितुं), अधिकारं प्रविश् (c. 10. -वेशयति -यितुं), अधिकारयुक्तं -क्तां कृ, अभिषिच् (c. 6. -षिञ्चति -षेक्तुं), संस्कारपूर्व्वम् अधिकारप्रवेशं कृ.—(Adorn) अलङ्कृ, भूष् (c. 10. भूषयति -यितुं), विभूष्.—(Indue, place in possession) युक्तं -क्तां कृ, सम्पन्नं -न्नां कृ, विशिष्टं -ष्टां कृ, उपेतं -तां कृ, अन्वितं -तां कृ, नियुज्, युज्.—(Inclose, besiege) परिवेष्ट्, उद्वेष्ट्, समन्ताद् रुध् (c. 7. रुणद्धि, रोद्धुं) or उपरुध् or अवरुध्.—(Invest money) क्षेत्रगृहादि क्रीत्वा धनं प्रयुज्, धनप्रयोगं कृ.

INVESTED, *p. p.* (Clothed) वेष्टितः -ता -तं, आच्छादितः -ता -तं, परिच्छन्नः -न्ना -न्नं, परिहितः -ता -तं, संवीतः -ता -तं, आश्लिष्टः -ष्टा -ष्टं.—(With office) अधिकारे नियुक्तः -क्ता -क्तं, पदयुक्तः -क्ता -क्तं, पदविशिष्टः -ष्टा -ष्टं.—(Indued, placed in possession) युक्तः -क्ता -क्तं. *See To* INVEST.—(Closed, besieged) परिवेष्टितः -ता -तं, उद्वेष्टितः -ता -तं, रुद्धः -द्धा -द्धं, समन्तादुपरुद्धः -द्धा -द्धं, पर्य्यवष्टब्धः -ब्धा -ब्धं, बाधितः -ता -तं.—(As money) प्रयुक्तः -क्ता -क्तं.

INVESTIGABLE, *a.* निरूपणीयः -या -यं, निरूप्यः -प्या -प्यं, विचारणीयः -या -यं, विचार्य्यः -र्य्या -र्य्यं, अनुसन्धेयः -या -यं, निर्णेयः -या -यं, विचारयोग्यः -ग्या -ग्यं.

To INVESTIGATE, *v. a.* निरूप् (c. 10. -रूपयति -यितुं), अनुसन्धा (c. 3. -दधाति -धातुं), परीक्ष् (c. 1. -ईक्षते -क्षितुं), समीक्ष्, अवेक्ष्, निरीक्ष्, विचर् (c. 10. -चारयति -यितुं), ज्ञा in des. (जिज्ञासते -सितुं), अन्विष् (c. 4. -इष्यति -एषितुं), अन्वेष् (c. 1. -एषते -षितुं), आलोच् (c. 10. -लोचयति -यितुं), आलोक् (c. 10. -लोकयति -यितुं), अनुयुज् (c. 7. -युनक्ति -युंक्ते -योक्तुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), निर्णी (c. 1. -णयति -णेतुं), निश्चि (c. 5. -चिनोति -चेतुं), विनिश्चि, विभू (c. 10. -भावयति -यितुं), चर्च् (c. 1. चर्चति -र्चितुं), मार्ग् (c. 10. मार्गयति -यितुं), मन् in des. (मीमांसते -सितुं), अभिनिध्यै (c. 1. -ध्यायति -ध्यातुं), विवेचनां कृ.

INVESTIGATED, *p. p.* निरूपितः -ता -तं, परीक्षितः -ता -तं, निरीक्षितः -ता -तं, अवेक्षितः -ता -तं, विचारितः -ता -तं, जिज्ञासितः -ता -तं, अन्वेषितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, निर्णीतः -ता -तं, आलोचितः -ता -तं, चर्चितः -ता -तं.

INVESTIGATING, *part.* निरूपयन् -यन्ती -यत् (त्), परीक्षकः -का -कं, अन्वेषी -षिणी -षि (न्), अनुसन्धानी -निनी -नि (न्), अनुसन्धायी &c., विचारी &c.

INVESTIGATION, *s.* निरूपणं, अनुसन्धानं, परीक्षा -क्षणं, विचारः -रणं -णा, जिज्ञासा, अन्वेषणं -णा, निरीक्षणं, अवेक्षा -क्षणं, समीक्षणं, संवीक्षणं, प्रसमीक्षा, निर्णयः, निश्चयः, अनुयोगः, विवेचना, विवेकः, चर्चा, विमर्शः, निरूपत्वं, परीष्टिः *f.*; 'under investigation,' निश्चीयमानः -ना -नं, विचार्य्यमाणः -णा -णं, निरूप्यमाणः -णा -णं.

INVESTIGATOR, *s.* परीक्षकः, विचारकः, निरूपयिता *m.* (तृ), अनुसन्धायी *m.* (न्), अन्वेष्टा *m.* (ष्टृ), अन्वेषी *m.* (न्), निर्णेता *m.* (तृ), चर्चाकारी *m.* (न्).

INVESTITURE, *s.* (Investing with any office) प्रतिष्ठापनं, प्रतिष्ठा, अभिषेकः, अभिषेचनं, अधिकारप्रवेशकरणं, पदस्थापनं -ना.—(With the sacrificial cord, or yajnopavīta) उपनयः -यनं, आनयः -यनं, मौञ्जीबन्धनं, पवित्रारोपणं.

INVESTMENT, *s.* (Clothes) परिधानं, आच्छादनं, वस्त्रं.—(Besieging, surrounding) अवरोधः -धनं, प्रतिरोधः, रोधः, वेष्टनं, परिवेष्टनं -वेष्टः, उद्वेष्टः, पर्य्यवष्टम्भनं.—(Laying out money) धनप्रयोगः.

INVETERACY, *s.* बद्धमूलता, निर्बन्धः, अभिनिवेशः, दृढता, स्थिरता, अभिनिविष्टता, चिरकालिकत्वं, बहुकालिकत्वं.

INVETERATE, *a.* बद्धमूलः -ला -लं, दृढमूलः -ला -लं, दृढः -ढा -ढं, स्थिरः -रा -रं, निर्बद्धः -द्धा -द्धं, चिरस्थायी -यिनी -यि (न्), बहुकालिकः -की -कं, चिरकालिकः -की -कं, चिरकालीनः -ना -नं, अभिनिविष्टः -ष्टा -ष्टं; 'inveterate hatred,' बद्धवैरं, अच्युतवैरं; 'an inveterate fool,' प्रतिनिविष्टमूर्खः.

INVETERATENESS, *s. See* INVETERACY.

INVIDIOUS, *a.* (Envious) मात्सरी -रिणी -रि (न्), समत्सरः -रा -रं, ईर्ष्यी -र्ष्यिणी -र्ष्यि (न्), ईर्ष्यालुः -लुः -लु.—(Likely to provoke envy or ill-will) ईर्ष्याकरः -रा -रं, ईर्ष्याजनकः -का -कं, असूयाजनकः -का -कं, असूयोत्पादकः -का -कं, मात्सर्य्यजनकः -का -कं, भत्सरावहः -हा -हं, द्वेषजनकः -का -कं, द्वेष्यः -ष्या -ष्यं, द्वेषणीयः -या -यं, कुत्सितः -ता -तं, अप्रीतिजनकः -का -कं.

INVIDIOUSLY, *adv.* (Enviously) समत्सरं, समात्सर्य्यं, सासूयं, सेर्ष्यं.—(In a manner so as to provoke hatred) यथा द्वेषः or असूया जायते तथा, यथा मात्सर्य्यम् उपजायते तथा.

INVIDIOUSNESS, *s.* द्वेषजनकत्वं, असूयाजनकत्वं, ईर्ष्याजनकत्वं.

To INVIGORATE, *v. a.* बलं वृध् (c. 10. वर्धयति -यितुं), तेजो वृध् or कृ or दा, वीर्य्यं or सत्त्वं वृध् or दा, अग्निं or रूचिं दा or वृध्, सबलं -लां कृ, सबलीकृ, सवीर्य्यं -र्य्यां कृ, पुष् (c. 10. पोषयति -यितुं), पुष्टिं कृ or दा or वृध्, आप्यै (c. 10. -प्याययति -यितुं), समाप्यै, दीप् (c. 10. दीपयति -यितुं).

INVIGORATED, *p. p.* वर्धितबलः -ला -लं, वर्धिततेजाः -जाः -जः (स्), वृद्धसत्त्वः -त्त्वा -त्त्वं, तेजितः -ता -तं, पुष्टः -ष्टा -ष्टं, दीपितः -ता -तं, प्रदीप्तः -प्ता -प्तं, आप्यायितः -ता -तं.

INVIGORATING, *a.* बलवर्धकः -का -कं, बलवर्धी -र्धिनी -र्धि (न्), तेजस्करः -रा -रं, तेजोवर्धकः -का -कं, पुष्टिदः -दा -दं, पुष्टिकारकः -का -कं, पौष्टिकः -की -कं, वीर्य्यदः -दा -दं, सत्त्ववर्धकः &c., दीपकः -का -कं.

INVIGORATION, *s.* (The act) बलवर्धनं, तेजोवर्धनं, सत्त्ववर्धनं, पुष्टिकरणं.—(State) बलवृद्धिः *f.*, तेजोवृद्धिः *f.*

INVINCIBLE, *a.* अजेयः -या -यं, अजय्यः -य्या -य्यं, दुर्जयः -या -यं, दुर्जेयः -या -यं, अदम्यः -म्या -म्यं, अदमनीयः -या -यं, अपराजेयः -या -यं, अपराजेतव्यः -व्या -व्यं, अपराजितः -ता -तं, अपराभाव्यः -व्या -व्यं, अप्रधृष्यः -ष्या -ष्यं, सर्व्वजित् *m. f. n.*

INVINCIBLENESS, *s.* अजेयता -त्वं, दुर्जेयता, अपराजेयत्वं, अदम्यता.

INVINCIBLY, *adv.* अजेयं, अपराजेयं, अदमनीयं, यथा जेतुं न शक्यते.

INVIOLABLE, *a.* (Not to be broken) अलंघ्यः -घ्या -घ्यं, अलंघनीयः -या -यं, अभेद्यः -द्या -द्यं, अनतिक्रमणीयः -या -यं, अनतिक्रम्यः -म्या

-म्यं, अभङ्गः -ङ्गा -ङ्गं, भङ्गायोग्यः -ग्या -ग्यं.—(Not to be treated irreverently, not to be hurt) अलंघनीयः -या -यं, अनुल्लंघनीयः -या -यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनपकार्य्यः -र्य्या -र्य्यं, विकारानर्हः -र्हा -र्हं.—(Not to be put to death) अवध्यः -ध्या -ध्यं, अघ्नः -घ्ना -घ्नं. These last are used in reference to an ambassador or herald.

Inviolableness, inviolability, *s.* अलंघ्यता -त्वं, अलंघनीयता -त्वं, अभेद्यता, अनतिक्रमणीयता, अबाध्यत्वं.—(Of an ambassador or herald) अवध्यता -त्वं, अवध्यभावः.

Inviolably, *adv.* अलंघनीयं, अभङ्गेन, यथा न भिद्यते तथाप्रकारेण.

Inviolate, *a.* अलंघितः -ता -तं, अभग्नः -ग्ना -ग्नं, अक्षतः -ता -तं, अखण्डः -ण्डा -ण्डं, अभङ्गः -ङ्गा -ङ्गं, अभेदितः -ता -तं, अभिन्नः -न्ना -न्नं, अबाधितः -ता -तं.

Invious, *a.* दुर्गमः -मा -मं, अगम्यः -म्या -म्यं, अगमनीयः -या -यं, दुरत्ययः -या -यं, गहनः -ना -नं, सबाधः -धा -धं, गत्यूनः -ना -नं.

To inviscate, *v. a.* चूर्णादिना श्यानद्रव्येण लिप् (c. 6. लिम्पति, लेप्तुं).

Invisibility, invisibleness, *s.* अदृश्यता -त्वं, अलक्ष्यता -त्वं, परोक्षता, अलोकनीयत्वं, दृष्यगोचरता, अप्रत्यक्षता, दुर्दृश्यता, दुर्दर्शत्वं, दुर्लक्ष्यता -त्वं, अदर्शनं, परोक्षं, अलोकनं, अन्तर्द्धा -र्द्धानं -र्द्धिः *m.*, अनर्हितत्वं, अविषयः.

Invisible, *a.* अदृश्यः -श्या -श्यं, अदर्शनीयः -या -यं, अलक्ष्यः -क्ष्या -क्ष्यं, अप्रत्यक्षः -क्षा -क्षं, दृष्यगोचरः -रा -रं, दृगगोचरः -रा -रं, अलोकनीयः -या -यं, अप्रेक्षणीयः -या -यं, परोक्षः -क्षा -क्षं, दुर्दृश्यः -श्या -श्यं, दुर्दर्शः -र्शा -र्शं, दुर्लक्ष्यः -क्ष्या -क्ष्यं, दुर्लक्षः -क्षा -क्षं, असमक्षः -क्षी -क्षं, दृष्यविषयः -या -यं, चक्षुरग्राह्यः -ह्या -ह्यं, दर्शनातीतः -ता -तं, दर्शनपथातीतः -ता -तं, अनालोक्यः -क्या -क्यं, अदृष्टरूपः -पा -पं, अन्तर्हितः -ता -तं, तिरोहितः -ता -तं, अन्तरितः -ता -तं, प्रकाशेतरः -रा -रं, अरूपः -पा -पं, अचाक्षुषः -षी -षं, असाक्षात् indec.; 'to become invisible,' अन्तर्धा in pass. (-धीयते), तिरोधा.

Invisibly, *adv.* अदर्शनीयं, अप्रत्यक्षं -क्षेण -क्षतस्, परोक्षं -क्षेण, असाक्षात्, अप्रकाशं, अप्रादुस्, असमक्षं, अदृष्टरूपेण, दुर्दर्शं, दृष्यगोचरेण; 'moving invisibly,' अलक्ष्यगतिः -तिः -ति.

Invitation, *s.* निमन्त्रणं, आमन्त्रणं, आह्वानं, आह्वयः, आहूतिः *f.*, आवाहनं, आकारणं, केतनं, सङ्केतः; 'invitation to dinner,' भोजनार्थं निमन्त्रणं.

Invitatory, *a.* निमन्त्रयिता -त्री -तृ (तॄ), आमन्त्रयिता &c., आह्वानार्थकः -का -कं.

To invite, *v. a.* निमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्, उपनिमन्त्र्, सन्निमन्त्र्, आह्वे (c. 1. -ह्वयति -ह्वातुं), समाह्वे, उपह्वे, केत् (c. 10. केतयति -यितुं), सङ्केत्, अभ्यर्थ् (c. 10. -अर्थयते -ति -यितुं), आकृ (c. 10. -कारयति -यितुं), आवह् (c. 10. -वाहयति -यितुं), सङ्केतं कृ; 'invite to dine,' भोजनार्थं or भोजनाय निमन्त्र्.—(Allure) आकृष् (c. 1. -कर्षति -क्रष्टुं), प्रलुभ् (c. 10. -लोभयति -यितुं).

Invited, *p. p.* निमन्त्रितः -ता -तं, आमन्त्रितः -ता -तं, आहूतः -ता -तं, केतितः -ता -तं, अभ्यर्थितः -ता -तं, आवाहितः -ता -तं, आकारितः -ता -तं; 'invited to dine,' भोजनार्थं निमन्त्रितः -ता -तं; 'the persons invited,' निमन्त्रणीयजनाः *m. pl.*, निमन्त्रिताः *m. pl.*—(Allured) आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं.

Inviting, *a.* (Alluring) आकर्षकः -का -कं, आकर्षी -र्षिणी -र्षि (न्).

To invocate, *v. a.* *See To* invoke.

Invocation, *s.* आह्वानं, आह्वयः, आहूतिः *f.*, ग्रहणं, अभिमन्त्रणं, आमन्त्रणं, अनुकर्षणं, उपह्वः, नामग्रहणं, नामस्मरणं, नामोच्चारणं, आवाहनं.

Invoice, *s.* बीजकं, वाणिजभाषायां समर्पितद्रव्यपरिसंख्यापत्रं.

To invoke, *v. a.* ह्वे (c. 1. ह्वयति -ह्वातुं), आह्वे, उपह्वे, ग्रहे, विह्वे, अभिमन्त्र् (c. 10. -मन्त्रयति -यितुं), आमन्त्र्, आवद् (c. 1. -वदति -दितुं), अभिवद्, आवच् (c. 2. -वक्ति -क्तुं), अभिवच्, प्रार्थ् (c. 10. प्रार्थयति -यितुं), अनुकृष् (c. 1. -कर्षति -क्रष्टुं), आह्वानं कृ.—(Call on by name) सम्बोधनं कृ, नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or स्मृ (c. 1. स्मरति, स्मर्तुं), नामग्रहणं कृ, आवाहनं कृ.—(Invoke blessings) आशास् (c. 2. -शास्ते -शासितुं).

Invoked, *p. p.* आहूतः -ता -तं, आमन्त्रितः -ता -तं, आवाहितः -ता -तं.

Involuntarily, *adv.* अनिच्छातस्, अकामतस्, अनिकामतस्, अनिच्छापूर्व्वं, अकामपूर्व्वं, असतिपूर्व्वं, अबुद्धिपूर्व्वं, अबोधपूर्व्वं, असन्तोषेण, असन्तोषपूर्व्वं, अज्ञानतस्, अज्ञानपूर्व्वं, निष्कामं.

Involuntary, *a.* अनैच्छिकः -की -कं, अनिच्छापूर्व्वः -र्व्वा -र्व्वं, अकामिकः -का -कं, अनभिकामिकः -का -कं, अकाम्यः -म्या -म्यं, अबुद्धिपूर्व्वः -र्व्वा -र्व्वं, असन्तोषपूर्व्वः -र्व्वा -र्व्वं, अज्ञानपूर्व्वः -र्व्वा -र्व्वं, असतिपूर्व्वः -र्व्वा -र्व्वं, अस्वेच्छाजातः -ता -तं, अवशः -शा -शं, अनिच्छाधीनः -ना -नं, इच्छाबाह्यः -ह्या -ह्यं.—(Not having will, unwilling) अकामः -मा -मं, निष्कामः -मा -मं, अनिच्छुः -च्छुः -च्छु.

Involution, *s.* (Act of involving or enveloping) आवेष्टनं, परिवेष्टनं, वेष्टनं, आवरणं, आच्छादनं.—(State of being entangled) आश्लिष्टता, अन्योन्यसंश्लेषः, अन्योन्यसंलग्नता, ग्रन्थिलत्वं, जटिलत्वं, सङ्कीर्णता, व्यतिकरः.

To involve, *v. a.* (Envelop) आवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिवेष्ट्, संवेष्ट्, आछद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), परिवृ; 'is involved,' आव्रियते.—(Implicate, connect, join) सम्बन्ध् (c. 9. -बध्नाति -बन्धुं), अनुबन्ध्, बन्ध्, संश्लिष् (c. 10. -श्लेषयति -यितुं), आश्लिष्, परिश्लिष्, संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं); 'he is involved in many crimes,' बहुपापैः सम्बध्यते or लिप्यते.—(Comprise) परिग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), अन्तर्गण् (c. 10. -गणयति -यितुं), परिसमाप् (c. 5. -आप्नोति -आप्तुं).

Involved, *p. p.* (Enveloped) आवेष्टितः -ता -तं, परिवेष्टितः -ता -तं, वेष्टितः -ता -तं, आवृतः -ता -तं, आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, समाच्छन्नः -न्ना -न्नं, व्याप्तः -प्ता -प्तं.—(Comprised, included) अन्तर्गतः -ता -तं, अन्तर्गणितः -ता -तं, परिगृहीतः -ता -तं, समाविष्टः -ष्टा -ष्टं, आकलितः -ता -तं, सहितः -ता -तं, प्रतिष्ठितः -ता -तं, अवान्तरः -रा -रं, गर्भः -र्भा -र्भं in comp.—(Implicated, connected) सम्बद्धः -द्धा -द्धं, अनुबद्धः -द्धा -द्धं, निबद्धः -द्धा -द्धं, बद्धः -द्धा -द्धं, संसृष्टः -ष्टा -ष्टं, संश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, अनुषक्तः -क्ता -क्तं, संयुक्तः -क्ता -क्तं, ग्रस्तः -स्ता -स्तं, लिप्तः -प्ता -प्तं; 'involved in crime,' पापसम्बद्धः -द्धा -द्धं, पापलिप्तः -प्ता -प्तं; 'in calamity,' विपद्ग्रस्तः -स्ता -स्तं; 'in debt,' ऋणग्रस्तः -स्ता -स्तं.—(Implied) ध्वनितः -ता -तं, स्फलितः -ता -तं; 'involved meaning,' स्फलितार्थः, ध्वनितार्थः.—(Confused, not clear) अस्पष्टः -ष्टा -ष्टं, अव्यक्तः -क्ता -क्तं, अभिन्नः -न्ना -न्नं.

Invulnerable, *a.* अभेद्यदेहः -हा -हं, अवेध्यदेहः -हा -हं, अछेद्यदेहः -हा -हं, अप्रहार्य्यदेहः, -हा -हं, अनाघातनीयः -या -यं, असम्भाव्यक्षतः -ता -तं, अशक्यक्षतः -ता -तं, अताक्ष्मः -क्ष्मा -क्ष्मं, अघाताक्ष्मः -क्ष्मा -क्ष्मं, वज्रदेहः -हा -हं, वज्रशरीरः -रा -रं.

Invulnerableness, *s.* अभेद्यता, अवेध्यता, अछेद्यता, अघातनीयत्वं.

Inward, *a.* अन्तरस्थः -स्था -स्थं, अन्तःस्थः -स्था -स्थं, आन्तरः -री -रं रिकः -की -कं, अन्तर्भूतः -ता -तं, अन्तर्वर्त्ती -र्त्तिनी -र्त्ति (न्), अन्तर्भवः -वा -वं, अन्तर्गतः -ता -तं, अभ्यन्तरः -रा -रं, आभ्यन्तरः -री -रं, अन्तरतमः

-मा -मत्, अन्तरङ्गः -ङ्गा -ङ्गं. Often expressed by अन्तर् in comp.; as, 'inward heat,' अन्तर्दाहः; 'inward spirit,' अन्तरात्मा *m.* (न्), अन्तःकरणं, अन्तःप्रकृतिः *f.*; 'inward consciousness,' अन्तःसंज्ञा; 'inward purity,' अन्तःशौचं; 'inward discipline,' अन्तर्यमनं, अन्तःकरणसंयमः, दमः; 'inward meditation,' अन्तर्भावना.

INWARDLY, *adv.* अन्तर्, अन्तरे -रेण, अभ्यन्तरेण; 'inwardly bad,' अन्तर्दुष्टः -ष्टा -ष्टं.—(In the heart, secretly) अन्तःकरणेन, मनसा, निभृतं, सुनिभृतं.

INWARDS, *s. pl.* अन्त्राणि *n. pl.*, अन्तर्नाड्यः *f. pl.*, उदरं.

To INWEAVE, *v. a.* ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति -न्थितुं). *See To* INTERWEAVE.

To INWRAP, *v. a.* आवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), परिवेष्ट्, आच्छद् (c. 10. -छादयति -यितुं), अवगुण्ठ् (c. 10. -गुण्ठयति -यितुं).

To INWREATHE, *v. a.* मालया परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं), मालायुक्तं -क्तां कृ.

INWROUGHT, *p. p.* खचितः -ता -तं, जडितः -ता -तं, लुरितः -ता -तं.

IOTA, *s.* लवलेशः, लेशः, विन्दुः *m.*, विन्दुमात्रं, तिलमात्रं.

IRASCIBLE, *a.* शीघ्रकोपी -पिनी -पि (न्), शीघ्रक्रोधी -धिनी -धि (न्), सुलभकोपः -पा -पं, क्रोधशीलः -ला -लं, कोपी -पिनी -पि (न्), क्रोधी &c., क्रोधिष्टः -ष्टा -ष्टं, कोपिष्टः -ष्टा -ष्टं, चण्डः -ण्डा -ण्डं, चण्डस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), पित्तस्वभावः -वा -वं, सन्तापी -पिनी -पि (न्).

IRASCIBLENESS, *s.* शीघ्रकोपित्वं, क्रोधशीलता, स्वभावचण्डता, पित्तस्वभावः, क्रोधस्वभावः, पित्तप्रकृतिः *f.*

IRATE, *a.* क्रुद्धः -द्धा -द्धं, कुपितः -ता -तं, क्रोधी -धिनी -धि (न्).

IRE, *s.* क्रोधः, कोपः, अमर्षः, रोषः, मन्युः *m.*, संरम्भः, सन्तापः.

IREFUL, *a.* क्रोधी -धिनी -धि (न्), कोपी -पिनी -पि (न्), क्रुद्धः -द्धा -द्धं, सकोपः -पा -पं, समन्युः -न्युः -न्यु, संरम्भी -म्भिणी -म्भि (न्).

IREFULLY, *adv.* सकोपं, सक्रोधं, सरोषं, सामर्षं, कोपेन, क्रोधेन.

IRIS, *s.* (Rainbow) इन्द्रायुधं, इन्द्रधनुस् *n.*—(Of the eye) नेत्रतारकामण्डलं, कनीनिकामण्डलं, कनीनिकापरिधिः *m.*, तारामण्डलं, उपतारा.—(Plant) गोलोमी, श्वेतदूर्वा, भूतकेशः.

To IRK, *v. a.* आयस् (c. 10. -यासयति -यितुं), दुःख् (c. 10. दुःखयति -यितुं), खिद् (c. 10. खेदयति -यितुं), पीड् (c. 10. पीडयति -यि'), बाध् (c. 1. बाधते -धितुं).

IRKSOME, *a.* खेदजनकः -का -कं, क्लेशकरः -री -रं, क्लेशदः -दा -दं, दुःखदः -दा -दं, दुःखकरः -री -रं, आयासहेतुकः -का -कं, कष्टकरः -री -रं, कष्टः -ष्टा -ष्टं, श्रमजनकः -का -कं, गुरुः -र्वी -रु.

IRKSOMENESS, *s.* खेदजनकत्वं, क्लेशजनकत्वं, क्लेशकत्वं, कष्टत्वं, गुरुता.

IRON, *s.* लोहं -हः, अयस् *n.*, आयसं, लौहं -हः, कृष्णायसं, कालायसं, कृष्णं, कालं, तीक्ष्णं, शस्त्रकं, पियडं, अश्मसारः, गिरिजं, गिरिसारः, शिलाजं, शिलात्मजं, निशितं, कान्तं, दृढं, मलीमसः; 'green sulphate of iron,' धातुशेखरः, पुष्पकासीशः, नयनौषधं, कासीसं, काशीशं, हंसलोमशं; 'red sulphate of iron,' धातुकासीशः; 'pyritic iron-ore,' स्वर्णमाक्षिकं, विट्माक्षिकं, सुवर्णमुखी; 'iron-filings,' लोहचूर्णं; 'rust of iron,' मण्डूरं, सिंहानं, अयोमलं. *See* RUST; 'sulphuret of iron,' पांशुकासीसं, ताप्यं, धातुमाक्षिकं; 'tipped with iron,' अयोमुखः -खा -खं, अयोग्रः -ग्रा -ग्रं, लोहाग्रः -ग्रा -ग्रं; 'wrought iron,' कुशी.—(Smoothing iron) वस्त्रादिश्लक्ष्णीकरणार्थं लोहयन्त्रं.—(Fetter) लौहबन्धः -न्धं -न्धनं.

IRON, *a.* (Made of iron) लौहः -ही -हं, लोहमयः -यी -यं, लोहलः -ला -लं, आयसः -सी -सं, अयोमयः -यी -यं, अयस्मयः -यी -यं, लोहात्मकः -का -कं, लोह in comp.; as, 'an iron arrow,' लोहनालः; 'iron-image,' लोहप्रतिमा; 'iron armour,' लोहवर्म्म *n.* (न्); 'iron pike,' लोहशङ्कुः *m.*; 'iron medicine,' लोहभस्म *n.* (न्); 'iron-toothed,' अयोदत्-दती-दत् (त्); 'having an iron constitution,' वज्रदेहः-हा-हं.

To IRON, *v. a.* (Smooth with an iron) लोहयन्त्रेण श्लक्ष्णीकृ.—(Fetter) शृङ्खलया बन्ध् (c. 9. बध्नाति, बन्द्धुं), शृङ्खल (nom. शृङ्खलयति -यितुं).

IRON-BAR, *s.* कुशी, लोहकुशी, लोहपिण्डः -ण्डं.

IRON-FILINGS, *s. pl.* लोहचूर्णं, लोहकिट्टं, लोहजं.

IRON-FISTED, *a.* वज्रमुष्टिः -ष्टिः -ष्टि, लोहमुष्टिः -ष्टिः -ष्टि.

IRON-FOUNDER, *s.* लोहकारः, अयस्कारः, व्योकारः,

IRON-FOUNDERY, *s.* लोहविलयनशाला, कुप्यशाला, सन्धानी.

IRON-HEARTED, *a.* अयोहृदयः -या -यं, वज्रहृदयः -या -यं, लोहहृदयः -या -यं.

IRON-MOLD, *s.* लोहचिह्नं, लोहाङ्कः, लोहकलङ्कः.

IRON-MONGER, *s.* लोहकारः, लोहद्रव्यविक्रेता *m.* (तृ) -विक्रयी *m.* (न्), लौहभाण्डविक्रयी *m.*, पिठरकटाहादिभाण्डविक्रेता *m.*

IRON-MONGERY, *s.* लोहद्रव्याणि *n. pl.*, लौहभाण्डानि *n. pl.*, लोहमयद्रव्याणि, पिठरकटाहादीनि लोहनिर्म्मितभाण्डानि.

IRONICAL, *a.* मृषावादी -दिनी -दि (न्), विकत्थनः -ना -नं, साक्षेपः -पा -पं, सव्यञ्जनः -ना -नं, उपरोधी -धिनी -धि (न्), औपरोधिकः -की -कं, उपरोधात्मकः -का -कं, अवक्षेपकः -का -कं.

IRONICALLY, *adv.* सविकत्थनं, साक्षेपं, सव्यञ्जनं, विपरीतलक्षणापूर्व्वं, निह्नवेन, सनिह्नवं, सोल्लुण्ठनं, मृषावादेन, मृषा.

IRONY, *s.* (Speech expressing one thing and meaning another) व्याजोक्तिः *f.*, व्यञ्जना, व्यंग्यः, आक्षेपः, अवक्षेपः, विपरीतलक्षणा, उपरोधः.—(Ironical praise) व्याजस्तुतिः *f.*, निन्दास्तुतिः *f.*, व्याजनिन्दा, विकत्था -त्थनं, सोत्प्रासः, सोल्लुण्ठः -ण्ठनं, मृषावादः, अन्यथास्तोत्रं.—(Dissimulation) निह्नवः, निह्नुतिः *f.*, अपह्नवः, अपलापः, अवहित्था.

IRONY, *a.* (Made of iron) लौहिकः -की -कं, लोहमयः -यी -यं, अयोमयः &c.

IRRADIANCE, IRRADIANCY, *s.* दीप्तिः *f.*, द्युतिः *f.*, प्रभा, कान्तिः *f.*, तेजस्.

To IRRADIATE, *v. a.* प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, दीप् (c. 10. दीपयति -यितुं), विदीप्, प्रदीप्, उद्दीप्, द्युत् (c. 10. द्योतयति -यितुं), विद्युत्, प्रद्युत्, विराज् (c. 10. -राजयति -यितुं).

IRRADIATED, *p. p.* प्रकाशितः -ता -तं, विकाशितः -ता -तं, दीपितः -ता -तं, प्रदीपितः -ता -तं, राजितः -ता -तं, विराजितः -ता -तं, द्योतितः -ता -तं.

IRRADIATION, *s.* प्रकाशनं, विकाशनं, दीपनं, प्रदीपनं, उद्दीपनं, दीप्तिः *f.*, प्रदीप्तिः *f.*, द्योतनं, प्रद्योतनं, उद्द्योतः -तनं, द्युतिः *f.*, उज्ज्वलनं, उज्ज्वलता, उद्भासः, प्रकाशता.

IRRATIONAL, *a.* (Void of reason) बुद्धिहीनः -ना -नं, बुद्धिरहितः -ता -तं, निर्बुद्धिः -द्धिः -द्धि, निर्बोधः -धा -धं, अबुद्धिमान् -मती -मत् (त्), ज्ञानहीनः -ना -नं, ज्ञानशक्तिरहितः -ता -तं, अज्ञानी -निनी -नि (न्), प्रज्ञाहीनः -ना -नं, अचेतनः -ना -नं, चैतन्यरहितः -ता -तं, अचिन्तः -न्ता -न्तं, निश्चिन्तः -न्ता -न्तं, चिन्ताशून्यः -न्या -न्यं, पशुधर्म्मी -र्म्मा -र्म्म (न्), पशुसमभावः -वा -वं, पशुसमानः -ना -नं.—(Contrary to reason, absurd) अन्याय्यः -य्या -य्यं, न्यायविरुद्धः -द्धा -द्धं, अन्यायी -यिनी -यि (न्), असङ्गतः -ता -तं, अतर्कितः -ता -तं, अतार्किकः -की -कं, अयुक्तिकः -का -कं, अयुक्तिमिद्धः -द्धा -द्धं, युक्तिविरुद्धः -द्धा -द्धं, अयुक्तः -क्ता -क्तं, असमञ्जसः -सा -सं, अनर्थकः -का -कं.

IRRATIONALITY, *s.* बुद्धिहीनता, ज्ञानहीनता, निर्बुद्धित्वं, अन्याय्यता.

IRRATIONALLY, *adv.* न्यायविरोधेन, असङ्गतं, असद्धं, अतर्कितं, पशुवत्.

IRRECLAIMABLE, *a.* दुष्कर्म्मनिवर्त्तयितव्यः -व्या -व्यं, कुकर्म्मापरावर्त्तनीयः

-या -यं, अशक्यविप्रतीसारः -रा -रं, उपदेशवहिर्भूतः -ता -तं, अनुद्धार्य्यः -र्य्या -र्य्यं, अशोधनीयः -या -यं.

IRRECONCILABLE, *a.* (Not to be brought to amity) असन्धेयः -या -यं, असन्धातव्यः -व्या -व्यं, असमाधेयः -या -यं, अशमनीयः -या -यं, अशाम्यः -म्या -म्यं, अशक्यशमः -मा -मं.—(That cannot be made to agree, inconsistent) असङ्गतः -ता -तं, परस्परविरुद्धः -द्धा -द्धं -विरोधी -धिनी -धि (न्), परस्परपराहतः -ता -तं, विसङ्गतः -ता -तं, असदृशः -शी -शं, असम्भावनीयः -या -यं, असम्भाव्यः -व्या -व्यं, अन्योन्यविपरीतः -ता -तं, असमञ्जसः -सा -सं.

IRRECONCILABLENESS, *s.* असङ्गतिः *f.*, परस्परविरोधः, अन्योन्यविपरीतता.

IRRECOVERABLE, *a.* असमाहार्य्यः -र्य्या -र्य्यं, अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अपुनरादेयः -या -यं, अनावाप्यः -प्या -प्यं, अनुद्धरणीयः -या -यं.

IRRECOVERABLY, *adv.* असमाहार्य्यं, अनुद्धरणीयं, यथा उद्धर्त्तुं न शक्यते तथा.

IRREFRAGABLE, *a.* अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं, अप्रत्याख्येयः -या -यं, अबाध्यः -ध्या -ध्यं, अविवदनीयः -या -यं, असन्दिग्धः -ग्धा -ग्धं, सुनिश्चितः -ता -तं, वज्रप्रमाणः -णा -णं, दृढप्रमाणः -णा -णं.

IRREFRAGABLENESS, *s.* अखण्डनीयता, अखण्ड्यता, अबाध्यत्वं.

IRREFRAGABLY, *adv.* अखण्डनीयं, यथा खण्डनं कर्त्तुं न शक्यते तथा.

IRREFUTABLE, *a.* अखण्डनीयः -या -यं, अखण्डितव्यः -व्या -व्यं, अशक्यखण्डनः -ना -नं, खण्डनाशक्यः -क्या -क्यं, अनिरसनीयः -या -यं.

IRREGULAR, *a.* विधिविरुद्धः -द्धा -द्धं, विधिभङ्गकः -का -कं, विधिहीनः -ना -नं, अविधिः -धिः -धि, अवैधः -धी -धं, अवैधिकः -की -कं, विधिघ्नः -घ्नी -घ्नं, नियमविरुद्धः -द्धा -द्धं, अयथाविधिः -धिः -धि, शास्त्रविरुद्धः -द्धा -द्धं, उत्सूत्रः -त्रा -त्रं, विसूत्रः -त्रा -त्रं.—(Immethodical) अक्रमकः -का -कं -मिकः -का -कं, क्रमविरुद्धः -द्धा -द्धं, क्रमहीनः -ना -नं, क्रमशून्यः -न्या -न्यं, क्रमरहितः -ता -तं, क्रमवान्नः -न्ना -न्नं, अव्यवस्थितः -ता -तं, असंस्थितः -ता -तं, अपर्य्यायः -या -यं, उच्छृङ्खलः -ला -लं.—(In conduct) व्यभिचारी -रिणी -रि (न्), अमर्य्यादः -दा -दं, उत्क्रान्तमर्य्यादः -दा -दं. धर्म्मरोधी -धिनी -धि (न्), धर्म्मविरुद्धः -द्धा -द्धं, विपथगामी -मिनी -मि (न्), अपथगामी &c., अपथवर्त्ती -र्त्तिनी -र्त्ति (न्), अन्यथाचारी &c., आचारवर्जितः -ता -तं, कुचरितः -ता -तं.—(In grammar, to be excepted) वर्ज्जनीयः -या -यं, निपातितः -ता -तं, निपातनीयः -या -यं.—(Uneven, unequal) विषमः -मा -मं, असमः -मा -मं; 'irregular fever,' विषमज्वरः.—(In shape) विरूपः -पा -पी -पं.

IRREGULARITY, *s.* अविधिः *m.*, अविधानं, अविधिता, विधिविरोधः, विधिभङ्गः, अवैधत्वं, उत्सूत्रता, विसूत्रता, शास्त्रविरोधः, नियमविरोधः, अनियमः, अक्रमः, उत्क्रमः, व्यतिक्रमः, क्रमविरोधः, अव्यवस्था, अपरिपाटिः *f.*—(In conduct) व्यभिचारः, विपथगमनं, कुपथगमनं, अपथः, कुपथः, अधर्म्मः -र्म्मत्वं, अनाचारः.—(In grammar, exception) निपातः -तनं, वर्ज्जनं, निषेधः.—(Unevenness) विषमता, वैषम्यं, विषमं, असमता; 'irregularity in diet,' कुपथ्यं, अपथ्यं.

IRREGULARLY, *adv.* अविधितस्, अविधानतस्, अविधिवत्, विधिविरुद्धं, विधिविरोधेन, नियमविरुद्धं, अनियमतस्, अयथाविधि, अक्रमेण, क्रमविरुद्धं, विसूत्रं, अव्यवस्थितं, अयथाशास्त्रं.

IRRELATIVE, *a.* असम्बन्धी -न्धिनी -न्धि (न्), निःसम्बन्धः -न्धा -न्धं, सम्बन्धहीनः -ना -नं, असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, अविषयकः -का -कं, अनानुषङ्गिकः -की -कं.

IRRELEVANCY, *s.* अप्रासङ्गिकत्वं, अप्रस्तुतता, अप्रसङ्गः, अविषयत्वं, निर्विषयता, अनन्वयः, अन्वयाभावः, असम्बन्धः, असम्पर्कः, असङ्गतत्वं, अप्रयुक्तिः *f.*

IRRELEVANT, *a.* अप्रासङ्गिकः -की -कं, अप्रस्तुतः -ता -तं, निर्विषयः -या -यं, अनन्वितः -ता -तं, असम्बन्धी -न्धिनी -न्धि (न्), अप्रसक्तः -क्ता -क्तं, प्रसङ्गबाह्यः -ह्या -ह्यं, प्रस्तुतबहिर्भूतः -ता -तं, असङ्गतः -ता -तं, अप्रकृतः -ता -तं, अप्राकरणिकः -की -कं, असम्पर्कीयः -या -यं, अनुपपन्नः -न्ना -न्नं, अप्रयुक्तः -क्ता -क्तं, अयौक्तिकः -की -कं.

IRRELEVANTLY, *adv.* अप्रस्तुतं, निर्विषयं, प्रस्तुतबहिस्, असम्बद्धं, असम्बन्धेन, असङ्गतं, अप्रयुक्तं, असम्पर्केण, अप्रसक्तं.

IRRELIGION, *s.* अधर्म्मः -र्म्मत्वं, वैधर्म्यं, निर्धर्म्मत्वं, धर्म्मलोपः, धर्म्महीनता, अपूजा, अभक्तिः *f.*, भक्तिहीनता, अभक्तत्वं, देवनिन्दा, अपुण्यत्वं, दुष्टता, पापिष्ठत्वं, सपापत्वं, दुष्कृतं.

IRRELIGIOUS, *a.* अधर्म्मी -र्म्मिणी -र्म्मि (न्), अधार्म्मिकः -की -कं, निर्धर्म्मः -र्म्मी -र्म्मं, अधर्म्मिष्ठः -ष्ठा -ष्ठं, धर्म्महीनः -ना -नं, त्यक्तधर्म्मा -र्म्मी -र्म्म (न्), अपूजकः -का -कं, अभक्तः -क्ता -क्तं, भक्तिहीनः -ना -नं, देवनिन्दकः -का -कं, दुष्टः -ष्टा -ष्टं, अपुण्यः -ण्या -ण्यं, असाधुः -ध्वी -धु, पापी -पिनी -पि (न्), IRRELIGIOUSLY, *adv.* अधर्म्मतस्, अधर्म्मेण, अधार्म्मिकवत्, अपुण्यवत्, पापिष्ठं.

IRREMEABLE, *a.* अपुनरागम्यः -म्या -म्यं, अप्रत्यागम्यः &c., अपरावर्त्यः -र्त्या -र्त्यं.

IRREMEDIABLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अशक्यप्रतीकारः -रा -रं, अप्रतिकारः -रा -रं, अविद्यमानप्रतीकारः -रा -रं, निरुपायः -या -यं, अनुपायः -या -यं, निरुपायी -यिनी -यि (न्), उपायहीनः -ना -नं, उपायातीतः -ता -तं, अशक्योपायः -या -यं, अचिकित्स्यः -त्स्या -त्स्यं, अचिकित्सनीयः -या -यं, चिकित्सितुम् अशक्यः -क्या -क्यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं.

IRREMEDIABLENESS, *s.* निरुपायत्वं, अप्रतिकार्य्यत्वं, प्रतीकारहीनता, असमाधेयता.

IRREMEDIABLY, *adv.* निरुपायं, यथा प्रतिकर्त्तुं न शक्यते तथाप्रकारेण, यथा उपायो न विद्यते तथा.

IRREMISSIBLE, *a.* अक्षन्तव्यः -व्या -व्यं, अमोचनीयः -या -यं, क्षमानर्हः -र्हा -र्हं.

IRREMOVABLE, *a.* अनपादेयः -या -यं, अनपहरणीयः -या -यं, अपरिहार्य्यः -र्य्या -र्य्यं, अनिःसारणीयः -या -यं, अनपनेतव्यः -व्या -व्यं, अचलः -ला -लं, स्थिरः -रा -रं.

IRREPARABLE, *a.* असाध्यः -ध्या -ध्यं, असाधनीयः -या -यं, असन्धेयः -या -यं, असमाधेयः -या -यं, अप्रतिसमाधेयः -या -यं, अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतिकारः -रा -रं, अशक्यप्रतीकारः -रा -रं, अचिकित्सनीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, अनुद्धरणीयः -या -यं.

IRREPARABLENESS, *s.* असाध्यता, अप्रतिकार्य्यत्वं, असमाधेयता, अनुद्धार्य्यत्वं,

IRREPARABLY, *adv.* असाधनीयं, यथा प्रतिकारो न विद्यते तथा, अचिकित्सनीयं, अप्रतिसमाधेयं.

IRREPREHENSIBLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, निर्दोषः -षा -षं, दोषशून्यः -न्या -न्यं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः -र्ह्या -र्ह्यं.

IRREPREHENSIBLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, दोषशून्यता, निर्दोषत्वं.

IRREPREHENSIBLY, *adv.* अनिन्दनीयं, निरपराधं, अनपराधेन, दोषं विना.

IRREPRESSIBLE, *a.* अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -ह्या -ह्यं, अनियन्तव्यः -व्या -व्यं, अनिवार्य्यः -र्य्या -र्य्यं, असंहरणीयः -या -यं, अयन्त्रणीयः -या -यं.

IRREPROACHABLE, *a.* अनिन्द्यः -न्द्या -न्द्यं, अनिन्दनीयः -या -यं, अनिन्दितः -ता -तं, अगर्ह्यः -र्ह्या -र्ह्यं, अविगर्ह्यः &c., अविगर्हितः -ता -तं, अपरिवाद्यः -द्या -द्यं, अनपवाद्यः -द्या -द्यं, अनवद्यः -द्या -द्यं, निरवद्यः -द्या -द्यं, निर्दोषः -षा -षं, निरपराधः -धा -धं, अपरिभाषणीयः -या -यं, अकुत्सितः -ता -तं, अनवगीतः -ता -तं, निष्कलङ्कः -ङ्का -ङ्कं, अदूष्यः -ष्या -ष्यं, अवाच्यः -च्या -च्यं, निर्वाच्यः -च्या -च्यं, अवचनीयः -या -यं, अदुर्वृत्तः -त्ता -त्तं.

IRREPROACHABLENESS, *s.* अनिन्द्यता, अनिन्दनीयता, अगर्ह्यत्वं, अपरिवाद्यता.

IRREPROACHABLY, *adv.* अनिन्दनीयं, अनिन्दितं, अगर्हणीयं, अविगर्हितं.

IRRESISTIBLE, *a.* अप्रतिकार्य्यः -र्य्या -र्य्यं, अप्रतीकार्य्यः &c., अनिवार्य्यः

-र्य्यी -र्य्यं, अनिवारणीयः -या -यं, अनिवारः -रा -रं, दुर्निवारः -रा -रं, अवार्यः -र्य्या -र्य्यं, निवार्यः -र्य्या -र्य्यं, अनवग्रहः -हा -हं, दुर्निग्रहः -हा -हं, असंहार्य्यः -र्य्या -र्य्यं, दुर्धरः -रा -रं, निर्धारणीयः -या -यं, निर्धार्यः -र्य्या -र्य्यं, अबाध्यः -ध्या -ध्यं, अबाधनीयः -या -यं, अनतिक्रमणीयः -या -यं, अप्रतिहतः -ता -तं, अप्रतिद्वन्द्वः -न्द्वा -न्द्वं, सर्व्वदमनः -ना -नं.

Irresistibleness, *s.* अप्रतिकार्य्यत्वं, अनिवार्य्यता, अनिवारणीयता, अवारणीयत्वं, दुर्निग्रहत्व, अबाध्यत्वं.

Irresistibly, *adv.* अनिवारणीयं, अवारणीयं, अप्रतिकार्य्यं, दुर्निग्रहं, यथा निवारयितुं न शक्यते तथाप्रकारेण.

Irresolute, *a.* अस्थिरमतिः -तिः -ति, अस्थिरचित्तः -त्ता -त्तं, अस्थिरबुद्धिः -द्धिः -द्धि, अस्थिरमनस्कः -स्का -स्कं, चञ्चलबुद्धिः -द्धिः -द्धि, चञ्चलवृत्तिः -त्तिः -त्ति, चलचित्तः -त्ता -त्तं, विकल्पशीलः -ला -लं, विकल्पयन् -यन्ती -यत् (न्), संशयात्मा -त्मा -त्म (न्), सन्दिग्धमतिः -तिः -ति, संशयापन्नमानसः -सा -सं, चपलात्मकः -का -कं, अधीरः -रा -रं, अनवस्थमनस्कः -स्का -स्कं, अनवस्थितः -ता -तं, धैर्य्यहीनः -ना -नं, तरलः -ला -लं.

Irresolutely, *adv.* अस्थिरं, अधीरं, स्थैर्य्यपूर्व्वं, धैर्य्यपूर्व्वं, अधैर्य्येण, अस्थैर्य्येण, अस्थिरचेतसा, चञ्चलबुद्ध्या, विकल्पशीलत्वात्, चञ्चलं, चपलवत्.

Irresolution, *s.* अस्थैर्य्यं, अस्थिरता, अधैर्य्यं, अधीरता, चित्तास्थैर्य्यं, विकल्पशीलता, बुद्धिचाञ्चल्यं, चञ्चलबुद्धिः *f.*, अस्थिरबुद्धिः *f.*, चलचित्तता, चञ्चलत्वं, अदृढता, अधृतिः *f.*, अधारणा, चपलता, चापल्यं, अनवस्थितिः *f.*

Irrespective, *a.* निरपेक्षः -क्षा -क्षं, अनपेक्षः -क्षा -क्षं, अपेक्षाहीनः -ना -नं, निर्व्यपेक्षः -क्षा -क्षं, अप्रतीक्षकः -का -कं.

Irrespectively, *adv.* निरपेक्षं, अनपेक्षं, अनपेक्ष्य, अप्रतीक्ष्य, अनुद्दिश्य.

Irresponsibility, *s.* अनुयोगानधीनता, अपृच्छाधीनता, प्रश्नायोग्यत्वं, अननुयोज्यता.

Irresponsible, *a.* अननुयोगाधीनः -ना -नं, अनुयोगानधीनः -ना -नं, अपृच्छाधीनः -ना -नं, अप्रश्नयोग्यः -ग्या -ग्यं, पृच्छानर्हः -र्हा -र्हं, अननुयोज्यः -ज्या -ज्यं, अननुयोक्तव्यः -व्या -व्यं.

Irrestrainable, *a.* अनिवार्य्यः -र्य्या -र्य्यं, अनिग्रहीतव्यः -व्या -व्यं, दुर्निग्रहः -हा -हं, अनिवर्त्तयितव्यः -व्या -व्यं, अनिवर्त्तनीयः -या -यं.

Irretrievable, *a.* अपुनःप्राप्यः -प्या -प्यं, पुनरप्राप्यः -प्या -प्यं, अपुनर्लभ्यः -भ्या -भ्यं, पुनरलभ्यः -भ्या -भ्यं, अनुद्धरणीयः -या -यं, अनुद्धार्य्यः -र्य्या -र्य्यं, असमाहार्य्यः -र्य्या -र्य्यं, अप्रतिसमाधेयः -या -यं.

Irretrievableness, *s.* अपुनःप्राप्यता, अनुद्धरणीयता, अप्रतिसमाधेयत्वं.

Irretrievably, *adv.* अनुद्धरणीयं, यथा प्रतिसमाधातुं न शक्यते तथा.

Irreverence, *s.* अपूजा, अपमानं, अवमानं, अनादरः, अवज्ञानं, अवज्ञा, असम्मानं, परिभवः, परिभूतिः *f.*, परिभावः, अवधीरणं, उपेक्षा, अमर्य्यादा,

Irreverent, *a.* अपूजकः -का -कं, अपमानी -निनी -नि (न्), अवमानी &c., अपमानकारी &c., अवज्ञाकारी &c., अनादरकारी &c., परिभावी -विनी -वि (न्), अनादरी -रिणी -रि (न्), अनादरबुद्धिः -द्धिः -द्धि.

Irreverently, *adv.* अपूजया, अपूजापूर्व्वं, सावमानं, सावज्ञानं, अनादरेण.

Irreversible, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अपरावर्त्तनीयः -या -यं, अनिवर्त्यः -र्त्या -र्त्यं, अनिवर्त्तनीयः -या -यं, परावर्त्तनाशक्यः -क्या -क्यं, परावर्त्तानर्हः -र्हा -र्हं, अलोप्यः -प्या -प्यं, अलोपनीयः -या -यं, अखण्डनीयः -या -यं, अखण्ड्यः -ण्ड्या -ण्ड्यं.

Irreversibleness, *s.* अपरावर्त्यत्वं, अपरावर्त्तनीयता, अलोप्यता, अखण्ड्यत्वं.

Irreversibly, *adv.* अपरावर्त्तनीयं, यथा परावर्त्तितुं न शक्यते तथा.

Irrevocable, *a.* अपरावर्त्यः -र्त्या -र्त्यं, अविकार्य्यः -र्य्या -र्य्यं, अनन्यथाकरणीयः -या -यं.

Irrevocably, *adv.* अपरावर्त्तनीयं, अपरिवर्त्तनीयं, अनन्यथाकरणीयं.

To irrigate, *v. a.* सिच् (c. 6. सिञ्चति, सेक्तुं), अभिषिच्, अवसिच्, जलेन प्लु (c. 10. प्लावयति -यितुं) or क्लिद् (c. 10. क्लेदयति -यितुं) or अभ्युक्ष् (c. 1. -उक्षति -क्षितुं) or प्रोक्ष्, अभिवृष् (c. 1. -वर्षति -र्षितुं), प्रणालिकासिञ्चनं कृ.

Irrigated, *p. p.* सिक्तः -क्ता -क्तं, जलसिक्तः &c., सलिलसिक्तः &c., जलप्लावितः -ता -तं, समुक्षितः -ता -तं.

Irrigation, *s.* सेकः, सेचनं, सिञ्चनं, निषेकः, अवसेकः, अवसेचनं, जलप्लावनं, क्लेदनं, अभ्युक्षणं, प्रोक्षणं, प्रणालिकासिञ्चनं.

Irriguous, *a.* जलसिक्तः -क्ता -क्तं, सिक्तः -क्ता -क्तं, जलाढ्यः -ढ्या -ढ्यं, अनूपः -पा -पं, बहूदकः -का -कं, सजलः -ला -लं, आर्द्रः -र्द्रा -र्द्रं, समुन्नः -न्ना -न्नं.

Irrision, *s.* उपहासः, अवहासः, अपहासः, परिहासः, हास्यं, अवहेला.

Irritability, *s.* शीघ्रकोपित्वं, कोपशीलता, क्रोधशीलता, सुक्रोधनीयता, चण्डस्वभावः, उच्चण्डता, मुखोत्तापनीयत्वं.

Irritable, *a.* (Easily made angry) शीघ्रकोपी -पिनी -पि (न्), सुलभक्रोपः -पा -पं, सुलभक्रोधः -धा -धं, शीघ्रक्रोधी &c., सुलभमन्युः -न्युः -न्यु, सुक्रोधनीयः -या -यं, सुप्रकोपणीयः -या -यं, कोपशीलः -ला -लं, क्रोधशीलः -ला -लं, सन्तापशीलः -ला -लं, कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः -ष्ठा -ष्ठं, चण्डस्वभावः -वा -वं, पित्तस्वभावः -वा -वं, पित्तवेगी -गिनी -गि (न्), उच्चण्डः -ण्डा -ण्डं, उष्णस्वभावः -वा -वं.—(Easily excited) शीघ्रोत्तेजनीयः -या -यं, सुखोत्तापनीयः -या -यं.

To irritate, *v. a.* कुप् (c. 10. कोपयति -यितुं), प्रकुप्, सङ्कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं जन् (c. 10. जनयति -यितुं), क्रोधं जन्.—(Excite) उत्तप् (c. 10. -तापयति -यितुं), सन्तप्, उत्तिज् (c. 10. -तेजयति -यितुं).

Irritated, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः -ता -तं, कुपितः -ता -तं, जातकोपः -पा -पं, जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं, उपजातक्रोधः -धा -धं, इङ्गमन्युः -न्युः -न्यु.—(Excited) उत्तेजितः -ता -तं, समुत्तेजितः -ता -तं, उत्तापितः -ता -तं, उत्तप्तः -प्ता -प्तं.

Irritating, *part.* or *a.* कोपजनकः -का -कं, क्रोधजनकः -का -कं, उत्तापकः -का -कं, सन्तापकः -का -कं, चित्तोत्तापकारी -रिणी -रि (न्).

Irritation, *s.* (The act) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं.—(State) कोपः, क्रोधः, अमर्षः, विमर्षः, मन्युः *m.*, क्रोधावेशः, क्रुद्धता, रागावेशः.—(Excitement) उत्तापः, उत्तप्तता, सन्तापः, सन्तप्तता, उत्तेजनं, समुत्तेजनं, दाहः; 'irritation of the throat,' कासः, क्षवथुः *m.*

Irritative, *a.* उत्तापकः -का -कं, सन्तापकः -का -कं, दाहजनकः -का -कं,

Irruption, *s.* अवस्कन्दः -न्दनं, उपद्रवः, अभिद्रवः, उपप्लवः, विप्लवः, अभिक्रमः -मणं, आक्रमः, अभिमर्दः, अभिग्रहः, अवलुम्पनं; 'to make an irruption,' अवस्कन्द् (c. 1. -स्कन्दति -स्कन्तुं), समवस्कन्द्, आस्कन्द्, उपद्रु (c. 1. -द्रवति -द्रोतुं), अभिद्रु, समाद्रु, अभिधाव् (c. 1. -धावति -वितुं).

Ischuretic, *a.* मूत्रावरोधघ्नः -घ्नी -घ्नं, मूत्रावष्टम्भनाशकः -का -कं.

Ischury, *s.* मूत्रावरोधः, मूत्रावष्टम्भः, मूत्रकृच्छ्रं, विष्टम्भः, मूत्रानुबन्धः, विबन्धः, आनाहः.

Isinglass, *s.* अभ्रं -भ्रकं, मत्स्यान्त्रनिर्म्मितम् अतिसंलग्नभावं श्यानद्रव्यं.

Island, *s.* द्वीपः -पं, अन्तरीपं, उपद्वीपं, पयोगडं; 'one of alluvial formation,' पुलिनं.

Island, *a.* द्वीप्यः -प्या -प्यं, द्वैप्यः -प्यी -प्यं, द्वैपः -पी -पं, द्वीपसम्बन्धी -न्धिनी -न्धि (न्), द्वीपस्थः -स्था -स्थं.

Islander, *s.* द्वीपवासी *m.* (न्), द्वीपनिवासी *m.*, द्वीपी *m.* (न्), द्वीपस्थः, द्वीपवासः, द्वैपः, द्वीप्यः.

Isle, *s.* द्वीपः -पं, अन्तरीपं. *See* Island.

Islet, *s.* क्षुद्रद्वीपः -पं, अल्पद्वीपः -पं, उपद्वीपः -पं.

Isochronal, isochronous. *a.* समकालिकः -की -कं, समसंख्यकालः -ला -लं.

To ISOLATE, *v. a.* वियुज् (c. 7. -युनक्ति -योक्तुं), विश्लिष् (c. 7. -श्लिनक्ति -श्लेक्तुं), अवश्लिष्, अन्यभेदं कृ, अन्यविभेदं कृ, अन्यवियोगं कृ, परविश्लेषं कृ, पृथक् स्था in caus. (स्थापयति -यितुं). *See To* INSULATE.

ISOLATED, *p. p.* असङ्गः -ङ्गा -ङ्गं, निःसङ्गः -ङ्गा -ङ्गं, गतसङ्गः -ङ्गा -ङ्गं, वियुक्तः -क्ता -क्तं, विभिन्नः -न्ना -न्नं, परविभिन्नः -न्ना -न्नं, अन्यविश्लिष्टः -ष्टा -ष्टं, व्यासक्तः -क्ता -क्तं, अनन्यसंसक्तः -क्ता -क्तं, अन्यासक्तः -क्ता -क्तं, पृथक्स्थितः -ता -तं, स्वतन्त्रः -न्त्रा -न्त्रं. *See* INSULATED.

ISOLATION, *s.* असङ्गः, परवियोगः, परविभेदः, विच्छेदः, अवच्छेदः, व्यासङ्गः, विभिन्नता, पृथक्त्वं. *See* INSULATION.

ISOSCELES, *a.* समद्विभुजः -जा -जं, समद्विबाहुः -हुः -हु, समद्विपार्श्वः -र्श्वा -र्श्वं; 'isosceles triangle,' समद्विबाहुकत्रिभुजः, तुल्यद्विबाहुकत्रिभुजः द्विसमत्रिभुजः -जा; 'angles at the base of an isosceles triangle,' तुल्यद्विबाहुकत्रिभुजस्य भूलग्नकोणौ *m.* du.

ISSUE, *s.* (Egress) निःसरणं, निस्सरणं, निर्गमः, निर्गतिः *f.*, निर्यायणं, निष्क्रमणं, विनिर्गमः, बहिर्गमनं, बहिस्सरणं, निःसारः -रणं, अपसारः, अपसरणं, प्रवहः.—(Event, consequence, last result) गतिः *f.*, उद्भूतं, अनुवृत्तं, संवृत्तं, उत्पन्नं, फलं, फलमुत्तरं, परिणामः, शेषः, अन्तः, सिद्धिः *f.*, प्रयुक्तिः *f.*, अन्वयः, निष्पन्नं; 'happy issue,' सद्गतिः *f.*, शुभगतिः *f.*, शुभफलं; 'expectation of a favourable issue,' शुभफलाकांक्षा.—(Progeny) प्रजा, अपत्यं, सन्तानं, सन्ततिः *f.*, अन्वयः, तनुः *m.*—(Flux) आमातिसारः, रक्तातिसारः, रक्तशुद्धिः *f.*—(Ulcer, fontanel) कृत्रिमव्रणः.

To ISSUE, *v. n.* (Flow out) प्रसु (c. 1. -सवति -सोतुं), निःसु, सु.—(Pass out, go out) निःसृ (c. 1. -सरति -सर्तुं), विनिःसृ, निर्गम् (c. 1. -गच्छति -गन्तुं), विनिर्गम्, निर्या (c. 2. -याति -तुं), विनिर्या, निष्क्रम् (c. 1. -क्रामति -क्रमितुं), विनिष्क्रम्, अभिनिष्क्रम्, निश्चर् (c. 1 -चरति -रितुं), विनिश्चर्, निरि (c. 2. -एति -तुं), बहिर्गम्.—(Proceed, arise) उत्पद् (c. 4. -पद्यते -पत्तुं), जन् (c. 4. जायते, जनितुं), प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), प्रभू.—(Close, end) निष्पद्, विगम्, समाप् in pass. (-आप्यते), निवृत्, अपया.

To ISSUE, *v. a.* (Send out) निःसृ (c. 10. -सारयति -यितुं), प्रचल् (c. 10. -चालयति -यितुं), प्रचर् (c. 10. -चारयति -यितुं), प्रचलीकृ.—(Make public) प्रकाश् (c. 10. -काशयति -यितुं), ख्या in caus. (ख्यापयति -यितुं), घुष् (c. 10. घोषयति -यितुं), विघुष्, प्रसिद्धीकृ.

ISSUED, *p. p.* निःसृतः -ता -तं, निर्गतः -ता -तं, प्रसुतः -ता -तं, उत्पन्नः -न्ना -न्नं.

ISSUELESS, *s.* असन्तानः -ना -नं, अनपत्यः -त्या -त्यं, अप्रजः -जा -जं, अप्रसुतः -ता -तं, निःसन्तानः -ना -नं, निरन्वयः -या -यं, निर्वंशः -शा -शं.

ISTHMUS, *s.* संयोगभूमिः *f.*, योगभूमिः *f.*, सम्बन्धभूमिः *f.*

IT, *pron.* तद्, एतद्, इदं. Sometimes 'it' is not expressed, but is inherent in the verb; as, 'it is well ascertained that the figure of the earth is globular,' पृथिवी गोलाकारा भवति इति सुनिश्चितं.

ITALIAN, *a.* इटालिदेशसम्बन्धी -न्धिनी -न्धि (न्), इटालिदेशजः -जा -जं, इटालिदेशीयः -या -यं, इटालिदेशस्थः -स्था -स्थं.

ITALICS, *s. pl.* इटालिकसंज्ञको मुद्राक्षरविशेषः.

ITCH, *s.* (The disease) कण्डूः *f.*, कण्डुः *f.*, खर्ज्जूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f.*, सूकण्डुः *f.*, खसः, पाम *n.* -मा *f.* (न्), कण्डूतिः *f.*—(An itching) कण्डूतिः *f.*, कण्डूयनं, कण्डूया.—(Eager desire) अतिस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

To ITCH, *v. n.* कण्डू (nom. कण्डूयति -ते), कण्डूयां कृ, कण्डूतिं कृ, स्पन्द् (c. 1. स्पन्दते -न्दितुं), स्फुर् (c. 6. स्फुरति -रितुं), कण्डूलः -ला -लं भू. —(Desire eagerly) अतिशयेन इष् (c. 6. इच्छति, एषितुं) or अभिलष् (c. 1. -लषति -षितुं), गृध् (c. 4. गृध्यति, गर्धितुं).

ITCHY, *a.* कण्डूलः -ला -लं, कच्छुरः -रा -रं, कण्डुरोगी -गिणी -गि (न्), पामनः -ना -नं.

ITEM, *adv.* (Also) अपरञ्च, अपिच, अथच, चैव, पुनरपि.

ITEM, *s.* (Article, separate particular) पदं, विषयः, प्रकरणं, अधिकरणं.

To ITERATE, *v. a.* (Utter again) पुनर् वद् (c. 1. वदति -दितुं), मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ.—(Do again) पुनः कृ, मुहुः कृ, पुनःपुनः कृ.

ITERATION, *s.* पुनरुक्तिः *f.*, पौनरुक्त्यं, पुनर्वचनं, अनुवादः, मुहुर्भाषा.—(Doing again) पुनःकरणं, पुनरावृत्तिः *f.*, द्विरावृत्तिः *f.*

ITERATIVE, *a.* पुनर्वादी -दिनी -दि (न्), पुनःकारी -रिणी -रि (न्).

ITINERANT, *a.* भ्रमानः -ना -नं, पर्यटनकारी -रिणी -रि (न्), अध्वगः -गा -गं -गामी -मिनी -मि (न्), भ्रमणकारी &c., परिभ्रमी -मिणी -मि (न्), अवनिचरः -रा -रं, यात्रिकः -की -कं, चक्राटः -टा -टं.

ITINERARY, *s.* मार्गवृत्तान्तपुस्तकं, मार्गक्रमणलेखः, प्रवासवृत्तान्तलेखः.

To ITINERATE, *v. n.* देशभ्रमणं कृ, देशपर्यटनं कृ, परिभ्रम् (c. 4. -भ्राम्यति -भ्रमितुं), पर्यट् (c. 1. -अटति -टितुं).

ITS, *pron.* तदीयः -या -यं, तस्य gen. c. (तद्), अस्य gen. c. (इदं).

ITSELF, *pron.* तद् एतद्, स्वयं.

IVORY, *s.* हस्तिदन्तः, करिदन्तः, गजदन्तः, दन्तिदन्तः -न्ती.

IVORY, *a.* दान्तः -न्ती -न्तं, हस्तिदन्ती -न्तिनी -न्ति (न), हस्तिदन्तनिर्म्मितः -ता -तं, दन्तिदन्तमयः -यी -यं.

IVY, *s.* वृक्षगृहादिरोही लताविशेषः, तरुरुहा, तरुरोहिणी.

J.

To JABBER, *v. n.* जल्प् (c. 1. जल्पति -ल्पितुं), उपजल्प्, त्वरितं वद् (c. 1 वदति -दितुं), अव्यक्तं or अस्पष्टं वद्, वद् in freq. (वावद्यते), प्रलप् (c. 1. -लपति -पि ˚), चटचट (nom. चटचटायते), अनर्थकवचनं कृ.

JABBERER, *s.* जल्पकः, जल्पाकः, जल्पी *m.* (न्), उपजल्पी *m.*, वाचालः, वाचाटः, वावदूकः, बहुभाषी *m.* (न्), अस्पष्टवक्ता *m.* (क्तृ).

JABBERING, *s.* जल्पः -ल्पनं, प्रजल्पः, जल्पितं, वावदूकता, प्रलापः, विप्रलापः. प्रलपितं, त्वरितवचनं, अस्पष्टवचनं, अव्यक्तवचनं, निरर्थकवचनं

JACK, *s.* (Instrument for pulling off boots) पादुकानिष्कर्षणयन्त्रं.—(Instrument for turning a spit) यन्त्रं यद्द्वारेण पाकशूलः परिवर्त्तते.—(A fish) जलसूचिः *m.*—(Coat of mail) कवचः -चं, तनुत्रं.—(Horse, wooden frame) मञ्चः, वृक्षः, उपस्तम्भः, आधारः.—(Male of certain animals) expressed by पुं prefixed.—(Flag at the end of a bow-sprit) नौकाग्रवहिःप्रलम्बो ध्वजपटः.—(Bread-fruit tree) पनसः, पनसनालिका, कण्टकिफलः.

JACK-A-LANTERN, *s.* पिशाचदीपिका, भूतदीपिका, मिथ्यादीप्तिः *f.*

JACKAL, *s.* शृगालः, सृगालः, जम्बुकः, जम्बूकः, गोमायुः *m.*, वक्रकः, क्रोष्टा *m.* (ष्टृ), गोमी *m.* (न्), क्रव्या *m.* (न्), भूरिमायः घोरराक्षसः, हूरवः, भ्रूभीरुः *m.*, फेरः, फेरण्डः, फेरवः.—(Female) शृगाली, क्रोष्ट्री, शिवा.

JACKANAPES, *s.* वानरवृत्तिः *m.*, कपिस्वभावः, मर्कटशीलः, वानरचरित्रः.

JACKASS, *s.* गर्द्दभः, रासभः, खरः, धूसरः, चक्रीवान् *m.* (न्), वालेयः.

JACK-BOOTS, *s. pl.* चर्म्मनिर्म्मितं जङ्घोत्तरीयं or जङ्घात्राणं, बृहत्पादुका.

JACK-DAW, *s.* काकजातीयः पक्षिभेदः, काकविशेषः, काकः, वायसः.

JACKET, *s.* कञ्चुकः, कञ्चुलिका, निचोलः -लकः, चोलः -लकः, निचुलः, अङ्गिका, कूर्पासकः.

JACK-KETCH, *s.* घातुकपुरुषः, दण्डपाशिकः, मृतपाः *m.*, उद्बन्धकः

JACK-PUDDING, *s.* भण्डः, भाण्डः, वैहासिकः, परिहासवेदी *m.* (न्), विदूषकः.

JACOBIN, *s.* हीनवर्णपक्षपाती *m.* (न्), राजद्रोही *m.* (न्), राजयुध्वा *m.* (न्).

JACOB'S-STAFF, *s.* (Pilgrim's staff) कार्पटिकदण्डः, कार्पटिकयष्टिः *m. f.*—(A staff concealing a weapon) कूटायुधं, कूटास्त्रं, अन्तर्गुप्तनिशितास्त्रो बहिःकाष्ठमयो दण्डः.

JADE, *s.* (Sorry horse) कदश्वः, अश्वतरः, अश्वकः.—(A name of reproach for a woman) बन्धकी, कुलटा, भ्रष्टा, पापीयसी. *See* JADISH.

To JADE, *v. a.* खिद् (c. 10. खेदयति -यितुं), आयस् (c. 10. -यासयति -यितुं), श्रम् (c. 10. श्रमयति -यितुं), क्लम् (c. 10. क्लमयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), तप् (c. 10. तापयति -यितुं), कृष् (c. 10. कर्षयति -यितुं), कष्टं कृ.

To JADE, *v. n.* (Become weary) खिद् in pass. (खिद्यते), आयस् (c. 4. -यस्यति -यसितुं), श्रम् (c. 4. श्राम्यति, श्रमितुं), क्लम् (c. 4. क्लाम्यति, क्लमितुं), सद् (c. 1. सीदति, सत्तुं), अवसद्, कष्ट (nom. कष्टायते).

JADED, *p. p.* खिन्नः -न्ना -न्नं, खेदितः -ता -तं, आन्तः -न्ता -न्तं, परिश्रान्तः -न्ता -न्तं, श्रमार्तः -र्त्ता -र्त्तं, क्लिष्टः -ष्टा -ष्टं, ग्लानः -ना -नं.

JADISH, *a.* (Bad) दुष्टः -ष्टा -ष्टं, पापीयान् -यसी -यः (स्), कुत्सितः -ता -तं, कु or कद् or दुर् prefixed.—(Unchaste, applied to a woman) बन्धकी, असती, असाध्वी, व्यभिचारिणी, पुंश्चली, धृष्टा, धर्षिणी, अविनीता, कामगा.

JAG, JAGG, *s.* (Notch) छेदः, अवच्छेदः, विच्छेदः, भङ्गः, दन्तः, क्रकचदन्तरूपो भङ्गः or छेदः.

To JAGG, *v. a.* जर्ज्जरीकृ, क्रकचदन्तरूपेण छिद् (c. 7. छिनत्ति, छेत्तुं) or विछिद् or अवछिद्, छेदं कृ, अवच्छेदं कृ, क्रकचरूपेण भङ्गुरं -रां -रं कृ, or भङ्गुरीकृ or जर्ज्जरं -रां -रं कृ, जर्ज्जरीकं -कां -कं कृ.

JAGGED, *p. p. a.* जर्ज्जरः -रा -रं, जर्ज्जरीकः -का -कं, क्रकचदन्तरूपेण विच्छिन्नः -न्ना -न्नं or दन्तुरः -रा -रं or दन्ती -न्तिनी -न्ति (न्), अनुक्रकचः -चा -चं, क्रकचधाराकारः -रा -रं, भङ्गुरः -रा -रं, विषमधारः -रा -रं.

JAGGEDNESS, *s.* जर्ज्जरता, जर्ज्जरीकता, दन्तुरत्वं, भङ्गुरत्वं.

JAGGY, *a.* दन्तुरः -रा -रं, अनुक्रकचः -चा -चं. *See* JAGGED.

JAIL, *s.* कारा, कारागारं, कारागृहं, कारावेश्म *n.* (न्), बन्धनागारं, बन्धनालयः, बन्धनगृहं, बन्धनस्थानं, निरोधस्थानं, वन्दिशाला, गुप्तिः *f.*, चारः.

JAILER, *s.* कारारक्षकः, कारागृहाध्यक्षः, कारागाराधिपतिः *m.*, बन्धनालयरक्षकः, गुप्तिपालकः, वन्दिपालः.

JAKES, *s.* शौचकूपः, पायुक्षालनवेश्म *n.* (न्), अवस्करस्थानं.

JAM, *s.* मिष्टफलं, मिष्टान्नं, स्वाद्वन्नं, सन्धितफलं, सन्धितं.

KEEN, *a.* (Sharp, having a fine edge) तीक्ष्णः -क्ष्णा -क्ष्णं, तीक्ष्णधारः -रा -रं, शितः -ता -तं, निशितः -ता -तं, शितधारः -रा -रं, धाराधरः -रा -रं, तीक्ष्णधाराधरः -रा -रं, खरः -रा -रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, ज्ञातः -ता -तं, निशातः -ता -तं, तेजोवान् -वती -वत् (त्), तीक्ष्णाग्रः -ग्रा -ग्रं, प्रखरः -रा -रं.—(As hunger, cold, &c.) तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं.—(Eager, vehement) तीक्ष्णकर्म्मा -र्म्मी -र्म्म (न्), तीक्ष्णस्वभावः -वा -वं, व्यग्रः -ग्रा -ग्रं, कुतूहली -लिनी -लि (न्), उच्चण्डः -ण्डा -ण्डं, उत्साही &c., अत्यभिलाषी &c., उत्सुकः -का -कं.—(In mind) सूक्ष्मबुद्धिः -द्धिः -द्धि, तीक्ष्णबुद्धिः &c., कुशाग्रीयमतिः -तिः -ति, विदग्धः -ग्धा -ग्धं.—(Acrimonious) तिग्मः -ग्मा -ग्मं, अरुन्तुदः -दा -दं, कटुः -टुः -टुी -टु, उग्रः -ग्रा -ग्रं, दंशी -शिनी -शि (न्), दंशकः -का -कं; 'keen words,' वाग्मिः *f.*, वाग्मिषुः *m. f.*

KEENLY, *adv.* तीक्ष्णं, तीव्रं, तैक्ष्ण्येन, सतैक्ष्ण्यं, तिग्मं, सतैग्म्यं, कटु, उग्रं, तीक्ष्णतया, उग्रतया, निष्ठुरं, खरं, प्राखर्य्येण, तेजसा.

KEENNESS, *s.* (Sharpness of edge) तीक्ष्णता, तैक्ष्ण्यं, धारातीक्ष्णता, धाराशितत्वं, निशितत्वं, तीव्रता, तीक्ष्णाग्रत्वं, तिग्मता.—(Eagerness, vehemence) तीक्ष्णता, स्वभावतीक्ष्णता, व्यग्रता, कौतूहलं, उच्चण्डता, अत्यभिलाषः, उत्साहः, अनुरागः.—(Of mind) बुद्धिसूक्ष्मता -सौक्ष्म्यं, बुद्धितीक्ष्णता -तैक्ष्ण्यं, कुशाग्रीयमतित्वं, विदग्धता.—(Acrimony) तिग्मता, तैग्म्यं, कटुता, उग्रता, अरुन्तुदत्वं, प्राखर्य्यं, निष्ठुरता, नैष्ठुर्य्यं.

To KEEP, *v. a.* (Hold) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), सन्धृ, धा (c. 3. धत्ते, धातुं), रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्; 'to keep in the memory or heart,' हृदये कृ or धृ.—(Have in custody) रक्ष्, अभिरक्ष्, परिरक्ष्, संरक्ष्, पाल् (c. 10. पालयति -यितुं), गुप् (c. 1. गोपायति, गोतुं), रक्षणं कृ, रक्षां कृ, पालनं कृ.—(Preserve, guard) रक्ष्, प्रतिरक्ष्, पाल् or पा (c. 2. पाति -तुं), परिपाल्, अनुपाल्, प्रतिपाल्, सम्पाल्, अभिपाल्, उपपाल्, गुप् (c. 1. or c. 10. गोपयति -यितुं), अनुगुप्, अभिगुप्, प्रगुप्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, अव् (c. 1. अवति -वितुं), गुप्तिं कृ, गोपनं कृ.—(Detain) धृ, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, रुध्, बन्ध् (c. 9. बध्नाति, बन्द्धुं), प्रतिबन्ध्.—(Restrain) निरुध्, वृ (c. 10. वारयति -यितुं), निवृ, निषिध् (c. 1. -षेधति -षेद्धुं), प्रतिषिध्.—(Tend, feed) पाल्, रक्ष्; 'keep cattle,' गोपालनं कृ, गोरक्षणं कृ, पाशुपाल्यं कृ.—(Practise, perform, observe) आचर् (c. 1. -चरति -रितुं), समाचर्, सेव् (c. 1. सेवते -वितुं), आस्था (c. 1. -तिष्ठति -स्थातुं), अनुष्ठा, समास्था, समुपास्था, विधा (c. 3. -दधाति -धातुं), भज् (c. 1. भजते, भक्तुं), आलस् (c. 1. -लसते -सितुं), समालस्, अवलस्; 'keep silence,' मौनं भज् or सेव् or अवलम्ब्.—(Fulfil) साध् (c. 10. साधयति -यितुं); 'keep a promise,' प्रतिज्ञां शुध् (c. 10. शोधयति -यितुं), प्रतिज्ञां पाल्.—(Not to divulge) धृ (c. 10. धारयति), न प्रकाश् (c. 10. काशयति -यितुं); 'to keep a secret,' रहस्यं धृ or रक्ष् or गुप्, रहस्यगोपनं कृ.—(Maintain, board) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, भरणं कृ, भृतिं कृ or दा, पाल्, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, पालनं कृ.—(Entertain) सत्कृ.—(Have in pay) वेतनं दा.—(Keep back) निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), विनिग्रह्, सन्निग्रह्, संरुध् (c. 1. -रुणद्धि -रोद्धुं), उपसंरुध्, विधृ, निवृ, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), उपसंहरणं कृ.—(Keep company with) सह चर्, सह वस् (c. 1. वसति, वस्तुं), संवस्.—(Keep in, conceal) गुह् (c. 1. गूहति -हितुं), निगुह्, छद् (c. 10. छादयति -यितुं), अन्तर्धा, अपवृ, संवृ, गोपनं कृ.—(Keep off) प्रतिवृ, निवृ, वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिकृ, निरुध्, व्यपोह् (c. 1. -जहते -हितुं), अपसिध्, प्रतिषिध्.—(Keep under) वशीकृ, स्वाधीनीकृ, निग्रह्, प्रत्याह्.—(Keep up, maintain) धृ, सन्धृ, भृ, सम्भृ, प्रवृत् (c. 10. -वर्त्तयति -यितुं), संस्था in caus. (-स्थापयति -यितुं), पाल्, प्रवर्त्तनं कृ.—(Keep out) निषिध्, निवृ.

To KEEP, *v. n.* (Remain, continue) स्था (c. 1. तिष्ठति -ते, स्थातुं), वृत् (c. 1. वर्त्तते -र्त्तितुं); 'to keep on doing any thing,' may be expressed by आस् (c. 2. आस्ते) with the pres. or indec. part. of another verb; as, 'he keeps following me,' मम पश्चाद् आगच्छन् आस्ते. *See* CONTINUE, *v. n.* (Last, endure) स्था, चिरस्थायी -यिनी -यि भू.—(Persevere) यत्नवस्था, निर्बन्धं कृ, आग्रहं कृ.—(Adhere, cohere) संसञ्ज् in pass. (-सज्यते -सज्जते), संश्लिष् in pass. (-श्लिष्यते), अनुबन्ध् in pass. (-बध्यते), संलग्नीभू, अनुलग्नीभू.—(Lodge) वस् (c. 1. वसति, वस्तुं), निवस्.—(Keep from) निवृत् (c. 1. -वर्त्तते -र्त्तितुं), परिहृ (c. 1. -हरति -हर्त्तुं), वृज् (c. 10. वर्जयति -यितुं), परिवृज्, विवृज्.—(Keep on) प्रवृत्, प्रारभ् सम्पद् (c. 10. -पादयति -यितुं).

KEEP, *s.* (Custody, charge) रक्षा -क्षणं, पालनं, गुप्तिः *f.*, गोपनं.—(Condition) अवस्था, स्थितिः *f.*, भावः, वृत्तिः *f.*; 'in good keep,' सुस्थितः -ता -तं.—(Board, maintenance) भृतिः *f.*, ग्रासाच्छादनं, अन्नजलं, भोजनं.—(Stronghold) दुर्गं.—(Dungeon) कारा, कारागारं, निरोधस्थानं, बन्धनागारं, गुप्तिः *f.*

KEEPER, *s.* रक्षकः, रक्षी *m.* (न्), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), अध्यक्षः, पतिः *m.* पः in comp.; as, 'keeper of sheep or cattle,' पशुपालः, मेषपोषकः, गोरक्षकः, गोपालः, गोपः, गवीश्वरः; 'of a prison,' कारारक्षकः, कारागाराध्यक्षः, बन्दिपालः; 'of mad people,' उन्मत्तपालकः; 'of a park,' उद्यानपालः -लकः, उद्यानरक्षकः; 'of a gaming-house,' सभापतिः *m.*, सभिकः, द्यूतसभाधिकारी *m.* (न्).

KEEPERSHIP, *s.* रक्षकत्वं, पालकत्वं, अध्यक्षत्वं, अधिकारित्वं.

KEEPING, *s.* (Custody, guard) रक्षा -क्षणं, गुप्तिः *f.*, पालनं, गोपनं.—(Congruity, harmony) ऐक्यं, सङ्गतत्वं, साङ्गत्यं, सादृश्यं, अविरोधः, योग्यता, आनुरूप्यं.

KEEPSAKE, *s.* स्मरणार्थकदानं, स्मरणार्थं दत्तं द्रव्यं or वस्तु, स्मरणार्थं गृहीतं द्रव्यं, स्मृतिजनकदानं, स्मृतिदानं, प्रीतिदानं, प्रीतिदायं.

KEG, *s.* क्षुद्रभाण्डं, काष्ठभाण्डं, दीर्घगोलाकारं क्षुद्रभाजनं.

To KEN, *v. a.* (Descry) दूराद् आलोक् (c. 1. -लोकते, c. 10. -लोकयति -यितुं) or अवलोक् or दृश् c. 1. पश्यति, द्रष्टुं) or प्रदृश्.—(Know) ज्ञा (c. 9. जानाति, ज्ञातुं).

KEN, *s.* (Reach of sight) चक्षुर्विषयः, नयनविषयः.—(Reach of understanding) बुद्धिविषयः; 'beyond the ken,' अविषयः -या -यं, बुद्ध्यतीतः -ता -तं.

KENNEL, *s.* (House for dogs) श्वशाला, कुक्कुरालयः, श्वगृहं, कुक्कुरागारं.—(Pack of hounds) श्वगणः, कुक्कुरगणः, मृगयाकुक्कुरगणः.—(Water-course) प्रणाली, जलमार्गः, जलवाहनी.

To KENNEL, *v. n.* कुक्कुरालये वस् (c. 1. वसति, वस्तुं) or स्था (c. 1. तिष्ठति, स्थातुं), श्ववद् or शृगालवद् गर्त्ते वस् or स्था.

To KENNEL, *v. a.* कुक्कुरालये वस् (c. 10. वासयति -यितुं).

KEPT, *p. p.* धृतः -ता -तं, धारितः -ता -तं, रक्षितः -ता -तं, पालितः -ता -तं, गुप्तः -प्ता -प्तं, भृतः -ता -तं, पोषितः -ता -तं.

KERCHIEF, *s.* (Head-dress) मस्तकाभरणं, मुकुटं. किरीटः, शेखरः; 'handkerchief,' नक्तकः, वरकं, मुखमार्ज्जनी; 'neckkerchief,' कण्ठवेष्टनं, ग्रीवावेष्टनं, कण्ठवस्त्रं.

KERNEL, *s.* बीजं, गर्भः, फलबीजं, फलगर्भः, अष्ठिः *f.*, अष्ठीला -लिका. —(Central part of any thing) मध्यं, गर्भः, उदरं, हृदयं, अभ्यन्तरं.

KERNELLY, *a.* बीजी -जिनी -जि (न्). बीजवान् -वती -वत् (त्), बीजपूर्णः -र्णा -र्णं, बीजमयः -यी -यं, बीजाकारः -रा -रं.

KESTREL, *s.* श्येनजातीयः पक्षिभेदः, कपोतारिः *m.*

KETCH, *s.* द्विकूपकविशिष्टा नौका, कूपकद्वययुक्ता नौः.

KETTLE, *s.* स्थाली, उदस्थाली, पिठरः -रं, कटाहः, उखा, पिष्टपचनं, कन्दुः *m. f.*, क्वथनीं.

KETTLE-DRUM, *s.* भेरी, मृदङ्गः, मुरजः, पटहः, दुन्दुभिः *m.*, महेलः, डिण्डिमः, आनकः, ढक्का.

KETTLE-DRUMMER, *s.* माहेलः -ल्लिकः, भैरवज्ञिकः, भेरीताडकः, पटहताडकः.

KEY, *s.* उद्घाटनं, उद्घाटकः -कं, उद्घाटकयन्त्रं, कुञ्चिका, कूर्च्चिका, ताली, तल्लिका, अङ्कुटः.—(Explanation) निर्व्वचनं, व्याख्या.—(Key-note) षादी *m.* (न्); 'change of key in music,' शुद्धान्यायुक् *f.* (ज्).

KEY-HOLE, *s.* उद्घाटनच्छिद्रं, कुञ्चिकाच्छिद्रं, उद्घाटनरन्ध्रं, कुञ्चिकारन्ध्रं.

KEY-STONE, *s.* बन्धनप्रस्तरः, सन्धानप्रस्तरः, संयोगप्रस्तरः, मध्यमप्रस्तरः, मध्यस्थप्रस्तरः.

KIBE, *s.* पादस्फोटः, पाददारी, विपादिका, स्फुटिः *f.*, अलसः.

To KICK, *v. a.* or *n.* पादेन तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रह (c. 1. -हरति -र्हुं), खुरेण or पार्ष्णिना तड् or आहन्, पादाघातं कृ, पादप्रहारं कृ, खुराघातं कृ, खुरक्षेपं कृ, खुरं क्षिप् (c. 6. क्षिपति -क्षेप्तुं) or प्रक्षिप्, पार्ष्णिं क्षिप, पादं प्रक्षिप्.

KICK, *s.* पादाघातः, पादप्रहारः, पादाहतिः *f.*, पादाभिघातः, खुराघातः, खुराभिघातः, खुरक्षेपः, पार्ष्णिः *m.*, पार्ष्णिक्षेपः, पदाघातः.

KICKED, *p. p.* पादाहतः -ता -तं, खुराहतः -ता -तं, पदाहतः -ता -तं.

KICKER, *s.* पादाघातकृत् *m.*, पादप्रहारकर्त्ता *m.* (र्त्तृ), खुरक्षेपकः.

KICKING, *s.* पादाघातकरणं, पादप्रहरणं, खुरक्षेपणं, खुराघातः.

KID, *s.* (Young goat) छागशावकः, अजशावकः, छागवत्सः, छागशिशुः *m.*, अजपोतकः.—(Fagot) काष्ठभारः, काष्ठकूर्च्चः.

To KID, *v. n.* छागशावकं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or उत्पद् (c. 10. -पादयति -यितुं).

KIDDER, *s.* धान्यादीनां पूर्व्वक्रेता *m.* (तृ) or पूर्व्वग्राहकः.

To KIDNAP, *v. a.* बालकस्तेयं कृ, मनुष्यस्तेयं कृ, बालकं हृ (c. 1. हरति, हर्त्तुं) or अपहृ or अभिहृ or चुर् (c. 10. चोरयति -यितुं), बालापहरणं कृ, मनुष्यापहरणं कृ.

KIDNAPPED, *p. p.* चौरहृतः -ता -तं, चौरापहृतः -ता -तं, बलादपहृतः -ता -तं.

KIDNAPPER, *s.* बालकस्तेयकृत् *m.*, मनुष्यस्तेयकृत्, बालापहारकः.

KIDNAPPING, *s.* बालकस्तेयं, मनुष्यस्तेयं, बालापहरणं, मनुष्यापहारः.

KIDNEY, *s.* वृक्कः -क्का -क्कं, वुक्कः, वूक्कः, वूक्का *m.* (न्), मूत्रपिण्डः.

KIDNEY-BEAN, *s.* मुद्गः, मुद्गपर्णी, मुद्गः -ष्कः, माषः, माषपर्णी, शिम्बिकः, शिम्बिपर्णी -र्णिका, मकुष्टकः, मकुष्टकः; 'a field of kidney beans,' माष्यं, मायोनं.

KILDERKIN, *s.* दीर्घगोलाकारं काष्ठभाण्डं, मानविशेषः.

To KILL, *v. a.* हन् (c. 2. हन्ति -न्तुं), निहन्, अभिहन्, आहन्, अभ्याहन्, समाहन्, विनिहन्, विहन्, प्रहन्, प्रणिहन्, निप्रहन्; 'the two last require the gen. c. of the object; हन् in caus. (घातयति -यितुं), व्यापद् (c. 10. -पादयति -यितुं), मृ (c. 10. मारयति -यितुं), सूद् (c. 10. सूदयति -यितुं), निसूद्, अभिसूद्, विनिसूद्, सन्निसूद्, वध्,—(Defective, usually found in the 3d pret. अवधीत् and fut. वधिष्यति -ते), नश् (c. 10. नाशयति -यितुं), विनश्, प्रमो in caus. (-मापयति -यितुं), शद् (c. 10. शातयति -यितुं), शस् (c. 1. शसति -सितुं), विशस्, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, विक्षण्, निपत् (c. 10. -पातयति -यितुं), विनिपत्, क्षि (c. 5. क्षिणोति, क्षेतुं or caus. क्षययति क्षपयति -यितुं), हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), तृह् (c. 6. तृहति, c. 7. तृणेढि, तर्हितुं), तुभ् (c. 9. तुभ्नाति, तोभितुं), तुप्, तुफ्, तुब्, तुम्प्, तुम्फ्, उज्झस् (c. 10. -जासयति -यितुं), with gen. c., कृत् (c. 6. कृन्तति, कर्त्तितुं), निकृत्, निष्कृत्, वधं कृ, प्राणहत्यां कृ, प्राणघातं कृ, जीवहत्यां कृ, पञ्चत्वं गम् (c. 10. गमयति -यितुं), लोकान्तरं गम् or प्राप् (c. 10. -आपयति -यितुं).

KILLED, *p. p.* हतः -ता -तं, निहतः -ता -तं, विहतः -ता -तं, आहतः -ता -तं, अभिहतः -ता -तं, समाहतः -ता -तं, विनिहतः -ता -तं, व्यापादितः -ता -तं, व्यापन्नः -न्ना -न्नं, घातितः -ता -तं, मारितः -ता -तं, सूदितः -ता -तं, निषूदितः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, विशसितः -ता -तं, निपातितः -ता -तं, विनिपातितः -ता -तं, क्षतः -ता -तं, विक्षतः -ता -तं, हतप्राणः -णा -णं, हतजीवितः -ता -तं, नष्टजीवितः -ता -तं, नष्टप्राणः -णा -णं, हतचैतन्यः -न्या -न्यं; 'being killed,' हन्यमानः -ना -नं, निहन्यमानः -ना -नं; 'to be killed,' हननीयः -या -यं, घातव्यः -व्या -व्यं, व्यापादनीयः -या -यं, व्यापादयितव्यः -व्या -व्यं.

KILLER, *s.* हन्ता *m.* (न्तृ), निहन्ता *m.*, घातकः, घाती *m.* (न्), मारकः, वधकारी *m.* (न्), वधकः, प्राणहन्ता *m.*, जीवहन्ता *m.*, हत्याकृत्, प्राणहत्याकृत्, नाशकः, विनाशकः, विशसिता *m.* (तृ), अन्तकः in comp., सूदनः, घ्नः in comp.

KILLING, *s.* घातः -तनं, हननं, निहननं, व्यापादनं, मारणं, वधः, प्राणघातः -तनं, प्राणहत्या, प्रमापणं, सूदनं, निषूदनं, क्षणनं, नाशः, प्राणनाशः, शसनं, विशसनं, विदारणं -णा, विमहेनं, महेनं, मथनं, प्रमथनं, प्रमयः, विशरः, विशारणं, निशारणं, निकारणं, निर्हिंसनं, निवर्हणं, निकृन्तनं, आलम्भः, हत्या in comp.

KILN, *s.* पाकपुटी, आपाकः, पवनं; 'brick-kiln,' इष्टकापचनस्थानं.

KIMBO, *s.* विभुग्नः -ग्ना -ग्नं, अवभुग्नः -ग्ना -ग्नं, कुटिलः -ला -लं, वक्रः -क्रा -क्रं; 'arms a-kimbo,' विभुग्नभुजौ *m.* du., बहिर्भुग्नभुजौ.

KIN, *s.* (Relationship) ज्ञातित्वं, ज्ञातिभावः, बन्धुता, बान्धवत्वं.—(Kindred) स्वकुलं, कुलं, ज्ञातयः *m. pl.*, स्वज्ञातयः, बान्धवाः *m. pl.*, सपिण्डाः *m. pl.*, सगोत्राः *m. pl.*, सम्बन्धिनः *m. pl.*, गोत्रं; 'of kin,' सगोत्रः -त्रा -त्रं, समानगोत्रः &c., स्वजातीयः -या -यं, सजातीयः -या -यं, गोत्रसम्बन्धी &c.; 'next of kin,' अनन्तरः -रा -रं, अनन्तरजातीयः -या -यं, अनन्तरजन्मा -न्मा -न्म (न्).

KIND, *a.* (Disposed to make others happy, benevolent) प्रियकरः -री -रं, प्रियङ्करः -री -रं, प्रियकारः -री -रं, प्रियकृत् *m. f. n.*, प्रियः -या -यं, प्रीतः -ता -तं, प्रीतिमान् -मती -मत् (त्), हितः -ता -तं, प्रियैषी -षिणी -षि (न्), हितैषी &c., हितवान् -वती -वत् (त्), सुहृत्तः -ता -तं, हितकामः -मा -मं, हितकरः -री -रं, हितबुद्धिः -द्धिः -द्धि, उपकारशीलः -ला -लं, उपकारी -रिणी -रि (न्), उपकारपरः -रा -रं, परोपकारी &c., लोकोपकारी &c., उपकारबुद्धिः -द्धिः -द्धि, स्निग्धः -ग्धा -ग्धं, स्नेहशीलः -ला -लं, स्नेही -हिनी -हि (न्), हृदयालुः -लुः -लु,

सुहृदयः -या -यं, सुहृत्तमः -मा -मं, अनुकूलः -ला -लं, कृपालुः -लुः -लु, कृपाशीलः -ला -लं, अनुकम्पकः -का -कं, अनुकम्पी -म्पिनी -म्पि (न्), दयालुः -लुः -लु, करुणात्मा -त्मा -त्म (न्), दयावान् &c., लोकानुकम्पनः -ना -नं, अद्रोही -हिणी -हि (न्), परहितेच्छुः -च्छुः -च्छु, परकल्याणेच्छुः &c., सुशीलः -ला -लं, प्रसन्नः -न्ना -न्नं, अनुनयी -यिनी -यि (न्), अनुग्राही &c.; 'kind to servants,' भृत्यकामकृत्; 'kind to the poor,' दरिद्रोपकारी &c., दीनानुकम्पनः -ना -नं, दीनवत्सलः -ला -लं; 'kind offices,' उपकारः, उपचारः; 'kind act,' सुकृतं, सुकृतिः *f.*, प्रीतिकर्म्म *n.* (न्); 'kind words,' प्रीतिवचस् *n.*, प्रियभाषणं; 'speaking kind words,' प्रियवादी -दिनी -दि (न्), प्रियंवदः -दा -दं; 'kind present,' प्रीतिदानं.

KIND, *s.* (Genus, class) जातिः *f.*, गणः, वर्गः, वर्गः, सामान्यं.—(Sort) विशेषः, भेदः, प्रभेदः, प्रकारः, आकारः, जातिः *f.* -तं, रूपं, विधिः *m.*, विधानं, विधः in comp.; 'a kind of fish,' मत्स्यभेदः, मत्स्यविशेषः; 'of various kinds,' विविधः -धा -धं, नानाविधः -धा -धं, नानारूपः -पी -पं; 'of many kinds,' बहुविधः -धा -धं, बहुरूपः -पी -पं, अनेकाकारः -रा -रं, अनेकरूपः -पी -पं; 'of two kinds,' द्विविधः -धा -धं; 'of four kinds,' चतुर्विधः -धा -धं, चतुःप्रकारः -रा -रं; 'of all kinds,' सर्व्वप्रकारः -रा -रं; 'all kinds of food,' सर्व्वप्रकारमन्नं; 'of the same kind,' सविधः -धा -धं, सजातिः -तिः -ति, सजातीयः -या -यं, समानजातीयः -या -यं; 'of such a kind,' एवंविधः -धा -धं, तथाविधः -धा -धं, एवंरूपः -पा -पं.—(Manner, way) रीतिः *f.*, प्रकारः, विधानं, प्रभृतिः *f.*

KIND-HEARTED, *a.* सुहृदयः -या -यं, सुहृदयवान् -वती -वत् (त्), हृदयालुः -लुः -लु, हृदयी -यिनी -यि (न्), हृदयिकः -का -कं, चित्तवान् &c.

To KINDLE, *v. a.* ज्वल् (c. 10. ज्वलयति, ज्वालयति -यितुं), प्रज्वल्, संज्वल्, समिन्ध् (c. 7. -इन्द्धे -इन्धितुं), तप् (c. 10. तापयति -यितुं, c. 1. तपति, तप्तुं), सन्तप्, दीप् (c. 10. दीपयति -यितुं), प्रदीप्, आदीप्, सन्दीप्, उपदीप्, उद्दीप्, सन्धुक्ष् (c. 10. -धुक्षयति -यितुं), दह् (c. 1. दहति, दग्धुं), प्रदह्, परिदह्, सम्प्रदह्.—(Excite) उत्तप्, उत्तिज् (c. 10. तेजयति -यितुं), समुत्तिज्, उत्सह् (c. 10. -साहयति -यितुं), प्रोत्सह्.—(Provoke) प्रकुप् (c. 10. -कोपयति -यितुं).

To KINDLE, *v. n.* समिन्ध् in pass. (-इध्यते), समिद्धीभू, दह् (c. 4. दह्यति -ते, दग्धुं), दीप् (c. 4. दीप्यते, दीपितुं), सन्दीप्, प्रदीप्, ज्वल् (c. 1. ज्वलति -लितुं), प्रज्वल्, तप् (c. 1. तपति, तप्तुं or in pass. तप्यते), सन्धुक्ष् (c. 1. -धुक्षते -क्षितुं), अग्निदीप्तः -प्ता -प्तं भू.

KINDLED, *p. p.* समिद्धः -द्धा -द्धं, इद्धः -द्धा -द्धं, दीप्तः -प्ता -प्तं, प्रदीप्तः -प्ता -प्तं, दीपितः -ता -तं, उद्दीप्तः -प्ता -प्तं, ज्वलितः -ता -तं, प्रज्वालितः -ता -तं, तप्तः -प्ता -प्तं, सन्तप्तः -प्ता -प्तं, तापितः -ता -तं, सन्धुक्षितः -ता -तं, दग्धः -ग्धा -ग्धं, उत्तेजितः -ता -तं; 'one whose anger is kindled,' समिद्धकोपः -पा -पं, कोपज्वलितः -ता -तं.

KINDLINESS, *s.* मृदुता, सौम्यता -त्वं, स्निग्धता, कोमलता, प्रीतता, प्रीतिः *f.*

KINDLY, *a.* (Congenial) समशीलः -ला -लं, समानशीलः -ला -लं, समानभावः -वा -वं, अनुगुणः -णा -णं, अनुकूलः -ला -लं.—(Bland, gentle) सौम्यः -म्या -म्यं, मृदुः -दुः -दवी -दु, स्निग्धः -ग्धा -ग्धं, कोमलः -ला -लं, प्रीतः -ता -तं, दयालुः -लुः -लु.

KINDLY, *adv.* प्रीत्या, प्रीतिपूर्व्वं, सुशीलवत्, सुशीलत्वात्, सुजनत्वात्, सानुनयं, सद्भावात्, कृपया, दयया, सदयं, प्रियं, हितं, स्नेहेन, सस्नेहं, सानुग्रहं, परहितेच्छया, उपकारशीलत्वात्, सानुकूल्यं; 'kindly affected,' सुरक्तः -क्ता -क्तं, अनुरक्तः -क्ता -क्तं, हितबुद्धिः -द्धिः -द्धि; 'speaking kindly,' प्रियवादी -दिनी -दि (न्).

KINDNESS, *s.* (Of disposition) प्रीतता, प्रीतिः *f.*, उपकारशीलता, स्निग्धता, स्नेहशीलता, स्नेहः, कृपालुता, दयालुता, प्रियता, दयाशीलता, कृपाशीलता, सुहितत्वं, हितत्वं, हितेच्छा, परहितेच्छा, हितकाम्या, सौजन्यं, सुजनत्वं, अनुग्रहः, प्रसादः, प्रसन्नता, उपकारबुद्धिः *f.*, परहितबुद्धिः *f.*, लोककृपा, सौहृद्यं, प्रेम *n.* (न्), अनुकूलता, आनुकूल्यं, अनुरोधः, मृदुशीलता, सौम्यत्वं.—(Act of kindness) उपकारः, उपकृतं -तिः *f.*, सुकृतं, सुकृतिः *f.*, प्रियं, परोपकारः, कृतोपकारः, हितं.

KINDRED, *s.* (Relationship) ज्ञातित्वं -ता, ज्ञातिभावः, सजातित्वं, बन्धुता, बान्धवत्वं, कुलसन्निधिः *m.*, सपिण्डता, एकपिण्डता, सगोत्रता, सम्बन्धित्वं, सगर्भत्वं.—(Relatives) ज्ञातयः *m. pl.*, बान्धवाः *m. pl.*, बन्धुजनः, बन्धुवर्गः, ज्ञातिवर्गः, बान्धवगणः, बान्धवजनः, स्वजनः -नाः *m. pl.*, सगोत्राः *m. pl.*, सकुल्याः *m. pl.*, स्वजातीयाः *m. pl.*, सजातीयाः, सम्बन्धिनः *m. pl.*, गोत्रं, बान्धवसमुदायः, गोत्रसमुदायः, गोत्रजाः *m. pl.*, कुलसन्निधिः *m.*

KINDRED, *a.* (Related) सजातीयः -या -यं, समानजातीयः -या -यं, सगोत्रः -त्रा -त्रं, समानगोत्रः -त्रा -त्रं, सकुल्यः -ल्या -ल्यं, समानवंशः -ंशा -ंशं, सवंशीयः -या -यं, सवर्णः -र्णा -र्णं, सम्बन्धी -न्धिनी -न्धि (न्), सम्बन्धीयः -या -यं.—(Congenial) समधर्म्मा -र्म्मा -र्म्म (न्), सधर्म्मा &c., समगुणः -णा -णं, तुल्यगुणः -णा -णं, समानभावः -वा -वं, तुल्यवृत्तिः -त्तिः -त्ति, अनुगुणः -णा -णं.

KINE, *s. pl.* गावः *m. pl.*, गोकुलं, गोवृन्दं, गोसमूहः.

KING, *s.* राजा *m.* (न्), नृपतिः *m.*, नृपः, नरपतिः *m.*, भूपतिः *m.*, भूपः, भूपालः, महीपतिः *m.*, पार्थिवः, पार्थः, पृथिवीपतिः *m.*, पृथिवीपालः, भूमिपः -पतिः *m.*, महीक्षित् *m.*, महीपः, महीपालः, क्षितिपः -पतिः *m.* -पालः, पृथिवीक्षित् *m.*, नरेश्वरः, नराधिपः, नरेशः, नरेन्द्रः, प्रजेश्वरः, प्रजापः -पतिः *m.*, जगतीपतिः *m.*, जगतीपालः, जगत्पतिः *m.*, अवनिपतिः *m.*, अवनिपालः, अवनीशः, अवनीश्वरः, क्षितीशः, क्षितीश्वरः, पृथिवीशकः, भूमिभृत् *m.*, क्षितिभृत् *m.*, भूभृत्, क्ष्माभृत्, क्ष्मापः, वसुधाधिपः, अधिपः, अधिपतिः *m.*, नायकाधिपः, महीभुक् *m.* (ज्), जगतीभुक् *m.*, क्ष्माभुक्, भूभुक् *m.*, भूमीन्द्रः, महीभर्त्ता *m.* (र्त्तृ), भर्त्ता *m.*, स्वामी *m.* (न्), प्रभुः *m.*, भगवान् *m.* (त्), क्षत्रपः -पतिः *m.*, राज्यभाक् *m.* (ज्), लोकपालः, लोकेशः, लोकेश्वरः, लोकनाथः, नरदेवः, राट् *m.* (ज्), इरावान् *m.* (त्), इन्द्रः in comp.; as, 'the king of beasts,' मृगेन्द्रः; 'the king of birds,' खगेन्द्रः; 'the king of men,' नरेन्द्रः; 'king of kings,' राजेन्द्रः, राजाधिराजः, राजराजः, राजाधिपः; 'supreme king,' अधिराजः, अधिराट् (ज्), महाराजः *m.* अधीश्वरः, सम्राट् (ज्), मण्डलेश्वरः, सर्व्वेश्वरः, राजसिंहः; 'a king's son,' राजपुत्रः, राजकुमारः, भर्त्तृदारकः; 'king's daughter,' राजपुत्री, राजकुमारी, राजकन्या; 'a line of kings,' राजावली -लिः *f.*, राजसन्ततिः *f.*; 'having no king,' अराजकः -का -कं, अनायकः -का -कं.

KING-CRAFT, *s.* राज्यनयनविद्या, राज्यकर्त्तृत्वं, राजत्वकरणं, राज्यचातुर्य्यं, राजनीतिः *f.*, राजनयः, राज्यरीतिः *f.*

KINGDOM, *s.* राज्यं, राजत्वं, ऐश्वर्य्यं, आधिपत्यं, स्वाम्यं, प्रभुत्वं, माहिनं.—(Country subject to a king) राष्ट्रं, राज्यं, विषयः.—(Government) राज्यं, राज्याधिकारः, राजाधिकारः, राज्यपालनं, राज्यनीतिः *f.*—(Population) प्रजा.—(Animal kingdom) जीवजातिः *f.*, प्राणिजातिः *f.*, जीवगणः.—(Vegetable kingdom) तृणजातिः *f.*, मूलजातिः, तृणगणः.—(Mineral kingdom) धातुजातिः *f.*, धातुगणः.

KINGFISHER, *s.* मत्स्यरङ्कः -ङ्कः, मत्स्यरङ्कः, मत्स्याशनः, सुचित्रकः, छत्रकः, कुट्टकः.

KINGLESS, *a.* अराजकः -का -कं, राजहीनः -ना -नं, अनायकः -का -कं.

KINGLIKE, KINGLY, *a.* राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजसदृशः -शी -शं, राजार्हः -र्हा -र्हं, नृपोचितः -ता -तं, राजोचितः -ता -तं, राजसन्निभः -भा -भं, राजसम्बन्धी -न्धिनी -न्धि (न्), राज in comp.; as, 'kingly policy,' राजनीतिः.

KING'S-EVIL, *s.* (A scrofulous disease) गण्डमाला.

KINGSHIP, *s.* राजता -त्वं, राज्यं, नृपत्वं, नरेन्द्रत्वं, भूपता -त्वं, महीपत्वं, नरेश्वर्यं, प्रभुत्वं, प्रजेश्वर्यं, प्राजापत्यं, आधिपत्यं, राजाधिकारः, राजपदं.

KINSFOLK, *s.* बान्धवाः *m. pl.*, बन्धुवर्गः, बन्धुजनः, बान्धववर्गः, स्वजनाः *m. pl.*, स्वजनः, ज्ञातिवर्गः, सजातीयाः *m. pl.*, सगोत्राः *m. pl.*

KINSMAN, *s.* बन्धुजनः, बन्धुः *m.*, बान्धवः, ज्ञातिः *m.*, स्वज्ञातिः *m.*, स्वजातीयः, सजातीयः, स्वबन्धुः *m.*, स्वजनः, स्वकुल्यः, सकुल्यः, स्ववंशीयः, सवंश्यः, वंश्यः, स्वकीयः, स्वकुटुम्बी *m.* (न्), कुटुम्बी *m.*, स्वः, कुलपुरुषः, गोत्रपुरुषः, सगोत्रः, गोत्रजः, गोत्रः, समानगोत्रः, गोत्रबन्धुः *m.*, सपिण्डः, सनाभिः *m.*, दायादः -दवः, समानोदकः, उदकदः, उदकदायी *m.* (न्); 'a number of kinsmen,' बन्धुगणः, बन्धुता; 'bewailing a kinsman,' बान्धवाक्रोशी *m.* (न्).

KINSWOMAN, *s.* बन्धुजनः, स्वजातीया, स्वकुल्या, गोत्रजा, गोत्रस्त्री.

KIRK, *s.* (Place of worship) भजनालयः, भजनमन्दिरं.—(Body of believers) भक्तसमूहः, भक्तगणः, भक्तवृन्दं. *See* CHURCH.

To KISS, *v. a.* चुम्ब् (c. 1. चुम्बति -म्बितुं, c. 10. चुम्बयति -यितुं), चुम्बनं कृ or दा, निंस् (c. 2. निंस्ते, निंसितुं), प्रणिंस्, परिणिंस्, निघृ (c. 1. निघृषति -र्षितुं), प्रणिघृ, मूर्ध्नि or मूर्धनि or शिरसि आघ्रा (c. 1. -जिघ्रति -घ्रातुं) or उपाघ्रा or उपघ्रा or समुपाघ्रा or समाघ्रा or अवघ्रा, अधरपानं कृ, अधररसं पा (c. 1. पिबति, पातुं).

KISS, *s.* चुम्बनं, चुम्बितं, परिणिंसा, निघृणं, प्रणिघृणं, निमिन्नकं, अधरपानं, दशनोच्छिष्टः; 'giving a kiss,' चुम्बनदानं.

KISSED, *p. p.* चुम्बितः -ता -तं, प्रणिंसितः -ता -तं, परिणिंसितः -ता -तं, निघृतः -ता -तं; 'to be kissed,' चुम्बनीयः -या -यं, प्रणिंसितव्यः -व्या -व्यं.

KISSER, *s.* चुम्बकः, चुम्बनदाता *m.* (तृ), परिणिंसकः.

KISSING, *part.* चुम्बन् -म्बती -म्बत् (त्), चुम्बितवान् -वती -वत् (त्).

KIT, *s.* (A large bottle) महाकूपी.—(A small fiddle) क्षुद्रसारङ्गी.—(A soldier's baggage) सैनिकसामग्री -ग्र्यं, सैनिकपरिच्छदः.—(Complement of necessary utensils) उपकरणसामग्र्यं -ग्री, उपकरणसमुदायः, सोपकारद्रव्यसम्भारः, द्रव्यसम्भारः, सम्भारः.

KITCHEN, *s.* पाकशाला, पाकस्थानं, पाकगृहं, पाकागारं, महानसः -सं, रसवती, सूदशाला; 'superintendent of the kitchen,' पाकशालाध्यक्षः, पाकगृहाधिकारी *m.* (न्), सूदाध्यक्षः.

KITCHEN-GARDEN, *s.* शाकवाटिका, शाकवाटी, शाकशाकटं, शाकशाकिनं.

KITCHEN-MAID, *s.* पाककर्म्मकरी, पाकचेटी, महानसचेटी, पाचकसहकारिणी दासिका or दासी.

KITCHEN-WORK, *s.* पाककर्म्म *n.* (न्), पाककार्य्यं, पाकागारकर्म्म.

KITE, *s.* (The bird) चिल्लः, आतायी *m.* (न्), आतापी *m.* (न्), विषचारी *m.* (न्), श्वभ्राभिः *m.*, श्येनः

KITLING, *s.* शावः -वकः, शिशुः *m.*, वत्सः, डिम्भः, डिम्बः.

KITTEN, *s.* मार्जारशावकः, विडालशिशुः *m.*, विडालशावकः, मार्जारवत्सः, क्षुद्रविडालः.

To KITTEN, *v. n.* मार्जारशावकं सू (c. 2. सूते, c. 4. सूयते, सोतुं) or प्रसू or जन् (c. 10. जनयति -यितुं) or प्रजन् (c. 4. -जायते -जनितुं).

To KLICK, *v. n.* *See To* CLICK.

To KNAB, *v. a.* दंश् (c. 1. दशति, दंष्टुं), दन्तैर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), or घृ (c. 1. धरति, धर्त्तुं).

KNACK, *s.* (Toy) क्रीडनकं.—(Dexterity) दक्षता, हस्तदक्षता, हस्तकौशल्यं, हस्तलाघवं, युक्तिः *f.*, चातुर्य्यं, नैपुण्यं, निपुणता, प्रयोगः, सुप्रयोगः -गता, पटुता, पाटवं, व्यापारः, क्षिप्रता, व्यापारक्षिप्रता, अभ्यासः.

To KNACK, *v. n.* आकस्मिकक्वणितं कृ, आकस्मिकशब्दं कृ, स्फुत्कारं कृ.

KNACKER, *s.* जीर्णाश्वक्रेता *m.* (तृ), जीर्णाश्वविशसिता *m.* (तृ).

KNAG, *s.* (Knot in wood) ग्रन्थिः *m.*, काष्ठसन्धिः *m.*, पर्ब्ब *n.* (न्).

KNAGGY, *a.* ग्रन्थिलः -ला -लं, बहुग्रन्थिः -न्थिः -न्थि, पर्ब्बविशिष्टः -ष्टा -ष्टं.

KNAP, *s.* (Protuberance) गण्डः, पिण्डः, गुल्मः, ग्रन्थिः *m.*, आभोगः.

To KNAP, *v. a.* (Bite) अकस्माद् दंश् (c. 1. दशति, दंष्टुं), आकस्मिकदंशनं कृ.—(Make a sharp sound) अकस्मात् क्वण् (c. 1. क्वणति -णितुं), आकस्मिकक्वणितं कृ.

KNAPSACK, *s.* पृष्ठेन भृतं सोपकारद्रव्यभाण्डं or सोपकारद्रव्याधारः, सैनिकेन यात्रामध्ये पृष्ठतो भृतं सोपकारद्रव्यभाजनं.

KNAR, *s.* (Knot in wood) ग्रन्थिः *m.*, पर्ब्ब *n.* (न्). *See* GNARLED.

KNAVE, *s.* धूर्त्तः, कितवः, वञ्चकः, प्रवञ्चकः, शठः, दुष्टजनः, तस्करः, पिशुनः, प्रतारकः, कूटकः, कूटकारः, दाम्भिकः, कुहकः, क्षित्वरः, कपटी *m.* (न्), कपटिकः.

KNAVERY, *s.* धूर्त्तता, कैतवं, तस्करविद्या, शाठ्यं, शठता, कूटता, पैशुन्यं, वञ्चनं, वञ्चकत्वं, व्याजः, कापट्यं, छलं, कपटः, दुष्टता.

KNAVISH, *a.* धूर्त्तः -र्त्तो -र्त्तं, धूर्त्तस्वभावः -वा -वं, धूर्त्तशीलः -ला -लं, कितवशीलः -ला -लं, शठः -ठा -ठं, तस्करस्वभावः -वा -वं, कपटी -टिनी -टि (न्), कापटिकः -की -कं, कौटिकः -की -कं, वञ्चकः -का -कं, पिशुनः -ना -नं.

KNAVISHLY, *adv.* धूर्त्तवत्, कितववत्, सकैतवं, कैतवेन, तस्करवत्, शठवत्, शाठ्येन, सकपटं, सकापट्यं, सव्याजं, सकूटं, वञ्चकवत्, वञ्चनार्थं, छलेन.

KNAVISHNESS, *s.* धूर्त्तता, कैतवं, धूर्त्तशीलता, कितवशीलता, शठता.

To KNEAD, *v. a.* हस्ताभ्यां मृद् (c. 9. मृद्नाति, मर्दितुं, c. 10. मर्दयति -यितुं), अवमृद्, विमृद्, प्रमृद्, उपमृद्, अभिमृद्, सम्मृद्, कराभ्यां पिष् (c. 7. पिनष्टि, पेष्टुं) or चूर्ण् (c. 10. चूर्णयति -यितुं), प्रचूर्ण्, विचूर्ण्, सचूर्ण्, चूर्णीकृ or घृष् (c. 1. घर्षति -र्षितुं), हस्ताभ्यां सम्पीड् (c. 10. -पीडयति -यितुं), हस्तसम्पीडनपूर्ब्बं पिण्डीकृ.—(Knead the limbs) संवाह् (c. 1. -वाहति -हितुं, c. 10. -वाहयति -यितुं), कराभ्यां संवाह्, संवाहनं कृ.

KNEADED, *p. p.* हस्ताभ्यां मर्दितः -ता -तं or सम्मर्दितः -ता -तं or विमर्दितः -ता -तं or मृदितः -ता -तं or उपमर्दितः -ता -तं or अवमर्दितः -ता -तं, कराभ्यां पिष्टः -ष्टा -ष्टं or सम्पिष्टः -ष्टा -ष्टं or चूर्णितः -ता -तं or घर्षितः -ता -तं or सम्पीडितः -ता -तं or पिण्डीकृतः -ता -तं.—(As the limbs) संवाहितः -ता -तं, कृतसंवाहः -हा -हं; 'to be kneaded,' संवाह्यः -ह्या -ह्यं.

KNEADING, *s.* हस्ताभ्यां मर्दनं or विमर्दनं or अवमर्दः -र्दनं or उपमर्दः -र्दनं, कराभ्यां पेषणं or घर्षणं or सम्पीडनं.—(Of the limbs) संवाहः -हनं, संहननं.—(Kneading-trough) द्रोणिः -णी *f.*

KNEE, *s.* जानु *n.* -नुः *m.*, जानुसन्धिः *m.*, अष्ठीवान् *m.* -वत् *n.* (त्), ऊरुपर्ब्ब *n.* (न्), ऊरुसन्धिः *m.*, जङ्घोरुसन्धिः *m.*, जङ्घोरुपर्ब्ब *n.*, कूर्परः, कूपरः, नलकीलः, पर्ब्बकं, चक्रिका; 'he fell on his knees,' जानुभ्यां भूमिम् अगमत् or भूमौ पपात.

KNEE-DEEP, *a.* जानुदघ्नः -घ्नी -घ्नं, जानुद्वयसः -सी -सं, जानुमात्रः -त्री -त्रं.

To KNEEL, *v. n.* जानुनी भूमौ न्यस् (c. 4. -अस्यति -असितुं), जानुनी भूमौ कृ, जानुभ्यां स्था (c. 1. तिष्ठति, स्थातुं), जानुभ्यां भूमौ पत् (c. 1. पतति -तितुं), or निपत्, जानुनी नम् (c. 10. नमयति -यितुं).

KNEELING, *part.* or *a.* भूमिन्यस्तजानुः -नुः -नु, क्षितिन्यस्तजानुः -नुः -नु, नतजानुकः -की -कं.

KNEEPAN, *s.* जानुफलकं, कपोली, नलकिनी, अष्ठीवत् *n.*, जानुफलं.

KNEE-TRIBUTE, *s.* जानुपूजा, जानुभ्यां पूजा, जानुनतिपूर्व्वी सेवा or अर्च्चना.

KNELL, *s.* प्रेतनयनकाले घण्टाध्वनिः *m.* or घण्टाशब्दः.

KNICK KNACK. *s.* क्रीडनकं, क्रीडाद्रव्यं, क्रीडावस्तु *n.*, क्रीडाविषयः.

KNIFE, *s.* छुरिका, छुरी, कर्त्तरिका, क्षुरी, कृन्तनिका, कृन्तत्रं, शस्त्री, कृपाणी -णिका, असिपुत्रिका.

KNIFE-GRINDER, *s.* भमाजीवी *m.* (न्), भमासक्रः, भमद्वारेण छुरिकातेजकः.

KNIGHT, *s.* सादी *m.* (न्), कुलीनसादी *m.*, अश्वसादी *m.*, अश्ववारः, कुलीनयोद्धा *m.* (द्ध्).

To KNIGHT, *v. a.* सादिपदे नियुज् (c. 7. -युनक्ति -योक्तुं), सादिख्यातिं दा, सादिपद्धतिं दा, कुलीनख्यातिं दा.

KNIGHTHOOD, *s.* सादिपदं, कुलीनसादिपदं, सादित्वं, सादिख्यातिः *f.*

To KNIT, *v. a.* दीर्घसूचिद्वारेण सूत्राणि ग्रन्थ् (c. 9. ग्रथ्नाति, c. 1. ग्रन्थति, ग्रन्थितुं), तन्तुग्रन्थनं कृ.—(Knit together, connect) संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), सन्धन्ध् (c. 9. -बध्नाति -बन्द्धुं), संश्लिष् (c. 10. -श्लेषयति -यितुं), योक्त्र (nom. योक्त्रयति -यितुं), संलग्नीकृ. —(Knit the brows) भ्रुवौ संहन् (c. 2. -हन्ति -न्तुं), भ्रूसंहतिं कृ.

KNIT, *p. p.* ग्रथितः -ता -तं.—(Well-knit) संहतः -ता -तं, सुसंहतः -ता -तं, दृढसन्धिः -न्धिः -न्धि; 'having the brows knit,' संहतभ्रूः -भ्रूः -भ्रु.

KNITTING, *s.* दीर्घसूचिद्वारा तन्तुग्रन्थनं or सूत्रग्रन्थनं, सूत्रश्लेषः; 'knitting the brows,' भ्रूसंहतिः *f.*

KNITTING-NEEDLE, *s.* दीर्घसूचिः -ची *f.*, सूत्रग्रन्थनार्थं दीर्घसूचिः or दीर्घशलाका.

KNOB, *s.* पिण्डः -ण्डं, गण्डः -ण्डका, गुल्मः, ग्रन्थिः *m.*. आभोगः.—(In wood) ग्रन्थिः *m.*, पर्व्व *n.* (न्).

KNOBBED, KNOBBY, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, सपिण्डः -ण्डा -ण्डं, गण्डी -ण्डिनी -ण्डि (न्), सगण्डः -ण्डा -ण्डं, ग्रन्थिलः -ला -लं.

To KNOCK, *v. a.* (Strike, hit) तड् (c. 10. ताडयति -यितुं), चितड्, तुद् (c. 6. तुदति -ते, तोत्तुं), आतुद्, चितुद्, प्रहृ (c. 1. -हरति -हर्त्तुं), हन् (c. 2. हन्ति -न्तुं), अभिहन्, निहन्, आहन्, विहन्, समाहन्, अभ्याहन्. —(Strike a door) द्वारं तड्.—(Knock down) पत् (c. 10. पातयति -यितुं), अवपत्, निपत्, भंश् (c. 10. भंशयति -यितुं), आघातेन or प्रहारेण भूमौ पत्.—(Knock out) आघातेन वहिष्कृ; 'to knock out the brains,' मस्तकं निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), आघातेन मस्तिष्कं वहिष्कृ.—(Knock off) आघातेन पत्; 'do quickly,' सत्वरं सम्पद् (c. 10. -पादयति -यितुं), त्वरितं कृ.—(Knock up, fatigue) खिद् (c. 10. खेदयति -यितुं), अवसद् (c. 10. -सादयति -यितुं), आयासेन सत्त्वं or बलं हृ (c. 1. हरति, हर्त्तुं) or अपहृ.—(Knock on the head) मस्तकम् आहत्य or ताडयित्वा व्यापद् (c. 10. -पादयति -यितुं).

To KNOCK, *v. n.* (Strike) ताडनं कृ, आघातं कृ, अभिघातं कृ, प्रहारं कृ, 'to knock with a stick,' वेत्राघातं कृ, दण्डप्रहारं कृ, दण्डपातनं कृ; 'with the fist,' मुष्ट्याघातं कृ, मुष्टिप्रहारं कृ, बाहुप्रहरणं कृ, मुष्टिपातं कृ. —(Strike against. clash) अभिहन् (c. 2. -हन्ति -न्तुं), प्रतिहन्, प्रतिघातं कृ, सङ्घट्ट् (c. 1. -घट्टते -ट्टितुं), आपत् (c. 1. -पतति -तितुं), अभिपत्.—(Knock under, submit) उपगम् (c. 1. -गच्छति -गन्तुं), वशं गम्, वशीभू.—(Knock up) श्रम् (c. 4. श्राम्यति, श्रमितुं), खिद् (c. 4. खिद्यते, खेत्तुं), अत्यायासात् or अतिखेदाद् गतसत्त्वः -त्त्वा -त्त्वं भू.

KNOCK, *s.* (Blow) आघातः, अभिघातः, घातः, प्रहारः, आहतिः *f.*, हतिः *f.*, ताडनं, पातः -तनं; 'a knock with a stick,' वेत्राघातः; 'a knock with the fist,' मुष्टिप्रहारः; 'a knock-down argument,' गलहस्तः.

KNOCKED, *p. p.* ताडितः -ता -तं, आहतः -ता -तं, अभिहतः -ता -तं, समाहतः -ता -तं, प्रहतः -ता -तं.—(Knocked down) निपातितः -ता -तं, पातितः -ता -तं, भंशितः -ता -तं.

KNOCK-KNEED, *a.* संहतजानुः -नुः -नु, संहतजानुकः -की -कं, संजुः -ज्रुः -ज्रु, संज्ञः -ज्ञा -ज्ञं.

KNOCKER, *s.* (One that knocks) ताडयिता *m.* (तृ), प्रहर्त्ता *m.* (र्त्तृ), ताडनकृत्.—(Of a door) द्वारताडनी, द्वारमुद्गरः, द्वारताडनयन्त्रं.

To KNOLL, *v. a.* or *n.* प्रेतनयनकाले घण्टाध्वनिं कृ or घण्टाशब्दं कृ.

KNOLL, *s.* क्षुद्रपर्व्वतः, ईषदुन्नतो भूभागः or भूमिभागः or मृत्तिकाचयः, वप्रः -प्री, वल्मीकं, नाकुः *m.*

KNOT, *s.* ग्रन्थिः *m.*, ग्रन्थिका, बन्धः -न्धनं, गण्डः; 'tying a knot,' ग्रन्थिबन्धनं.—(Joint in a plant) पर्व्व *n.* (न्), ग्रन्थिः *m.*, परुः *m.*, गण्डूः *f.*, आकल्यकः.—(In wood) काष्ठग्रन्थिः *m.*, काष्ठसन्धिः *m.*, काण्डसन्धिः *m.*—(Articulation) सन्धिः *m.*—(Bond of union) सन्धिः *m.*, सम्बन्धः, संहतिः *f.*, संयोगः.—(Gang, crew) गणः, सङ्घः, समूहः, संसर्गः, निवहः, मण्डलं.—(Bunch, clump) पिण्डः -ण्डं, गुल्मः, गुच्छः -च्छकः, स्तवकः, काण्डः, स्तम्बः.—(Knotty point) ग्रन्थिः *m.*, गूढार्थः; 'one who removes knots,' ग्रन्थिहरः.

To KNOT, *v. a.* ग्रन्थिं कृ, ग्रन्थ् (c. 1. ग्रन्थति -न्थितुं), ग्रन्थिरूपेण संश्लिष् (c. 10. -श्लेषयति -यितुं).

To KNOT, *v. n.* ग्रन्थिरूपेण संश्लिष्टीभू, ग्रन्थिं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

KNOTTINESS, *s.* ग्रन्थिलत्वं, सग्रन्थित्वं, ग्रन्थिपूर्णता, सपर्व्वत्वं, ग्रन्थिमत्त्वं.

KNOTTY, KNOTTED; *a.* ग्रन्थिलः -ला -लं, ग्रन्थिमान् -मती -मत् (त्), ग्रन्थी -न्थिनी -न्थि (न्), ग्रन्थिमयः -यी -यं, पर्व्वमयः -यी -यं, बहुग्रन्थिः -न्धिः -न्धि.—(Intricate, difficult) गूढार्थः -र्था -र्थं, दुर्ज्ञेयः -या -यं, दुर्गमः -मा -मं, दुःशोधनीयः -या -यं.

To KNOW, *v. a.* and *n.* ज्ञा (c. 9. जानाति -नीते, ज्ञातुं), परिज्ञा, संज्ञा, विज्ञा, विद् (c. 2. वेत्ति, वेदितुं), संविद्, बुध् (c. 1. बोधति -ते -धितुं, c. 4. बुध्यते, बोद्धुं), अवबुध्, ससुध्, अवगम् (c. 1. -गच्छति -गन्तुं), अवे (c. 2. अवैति -तुं, rt. इ), मन् (c. 4. मन्यते, मन्तुं); 'know thou,' अवेहि, जानीहि.—(Recognize) अभिज्ञा, प्रतिज्ञा, प्रत्यभिज्ञा, समभिज्ञा. —(Be familiar or acquainted with) परिचयं कृ, परिचितः -ता -तं भू or अस्.—(Understand, perceive) उपलभ् (c. 1. -लभते -लब्धुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), अर्थं ग्रह्.—(Carnally) प्रज्ञा, सङ्गम् (c. 1. -गच्छति -गन्तुं), भज् (c. 1. भजते, भक्तुं), स्त्रीसङ्गं कृ, स्त्रीसङ्ग्रहणं कृ.

KNOWABLE, *a.* ज्ञातव्यः -व्या -व्यं, ज्ञेयः -या -यं, विज्ञेयः -या -यं, ज्ञानीयः -या -यं, वेदनीयः -या -यं, वेद्यः -द्या -द्यं, अवगम्यः -म्या -म्यं, अवगन्तव्यः -व्या -व्यं.

KNOWER, *s.* ज्ञाता *m.* -त्री *f.* (तृ), ज्ञानी *m.* -निनी *f.* (न्), वेत्ता *m.* -त्री *f.* (त्तृ), वेदिता *m.* (तृ), वेदी *m.* -दिनी *f.* (न्), अभिज्ञः -ज्ञा, ज्ञः ज्ञा in comp.

KNOWING, *a.* (Shrewd) अभिज्ञः -ज्ञा -ज्ञं, विज्ञः -ज्ञा -ज्ञं, ज्ञानी -निनी -नि (न्), विदग्धः -ग्धा -ग्धं, तद्विद् *m.f.n.*, तज्ज्ञः -ज्ञा -ज्ञं, पक्कबुद्धिः -द्धिः, -द्धि, विचक्षणः -णा -णं, नागरः -रा -रं, निपुणः -णा -णं, प्रवीणः -णा -णं.

KNOWINGLY, *adv.* ज्ञानतस्, ज्ञानात्, ज्ञानपूर्व्वं, मत्या, बुद्ध्या, मतिपूर्व्वं, बुद्धिपूर्व्वं, बोधपूर्व्वं.—(Cunningly) विज्ञवत्, विदग्धवत्.

KNOWLEDGE, *s.* (Certain perception, opposed to ignorance of) ज्ञानं, परिज्ञानं, विज्ञानं, अभिज्ञानं, बोधः -धनं, प्रबोधः, अवबोधः, उद्बोधः, प्रज्ञा, उपलब्धिः *f.*, वेदनं, संवेदः -दनं, अवगमः, प्रमा, प्रमितिः *f.*, समुदागमः, उपलम्भः, ज्ञप्तिः *f.*, प्रतीतिः *f.*, ज्ञातृत्वं, वेत्तृत्वं, विपश्यं.—(Learning, science) विद्या, ज्ञानं, विज्ञानं, विद्वत्ता, वैदुष्यं, पाण्डित्यं,

प्राज्ञत्वं, श्रुतिः *f.*, व्युत्पत्तिः *f.*—(Spiritual knowledge) आत्मविद्या, आत्मज्ञानं, परमार्थविद्या, परमार्थज्ञानं, परमार्थः, अध्यात्मविद्या, तत्त्वज्ञानं, ज्ञानविद्या, ज्ञानं, ब्रह्मज्ञानं, ब्रह्मविद्या; 'instruction in spiritual knowledge,' ब्रह्मदानं, ब्रह्मोपदेशः, ज्ञानोपदेशः, आत्मबोधः; 'versed in it,' ज्ञानवान् -वती -वत् (त्), ज्ञानपरः -रा -रं, ज्ञाननिष्ठः -ष्ठा -ष्ठं, —(Sacred and profane knowledge) ज्ञानविज्ञानं.—(Recognition) प्रत्यभिज्ञानं, प्रत्यभिज्ञा, अभिज्ञानं, संविद्भिः *f.*—(Acquaintance with persons) परिचयः, सौहृदं —(Conversancy) परिज्ञानं, अभिज्ञता, विज्ञता, नैपुण्यं, प्रवीणता, पाटवं; 'acquiring knowledge,' विद्यागमः, विद्याप्राप्तिः *f.*, विद्यार्जनं, विद्यालाभः; 'giving knowledge,' विद्यादानं; 'eager after knowledge,' विद्यार्थी -र्थिनी -र्थि (न्), जिज्ञासुः -सुः -सु, ज्ञानेच्छुः -च्छुः -च्छु, ज्ञानेप्सुः -प्सुः -प्सु; 'thirst after knowledge,' जिज्ञासा, विद्यार्थः, ज्ञानेच्छा; 'attainable by knowledge,' ज्ञानगम्यः -म्या -म्यं; 'gained by knowledge,' विद्यार्जितः -ता -तं, विद्यालभ्यः -भ्या -भ्यं; 'according to one's knowledge,' यथाज्ञानं; 'without the knowledge of,' अगोचरेण; 'with the knowledge of,' गोचरेण; 'with my knowledge,' मम गोचरेण, मद्गोचरेण.

KNOWN, *p. p.* ज्ञातः ता -तं, परिज्ञातः -ता -तं, अभिज्ञातः -ता -तं, विज्ञातः -ता -तं, विदितः -ता -तं, विज्ञः -ज्ञा -ज्ञं, विज्ञप्तः -प्ता -प्तं, बुधितः -ता -तं, बुद्धः -द्धा -द्धं, अवगतः -ता -तं, मतः -ता -तं, उपलब्धः -ब्धा -ब्धं, गृहीतार्थः -र्था -र्थं; 'to make known,' ज्ञा in caus. (ज्ञापयति, ज्ञपयति -यितुं), विज्ञा, निविद् (c. 10. -वेदयति -यितुं), विद्, बुध् (c. 10. बोधयति -यितुं); 'made known,' ज्ञप्तः -प्ता -प्तं, विज्ञप्तः -प्ता -प्तं, ज्ञापितः -ता -तं, विज्ञापितः -ता -तं, वेदितः -ता -तं, निवेदितः -ता -तं; 'to be known,' ज्ञा in pass. (ज्ञायते), प्रती in pass. (-ईयते), परिचि in pass. (-चीयते); 'be it known,' विदितम् अस्तु, ज्ञातम् अस्तु.—(Celebrated) विश्रुतः -ता -तं, ख्यातः -ता -तं, विख्यातः -ता -तं, विज्ञातः -ता -तं, प्रसिद्धः -द्धा -द्धं, प्रतीतः -ता -तं; 'known quantity,' रूपं.

KNUCKLE, *s.* अङ्गुलिसन्धिः *m.*, अङ्गुलिग्रन्थिः *m.*, अङ्गुलिपर्व्व *n.* (न्), सन्धिः *m.*, पर्व्व *n.* (न्), ग्रन्थिः *m.*

To KNUCKLE, *v. n.* वशं गम् (c. 1. गच्छति, गन्तुं), वशीभू, उपगम्, अभ्युपगम्, नम्रीभू, पराधीनीभू.

KNUCKLED, *a.* सन्धियुक्तः -क्ता -क्तं, सन्धिविशिष्टः -ष्टा -ष्टं, ग्रन्थिलः -ला -लं.

KNURL, *s.* ग्रन्थिः *m.*, ग्रन्थिका, पिण्डः -ण्डं, गण्डः.

KNURLED, *a.* ग्रन्थिलः -ला -लं, ग्रन्थिमयः -यी -यं, बहुग्रन्थिः -न्थिः -न्थि.

KRISHNA, *s.* (The most celebrated form of Vishnu, or rather identified with Vishnu, as distinct from his ten Avatárs, or Incarnations. The following particulars of the history of this very popular deity, whose votaries are still so numerous in India, are given as an introduction to the enumeration of his various names. Vasudeva, a descendant of Yadu and Yayáti, had two wives, Rohiní and Devakí. The latter had eight sons, of whom the eighth was Krishna. Kansa, a demon, the sister of Devakí, and king of Mathurá, was informed by the gods that one of these sons would kill him. He therefore kept Vasudeva and his wife Devakí in confinement in his palace, and slew their first six children. The seventh son was Balaráma, who was saved by being abstracted from the womb of Devakí, and transferred to that of Rohiní. The eighth was Krishna, who was born with kin as black as the dark leaves of the lotus, and with a peculiar mark on his breast: he was born at midnight, and immediately taken up by Vasudeva, who, favoured by the gods, was able to elude the vigilance of the guards, and make his escape through the gates of Mathurá to the banks of the Yamuná river. Here Sesha, the many-headed serpent, spread his hoods above the heads of the father and child, and thus protecting them, Vasudeva was enabled to cross the stream, and finding a a cowherd named Nanda, whose wife Yaśodá had just been delivered of a child, he quietly substituted his own son in its place, and returned with the child of the cowherd to the bedside of Devakí. When Kansa found that the infant Krishna had escaped, he summoned certain demons, his servants, and gave orders that a search should be made for the child, and that all male children in whom were signs of unusual vigour, should be killed. At the same time he released Vasudeva and his wife, as no longer endangering his safety. The cowherd Nanda, with his wife Yaśodá, taking the infant Krishna, and accompanied by Rohiní and the infant Balaráma, went to reside at a village called Gokula, or Vraja, where they settled. Here the female demon Pútaná tried to destroy the young Krishna by offering him her breast to suck, but was killed by the child. Soon the child, with his playfellow Balaráma, began to be unruly; and one day his foster-mother passed the folds of a rope round his body and tied him to a large wooden bowl, but the strength of the young Krishna enabled him to drag the bowl against the trunks of two trees, which were uprooted by the shock. The family of Nanda now removed from Vraja to Vrindávana, and here Krishna and Balaráma grew up together, and, roaming about the woods, joined in the sports of the herdsmen's sons. One day Krishna came to the banks of the Yamuná, within which was the fearful pool of the serpent Káliya. Krishna jumped boldly in. A terrible combat ensued, in which the divine child was victorious, and commanded the snake-king to depart from the Yamuná to the ocean. About the same time Balaráma killed the demon Dhenuka, who sought to destroy the two boys, and soon afterwards killed the demon Pralamba, who had assumed the shape of a young cowherd, that he might mix in their sports. Not long after, the young Krishna, who delighted in playing tricks upon his elders, resolved to rouse the anger of the god Indra, who, according to some, was his elder brother. He persuaded Nanda to cease sacrificing to Indra, and to worship the mountain Govardhana, which sheltered the shepherds and their cattle. This they did, but the exasperated Indra would have destroyed them and their flocks with heavy rain, had not Krishna lifted up the mountain and sheltered them under it. Indra,

foiled in his revenge, descended from heaven to praise Krishna, and made him lord over the cattle. Meanwhile Krishna had grown a beautiful youth, and soon began to sport with the Gopís, or shepherdesses, of whom seven or eight became his wives, and amongst them his favorite, Rádhá. In this character he is usually represented with flowing hair and with a flute in his hand, and has been compared to Apollo accompanied by the muses. In his pastimes with the shepherdesses he invented a kind of round dance, called Rása or Mandala nrityam, in which he and Rádhá being in the centre, the attendant Gopís danced round them. But the happiness of Krishna was interrupted by his tyrannical uncle Kansa, who sent formidable demons to destroy him; Arishta, in the form of a bull, Kesin, in the form of a horse, Kálanemi, and others. They were all killed by the young Krishna. Kansa then sent a messenger, named Akrúra, to entice Krishna and Balaráma to his city Mathurá, under pretext of being present at some games. They accepted the invitation and went. At the entrance of the town Krishna killed Kansa's washerman, who insulted him. Having clothed himself in the washerman's yellow clothes, he proceeded, and meeting a crooked woman carrying ointment, miraculously made her straight by a touch of his hand. At the games he killed the king's boxer, Chánúra, and afterwards Kansa himself, and placed Kansa's father, Ugrasena, upon the throne. He then became the pupil of Sándípani, and, to rescue his son, killed the demon Panchajana, and, taking the conch shell, formed of his bones, bore it as his horn. Still living in Mathurá, he was attacked by a prince named Kálayavana, who advanced with a large force against the Yadu tribe. Upon this Krishna built and fortified a city called Dwáraka, in the province of Guzerat, and thither transferred the inhabitants of Mathurá. One day Krishna went forth unarmed, and, being pursued by Kálayavana, took refuge in a cavern, where Muchukunda, king of men, was asleep. Kálayavana, entering the cavern, was reduced to ashes by an angry glance from the eye of Muchukunda. Krishna then returned to Dwáraka. Soon after he was accused of stealing a wonderful jewel called 'syamantaka,' in the possession of a man named Prasena. But the jewel was really lost by the death of Prasena in a forest, and was picked up by a lion, who, in his turn, was killed by the king of the bears, Jámbavat. The latter took the jewel to his cavern, where he was found by Krishna, and compelled to restore the gem. At the same time the bear gave him his daughter Jámbavatí in marriage. He next married Satyabhāmā, daughter of Satrájit, and afterward carried off Rukminí, daughter of Bhíshmaka. By the latter he had a son called Pradyumna, who is usually

identified with Kámadeva, the god of love, and a daughter named Chárumatí, as well as many other children. Besides these wives he had more than sixteen thousand others, who bore him a numerous progeny of one hundred and eighty thousand sons. The other incidents of his life are thus briefly related. Indra came to Dwáraka, and reported to Krishna the tyranny of the demon Naraka. Krishna went to his city, and slew him and another demon named Mura, who assisted in the defence of the city. He afterwards ascended to the heaven of Indra, with his wife Satyabhámá, and, visiting the gardens of Swarga, was induced by his wife to carry off the Párijáta tree, or celebrated tree of Paradise. Sachí, the wife of Indra, excited her husband to its rescue, and a conflict ensued between the gods and Krishna, who defeated them, and carried the tree to Dwáraka. Soon after this, Ushá, the daughter of the Daitya Bána, became enamoured of Aniruddha, son of Pradyumna and grandson of Krishna, and induced her father to carry him off. Krishna, Balaráma, and Pradyumna, came to his rescue. Siva and Skanda aided Bána, but the former was disabled and the latter put to flight; and Krishna, encountering Bána, cut off all his arms. After this, Paundraka, one of the family of Vasudeva, assumed the insignia and title of Krishna, and was supported by the king of Benares. Krishna advanced against them, mounted on his vehicle Garuda, and having destroyed them, set fire to Benares by the radiance from his chakra or discus. Lastly, being recalled by the gods to heaven, he destroyed all his own family the Yádavas. Amongst them died Balaráma, out of whose mouth, as he expired, issued the great serpent, Ananta or Sesha, of which he was an incarnation. Krishna himself was killed by a chance shot from a hunter, and again became one with the Universal Spirit. From this summary of the history of Krishna his various names will become intelligible. Many of these names, as well as many of his attributes and peculiarities, are identical with those of Vishnu. *See* VISHNU. As being of a black or dark blue colour he is called) कृष्णः, नीलमाधवः.—(As descended from Yadu) यादवः, यदुनाथः, कुकुराधिनाथः.—(As son of Vasudeva) वासुदेवः, वसुदेवभूः *m.*—(Son of Devakí) देवकीनन्दनः, देवकीपुत्रः, देवकीसूनुः *m.*, दैवकीनन्दनः.—(As bearing the mark Srívatsa on his breast) श्रीवत्सभृत् *m.*, श्रीवत्सलाञ्छनः, श्रीवत्साङ्कः.—(As foster-son of Nanda) नन्दनन्दनः, नन्दकी *m.* (न्), नन्दात्मजः.—(As slayer of Pútaná) पूतनाहा *m.* (न्), पूतनारिः *m.*, पूतनासूदनः.—(As having a rope round his body) दामोदरः.—(As destroying a tree in the forest of Vrindávana) यमलार्जुनहा *m.*—(Conqueror of Káliya) कालियजित्.—(Younger brother of Indra) उपेन्द्रः, इन्द्रानुजः, इन्द्रावरजः.—(Upholder of Govardhana) गोवर्धनधरः.—(Chief of shepherds and Protector of cattle) गोविन्दः, गोपालः -लकः, गोपेन्द्रः, गोपेशः.—(The long-haired) केशवः,

केशी *m.* (न्), केशः, केशटः.—(Bearer of the flute) वंशीधरः, मुरलीधरः.—(Lord of the shepherdesses) गोपीनाथः.—(Beloved of Rádhá) राधाकान्तः, राधावल्लभः, राधानाथः.—(Destroyer of Arishta) अरिष्टसूदनः.—(Of Kesín) केशिहा *m.* (न्), केशिसूदनः.—(Of Kálanemi) कालनेमिहा *m.*, कालनेमिरिपुः *m.*, कालनेमिशत्रुः *m.*, कालनेम्यरिः *m.*—(Dressed in yellow clothes) पीताम्बरः.—(Conqueror of Chánúra) चानूरजित्.—(Killer of Kansa) कंसहा *m.*, कंसजित् *m.*, कंसारिः *m.*, कंसारातिः *m.*—(Lord of Mathurá) मथुरेशः.—(Bearer of the couch Pánchajanya) पाञ्चजन्यधरः.—(Conqueror of Kálayavana) कालयवनजित्.—(Lord of Dwáraka) द्वारकेशः, द्वारकनाथः.—(Husband of Jámbavatí) जाम्बवतीपतिः *m.*—(Conqueror of Naraka) नरकजित्, नरकान्तकः.—(Destroyer of Mura) मुरहा *m.*, मुरारिः *m.*, मुररिपुः *m.*—(Conqueror of Paundraka) पौण्ड्रकजित्.—(Bearing the discus) चक्रधरः, चक्री *m.* (न्), चक्रपाणिः *m.*, चक्रहस्तः, चक्रवान् *m.* (त्), चक्रभृत् *m.*—(Bearing the conch) शङ्खी *m.* (न्), शङ्खभृत् *m.*—(Blowing the conch) धमः.—(Bearing a chaplet or garland) वनमाली *m.* (न्), मालः.—(Bearing the jewel on his breast) कौस्तुभवक्षाः *m.*, कौस्तुभलक्षकः.—(Destroyer of the demon Madhu) माधवः, मधुजित्, मधुरिपुः *m.*, मधुभिद् *m.*, मधुमथनः.—(Having Garuda as his symbol) गरुडध्वजः, तार्क्ष्यध्वजः, तार्क्ष्यनायकः.—(Foe of barbarians) यवनारिः.—(Foe of the daityas) दैत्यारिः *m.*—(The undecaying one) अच्युतः, अनन्तः.—(Worshipped by men) जनार्दनः.—(Lord of the senses) हृषीकेशः. The following are other names of this deity, some of which will be explained under the head of Vishnu हरिः *m.*, नारायणः, वैकुण्ठः, स्वभूः *m.*, पुण्डरीकाक्षः, विष्टरश्रवाः *m.* (स्), शार्ङ्गी *m.* (न्), पद्मनाभः, वासुभद्रः, वासुः *m.*, त्रिविक्रमः, विश्वक्सेनः, चतुर्भुजः, शौरिः *m.*, पुरुषोत्तमः, बलिध्वंसी *m.* (न्), विश्वम्भरः, विष्णुः *m.*, अधोक्षजः, कैटभजित् *m.*, राहुभेदी *m.* (न्), कुसुभः, उरुगायः. Krishna's mace or club is called कौमोदकी; 'his sword,' नन्दकः; 'his jewel,' कौस्तुभः, स्यमन्तकः; 'his discus,' सुदर्शनः, चक्रं; 'his conch,' पाञ्चजन्यः, शङ्खः; 'his garland,' वनमाला; 'his charioteer,' सात्यकिः *m.*, शैनेयः, दारुकः, युयुधानः; 'his heaven,' गोलोकः; 'a festival in his honour,' रासयात्रा: 'his paternal uncle and friend,' अक्रूरः; 'his grandfather,' शूरः; देवकः; 'his city,' द्वारकः -का, द्वारिका, द्वारवती, अम्बिनगरी. A modern reformer of the Vaishnava faith called चैतन्यः is considered in Bengal as an avatár of Vishnu. He is also called गौरचन्द्रः, गौराङ्गः

KRORE, *s.* (Ten millions) कोटिः -टी.

KURÁN, *s.* यावनधर्म्मग्रन्थः, यावनधर्म्मपुस्तकं, यवनीयधर्म्मशास्त्रं.

KUVERA. *s.* (God of wealth, the Hindu Plutus, chief of the Yakshas and Guhyakas, into whose forms transmigrate the souls of those men who in this life are absorbed in the pursuit of riches. He is the son of Viśravas by Ilavilá and regent of the north. He is represented in external appearance as a mere man, but with a deformed body, having three legs and but eight teeth. Hence he is called) कुवेरः, मनुष्यधर्म्मा *m.* (न्), कुहः.—(As lord of wealth) धनपतिः *m.*, धनाधिपः, धनदः, धनकेलिः *m.*, धनाध्यक्षः, विन्नेशः, वसुः *m.*, अर्थपतिः *m.*, श्रीमान् *m.* (त्), श्रीदः.—(Chief of the Yakshas) यक्षराजः, यक्षराट् *m.* (ज्), यक्षेन्द्रः, यक्षेशः, पुण्यजनेश्वरः, राक्षसेन्द्रः, यक्षः.—(Son of Visravas) वैश्रवणः.—(Son of Ilavilá) ऐलविलः, ऐलविलः, ऐडविलः, ऐडविडः.—(Regent of the north) उत्तराशापतिः *m.*—(Lord of the Kinnaras) किन्नरेशः, किन्नरेश्वरः, किम्पुरुषेश्वरः, मयुराजः.—(Descended from Pulasti or Pulastya) पौलस्त्यः.—(King of kings) राजराजः.—(King of men) मनुराट्.—(Borne by men) नरवाहनः.—(Friend of Siva) त्र्यम्बकसखः, ईशसखः -खा.—(Having a yellow mark in place of one of his eyes) एकपिङ्गः -ङ्गलः.—(Lord of Alaká) अलकाधिपः -पतिः *m.*—(Inhabiting Kailása) कैलासनिकेतनः, कैलासौकाः.—(Lord of the divine treasures) निधिनाथः, निधीशः.—(The very fleet) रयिष्ठः. Kuvera's vehicle or car is called पुष्पं -ष्पकं; 'his garden,' चैत्ररथं; 'his city,' अलका, वसुधारा, वसुभारा, वसुस्थली, यक्षराट्पुरी.—(The mountain on which his city is situated) कैलासः, कुवेराचलः, कुवेराद्रिः *m.*—(His wife) कौवेरी, चार्वी, यक्षी, चामुण्डा.—(His son) नलकूबरः, नलकूवरः, नलकूवेरः, मणिग्रीवः, मायुराजः.—(His attendants, who are shaped like men with the heads of horses) किन्नरः, किम्पुरुषः, तुरङ्गवदनः, तुरङ्गवक्त्रः, तुरङ्गाननः, तुरङ्गास्यः, अश्ववक्त्रः, अश्ववदनः, मयुः.—(His divine treasure) निधिः *m.*, निधानं, शेवधिः *m.*, शेवधिः. There are nine of these treasures or gems, viz. पद्मः, महापद्मः, शङ्खः, मकरः, कच्छपः, मुकुन्दः, नन्दः, नीलः, खर्व्वः.—(Relating to Kuvera) कौवेरः -री -रं.

L.

LABEL, *s.* पत्रं, सूचकपत्रं, अङ्कपत्रं, अङ्कपटः, बीजकं.

To LABEL, *v. a.* सूचकपत्रम् आरुह् (c. 10. -रोपयति -यितुं) or अनुबन्ध् (c. 9. -बध्नाति -बन्धुं) or बन्ध्.

LABIAL, *a.* ओष्ठ्यः -ष्ठ्या -ष्ठ्यं, ओष्ठसम्बन्धी -न्धिनी -न्धि (न्); 'a labial letter,' ओष्ठ्यं.

LABIODENTAL, *a.* दन्तोष्ठ्यः -ष्ठ्या -ष्ठ्यं, दन्तौष्ठ्यः &c., दन्त्योष्ठ्यः &c.

LABOR, *s.* (Exertion) उत्साहः, उद्योगः, यत्नः, प्रयत्नः, व्यवसायः, अध्यवसायः, उद्यमः, आयासः, कर्म्म *n.* (न्), क्रिया, प्रवृत्तिः *f.*, आभोगः, चेष्टा.—(Toil) आयासः, प्रयासः, क्लेशः, श्रमः, परिश्रमः, कष्टं, दुःखं, नित्यश्रमः, नित्यक्लेशः.—(Bodily or manual labor) कायक्लेशः, देहक्लेशः, शरीरायासः, शरीरक्लेशः, शरीरश्रमः, व्रातं.—(Unpaid labor) विष्टिः, आजूः *f.*—(Travail, childbirth) प्रसववेदना, प्रसूतिवेदना, गर्भवेदना, प्रसवयातना, प्रसवकालः, प्रसूतिकालः; 'acquired by one's own labor,' स्वकष्टार्जितः -ता -तं.

LUCRATIVELY, *adv.* सफलं, साफल्येन, सलाभं, लाभपूर्व्वं, सार्थं.

LUCRATIVENESS, *s.* साफल्यं, सफलता -त्वं, सलाभत्वं, सार्थता, फलदता.

LUCRE, *s.* लाभः, अर्थः, वृद्धिः *f.*, धनलाभः, प्राप्तिः *f.*, फलं, धनोपार्ज्जनं, अर्थलब्धिः *f.*, अर्ज्जनं, योगक्षेमः, लभ्यं, लभ्यांशः, प्राप्तव्यांशः, आयः, फलोदयः.

To LUCUBRATE, *v. n.* निशाध्ययनं कृ, रात्र्यध्ययनं कृ, निशाभ्यासं कृ, रात्रौ or निशि विद्याभ्यासं कृ or विद्यासेवां कृ.

LUCUBRATION, *s.* (Nocturnal study) निशाध्ययनं, रात्र्यध्ययनं, निशाभ्यासः.—(That which is composed by night) निशाभ्यासेन रचितो ग्रन्थः.

LUCULENT, *a.* प्रसन्नः -न्ना -न्नं, विशदः -दा -दं, स्वच्छः -च्छा -च्छं, स्पष्टः -ष्टा -ष्टं, निर्म्मलः -ला -लं, सुप्रभः -भा -भं, तेजोमयः -यी -यं.

LUDICROUS, *a.* हास्यजनकः -का -कं, हास्यकरः -रा -रं, हास्यः -स्या -स्यं, अवहास्यः &c., उपहास्यः &c., हास्योत्पादकः -का -कं, हासोत्पादकः -का -कं, हासकरः -रा -रं, परिहासकरः -रा -रं, असङ्गतः -ता -तं, कौतुकजनकः -का -कं.

LUDICROUSLY, *adv.* असङ्गतं, हास्यप्रकारेण, यथा हासो जायते तथा.

LUDICROUSNESS, *s.* हास्यता, हास्यजनकता, उपहास्यता, हास्योत्पादकत्वं, असङ्गतत्वं, कौतुकजनकत्वं, अवहास्यत्वं.

LUES VENEREA, *s.* उपदंशः; 'afflicted with it,' उपदंशी -शिनी (न्).

To LUFF, *v. a.* प्रतिवातं नौकां परिवृत् (c. 10. -वर्त्तयति -यितुं).

To LUG, *v. a.* (Drag with force) बलेन कृष् (c. 1. कर्षति, c. 6

कृषति, क्रष्टुं, कर्ष्टुं), बलात् or प्रसभम् आकृष् or अपकृष् or हृ (c. 1. हरति, हर्तुं) or अपहृ.

Luggage, *s.* परिच्छदः, पथिकपरिच्छदः, यात्रिकसामग्री, सामग्र्यं, यात्रिकभाण्डानि *n. pl.*, वस्त्रभाण्डानि *n. pl.*, वस्त्रपात्राणि *n. pl.*

Lugger, *s.* त्रिकूपकविशिष्टा दीर्घवातवसना क्षुद्रनौका.

Lugubrious, *a.* शोकसूचकः -का -कं, शोकात्मकः -का -कं, शोकमयः -यी -यं, दुःखबोधकः -का -कं, कारुणिकः -की -कं, खेदसूचकः -का -कं, शोकी -किनी -कि (न्).

Lukewarm, *a.* ईषदुष्णः -ष्णा -ष्णं, कवोष्णः -ष्णा -ष्णं, मन्दोष्णः &c., कदुष्णः &c., कोष्णः &c., अनुष्णः &c., ईषत्तप्तः -प्ता -प्तं.—(Not zealous) मन्दोत्साहः -हा -हं, मन्दोद्योगः -गा -गं, निरुत्सुकः -का -कं, अतीक्ष्णः -क्ष्णा -क्ष्णं, अव्यग्रः -ग्रा -ग्रं, ईषच्चलः -ला -लुं, उदासीनः -ना -नं.

Lukewarmly, *a.* ईषदुष्णं, ईषत्तापेन, कवोष्णं, अनुत्तापेन, मन्दोद्योगेन.

Lukewarmness, *s.* कवोष्णता, मन्दोष्णता, कोष्णता -त्वं, ईषदुष्णता, कदुष्णत्वं, अनुष्णत्वं, ईषत्तापः, ईषत्तप्तता.—(Want of zeal) मन्दोत्साहः, मन्दोद्योगः, ईषच्चलता, ईषदुत्तापः, अनौत्सुक्यं, अतीक्ष्णता, उदासीनता.

To lull, *v. a.* (Compose to sleep) स्वप् (c. 10. स्वापयति -यितुं), संस्वप्, सम्प्रस्वप्.—(Quiet, soothe) शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), अभिशान्त्व्, परिशान्त्व्, उपसान्त्व्, लल् (c. 10. लालयति -यितुं), प्रसद् (c. 10. -सादयति -यितुं), प्रसन्नीकृ.

To lull, *v. n.* (Subside, become calm) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विरम् (c. 1. -रमति -रन्तुं), विगम् (c. 1. -गच्छति -गन्तुं), प्रसद् (c. 1. -सीदति -सत्तुं), सम्प्रसद्, विश्रम् (c. 4. -श्राम्यति -श्रमितुं), निर्वा (c. 2. -वाति -तुं), निर्वातीभू, विगतवातीभू, निर्वेगीभू, निवृत्तवायुः -युः -यु भू.

Lull, *s.* (Temporary quiet after storm) शान्तिः *f.*, वायुशान्तिः, निवृत्तिः *f.*, वायुनिवृत्तिः *f.*, निर्वातः, विरामः, विरतिः *f.*, वायुविरामः, विश्रामः, निर्वृतिः *f.*, शमः, उपशमः, विच्छेदः, वायुशमः, वातविच्छेदः, वायुस्थैर्य्यं.

Lullaby, *s.* बालकस्वापकरणार्थकं गीतं, बालस्वापकगीतं, लालनगीतं, शान्तिकगीतं, बालसान्त्वनगीतं, शिशुशमकगीतं.

Lulled, *p. p.* (Put to sleep) स्वापितः -ता -तं.—(Quieted) शमितः -ता -तं, शान्तः -न्ता -न्तं, उपशान्तः -न्ता -न्तं, प्रसादितः -ता -तं, उपगूढः -ढा -ढं.

Luller, *s.* शमकः, शान्तिकरः, शान्तिदः, सान्त्वनकृत्, लाली *m.* (न्).

Lumbago, *s.* गृध्रसी, गृध्रसी, कटिवातः, श्रोणिवातः, कटिवेदना.

Lumbal, lumbar, *a.* कटिसम्बन्धी -न्धिनी -न्धि (न्), श्रोणिसम्बन्धी &c.

Lumber, *s.* निरर्थकद्रव्यं, अनर्थकद्रव्यं, बाधकद्रव्यं, क्लेशकद्रव्यं, बाधकं, भारः, अतिभारः.

To lumber, *v. a.* निरर्थकद्रव्यैः पृ (c. 10. पूरयति -यितुं), निरर्थकद्रव्याणि इतस्ततो विकृ (c. 6. -किरति -करितुं -रीतुं) or विक्षिप् (c. 6. -क्षिपति -क्षेप्तुं).

Lumber-room, *s.* निरर्थकद्रव्यकोष्ठः, बाधकद्रव्यकोष्ठकं.

Luminary, *s.* ज्योतिस् *n.*, ज्योतिष्मान् *m.* (त्), भास्वान् *m.* (त्), प्रतिभावान् *m.* (त्), खद्योतनः, भास्करः, प्रभाकरः, खोल्कः, गगनेचरः, खेचरः, खचरः, प्रकाशकपदार्थः, प्रकाशयुक्तपदार्थः, तेजोराशिः *m.*

Luminous, *a.* तेजोमयः -यी -यं, दीप्तिमान् -मती -मत् (त्), प्रदीप्तिमान् &c., प्रभावान् &c., भास्वान् &c., भानुमान् &c., प्रकाशयुक्तः -क्ता -क्तं, विशदः -दा -दं.—(Shining by its own light) स्वप्रकाशः -शा -शं; 'the sun is a luminous body,' सूर्य्यः स्वप्रकाशः.

Luminously, *adv.* तेजसा, दीप्त्या, प्रभया, स्वप्रकाशेन, विशदं.

Lump, *s.* पिण्डः -ण्डं, स्थूलं, घनः, स्थूलभागः, स्थूलांशः, गण्डः, गण्डका, शर्करा, घनौघः.—(Collection. heap) राशिः *m.*, ओघः, सङ्घः, पूगः, स्तोमः, पुञ्जः, वृन्दं, समूहः, सञ्चयः, सञ्चयः, स्तूपः, उत्करः.—(Gross) साकल्यं, समुदायः, समासः; 'a lump of flesh,' मांसपिण्डः, लोचकः; 'of earth,' मृत्पिण्डः; 'having lumps in the neck,' गण्डमाली -लिनी -लि (न्); 'in the lump,' साकल्येन.

To lump, *v. a.* पिण्डीकृ, पिण्ड् (c. 1. पिण्डते, c. 10. पिण्डयति -यितुं), एकपिण्डीकृ, राशीकृ, एकराशीकृ, ओघीकृ, एकौघीकृ, घनीकृ, स्थूलीकृ, वृन्दीकृ, पुञ्जीकृ, पूगीकृ, एकत्रीकृ.

Lumped, *p. p.* पिण्डीकृतः -ता -तं, पिण्डीभूतः -ता -तं, पिण्डितः -ता -तं.

Lumpish, *a.* स्थूलः -ला -लं, स्थूलस्वभावः -वा -वं, स्थूलबुद्धिः -द्धिः -द्धि.

Lumpishly, *adv.* स्थूलवत्, स्थौल्येन, सस्थौल्यं, स्थूलजनवत्, बुद्धिस्थौल्यात्.

Lumpishness, *s.* स्थूलता, स्थौल्यं, स्वभावस्थूलता, बुद्धिस्थौल्यं.

Lumpy, *a.* पिण्डी -ण्डिनी -ण्डि (न्), पिण्डितः -ता -तं, सपिण्डः -ण्डा -ण्डं, पिण्डलः -ला -लं, पिण्डीभूतः -ता -तं, पिण्डमयः -यी -यं, पिण्डपूर्णः -र्णा -र्णं.

Lunacy, *s.* उन्मत्तता, उन्मादः, उन्मादवायुः *m.*, बुद्धिभ्रमः, मतिभ्रमः, बुद्धिभ्रंशः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिविक्षेपः, बुद्धिक्षिप्तता, मदः, प्रामाद्यं, अपस्मारः

Lunar, lunary, *a.* चान्द्रः -न्द्री -न्द्रं, चान्द्रिकः -की -कं, चान्द्रमसः -सी -सं, चन्द्रसम्बन्धी -न्धिनी -न्धि (न्), सौम्यः -म्या -म्यं, सौमिकः -की -कं, ऐन्दवः -वी -वं; 'lunar month,' चान्द्रमासः; 'lunar asterism or mansion,' नक्षत्रं, दाक्षायिणी; 'the twenty-seven lunar asterisms collectively,' दाक्षायिण्यः *f. pl.*, नक्षत्रचक्रं; 'lunar day,' तिथिः *m.f.* Of these lunar days there are fourteen for the waxing, and fourteen for the waning moon; the first lunar day is called प्रतिपद् *f.*, पक्षतिः -तौ *f.*; the day of new moon is called अमावसी, अमावस्या, अमा; 'the day of full moon,' पूर्णिमा, पौर्णिमा, पौर्णमासी, पूर्णेन्दुः *m.* The eleventh तिथि of each शुक्लपक्षः or waxing, and कृष्णपक्षः or waning moon, is regarded as sacred to Vishnu; and the following are the names given by Major Candy for the two एकादशी of each month: चैत्रः, 1. कामदा, 2. पापमोचनी; वैशाखः, 1. मोहिनी, 2. वरूथिनी; ज्येष्ठः, 1. निर्जला, 2. अपरा; आषाढः, 1. शयनी, 2. योगिनी; श्रावणः, 1. पुत्रदा, 2. कामिका; भाद्रः, 1. परिवर्त्तिनी, 2. अजा; आश्विनः, 1. पाशाङ्कुशा, 2. इन्दिरा; कार्त्तिकः, 1. बोधिनी, 2. रमा; मार्गशीर्षः, 1. मोक्षदा, 2. फलदा; पौषः, 1. प्रजावर्धिनी, 2. सफला; माघः, 1. जयदा, 2. षट्तिला; फाल्गुनः, 1. आमलकी, 2. विजया. The एकादशी of the शुक्लपक्षः of the months आषाढः and कार्त्तिकः are both particularly sacred. On the first, or शयनैकादशी, Vishnu goes to sleep, and on the second awakes. (Difference of solar and lunar days) क्षयतिथिः *f.*; 'inauspicious lunar day,' घातितिथिः *f.*, दग्धतिथिः *f.*; 'observance of the fasts and rites of the several lunar days,' तिथिपालनं; 'lunar eclipse,' चन्द्रग्रहणं; 'lunar measurement,' चान्द्रमानं; 'the lunar dynasty,' सोमवंशः.—(Resembling the moon). *See* Luniform.

Lunated, *a.* अर्द्धचन्द्राकारः -रा -रं, अर्द्धचन्द्राकृतिः -तिः -ति.

Lunatic, *a.* उन्मत्तः -त्ता -त्तं, उन्मादी -दिनी -दि (न्), उन्मादवान् -वती -वत् (त्), सोन्मादः -दा -दं, उन्मदः -दा -दं, विक्षिप्तः -प्ता -प्तं, विक्षिप्तबुद्धिः -द्धिः -द्धि, विक्षिप्तमनाः -नाः -नः (स्), हतबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, नष्टेन्द्रियः -या -यं, वातुलः -ला -लं, अपस्मारी -रिणी &c.

LUNATION, *s.* चन्द्रपरिवर्त्तनं, चन्द्रावृत्तिः *f.*, चन्द्रपरिवृत्तिः *f.*

LUNCH, LUNCHEON, *s.* उपाहारः, अल्पाहारः, लघ्वाहारः, लघुभोजनं, अल्पभोजनं, अल्पैभोजनं, अह्नीहारः, अह्नीशनं, अह्नैशनं, ग्रासः, ग्रासपरिमिताहारः.

LUNE, *s.* (In geometry) चन्द्रखण्डं.—(Leash). *See* the word.

LUNGS, *s.* फुप्फुसः, पुप्फुसः, पुस्फुसः, फुस्फुसः, रक्तफेनजः.

LUNIFORM, *a.* चन्द्राकारः -रा -रं, चन्द्राकृतिः -तिः -ति, चन्द्ररूपः -पा -पं.

LUPINE, *s.* द्विदलं, कलायः, शमीधान्यं, त्रिपुटः, सतीलकः.

LURCH, *s.* अकस्माद् एकपार्श्वे नौकापरिवर्त्तनं or नौकापरिवृत्तिः *f.*—(To leave a person in the lurch) दुर्दशाग्रस्तं कञ्चिज्जनं त्यज् (c. 1. त्यजति, त्यक्तुं) or परित्यज्.

To LURCH, *v. n.* (Roll suddenly on one side) नाविकभाषायाम् ऊर्मिप्रलोठनाद् एकपार्श्वं अकस्माद् परिवृत् (c. 1. -वर्त्तते -र्त्तितुं).

LURCHER, *s.* (Poacher) कौटिकः, कौटिलिकः, कूटोपायेन वनपक्षिग्राहकः.—(Dog) कौटिकश्वा *m.* (न्), कौटिककुक्कुरः.

LURE, *s.* (For hawks) श्येनामिषं.—(Any thing which entices, allurement) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, आमिषं, लोभः, आमिषदर्शनं.

To LURE, *v. n.* (Call hawks by holding out a bait) आमिषदर्शनेन श्येनादीन् आकृष् (c. 1. -कर्षति -क्रष्टुं), आमिषं दर्शयित्वा श्येनान् अह्वे (c. 1. -ह्वयति -ह्वातुं) or श्येनाह्वानं कृ.—(Allure) प्रलुभ् (c. 10. -लोभयति -यितुं), लुभ्, आकृप्, मुह् (c. 10. मोहयति -यितुं), लल् (c. 10. लालयति -यितुं).

LURED, *p. p.* आकृष्टः -ष्टा -ष्टं, प्रलोभितः -ता -तं, लालितः -ता -तं.

LURID, *a.* मलिनमुखः -खा -खी -खं, मलिनप्रभः -भा -भं, मलिनः -ना -नं, मलिनतेजाः -जाः -जः (स्), तमोवृतः -ता -तं, उग्रदर्शनः -ना -नं, घोररूपः -पा -पं, दुर्दिनग्रस्तः -स्ता -स्तं.

To LURK, *v. n.* निभृते or निभृतं or सुनिभृतं or प्रच्छन्नं स्था (c. 1. तिष्ठति, स्थातुं) or वृत् (c. 1. वर्त्तते -र्त्तितुं), गुप्तः -प्ता -प्तं वृत् or भू, गुप् in pass. (गुप्यते).

LURKER, *s.* निभृतवर्त्ती *m.* (न्), प्रच्छन्नस्थायी *m.* (न्), निभृते स्थायी *m.*

LURKING-PLACE, *s.* गुप्तिः *f.*, गुप्तिस्थानं, गोपनस्थानं, निभृतस्थानं, गूढस्थानं.

LUSCIOUS, *a.* अतिमधुरः -रा -रं, अतिमिष्टः -ष्टा -ष्टं, अतिस्वादुः -दुः -दुः -दु, स्वादिष्टः -ष्टा -ष्टं, सुमधुरः -रा -रं, सुस्वादुः &c., मधुमयः -यी -यं, मधुमान् -मती -मत् (त्), अतितृप्तिजनकः -का -कं, अतितुष्टिजनकः -का -कं.

LUSCIOUSLY, *adv.* अतिमधुरं, अतिमिष्टं, अतिमाधुर्य्येण, सुमधुरं.

LUSCIOUSNESS, *s.* अतिमाधुर्य्यं, सुमाधुर्य्यं, अतिमधुरता, अतिमिष्टता, अतिस्वादुता, माधुर्य्यं, तृप्तिजनकत्वं.

LUSORY, *a.* विनोदी -दिनी -दि (न्), सविनोदः -दा -दं, लीलायितः -ता -तं, सलीलः -ला -लं, लीलाखेलः -ला -लं, सकौतुकः -का -कं, क्रीडा in comp.

LUST *s.* (Carnal desire) कामः, कामिता, कामुकत्वं, कामना, कामाग्निः *m.*, कामानलः, रताधित्वं, मैथुनार्थित्वं, मैथुनेच्छा, मदनः, मदनेच्छा, रताभिलाषः रमणेच्छा, विषयाभिलाषः.—(Eager desire) लालसा, अत्याभिलाषः, अतिस्पृहा, अतिशयेच्छा, अतीच्छा, लोभः, अतिलोभः, वाञ्छा, आकांक्षा, कांक्षा, लिप्सा, तृष्णा, अतिलिप्सा.—(Depraved affections) दुष्टवासना, दुर्वासना, कुवासना प्रसङ्गासना; 'inflamed with lust,' कामाग्निदीप्तः -प्ता -प्तं.

To LUST, *v. n.* (Have carnal desire) कामार्त्तः -र्त्ता -र्त्तं भू, कामुकः -का -कं भू, रताधी -र्थिनी -र्थि भू, मैथुनार्थी &c. भू, मैथुनाभिलाषी -षिणी -षि भू, मैथुनम् अभिलष् (c. 1. -लषति -षितुं), काम (c. 10. कामयते -यितुं), अभिकम्, विषयाभिलाषी भू; 'to lust after a woman,' कामतः स्त्रीसङ्गम् अभिलष्.—(Desire eagerly) अत्यन्तम् अभिलष् or इष् (c. 6. इच्छति, एषितुं) or वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं) or अभिवाञ्छ्, अतिशयेन स्पृह् (c. 10. स्पृहयति -यितुं) or कांक्ष् (c. 1. कांक्षति -क्षितुं) or आकांक्ष् or अभिकांक्ष् or लभ् in des. (लिप्सते -प्सितुं), लुभ् (c. 4. लुभ्यति, लोभुं).

LUSTFUL, *a.* कामुकः -का -कं, कामी -मिनी -मि (न्), कामवृत्तिः -त्तिः -त्ति, कामप्रवणः -णा -णं, कामासक्तः -क्ता -क्तं, सकामः -मा -मं, कामनः -ना -नं, कमनः -ना -नं, कम्यः -म्या -म्यं, कमिता -त्री -तृ (तृ), कामयिता &c., रताधी -र्थिनी &c., मैथुनार्थी &c., सुरतार्थी &c., मैथुनाभिलाषी -षिणी &c., सम्भोगाभिलाषी &c., रताभिलाषी &c., मैथुनेच्छुः -च्छुः -च्छु, व्यवायी -यिनी &c., अनुकः -का -कं, अभीकः -का -कं, अभिकः -का -कं, लापुकः -का -कं, अभिलापुकः -का -कं, व्यवायपरायणः -णा -णं, लम्पटः, स्त्रीलम्पटः, स्त्रीव्यसनी *m.* (न्), स्त्रीसङ्गाभिलाषी &c., स्त्रीसम्भोगाभिलाषी, स्त्रीरतः, स्त्रीपरः.—(Under the influence of lust) कामार्त्तः -र्त्ता -र्त्तं, कामातुरः -रा -रं, कामान्धः -न्धा -न्धं, कामान्वितः -ता -तं, कामाविष्टः -ष्टा -ष्टं, कामग्रस्तः -स्ता -स्तं, कामाधीनः -ना -नं, कामयुक्तः -क्ता -क्तं, कामाक्रान्तः -न्ता -न्तं, कामजितः -ता -तं, जातकामः -मा -मं, कामोपहतः -ता -तं.

LUSTFULLY, *adv.* सकामं, कामुकवत्, कामपूर्व्वं, कामतस्, लम्पटवत्.

LUSTFULNESS, *s.* कामुकत्वं -ता, कामिता, सकामता, रताधित्वं, मैथुनार्थित्वं.

LUSTILY, *adv.* बलवत्, महाबलेन, सवीर्य्यं, ससत्त्वं, वीर्य्येण, मांसलवत्, हृष्टपुष्टवत्, तेजसा, पौरुषेण, सपौरुषं.

LUSTINESS, *s.* बलवत्त्वं, सबलता, मांसलता, दृढाङ्गता, शरीरदृढता, ससत्त्वता, वीर्य्यवत्त्वं, वीर्य्यं, सत्त्वं, अंशलता, पृथुशरीरता, वज्रदेहत्वं, व्यूढोरस्कत्वं, शरीरपृथुता, हृष्टपुष्टता.

LUSTRAL, *a.* शुद्धिकरः -रा -रं, शुचिकरः -रा -रं, शोधकः -का -कं, पावकः -का -कं, पावनः -ना -नं; 'lustral water,' शान्युदं -दकं, पावनोदकं, पावनं; 'vessel containing it,' शान्युदकुम्भः.

To LUSTRATE, *v. a.* शुध् (c. 10. शोधयति -यितुं), परिशुध्, विशुध्, पू (c. 9. पुनाति, पवितुं), परिपू, विपू, पवित्रीकृ, शोधनं कृ.

LUSTRATION, *s.* शुद्धिकरणं, शोधनं, शुचिकरणं, शुद्धिः *f.*, पावनं, पवित्रीकरणं, मलापकर्षणं; 'lustration of arms, a ceremony performed by a king before taking the field,' लोहाभिहारः, लोहाभिसारः, नीराजनं -ना.

LUSTRE, *s.* तेजस् *n.*, द्युतिः *f.*, प्रभा, शोभा, रुचिः *f.*, ओजस् *n.*, ओजस्विता, प्रतापः, वृहद्द्युतिः *f.*, उज्ज्वलता, उद्द्योतः, लविः *f.*, कान्तिः *f.*, दीप्तिः *f.*, रुच् *f.* (क्), भास् *f.*, प्रकाशः -शनं, राढा; 'of metal or a gem,' ओजस् *n.*, तेजस् *n.*

LUSTROUS, *a.* तेजस्वी -स्विनी -स्वि (न्), सुप्रभः -भा -भं, कान्तिमान् -मती -मत् (त्), द्युतिमान् &c., दीप्तिमान् &c., ओजस्वी &c., तापी -पिनी &c., प्रतापवान् &c., शोभनः -ना -नं, प्रभावान् &c., उज्ज्वलः -ला -लं.

LUSTRUM, *s.* युगं, वर्षपञ्चकं, वत्सरपञ्चत्वं, अब्दपञ्चकत्वं.

LUSTY, *a.* मांसलः -ला -लं, दृढाङ्गः -ङ्गा -ङ्गं, दृढशरीरः -रा -रं, पृथुशरीरः -रा -रं, बलवान् -वती -वत् (त्), महाबलः -ला -लं, महाबाहुः -हुः -हु, अंशलः -ला -लं, अंसलः -ला -लं, वज्रदेहः -हा -हं, व्यूढोरस्कः -स्का -स्कं, महाकायः -या -यं, स्थूलशरीरः -रा -रं, मेदस्वी -स्विनी -स्वि (न्), वीर्य्यवान् -वती &c., सवीर्य्यः -र्य्या -र्य्यं, ससत्त्वः -त्त्वा -त्त्वं, हृष्टपुष्टः -ष्टा -ष्टं, वृहदङ्गः -ङ्गा -ङ्गं, वृहच्छरीरः &c.

LUTANIST, *s.* वैणिकः, वीणावादः -दकः, वीणापाणिः *m.*

LUTANOUS, *a.* (Living in mud) पङ्कस्थः -स्था -स्थं, कर्दमस्थः -स्था -स्थं,

पङ्कवासी -सिनी &c., पङ्कजः -जा -जं.—(Pertaining to it) पङ्किलः -ला -लं, पङ्की -ङ्किनी &c., काहमः -मी -मं.—(Of the colour of mud) पङ्कवर्णः -र्णा -र्णं.

LUTE, *s.* वीणा, वल्लकी, विपञ्ची -ञ्चिका, तन्त्री *m.* (न्), रुद्री, षट्पदी, सारङ्गी, शारङ्गी, पिनाकी; 'with seven strings,' परिवादिनी; 'the wire of a lute,' तन्त्री, तन्त्रं; 'the neck,' वीणादण्डः, प्रबालः; 'a piece of wood under the neck called the belly,' ककुभः, प्रसेवकः; 'the tie,' उपनाहः, वीणानुबन्धः, निबन्धनं; 'the whole body of the lute, comprising the gourd, neck, and belly,' कोलम्बकः; 'the quill or bow,' कोणः, परिवादः, शारिका, रणः.

To LUTE, *v. a.* पङ्केन लिप् (c. 6. लिम्पति, लेप्तुं), पङ्कलेपेन संलग्नीकृ.

LUTER, LUTIST, *a.* वीणावादः -दकः. *See* LUTANIST.

LUTE-STRING, *s.* वीणातन्त्रं, तन्त्री, वीणातारः -रा.

LUTULENT, *a.* पङ्किलः -ला -लं, पङ्की -ङ्किनी -ङ्कि (न्), काहमः -मी -मं.

To LUXATE, *v. a.* विसन्धीकृ, सन्धित्रोटनं कृ, अस्थिसन्धिं or अस्थिग्रन्थिं चुट् (c. 10. चोटयते -यितुं) or विसन्धा (c. 3. -दधाति -धातुं) or भञ्ज् (c. 7. भनक्ति, भंक्तुं), सन्धिभङ्गं कृ, सन्धिविश्लेषं कृ, सन्धिच्युतिं कृ.

LUXATED, *p. p.* विसन्धितः -ता -तं, त्रुटितसन्धिः -न्धिः -न्धि, च्युतसन्धिः &c., सन्धिच्युतः -ता -तं, सन्धिविश्लिष्टः -ष्टा -ष्टं, स्थानभ्रष्टः -ष्टा -ष्टं.

LUXATION, *s.* सन्धित्रोटनं, सन्धिविश्लेषः, सन्धिच्युतिः *f.*, विसन्धीकरणं.

LUXURIANCE, LUXURIANCY, *s.* अतिवृद्धिः *f.*, अधिकवृद्धिः *f.*, अतिवर्धनं, अत्यन्तवर्धनं, नितान्तवृद्धिः *f.*, वृद्धिबाहुल्यं, समृद्धिः *f.*, सामृद्धं, वृद्ध्याधिक्यं, अतिस्फीतिः *f.*, अतिस्फातिः *f.*, उद्रेकः, उत्सेकः, आप्यायनं.

LUXURIANT, *a.* अतिवर्धिष्णुः -ष्णुः -ष्णु, अतिवर्धमानः -ना -नं, अतिवर्धितः -ता -तं, अतिवर्धी -र्धिनी -र्धि (न्), अतिवर्धनः -नी -नं, अतिस्फीतः -ता -तं, अतिपीनः -ना -नं, अतिसमृद्धः -द्धा -द्धं, अतिपुष्कलः -ला -लं, अतिबहुलः -ला -लं, अतिप्रचुरः -रा -रं, उत्सिक्तः -क्ता -क्तं, उद्रिक्तः -क्ता -क्तं, अतिरिक्तः -क्ता -क्तं.

LUXURIANTLY, *adv.* अतिवृद्ध्या, अतिवृद्धिपूर्वं, बाहुल्येन, अतिबहुलं, अतिबहुशस्, अतिप्रचुरं, अतिप्राचुर्येण, अतिपुष्कलं, अतिरिक्तं, उद्रेकेण.

To LUXURIATE, *v. n.* (Grow exuberantly) अत्यन्तं वृध् (c. 1. वर्धते -र्धितुं) or ऋध् (c. 5. ऋध्नोति, c. 4. ऋध्यति, अर्धितुं) or समृध् or प्यै (c. 1. प्यायते, प्यातुं) or आप्यै or स्फाय् (c. 1. स्फायते -यितुं), अतिबहुलीभू, अतिप्रचुरीभू, अतिवृद्धिम् इ (c. 2. एति -तुं), अतिस्फीतिम् इ.—(Live or feed luxuriously) अतिविलासेन or अतिसुखेन or सुखोपभोगेन वृत् (c. 1. वर्त्तते -र्त्तितुं) or चर् (c. 1. चरति -रितुं) or विह (c. 1. -हरति -हर्त्तुं) or भम् (c. 4. भाम्यति, भमितुं).

LUXURIOUS, *a.* (Contributing to luxury, furnished with luxuries) सुखभोगवान् -वती -वत् (त्), सुखभोगकरः -रा -रं, सुखभोगावहः -हा -हं, अतिसुखावहः -हा -हं, अतिसुखी -खिनी -खि (न्), सुखभोगसाधकः -का -कं, सुखभोगमयः -यी -यं, अतिसुखमयः &c., सुखोपभोगदः -दा -दं, सविलासः -सा -सं, विलासी -सिनी &c., विलासमयः &c., विलासयुक्तः -क्ता -क्तं, विलाससुखमयः &c.—(Indulging in luxury) विलासी -सिनी &c., विलासासक्तः -क्ता -क्तं, भोगासक्तः -क्ता -क्तं, सुखभोगासक्तः &c., सुखभोगपरायणः -णा -णं, विषयासक्तः -क्ता -क्तं, विषयोपभोगव्यग्रः -ग्रा -ग्रं, वैषयिकः -की -कं, देहम्भरः -रा -रं, आत्मम्भरिः -रिः -रि, विषयोपसेवी -विनी &c., सुखसेवी &c.

LUXURIOUSLY, *adv.* विलासेन, सुखेन, अतिसुखेन, अतिविलासपूर्वं, सविलासं, सुखोपभोगेन, सुखोपभोगपूर्वं, सुखासक्तवत्, परमाक्षोपभोगेन.

LUXURIOUSNESS, *s.* विलासित्वं -ता, सविलासत्वं, सुखोपभोगः, सुखभोगः, अतिसुखिता, सुखासक्तिः *f.*, सुखभोगासक्तिः *f.*, भोगासक्तिः *f.*, विषयभोगासक्तिः *f.*, विषयभोगः, विषयसेवा, विषयोपसेवा, सुखसेवा, सुखास्वादः.

LUXURY, *s.* विलासः, विलासित्वं -ता. *See* LUXURIOUSNESS. (That which gratifies the senses or appetite) सुखं, सुखसाधनं, भोगः, भोगसाधनं, सौख्यं, सुखसाहित्यं, विषयसुखं, विषयसुखसाहित्यं, आमिषं, आमिषं.—(Dainty) स्वाद्वन्नं, परमान्नं, विशिष्टान्नं, उत्तमान्नं, मिष्टान्नं, भोजनविशेषः, विशिष्टभोजनं, विशिष्टामिषं.

LYE, *s.* क्षारोदकं, क्षारजलं, क्षारितजलं, क्षारसंसृष्टं जलं.

LYING, *part.* (Reclining) शायी -यिनी -यि (न्), शयः -या -यं, शयानः -ना -नं, शयितः -ता -तं, पतन् -तन्ती -तत् (न्), पतितः -ता -तं, संविष्टः -ष्टा -ष्टं, उपविष्टः -ष्टा -ष्टं; 'lying on a bed,' शयने संविष्टः -ष्टा -ष्टं; 'lying prostrate,' अपभूशयः -या -यं, क्षिप्तदेहः -हा -हं; 'lying with the face upwards,' उत्तानशयः -या -यं.—(Act of lying) शयनं, पतनं, संवेशः.—(Lying in) प्रसवकालः, प्रसवावस्था, सूतिकालः, प्रसूतिकालः; 'lying-in chamber,' सूतिकागृहं, सूतिगृहं, सूतिकाभवनं, सूतिगृहं, सूतीगृहं, अरिष्टशय्या, अरिष्टं, गर्भः, अपवरकः.

LYING, *s.* (Telling falsehood) मृषावादः, मिथ्यावादः, मिथ्याभाषणं, मिथ्याकथनं, असत्यभाषणं, मृषाभाषिता -षणं, मृषाभिधानं, मिथ्योक्तिः *f.*, असत्योक्तिः *f.*, अनृतवादः.

LYING, *part.* or *a.* (Addicted to falsehood) मिथ्यावादी -दिनी -दि (न्), मृषावादी &c., असत्यवादी &c., अनृतवादी &c., असत्यभाषी -षिणी &c., अनृतभाषी &c., अनृतवाक् *m. f. n.* (च्), असत्यः -त्या -त्यं, निःसत्यः -त्या -त्यं.

LYMPH, *s.* मेदस् *n.*, वसा, चर्म्माम्भस् *n.*, त्वगम्भस् *n.*, त्वगुदकं, चर्म्मोदकं, चर्म्मसारः, त्वक्सारः, अमृक्करः, उदकधातुः *m.*

LYMPHATE, LYMPHATED, *a.* उन्मत्तः -त्ता -त्तं, वातुलः -ला -लं.

LYMPHATIC, *s.* मेदोवहं, मेदोवाहिनी, चर्म्माम्भोवाहिनी, त्वक्सारवाहिनी, शरीरान्तर्गतजलवाहिनी.

LYNX, *s.* वनविडालः, वनमार्जारः, सूक्ष्मदृष्टिः क्षुद्व्याघ्रविशेषः.

LYRE, *s.* वल्लकी, वीणा, विपञ्ची -ञ्चिका, तन्त्री. *See* LUTE.

LYRIC, LYRICAL, *a.* वैणिकः -की -कं, वीणावादनसहितः -ता -तं.

LYRIST, *s.* वल्लकीवादकः, वल्लकीपाणिः *m.*, वैणिकः.

LYTHRUM, *s.* (A plant) अग्निज्वाला, सुभिक्षा, धातकी, धातृपुष्पिका.

M

MACAROON, *s.* बादाम्निर्म्मितो मिष्टपिष्टकविशेषः.

MACAW, MACAO, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, वक्रतुण्डः.

MACE, *s.* (Club, ensign of authority) वेत्रं, गदा, यष्टिः *m. f.*, यष्टिकः, दण्डः -ण्डं, मुषलः, मुसलः, लगुडः, लगुरः, मुद्गरः, वातद्धिः *m.*—(The spice) जातीकोशं, जातिकोशं, जातीकोषं, जातिकोषं, जातिः -तीं *f.*, जातिफलं, जातीफलं, फलं, जातीपत्री, जातिपत्रं, जातिपुष्पं, गुडत्वचं, राजभोग्यं.

MACE-BEARER, *s.* वेत्रधरः, वेत्रधारी *m.* (न्), वेत्री *m.* (न्), वेत्रपाणिः *m.* गदाधरः, गदी *m.* (न्), गदापाणिः *m.*, गदाहस्तः, दण्डधरः, दण्डी *m.* (न्), दण्डहस्तः लगुडहस्तः, दण्डधारी *m.*, दण्डिकः, दण्डभृत् *m.*, यष्टिग्रहः, याष्टीकः.

To MACERATE, *v. a.* (Make lean, waste) कृश (nom. कृशयति -यितुं), कृशीकृ, परिकृशीकृ, क्षि in caus. (क्षपयति -यितुं), क्षीणं -णां -णं कृ, क्षीणीकृ, ग्लै in caus. (ग्लपयति -यितुं), मांसक्षयं कृ.—(Steep) जलसेकेन or जलप्लावनेन कोमलीकृ, चिरकालं जलेन समाप्लु (c. 10. -प्लावयति -यितुं) or जलसमाप्लुतं -तां कृ or जलसिक्तं -क्तां कृ or आर्द्रीकृ; 'macerate indigo,' नीलसन्धानं कृ, नीलपाचनं कृ.

MACERATED, *p.p.* (Made lean) कृशीकृतः -ता -तं, परिकृशः -शा -शं, क्षीणः -णा -णं.—(Steeped) जलसेकेन कोमलीकृतः -ता -तं or मृदूकृतः -ता -तं.

MACERATION, *s.* (Making thin, mortification) कृशीकरणं, क्षीणकरणं, कर्शनं, क्लेशकरणं, क्लेशदानं, मांसक्षयः, मांसशोषणं, शरीरपाकः, शरीरशोषः, कायक्लेशः, क्लेशः, कायकृच्छ्रं.—(Steeping) जलसेकेन कोमलीकरणं, आर्द्रीकरणं; 'of indigo,' नीलमन्थानं, नीलपाचनं.

To MACHINATE, *v. a.* परिकॢप् (c. 10. -कल्पयति -यितुं), उपायं कॢप् or घट् (c. 1. घटते -टितुं) or विधा (c. 3. -दधाति -धातुं) or अनुसन्धा or संविधा, मन्त्र् (c. 10. मन्त्रयति -यितुं), सम्प्रधृ (c. 10. -धारयति -यितुं), कल्पनां कृ, परिकल्पनां कृ, अनुसन्धानं कृ.—(Plot) द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं), कपटप्रबन्धं कृ, कपटप्रबन्धेन द्रोहं कृ.

MACHINATION, *s.* कल्पना, परिकल्पना -नं, कॢप्तिः *f.*, मन्त्रणा, कुकल्पना, कुमन्त्रणा, कुयुक्तिः *f.*, कुप्रयुक्तिः *f.*, कुसृष्टिः *f.*, कुसङ्कल्पः, कपटप्रयोगः, कपटप्रबन्धः, घटनं -ना, कुघटना, विधानं, संविधानं, अनुसन्धानं, दुष्टकार्य्यसाधनार्थम् उपायचिन्तनं, द्रोहचिन्तनं; 'against the king,' राजद्रोहः, राजशरीराभिद्रोहः.

MACHINATOR, *s.* परिकल्पकः, परिकल्पनाकृत् *m.*, कुमन्त्रणाकृत्, कुकल्पनाकारी *m.* (न्), घटकः, उपायचिन्तकः, द्रोहचिन्तकः.

MACHINE, *s.* यन्त्रं, उपकरणं, विलालः, साधनं, साधनयन्त्रं.

MACHINERY, (Collective mechanism) यन्त्रसाहित्यं, यन्त्रशक्तिसाहित्यं, यान्त्रं, यान्त्रिकं, यन्त्रत्वं.—(Machines in general) यन्त्रसामग्र्यं, यन्त्रसमूहः, यन्त्रसमुदायः, यान्त्रं, यन्त्रविद्या.

MACHINIST, *s.* यन्त्रकारः -रकः, यन्त्रकृत् *m.*, यन्त्रनिर्म्माणशिल्पज्ञः. यन्त्रविद्यानिपुणः, यन्त्रविद्, कलाज्ञः.

MACILENCY, *s.* कृशता, कार्श्यं, कृशाङ्गता, क्षीणता, क्षामता, मांसक्षीणता,

MACILENT, *a.* कृशः -शा -शं, क्षीणः -णा -णं, क्षीणमांसः -सा -सं.

MACROCOSM, *s.* जगत्सर्ग्गं, जगत्कृत्त्वं, विश्वजगत् *n.*, विश्वं, त्रिभुवनं.

MACROLOGY, *s.* दीर्घसूत्रता, अतिविस्तीर्णवाक्यं, अतिविस्तरः.

MACTATION, *s.* उपहारार्थं घातनं or निहननं or प्रणापणं, विशसनं.

MACULA, *s.* कलङ्कः, लाञ्छनं, चिह्नं, विन्दुः *m.*, कलुषं, अङ्कः.

To MACULATE, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलुष (nom. कलुषयति -यितुं), चिह्न (nom. चिह्नयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं).

MACULATE, MACULATED, *a.* कलङ्कितः -ता -तं, कलङ्की -ङ्किनी -ङ्कि (न्), कलुषितः -ता -तं, लाञ्छितः -ता -तं, चिह्नितः -ता -तं.

MAD, *a.* उन्मत्तः -त्ता -त्तं, उन्मादः -दा -दं, उन्मादवान् -वती -वत् (त्), उन्मादी -दिनी -दि (न्), सोन्मादः -दा -दं, उन्मदः -दा -दं, उन्मदिष्णुः -ष्णुः -ष्णु, मत्तः -त्ता -त्तं, वातुलः -ला -लं, वातूलः -ला -लं, प्रमदः -दा -दं, मून्मदः -दा -दं, मून्मादः -दा -दं, हतबुद्धिः -द्धिः -द्धि, नष्टबुद्धिः &c., विक्षिप्तबुद्धिः &c., भ्रष्टबुद्धिः &c., बुद्धिभ्रष्टः -ष्टा -ष्टं, हतज्ञानः -ना -नं, विप्लुतचित्तः -त्ता -त्तं, भ्रान्तचित्तः -त्ता -त्तं, विक्षिप्तमतिः -तिः -ति, विक्षिप्तः -प्ता -प्तं, मूढचेताः -ताः -तः (स्), नष्टेन्द्रियः -या -यं.—(Proceeding from madness) उन्मादप्रयुक्तः -क्ता -क्तं, उन्मादसूचकः -का -कं, बुद्धिभंशसूचकः -का -कं.—(Furious) मदोत्कटः -टा -टं, मदोद्यतः -ता -तं, कोपाकुलः -ला -लं, संरब्धः -ब्धा -ब्धं; 'a mad dog,' अलर्कः, अलकः; 'a mad fellow,' प्रमदजनः; 'to go mad,' उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू; 'drive mad,' उन्मद् (c. 10. -मादयति -यितुं).

MADAM, *s.* आर्य्या, आर्य्यिका, आर्य्यका, भवती, भाविनी.—(As a complimentary title) आर्य्ये voc. c., भवति voc. c.

MAD-BRAIN, MAD-BRAINED, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c.

MAD-CAP, *s.* प्रमदजनः, उन्मत्तजनः, साहसिकः, साहसकर्म्मा *m.* (न्).

To MADDEN, *v. a.* उन्मद् (c. 10. -मादयति -यितुं), मद्, उन्मत्तीकृ, मत्तीकृ.

To MADDEN, *v. n.* उन्मद् (c. 4. -माद्यति -मदितुं), उन्मत्तीभू, मत्तीभू, मद्.

MADDENED, *p. p.* उन्मादितः -ता -तं, उन्मत्तीकृतः -ता -तं, संरब्धः -ब्धा -ब्धं.

MADDENING, *a.* उन्मादकः -का -कं, उन्मादजनकः -का -कं, उन्मादन -ना -नं.

MADDER, *s.* (The plant) मञ्जिष्ठा, विकसा, विकषा, मण्डूकपर्णी, ताम्रवल्ली, योजनवल्ली, योजनपर्णी, भण्डीरी, भण्डिरी, भण्डी, जिङ्गी, समङ्गा, कालमेघिका, चित्राङ्गी, कालमक्षिका.

MADE, *p. p.* कृतः -ता -तं, निर्म्मितः -ता -तं, कल्पितः -ता -तं, प्रकल्पितः -ता -तं, रचितः -ता -तं, विरचितः -ता -तं, घटितः -ता -तं, विहितः -ता -तं; 'made of,' मयः -यी -यं, निर्म्मितः -ता -तं, घटितः -ता -तं in comp.; as, 'made of wood,' काष्ठमयः -यी -यं, काष्ठघटितः -ता -तं, काष्ठनिर्म्मितः -ता -तं; 'made known,' निवेदितः -ता -तं, आवेदितः -ता -तं, सूचितः -ता -तं, आख्यातः -ता -तं, ज्ञापितः -ता -तं, विज्ञापितः -ता -तं; 'made ready,' सज्जीकृतः -ता -तं; 'made favorable,' प्रसादीकृतः -ता -तं; 'made up, as the mind,' स्थिरीकृतः -ता -तं, स्थिरः -रा -रं; 'made up, reconciled,' सन्धितः -ता -तं, शान्तविवादः -दा -दं; 'made up, settled,' सिद्धः -द्धा -द्धं, साधितः -ता -तं, निष्पन्नः -न्ना -न्नं; 'made over,' सङ्क्रामितः -ता -तं, सञ्चारितः -ता -तं, प्रतिपादितः -ता -तं; 'made light of,' लघूकृतः -ता -तं; 'made good,' साधितः -ता -तं; 'made to do any thing,' expressed by the caus. pass. part.; as, 'made to pay,' दापितः -ता -तं; 'made to go,' गमितः -ता -तं; 'made to know,' ज्ञापितः -ता -तं; 'one who has made an agreement,' कृतसङ्केतः -ता -तं.

MADEFACTION, *s.* आर्द्रीकरणं, क्लेदनं, संक्लेदनं, समुन्दनं, क्लिन्नीकरणं.

To MADEFY, *v. a.* आर्द्रीकृ, क्लिद् (c. 10. क्लेदयति -यितुं), संक्लिद्, परिक्लिद्.

MADHOUSE, *s.* उन्मत्तालयः, उन्मत्तपालनगृहं, उन्मत्तस्थानं.

MADLY, *adv.* उन्मत्तवत्, सोन्मादं, मत्तवत्, वातुलवत्, चित्तविभ्रमात्, चित्तविप्लवात्, उन्मादेन, प्रामाद्यात्, प्रमदजनवत्.

MADMAN, *s.* उन्मत्तजनः, मत्तजनः, प्रमदजनः, उन्मादकः, वातुलः.

MADNESS, *s.* उन्मत्तता, उन्मादः, सोन्मादता, मत्तता, वातुलता, विक्षिप्तता, बुद्धिविक्षिप्तता, बुद्धिविक्षेपः, बुद्धिभ्रमः, मतिभ्रमः, चित्तविभ्रमः, चित्तविप्लवः, बुद्धिनाशः, बुद्धिभ्रंशः, मतिभ्रंशः, मदः, प्रमदता, प्रामाद्यं, उन्मादवायुः *m.*

MÆNORRHAGIA, *s.* (A disease) योन्यर्शस् *n.*, प्रदरः, प्रदरामयः.

MAGAZINE, *s.* (Storehouse) भाण्डागारं, भाण्डगृहं, कोषागारं.—(Of arms, ammunition, &c.) युद्धद्रव्यागारं, शस्त्रागारं, अस्त्रागारं, युद्धभाण्डागारं, आयुधागारं.—(A miscellany published periodically) काले काले प्रकाशितो नानाविषयसङ्ग्रहः or नानावस्तुविषयको ग्रन्थः.

MAGGOT, *s.* कीटः, कृमिः *m.*, अलिः *m.*, कौटाणडजं.

MAGGOTY, *s.* कीटपूर्णः -र्णा -र्णं, कृमिपूर्णः -र्णा -र्णं, कृमिमयः -यी -यं.

MAGI, MAGIANS, *s. pl.* पूर्व्वदेशीयपण्डिताः *m. pl.*, प्राग्देशीयविद्वज्जनाः.

MAGIC, *s.* अभिचारः, अभिचारविद्या, माया, मायाविद्या, योगः, सम्प्रयोगः, वशक्रिया, मूलकर्म्म *n.* (न्), चित्रकर्म्म *n.*, जालं, जालकर्म्म *n.*, इन्द्रजालं, अभिमन्त्रणं, काम्मर्णं, काम्मर्णत्वं, पिशाचविद्या, कुविद्या, मोहः, कुहकः, कुसृतिः *f.*, संवदनं -ना, मन्त्रः, मन्त्रमोहनं.

MAGIC, MAGICAL, *a.* आभिचारिकः -की -कं, अभिचारिकः -की -कं, अभिचारी -रिणी -रि (न्), मायामयः -यी -यं, मायी -यिनी -यि (न्), मायावी -विनी &c., मायिकः -की -कं, ऐन्द्रजालिकः -की -कं, मोही -हिनी &c., कौमृतिकः -की -कं.

MAGICALLY, *adv.* अभिचारेण, अभिचारविद्यानुसारात्, मायया, सेन्द्रजालं.

MAGICIAN, *s.* अभिचारवित् *m.*, अभिचारविद्याज्ञः, मायाकारः, मायाकृत् *m.*, मायी *m.* (न्), मायिकः, मायावी *m.* (न्), मायाजीवी *m.* (न्), पिशाचविद्याज्ञः, अभिचारी *m.* (न्), चित्रकर्म्मविद् *m.*, मूलकर्म्मविद् *m.*, इन्द्रजालिकः, ऐन्द्रजालिकः, इन्द्रियमोही *m.* (न्), कुहकः, कुहककारः, कुहकजीवी *m.*, योगी *m.* (न्), योगेश्वरः, सम्प्रयोगी *m.*, कौसृतिकः, सिद्धः, चित्रकर्म्मा *m.* (न्).

MAGISTERIAL, *a.* (Pertaining to a magistrate or magistracy) धर्म्माधिकारसम्बन्धी -न्धिनी &c., धर्म्माध्यक्षसम्बन्धी &c., दण्डनीतिसम्बन्धी &c., आधिकारिकः -की -कं, वैनयिकः -की -कं.—(Pertaining to a master) प्रभुसम्बन्धी &c., स्वामिसम्बन्धी &c., प्रभुत्वविशिष्टः -ष्टा -ष्टं, आधिकारिकः -की -कं.—(Imperious) आज्ञापकः -का -कं, आदेशकः -का -कं, धृष्टः -ष्टा -ष्टं, शासनरूपः -पा -पं.

MAGISTERIALLY, *adv.* धर्म्माध्यक्षवत्, दण्डनायकवत्, अधिकारेण, शासनरूपेण.

MAGISTRACY, *s.* (Office of a magistrate) धर्म्माधिकारः -रित्वं, धर्म्माधिकरणं, धर्म्माधिपत्यं, धर्म्माध्यक्षता, न्यायाधिकारः, न्यायाधीशता.—(Body of magistrates) धर्म्माधिकारिणः *m. pl*, धर्म्माधिकारिगणः, धर्म्माध्यक्षगणः, धर्म्माध्यक्षसमूहः, न्यायाधीशगणः, न्यायाधीशमण्डलं.

MAGISTRATE, *s.* धर्म्माध्यक्षः, धर्म्माधिकारी *m.* (न्), न्यायाध्यक्षः, न्यायाधीशः, न्यायाधिपतिः *m.*, दण्डनायकः, प्राड्विवाकः, दण्डप्रणेता *m.* (तृ), नीतिशास्ता *m.* (स्तृ), विचारकर्त्ता *m.* (र्तृ), अक्षदर्शकः, आक्षपाटिकः.

MAGNANIMITY, *s.* माहात्म्यं, महात्मता -त्वं, माहात्मिकता, मनोमहत्त्वं, मतिमहत्त्वं, मनोमहिमा *m.* (न्), औदार्य्यं, उदारता, चित्तोदारता, उदारचित्तता, महेच्छा, महानुभावः, महाशयत्वं, मनःप्रौढता, महापुरुषत्वं, शौर्य्यं, वीरत्वं, प्रभावः, महिमा *m.*

MAGNANIMOUS, *a.* महात्मा -त्मा -त्म (न्), महामनाः -नाः -नः (स्), महामनस्कः -स्का -स्कं, माहात्मिकः -की -कं, महामतिः -तिः -ति, उदारचेताः -ताः -तः (स्), उदारमतिः -तिः -ति, उदारः -रा -रं, महानुभावः -वा -वं, महाशयः -या -यं, महेच्छः -च्छा -च्छं, उन्नतमनाः &c., शूरः -रा -रं.—(Proceeding from magnanimity) माहात्म्यपूर्व्वः -र्व्वा -र्व्वं, औदार्य्यपुरःसरः -रा -रं, माहात्म्ययोग्यः -ग्या -ग्यं.

MAGNANIMOUSLY, *adv.* औदार्य्येण, उदारवत्, माहात्म्येन, समाहात्म्यं, मनोमहत्त्वात्, मनोमहिम्ना, महानुभावात्, उदारचित्तत्वात्, महेच्छया, शूरवत्, महाशयवत्, उदारचेतसा.

MAGNATE, *s.* उत्कृष्टपदस्थः, उच्चपदस्थः, महाकुलीनः, राजन्यः.

MAGNESIA, *s.* अम्लपित्तनाशकं शुक्लचूर्णं or चूर्णीकारं मृत्तिकाभस्म *n.* (न्).

MAGNET, *s.* लोहचुम्बकः, लोहकान्तः -न्तं, अयस्कान्तः, चुम्बकः, चुम्बकप्रस्तरः, चुम्बकमणिः *m.*, अयस्कान्तमणिः *m.*, अयस्कान्तमणिशलाका, आकर्षः -र्षकः, आकर्षकमणिः *m.*, वैक्रान्तं, लौहाकर्षकप्रस्तरः.

MAGNETIC, MAGNETICAL, *a.* आकर्षिकः -का -कं, आकर्षकः &c., आकर्षणगुणः -णा -णं, आकर्षणधर्म्मकः -का -कं, लोहचुम्बनशीलः -ला -लं, लोहचुम्बनधर्म्मकः -का -कं, लोहचुम्बकसम्बन्धी -न्धिनी -न्धि (न्), लोहचुम्बकविषयः -या -यं; 'magnetic attraction,' आकर्षः.

MAGNETICALLY, *adv.* आकर्षणशक्तिद्वारेण, आकर्षणपूर्व्वं, लोहचुम्बनशक्त्या.

MAGNETISM, *s.* आकर्षणशक्तिः *f.*, लोहचुम्बनशक्तिः *f.*, लोहचुम्बनधर्म्मः, लोहचुम्बकगुणः, अयस्कान्तगुणः, अयस्कान्तमणिधर्म्मः.

To MAGNETIZE, *v. a.* आकर्षणशक्तिं or लोहचुम्बनशक्तिं दा (c. 3. ददाति, दातुं).

MAGNIFIC, MAGNIFICAL, *a.* महाप्रतापः -पा -पं. *See* MAGNIFICENT.

MAGNIFICENCE, *s.* प्रतापः, महाप्रतापः, महान् प्रतापः, अतिप्रतापः, सुप्रतापः, तेजस् *n.*, अतितेजस् *n.*, महातेजस् *n.*, विभूतिः *f.*, वैभवं, विभवः, ऐश्वर्य्यं, अतिशोभा, अतिकान्तिः *f.*, महादीप्तिः *f.*, महती शोभा, वृहद्दीप्तिः *f.*, अतिप्रभा, ओजस्विता, उज्ज्वलता, श्रीः *f.*, महिमा *m.* (न्), महत्त्वं.

MAGNIFICENT, *a.* महाप्रतापः -पा -पं, प्रतापवान् -वती -वत् (त्), महातेजाः -जाः -जः (स्), प्रतापी -पिनी -पि (न्), अतिप्रतापी &c., तेजस्वी -स्विनी &c., अतितेजसः -सी -सं, शोभनः -ना -नं, अतिशोभनः -ना -नं, सुप्रभः -भा -भं, अतिकान्तिमान् -मती &c., ओजस्वी -स्विनी &c., उज्ज्वलः -ला -लं, महाप्रभः -भा -भं, देदीप्यमानः -ना -नं, विभूतिमान् -मती &c.

MAGNIFICENTLY, *adv.* महाप्रतापेन, सुप्रतापेन, अतिप्रतापेन, अतितेजसा, महातेजसा, सप्रतापं, विभूत्या, अतिशोभापूर्व्वं, ऐश्वर्य्येण.

MAGNIFIED, *p. p.* अधिकीकृतः -ता -तं, विपुलीकृतः -ता -तं, वर्धितः -ता -तं, उपचितः -ता -तं, विशालीकृतः -ता -तं, करालीकृतः -ता -तं, करालितः -ता -तं, अत्युक्तिपूर्व्वं वर्णितः -ता -तं, बहुलीकृतः -ता -तं, कीर्त्तितः -ता -तं.

MAGNIFIER, *s.* वर्धकः, वृद्धिकर्त्ता *m.* (र्तृ), वर्धनकृत् *m.*, आधिक्यकृत्.—(Optical instrument) विपुलदर्शककाचः.

To MAGNIFY, *v. a.* (Make great or greater) अधिकीकृ, विपुलीकृ, विशालीकृ, वृध् (c. 10. वर्धयति -यितुं), महत्तरं -रां कृ, विपुलतरं -रां कृ, आधिक्यं कृ.—(Amplify) अत्युक्त्या or अतिशयोक्त्या वृध् or विस्तृ (c. 10. -स्तारयति -यितुं), वाग्विस्तारेण वृध् or अधिकीकृ, अतिशयोक्तिं कृ, अत्युक्तिं कृ.—(Extol) अतिशयेन कृत् (c. 10. कीर्त्तयति -यितुं) or वर्ण् (c. 10. वर्णयति -यितुं), अतिवर्णनं कृ.

MAGNIFYING, *part.* or *a.* वर्धी -र्धिनी -र्धि (न्), वर्धकः -का -कं, अधिककारी -रिणी &c., विपुलकारी &c., विपुलदर्शकः -का -कं.—(Glass) विपुलदर्शककाचखण्डः -ण्डं.

MAGNILOQUENCE, *s.* अत्युक्तिः *f.*, अतिशयोक्तिः *f.*, अतिभाषणं, प्रगल्भभाषणं, प्रौढभाषणं, चित्रोक्तिः *f.*, गर्व्वितवाक्यं, गर्व्वोक्तिः *f.*, शन्दमात्रं.

MAGNILOQUENT, *a.* प्रौढभाषी -षिणी -षि (न्), प्रगल्भभाषी &c., चित्रभाषी &c., गर्व्वितवाक्यकारी -रिणी &c.

MAGNITUDE, *s.* (Size, extent) परिमाणं, परिमितिः *f.*, प्रमाणं, मानं, आकारपरिमाणं, आकृतिपरिमाणं, रूपपरिमाणं, आकारमानं, महत्त्वपरिमाणं, मात्रं; 'of the magnitude of an egg,' अण्डपरिमाणः -णा -णं; 'of the same magnitude,' सममात्रः -त्री -त्रं, समपरिमाणः -णा -णं.—(Bulk) भारमानं, भारपरिमाणं.—(Greatness) महत्त्वं, वृहत्त्वं, स्थूलता, स्थौल्यं, विपुलता, वैपुल्यं, विशालता, पृथुता -त्वं, प्रथिमा *m.* (न्), महिमा *m.* (न्), उरुता -त्वं, विकटता, वैकट्यं, विस्तीर्णता.

MAGPIE, *s.* चापः, किकिः *m.*, किकिदिविः *m.*, किकोदिवः, किकोदीविः *m.*

MAHOGANY, *s.* नन्दिकः, तुन्नः, तुणिः *m.*

MAHOMMEDAN, *a.* यावनः -नी -नं, यवनदेशीयः -या -यं. *See* MOHAMMEDAN.

MAHRATTA, *s.* (Country) महाराष्ट्रं.—(Dialect) महाराष्ट्री.

MAID, MAIDEN, *s.* कन्या, कुमारी, तरुणी, युवती, बालिका, बाला, कन्यिका, कन्यका, कुमारिका, गौरी, गौरिका, भीदा, रोहिणी, नग्निका, कनी. Some of these words refer to particular ages; as, 'a maid of eight,' गौरी -रिका; 'of nine,' कन्या, रोहिणी; 'of ten,' लग्निका, नग्निका; 'of from ten to twelve,' कुमारी -रिका; 'of from sixteen to thirty,' तरुणी; 'of the age of puberty,' मध्या, मध्यमा, मुग्धा.—(Unmarried woman, virgin) अनूढा, अविवाहिता, अपरिणीता, निवरा, अवरा, अदत्ता, अप्रत्ता, अक्षता, अक्षतयोनिः *f.*, अविद्धयोनिः *f.*, पुरुषास्पृष्टा.—(Female servant) दासी -सिका, चेटी, परिचारिका, सहचारिणी, कर्म्मकरी, सैरन्ध्री, सैरिन्ध्री.

MAIDEN, *a.* (Pertaining to a maid) कौमारः -री -रं, कुमारिकासम्बन्धी -न्धिनी -न्धि (न्), कन्यासम्बन्धी &c., कुमारिकाविषयः -या -यं, कन्याविषयः -या -यं.—(Consisting of maids) कन्यामयः -यी -यं, कुमा-

रीमयः -यी -यं.—(Fresh, unused) नवः -वा -वं, अभिनवः -वा -वं, अपृथ्वीः -थ्वी -थ्वीं, अकृतोपभोगः -गा -गं, अजातोपभोगः -गा -गं, अक्षतः -ता -तं, अखण्डः -ण्डा -ण्डं.

MAIDENHEAD, MAIDENHOOD, *s.* कौमारं, कौमार्य्यं, कुमारीत्वं, कन्यात्वं, तरुणीत्वं, तारुण्यं, कुमारीभावः, कुमारीदशा, कुमारिकाभावः.—(Freshness) नवत्वं -ता, अक्षतत्वं, अखण्डता.

MAIDENLIKE, MAIDENLY, *a.* कुमारीयोग्यः -ग्या -ग्यं, कुमारीसदृशः -शी -शं, कन्यायोग्यः -ग्या -ग्यं, कुमारिकोचितः -ता -तं, कन्योचितः -ता -तं, कुमारिकानुरूपः -पा -पं, कुमारीतुल्यः -ल्या -ल्यं.

MAID-SERVANT, *s.* दासी -सिका, चेटी, प्रेष्या, कर्म्मकरी, प्रेष्यवधूः *f.*, प्रतीहारी, परिचारिका, सेवकी.

MAIL, *s.* (Armour) कवचः -चं, सन्नाहः, वर्म्म *n.* (न्), लोहवर्म्म *n.*, अयोवर्म्म *n.*, कञ्चुकः, तनुत्रं, तनुत्राणं, सज्जा, युद्धसज्जा, दंशनं, दंसनं, उरश्छदः, कङ्कटकः, कङ्कटः, जागरः, जगरः, कायबलनं, उरस्त्राणं, वक्षस्त्राणं, आयसी, वाणवारः, वारवाणः -णं.—(Post) पत्रवाहनं, लेख्यवाहनं, राजनियोगिभृतः पत्रकोषः, राजधावकभृतो लेख्यकोषः.

MAILED, *p. p.* वर्मितः -ता -तं, संवर्मितः -ता -तं, सन्नद्धः -द्धा -द्धं, दंशितः -ता -तं, परिदंशितः -ता -तं, कवची -चिनी -चि (न्), सकवचः -चा -चं, कृतसन्नाहः -हा -हं, सज्जः -ज्जा -ज्जं, सज्जितः -ता -तं, सज्जीकृतः -ता -तं, कञ्चुकी -किनी &c., व्यूढकङ्कटः -टा -टं, ऊढकङ्कटः -टा -टं.

To MAIM, *v. a.* विकल (nom. विकलयति -यितुं), विकलीकृ, विकलाङ्गीकृ, व्यङ्गीकृ, न्यूनाङ्गीकृ, हीनाङ्गीकृ, अङ्गं छिद् (c. 7. छिनत्ति, छेत्तुं) or लू (c. 9. लुनाति, लवितुं) or व्रश्च् (c. 6. वृश्चति, व्रश्चितुं) or खण्ड् (c. 10. खण्डयति -यितुं).

MAIM, *s.* अङ्गवैकल्यं, वैकल्यं, विकलीकरणं, व्यङ्गीकरणं, अङ्गच्छेदः.

MAIMED, *p. p.* विकलाङ्गः -ङ्गा -ङ्गं, विकलीकृतः -ता -तं, विकलः -ला -लं, छिन्नाङ्गः &c., हीनाङ्गः &c., लूनाङ्गः &c., खण्डिताङ्गः &c., व्यङ्गः &c., अपाङ्गः &c., अङ्गविकलः -ला -लं, अङ्गहीनः -ना -नं, विहस्तीकृतः -ता -तं, क्षतविक्षतः -ता -तं.

MAIMING, *s.* विकलीकरणं, व्यङ्गीकरणं, अङ्गछेदनं, अङ्गखण्डनं.

MAIN, *a.* (Principal) मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधानः -ना -नं, परमः -मा -मं, परः -रा -रं, अग्रः -ग्रा -ग्रं, अग्र्यः -ग्र्या -ग्र्यं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमः -मा -मं, प्रवरः -रा -रं, विशिष्टः -ष्टा -ष्टं, मूलिकः -की -कं.—(Most important) गुरुतमः -मा -मं, गरिष्ठः -ष्ठा -ष्ठं, परमः -मा -मं; 'main evil,' प्रधानदूषणं, गुरुदूषणं; 'main matter,' गुरुकार्य्यं, गुरुकं; 'main entrance,' सिंहद्वारं; 'main stock,' मूलद्रव्यं.

MAIN, *s.* (The bulk, gross) प्रधानभागः, प्रधानांशः, अधिकभागः, मुख्यभागः, मुख्यांशः, बहुतरभागः, स्थूलांशः, बाहुल्यं, साकल्यं, समुदायः, सामग्र्यं; 'in the main,' बाहुल्येन, बहुशस्, साकल्येन, सामान्यतस्, भूयिष्ठं.—(Force, strength) बलं, शक्तिः *f.*; 'with might and main,' सर्व्वबलेन, सकलबलेन, प्रसभं, प्रसह्य.—(The ocean) समुद्रः, महासागरः, महोदधिः *m.*, महार्णवः.—(Continent) महाद्वीपः, प्रधानद्वीपः.—(At cock-fighting) समाह्वयः, साह्वयः, प्राणिद्यूतं.

MAIN-LAND, *s.* महाद्वीपः, मुख्यभूमिः *f.*, मध्यभूमिः, मूलभूमिः, मध्यस्थलं, स्थलं -ली, भूखण्डः, पृथिवीखण्डः, द्वीपः, प्रधानद्वीपः, अविच्छिन्नभूमिः.

MAINLY, *adv.* मुख्यशस्, मुख्यतस्, प्रधानतस्, प्राधान्यतस्, प्राधान्येन, विशेषतस्, विशेषेण, बाहुल्येन, बहुशस्, भूयिष्ठं, बहुतरं, सामान्यतस्, साकल्येन, परमं.

MAIN-MAST, *s.* महाकूपकः, महागुणवृक्षकः, प्रधानकूपकः, मध्यकूपकः.

MAINPRIZE, *s.* दर्शनप्रातिभाव्यपूर्व्वकम् आसिद्धजनमोक्षणं.

MAINSAIL, *s.* महाकूपकसम्बन्धि वातवसनं, महाकूपकवसनं.

To MAINTAIN, *v. a.* (Hold) धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), सन्धृ.—(Support) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, आलस् (c. 1. -लसते, c. 10. -लसयति -यितुं), अवलस्, समवलस्, उज्जम्भ् (c. 10. -तम्भयति -यितुं, rt. स्तम्भ्), संस्तम्भ्, विष्टम्भ्, सङ्ग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), वृध् (c. 10. वर्धयति -यितुं), संवृध्, भरणं कृ.—(Keep) पाल् (c. 10. पालयति -यितुं), अनुपाल्, रक्ष् (c. 1. रक्षति -क्षितुं), संरक्ष्, पालनं कृ, रक्षणं कृ, संरक्षणं कृ.—(Support with food) भृ, सम्भृ, भरणं कृ, भृतिं दा, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, अन्नवस्त्रं दा, अन्नाच्छादनं दा, योगक्षेमं कृ; 'maintain a family,' कुलालम्बनं कृ; 'maintain one's self,' निर्वाहं कृ, उदरनिर्वाहं कृ.—(Vindicate, make good) प्रतिपद् (c. 10. -पादयति -यितुं), प्रतिपादनं कृ, व्यवस्था in caus. (-स्थापयति -यितुं), व्यवस्थापनं कृ, अनुपाल्, अनुपालनं कृ, प्रतिपालनं कृ, समर्थनं कृ, पक्षपातं कृ.—(Affirm) निश्चयेन वद् (c. 1. वदति -दितुं), दार्ढ्येन वद्.

MAINTAINABLE, *a.* भरणीयः -या -यं, भर्त्तव्यः -व्या -व्यं, भार्य्यः -र्य्या -र्य्यं, सम्भार्य्यः -र्य्या -र्य्यं, भरण्यः -ण्या -ण्यं, धर्त्तव्यः -व्या -व्यं, धार्य्यः -र्य्या -र्य्यं, धरणीयः -या -यं, पालनीयः -या -यं, रक्षणीयः -या -यं, पोषणीयः -या -यं, वर्धनीयः -या -यं, पोष्यः -ष्या -ष्यं.

MAINTAINED, *p. p.* भृतः -ता -तं, सम्भृतः -ता -तं, धृतः -ता -तं, धारितः -ता -तं, आलम्बितः -ता -तं, पालितः -ता -तं, पोषितः -ता -तं, पुष्टः -ष्टा -ष्टं, रक्षितः -ता -तं, वर्धितः -ता -तं, भर्त्रिमः -मा -मं; 'being maintained,' धार्य्यमाणः -णा -णं.

MAINTAINER, *s.* भर्त्ता *m.* (र्त्तृ), भरः, भरणकृत् *m.*, धर्त्ता *m.* (र्त्तृ), धरः, पालकः, पोषकः, पोष्टा *m.* (ष्टृ), भृतिदाता *m.* (तृ), प्रतिपालकः, रक्षिता *m.* (तृ), आलम्बी *m.* (न्); 'of a family,' कुलालम्बी *m.*

MAINTENANCE, *s.* (Support) भृतिः *f.*, भरणं, सम्भृतिः *f.*, धारणं, धृतिः *f.*, भृत्या, पालनं, पोषणं, परिपालनं, प्रतिपालनं, रक्षणं, संरक्षणं, वर्धनं, संवर्धनं.—(Means of support, subsistence) जीवनोपायः, वृत्त्युपायः, उपजीवनं, जीविका, उपजीविका, वृत्तिः *f.*, वर्त्तनं, निर्वाहः, उदरनिर्वाहः, प्राणधारणं, प्राणयात्रा, शरीरधारणं, शरीरयात्रा, योगक्षेमः.—(Food and clothing) अन्नवस्त्रं, अन्नाच्छादनं, ग्रासाच्छादनं, अन्नवस्त्रं, कक्षिपूः *m.*du.—(Defence, vindication) रक्षणं, प्रतिपादनं, व्यवस्थापनं, स्थापनं -ना.

MAIN TOP, *s.* महाकूपकाग्रं, प्रधानकूपकाग्रं, मध्यकूपकाग्रं.

MAIZE, *s.* शस्यं, स्तम्बकरिः *m.*, शस्यविशेषः.

MAJESTIC, MAJESTICAL, *a.* राजश्रीयुक्तः -क्ता -क्तं, राजश्रीमान् -मती -मत् (न्), राजयोग्यः -ग्या -ग्यं, राजसदृशः -शी -शं, राजतुल्यः -ल्या -ल्यं, राजतेजोमयः -यी -यं, राजतेजोरूपः -पा -पं, राजतेजोवान् -वती &c., प्रतापवान् -वती &c., राजप्रतापी -पिनी &c., राजप्रतापयुक्तः &c., गौरवयुक्तः &c., ऐश्वरः -री -रं, ऐश्वर्य्यवान् -वती &c., राजैश्वर्य्यवान् &c., महामहिमा -मा -म (न्), ऐशिकः -की -कं, सम्राजीयः -या -यं, राजकीयः -या -यं, विभूतिमान् &c., प्रभाववान् &c., प्रभावी -विणी &c., राजप्रभावी &c., प्रभविष्णुः -ष्णुः -ष्णु, माहात्मिकः -की -कं.

MAJESTICALLY, *adv.* राजतेजसा, राजप्रतापेन, सप्रतापं, सप्रभावं, राजैश्वर्य्येण, महामहिम्ना, विभूत्या, राजप्रभावेण, राजयोग्यं, राजसदृशं, राजवत्, राजवैभवेन, सगौरवं.

MAJESTY, *s.* राजश्रीः *f.*, राजतेजस् *n.*, राजप्रतापः, तेजस् *n.*, प्रतापः, प्रभावः, राजप्रभावः, ऐश्वर्य्यं, राजैश्वर्य्यं, महिमा *m.* (न्), राजमहिमा, महामहिमा, राजसायुज्यं, विभूतिः *f.*, राजविभूतिः *f.*, वैभवं, विभवः, राजविभवः, राजप्रभवः, भूतिः *f.*, माहात्म्यं, राजत्वं, राज्यं, प्रभुता, राजगौरवं; 'your majesty,' देव voc. c., श्रीमद्देव voc. c., आयुष्मन् voc. c., राजन् voc. c.: 'he speaks ill of your majesty,'

देवपादान् अधिष्ठिपति; 'his majesty,' भर्त्ता *m.* (र्त्तृ), प्रभुः *m.*, भगवान् *m.* (त्), स्वामी *m.* (न्), महाराजः, भवान् *m.* (त्), अत्रभवान् *m.*, तत्रभवान् *m.*, प्रभविष्णुः *m.*; 'her majesty,' अत्रभवती, तत्रभवती, देवी; 'requisites of majesty,' प्रकृतिः *f.*

MAJOR, *a.* (Greater in number) अधिकः -का -कं, अधिकतरः -रा -रं, अधिकसंख्यः -ख्या -ख्यं, अधिकपरिमाणः -णा -णं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, बहुतरः -रा -रं.—(Greater in dignity) मुख्यः -ख्या -ख्यं, प्रधानः -ना -नं, प्रमुखः -खा -खं, श्रेयान् -यसी &c., श्रेष्ठः -ष्ठा -ष्ठं, गुरुः -र्वी -रु, गरीयान् -यसी &c.—(Major premiss) गुर्ववयवः, पूर्व्वपक्षः.

MAJOR, *s.* (Person of full age) प्राप्तव्यवहारः, व्यवहारप्राप्तः, ज्ञातव्यवहारः, लब्धव्यवहारः, व्यवहारज्ञः, व्यवहारयोग्यः, व्यवहारक्षमः, व्यवहारार्हः, व्यवहाराधिकारी *m.* (न्), त्यक्तशैशवः.—(Military officer) सैन्यदलाध्यक्षः, गुल्मपतिः *m.*, सैन्याधिपतिः *m.*

MAJOR-DOMO, *s.* गृहाधिकृतः, गृहकार्य्याधीशः, गृहकर्म्माध्यक्षः, कार्य्याधीशः.

MAJORITY, *s.* (Greater number) अर्द्धाधिकं, अर्द्धाधिकं, अर्द्धाधिकसंख्या, अर्द्धाधिकपक्षः, अधिकपक्षः, अधिकसंख्या, अधिकभागः, बहुतरभागः, बहुतरपक्षः, परार्द्धं, भूयिष्ठं.—(State of being greater) आधिक्यं, अधिकत्वं -ता.—(Full age) व्यवहारः, व्यवहारप्राप्तिः *f.*, व्यवहारक्षमता, व्यवहारज्ञत्वं, व्यवहार्य्यवयस् *n.*, व्यवहार्य्यता, व्यवहार्य्यावस्था, प्राप्तव्यवहारत्वं, ज्ञातव्यवहारत्वं, व्यवहारयोग्यता, शैशवत्यागः; 'one who has attained his majority,' प्राप्तव्यवहारः. *See* MAJOR.

To MAKE, *v. a.* (Form, create) कृ (c. 8. करोति, कुरुते, कर्त्तुं), सङ्कृ, अभिकृ, निर्मा (c. 2. -माति, c. 3. -मिमीते, c. 4. -मायते -मातुं), विनिर्मा, कॢप् (c. 10. कल्पयति -यितुं), संकॢप्, विधा (c. 3. -दधाति -धातुं), रच् (c. 10. रचयति -यितुं), विरच्, घट् (c. 10. घटयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं), जन् (c. 10. जनयति -यितुं), सञ्जन्.—(Do, perform) कृ, सङ्कृ, विधा, अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं), आचर् (c. 1. -चरति -रितुं), समाचर्.—(Constitute, compose) निर्मा, कॢप्, घट्, संस्था in caus. (-स्थापयति -यितुं) or expressed by निर्म्मितः -ता -तं, मयः -यी -यं, घटितः -ता -तं, रूपः -पा -पं, आत्मकः -का -कं, सम्भृतः -ता -तं in comp. *See* CONSTITUTED, consisting of, made of.—(Effect) साध् (c. 10. साधयति -यितुं), उत्पद् (c. 10. -पादयति -यितुं), निष्पद्, सम्पद्, जन् (c. 10. जनयति -यितुं), कल् (c. 10. कलयति -यितुं), निर्मा, कृ.—(Produce) उत्पद्, जन्, सञ्जन्.—(Cause to be) कृ, or expressed by the caus. form; as, 'good fortune makes a man proud,' श्रीः पुरुषं दर्पयति.—(Compel, force) expressed by the causal form usually in conjunction with बलात् or बलेन. *See To* FORCE. 'He is made to perform that action' कार्य्यते तत् कर्म्म.—(Gain) प्राप् (c. 5. -आप्नोति -आप्तुं), लभ् (c. 1. लभते, लब्धुं), उत्पद्.—(Adjust, arrange) रच्, विरच्, विन्यस् (c. 4. -अस्यति -असितुं), परिकॢप्; 'to make a bed,' शय्यां विन्यस्.—(Make amends) निष्कृतिं दा, निस्तारं कृ, पारितोषिकं दा, प्रतिफलं दा, क्षतिपूरणं कृ.—(Make account of) मन् (c. 10. मानयति -यितुं), सम्मन्, अपेक्ष् (c. 1. -ईक्षते -क्षितुं), प्रतीक्ष्.—(Make away) व्यापद् (c. 10. -पादयति -यितुं), हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं), वधं कृ.—(Make good, fulfil) निष्पद्, सम्पद्, सम्पॄ (c. 10. -पूरयति -यितुं), सिद्धीकृ, साध्.—(Make good a loss) क्षतिपूरणं कृ, प्रत्युपकृ, अपाकृ, निष्कृ, प्रतिकृ, निष्कृतिं दा, प्रतिदा.—(Make known) ज्ञा in caus. (ज्ञापयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), सूच् (c. 10. सूचयति -यितुं). *See* KNOWN. (Make light of) लघूकृ, तुच्छीकृ.—(Make love) विवाहार्थं प्रेम कृ.—(Make merry) उत्सवं कृ.—(Make much of) बहु मन्.—(Make over) परस्मै or परस्मिन् सम् in caus. (-अर्पयति -यितुं), द्रव्याधिकारित्वं पराधीनं कृ or परवशं कृ or परस्वत्वे प्रतिपद् (c. 10. -पादयति -यितुं), परसमर्पणं कृ.—(Make out) निरूप् (c. 10. -रूपयति -यितुं), उपलभ्, अवगम् (c. 1. -गच्छति -गन्तुं), ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), विज्ञा (c. 9. -जानाति -ज्ञातुं), ज्ञा.—(Make out, prove) प्रमाणीकृ, साध्, सूच्.—(Make up, collect) समानी (c. 1. -नयति -नेतुं), सम्भृ (c. 1. -भरति -भर्त्तुं), समादा, एकीकृ, एकत्रीकृ, समूहीकृ.—(Make up, reconcile) सन्धा, समाधा, विवादं शम् (c. 10. शमयति -यितुं), विसंवादसान्त्वनं कृ.—(Make up, settle) साध्, सिद्धीकृ, निर्णी.—(Make up one's mind) निश्चयं कृ, निर्णयं कृ, दृढसङ्कल्पं कृ.—(Make water) मूत्रं कृ, मूत्रोत्सर्गं कृ, मूत्रत्यागं कृ.

To MAKE, *v. n.* (Move towards) अभिया (c. 2. -याति -तुं), प्रतिया, आया, प्रत्यया, उपया; प्रतिगम् (c. 1. -गच्छति -गन्तुं), अभिगम्, अभ्यागम्, उपसृप् (c. 1. -सर्पति -सर्प्तुं), आक्रम् (c. 1. -क्रामति -क्रमितुं) उपक्रम्, अभिक्रम्, अभिसृ (c. 1. -सरति -सर्त्तुं), प्रतिसृ.—(Contribute, conduce) आवह् (c. 1. -वहति -वोढुं), आनी (c. 1. -नयति -नेतुं), सम्पद् (c. 10. -पादयति -यितुं); 'to make for one's advantage,' आत्महिताय भू, आत्मविवृद्धये भू.—(Make as if) प्रतिभा (c. 2. -भाति -तुं), आभा.—(Make off) पलाय् (c. 1. पलायते -यितुं, rt. इ), विपलाय्, अपधाव् (c. 1. -धावति -वितुं), अपक्रम्, अपसृप्, अपया, अपसृ, अपगम्, चल् (c. 1. चलति -लितुं), अपचल्.—(Make up, be reconciled) सन्धा (c. 3. -धत्ते -धातुं), शान्तविवादः -दा -दं भू.

MAKE, *s.* आकारः, आकृतिः *f.*, संस्कारः, रूपं, संस्थानं, विग्रहः, मूर्त्तिः *f.*, वपुस् *n.*, निर्माणं, निर्म्मितिः *f.*, व्यूहनं.

MAKE-BATE, *s.* कलहकारी *m.* (न्), द्वन्द्वकारी *m.* (न्), कलिकारकः, भेदकरः.

MAKE-PEACE, *s.* सन्धाता *m.* (तृ), सन्धानकर्त्ता *m.* (र्त्तृ), सन्धिकृत् *m.*

MAKER, *s.* कर्त्ता *m.* (र्त्तृ), कारः -रकः, कारी *m.* (न्), कृत् *m.*, कारुः *m.*, निर्माता *m.* (तृ), निर्माणकृत् *m.*, निर्माणकर्त्ता, विधाता *m.* (तृ), विधायी *m.* (न्), कल्पकः, परिकल्पकः, रचकः, घटकः, उत्पादकः.—(Creator) स्रष्टा *m.* (ष्टृ), विधाता *m.*, धाता *m.* सृक् *m.* (ज्), सृष्टिकर्त्ता *m.*, जनकः, जनिता *m.* (तृ), जनयिता *m.*—(Of the world) जगत्कर्त्ता *m.*, जगत्स्रष्टा *m.* (ष्टृ), विश्वसृक् *m.*, विश्वविधायी *m.*, विश्वकृत् *m.*, लोककृत् *m.*

MAKING, *s.* करणं, निर्माणं, निर्म्मितिः *f.*, कल्पनं -ना, विधानं, रचनं -ना, घटनं -ना, जननं, उत्पादनं, सृष्टिः *f.*, सर्ज्जनं.

MAL, as a prefix is expressed by अ, दुर्, वि, कु, अप, कत्, असत्.

MALABAR, *s.* (The country) मलयः, मलयदेशः, केरलः.

MAL-ADMINISTRATION, *s.* असम्यक्पालनं, दुर्नीतिः *f.*, दुर्नयः, दुःशासनं, कुनीतिः *f.*, अनीतिः *f.*, दुर्नीतं, दुर्निर्वाहः.

MALADY, *s.* रोगः, व्याधिः *m.*, आमयः, विकारः, विकृतिः *f.*, पीडा, दुःखं, रुक् *f.*, (ज्), रुजा, गदः, तापः, उपतापः, अस्वास्थ्यं, अस्वस्थता, बाधा, क्लेशः, आर्त्तिः *f.*, कष्टं.

MALAPERT, *a.* अविनीतः -ता -तं, दुर्विनीतः -ता -तं, अविनयः -या -यं, धृष्टः -ष्टा -ष्टं, धर्षितः -ता -तं, प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्).

MALAPERTLY, *adv.* दुर्विनीतवत्, अविनयेन, दुर्विनयात्, धृष्टवत्, प्रगल्भं.

MALAPERTNESS *s.* अविनयः, दुर्विनयः, अविनीतता, दुर्विनीतता, धृष्टता, प्रगल्भता, प्रागल्भ्यं, प्रतिभा -भानं, दुर्वृत्तता.

MALAPROPOS, *adv.* अस्थाने, अकाले, अयोग्यं, असमयेन, अनवसरेण, अप्रसङ्गवत्, अप्रसङ्गेन, अप्रस्तुतं, अप्रासङ्गिकः -की -कं.

MALARIA, *s.* पूतिवातः, दुर्वायुः *m.*, दुर्वातः, रोगजनकः कुवायुः *m.*, पूतिवाष्पः, मारकवाष्पः, दूषकवाष्पः.

MALCONTENT, MALCONTENTED, *a.* (Discontented) असन्तुष्टः -ष्टा -ष्टं, अतुष्टः -ष्टा -ष्टं.—(With the government) राज्यमार्गासन्तुष्टः -ष्टा -ष्टं, राज्यनीतिवितुष्टः -ष्टा -ष्टं, राज्यविद्विष्टः &c.

MALE, *s.* पुमान् *m.* (पुंस् or पुमस्), पुरुषः, पूरुषः, नरः, ना *m.* (नृ), मानुषः, मनुष्यः, मानवः, मनुजः, पुंव्यक्तिः *m.*, पुम्प्राणी *m.*, पञ्चजनः; 'duties of the male,' पुन्धर्म्माः, नृधर्म्माः; 'male and female,' स्त्रीपुरुषौ *m.* du., मिथुनं, युग्मं, द्वन्द्वं.—(In botany) पुरुषः.—(Screw) नरः.

MALE, *a.* पुं in comp., पुरुष in comp., पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुंजातीयः -या -यं, पुरुषजातिसम्बन्धी -न्धिनी -न्धि (न्), नर in comp.; 'male species,' पुंजातिः *f.*, पुरुषजातिः *f.*; 'male offspring,' पुमपत्यं, पुंसन्तानं, पुमन्वयः, अन्वयः; 'the male organ,' पुंलिङ्गं, पुंश्चिह्नं; 'a male tiger,' पुंव्याघ्रः; 'male attire,' पुरुषवेशः, नरवेशः, नृवेशः.

MALEDICTED, *a.* शप्तः -प्ता -प्तं, अभिशप्तः -प्ता -प्तं, आक्रुष्टः -ष्टा -ष्टं.

MALEDICTION, *s.* शापः, अभिशापः, शपः -पनं, शपथः, परिशापः, आक्रोशः -शनं, अवक्रोशः, उपक्रोशः, भर्त्सनं, अभिभर्त्सः, दुर्वाक्यं, अमङ्गलवचनं, अकल्याणवचनं, अमङ्गलेच्छा, मौखर्य्यं.

MALEDICTORY, *a.* अभिशापकः -का -कं, आक्रोशकः -की -कं, रुशन् -शती -शत् (त्), अनिष्टप्रार्थकः -का -कं, अमङ्गलाशंसकः -का -कं, दुर्वाक्यमयः -यी -यं.

MALEFACTOR, *s.* अपराधी *m.* (न्), पापी *m.* (न्), पातकी *m.* (न्), महापातकी *m.*, कुकर्म्मा *m.* (न्), पापकर्म्मा *m.*, दुष्कृती *m.* (न्), पापकारी *m.* (न्), कुकर्म्मकारी *m.*, दुष्कर्म्मा *m.*, दुष्कृतकर्म्मा *m.*, अन्यायी *m.* (न्), एनस्वी *m.* (न्), दोषी *m.*, कृतापराधः, कृतागाः *m.* (स्), कृष्णकर्म्मा *m.*, असत्कर्म्मा *m.*

MALEVOLENCE, *s.* दुष्टभावः, भावदुष्टता, दुष्टबुद्धिः *f.*, द्रोहबुद्धिः *f.*, दुर्बुद्धिः *f.*, द्वेषबुद्धिः *f.*, द्वेषभावः, दुष्टचित्तत्वं, कुभावः, कुबुद्धिः *f.*, द्रोहचिन्तनं, द्रोहः, असूया, अभ्यसूया, दौरात्म्यं, अहितत्वं, अप्रीतिः *f.*, मात्सर्य्यं, पापदर्शनं, अहितेच्छा, अहितेप्सा, अहितैषा, अपकारेच्छा, अनिष्टेच्छा, पुरोभागिता.

MALEVOLENT, *a.* दुष्टबुद्धिः -द्धिः -द्धि, दुष्टभावः -वा -वं, द्रोहबुद्धिः &c., द्वेषबुद्धिः &c., कुबुद्धिः &c., दुर्बुद्धिः &c., कुभावः -वा -वं, अहितबुद्धिः &c., सासूयः -या -यं, साभ्यसूयः -या -यं, मत्सरः -रा -रं -री -रिणी -रि (न्), दुरात्मा -त्मा -त्म (न्), दुष्टात्मा &c., दुष्टचेताः -ताः -तः (स्), दुष्टमतिः -तिः -ति, पापदर्शी -र्शिनी -र्शि (न्), दोषैकदृक् (श्), द्रोहचिन्तकः -का -कं, अनिष्टचिन्तकः &c., अपकारार्थी -र्थिनी &c., अनिष्टार्थी &c., अहितकामः -मा -मं, अहितेच्छुः -च्छुः -च्छु, अहितैषी -षिणी &c., अहितः -ता -तं, दुष्टशीलः -ला -लं, हिंसाशीलः &c., अपकारशीलः &c., दुःशीलः &c. दुर्हृदयः -या -यं, विषहृदयः -या -यं, पुरोभागी -गिनी &c.

MALEVOLENTLY, *adv.* दुष्टभावेन -वात्, दुष्टबुद्धित्वात्, द्रोहबुद्धा, अहितबुद्धा, मात्सर्य्येण, मत्सरवत्, सासूयं, साभ्यसूयं, दुष्टचेतसा, अहितेच्छया, दुष्टशीलत्वात्.

MALICE, *s.* दुष्टभावः, द्रोहः, द्रोहबुद्धिः *f.*, द्रोहचिन्ता -न्तनं, द्वेषभावः, द्वेषः, दीर्घद्वेषः, असूया, अभ्यसूया, ईर्ष्या, मात्सर्य्यं, मत्सरता, हिंसाबुद्धिः *f.*, हिंसाशीलता, नृशंस्यं, नृशंसता, दंशः, दौर्जन्यं, दुष्टशीलता, दुःशीलता, अपकारेच्छा, अहितेच्छा, अनिष्टेच्छा, मानसहिंसा, दौरात्म्यं, दुरात्मता, हिंसा, परिहिंसा, खलता; 'malice prepense,' द्रोहचिन्तनं, व्यापादः; 'secret malice,' मानसद्वेषः, मानसद्रोहः; 'bearing malice,' दीर्घद्वेषी -षिणी -षि (न्).

MALICIOUS, *a.* द्रोहबुद्धिः -द्धिः -द्धि, द्रोही -हिणी -हि (न्), दुष्टभावः -वा -वं, मत्सरः -रा -रं, मत्सरी -रिणी &c., नृशंसः -सा -सं, हिंसाशीलः -ला -लं, हिंसात्मकः -का -कं, हिंसालुः -लुः -लु, द्रोहशीलः &c., परिहिंसाशीलः &c., हिंसारुचिः -चिः -चि, द्वेषी -षिणी &c., अतिद्वेषी &c., अतिद्वेषकः -का -कं, अतिद्वेष्टा -ष्ट्री -ष्टृ (ष्टृ), कुबुद्धिः &c., कुमेधाः -धाः -धः (स्), दंशी -शिनी &c., साभ्यसूयः -या -यं, सासूयः &c., दुर्जनः -ना -नं, खलः -ला -लं, पिशुनः -ना -नं, क्रैरवः -वा -वं. *See* MALEVOLENT. (Proceeding from malice) द्वेषमूलकः -का -कं, मात्सर्य्यहेतुकः -का -कं, द्रोहमूलः -ला -लं, दौर्जन्यहेतुकः -का -कं.

MALICIOUSLY, *adv.* द्रोहबुद्धा, द्रोहशीलत्वात्, दुष्टभावेन, अपकारेच्छया, सद्वेषं, द्रोहचिन्तापूर्ब्बं, समात्सर्य्यं; 'maliciously intentioned,' द्रोहबुद्धिः -द्धिः -द्धि.

MALICIOUSNESS, *s.* द्रोहबुद्धित्वं, हिंसाशीलता, कौटिल्यं. *See* MALICE.

MALIGN, *a.* अतिदुष्टः -ष्टा -ष्टं, विषपूर्णः -र्णा -र्णं. *See* MALIGNANT.

To MALIGN, *v. a.* अपवद् (c. 1. -वदति -दितुं), परिवद्, अभिशंस् (c. 1. -शंसति -सितुं), कलङ्क (nom. कलङ्कयति -यितुं), असूय (nom. असूयति -यितुं), मुखरीकृ.

MALIGNANT, *a.* (Malicious) द्रोहबुद्धिः -द्धिः -द्धि, दुष्टबुद्धिः &c., दुर्बुद्धिः &c., दुष्टमतिः -तिः -ति, दुर्मतिः &c., दुराशयः -या -यं, अहितः -ता -तं, नृशंसः -सा -सं, विषहृदयः -या -यं. *See* MALICIOUS, MALEVOLENT. (Virulent, acrimonious) उग्रः -ग्रा -ग्रं, अत्युग्रः &c., अतिकटुः -टुः -टु, अरून्तुदः -दा -दं, अतितिग्मः -ग्मा -ग्मं, अतिदुष्टः -ष्टा -ष्टं, बहुविषः -षा -षं, विषालुः -लुः -लु, विषपूर्णः -र्णा -र्णं; 'a malignant ulcer,' दुष्टव्रणः.—(Dangerous to life, difficult to be cured) मारात्मकः -का -कं, प्राणनाशकः -का -कं, शरीरनाशकः -का -कं, साङ्घातिकः -की -कं, दुश्चिकित्स्यः -त्स्या -त्स्यं, दुश्चिकित्सः -त्सा -त्सं, दुःसाध्यः -ध्या -ध्यं, दुःशमनीयः -या -यं, सान्निपातिकः -की -कं, काल in comp.; 'malignant fever,' कालज्वरः, सन्निपातज्वरः, मारकः, मरकः.—(Unpropitious in astrology) अनिष्टः -ष्टा -ष्टं, अनिष्टसूचकः -का -कं, अमङ्गलः -ला -लं, अकल्याणः -णा -णं.

MALIGNANTLY, *adv.* सद्रोहं, अतिदुष्टं, अत्युग्रं, अतितिग्मं, दुष्टभावात्, सविषं.

MALIGNED, *p. p.* मिथ्याभिशस्तः -स्ता -स्तं, मिथ्याभियुक्तः -क्ता -क्तं, कलङ्कितः &c.

MALIGNER, *s.* अपवादी *m.* (न्), अभिशस्तकः, असूयकः, गुणघाती *m.*

MALIGNITY, MALIGNANCY, *s.* (Maliciousness) दुष्टबुद्धित्वं, बुद्धिदुष्टता, भावदुष्टता, दुर्बुद्धित्वं, द्रोहः, द्रोहबुद्धित्वं, अतिदुष्टता, द्वेषः, अतिद्वेषः, दुर्मतिः *f.* -तित्वं, पैशुन्यं. *See* MALICE, MALICIOUSNESS. (Virulence) उग्रता, अत्युग्रता, अतिकटुता, अतितिग्मता, अतिदुष्टता, सविषत्वं, विषपूर्णता, बहुविषत्वं.—(Destructive tendency) मारात्मकत्वं -ता, अतिनाशकता, साङ्घातिकता, दुश्चिकित्स्यता.

MALKIN, *s.* (Mop) मार्जनी, सम्मार्जनी.—(Drab) नीचस्त्री, अशुद्धा.

MALL, *s.* (Heavy hammer) वृहन्मुद्गरः, काष्ठमुद्गरः, घनः.—(Public walk) जनाकीर्णमार्गः, लोकाकीर्णमार्गः, लोकमार्गः, लोकपथः, सर्व्वसामान्यपथः.

MALLEABILITY, *s.* आघातवर्धनीयता, ताडनवर्धनीयता, मुद्गराघातवर्धनीयत्वं, घनवर्धनीयत्वं, घनवर्धिष्णुता, उद्वर्त्तनक्षमता, उद्वर्त्तनीयता.

MALLEABLE, *a.* आघातवर्धनीयः -या -यं, ताडनवर्धनीयः -या -यं, मुद्गराघातवर्धनीयः -या -यं, उद्वर्त्तनक्षमः -मा -मं, घनवर्धनीयः -या -यं, घनवर्धिष्णुः -ष्णुः -ष्णु.

To MALLEATE, *v. a.* मुद्गराघातेन उद्वर्त्तनं कृ or उद्वृत् (c. 10. -वर्त्तयति -यितुं).

MALLEATION, *s.* मुद्गराघातवर्धनं, घनवर्धनं, ताडनवर्धनं, उद्वर्त्तनं.

MALLET, *s.* मुद्गरः, काष्ठमुद्गरः, घनः, काष्ठघनः, दुघणः.

MAL-PRACTICE, *s.* कुचर्य्या, कुचरितं, कुचेष्टितं, दुश्चरितं, दुश्चेष्टितं, दुराचारः.

MALT, *s.* चिरकालेन जलस्थितं यववीजं, ईषत्स्फुटत् or ईषत्फुल्लवत् यववीजं,

यवपानीयवीजं.

MALT-DRINK, MALT-LIQUOR, *s.* यवसुरा, यवरसः, यवजं, यवपानीयं.

MALT-HOUSE, *s.* यवपाचनगृहं, यवसन्धानस्थानं, यववीजगृहं.

To MALTREAT, *v. a.* अपकृ, अपकारं कृ, शत्रुवद् आचर् (c. 1. -चरति -रितुं).

MALTREATED, *p. p.* अपकृतः -ता -तं, कृतापकारः -रा -रं, दुराचरितः -ता -तं.

MALTREATMENT, *s.* अपकारः, अपक्रिया, अपकृतिः *f.*, निकारः, पीडा.

MALVERSATION, *s.* दुराचरितं, अनुचिताचारः, धूर्त्तता, शाठ्यं, खलता, कुसृतिः *f.*

MÁLWA, *s.* (Province) मालवः, दाशेरकः; 'the people of Málwa,' मालवाः *m. pl.*, मालव्याः *m. pl.*, मालवी *f. sing.*

MAM, MAMMA, *s.* मा, माता *f.* (तृ), अम्बा, अम्बिका, अम्बालिका.

MAMMALIA, *s. pl.* स्तनाः *m. pl.*, स्तनविशिष्टो जन्तुगणः, सस्तनजातिः *f.*

MAMMARY, *a.* स्तनसम्बन्धी -न्धिनी -न्धि (न्), कुचसम्बन्धी &c.

MAMMET, *s.* पुत्तली -लिका, पुत्रिका, पाञ्चाली -लिका, पाञ्चलिका.

MAMMIFER, MAMMIFEROUS, *a.* सस्तनः -ना -नं, स्तनवान् -वती -वत् (त्).

MAMMIFORM, *a.* स्तनाकारः -रा -रं, स्तनाकृतिः -तिः -ति, कुचाकारः -रा -रं.

MAMMILLARY, *a.* स्तनसम्बन्धी -न्धिनी -न्धि (न्), स्तनाकारः -रा -रं.

MAMMON, *s.* धनं, धनेश्वरः, लक्ष्मीः *f.*; 'serving mammon,' धनसेवनं, लक्ष्मीपूजनं, धनसम्पादनं, अर्थसेवा, अर्थपरता.

MAMMOTH, *s.* मेम्मथसंज्ञकः प्राचीनकालिको हस्ती.

MAN, *s.* (A male of the human race) पुरुषः, नरः, मनुष्यः, मानुषः, मानवः, मनुजः, जनः, पुमान् *m.* (पुंस् or पुमस्), मर्त्यः, पूरुषः, मनुः *m.*, पञ्चजनः, मनुभूः *m.*, पुंष्यक्तिः *m.*, वीरः, माल्लः, वृषसानः, वृषसानुः *m.*, चर्षणिः *m.*, भूस्पृक् *m.* (श्), 'an eminent man,' पुरुषसिंहः, पुरुषव्याघ्रः, पुरुषर्षभः, पुरुषशार्दूलः, पुरुषपुङ्गवः, पुरुषोत्तमः, पुरुषचन्द्रः, पुरुषपुण्डरीकः, नरसिंहः, नृसिंहः; 'a low man,' पुरुषाधमः; 'a man of truth,' सत्यवीरः.—(Mankind) मनुष्यजातिः *f.*, पुरुषजातिः *f.*, मानुष्यं, पुरुषाः *m. pl.*, मानुषाः *m. pl.*, मानवाः *m. pl.*, नराः *m. pl.*, लोकः, मनुष्यलोकः, मनुभूः *m.*; 'the fear of man,' पुरुषभीतिः *f.*, जनभीतिः *f.*; 'the measure or stature of a man,' पौरुषं, पुरुषपरिमाणं.—(Person) जनः, व्यक्तिः *f.*—(Male servant) सेवकः, प्रेष्यः, किङ्करः, दासजनः.—(Man at chess, &c.) नरः, सारः, शारः, शारिः *m.*, सारिः -री -रिका, जन्तुपुत्रकः, नयः.—(Adult) प्रौढवयस्कः, मानुष्यप्राप्तः.

To MAN, *v. a.* मनुष्ययुक्तं -क्ता कृ, समनुष्यं -ष्यां कृ, सैन्यान् प्रविश् (c. 10. -वेशयति -यितुं) or निविश्, पुरुषप्रवेशनात् सज्जीकृ.

MANACLE, *s.* हस्तबन्धनं, करबन्धनं, हस्तपाशः, पाणिबन्धः.

To MANACLE, *v. a.* हस्तौ पाशेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), पाणिबन्धनं कृ, करसंयमनं कृ, करयन्त्रणं कृ.

MANACLED, *p. p.* बद्धहस्तः -स्ता -स्तं, संयमितकरः -रा -रं, यन्त्रितकरः &c.

To MANAGE, *v. a.* (Conduct, carry on) प्रणी (c. 1. -णयति -णेतुं), सम्प्रणी, विधा (c. 3. -दधाति -धातुं), वह् (c. 10. वाहयति -यितुं), निर्वह्, आचर् (c. 1. -चरति -रितुं), घट् (c. 1. घटते -टितुं), प्रवृत् (c. 10. -वर्त्तयति -यितुं), वृत्, कृ.—(Direct, control) शास् (c. 2. शास्ति -सितुं), नियन्त्र्, वशीकृ, अनुशास्, समनुशास्, नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, सन्नियम्, यन्त्र् (c. 10. यन्त्रयति -यितुं).—(Train) विनी, शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्; 'let it be managed,' विधीयतां.

To MANAGE, *v. n.* निर्वाहं कृ, प्रणयनं कृ, उपायप्रयोगं कृ, प्रयोगं कृ.

MANAGEABLE, *a.* विनेयः -या -यं, प्रणेयः -या -यं, विधेयः -या -यं, सुविधेयः -या -यं, गृह्यकः -का -कं, वश्यः -श्या -श्यं, सुकरः -रा -रं, आयत्तः -त्ता -त्तं, शासनीयः -या -यं, विनीतः -ता -तं.

MANAGED, *p. p.* प्रणीतः -ता -तं, विहितः -ता -तं, निर्वाहितः -ता -तं, निर्वेहितः -ता -तं, वाहितः -ता -तं, घटितः -ता -तं, प्रवर्त्तितः -ता -तं, वर्त्तितः -ता -तं, आचरितः -ता -तं, नियतः -ता -तं, विनियतः -ता -तं, प्रयुक्तः -क्ता -क्तं; 'well managed,' सुघटितः -ता -तं, सुप्रयुक्तः -क्ता -क्तं, सुनीतः -ता -तं; 'badly managed,' दुर्घटितः -ता -तं, असम्यक् चेष्टितः -ता -तं.

MANAGEMENT, *s.* (Conduct, carrying on) प्रणयनं, सम्प्रणयनं, नीतिः *f.*, नयः, प्रणीतिः *f.*, नायः, नेतृत्वं, निर्वाहः, निर्वेहणं, निर्वाहणं, व्यवहर्तृत्वं, आचरणं, सम्पादनं, विधानं, घटनं -ना, प्रयोगः, प्रवर्त्तनं, प्रवृत्तिः *f.*, करणं; 'of affairs,' कर्म्मनिर्वाहः.—(Control) अधिकारः, प्रभुत्वं, अधिष्ठातृत्वं, शासनं, अनुशासनं, विनियमः.—(Contrivance) उपायः, प्रयोगः, उपायप्रयोगः, युक्तिः *f.*, युक्तिप्रयुक्तिः *f.*, उपायज्ञता; 'good management,' सुनयः, सुनीतिः *f.*; 'bad management,' दुर्णयः, दुर्णीतिः; 'management of a drama,' स्थापना.

MANAGER, *s.* नायकः, नेता *m.* (तृ), प्रणेता *m.*, सम्प्रणेता *m.*, निर्वाहकः, वाहकः, सम्पादकः, व्यवहर्त्ता *m.* (र्तृ), घटकः, अधिष्ठाता *m.* (तृ), प्रवर्त्तकः, प्रयोजकः, चालकः, अधिकारी *m.* (न्), अधिकृतः, कर्त्ता *m.* (र्तृ), कारकः; 'manager of affairs,' कर्म्मनिर्वाहकः, कार्य्याध्यक्षः, कार्य्यदृष्टा (ष्टृ), कार्य्यावेक्षिता *m.* (तृ), कर्म्माधिकारी *m.*; 'manager of the treasury,' कोषाध्यक्षः, धनाधिकारी *m.*, अर्थाधिकारी.—(Stage manager) सूत्रधारः -री *m.* (न्), मारिषः, स्थापकः, सूचकः.—(Expert in the use of means) उपायज्ञः, युक्तिमान् *m.* (त्), विदग्धः.—(Economical) परिमितव्ययी *m.* (न्), परिमिताचारी *m.*

MANAGING, *a.* उपायज्ञः -ज्ञा -ज्ञं, उपायकुशलः -ला -लं, विदग्धः -ग्धा -ग्धं.

To MANCIPATE, *v. a.* दासीकृ, वशीकृ, करदीकृ, बन्ध् (c. 9. बध्नाति, बन्द्धुं).

MANCIPATION, *s.* दास्यं, दासत्वं, दासीकरणं, वशीकरणं, परप्रेष्यत्वं, बन्धनं.

MANCIPLE, *s.* भोजनाधिकारी *m.* (न्), भोजनादिपरिकल्पकः.

MANDATE, *s.* आज्ञा, आदेशः, निदेशः, निर्देशः, नियोगः, शासनं, शास्तिः *f.*, नियमः, चोदना -नं, विधिः *m.*, विधानं; 'written,' आज्ञापत्रं, शासनपत्रं, पट्टं.

MANDATORY, *a.* आदेशकः -का -कं, आदेशी -शिनी -शि (न्), निर्देशकः -का -कं, आज्ञापकः -का -कं, आज्ञासूचकः -का -कं, आज्ञाबोधकः -का -कं, शासकः -का -कं.

MANDIBLE, *s.* हनुः *m. f.*—(Lower jaw) पीचं, कुम्भः, चिबुकं.

MANDRAKE, *s.* (A plant) लक्ष्मणा, पुत्रदात्री, पुत्रदा, दूदाफलं.

To MANDUCATE, *v. a.* चर्व् (c. 1. चर्वति -र्वितुं, c. 10. चर्वयति -यितुं), चर्वणं कृ.

MANDUCATION, *s.* चर्वणं -णा, दन्तपेषणं, रोमन्थः, भक्षणं, भोजनं.

MANE, *s.* (Of a horse, &c.) केशरः, केसरः.—(Of a lion) सिंहकेशरः, सटा.

MAN-EATER, *s.* पुरुषादः, मनुष्यादः, मानवादः, मनुष्यभोजी *m.* (न्), नरभोजी *m.*, मनुष्यभक्षी *m.*, नरभुक् *m.* (ज्), नराशी *m.*, नृजग्धः, नृमांसखादकः, मनुष्यमांसभुक् *m.*

MANED, *a.* केशरी -रिणी -रि (न्), केसरी &c., सकेशरः -रा -रं.

MANEGE, *s.* (Art of training horses) अश्वशिक्षणविद्या, अश्वदमनविद्या.—(School for training horses) अश्वशिक्षाशाला.

MANES, *s. pl.* (Deceased ancestors) पितरः *m. pl.*, पितृलोकः, पितृपितामहादि *n.*—(Ghost) प्रेतलोकः, प्रेतः, प्रेतनरः, परेतः, पितृवनेचरः.—(Eater of the funeral oblation) पिण्डादः, पिण्डाशी *m.* (न्), पिण्डाशः, पिण्डभाक् *m.* (ज्), पिण्डी *m.* (न्), श्राद्धभुक् *m.* (ज्), श्राद्धी *m.* (न्), श्राद्धिकः; 'collective class of manes or deceased ancestors,' पितृगणः, पितृवर्गः, पितृसामान्यं, certain of these classes are सोमसद्, अग्निष्वात्ताः, सोमपाः, आज्यपाः, अर्य्यमा *m.* (न्),

सुकाली *m.* (न्), हविष्मत्, कव्यवाहनः, कव्यवालः, वारिषद्, अग्निदग्धः, अनग्निदग्धः, सोमः; 'business of offering oblations to the manes,' पितृकर्म्म *n.* (न्), पितृक्रिया, पितृव्रतं, पितृकार्य्यं, श्राद्धकर्म्म *n.*, श्राद्धक्रिया, पितृयज्ञः, पितृमेधः; 'oblation to the manes,' श्राद्धं, पिण्डः -ण्डी, कव्यं, various forms of these oblations are पार्वणश्राद्धं, एकोद्दिष्टश्राद्धं, नित्यश्राद्धं, नैमित्तिकश्राद्धं, काम्यश्राद्धं, आह्निकश्राद्धं, वृद्धिश्राद्धं, सपिण्डनश्राद्धं, उदकुम्भश्राद्धं, नान्दीश्राद्धं, नान्दीमुखं, प्रीतिश्राद्धं, हिरण्यश्राद्धं, आमश्राद्धं, पाथेयश्राद्धं, तिलतर्पणं; 'the offering of a cake,' पिण्डदानं, पिण्डनिर्वपणं; 'of water,' उदकदानं, उदकक्रिया; 'gifts in honor of the manes,' पितृदानं -नकं, पितृतर्पणं; 'one who makes the oblation,' पिण्डदः, श्राद्धदः, श्राद्धकरः, श्राद्धकृत् *m.*; 'day sacred to the manes,' पितृतिथिः *m. f.*, पितृदिवसः; 'heaven of the manes,' पितृलोकः, पितृपदं, पितृस्थानं. Oblations to the manes are made by the relations of the deceased soon after his death, and are repeated once, or, according to some, twice in every year, *i. e.* on the anniversary of the death, and on the same lunar day of the waning half of the month Bhádra. The latter are called महालयः. These obsequial rites are supposed to be necessary to secure the residence of the souls of the deceased in a world appropriated to the manes.

MANEUVER, MANŒUVRE, *s.* उपायः, उपायप्रयोगः, युक्तिः *f.*, सुयुक्तिः *f.*, प्रयुक्तिः, युक्तिप्रयुक्त्याः *f. pl.*, माया, व्यपदेशः, कैतवप्रयोगः, विदग्धप्रयोगः, छलं, उपसञ्चरः.—(Military manœuvre) युद्धछलं, युद्धव्यपदेशः; 'evolutions of troops,' सैन्यविन्यासः, सैन्यव्यूहः, योग्या.

To MANEUVER, *v. n.* उपायप्रयोगं कृ, कैतवप्रयोगं कृ, विदग्धप्रयोगं कृ, व्यपदेशं कृ, छलं कृ; 'to distribute troops,' छलार्थं सैन्यान् विन्यस् (c. 4. -अस्यति -सितुं) or व्यूह् (c. 1. -ऊहते -हितुं).

MANFUL, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषयोग्यः -ग्या -ग्यं, वीरयोग्यः &c., शूरयोग्यः &c., महावीर्य्यः -र्य्या -र्य्यं, साहसिकः -की -कं.

MANFULLY, *adv.* पुरुषवत्, पौरुषेण, सपौरुषं, सवीर्य्यं, वीरवत्, सविक्रमं, शूरवत्, महावीर्य्येण, सपराक्रमं, निर्भयं.

MANFULNESS, *s.* पौरुषं, पुरुषता -त्वं, वीर्य्यं, सुवीर्य्यं, विक्रमः, साहसं.

MANGE, *s.* खर्ज्जूः *f.*, कच्छूः *f.*, कण्डूः *f.*, पाम *n.* (न्), सिध्म *n.* (न्), त्वक्पुष्पं, त्वग्रोगः, दुश्चर्म्मत्वं, चर्म्मदुष्टता.

MANGER, *s.* गवादनी, अश्वादनी, गवादनपात्रं, तृणपात्रं, भोजनपात्रं.

MANGINESS, *s.* कच्छुरता -त्वं, सिध्मलत्वं, सिध्मवत्त्वं, दुष्टचर्म्मत्वं.

To MANGLE, *v. a.* (Lacerate) व्यवच्छिद् (c. 7. -छिनत्ति -छेत्तुं), व्रश्च् (c. 6. वृश्चति, व्रश्चितुं), प्रव्रश्च्, विदृ (c. 10. -दारयति -यितुं), बहुलवशः खण्ड् (c. 10. खण्डयति -यितुं) or छिद्, बहुखण्डशः कृ, खण्डं खण्डं कृ, बहुखण्डीकृ, विनिकृत् (c. 6. -कृन्तति -कर्त्तितुं), छिन्नभिन्नीकृ, क्षतविक्षतीकृ.—(Smooth linen) वस्त्यमाणयन्त्रेण वस्त्रं मृज् (c. 2. मार्ष्टि -ष्टुं) or प्रमृज् or स्निग्धीकृ or श्लक्ष्णीकृ or श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं).

MANGLE, *s.* (For clothes) वस्त्रमार्जनार्थं चक्रयन्त्रं, वस्त्रमार्जनचक्रं.

MANGLED, *p. p.* (Lacerated) क्षतविक्षतः -ता -तं, छिन्नभिन्नः -न्ना -न्नं, व्यवच्छिन्नः -न्ना -न्नं, विशसितः -ता -तं, विनिकृतः -त्ता -त्तं.—(As linen) मृष्टः -ष्टा -ष्टं, मार्ज्जितः -ता -तं.

MANGO, *s.* (Tree) आम्रः, चूतः -तकः, रसालः, सहारः, माकन्दः, मधुदूतः, वसन्तदूतः, कामवल्लभः, मदिरासखः, कामशरः, कामाङ्गः, गन्धबन्धुः *m.*, शरेष्टः, नास्तितदः, पिकबन्धुः *m.*, पिकवल्लभः, कोकिलावासः, पलालदोहदः, कोषी *m.* (न्); 'its fruit,' आम्रफलं, चूतफलं, फलश्रेष्ठः; 'a fragrant sort of mango tree,' सहकारः, मकरन्दः; 'juice of the mango,' आम्रसः; 'inspissated juice,' आम्रावष्टिः; 'piece of dried mango,' आम्रपेशी; 'tuft of mango,' आम्रपल्लवः; 'mango-grove,' आम्रवनं, मकरन्दवनं; 'made of mango,' आम्रमयः -यी -यं.

MANGO-FISH, *s.* तपस्वी *m.* (न्), तपःकरः, तपस्यामत्स्यः.

MANGY, *a.* कच्छुरः -रा -रं, सिध्मलः -ला -लं, सिध्मवान् -वती -वत् (त्), पामनः -ना -नं, दुष्टचर्म्मा -र्म्मी -र्म्म (न्), त्वग्रोगी -गिणी -गि (न्).

MAN-HATER, *s.* पुरुषद्वेषी *m.* -षिणी *f.*. मनुष्यद्वेषी &c., मनुष्यद्वेष्टा *m.* (ष्टृ), मनुष्यवैरी *m.* (न्), मनुष्यशत्रुः *m.*, मनुष्यद्रोही *m.*

MANHOOD, *s.* पौरुषं, पुरुषता -त्वं, पौरुषता, मनुष्यत्वं, मानुष्यं, पुरुषभावः, पुरुषदशा, मानुषत्वं -ता, मानव्यं, पुरुषधर्म्मः —(Virility) पुंस्त्वं, पुंस्ता, पुम्भावः, पुरुषत्वं, पौरुषत्वं, पौरुषं, ओजस् *n.*, तेजस् *n.*, ऊर्जः.—(Not boyhood) यौवनं, तारुण्यं, प्रौढता, प्रौढिः *f.*, व्यवहारावस्था.—(Courage) पौरुषं, वीर्य्यं, शूरता.

MANIA, *s.* उन्मादः, उन्मत्तता, मदः, मत्तता, बुद्धिभ्रमः, चित्तविप्लवः.

MANIAC, *a.* उन्मत्तः -त्ता -त्तं, उन्मादवान् -वती -वत् (त्). *See* MAD.

MANIAC, *s.* उन्मत्तजनः, मत्तजनः, प्रमदजनः, भ्रान्तबुद्धिः *m.*, नष्टबुद्धिः.

MANIFEST, *a.* स्पष्टः -ष्टा -ष्टं, सुस्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, अभिव्यक्तः -क्ता -क्तं, सुव्यक्तः -क्ता -क्तं, प्रव्यक्तः &c., प्रत्यक्षः -क्षा -क्षं, स्फुटः -टा -टं, प्रस्फुटः -टा -टं, प्रकाशः -शा -शं, सुप्रकाशः -शा -शं, प्रकाशितः -ता -तं, साविष्कारः -रा -रं, प्रकटः -टी -टं, प्रकटीभूतः -ता -तं, प्रकटितः -ता -तं, आविर्भूतः -ता -तं, प्रादुर्भूतः -ता -तं, प्रत्यक्षभूतः -ता -तं, प्रसिद्धः -द्धा -द्धं, उद्भूतः -ता -तं; 'becoming manifest,' पुरःस्फुरन् -रन्ती -रत् (त्); 'to become manifest,' प्रादुर्भू, आविर्भू, प्रादुरस्, स्पष्टीभू, प्रत्यक्षीभू, व्यक्तीभू, प्रकाश् (c. 1. -काशते -शितुं), प्रकाशीभू; 'to make manifest, made manifest.' *See To* MANIFEST, MANIFESTED.

To MANIFEST, *v. a.* (Show plainly) व्यक्तीकृ, आविष्कृ, प्रादुष्कृ, प्रत्यक्षीकृ, स्पष्टीकृ, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, व्यञ्ज् (c. 7. -अनक्ति -अंक्तुं, c. 10. -अञ्जयति -यितुं), स्फुटीकृ.—(Exhibit) सूच् (c. 10. सूचयति -यितुं), दृश् (c. 10. दर्शयति -यितुं).

MANIFESTATION, *s.* (Act) आविष्करणं, आविष्कारः, प्रादुष्करणं, व्यक्तीकरणं, प्रत्यक्षीकरणं, स्पष्टीकरणं, प्रकटीकरणं, प्रकाशनं, प्रकाशकरणं, व्यञ्जनं, विकाशनं, स्पष्टकरणं.—(State) व्यक्तिः *f.*, अभिव्यक्तिः *f.*, व्यक्तता -त्वं, प्रकाशः -शता, प्रादुर्भावः, आविर्भावः, आविर्भवनं, प्रत्यक्षता, स्पष्टता, प्राकट्यं, प्रकटत्वं, स्फुटता, आविर्भूतता, प्रादुर्भूतता, उद्भूतता, उद्भवः, प्रसिद्धिः *f.*, अवभासः.

MANIFESTED, *p. p.* (Made apparent, become evident) प्रादुष्कृतः -ता -तं, आविष्कृतः -ता -तं, व्यक्तीकृतः -ता -तं, प्रत्यक्षीकृतः -ता -तं, स्पष्टीकृतः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रत्यक्षभूतः -ता -तं, आविर्भूतः -ता -तं, प्रादुर्भूतः -ता -तं, प्रकाशितः -ता -तं, व्यञ्जितः -ता -तं, विकाशितः -ता -तं, स्फुटितः -ता -तं, प्रस्फुटितः -ता -तं, अभिव्यज्यमानः -ना -नं.—(Exhibited) सूचितः -ता -तं.

MANIFESTER, *s.* प्रकाशकः, विकाशकः, प्रत्यक्षकर्त्ता *m.* (र्त्तृ), अभिव्यञ्जकः.

MANIFESTLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, प्रकाशं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, प्रकटं, प्राकट्येन.

MANIFESTNESS, *s.* व्यक्तता, प्रत्यक्षता, प्रादुर्भावः, आविर्भावः, स्पष्टता, प्रकाशता, प्राकट्यं, स्फुटता, आविर्भूतता.

MANIFESTO, *s.* ज्ञापनपत्रं, ख्यापनपत्रं, घोषणापत्रं, प्रकाशनपत्रं, प्रसिद्धिपत्रं.

MANIFOLD, *a.* बहुविधः -धा -धं, बहुगुणः -णा -णं, अनेकविधः -धा -धं, बहुप्रकारः -रा -रं, नानाविधः -धा -धं, विविधः -धा -धं, बहुरूपः -पा -पं, नानारूपः -पी -पं, अनेकरूपः -पा -पं, बहुलः -ला -लं, अनेकः -का -कं.

MANIFOLDLY, *adv.* बहुधा, अनेकधा, बहुविधेन, नानाविधेन, बाहुल्येन.

MANIFOLDNESS, *s.* बहुरूपत्वं, बहुलता, बाहुल्यं, अनेकता, अनैक्यं.

MANIKIN, *s.* माणवकः, माणवः, मानवकः, मनुष्यकः, क्षुद्रपुरुषः.

MANIPLE, *s.* (Handful) मुष्टिः *m.f.*, हस्तपूरणं.—(Small band) क्षुद्रगुल्मः.

To MANIPULATE, *v. a.* हस्ताभ्यां कृ, हस्तव्यापारपूर्व्वं कृ, हस्तकर्म्मद्वारा कृ.—(Move the hands) हस्तादि सञ्चल् (c. 10. -चालयति -यितुं), हस्तसञ्चालनं कृ.

MANIPULATION, *s.* हस्तकर्म्म *n.* (न्), हस्तव्यापारः.—(Movement of the hands, &c.) हस्तादिसञ्चालनं, अङ्गसञ्चालनं, हस्तादिविक्षेपः.

MANKIND, *s.* मनुष्यजातिः *f.*, पुरुषजातिः *f.*, नरजातिः *f.*, मानवजातिः *f.*, मनुष्याः *m. pl.*, मानुषाः *m. pl.*, मानवाः *m. pl.*, पुरुषाः *m. pl.*, नराः *m. pl.*, मर्त्याः *m. pl.*, जनाः *m. pl.*, मनुजाः *m. pl.*, जनपदाः *m. pl.*, मनुष्यगणः, लोकः, जीवलोकः -कं, जगती, मनुभूः *m.*

MANLINESS, *s.* पौरुषं, पुरुषता -त्वं, पौरुषता, वीर्य्यं, सुवीर्य्यं, वीरता, शूरता, शौर्य्यं, विक्रमः, पराक्रमः, साहसं, पुंस्त्वं, मनुष्यत्वं.

MANLY, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषयोग्यः -ग्या -ग्यं, नारः -री -रं, नरयोग्यः &c., वीरः -रा -रं, शूरः -रा -रं, प्रवीरः -रा -रं, वीरयोग्यः &c., महावीर्य्यः -र्य्या -र्य्यं, पुरुष or नर in comp.; 'manly act,' पुरुषकारः; 'manly office,' पुरुषाधिकारः; 'manly duty,' नरधर्म्मः.

MANNA, *s.* (Of the bamboo) वंशरोचना, वंशलोचना, कर्म्मरी. The Hebrew word may be rendered by मान्ना.

MANNER, *s.* (Form, fashion, way) प्रकारः, रीतिः *f.*, विधः, विधिः *m.*, रूपं, विधानं, कृतिः *f.*, आकारः, आकृतिः *f.*; 'in this manner,' अनेन प्रकारेण, अनया रीत्या, अनयर्त्या; 'in such a manner,' एवंविधं -धेन, तथाविधं -धेन, एवंरूपेण, एवम्प्रकारेण, इत्यादिविधानेन; 'in the manner before mentioned,' पूर्व्वोक्तप्रकारेण, पूर्व्वोक्तरीत्या.—(Kind) प्रकारः, विधः, भेदः, प्रभेदः, विशेषः; 'all manner of food,' सर्व्वप्रकारम् अन्नं.—(Method, mode of doing) रीतिः *f.*, मार्गः, क्रमः, पर्य्यायः, पद्धतिः *f.*, परिपाटी, क्रिया, वृत्तान्तः, कृप्तिः *f.*, चेष्टा.—(Custom, habitual practice) आचारः, आचरणं, व्यवहारः, व्यवहृतिः *f.*, प्रचारः, समाचारः, चर्य्या, रीतिः *f.*, नियमः, नित्यकृत्यं, अभ्यासः, धारा, अनुसारः, स्थितिः *f.*, चरितं, सम्प्रदायः, व्यापारः, शीलः, आवृत्तिः *f.*, मार्गः, पथः; 'manners and customs of a country,' देशाचारः, देशव्यवहारः, देशरीतिः *f.*, देशसम्प्रदायः; 'good manners,' सदाचारः, शिष्टाचारः, शिष्टसम्प्रदायः, मर्य्यादा, सुनीतिः *f.*, विनयः, सुशीलता; 'bad manners,' दुराचारः, दुर्नीतिः *f.*, अनीतिः *f.*, अविनयः, कुरीतिः *f.*, अमर्य्यादा, कुचर्य्या, दुःशीलता; 'violation of good manners,' मर्य्यादातिक्रमः, विनयभङ्गः, सदाचारलंघनं.—(Mien, air) आकारः, वदनाकारः, रूपं, गतिः *f.*, वदनं.—(Peculiar way) विशेषरीतिः *f.*—(Style) वृत्तिः *f.*—(In like manner) तथैव, तथा, एवं, एवमेव, तथाहि, तद्वत्.

MANNERED, *a.* (Having good manners) सुशीलः -ला -लं, विनीतः -ता -तं, शिष्टाचारी -रिणी -रि (न्); 'ill-mannered,' दुःशीलः -ला -लं, वामशीलः -ला -लं, कुशीलः -ला -लं, दुर्मर्य्यादः -दा -दं, अविनयः -या -यं, प्रणष्टविनयः &c., अशिष्टः -ष्टा -ष्टं.

MANNERISM, *s.* एकरीतिसेवनं, एकरसासक्तिः *f.*, अनन्यरससेवनं, एकरसत्वं.

MANNERLINESS, *s.* शिष्टता, सभ्यता, सुशीलता, विनयः, शिष्टाचारत्वं, सौजन्यं.

MANNERLY, *a.* शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, विनीतः -ता -तं, विनयवान् -वती -वत् (त्), सुशीलः -ला -लं, शिष्टाचारी -रिणी -रि (न्), सदाचारी &c., सुव्यवहारी &c., सुजनः -ना -नं.

MANNERLY, *adv.* सभ्यवत्, सुशीलवत्, सविनयं, शिष्टाचारानुसारेण, सौजन्यात्.

MANNERS, *s. pl.* सदाचारः, शिष्टाचारः, मर्य्यादा, विनयः, सुनीतिः *f.*, शिष्टता, सभ्यता, सभ्याचारः, सुशीलता. *See* MANNER.

MANNISH, *a.* पुरुषस्वभावः -वा -वं, पुरुषवृत्तिः -त्तिः -त्ति, पुरुषधर्म्मकः -का -कं, पुम्प्रकृतिः -तिः -ति, पुरुषाकारः -रा -रं, पुरुषोपमः -मा -मं, पुरुषयोग्यः -ग्या -ग्यं.

MANŒUVRE, *s.* *See* MANEUVER.

MAN-OF-WAR, *s.* वृहत्परिमाणा युद्धनौका or युद्धनौः *f.*

MANOR, *s.* ग्रामेश्वराधीना भूमिः, ग्रामेश्वरभूमिः *f.*; 'Lord of the manor,' ग्रामेश्वरः, ग्रामणीः *m.*, देशमुखः.

MANORIAL, *a.* ग्रामेश्वरभूमिसम्बन्धी -न्धिनी -न्धि (न्).

MANSE, *s.* धर्म्माध्यापकगृहं, धर्म्मोपदेशकवेश्म *n.* (न्).

MANSION, *s.* हर्म्यं, भवनं, मन्दिरं, धाम *n.* (न्), सदनं, सौधं, शाला, सद्म *n.* (न्), गृहं, गेहं, वेश्म *n.* (न्), निवेशनं, निकेतनं, आयतनं, वासस्थानं, निवासस्थानं, आलयः, निलयः, निवसतिः *f.*—(Lunar mansion) नक्षत्रं, विधुप्रिया, चन्द्रप्रिया, दक्षजा, चन्द्रदाराः *pl.* The last of these words is applied to the twenty-seven lunar mansions collectively, as in mythology they are supposed to be so many nymphs, daughters of Daksha, and wedded to the moon. The following are the names of the twenty-seven *nakshatras* in order: 1. अश्विनी, 2. भरणी, 3. कृत्तिका, 4. रोहिणी, 5. मृगशिरस् *n.*, 6. आर्द्रा, 7. पुनर्वसुः *m.*, 8. पुष्यः -ष्या, 9. आश्लेषा, 10. मघा, 11. पूर्व्वाफाल्गुनी, 12. उत्तरफाल्गुनी, 13. हस्तः, 14. चित्रा, 15. स्वातिः -ती *f.*, 16. विशाखा, 17. अनुराधा, 18. ज्येष्ठा, 19. मूलः -लं, 20. पूर्व्वाषाढा, 21. उत्तराषाढा, 22. श्रवणः -णा, 23. धनिष्ठा, 24. शतभिषा, 25. पूर्व्वाभाद्रपदा, 26. उत्तरभाद्रपदा, 27. रेवती. Some add a twenty-eighth, अभिजित्. Astrologers divide the twenty-seven lunar mansions into three classes of nine each, called देवगणः, राक्षसगणः, मनुष्यगणः.

MANSLAUGHTER, *s.* (Killing of a man) मनुष्यमारणं, मनुष्यहत्या, मनुष्यघातः, मनुष्यवधः.—(In law) असमीक्ष्यघातः, असमीक्ष्यवधः, असमीक्ष्यहत्या, अहेतुकृतहत्या.

MANSLAYER, *s.* मनुष्यमारकः, मनुष्यघातकः, नृहन्ता *m.* (न्तृ), मनुष्यहन्ता *m.*, नृघातकः, मनुष्यवधकः.

MAN-STEALER, *s.* मनुष्यापहारकः, मनुष्यचोरः, मनुष्यस्तेयकृत् *m.*

MAN-STEALING, *s.* मनुष्यापहारः, मनुष्यहरणं, मनुष्यापहरणं, मनुष्यस्तेयं, मनुष्यचौर्य्यं.

MANSUETE, *a.* गृह्यः -ह्या -ह्यं, वश्यः -श्या -श्यं, दमितः -ता -तं, दान्तः -न्ता -न्तं.

MANSUETUDE, *s.* गृह्यता, वश्यता, विनेयता, विधेयता, दान्तता, शान्तता.

MANTELET, *s.* स्त्रीलोकभृतः क्षुद्रप्रावारः.—(In war) पारश्वधावरणं, पारश्वधत्राणं, सैन्यावरणं.

MANTLE, *s.* प्रावारः -रकः, प्रावृतं -ता -तः, उत्तरीयं, आवारः, आवरणं, पिधानं, संव्यानं, नीशारः, जवनिका, प्रच्छदपटः, गात्रीयवस्त्रं, निवीतः -ता -तं, निवृतः -ता -तं.

To MANTLE, *v. a.* (Cloak) प्रावृ (c. 5. -वृणोति -वरितुं -रीतुं), आवृ, छद् (c. 10. छादयति -यितुं), आछद्, प्रच्छद्.

To MANTLE, *v. n.* (Expand, spread) विस्तृ in pass. (-स्तीर्य्यते), प्रवृध् (c. 1. -वर्धते -र्धितुं), प्रसृप् (c. 1. -सर्पति सर्प्तुं), विसृप्.—(Rise, rush

upwards) उद्गम् (c. 1. -गच्छति -गन्तुं), उत्सृप्, उद्गतः -ता -तं भू.—(Gather froth) फेन (nom. फेनायते), उत्सेचनं कृ, उत्सेकं कृ, फेनावृतः -ता -तं भू.

MANTUA, *s.* स्त्रीवस्त्रं, स्त्रीकटीवस्त्रं, स्त्रीवसनं, स्त्रीपरिधानं.

MANTUA-MAKER, *s.* स्त्रीवस्त्रकर्त्री *f.* (त्रि), स्त्रीवसनकृत्, स्त्रीपरिधानकृत्.

MANUAL, *a.* (Pertaining to the hand) हस्त्यः -स्त्या -स्त्यं, हस्तसम्बन्धी -न्धिनी -न्धि (न्), हस्त in comp.—(Performed by the hand) हस्तकृतः -ता -तं, हस्तसाध्यः -ध्या -ध्यं, हस्तसाधनीयः -या -यं; 'manual operation,' हस्तकर्म्म *n.* (न्), हस्तक्रिया, हस्तव्यापारः; 'manual labor,' व्रातं, शिल्पकर्म्म; 'manual art,' शिल्पं; 'knowledge of it,' शिल्पविद्या; 'relating to it,' शिल्पिकः -की -कं; 'manual skill or dexterity,' हस्तकौशल्यं, हस्तकौशलं, हस्तलाघवं, हस्तचापल्यं; 'sign manual,' हस्ताक्षरं, स्वहस्ताक्षरं, स्वाक्षरं.

MANUAL, *s.* (Small book for carrying in the hand) पद्धतिः -तीः *f.*, सारग्रन्थः, सारसङ्ग्रहः, सारसंक्षेपः, संक्षिप्तग्रन्थः, संहिता; 'of laws,' धर्म्मसंहिता.

MANUFACTORY, *s.* शिल्पशाला -लं, शिल्पिशाला -लं, यन्त्रगृहं, आवेशनं, प्रावेशनं, अन्वासनं.

MANUFACTURAL, *a.* शिल्पिकः -की -कं, शिल्पकर्म्मसम्बन्धी -न्धिनी -न्धि (न्).

MANUFACTURE, *s.* (The act) निर्म्माणं, निर्म्मितिः *f.*, कल्पनं -ना, रचनं -ना, विरचना, घटनं, सन्निवेशः, पर्य्यायः, शिल्पकर्म्म *n.* (न्), शिल्पेन or शिल्पकर्म्मणा निर्म्माणं or करणं.—(The article) शिल्पिकद्रव्यं, शिल्पनिर्म्मितद्रव्यं, शिल्पिकवस्तु *n.*

To MANUFACTURE, *v. a.* शिल्पेन or शिल्पकर्म्मणा निर्मा (c. 2. -माति -तुं, c. 3. -मिमीते caus. मापयति -यितुं) or विनिर्मा or कॢप् (c. 10. कल्पयति -यितुं) or कृ (c. 8. करोति, कर्त्तुं, c. 10. कारयति -यितुं) or संस्कृ or रच् (c. 10. रचयति -यितुं) or विरच् or घट् (c. 1. घटते -टितुं).

MANUFACTURED, *p. p.* शिल्पनिर्म्मितः -ता -तं, शिल्पकृतः -ता -तं, शिल्पकल्पितः -ता -तं, निर्म्मितः -ता -तं, शिल्पिकः -की -कं, कार्म्मिकः -की -कं.

MANUFACTURER, *s.* शिल्पी *m.* (न्), शिल्पिकः, शिल्पकारः.

MANUMISSION, *s.* दास्यमुक्तिः *f.*, दास्यमोचनं, दास्यमोक्षः -क्षणं, दासमोक्षः &c.

To MANUMIT, *v. a.* दास्याद् विमुच् (c. 6. -मुञ्चति -मोक्तुं) or मुच् or मोक्ष् (c. 10. मोक्षयति -यितुं) or विमोक्ष्, विसृज् (c. 6. -सृजति -स्रष्टुं, c. 10. -सर्जयति -यितुं).

MANUMITTED, *p. p.* दास्यमुक्तः -क्ता -क्तं, दास्यमोक्षितः -ता -तं, मुक्तदास्यः -स्या -स्यं, दास्यविमोचितः -ता -तं, अभुजिष्यः -ष्या -ष्यं.

To MANURE, *v. a.* भूमिं पुरीषादिना लिप् (c. 6. लिम्पति, लेप्तुं), उर्व्वराकरणार्थं गोमयादिसम्भिन्नद्रव्यं भूमौ प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or क्षिप् or धा (c. 3. दधाति, धातुं), भूमिलेपनेन or पांशुप्रक्षेपेण उर्व्वरात्वं जन् (c. 10. जनयति -यितुं) or बहुशस्योत्पादकत्वं जन्, आलवालं स्था in caus. (स्थापयति -यितुं).

MANURE, *s.* भूमिलेपः -पनं, पांशुः *m.*, पांसुः *m.*, सारः, पुरीषादि *n.*, पुरीषादिसम्भिन्नद्रव्यं, गोमयादिसम्भिन्नद्रव्यं, शस्योत्पादकद्रव्यं.

MANUSCRIPT, *s.* हस्तलेखः -खनं, हस्तलिखितं, हस्तलेख्यं, लेख्यं, लिखितं, पुस्तकं -की, पुस्तं -स्ती.

MANUSCRIPT, *a.* हस्तलिखितः -ता -तं, लेख्यकृतः -ता -तं, लिखितः -ता -तं.

MANY, *a.* बहुः -हुः -ह्वी -हु, बहुलः -ला -लं, अनेकः -का -कं, प्रचुरः -रा -रं, भूरिः -रिः -रि, बहुसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, नैकः -का -कं, अनल्पः -ल्पा -ल्पं, पुष्कलः -ला -लं, विपुलः -ला -लं, प्राज्यः -ज्या -ज्यं, प्रभूतः -ता -तं, पुरुः -रूः -रु, पुरुहः -हा -हं, पुरुहुः -हुः -हु, अदभ्रः -भ्रा -भ्रं, बहुतिथः -था -थं, स्फिरः -रा -रं, नाना in comp.; 'as many as,' यावान् -वती -वत् (त्) or यावत् indec., यावत्संख्यकः -का -कं, यत्संख्यकः -का -कं, यतयः यतीनि or यति indec.; 'so many,' तावान् -वती -वत् (त्) or तावत् indec., तावत्संख्यकः -का -कं, तत्संख्यकः -का -कं, ततयः *m. f.* ततीनि *n.* or तति indec.; 'how many?' कियान् -यती -यत् (त्) or कियत् indec., कतिः -तिः -ति or plur. कतयः, कतीनि; 'of how many sorts?' कतिविधः -धा -धं; 'in many places,' बहुत्र, अनेकत्र; 'in many ways,' बहुधा, अनेकधा; 'in how many ways?' कतिधा; 'many times,' बहुशस्, अनेकशस्, बहुवारं, बहुकृत्वस्, मुहुर् मुहुः, भूयस्, पुनः पुनर्.

MANY, *s.* (A multitude) समूहः, समवायः, समुदायः, समाजः, संघातः, ओघः, निवहः, वृन्दं; 'the interests of the many,' समूहकार्य्यं.

MANY-COLORED, *a.* नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, बहुवर्णः -र्णा -र्णं, चित्रविचित्रः -त्रा -त्रं, बहुरङ्गी -ङ्गिणी -ङ्गि (न्).

MANY-CORNERED, *a.* बहुकोणः -णा -णं, अनेककोणविशिष्टः -ष्टा -ष्टं.

MANY-FIBERED, *a.* बहुतन्वी -न्विणी -न्वि (न्), बहुसूत्री -त्रिणी &c.

MANY-FLOWERED, *a.* बहुपुष्पः -ष्पा -ष्पं, प्रचुरकुसुमः -मा -मं.

MANY-HEADED, *a.* बहुशिराः -राः -रः (स्), बहुशिरस्कः -स्का -स्कं, बहुमस्तकः -का -कं, अनेकमस्तकः -का -कं, बहुमूर्द्धा -र्द्धी -र्द्धं (न्).

MANY-LEAVED, *a.* बहुपर्णः -र्णा -र्णं, बहुपत्रः -त्रा -त्रं, प्रचुरपर्णः &c.

MANY-LEGGED, *a.* बहुपादः -दा -दं, बहुपाद् *m. f. n.*, बहुजङ्घः -ङ्घा -ङ्घं.

MANY-STREAMED, *a.* बहुप्रवाहः -हा -हं, बहुस्रोताः -ताः -तः (स्).

MANY-STRINGED, *a.* बहुसूत्री -त्रिणी -त्रि (न्), बहुतन्त्रिकः -का -कं.

MANY-TONGUED, *a.* बहुजिह्वः -ह्वा -ह्वं, अनेकजिह्वः -ह्वा -ह्वं.

MAP, *s.* देशालेख्यपत्रं, भूपृष्ठालेख्यपत्रं, देशालेख्यं, देशसमुद्राद्यालेख्यं, भूगोलस्य देशसमुद्रनगराद्यालेख्यं, देशचित्रं, भूपृष्ठभङ्गिप्रदर्शनपत्रं, भूपृष्ठदेशालेख्यं.

To MAP, *v. a.* भूपृष्ठदेशान् लिख् (c. 6. लिखति, लेखितुं) or आलिख् or चित्र् (c. 10. चित्रयति -यितुं), देशालेख्यं कृ, भूपृष्ठालेख्यं कृ.

To MAR, *v. a.* दुष् (c. 10. दूषयति -यितुं), नश् (c. 10. नाशयति -यितुं), हन् (c. 2. हन्ति -न्तुं), व्याहन्, विहन्, क्षतिं कृ.

MARASMUS, *s.* क्षयः, क्षयरोगः, क्षयथुः *m.*, यक्ष्मा *m.* (न्), जक्ष्मा *m.*, शोषः.

To MARAUD, *v. n.* युद्धसमये गोधान्यादिग्रहणार्थम् इतस्ततो भ्रम् (c. 4. भाम्यति, भमितुं) or परिभ्रम्, लोभ्रार्थं परिभ्रम् or उपद्रवं कृ or विप्लवं कृ or उपद्रु (c. 1. -द्रवति -द्रोतुं).

MARAUDER, *s.* लोभ्रार्थं परिभ्रमणकारी *m.* (न्), उपद्रवी *m.* (न्), विप्लवकारी *m.*, उपद्रवकारी *m.*, उपप्लवकृत्, लुण्टाकः.

MARAUDING, *s.* युद्धकाले गोधान्याद्यपहरणार्थम् इतस्ततः परिभ्रमणं, विप्लवः, उपप्लवः, उपद्रवः, विप्लवकरणं.

MARBLE, *s.* मार्ब्बलाख्यो नानावर्णः प्रस्तरः, रुचिरप्रस्तरः, चारुप्रस्तरः, पाषाणः, ग्रावा *m.* (न्), शिला, उपलः.

MARBLE, *a.* (Made of marble) पूर्व्वोक्तप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.—(Variegated) प्रस्तररेखानुकारेण चित्रितः -ता -तं.

MARBLE-HEARTED, *a.* पाषाणहृदयः -या -यं, वज्रहृदयः &c., वज्रचित्तः -त्ता -त्तं.

MARCASITE, *s.* आवर्त्तः, सुवर्णमाक्षिकं, सुवर्णमुखी.

MARCESCENT, *a.* विशीर्य्यमाणः -णा -णं, क्षीयमाणः -णा -णं, म्लायमानः -ना -नं.

MARCH, *s.* (The month) फाल्गुनः -निकः, चैत्रः -त्रिकः, फाल्गुनोत्तरार्द्धं, चैत्रपूर्व्वार्द्धं, पूर्व्वचैत्रः, उत्तरफाल्गुनः, तपस्यः, मधुः *m.*, तृतीयमासः.—(Movement of soldiers, &c.) गमनं, यानं, यात्रा, सैनिकगमनं, सैनिकयात्रा, गमः, गतिः *f.*, सैनिकगतिः *f.*, व्रज्या, सरणं, संसरणं.—(Marching onwards, progression) प्रयाणं, प्रस्थानं, प्रस्थितिः *f.*, प्रगमनं,

अग्रगमनं.—(Marching against) अभिषेणनं, अभिनियोनं; 'setting out on a march,' यात्राकरणं; 'toilsome march,' दुर्गसञ्चारः, दुर्गसञ्चारः, सञ्चारः.

To MARCH, *v. n.* यात्रां कृ, गमनं कृ, सैनिकवद् गमनं कृ or प्रगम् (c. 1. -गच्छति -गन्तुं) or प्रया (c. 2. -याति -तुं) or प्रस्था (c. 1. -तिष्ठति -ते -स्थातुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or चल् (c. 1. चलति -लितुं) or प्रचल्; 'to march against,' अभिनियी (c. 2. -याति -तुं), अभिप्रया, प्रतिव्रज्, अभिप्रस्था, प्रत्याभिप्रस्था, अभिगम्, प्रतिगम्; 'one who marches slow,' मन्दगामी *m.* (न्), मन्थरः; 'fast,' अतिजवः, जंघालः, जंघिलः.

To MARCH, *v. a.* अभिषेण (nom. अभिषेणयति -यितुं), सेनां प्रस्था in caus. (-स्थापयति -यितुं) or चल् (c. 10. चलयति -यितुं) or प्रतिगम् (c. 10. -गमयति -यितुं), यात्रां कृ (c. 10. कारयति -यितुं).

MARCHES, *s. pl.* (Confines) देशसीमा, देशसमन्ताः *m. pl.*, देशप्रान्ताः *m. pl.*

MARE, *s.* अश्वा, अश्विनी, वाजिनी, तुरगी, तुरङ्गी, तुरङ्गिणी, वडवा, वडवा, घोटिका, अश्वतरी, वामी, प्रसूः *f.*, प्रसूका.

MARGARITE, *s.* (Pearl) मुक्ता, मुक्तिका, मौक्तिकं, शुक्तिवीजं, शुक्तिजं.

MARGIN, *s.* प्रान्तः, अन्तः -न्तं, सीमा, उपान्तं, पर्य्यन्तं, कच्छः, धारः -रा, तटं, समन्तः, उत्सङ्गः, कोटिः *f.*, परिसरः; 'of a river,' तीरं, कूलं, तटं, कच्छः, कच्छान्तः; 'on the margin,' प्रान्ततस्.—(Of a book) समासः, पुस्तकप्रान्तः.

MARGINAL, *a.* प्रान्तस्थः -स्था -स्थं, समासस्थः &c., समासलिखितः -ता -तं.

MARGINALLY, *adv.* (Along the margin) प्रान्ततस्, प्रान्ते, अनुप्रान्तं.

MARINE, *a.* सामुद्रः -द्री -द्रं, समुद्रीयः -या -यं, समुद्रियः -या -यं, सामुद्रिकः -की -कं, समुद्रसम्बन्धी -न्धिनी -न्धि (न्), समुद्रविषयः -या -यं, सैन्धवः -वी -वं, सिन्धुकः -का -कं, समुद्रजः -जा -जं, समुद्रोद्भवः -वा -वं, जलधिसम्भवः -वा -वं, सागरसम्बन्धी &c.; 'marine engagement,' नौयुद्धं.

MARINE, *s.* (A soldier that serves on board a ship) नौयोद्धा *m.* (द्धृ), नौसैन्यः, नाविकसैन्यः, समुद्रीयसैनिकः.—(Navy) युद्धनौसमूहः.—(Naval affairs) नाविकविषयः, नाविककर्म्म *n.* (न्), नाविकप्रकरणं, जलयानविषयः, जलयानप्रकरणं.

MARINER, *s.* नाविकः, नाविकजनः, समुद्रयायी *m.* (न्), समुद्रगः, समुद्रगामी *m.*, पोतवाहः, नियामः, जलपथोपजीवी *m.* (न्), उदधिक्राः *m.* (म्), समुद्रीयजनः.

MARITAL, *a.* भर्त्रृसम्बन्धी -न्धिनी -न्धि (न्), पतिसम्बन्धी &c., भर्त्रृविषयः -या -यं, पतिविषयः &c., स्वामिविषयः &c.

MARITIME, *a.* (Relating to the sea) सामुद्रः -द्री -द्रं, समुद्रियः -या -यं, समुद्र in comp. *See* MARINE, *a.* (Naval) नाविकः -की -कं, नाव्यः -व्या -व्यं, नौ in comp.—(Bordering on the sea) समुद्रतटस्थः -स्था -स्थं, समुद्रतीरस्थः -स्था -स्थं.

MARJORAM, *s.* तुलसी, मरुवकः, समीरणः, प्रस्थपुष्पः, फणिज्झकः, पर्णासः, जम्भीरः, कठिञ्जरः, कुठेरकः, अर्जकः.

MARK, *s.* (Sign, token by which a thing is known) चिह्नं, लक्षणं, लाञ्छनं, लिङ्गं, अङ्कः -ङ्कं, अभिज्ञानं, व्यञ्जनं, व्यञ्जकः -कं, लक्ष्यं, लक्ष्म *n.* (न्), लक्ष्मणं, ललामं.—(Spot) कलङ्कः, अङ्कः, चिह्नं, विन्दुः *m.*, विप्रुट् (ष्), विप्रुट्, गण्डः.—(Mark on the body) सामुद्रं, सामुद्रचिह्नं, सामुद्रिकलक्षणं, तिलः -लकः, तिलकालकः; 'an interpreter of marks on the body,' सामुद्रिकः; 'an auspicious mark,' सुलक्षणं, सुचिह्नं; 'having auspicious marks,' सुलक्षणी -णिनी -णि (न्), सुलक्षणिकः -का -कं; 'having thirty-two auspicious marks,' द्वात्रिंशल्लक्षणोपेतः -ता -तं; 'an inauspicious mark,' कुलक्षणं, अपलक्षणं, दुर्लक्षणं, दुश्चिह्नं; 'having inauspicious marks,' कुलक्षणी -णिनी &c., कुलक्षणः -णा -णं.—(Butt for shooting at) लक्ष्यं, बाणलक्ष्यं, लक्ष्मं, वेध्यं, व्यध्यः, शरव्यं, दृष्टिगुणः, प्रतिकायः; 'hitting the mark,' लक्ष्यभेदः; 'to hit the mark,' लक्ष्यं भिद् (c. 7. भिनत्ति, भेत्तुं) or व्यध् (c. 4. विध्यति, व्यद्धुं), लक्ष्यवेधनं कृ.—(Line) रेखा, लेखा.

To MARK, *v. a.* (Stamp, impress with a mark) चिह्न (nom. चिह्नयति -यितुं), अङ्क (c. 10. अङ्कयति -यितुं), लक्ष् (c. 10. लक्षयति -यितुं), मुद्र् (nom. मुद्रयति -यितुं), लाञ्छ् (c. 1. लाञ्छति -ञ्छितुं), अङ्कं कृ, चिह्नं कृ, लक्षणं कृ, लक्ष्मीकृ.—(Stain) कलङ्क (nom. कलङ्कयति -यितुं), मलिन (nom. मलिनयति -यितुं), कलङ्कीकृ, लाञ्छ्.—(Draw a line) लिख् (c. 6. लिखति, लेखितुं), आलिख्, रेखां कृ.—(Notice, observe) लक्ष्, आलक्ष्, उपलक्ष्, अवेक्ष् (c. 1. -ईक्षते -क्षितुं), निरीक्ष्, वीक्ष्, समीक्ष्, प्रेक्ष्.—(Mark out, define) परिच्छिद् (c. 7. -छिनत्ति -छेत्तुं), परिच्छेदं कृ, निर्दिश् (c. 6. -दिशति -देष्टुं), लक्ष्, लक्ष्मीकृ.—(Mark out, trace the outline) वाह्यरेखां लिख् or अङ्क् or कृ, बहिर्लेखां कृ.

To MARK, *v. n.* (Note, take notice) आलोच् (c. 10. -लोचयति यितुं), आलक्ष् (c. 10. -लक्षयति -यितुं), निरूप् (c. 10. -रूपयति -यितुं), समीक्ष्, (c. 1. -ईक्षते -क्षितुं), समीक्षां कृ, बुध् (c. 4. बुध्यते, बोद्धुं), विमृश् (c. 6. -मृशति -मर्ष्टुं), परामर्शं कृ, विवेचनं कृ.

MARKED, *p. p.* चिह्नितः -ता -तं, अङ्कितः -ता -तं, लक्षितः -ता -तं, उपलक्षितः -ता -तं, लाञ्छितः -ता -तं, कृतलक्षणः -णा -णं, कृताङ्कः -ङ्का -ङ्कं, कृतलाञ्छनः -ना -नं, मुद्रितः -ता -तं, मुद्राङ्कितः -ता -तं.—(Defined) परिच्छिन्नः -न्ना -न्नं, निर्दिष्टः -ष्टा -ष्टं, लक्षितः -ता -तं.

MARKER, *s.* चिह्नकर्त्ता *m.* (र्त्तृ), अङ्कनकृत् *m.*, अङ्कयिता *m.* (तृ), लक्षयिता *m.*

MARKET, *s.* पण्यवीथी -थिका, पण्यशाला, विक्रयशाला, विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, हट्टः, विपणिः *m.* -णी *f.*, निगमः, अवटङ्कः, क्रयारोहः, पुरतटी, निषद्या, निर्घटं, पणयन्थिः *m.*, पण्याजीवं -वकं; 'a free market,' क्रचङ्कनं.—(Sale) विक्रयः, विपणः.

To MARKET, *v. n.* क्रयविक्रयं कृ, पण् (c. 1. पणते -णितुं, पणायति -यितुं), पणायां कृ.

MARKET-DAY, *s.* क्रयविक्रयदिवसः, हट्टदिवसः, हट्टवारः.

MARKET-PLACE, *s.* चत्वरं, चतुष्पथं, क्रयविक्रयचत्वरं, पणायाचत्वरं, पणायां, पणायास्थानं, विपणिः -णी *m. f.* *See* MARKET.

MARKET-RATE, MARKET-PRICE, *s.* आपणिकः, पण्यभावः, पण्यमूल्यं, अर्घबलाबलं.

MARKET-TOWN, *s.* ग्राममुखः, मुख्यग्रामः, नगरमुखः, मुख्यनगरं -री, कर्व्वटः -टं.

MARKETABLE, *a.* विक्रेयः -या -यं, विक्रयणीयः -या -यं, पण्यः -ण्या -ण्यं, पणितव्यः -व्या -व्यं, पण्याहः -ही -हं, क्रेयः -या -यं, क्रयविक्रययोग्यः -ग्या -ग्यं.

MARKING, *s.* अङ्कनं, मुद्राङ्कनं, चिह्नाङ्कनं, चिह्नकरणं, अङ्ककरणं, लिखनं.

MARKING-INK, *s.* दहनमसिः *f.*, दहनमसिका, दहनरसः, वस्त्राङ्कनमसिः.

MARKING-NUT, *s.* दहनं, निर्दहनं, भल्लिका, भल्लातः -तकी, भल्ली.

MARKSMAN, *s.* लक्ष्यवेधी *m.* (न्), लक्ष्यभेदी *m.*, लक्ष्मलक्षः, सुसन्धानी *m.* (न्), सुप्रयोगवाणः, सुप्रयोगविशिखः, शराभ्यासकुशलः, धनुर्विद्, आयुधविद्.

MARL, *s.* मालाख्यो मृत्तिकाविशेषः, चिक्कणमृत्तिका, पांशुः *m.*

To MARL, *v. a.* पूर्व्वोक्तमृत्तिकया लिप् (c. 6. लिम्पति, लेप्तुं).

MARMALADE, *s.* मिष्टफलं, मिष्टान्नं, शर्करादिसंसृष्टा नारङ्गत्वक् *f.* (च्).

MARMOREAN, *a.* चारुप्रस्तरमयः -यी -यं, पाषाणनिर्म्मितः -ता -तं.

MARMOSET, *s.* सूक्ष्मवानरः, सूक्ष्मकपिः, क्षुद्रप्लवङ्गः.

MAROON, *a.* (Dark red) घनरक्तः-क्ता-क्तं, घनारुणः-णा-णं, कपिशः-शा-शं.

MARPLOT, *s.* कार्य्यविघातकः, कार्य्यविनाशकः, कार्य्यबाधकः.

MARQUEE, *s.* पटमण्डपः, पटवासः, बृहत्पटवेश्म *n.* (न्), वस्त्रगृहं.

MARQUESS, *s.* उपाग्रणीः *m.*, उपनायकः, उपाधिपः, कुलीनपदमध्याद् द्वितीयपदस्थः, द्वितीयकुलीनपदभाक् *m.* (ज्).

MARQUISATE, *s.* पूर्व्वोक्तकुलीनजनस्य अधिकारः, उपाधिपत्यं.

MARRED, *p. p.* दूषितः -ता -तं, विहतः -ता -तं, व्याहतः -ता -तं, नाशितः -ता -तं, विनाशितः -ता -तं, क्षतः -ता -तं, विक्षतः -ता -तं.

MARRER, *s.* दूषकः, दूषयिता *m.* (तृ), नाशकः, विनाशकः, विघातकः.

MARRIAGE, *s.* विवाहः, उद्वाहः -हनं, उद्वहनं, परिणयः -यनं, पाणिग्रहः -हणं, पाणिग्राहः, पाणिपीडनं, हस्तेकरणं, दारपरिग्रहः, दारसङ्ग्रहः, दारक्रिया, दारकर्म्म *n.* (न्), दाराधिगमनं, उपयमः, उपयामः, लग्नकार्य्यं, मैथुनं, वाधुक्यं, निवेशः; 'marriage-rite,' विवाहविधिः *m.*, विवाहक्रिया, विवाहसंस्कारः; 'giving in marriage,' दारिकादानं, दारिकाप्रदानं; 'marriage-contract,' वाङ्निश्चयः; 'marriage-settlement,' शुल्कः-ल्कं; 'auspicious season for marriage,' लग्नतिथिः *f.*, लग्नमुहूर्त्तः -र्त्तं; 'marriage-string, or ring hung round the neck of the bride, who wears it till she becomes a widow, when it is broken,' मङ्गलसूत्रं, माङ्गल्यतन्तुः *m.*, सौभाग्यतन्तुः *m.*, कौतुकं; 'marriage gifts,' यौतकं, औद्वाहिकं, पारिणाय्यं, हरणं, सुदायः -यं; 'marriage festival,' विवाहोत्सवः, विवाहमहोत्सवः; 'ablution at marriage,' मङ्गलस्नानं; 'compliments at marriage,' जसूलः, जसूलमालिका; 'second marriage,' द्वितीयविवाहः, द्वितीयसम्बन्धः. The following are different forms of marriage, explained in Manu, chap. iii. verses 27 et seq.: आसुरविवाहः, आर्षविवाहः, गन्धर्व्वविवाहः, दैवविवाहः, पैशाचविवाहः, प्राजापत्यविवाहः, ब्राह्मविवाहः, राक्षसविवाहः, प्रीतिविवाहः. The स्वयंवरः is a form of marriage in which a girl chooses her own husband.

MARRIAGEABLE, *a.* विवाह्यः -ह्या -ह्यं, उद्वाह्यः &c., वोढव्यः -व्या -व्यं, विवाहयोग्यः -ग्या -ग्यं, विवाहोचितः -ता -तं, विवाहोपयुक्तः -क्ता -क्तं, विवाहकालप्राप्तः -प्ता -प्तं, विवाहवयस्कः -स्का -स्कं, परिणेयः -या -यं; 'as a girl,' दुष्टरजाः *f.* (स्), सञ्जातार्त्तवा, आगतार्त्तवा, ऋतुयुक्ता, ऋतुमती, मध्यमा, मध्या, पतीयन्ती.

MARRIED, *p. p.* विवाहितः -ता -तं, उद्वाहितः -ता -तं, ऊढः -ढा -ढं, उपोढः -ढा -ढं, समूढः -ढा -ढं, कृतविवाहः -हा -हं, ज्ञातविवाहः -हा -हं, कृतोद्वाहः -हा -हं, कृतदारपरिग्रहः -हा -हं, परिणीतः -ता -तं, कृतोपयमः -मा -मं, ज्ञतोपयमः -मा -मं, निर्विष्टः -ष्टा -ष्टं, प्रत्तः -त्ता -त्तं; 'a married man,' सभार्य्यः, सपत्नीकः, स्त्रीमान् *m.* (त्), कृतदारः, सदारः, कृतदारपरिग्रहः, कुटुम्बी *m.* (न्), सकुटुम्बः, भार्य्योढः; 'a married woman,' सभर्त्तृका, सपतिका, पतिवाली, सधवा, सुवासिनी; 'newly married woman,' नववधूः *f.*, नववरिका; 'twice-married woman,' पुनर्भूः *f.*, दिधिषूः *f.*, दिधीषूः *f.*, दिधिषुः *f.*; 'one who is married before his elder brother,' परिवेत्ता *m.* (तृ).

MARROW, *s.* मज्जा, वपा, वसा, मेदस् *n.*, मेदः, मज्जा *m.* (न्), मज्जनं, सारः, अस्थिसारः, देहसारः, वीजं, स्निग्धा, वपाकृत् *m.*, अस्थिकृत्, अस्थिजं, अस्थिजः, हड्डजं, शुक्रकरः, तेजस् *n.*, मधुरं, जीवनं, मणिच्छिद्रा. —(Pith, essence) सारः, गर्भः, सारता, श्रेष्ठांशः.

MARROW-BONE, *s.* मज्जापूर्णम् अस्थि, मेदोयुक्तम् अस्थि.

MARROWLESS, *a.* मज्जाहीनः -ना -नं, मेदोहीनः -ना -नं, वपाशून्यः -न्या -न्यं, गतसारः -रा -रं, असारः -रा -रं, निःसारः -रा -रं.

MARROWY, *a.* मज्जावान् -वती -वत् (त्), सारवान् &c., मेदस्वी -स्विनी -स्वि(न्).

To MARRY, *v. a.* (Unite a man and woman in wedlock) विवाहसंस्कारेण स्त्रीपुरुषौ संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं) or सम्बन्ध् (c. 9. -बध्नाति -बन्द्धुं) or विवाहसंयुक्तौ कृ, विवाहसंस्कारं कृ. —(Take for wife) विवह् (c. 1. -वहति -ते -वोढुं), उद्वह्, समुद्वह्, उदावह्, परिणी (c. 1. -णयति -णेतुं), उपयम् (c. 1. -यच्छते -ति -यमते -यन्तुं), पाणिं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कन्यां परिग्रह् or प्रतिग्रह् or सङ्ग्रह्, दारपरिग्रहं कृ, दारसङ्ग्रहं कृ, दाराधिगमनं कृ, कन्यापरिणयं कृ, भार्य्यां विद् (c. 6. विन्दते -ति, वेत्तुं) or अनुविद्; 'he should marry a wife,' कन्यां विवहेत् or उपयच्छेत, कन्यायाः पाणिं गृह्णातु. —(Take for husband) पतिं विद् or वृ (c. 5. वृणोति, वरितुं -रीतुं), भर्त्रा संयुज् in pass. (-युज्यते), पतिवरणं कृ, भर्त्तृवरणं कृ.—(Dispose of in marriage) विवाहार्थं कन्यां दा or प्रदा.

To MARRY, *v. n.* भर्त्रा or भार्य्यया संयुज् in pass. (-युज्यते) or युज्, विवाहं कृ, उद्वाहं कृ, परिणयं कृ, पाणिग्रहणं कृ, दारपरिग्रहं कृ, उपयमं कृ.

MARS, *s.* (The planet, fabled as the son of the earth) मङ्गलः, मङ्गलग्रहः, भौमः, अङ्गारकः, कुजः, भूमिजः, भूसुतः, महीसुतः, क्षितिसुतः, आवनेयः, धरात्मजः, धरासुतः, धरापुत्रः, नवदीधितिः *m.*, आषाढभवः, शिवधर्म्मजः, गगणोल्मुकः, खोल्मुकः, लोहितः -तकः, लोहिताङ्गः, रक्ताङ्गः, रुधिरः, आरः, घण्टेश्वरः, ऋणान्तकः, चरः, ज्ञः. (In mythology, the god of war). *See* KÁRTIKEYA.

MARSH, *s.* कच्छः, कच्छभूः *f.*, कच्छभूमिः *f.*, अनूपभूः *f.*, अनूपभूमिः *f.*, सजलभूमिः *f.*, जलार्द्रभूः *f.*, आर्द्रभूमिः *f.*, पवः.

To MARSHAL, *v. a.* विन्यस् (c. 4. -अस्यति -असितुं), व्यूह् (c. 1. -ऊहते -हितुं), विरच् (c. 10. -रचयति -यितुं), रच्, क्रमेण स्था in caus. (स्थापयति -यितुं), व्यवस्था, विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा.

MARSHAL, MARSHALLER, *s.* विधाता *m.* (तृ), संविधाता *m.*, व्यवस्थापकः, विरचकः, व्यूहरचकः, विन्यासकृत् *m.*

MARSHY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, जलार्द्रः -र्द्रा -र्द्रं, जलप्रचुरः -रा -रं, जलमयः -यी -यं, सजलः -ला -लं, जलप्रायः -या -यं, आप्यः -प्या -प्यं, आर्द्रः -र्द्रा -र्द्रं.

MART, *s.* विक्रयस्थानं, क्रयविक्रयस्थानं, पण्यस्थानं, आपणः, विपणिः *m.* -णी *f.*, निगमः, निषद्या, पण्यवीथी -थिका, अवटङ्कः.

MARTIAL, *a.* (Relating to war) युद्धसम्बन्धी -न्धिनी -न्धि (न्), रणसम्बन्धी &c., युद्धविषयः -या -यं, रणविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, साम्परायिकः -की -कं.—(Suited to war) रणयोग्यः -ग्या -ग्यं, युद्धोपयुक्तः -क्ता -क्तं, रणोपयोगी -गिनी &c. —(Given to war) रणप्रियः -या -यं, रणासक्तः -क्ता -क्तं, रणवीरः -रा -रं, रणकामी -मिनी &c.; 'martial music,' रणवाद्यं

MARTINET, *a.* उग्रदण्डः, उग्रशासनः, तीक्ष्णदण्डः, दण्डबुद्धिः *m.*, उद्यतदण्डः, तीक्ष्णशासनः, निष्ठुरबुद्धिः *m.*, निष्ठुरः.

MARTINGAL, MARTINGALE, *s.* तलिका, तलसारकः, अधोबन्धनं.

MARTYR, *s.* साक्षी *m.* (न्), स्वधर्म्मार्थं प्राणत्यागी *m.* (न्) or देहत्यागी *m.* or जीवितत्यागी *m.*, स्वमतार्थं त्यक्तप्राणः or अर्पितप्राणः, स्वधर्म्मप्रमाणार्थं न्यस्तप्राणः or न्यस्तदेहः or न्यस्तजीवितः or जीवोत्सर्गी *m.* or साक्षी *m.*

To MARTYR, *v. a.* स्वधर्म्मार्थं हन् (c. 2. हन्ति -न्तुं or caus. घातयति -यितुं).

MARTYRDOM, *s.* स्वधर्म्मार्थं प्राणत्यागः or जीवितत्यागः, स्वमतार्थं जीवोत्सर्गः or प्राणोत्सर्गः, स्वधर्म्मप्रमाणार्थं देहन्यासः or प्राणन्यासः or प्राणार्पणं.

MARTYRED, *p. p.* स्वधर्म्मार्थं, हतः -ता -तं or व्यापादितः -ता -तं, स्वधर्म्मप्रमाणार्थं हतजीवितः -ता -तं or नष्टप्राणः -णा -णं.

MARTYROLOGY, *s.* साक्षिचरित्रशास्त्रं, स्वधर्म्मार्थं प्राणत्यागिनां चरित्रविवरणं or चरित्रलिखनं.

MARVEL, *s.* कौतुकं, अद्भुतं, अद्भुतवस्तु *n.*, आश्चर्य्यवस्तु *n.*, आश्चर्य्यं, चमत्कारः, चित्रवस्तु *n.*, चित्रं, विस्मयजनकवस्तु, उत्पातः, उपसर्गः.

To MARVEL, *v. n.* विस्मितः -ता -तं भू, विस्मयान्वितः -ता -तं भू, सविस्मयः -या -यं भू, विस्मि (c. 1. -स्मयते -स्मेतुं) with instr. loc. or acc. c., आश्चर्य्यः -र्य्या -र्य्यं भू, चमत्कृतः -ता -तं भू, आश्चर्य्यं ज्ञा (c. 9. जानाति, ज्ञातुं) or मन् (c. 4. मन्यते, मन्तुं).

MARVELLOUS, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, विस्मयजनकः -का -कं, विस्मयोत्पादकः -का -कं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, आश्चर्य्यजनकः -का -कं, चमत्कारजनकः -का -कं, चित्रः -त्रा -त्रं, विचित्रः -त्रा -त्रं, तातः -ता -तं; 'a marvellous tale,' चित्रोक्तिः *f.*; 'a marvellous action,' अद्भुतकर्म्म *n.* (न्), आश्चर्य्यकर्म्म.

MARVELLOUSLY, *adv.* अद्भुतं, अद्भुतप्रकारेण, विचित्रं, आश्चर्य्यप्रकारेण, यथा विस्मयो जायते तथा.

MARVELLOUSNESS, *s.* अद्भुतता -त्वं, आश्चर्य्यत्वं, विचित्रता, साश्चर्य्यत्वं, वैचित्र्यं, विस्मयजनकता, अपूर्व्वत्वं.

MARWAR, *s.* (The province) मरुः *m.*, मरुभूः *f.*—(The inhabitants) मरवः *m. pl.*, मरुभुवः *m. pl.*

MASCULINE, *a.* पौरुषः -षी -षं, पौरुषेयः -यी -यं, पुरुषजातीयः -या -यं, पुंजातीयः -या -यं, पुं in comp., पुरुष in comp., अक्लीवः -वा -वं.—(Having the qualities of a man, resembling a man) पुरुषस्वभावः -वा -वं, पुरुषवृत्तिः -त्तिः -त्ति, पुरुषशीलः -ला -लं, पुरुषधर्म्मकः -का -कं, पुरुषप्रकृतिः -तिः -ति, पुम्प्रकृतिः -तिः -ति; 'the masculine gender,' पुंलिङ्गं, पुमान् *m.* (पुंस्), पुरुषः; 'a masculine woman,' ऋषभी.

MASCULINELY, *adv.* पुरुषवत्, नरवत्, सपौरुषं, पौरुषेण, पुंवत्.

MASCULINENESS, *s.* पुंस्त्वं, पुरुषत्वं -ता, पौरुषं, पौरुषता, पुरुषशीलता, पुरुषस्वभावः, पुरुषप्रकृतिः *f.*

MASH, *s.* उदपेषः -षणं, उदकपेषः, सम्पेषः -षणं, नानाद्रव्यसम्पेषः, नानाद्रव्यमिश्रणं, जलमिश्रितं नानासम्मिश्रद्रव्यं, नानासम्मिश्रद्रव्यपिण्डः.

To MASH, *v. a.* सम्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्मृद् (c. 9. -मृद्नाति -मर्द्दितुं), सम्पेषणं कृ, सम्मर्दनं कृ, चूर्ण् (c. 10. चूर्णयति -यितुं), सच्चूर्ण्, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), सम्पेषणपूर्ब्बं पिण्डीकृ.

MASHED, *p. p.* सम्पिष्टः -ष्टा -ष्टं, सम्मर्दितः -ता -तं, सच्चूर्णितः -ता -तं, क्षुण्णः -ण्णा -ण्णं, सम्पेषणानन्तरं पिण्डीभूतः -ता -तं.

MASK, *s.* (Cover for the face) कृत्रिममुखं, छद्ममुखं, छद्मास्यं, कपटमुखं, उपमुखं.—(Pretext, subterfuge) छद्म *n.* (न्), कपटः -टं, अपदेशः, अपदेशः, व्याजः, छलं, कूटं.—(Masquerade) छद्मवेशः, कपटवेशः, कृत्रिमवेशः, छद्मवेशधारणं, विडम्बनं.

To MASK, *v. a.* (Disguise with a mask) कृत्रिममुखेन छद् (c. 10. छादयति -यितुं) or गुह् (c. 1. गूहति -हितुं), मुखगोपनं कृ.—(Conceal) छद्, आछद्, गुप् (c. 1. गोपायति, गोप्तुं), गोपनं कृ, अपवृ (c. 10. -वारयति -यितुं).

To MASK, *v. n.* विडम्बनं कृ, छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू.

MASKED, *p. p.* (Having the face covered) गुप्तमुखः -खी -खं, छद्ममुखी -खिनी -खि (न्), कृत्रिममुखी &c.—(Disguised) छद्मवेशी -शिनी &c., कपटवेशी &c., छद्मवेशधारी -रिणी &c., कपटवेशः -शा -शं, छद्मवेशः &c., कपटरूपी -पिणी &c., विडम्बितवेशी &c., अलक्षितः -ता -तं.—(Concealed) गुप्तः -प्ता -प्तं, गोपितः -ता -तं, आच्छादितः -ता -तं.

MASKER, *s.* छद्मवेशी *m.* (न्), कपटवेशी *m.*, छद्मवेशभृत्, छद्मरूपी *m.*, विडम्बितवेशः, कृत्रिमवेशधारी *m.*, विडम्बनकृत्.

MASON, *s.* लेपकः, लेपी *m.* (न्), लेपकरः, गृहनिर्म्माता *m.* (तृ), सुधाजीवी *m.* (न्), लेपजीवी *m.*, प्रलेपकः, प्रस्तरन्यासकृत्, इष्टकान्यासजीवी *m.*

MASONRY, *s.* लेपकर्म्म *n.* (न्), इष्टकान्यासकर्म्म *n.*, सुधाकर्म्म *n.*, गृहनिर्म्माणं, गृहकरणं, गृहनिर्म्माणे प्रस्तरन्यासः or प्रस्तरादिविन्यासः.—(Brickwork, any thing made of stone, brick, &c.) इष्टकाकर्म्म *n.*, प्रस्तरकर्म्म *n.*, प्रस्तरनिर्म्मितं प्राकारादि.

MASQUERADE, *s.* छद्मवेशधारणं, वेशधारणं, छद्मवेशक्रीडा, छद्मवेशसमारम्भः, छद्मवेशः, कपटवेशिनां यात्रा, विडम्बनं, विडम्बनक्रीडा.

To MASQUERADE, *v. n.* छद्मवेशी -शिनी -शि भू, कपटवेशी &c. भू, छद्मवेशं धृ (c. 10. धारयति -यितुं), विडम्ब् (c. 10. -डम्बयति -यितुं), विडम्बनं कृ.

MASQUERADER, *s.* छद्मवेशी *m.* (न्), वेशधारी *m.*, विडम्बनकर्त्ता *m.* (र्त्तृ). *See* MASKER.

MASS, *s.* (Lump) पिण्डः -ण्डं, घनः, ओघः, घनौघः, स्थूलं, गण्डः -ण्डका; 'a mass of iron,' लोहपिण्डः.—(Heap) राशिः *m.*, सञ्चयः, निचयः, प्रचयः, समुच्चयः, चयः, चितिः *f.*, चायः, निकरः, उत्करः, ओघः, पुञ्जः, पूगः, स्तूपः, स्तोमः.—(Collection) समूहः, सङ्घः, सङ्घातः, संहतिः *f.*, समुदायः, वृन्दं, संहारः, समाहारः, सञ्चयः, निवहः; 'in masses,' सङ्घशस्.—(Gross, bulk) साकल्यं, सामग्र्यं, समुदायः; 'in the mass,' साकल्येन.

MASSACRE, *s.* महामारणं, महाघातः, महावधः, निषूदनं, विशसनं, निहननं, संहारः, विमर्द्दनं, निकृन्तनं, प्रमापणं, निशारणं.

To MASSACRE, *v. a.* अतिनैष्ठुर्य्येण हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं) or निहन् or मृ (c. 10. मारयति -यितुं) or सूद् (c. 10. सूदयति -यितुं) or निसूद् or विनिसूद् or विशस् (c. 1. -शसति -सितुं) or निकृत् (c. 6. -कृन्तति -कर्त्तितुं).

MASSACRED, *p. p.* अतिनैष्ठुर्य्येण हतः -ता -तं or विनिहतः -ता -तं or घातितः -ता -तं or निषूदितः -ता -तं or विशसितः -ता -तं.

MASSIVENESS, MASSINESS, *s.* स्थूलता -त्वं, स्थौल्यं, स्थूलाकारता, वृहत्त्वं, गुरुत्वं -ता, सभारता -त्वं, भारिता -त्वं, भारवत्त्वं, पिण्डाकारता, महत्त्वं, स्थानता.

MASSIVE, MASSY, *a.* स्थूलः -ला -लं, स्थूलाकारः -रा -रं, स्थूलरूपः -पा -पं, भारी -रिणी -रि (न्), भारवान् -वती -वत् (त्), सभारः -रा -रं, गुरुः -र्व्वी -रु, पिण्डितः -ता -तं, पिण्डाकारः -रा -रं, वृहन् -हती -हत् (त्), वृहत्परिमाणः -णा -णं, स्थूलपरिमाणः -णा -णं, स्थानः -ना -नं.

MAST, *s.* (Of a ship) कूपकः, कूपः, गुणवृक्षकः, गुणवृक्षः, नौकूपकः.

MAST-HEAD, *s.* गुणवृक्षकाग्रं, गुणवृक्षाग्रं, कूपकाग्रं.

MELLOW, *a.* पक्वः -क्वा -क्वं, परिपक्वः -क्वा -क्वं, पक्वमृदुः -द्वी -दु, मृदुपक्वः -क्वा -क्वं, पक्त्रिमः -मा -मं, विपक्त्रिमः -मा -मं.—(Soft) मृदुः -दुः -द्वी -दु, कोमलः -ला -लं, मृदुलः -ला -लं, स्निग्धः -ग्धा -ग्धं, ललितः -ता -तं, सुखस्पर्शः -र्शा -र्शं.—(To the ear) मृदुशब्दः -ब्दा -ब्दं, कोमलशब्दः &c., मृदुनादः -दा -दं, मञ्जुलः -ला -लं, मञ्जुस्वनः -ना -नं.

To MELLOW, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, मृदुपक्वं -क्वां कृ, परिपक्वं -क्वां कृ, परिपक्वीकृ, मृदूकृ, कोमलीकृ.

To MELLOW, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पक्वीभू, पक्वतां or पक्वदशां या (c. 2. याति -तुं) or इ (c. 2. एति -तुं), मृदुपक्वः -क्वा -क्वं भू, मृदूभू, कोमलीभू.

MELLOWED, *p. p.* पाकेन मृदूकृतः -ता -तं or कोमलीकृतः -ता -तं.

MELLOWNESS, *s.* पक्वता, परिपक्वता, मृदुता, पक्वमृदुता, कोमलता, मार्दवं, स्निग्धिमा *m.* (न्), पाकः, परिपाकः, पक्तिः *f.*, पक्वदशा, पक्वभावः.—(Of sound) शब्दमृदुता, नादमार्दवं.

MELODIOUS, *a.* मधुरः -रा -रं, सुश्राव्यः -व्या -व्यं, सुस्वरः -रा -रं, सुखश्रवः -वा -वं, सुचारुस्वनः -ना -नं, मञ्जुस्वनः -ना -नं, श्रोत्रसुखः -खा -खं, श्रोत्राभिरामः -मा -मं, श्रुतिसुखः -खा -खं, मधुरस्वरः -रा -रं, मधुराक्षरः -रा -रं, मधुकः -का -कं, सुशब्दः -ब्दा -ब्दं, मञ्जुलः -ला -लं.

MELODIOUSLY, *adv.* मधुरं, सुस्वरं, मधुरस्वरेण, सुचारुस्वरेण, माधुर्य्येण.

MELODIOUSNESS, *s.* मधुरता, माधुर्य्यं, सुश्राव्यता, सुस्वरता, स्वरमधुरता, स्वरमाधुर्य्यं, श्रोत्राभिरामता.

MELODY, *s.* सुस्वरः, सुस्वरानुपूर्व्यं, सुस्वरानुपूर्वी, सुस्वरानुक्रमः, स्वरमाधुर्य्यं, स्वरानुक्रममाधुर्य्यं, माधुर्य्यं, मधुरता, सुश्राव्यता, कलता -त्वं, तालः, तालैक्यं, प्रतितालः.

MELON, *s.* (Water-melon) तरसुजं, लतापनसः, सेटुः *m.*, कालिङ्गं, कालिन्दकं, गोडुम्बः.

To MELT, *v. a.* विली in caus. (-लाययति -लापयति -यितुं), विदु (c. 10. -द्रावयति -यितुं), द्रवीकृ, गल् (c. 10. गालयति -यितुं), विद्रावणं कृ, गालनं कृ, विद्रुतीकृ, विलीनीकृ, आर्द्रीकृ, सार्द्रीकृ.—(Soften to love or tenderness) करुणार्द्रीकृ, दयार्द्रीकृ, भावार्द्रीकृ, सार्द्रीकृ, आर्द्रीकृ, वत्सल (nom. वत्सलयति -यितुं), वत्सलीकृ.

To MELT, *v. n.* विली (c. 4. -लीयते -लेतुं), प्रविली, प्रली, द्रु (c. 1. द्रवति, द्रोतुं), विदु, गल् (c. 1. गलति -लितुं), विगल्, क्षर् (c. 1. क्षरति -रितुं), द्रवीभू, आर्द्रीभू, सार्द्रीभू, विलीनीभू, विद्रुतीभू.—(Be softened to love or tenderness) दयार्द्रीभू, करुणार्द्रीभू, आर्द्रहृदयः -या -यं भू, क्लिन्नहृदयः -या -यं भू, सार्द्रीभू, वत्सल (nom. वत्सलायते), वत्सलीभू.

MELTED, *p. p.* द्रुतः -ता -तं, द्रावितः -ता -तं, विद्रुतः -ता -तं, विद्रावितः -ता -तं, द्रवीभूतः -ता -तं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, गलितः -ता -तं, गालितः -ता -तं, क्षरितः -ता -तं, परिगलितः -ता -तं, द्रवीकृतः -ता -तं, द्रवमाणः -णा -णं, अवदीर्णः -र्णा -र्णं, आर्द्रीकृतः -ता -तं, सार्द्रीकृतः -ता -तं.—(Softened to tenderness) करुणार्द्रीकृतः -ता -तं, दयार्द्रीभूतः -ता -तं, क्लिन्नहृदयीकृतः -ता -तं, वत्सलीकृतः -ता -तं.

MELTER, *s.* द्रावकः, विद्रावकः, द्रावकरः, विलयनकृत्, द्रवकत्री *m.* (त्रृ).

MELTING, *s.* द्रावः -वणं, विद्राव -वणं, विलयः -यनं, द्रवत्वं, गलनं, गालनं, गलितत्वं, द्रवीकरणं, क्षरणं, विलीनता, आर्द्रीकरणं, सार्द्रीकरणं.

MELTING, *part.* or *a.* द्रवमाणः -णा -णं, गलन् -लन्ती -लत् (त्), क्षरन् &c., गाली -लिनी -लि (न्), वात्सल्यजनकः -का -कं.

MEMBER, *s.* (Limb of the body) अङ्गं, अवयवः, शरीराङ्गं, शरीरावयवः, गात्रं, पक्षः, प्रतीकः, उपघनः; 'a minor member of the body,' प्रत्यङ्गं; 'having members,' अङ्गी -ङ्गिनी -ङ्गि, अवयवी &c., साङ्गः -ङ्गा -ङ्गं.—(Of a discourse, &c.) अङ्गं, प्रकरणं, खण्डः -ण्डं, देशः, पदं, परिच्छेदः, विच्छेदः.—(Part, division) अङ्गं, भागः, विभागः, अंशः, अवयवः; 'member by member,' अवयवशस्; 'forming a member,' अङ्गभूतः -ता -तं.—(Of a community or association) गणाभ्यन्तरः, संसर्गाभ्यन्तरः.—(Of an assembly) सभासद्, सभ्यः, सभास्थः, सभास्तारः, सभाभ्यन्तरः, सामाजिकः, सदस्यः.—(Individual) व्यक्तिः *f.*, एकजनः.—(Of a compound word) पदं; 'first member of a compound,' उपपदं; 'last member,' उत्तरपदं.

MEMBERED, *a.* अङ्गी -ङ्गिनी -ङ्गि (न्), साङ्गः -ङ्गा -ङ्गं, अवयवी &c.

MEMBRANE, *s.* त्वक् *f.* (च्), आवरणत्वक् *f.*, आवरकत्वक् *f.*, तनुत्वक् *f.*, अन्तस्त्वक् *f.*, चर्म्म *n.* (न्), अन्तश्चर्म्म *n.*, झिल्लिका, झिल्ली, आवरणं.

MEMBRANEOUS, MEMBRANOUS, *a.* तनुत्वङ्मयः -यी -यं, आवरणत्वङ्मयः -यी -यं, तनुत्वगावृतः -ता -तं.

MEMBRUM VIRILE, *s.* शिश्नः, पुंलिङ्गं, पुंश्चिह्नं, पुरुषाङ्गं, नरङ्गं, लिङ्गं, ध्वजः, इन्द्रियं, जघन्यं, चर्म्मदण्डः -ण्डं.

MEMENTO, *s.* स्मरणार्थकवस्तु *n.*, स्मृतिजनकचिह्नं, स्मरणं.

MEMOIR, *s.* वृत्तान्तः, वृत्तान्तरचना, वृत्तान्तोपाख्यानं, वृत्तान्तलिखनं, चरित्रं, चरित्ररचना, चरित्रोपाख्यानं, चरित्रलिखनं, इतिहासः.

MEMORABLE, *a.* स्मरणीयः -या -यं, स्मरणयोग्यः -ग्या -ग्यं, स्मरणार्हः -र्हा -र्हं, स्मर्त्तव्यः -व्या -व्यं, स्मरणोपयुक्तः -क्ता -क्तं, चिरस्मरणीयः &c., अविस्मरणीयः &c.

MEMORANDUM, *s.* स्मरणं, स्मरणपत्रं, स्मारकपत्रं, स्मरणार्थकचिह्नं, पत्रकं.

MEMORATIVE, MEMORIAL, *a.* स्मारकः -का -कं, स्मार्त्तः -र्त्ती -र्त्तं, स्मृतिजनकः -का -कं, स्मरणार्थकः -का -कं, स्मृतिकरः -रा -रं.

MEMORIAL, *s.* स्मरणार्थकविषयः, स्मरणार्थकवस्तु *n.*, स्मारकविषयः, स्मारकवस्तु, स्मरणार्थकचिह्नं, स्मार्त्तविषयः, स्मार्त्तवस्तु *n.*, स्मरणं.—(Petition) निवेदनपत्रं, विज्ञापनपत्रं, प्रार्थनपत्रं.

MEMORIALIST, *s.* निवेदनकर्त्ता *m.* (र्त्तृ), विज्ञापनकृत् *m.*, प्रार्थकः, प्रार्थयिता *m.*, अर्थी *m.* (न्), प्रार्थनपत्रलेखकः.

To MEMORIALIZE, *v. a.* निवेदनपत्रेण प्रार्थ् (c. 10. -अर्थयति -यितुं), निवेदनपत्रं लिख् (c. 6. लिखति, लेखितुं), निवेदनं कृ.

MEMORY, *s.* स्मरणं, स्मृतिः *f.*, संस्मृतिः *f.*, संस्मरणं, अनुस्मृतिः *f.*, अविस्मृतिः *f.*, संस्कारः, स्मरणशक्तिः *f.*, धारणा -णं; 'retentiveness of memory,' धारणा, धारणाशक्तिः *f.*; 'having a good or retentive memory,' स्मृतिमान् -मती -मत् (त्), स्मरणशीलः -ला -लं, चिरस्मरणशीलः -ला -लं, अधिगतार्थस्मरणशीलः -ला -लं, अधिगतार्थाविस्मरणशीलः -ला -लं; 'to commit to memory,' हृदये कृ, मनसि कृ, अभ्यस् (c. 4. -अस्यति -असितुं), रूपं कृ; 'committed to memory,' कण्ठस्थः -स्था -स्थं, हृदयस्थः -स्था -स्थं, हृत्स्थः &c., अभ्यस्तः -स्ता -स्तं; 'within memory,' स्मार्त्तः -र्त्ती -र्त्तं.—(Time to which memory may extend) स्मार्त्तकालः, स्मरणकालः, स्मृतिकालः.

MEN, *s. pl.* पुरुषाः *m. pl.*, नराः *m. pl.*, मनुष्याः *m. pl.*, मानुषाः *m. pl.*

To MENACE, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), अवभर्त्स्, निर्भर्त्स्, अभिभर्त्स्, अभिनिर्भर्त्स्, परिभर्त्स्, तर्ज् (c. 10. तर्जयति -यितुं), अभितर्ज्, सन्तर्ज्, अवगुर् (c. 6. -गुरते -रितुं), भर्त्सनं कृ, तर्जनं कृ, भयप्रदर्शनं कृ.

MENACE, *s.* भर्त्सनं -ना, निर्भर्त्सनं -ना, तर्जनं, भयप्रदर्शनं, भयदर्शनं, परोदितं, अपकारणीः *f.* (र्).

MENACED, *p. p.* भर्त्सितः -ता -तं, अभिभर्त्सितः -ता -तं, तर्जितः -ता -तं.

MENACER, *s.* भर्त्सनकारी *m.* (न्), निर्भर्त्सनकृत् *m.*, भयप्रदर्शकः.

MENAGERY, MENAGERIE, *s.* पशुपक्षिसङ्ग्रहः, पक्षादिसङ्ग्रहः, विदेशीयजन्तुपालिका, विदेशीयपशुशाला, विदेशीयपशुपालनस्थानं, नानाजातीयपशुसङ्ग्रहः, भिन्नजातीयजन्तुसङ्ग्रहः, वितंसः, वीतंसः.

MENAGOGUE, *s.* ऋतुवर्धकम् or ऋतुप्रवाहकम् or ऋतुजनकम् औषधं, मुखार्त्तवौषधं.

To MEND, *v. a.* (Repair) सन्धा (c. 3. -दधाति -धत्ते -धातुं), समाधा, प्रतिसमाधा, प्रतिकृ, प्रतिसङ्कृ, पूर्ब्बवत् कृ, साध् (c. 10. साधयति -यितुं), उद्धृ (c. 1. -हरति -हर्त्तुं), जीर्णोद्धारं कृ, जीर्णोद्धरणं कृ, सुस्थं -स्थां कृ, स्वस्थं -स्थां कृ, सन्धानं कृ, प्रतिसमाधानं कृ.—(Correct) शुध् (c. 10. शोधयति -यितुं), परिशुध्, विशुध्, संशुध्.—(Help) उपकृ.—(Improve) वृध् (c. 10. वर्धयति -यितुं), संवृध्, अधिकीकृ.

To MEND, *v. n.* (Grow better) भद्रतरः -रा -रं भू, भद्रतरीभू, अधिकीभू, वृध् (c. 1. वर्धते -र्धितुं), वृद्धिं गम् (c. 1. गच्छति, गन्तुं) or इ (c. 2. एति -तुं), श्रेयान् -यसी -यो भू, सुस्थः -स्था -स्थं भू, स्वस्थः -स्था -स्थं भू.

MENDABLE, *a.* सन्धेयः -या -यं, समाधेयः -या -यं, प्रतिसमाधेयः -या -यं, साध्यः -ध्या -ध्यं, उद्धार्य्यः -र्य्या -र्य्यं, उद्धरणीयः -या -यं, प्रतिकार्य्यः -र्य्या -र्य्यं.

MENDACIOUS, *a.* असत्यवादी -दिनी -दि (न्), मिथ्यावादी &c., असत्यभाषी -षिणी, अनृतभाषी &c. *See* LYING, LIAR.

MENDACITY, *s.* असत्यभाषणं, मिथ्यावादः, अनृतभाषणं, मृषावादः.

MENDED, *p. p.* समाहितः -ता -तं, प्रतिसमाहितः -ता -तं, सन्धितः -ता -तं, साधितः -ता -तं, उद्धृतः -ता -तं, जीर्णोद्धृतः -ता -तं, प्रतिकृतः -ता -तं.

MENDER, *s.* सन्धानकर्त्ता *m.* (र्त्तृ), सन्धानकृत् *m.*, सन्धाता *m.* (तृ), प्रतिसमाधाता *m.*, साधकः, उद्धर्त्ता *m.* (र्त्तृ), जीर्णोद्धर्त्ता.

MENDICANCY, *s.* भिक्षुकता, भिक्षोपजीविता, भैक्ष्यं, भैक्षजीविका.

MENDICANT, *s.* (Beggar) भिक्षार्थी *m.* (न्), भिक्षुकः -की *f.*, भिक्षुः *m.*, भिक्षाकः -की, भिक्षोपजीवी *m.* (न्), भैक्षजीवी *m.*, भिक्षाशी *m.* (न्), भिक्षाहारः, भैक्षभुक् *m.* (ज्), भैक्षाशी *m.*, भिक्षाचरः, भिक्षणशीलः, वनीयकः, याचकः, याचनकः. *See* BEGGAR. (Religious mendicant) भिक्षुः *m.*, परिव्राजकः -जिका, परिव्राजः, परिव्राट् *m.* (ज्), प्रव्रजितः, पाराशरी *m.* (न्), पराशरी *m.*, योगी *m.* (न्), सन्यासी *m.* (न्), यती *m.* (न्). Other kinds of religious mendicants are दण्डी *m.* (न्), त्रिदण्डी *m.* (न्), वैरागी *m.* (न्), भैरवयोगी *m.*, दिगम्बरः, मस्करी *m.* (न्), अघोरपन्थाः *m.* (न्), कर्मन्दी *m.* (न्).

MENDICITY, *s.* भिक्षुकता -त्वं, भैक्ष्यं, भैक्षोपजीवनं, भैक्षजीविका, भैक्षचर्य्या, भैक्षचरणं, भिक्षाशित्वं, भिक्षाटनं, भिक्षावृत्तिः *f.*, भिक्षुकवृत्तिः *f.*, भिक्षा, प्रव्रज्या, परिव्रज्या -ज्यं, व्रज्या, याचनावृत्तिः *f.*, याचकवृत्तिः *f.*, याच्ञा, याचना, पैण्डित्यं.

MENDING, *s.* सन्धानं, सन्धानकरणं, समाधानं, प्रतिसमाधानं, साधनं, उद्धारः, उद्धरणं, जीर्णोद्धारः, जीर्णोद्धरणं, सुस्थकरणं, प्रतिकरणं.

MENIAL, *a.* गृहदाससम्बन्धी -न्धिनी -न्धि (न्), प्रेष्यसम्बन्धी &c., अवकृष्टः -ष्टा -ष्टं, वार्षलः -ली -लं, व्रातीनः -ना -नं; 'menial offices,' प्रेष्यकर्म्म *n.* (न्), भृत्यकर्म्म *n.*; 'menial service,' प्रेष्यभावः, दास्ययोगः.

MENIAL, *s.* गृहदासः -सी *f.*, प्रेष्यः -ष्या, भृत्यः, चेटः -टी *f.*, सेवकः -की, अवकृष्टः, अवकृष्टकर्म्मकरः, किङ्करः; 'menials,' परिजनः, परिचरः, दासवर्गः.

MENISCUS, *s.* अर्द्धचन्द्राकारः, अर्द्धचन्द्राकृतिः *f.*

MENOLOGY, *s.* (Register of months) मासविवरणं, मासपञ्जिका.

MEN-PLEASER, *s.* लोकरञ्जकः, जनरञ्जकः, जनानुसारी *m.* (न्), लोकानुसारी.

MENSAL, *a.* भोजनपात्रसम्बन्धी -न्धिनी -न्धि (न्), भोजनाधारसम्बन्धी &c.

MENSES, *s. pl.* ऋतुः *m.*, आर्त्तवं, पुष्पं, कुसुमं, रजस् *n.*, योनिरक्तं, स्त्री-

धर्म्मः, कला, मलं, योनिमलं; 'first appearance of the menses,' ऋतुदर्शनं, रजोदर्शनं; 'ceremonies on the event,' ऋतुशान्तिः *f.*, ऋतूत्सवः; 'suppression of them,' रजोबन्धः.

MENSTRUAL, *a.* (Monthly) मासिकः -की -कं, मास्यः -स्या -स्यं, मासीयः -या -यं, मासीनः -ना -नं, प्रातिमासिकः -की -कं, मासानुमासिकः -की -कं.

To MENSTRUATE, *v. n.* ऋतुमती भू, पुष्पवती भू, रजस्वला भू.

MENSTRUATION, *s.* ऋतुप्रवाहः, ऋतुस्रावः; 'woman in this state.' *See* the next.

MENSTRUOUS, *a.* (Woman) ऋतुमती, पुष्पवती, रजस्वला, मलिनी, स्त्रीधर्म्मिणी, उदक्या, आत्रेयी -यिका, ऋविः -वी, वृषली, अस्पृशा, सरजाः, चाण्डाली, ब्रह्मघातिनी, रजकी, शूद्री.—(Relating to the menses) आत्रेयः -वी -यं, ऋतुसम्बन्धी -न्धिनी -न्धि (न्), ऋतु in comp.

MENSTRUUM, *s.* (Solvent) द्रावकरसः, द्रावणं, विद्रावकरसः, विद्रावणं.—(Medium for mixing medicines) योगवाही *m.* (न्).

MENSURABILITY, *s.* मेयता, प्रमेयता, परिमेयता, मापनीयत्वं.

MENSURABLE, *a.* मेयः -या -यं, प्रमेयः -या -यं, परिमेयः -या -यं, मापनीयः -या -यं, माप्यः -प्या -प्यं, मापनक्षमः -मा -मं.

MENSURAL, *a.* मानसम्बन्धी &c., मानविषयः -या -यं, परिमाणविषयः &c.

To MENSURATE, *v. a.* मा (c. 2. माति -तुं, c. 10. मापयति -यितुं). *See To* MEASURE.

MENSURATION, *s.* मापनं, परिमाणं, प्रमाणं, मानं, मितिः *f.*, मापकरणं.

MENTAL, *a.* मानसः -सी -सं, मानसिकः -की -कं, मनस्कः -स्का -स्कं, मनसिजः -जा -जं, मनोजः -जा -जं, मनोगतः -ता -तं, मनोभवः -वा -वं, मनःस्थः -स्था -स्थं, बुद्धिस्थः &c., चिद्भवः -वा -वं, चिद्गतः -ता -तं, चित्तजः -जा -जं, मनोमयः -यी -यं, मनःकल्पितः -ता -तं, बुद्धिकल्पितः -ता -तं, मनःसम्बन्धी -न्धिनी &c.; 'mental suffering,' मनस्तापः, मनःपीडा; 'mental abstraction,' योगः, अन्तर्ध्यानं, चित्तवृत्तिविरोधः.

MENTALLY, *adv.* मनसा, बुद्ध्या, चिन्तया, बुद्धिमात्रेण; 'mentally blind,' अन्धधीः -धीः -धि, अन्धबुद्धिः -द्धिः -द्धि, अन्धीकृतात्मा -त्मा -त्म (न्).

MENTION, *s.* अभिधानं, अभिधा, आख्यानं, कथनं, उपादानं, ग्रहणं, नामग्रहणं, नामनिर्देशः, निवेदनं, कीर्त्तनं, सङ्कीर्त्तनं, उच्चारणं, उद्देशः, उल्लेखः -खनं, श्रुतिः *f.*; 'no mention whatever,' न गन्धलेशः; 'to make mention.' *See* the next.

To MENTION, *v. a.* ख्या (c. 2. ख्याति -तुं), आख्या, कथ् (c. 10. कथयति -यितुं), सङ्कथ्, निविद् (c. 10. -वेदयति -यितुं), अभिधा (c. 3. -दधाति -धातुं), कृत् (c. 10. कीर्त्तयति -यितुं), अनुकृत्, उच्चर् (c. 10. -चारयति -यितुं), निर्दिश् (c. 6. -दिशति -देष्टुं), उद्दिश्, उद्देशं कृ, अभिधानं कृ.—(By name) नाम ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), नामग्रहणं कृ, नामनिर्देशं कृ; 'it will be mentioned,' वक्ष्यते.

MENTIONED, *p. p.* उक्तः -क्ता -क्तं, प्रोक्तः -क्ता -क्तं, कथितः -ता -तं, आख्यातः -ता -तं, अभिहितः -ता -तं, निवेदितः -ता -तं, कीर्त्तितः -ता -तं, स्मृतः -ता -तं; 'by name,' नामाभिहितः -ता -तं; 'before mentioned,' पूर्व्वोक्तः -क्ता -क्तं, पूर्व्वोदितः -ता -तं; 'about to be mentioned,' वक्ष्यमाणः -णा -णं.

MENTOR, *s.* उपदेष्टा *m.* (ष्टृ), उपदेशकः, मन्ता *m.* (न्तृ), अभिमन्ता *m.*

MEPHITIC, MEPHITICAL, *a.* पूतिगन्धी -न्धिनी -न्धि (न्), पूतिगन्धः -न्धा -न्धं, पूतिगन्धात्मकः -का -कं, दुर्गन्धी &c., दूषकगन्धी &c., पूतिगन्धमयः -यी -यं, दुर्गन्धमयः -यी -यं, पूतिविषः -षा -षं, विषात्मकः -का -कं.

MERACIOUS, *a.* तेजोमयः -यी -यं, सत्त्वपूर्णः -र्णा -र्णं, रसिकः -का -कं.

MERCANTILE, *a.* वाणिजिकः -की -कं, वाणिजः -जी -जं, वाणिज्यसम्बन्धी -न्धिनी -न्धि (न्), वणिक्पथसम्बन्धी &c., वणिक्सम्बन्धी &c., व्यवहारसम्बन्धी &c., आपणिकः -का -कं, पणायासम्बन्धी &c., नैगमः -मी -मं.

MERCATURE, *s.* क्रयविक्रयः, वाणिज्यं, पणाया, वणिक्पथं.

MERCENARILY, *adv.* लाभलोभात्, लाभापेक्षया, स्वार्थापेक्षया, लाभदृष्ट्या, लाभबुद्ध्या, फललोभात्, वेतनार्थं, फलार्थं, अर्थतस्, भृतकवत्, सकामं.

MERCENARINESS, *s.* लाभलोभः, फललोभः, लाभदृष्टिः *f.*, वेतनार्थित्वं, लाभबुद्धिः *f.*, फलाशा, धनलोभः, धनलुब्धता, स्वार्थापेक्षा, सकामता, सकामबुद्धिः *f.*, वेतनापेक्षा.

MERCENARY, *a.* (Hired, hireling) भृतकः -का -कं, वैतनिकः -की -कं, वेतनार्थी -र्थिनी -र्थि (न्), वक्षिकः -का -कं, भृतिभुक् *m. f. n.* (ज्), भरण्यभुक् *m. f. n.*, भृत्यः -त्या -त्यं, वेतनभृत् *m. f. n.*—(Actuated by hope of gain, greedy of gain) लाभलोभी -भिनी &c., लाभार्थी -र्थिनी &c., लाभदृष्टिः -ष्टिः -ष्टि, लाभबुद्धिः -द्धिः -द्धि, धनलोभी &c., धनलुब्धः -ब्धा -ब्धं, धनार्थी &c., फलदर्शी -र्शिनी &c., स्वार्थीः -र्थी -र्थं, स्वार्थदर्शी &c., स्वार्थापेक्षकः -का -कं, सकामः -मा -मं, कामात्मा -त्मा -त्म (न्); 'from mercenary motives,' अर्थतस्, स्वार्थतस्, लाभलोभात्, फललोभात्.

MERCENARY, *s.* (A hireling) भृतकः, भृतिभुक् *m.* (ज्), भरण्यभुक् *m.*, वैतनिकः, वक्षिकः, वेतनार्थी *m.* (न्), वेतनभुक् *m.*, भृत्यः; 'soldier,' भृतकसैन्यः.

MERCER, *s.* कौशास्त्रविक्रयी *m.* (न्), कौशेयवणिक् *m.* (ज्), कौशिकवणिक्, दुकूलविक्रेता *m.* (तृ), कौशिकवस्त्रव्यवसायी *m.* (न्).

MERCERY, *s.* कौशास्त्रं, कौशिकवस्त्रादि *n.*, कौशिकवस्त्रादिव्यवसायः.

MERCHANDISE, *s.* (Goods) पण्यं, पण्यद्रव्यं, पण्यद्रव्याणि *n. pl.*, पण्यानि *n. pl.*, विक्रेयद्रव्याणि, विट्पण्यं, भाण्डकं, पण्यभाण्डकं, पण्यभाण्डानि *n. pl.*, वाणिजभाण्डानि, वाणिजद्रव्यं, वाणिजपण्यं, पणः, पणसः.—(Trade) वाणिज्यं -ज्या, वणिक्पथं, क्रयविक्रयः, पणाया, व्यापारः, व्यवहारः, व्यवसायः.

To MERCHANDISE, *v. n.* वाणिज्यं कृ, क्रयविक्रयं कृ, व्यापारं कृ.

MERCHANT, *s.* वणिक् *m.* (ज्), वाणिजः -जिकः, वाणिजजनः, महाजनः, सार्थवाहः, सार्थिकः, क्रयविक्रयिकः, आपणिकः, पणिकः, व्यवसायी *m.* (न्), व्यापारी *m.*, व्यवहारी *m.*, व्यवसायकः, वाणिज्योपजीवी *m.* (न्), श्रेष्ठी *m.* (न्), साधुः *m.*, साधुजनः, नैगमः; 'voyaging merchant,' पोतवणिक्, सांयात्रिकः; 'man of the mercantile or third class,' वैश्यः, विट् *m.* (श्); 'company of merchants,' सार्थः, निगमः,

MERCHANTABLE, *a.* पण्यः -ण्या -ण्यं, विक्रेयः -या -यं, पण्याहः -र्हा -र्हं.

MERCHANT-MAN, *s.* (Ship employed in trade) वाणिजनौः *f.*, वाणिजनौका.

MERCIFUL, *a.* दयालुः -लुः -लु, दयावान् -वती -वत् (त्), कृपालुः -लुः -लु, कृपावान् &c., दयाशीलः -ला -लं, कृपाशीलः -ला -लं, सदयः -या -यं, सकरुणः -णा -णं, करुणाशीलः -ला -लं, कारुणिकः -की -कं, सानुकम्पः -म्पा -म्पं, अनुकम्पी -म्पिनी -म्पि (न्), मानुक्राशः -शा -शं, हृदयालुः -लुः -लु, दयामयः -यी -यं, कृपामयः &c., करुणामयः &c., दयाबुद्धिः -द्धिः -द्धि, दयादृष्टिः -ष्टिः -ष्टि, क्षमाशीलः -ला -लं, क्षमावान् &c., अनुकम्पाशीलः -ला -लं, घृणी -णिनी &c., करुणार्द्रः -द्रा -द्रं, वत्सलः -ला -लं, कृपाकरः -रा -रं, दयायुक्तः -क्ता -क्तं.

MERCIFULLY, *adv.* सदयं, सकारुण्यं, सानुकम्पं, कृपया, दयया, सानुक्रोशं, दयापूर्व्वं, कृपापूर्व्वं, दयाबुद्धा, कारुण्येन -ण्यात्, क्षमापूर्व्वं, वात्सल्यात्.

MERCIFULNESS, *s.* दयालुता, कृपालुता, कारुण्यं, दयाशीलता, कृपाशीलता, सदयत्वं, सानुकम्पता, सानुक्रोशता, क्षमाशीलता, दया, कृपा, अनुकम्पा, करुणा, घृणा, वात्सल्यं.

MERCILESS, *a.* निर्दयः -या -यं, अदयः -या -यं, निष्कृपः -पा -पं, निर्घृणः

-णा -णं, निष्करुणः -णा -णं, अकरुणः -णा -णं, दयाहीनः -ना -नं, दयारहितः -ता -तं, दयाशून्यः -न्या -न्यं, कृपाहीनः -ना -नं, वीतघृणः -णा -णं, निष्ठुरः -रा -रं.

MERCILESSLY, *adv.* निर्दयं, निष्कृपं, निष्करुणं, निष्ठुरं, अतिनैष्ठुर्य्येण.

MERCURIAL, *a.* (Containing mercury or quicksilver) पारदमयः -यी -यं, पारदात्मकः -का -कं, सपारदः -दा -दं.—(Volatile, sprightly) चञ्चलः -ला -लं, चपलः -ला -लं, चञ्चलबुद्धिः -द्धिः -द्धिं, प्रकृतितरलः -ला -लं, तरलप्रकृतिः -तिः -ति, क्षणिकबुद्धिः &c., अस्थिरः -रा -रं.

MERCURY, *s.* (The planet, fabled as the son of Soma, or the moon, by Rohiní) सौम्यः, सोमभूः *m.*, बुधः, रौहिणेयः, रोधनः, बोधनः, राजपुत्रः, तुङ्गः, एकाङ्गः, श्यामाङ्गः, एकदेहः, प्रहर्षणः, पञ्चाक्षिन् *m.*, अविष्ठाजः.—(Quicksilver) पारदः, पारः -रतः, रसः, रसधातुः *m.*, सिद्धधातुः, दिव्यरसः, चपलः, दारदः. *See* QUICKSILVER. (A preparation of mercury used in medicine) घनसारः, चन्द्रोदयः, चतुर्मुखः; 'Calx or oxid of mercury,' रसभस्म *n.* (न्), पारदभस्म *n.*; 'white sublimate or muriate of mercury,' रसकर्पूरः; 'sulphuret of mercury,' कज्जली.—(Interpreter or preceptor of the gods) बृहस्पतिः *m.*

MERCY, *s.* (Disposition to forgive, clemency) दया, कृपा, दयाशीलता, कृपाशीलता, क्षमाशीलता, दयालुता, कृपालुता, दयाबुद्धिः *f.*, क्षमाबुद्धिः *f.*—(Compassion) अनुकम्पा, कारुण्यं, करुणा, घृणा, अनुक्रोशः, कृपा, दया.—(Grace, favor) अनुग्रहः, प्रसादः, प्रसन्नता, अनुरोधः.—(Pardon) क्षमा, पापमार्जनं, पापशुद्धिः *f.*, निष्कृतिः *f.*; 'ocean or fountain of mercy,' दयासागरः, दयासमुद्रः, दयानिधिः *m.*, करुणाकरः; 'vessel or recipient of mercy,' दयापात्रं, कृपापात्रं, दयाभाजनं, अनुकम्पनीयः -या, अनुग्राह्यः -ह्या; 'to shew or have mercy,' दयां कृ, अनुकम्प् (c. 1. -कम्पते -म्पितुं), दय् (c. 1. दयते -यितुं), क्षम् (c. 1. क्षमते -मितुं, क्षन्तुं); 'mercy!' त्राहि, त्रायस्व, क्षमस्व, क्षम्यतां.

MERCY-SEAT, *s.* करुणासनं, ईश्वरासनं, परमेश्वरासनं, ईश्वरप्रसादासनं.

MERE, *a.* (Only, pure) मात्र in comp., मात्रकः -का -कं, केवलः -ला -लं, केवली -लिनी -लि (न्), शुद्धः -द्धा -द्धं; 'a mere man,' मनुष्यमात्रः; 'mere touch,' स्पर्शमात्रं; 'mere words,' वाङ्मात्रं; 'by mere talk,' वाक्यमात्रेण; 'a mere grammarian,' केवलवैयाकरणः; 'a mere logician,' केवलनैयायिकः.

MERE, *s.* (A lake) सरस् *n.*, ह्रदः, सरोवरः, पयोराशिः *m.*—(Boundary) सीमा, परिसीमा, अन्तः, समन्तः, पर्य्यन्तं.

MERELY, *adv.* मात्रं, मात्रेण -त्रात्, केवलं, कुट्टारं, खलु; 'by merely inspecting,' निरीक्षणमात्रेण; 'from caste merely,' जातिमात्रात्.

MERETRICIOUS, *a.* (Relating to harlots) वेश्यासम्बन्धी -न्धिनी -न्धि (न्), वाराङ्गनीयः -या -यं, पण्याङ्गनीयः -या -यं.—(Having a false show, gaudy) कृत्रिमशोभावान् -वती -वत् (त्), कृत्रिमशोभामयः -यी -यं, मिथ्याशोभनः -ना -नं, कृत्रिमालङ्कारमयः -यी -यं, मिथ्यालङ्कारवान् &c., मिथ्यारागी -गिणी &c.

MERETRICIOUSLY, *adv.* वेश्यारूपेण, कृत्रिमशोभापूर्व्वं, मिथ्याशोभापूर्व्वं.

To MERGE, *v. a.* (Immerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, मग्नं -ग्नां कृ, अवगाह् (c. 10. -गाहयति -यितुं), गाह्.—(Cause to be swallowed up or lost) ग्रस्तं -स्तां कृ, विलीनं -नां कृ, निपीतं -तां कृ, नश् (c. 10. नाशयति -यितुं), नष्टं -ष्टां कृ.

To MERGE, *v. n.* मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), अवगाह् (c. 1. -गाहते -हितुं -गाढुं), ग्रस्तः -स्ता -स्तं भू, निपीतः -ता -तं भू, नश् (c. 4. नश्यति -शितुं), मग्नः -ग्ना -ग्नं भू, विली (c. 4. -लीयते -लेतुं).

MERGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः -ग्ना -ग्नं, अवगाढः -ढा -ढं, लीनः -ना -नं, विलीनः -ना -नं, निलीनः -ना -नं, लुप्तः -प्ता -प्तं.

MERIDIAN, *s.* (Midday, noon) मध्याह्नः, मध्याह्नकालः, मध्यन्दिनं, दिनमध्यं.—(Meridian of the place in geography and astronomy) याम्योत्तरवृत्तं, खमध्यं; 'meridians of right ascension,' क्रान्तिसूत्राणि *n. pl.*; 'distance from the first meridian,' रेखान्तरं, देशान्तरं; 'distance between the meridians,' स्पष्टपरिधिः *m.*—(Height, highest point) उच्चता, उच्चपदं, अग्रं, मध्यं.

MERIDIAN, *a.* (Relating to midday) माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं, मध्याह्नकालीनः -ना -नं.—(Pertaining to the meridian line) याम्योत्तरवृत्तसम्बन्धी -न्धिनी -न्धि (न्), खमध्यसम्बन्धी &c.—(Highest) उच्चतमः -मा -मं, उत्तमः -मा -मं.

MERIDIONAL, *a.* दक्षिणदिक्स्थः -स्था -स्थं, दक्षिणमुखः -खा -खं, दक्षिणाभिमुखः &c., दाक्षिणिकः -की -कं, दक्षिणदेशीयः -या -यं.

MÉRIT, *s.* (Desert) गुणः, योग्यता, उपयोगः, उपयुक्तता, पात्रता.—(Excellence, great merit) गुणोत्कर्षः, गुणप्रकर्षः, गुणवैशेष्यं, गुणिता, गुणपूगं, सगुणता, गुणौघं, गुणवत्ता, गुणता, गुणमहत् *n.*, उत्कर्षः, उत्कृष्टता, श्रेष्ठता, शस्यं, प्रशस्यं, सारता -त्वं; 'appreciating merit,' गुणग्रहणं; 'one who does so,' गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः.—(Merits, good or bad) गुणागुणं, गुणदोषौ *m.* du., गुणदोषं, सारासारं, पुण्यापुण्यं, धर्म्माधर्म्मं; 'testing one's merits,' गुणागुणपरीक्षा, गुणदोषपरीक्षणं.—(Merit acquired through works, according to the Hindu notion) पुण्यं, श्रेयस् *n.*, सुकृतं, धर्म्मः, वृषः, तपस् *n.*, नियमः, पुण्यसामग्री, सच्चितं; 'acquisition of merit,' पुण्यार्जनं, पुण्यसम्पादनं, श्रेयःसम्पादनं; 'acquired by merit,' पुण्यार्जितः -ता -तं, पुण्यविर्जितः -ता -तं; 'reward of merits,' पुण्यफलं; 'good fortune, as the result of merits,' पुण्योदयः; 'merit acquired in some former birth,' पूर्व्वपुण्यं; 'mightiness of merit,' पुण्यप्रतापः; 'person of great merit,' पुण्यनिधिः *m.*, श्रेयोनिधिः *m.*, पुण्यसागरः, पुण्यराशिः *m.*, पुण्यात्मा *m.* (न्), पुण्यजनः; 'a work giving an account of the merits of any holy place or object,' माहात्म्यं.

To MERIT, *v. a.* अर्ह् (c. 1. अर्हति -ते -र्हितुं), अर्हः -र्हा -र्हं or उपयुक्तः -क्ता -क्तं or योग्यः -ग्या -ग्यं or उचितः -ता -तं भू or अस्; 'he merits a kingdom,' राज्यम् अर्हति; 'he merits punishment,' दण्डार्हो भवति or अस्ति; 'to merit confidence,' विश्वासपात्रं भू. *See To* DESERVE.

MERITED, *p. p.* उपयुक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, अर्हितः -ता -तं.

MERITORIOUS, *a.* (Deserving a reward) वेतनार्हः -र्हा -र्हं, दक्षिणार्हः &c., प्रतिफलार्हः &c.—(Deserving of honor) श्लाघ्यः -घ्या -घ्यं, श्लाघनीयः -या -यं, प्रशंसनीयः -या -यं, शंस्यः -स्या -स्यं, प्रशस्तः -स्ता -स्तं, श्लाघार्हः -र्हा -र्हं, प्रशंसार्हः &c.—(Having great merit) गुणवान् -वती -वत् (त्), गुणसम्पन्नः -न्ना -न्नं, गुणी -णिनी -णि (न्), गुणान्वितः -ता -तं, श्रेष्ठः -ष्ठा -ष्ठं, उत्तमगुणविशिष्टः -ष्टा -ष्टं.—(Having great religious merit) पुण्यवान् -वती &c., पुण्यशाली -लिनी &c., पुण्यरूपः -पा -पं, पुण्यात्मकः -का -कं, कृतपुण्यपुञ्जः -ञ्जा -ञ्जं; 'meritorious act,' पुण्यकं, व्रतः -तं, नियमः, तपस् *n.*

MERITORIOUSLY, *adv.* यथा वेतनम् or प्रतिफलम् अर्हति तथा, श्लाघनीयं.

MERITORIOUSNESS, *s.* योग्यता, उपयुक्तता, वेतनार्हता, वेतनयोग्यता, उपयोगिता, पात्रता, गुणिता, गुणसम्पन्नता, श्लाघ्यता, पुण्यता, पुण्यवत्त्वं.

MERLIN, *s.* (Kind of hawk) श्येनभेदः, कपोतारिः *m.*

MERMAID, *s.* मत्स्यकन्या, मत्स्यकुमारी -रिका, कविकल्पितः कन्योर्द्धकायो मत्स्याधःकायो जन्तुविशेषः, समुद्रीयस्त्री.

MERRILY, *adv.* सहर्षं, सानन्दं, उल्लासेन, उल्लसितं, सहासं, सहास्यं, सहसितं, परिहासेन, हृष्टमनसा, सकौतुकं, प्रफुल्लमनसा, उल्लसवत्, हृष्टवत्, प्रमोदेन.

MERRIMENT, *s.* उल्लसता, उल्लासः, हर्षः, प्रहर्षः, आनन्दः, सानन्दता, प्रफुल्लता, हास्यं, प्रहसनं, हासिका, परिहासः, परीहासः, आह्लादः, मुदा, प्रमोदः, कौतुकं, प्रहृष्टता, हृष्टता, क्रीडा, क्रीडाकौतुकं, विलासः, लीला, खेला, हास्यविनोदः, उत्सवः, जर्भटी.

MERRINESS, *s.* हृष्टता, प्रहृष्टता, उल्लसता, उल्लासिता, हास्यमुखता, हास्यवृत्तिः *f.*, सानन्दता, प्रफुल्लता, सदानन्दिता.

MERRY, *a.* हृष्टः -ष्टा -ष्टं, हृष्टहृदयः -या -यं, प्रहृष्टः -ष्टा -ष्टं, प्रहृष्टचित्तः -त्ता -त्तं, उल्लसः -सा -सं, उल्लासी -सिनी -सि (न्), उल्लासवृत्तिः -त्तिः -त्ति, परिहासशीलः -ला -लं, हास्यवृत्तिः -त्तिः -त्ति, हास्यमुखः -खी -खं, हास्यवदनः -ना -नं, सुहसाननः -ना -नं, आनन्दी -न्दिनी &c., आनन्दवृत्तिः -त्तिः -त्ति, हासी -सिनी &c., प्रमोदी -दिनी &c., मुदान्वितः -ता -तं, मुदितः -ता -तं, विलासी &c., विनोदी &c., सुमनाः -नाः -नः (स्), कौतुकी &c., उपजातकौतुकः -का -कं.—(Causing mirth) हास्यजनकः -का -कं, हास्योत्पादकः -का -कं, विनोदकः -का -कं; 'to make merry,' उत्सवं कृ; 'to be merry,' उल्लस् (c. 1. -लसति -सितुं), सुमन (nom. सुमनायते), कौतुकं कृ.

MERRY-ANDREW, *s.* भण्डः, वैहासिकः, विदूषकः, परिहासवेदी *m.* (न्).

MERRY-MAKING, *s.* उत्सवः, उत्सवकरणं, महोत्सवः, विलासकरणं.

MERSION, *s.* मज्जनं, प्रमज्जनं, निमज्जनं, विगाहः -हनं, अवगाहनं.

MERU, *s.* (The sacred mountain, in the centre of the seven continents, at the extremity of the world's axis, where the gods reside, corresponding to Mount Olympus of the Greeks) मेरुः *m.*, सुमेरुः *m.*, सुरालयः, देवालयः, हेमाद्रिः *m.*, रत्नसानुः *m.*

MESENTERIC, *a.* अन्त्रपेशीसम्बन्धी -न्धिनी &c., मध्यान्त्रिकः -की -कं.

MESENTERY, *s.* अन्त्रपेशी, अन्त्रावरणात्वक् *f.* (च्), मध्यान्त्रावरणात्वक् *f.*, मध्यान्त्रबन्धनात्वक् *f.*; 'enlargement of the mesentery,' प्लीहा *m.* (न्).

MESH, *s.* (Interstice of a net) जालान्तरं, जालच्छिद्रं, जालरन्ध्रं.

To MESH, *v. a.* जाले or पाशे पत् (c. 10. पातयति -यितुं), जाले पातयित्वा बन्ध् (c. 9. बध्नाति, बन्द्धुं), जालबद्धं -द्धां कृ.

MESHY, *a.* जालरूपः -पा -पं, जालाकारः -रा -रं, जालमयः -यी -यं, जालवन्निर्मितः -ता -तं जालवद् बहुच्छिद्रमयः -यी -यं.

MESLIN, *s.* (Mixture of grain) मिश्रधान्यं, धान्यमिश्रणं, मिश्रान्नं.

MESS, *s.* (Dish or quantity of food) अन्नभागः, अन्नपात्रं, अन्नं, सिद्धान्नं, यत् खाद्यद्रव्यम् एकपुरुषस्य परिवेष्यते.—(Food prepared for a number of persons in common) गणान्नं.—(Set of persons who eat together) पंक्तिः *f.*, सहभोजिपंक्तिः *f.*, सहभोजनपंक्तिः *f.*, गणान्नपंक्तिः *f.*, जग्धिपंक्तिः *f.*, सहभोजिगणः, सहभोजिनः *m. pl.*, पंक्तिभोजिनः *m. pl.*, गणचक्रकं, गणचक्रं; 'not admissible into the same mess,' अपांक्तेयः -या -यं, अपांक्तः -क्ता -क्तं, अपांक्त्यः -क्त्या -क्त्यं.—(Medley, litter) सङ्करः, नानाद्रव्यसाङ्कर्य्यं, नानाद्रव्यसन्निपातः, नानाद्रव्यसम्मिश्रणं, सङ्कीर्णकं, सङ्कुलकं.—(Plight) दुर्दशा, दुर्गतिः *f.*, कर्दमः; 'in a mess,' दुर्दशाग्रस्तः -स्ता -स्तं.

To MESS, *v. n.* (Eat in company) पंक्तिभोजनं कृ, एकपंक्तिभोजनं कृ, सहभोजनं कृ, एकत्र भोजनं कृ or आहारं कृ.

To MESS, *v. a.* (Make into a mess) सङ्करीकृ, सम्मिश्रीकृ.

MESSAGE, *s.* सन्देशः, सन्दिष्टं, वार्त्ता, दूत्यं, दौत्यं, वृत्तान्तः, वाचिकं, निर्देशः, निर्दिष्टं, वचनोपन्यासः, आदेशः, समाचारः, आज्ञा, शासनं, शास्तिः *f.*, वक्तव्यं, वचनं, प्रेषः; 'sending on a message,' प्रतिशासनं.

MESSED, *p. p.* सङ्करीकृतः -ता -तं, सम्मिश्रितः -ता -तं, सन्निपतितः -ता -तं.

MESSENGER, *s.* दूतः, सन्देशहरः, वार्त्ताहरः, वार्त्तायनः, वाचिकहरः, आख्यायकः, अध्वगः, प्रयोज्यः, सञ्चारकः, चारः, धावकः, समाचारदायकः, कार्य्यङ्करः, निमृष्टार्थः; 'female messenger,' दूती -तिः -तिका, सञ्चारिका.

MESSIAH, *s.* (The Anointed) अभिषिक्तः, अभिषिक्तत्राता *m.* (तृ).

MESSMATE, *s.* पंक्तिभोजी *m.* (न्), एकपंक्तिः *m.*, समपंक्तिः, सहभोजी *m.*

MESSUAGE, *s.* वासगेहं -हः, वासगृहं, गृहवाटिका, वास्तुवाटी.

MET, *p. p.* समागतः -ता -तं, सङ्गतः -ता -तं, समुपागतः -ता -तं, मिलितः -ता -तं, अभिमुख्यागतः -ता -तं, सम्मुखागतः -ता -तं, अभियातः -ता -तं.—(Met as a guest) प्रत्युद्गतः -ता -तं, प्रत्युद्यातः -ता -तं.—(Met with) आसादितः -ता -तं, समासादितः -ता -तं, प्राप्तः -प्ता -प्तं, अधिगतः -ता -तं; 'hard to be met with,' दुर्लभः -भा -भं. *See To* MEET. 'Easy to be met with,' सुलभः &c.

METACARPAL, *a.* करभसम्बन्धी -न्धिनी -न्धि (न्), पीलुसम्बन्धी &c.

METACARPUS, *s.* करभः, पीलुः *m.*, करभास्थि *n.*, प्रपाणिः *m.*, प्रहस्तः.

METACHRONISM, *s.* न्यूनकालनिरूपणं, न्यूननिरूपितकालः.

METAL, *s.* धातुः *m.*, लोहः, तैजसं, सुवर्णरूप्यादि *n.*; 'base metal,' कुप्यं; 'factitious metal,' कृत्रिमधातुः *m.*; 'fused,' रसधातुः *m.*, रसः; 'inferior,' उपधातुः *m.*; 'melting metals together,' आवर्त्तन; 'the metals collectively,' धातुजातं, अष्टधातु *n.* The eight metals are, 'gold,' सुवर्णं; 'silver,' रूप्यं; 'copper,' ताम्रं; 'brass,' पित्तलं; 'bell-metal, or a kind of pewter,' कांस्यं; 'tin,' त्रपु; 'lead,' सीसकं; 'iron,' लोहः. Some make 'steel,' तीक्ष्णायसं, one of the eight metals, instead of कांस्यं.

METALLIC, METALLICAL, *a.* (Pertaining to metals) धातुसम्बन्धी -न्धिनी -न्धि (न्), लोहसम्बन्धी &c.—(Consisting of metal) धातुमयः -यी -यं, लोहमयः -यी -यं, लौहः -ही -हं, धातुरूपः -पा -पं, धातुनिर्मितः -ता -तं, सिद्धरसः -सा -सं, तैजसः -सी -सं, धातुगुणकः -का -कं, धातु or लोह in comp.

METALLIFEROUS, *a.* धातूत्पादकः -का -कं, धातुजनकः -का -कं.

METALLIST, *s.* धातुपरीक्षकः, धातुज्ञः, धातुविद् *m.*, धातुकर्म्मैकारी *m.* (न्).

METALLOGRAPHY, *s.* धातुवर्णनं, धातुविवरणं, धातुविवरणविद्या.

METALLURGIST, *s.* धातुकर्म्मैकारी *m.* (न्), धातुशोधकः, धातुशोधनकृत् *m.*

METALLURGY, *s.* धातुशोधनं, धातुशोधनविद्या, धातुकर्म्म *n.* (न्).

To METAMORPHOSE, *v. a.* रूपपरिणामं कृ, परिणतरूपं -पां कृ, शरीरपरिणामं कृ, आकारपरिणामं कृ, रूपान्तरं कृ, देहान्तरं कृ, रूपविकारं कृ, रूपभेदं कृ.

METAMORPHOSED, *p. p.* परिणतरूपः -पा -पं, परिणतशरीरः -रा -रं, परिणताकारः -रा -रं, परिणताकृतिः -तिः -ति, रूपान्तरीकृतः -ता -तं, विकृताकारः -रा -रं, परिणतः -ता -तं, विकृतः -ता -तं, भिन्नरूपः -पा -पं.

METAMORPHOSIS, *s.* रूपपरिणामः, रूपान्तरं, देहान्तरं, आकारपरिणामः, रूपविकारः, रूपभेदः, शरीरविकारः, परिणामः, विकारः, विकृतिः *f.*

METAPHOR, *s.* रूपकं, व्यञ्जनं -ना, व्यञ्जकः, लक्षणा, उपलक्षणं, ध्वनिः *m.*, समासोक्तिः *f.*, आरोपः, उपमा, उपमितिः *f.*, दृष्टान्तः, उत्प्रेक्षा, निदर्शनं, जहल्लक्षणा, जदत्स्वार्था, रूपकालङ्कारः, उपचारः, उपक्षेपः.

METAPHORIC, METAPHORICAL, *a.* लाक्षणिकः -की -कं, उपलक्षितः -ता -तं, सरूपकः -का -कं, सव्यञ्जकः -का -कं, व्यञ्जकः -का -कं, आरोपितः

-ता -तं, ध्वनितः -ता -तं, गौणः -णी -णं, औपचारिकः -की -कं; 'metaphorical sense,' गौणत्वं.

METAPHORICALLY, *adv.* सरूपकं, सव्याजनं, रूपकपूर्व्वं, रूपकक्रमेण, उपलक्षणपूर्व्वं, उपलक्षणतस्, लाक्षणिकं, ध्वनितं.

METAPHRASE, *s.* यथाशब्दं भाषान्तरं, यथाशब्दभाषान्तरं.

METAPHRAST, *s.* यथाशब्दभाषान्तरकर्त्ता *m.* (र्त्तृ).

METAPHYSIC, METAPHYSICAL, *a.* आन्वीक्षिकः -की -कं, आन्वीक्षिकीसम्बन्धी -न्धिनी -न्धि (न्), मानसधर्म्मविषयः -या -यं, आत्मविषयः -या -यं, आन्वीक्षिकीविषयः -या -यं, आत्मज्ञानसम्बन्धी &c., अध्यात्मविद्यासम्बन्धी &c., मानसः -सी -सं, आध्यात्मिकः -की -कं, नैयायिकः -का -कं.

METAPHYSICALLY, *adv.* मानसधर्म्मानुसारेण, आत्मविद्यानुरूपेण.

METAPHYSICIAN, *s.* आन्वीक्षिकीज्ञः, मानसधर्म्मज्ञः, मानसविद्याज्ञः, अध्यात्मविद्याज्ञः, नैयायिकः, अर्थतत्त्ववेत्ता *m.* (त्तृ).

METAPHYSICS, *s.* आन्वीक्षिकी, आन्वीक्षिकी विद्या, मानसधर्म्मविषयका विद्या, मानसधर्म्मः, आत्मविषयकं ज्ञानं, आत्मधर्म्मविषयका विद्या, अमूर्त्तविषयज्ञानं, आत्मविद्या, अध्यात्मविद्या, मानसविद्या, आत्मतत्त्वविद्या, आत्मतत्त्वशास्त्रं, अर्थतत्त्वशास्त्रं, अर्थतत्त्वविद्या, आत्मतत्त्वविचारः.

METASTASIS, *s.* रोगस्थानान्तरं, रोगस्थलान्तरं.

METATARSAL, *a.* प्रपदीनः -ना -नं, प्रपदीयः -या -यं, प्रपदसम्बन्धी &c.

METATARSUS, *s.* प्रपदं, पादस्य मध्यभागः.

METATHESIS, *s.* अक्षरविपर्य्ययः, वर्णव्यत्ययः, अक्षरपरिवर्त्तनं.

To METE, *v. a.* मा (c. 2. माति -तुं, c. 10. मापयति -यितुं), परिमा, मापनं कृ.

METED, *p. p.* मितः -ता -तं, सम्मितः -ता -तं, परिमितः &c., निर्म्मितः &c.

METEMPSYCHOSIS, *s.* प्राणिनां पुनर्जन्म *n.* (न्), अन्यजन्म *n.*, जन्मान्तरं, जन्मजन्मान्तरं, देहान्तरप्राप्तिः *f.*, शरीरान्तरप्राप्तिः *f.*, रूपान्तरग्रहणं, अन्यशरीरग्रहणं.

METEOR, *s.* उल्का, खोल्का -ल्कः, अग्न्युत्पातः, केतुतारा, शिखावज्ज्योतिस् *n.*, अग्निरेखाकारि गगणात्पतज्ज्योतिस्, उपाहितः, उपग्रहः, उत्पातः, दिव्योत्पातः.

METEORIC, *a.* (Pertaining to meteors) उल्कासम्बन्धी &c., उल्काविषयः -या -यं.—(Proceeding from) उल्कोत्पन्नः -न्ना -न्नं, उल्कोद्भवः -वा -वं, उल्काजः -जा -जं.

METEOROLOGIC, METEOROLOGICAL, *a.* विद्युदुल्कादिविषयकः -का -कं, आकाशोद्भववस्तुसम्बन्धी &c., दिव्युद्भवविषयसम्बन्धी &c., आकाशीयः -या -यं.

METEOROLOGY, *s.* विद्युदुल्कादिविद्या, आकाशोद्भववस्तुविद्या, अन्तरीक्षजविषयविद्या, आकाशविद्या, अन्तरीक्षविद्या, सामान्यवायुविषयका विद्या, वायुचक्रशास्त्रं.

METEOROUS, *a.* उल्कागुणकः -का -कं, उल्काधर्म्मकः -का -कं.

METER, *s.* मापकः, परिमापकः, मापनकर्त्ता *m.* (र्त्तृ), माननिरूपकः.

METHEGLIN, *s.* (Kind of mead) मधु *n.*, मधुपानीयं, मधुनीरं.

METHINKS, *v. impers.* मन्ये, इति मन्ये, इति तर्कयामि.

METHOD, *s.* (Regular arrangement) क्रमः, अनुक्रमः, पर्य्यायः, व्यवस्था, व्यवस्थापनं, क्रमेण स्थापनं, आनुपूर्व्यं, आनुपूर्वी, परिपाटिः -टी *f.*, पारिपाट्यं, परम्परा, पारम्पर्य्यं, विन्यासः, व्यूहनं, व्यूढिः *f.*, प्रतिविधानं, विधानं, संविधानं, रचना, विरचनं -ना, आवृत् *f.*—(Way, mode, process) रीतिः *f.*, मार्गः, विधिः *m.*, विधानं, विधः, प्रकारः, क्रमः, नियमः, सूत्रं, कृतिः *f.*, रूपं, युक्तिः *f.*, पद्धतिः *f.*, न्यायः, मर्य्यादा, वृत्तान्तः, कूम्निः *f.*, क्रिया, धारा; 'in this method,' अनेन विधानेन, अनेन प्रकारेण, अनया रीत्या, अनयर्य्या. *See* MANNER.

METHODICAL, *a.* (Said of persons) नियमशीलः -ला -लं, क्रमशीलः -ला -लं, यथाक्रमकारी -रिणी -रि (न्), क्रमानुगतः -ता -तं, क्रमानुकारी &c., क्रमकः -का -कं, क्रमिकः &c.—(Of things) क्रमिकः -का -कं, क्रमकः -का -कं, यथाक्रमः -मा -मं, सक्रमः -मा -मं, यथानुक्रमः -मा -मं, क्रमानुसारी &c., व्यवस्थितः -ता -तं, सूचितः -ता -तं, यथापर्य्यायः -या -यं, अनुपूर्व्वः -र्व्वी -र्व्वं, अनुक्रान्तः -न्ता -न्तं; 'methodical proceeding,' अनुक्रमः -मणं.

METHODICALLY, *adv.* यथाक्रमं, अनुक्रमेण, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, पर्य्यायेण, यथापर्य्यायं, यथानियमं, यथामार्गं, अनुपूर्व्वशस्, यथासूत्रं, विधितस्; 'done methodically,' अनुक्रान्तः-न्ता-न्तं.

METHODICALNESS, *s.* क्रमशीलता, क्रमिकत्वं, व्यवस्थितिः *f.*, सक्रमता.

METHODISM, *s.* नियमनिष्ठा, नियमासक्तिः *f.*, कर्म्मनिष्ठा.

METHODIST, *s.* नियमनिष्ठः, नियमासक्तः, नियमी *m.* (न्), कर्म्मनिष्ठः.

METHODISTICAL, *a.* नियमनिष्ठाशीलः -ला -लं, नियमनिष्ठासम्बन्धी &c.

To METHODIZE, *v. a.* व्यवस्था in caus. (-स्थापयति -यितुं), व्यवस्थापनं कृ, क्रमेण or यथाक्रमं स्था, विरच् (c. 10. -रचयति -यितुं), विधा (c. 3. -दधाति -धातुं), संविधा, प्रतिविधा, विन्यस् (c. 4. -अस्यति -असितुं) व्यूह् (c. 1. -ऊहते -हितुं).

METHODIZED, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः -ता -तं, विन्यस्तः -स्ता -स्तं, प्रतिविहितः -ता -तं, अनुक्रान्तः -न्ता -न्तं, परिपाटीकृतः -ता -तं.

METONYMICAL, *a.* अजहल्लाक्षणिकः -की -कं, अजहत्स्वार्थलाक्षणिकः -की -कं.

METONYMY, *s.* अजहत्स्वार्था, अजहल्लक्षणा, भक्तिः *f.*

METRE, *s.* छन्दस् *n.*, छन्दः, वृत्तं, वर्णवृत्तं, गणवृत्तं, मात्रछन्दस्, पद्यं, वक्त्रं, वेदः; 'violation of metre,' छन्दोभङ्गः. The following are certain forms of metre explained in Wilson's Dictionary: 1. अनुष्टुप् *f.* (भ्) or श्लोकः, of which varieties are चित्रपदा, माणवकः, विद्युल्लाला, प्रमाणिका, 2. त्रिष्टुप् *f.*, varieties इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः *f.*, रथोद्धता, 3. जगती, varieties वंशस्थविलं, द्रुतविलम्बितं, भुजङ्गप्रयातं, 4. अतिजगती, varieties मञ्जुभाषिणी, प्रहर्षिणी, पुष्पिताग्रा, 5. शक्करी or शक्वरी, varieties वसन्ततिलकः, अपराजिता, वासन्ती, लोला, नान्दीमुखं, 6. अतिशक्करी or अतिशक्वरी, varieties मालिनी or मानिनी, चित्रा, तूणकं, लीलाखेलः, 7. अष्टी, varieties चकिता, पञ्चचामरं, मदनललितं, वाणिः *f.*, प्रवरललितं, 8. अत्यष्टी, varieties शिखरिणी, मन्दाक्रान्ता, हरिणी, भाराक्रान्ता, पृथ्वी-भरः, 9. धृतिः *f.* varieties नाराचः, नन्दनं, शार्दूललालितः, कुसुमितलता, चित्रलेखा, 10. अतिधृतिः *f.* of which varieties are शार्दूलविक्रीडितः, मेघविस्फूर्जितं, सुरसा, फुल्लदाम *n.* (न्), 11. कृतिः *f.*, varieties सुवदना, गीतिका, शोभा, 12. प्रकृतिः, varieties सुन्दरा, सरसी, 13. आकृतिः *f.*, varieties हंसी, मदिरा, 14. विकृतिः *f.*, 15. सङ्कृतिः *f.*, 16. अतिकृतिः *f.*, variety क्रौञ्चपदा, 17. उत्कृतिः *f.*, variety भुजङ्गविजृम्भितं, 18. दण्डकः, varieties जीमूतः, लीला, शङ्खः, व्यालः, प्रचितं, 19. प्रतिष्ठा, varieties कन्या, सती, 20. सुप्रतिष्ठा, varieties पंक्तिः *f.*, प्रिया, 21. मध्या or मध्यमा, varieties नारी, मृगी, 22. उक्था, 23. अत्युक्था, 24. बृहती, varieties भुजङ्गशिशुः *m.*, भुजङ्गसङ्गता, मणिमध्यं, 25. पंक्तिः *f.*, varieties रुक्मवती, मनोरमा, त्वरितगतिः *f.*, 26. उष्णिक् *f.* (ह्), varieties मधुमती, कुमारललिता, 27. गायत्री, varieties तनुमध्या, शशिवदना, this and the preceding are found only in the Vedas. There is another class of metres regulated, not by the number of syllables, but by the number of syllabic instants or short syllables, each long syllable being supposed to contain two short. They are called, 1. आर्य्या, varieties पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः *f.*, उपगीतिः *f.*, उद्गीतिः *f.*, आर्य्यागीतिः *f.*,

2. वैतालीयः, varieties औपछन्दसिकः, दोहडिका.

METRICAL, *a.* छान्दसः -सी -सं, छन्दोयुक्तः -क्ता -क्तं, छन्दोवान् -वती -वत् (त्), छन्दोबद्धः -द्धा -द्धं, छन्दोरूपः -पा -पं, छन्दोविशिष्टः -ष्टा -ष्टं, पद्यरूपः -पा -पं, पद्यात्मकः -का -कं, स्वरबद्धः &c., तालबद्धः &c.

METRONOME, *s.* तालमापकयन्त्रं, तालमापनी.

METROPOLIS, *s.* राजधानं -नी -नकं -निका, राजनगरी, मुख्यनगरी, पुरोत्तमः, कष्टेटः.

METROPOLITAN, *a.* राजधानसम्बन्धी -न्धिनी -न्धि (न्), राजधानीयः -या -यं. —(Archbishop) प्रधानधर्म्माध्यक्षः, मुख्यधर्म्माध्यक्षः, धर्म्माध्यक्षाधिपतिः *m.*

METTLE, *s.* वीर्य्यं, साहसं, सत्त्वं, तेजस् *n.*, प्रभावः, प्रहर्षः, पौरुषं, ओजस्, ऊर्जः, मदः, मादः, मत्तता.

METTLED, METTLESOME, *a.* महासत्त्वः -त्त्वा -त्त्वं, महातेजाः -जा -जः (स्), तेजोवान् -वती -वत् (त्), ओजस्वी -स्विनी -स्वि (न्), साहसिकः -की -कं, वीर्य्यवान् &c., मदोद्धतः -ता -तं, ऊर्जस्वी &c., मत्तः -त्ता -त्तं, मादवान् &c., प्रचण्डः -ण्डा -ण्डं.

METTLESOMENESS, *s.* मत्तता, मदोद्धतिः *f.*, प्रचण्डता, महासत्त्वता.

MEUM ET TUUM, *s.* स्वपरभेदः, आत्मपरभेदः, स्वपरविचारः.

MEW, *s.* (Cage) पञ्जरं, पिञ्जरं, वीतंसः.—(Sea-fowl) जलकुक्कुटः -टी. —(Cry of a cat) मेनादः, मार्जारनादः.

To MEW, *v. a.* (Shut up) पञ्जरे or कारागारे निरुध् (c. 7. -रुणद्धि -रोद्धुं) or अवरुध् or बन्ध् (c. 9. बध्नाति, बन्द्धुं).—(Molt, shed the feathers) पक्षान् or पक्षौघान् पत् (c. 10. पातयति -यितुं) or मुच् (c. 6. मुञ्चति, मोक्तुं) or निर्मुच्, पक्षनिर्मोकं कृ.—(Cry as a cat) मेनादं कृ, मार्जारवद् रु (c. 2. रौति, रवितुं).

To MEWL, *v. n.* शिशुवत् or बालकवत् क्रन्द् (c. 1. क्रन्दति -न्दितुं) or रुद् (c. 2. रोदिति -तुं), शिशुवत् क्रन्दनं कृ or रुदितं कृ or चीत्कारं कृ.

MEWS, *s. pl.* अश्वगोष्ठं, अश्वशाला, राजाश्वस्थानं.

MIASM, MIAS'MA, *s.* वायुदूषकः पूतिगन्धः or कुत्सितगन्धः, रोगजनकः कुवायुः or पूतिवातः, पूतिवाष्पः, मारकवाष्पः, दूषकवाष्पः.

MICA, *s.* अभ्रं, अभ्रकं, स्वच्छपत्रं, निर्मलं.

MICHAELMAS, *s.* वत्सरस्य तृतीयपादावसाने पर्व्व *n.* (न्), शरत्कालीनपर्व्व *n.*

MICROCOSM, *s.* सूक्ष्मजगत् *n.*, सूक्ष्मलोकः, सूक्ष्मसंसारः, क्षुद्रजगत्.

MICROSCOPE, *s.* सूक्ष्मदर्शकयन्त्रं, सूक्ष्मनिरीक्षणयन्त्रं, सूक्ष्मनिरीक्षणकाचः, सूक्ष्मद्रव्यदर्शनार्थं काचयन्त्रं.

MICROSCOPIC, *a.* सूक्ष्मीक्रयन्त्रद्वारेण दृष्टः -ष्टा -ष्टं or उपलब्धः -ब्धा -ब्धं.

MICTURITION, *s.* मिमिक्षा, मेहनेच्छा, मूत्रत्यागेच्छा, मूत्रोत्सर्गेच्छा.

MID, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यस्थः -स्था -स्थं. *See* MIDDLE.

MID-AGE, *s.* मध्यवयस् *n.*, मध्यमवयस् *n.*, आयुर्मध्यं.

MID-COURSE, *s.* अर्द्धमार्गः, अर्द्धपथः, मार्गार्द्धं, मार्गमध्यं.

MID-DAY, *s.* मध्याह्नः, दिनमध्यं, दिवामध्यं, मध्यन्दिनं, उह्निं; 'at mid-day,' दिनमध्ये, मध्याह्ने.

MID-DAY, *a.* माध्याह्निकः -की -कं, माध्यन्दिनः -नी -नं; 'mid-day rites,' माध्याह्निकी क्रिया; 'mid-day meal,' मध्याह्नभोजनं.

MIDDLE, *a.* मध्यः -ध्या -ध्यं, मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं, मध्यस्थितः -ता -तं, मध्यवर्त्ती -र्त्तिनी -र्त्ति (न्), माध्यः -ध्या -ध्यं, माध्यमः -मी -मं, गर्भस्थः &c., गर्भस्थितः -ता -तं; 'middle state,' मध्यस्थता, माध्यस्थ्यं; 'the middle classes,' मध्यमवर्णाः *m. pl.*, मध्यवर्णजाः *m. pl.*, मध्यजातीयाः *m. pl.*

MIDDLE, *s.* मध्यं, मध्यभागः, मध्यदेशः, मध्यस्थानं, मध्यस्थलं, मध्यमप्रदेशः, अभ्यन्तरं, अन्तरं, गर्भः, हृदयं; 'the middle of the arm,' दोर्मध्यं; 'of the night,' रात्रिमध्यं; 'of a house,' गृहाभ्यन्तरं; 'of a bow,' लक्तकः; 'going in the middle,' मध्यगः -गा -गं, मध्यचारी -रिणी -रि (न्); 'in the middle,' मध्ये, मध्यतस्; 'in the middle of the night,' रात्रिमध्ये, महानिशायां; 'in the middle of the Ganges,' मध्येगङ्गं.

MIDDLE-AGED, *a.* मध्यमवयस्कः -स्का -स्कं, मध्यवयस्कः &c., अर्द्धवयस्कः &c., गतयौवनः -ना -नं, अतिक्रान्तयौवनः -ना -नं, अर्द्धवृद्धः -द्धा -द्धं; 'a middle-aged widow,' कात्यायनी.

MIDDLE-EARTH, *s.* मध्यलोकः, मध्यमलोकः, मध्यभुवनं, पृथिवी.

MIDDLE-FINGER, *s.* मध्यमा, मध्या, कणिका, ज्येष्ठः.

MIDDLE-MAN, *s.* मध्यस्थजनः, मध्यवर्त्ती *m.* (न्), मध्यस्थितः.

MIDDLEMOST, *a.* मध्यमः -मा -मं, मध्यमीयः -या -यं, मध्यस्थः -स्था -स्थं.

MIDDLE-SIZED, *a.* मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.

MIDDLING, *a.* मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमीयः -या -यं, माध्यः -ध्यी -ध्यं, माध्यमः -मी -मं.—(Of middle rank) मध्यमवर्णजः -जा -जं, मध्यमपदस्थः -स्था -स्थं.—(Of middle size) मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c., मध्यमः -मा -मं.—(Of middle quality) विगुणः -णा -णं, मध्यमगुणः -णा -णं, सामान्यगुणः &c., सामान्यः -न्या -न्यं, साधारणः -णी -णं.

MIDGE, *s.* सूक्ष्ममशकः, सूक्ष्ममसकः, सूक्ष्ममक्षिका, दंशकः, सूचिवदनः.

MID-HEAVEN, *s.* खमध्यं, गगणमध्यं, अन्तरीक्षमध्यं, दशमलग्नं.

MIDLAND, *a.* मध्यदेशीयः -या -यं, माध्यदेशः -शी -शं, मध्यदेशस्थः -स्था -स्थं, मध्यदेशवर्त्ती -र्त्तिनी -र्त्ति (न्), समुद्रदूरस्थः -स्था -स्थं.

MIDLEG, *s.* जङ्घामध्यं, जङ्घाया मध्यदेशः.

MIDMOST, *a.* मध्यमः -मा -मं. *See* MIDDLEMOST.

MIDNIGHT, *s.* रात्रिमध्यं, मध्यरात्रः, अर्द्धरात्रः, अर्द्धनिशा, महारात्रः, महानिशा, निशीथः, सद्यीवसरः, निःसम्पातः, निसम्पातः; 'at midnight,' रात्रिमध्ये.

MIDRIFF, *s.* शरीरमध्यं, उदरवक्षःस्थलमध्ये शरीरभागः.

MIDSEA, *s.* समुद्रमध्यं, सागरमध्यं, मध्यसमुद्रः.

MIDSHIPMAN, *s.* नाविककर्म्मोभ्यासकृत् *m.*, नाविकशिष्यः.

MIDST, *s.* or *adv.* मध्यं, मध्ये, अन्तरं -रे; 'in the midst,' मध्ये; 'from the midst,' मध्यात्; 'to be in the midst of troubles,' दुःखग्रस्तः -स्ता -स्तं भू, दुःखसागरमग्नः -ग्ना -ग्नं भू. Sometimes मध्ये is put first in a compound; as, 'in the midst of the sea,' मध्येसमुद्रं, मध्येऽर्णवं,

MIDSTREAM, *s.* प्रवाहमध्यं, सरिन्मध्यं; 'in midstream,' सरिन्मध्ये.

MIDSUMMER, *s.* ग्रीष्मकालमध्यं, निदाघकालमध्यं, उष्णकालमध्यं.

MIDWAY, *s.* अर्द्धमार्गः, अर्द्धपथः, मार्गमध्यं, पथमध्यं, मार्गार्द्धं.

MIDWAY, *adv.* अर्द्धमार्गे, अर्द्धपथे, मार्गमध्ये, पथमध्ये, वर्त्ममध्ये.

MIDWIFE, *s.* सविका, प्रसवकारिणी, प्रसवकारयित्री, अपत्यदा, गर्भिण्यवेक्षित्री, धात्री; 'man-midwife,' प्रसवकारी *m.* (न्), प्रसववैद्यः, सूतिवैद्यः, गर्भमोचकवैद्यः.

MIDWIFERY, *s.* प्रसवकर्म्म *n.* (न्), प्रसवकार्य्यं, प्रसवकरणं, प्रसवकारणं, सूतिकर्म्म *n.*, सूतिकरणं, गर्भिण्यवेक्षणं, गर्भमोचनविद्या, बालतन्त्रं, कुमारभृत्या.

MIDWINTER, *s.* शीतकालमध्यं, शिशिरमध्यं, मध्यशिशिरं, हेमन्तमध्यं.

MIEN, *s.* आकारः, वदनाकारः, चर्य्या, गतिः *f.*, रूपं, रीतिः *f.*, चरितं, व्यवहारः, चलनं, वृत्तिः *f.*, चारः, आचारः, आकृतिः *f.*

MIGHT, *s.* बलं, शक्तिः *f.*, सामर्थ्यं, विक्रमः, पराक्रमः, प्रभावः, ऐश्वर्य्यं, प्रतापः, ऊर्जः, अतिशक्तिः *f.*, तेजस्, वीर्य्यं, शौर्य्यं, प्राबल्यं; 'with all one's might,' यथाशक्ति, यथासामर्थ्यं, यथाबलं.

MIGHTILY, *adv.* बलेन, सबलं, ऐश्वर्य्येण, सविक्रमं, सपराक्रमं, प्रभावेण

प्रतापेन, सचीर्य्यं, वीर्य्येण, प्रबलं, बलवत्.—(Greatly) भृशं, अत्यन्तं, अतिमात्रं.

MIGHTINESS, *s.* प्रबलता, प्राबल्यं, सामर्थ्यं, ऐश्वर्य्यं, सबलत्वं, अतिशक्तिता, प्रतापः, प्रभावः, वीर्य्यं, सारता, सप्रतापता, बलीयस्त्वं.

MIGHTY, *a.* प्रबलः -ला -लं, महाबलः -ला -लं, बलवान् -वती -वत् (त्), बली -लिनी -लि (न्), शक्तिमान् -मती &c., अतिशक्तिमान् &c., बलीयान् -यसी -यः (स्), बलिष्ठः -ष्ठा -ष्ठं, महाविक्रमः -मा -मं, उरुविक्रमः &c., गाढविक्रमः &c., महाशक्तिः -क्तिः -क्ति, अर्जितः -ता -तं, ऊर्जस्वी -स्विनी &c., विक्रान्तः -न्ता -न्तं, पराक्रान्तः &c., पराक्रमा &c., विक्रमी &c.—(Great, majestic) महान् -हती -हत् (त्), ऐश्वर्य्यवान् &c., प्रतापी &c., प्रतापवान् &c., महातेजाः -जाः -जः (स्), प्रभावी &c., विभूतिमान् &c., तेजोवान् &c., महौजाः &c., महोदारः -रा -रं; 'mighty lord,' परमेश्वरः, महेश्वरः.

To MIGRATE *v. n.* उत्क्रम् (c. 1. -क्रामति -क्रमितुं), देशाद् देशं भ्रम् (c. 4. भाम्यति, भमितुं), एकदेशं त्यक्त्वा देशान्तरं गम् (c. 1. गच्छति, गन्तुं) or देशान्तरम् अधिवस्, देशान्तरं or स्थानान्तरं गत्वा वस्, देशभ्रमणं कृ, दिग्भ्रमणं कृ, देशाटनं कृ, विदेशगमनं कृ, देशपरिवर्त्तनं कृ.

MIGRATION *s.* उत्क्रमः, उत्क्रमणं, देशान्तरगमनं, स्थानान्तरगमनं, देशभ्रमणं, दिग्भ्रमणं, देशपरिवर्त्तनं, देशाटनं, विदेशगमनं.

MIGRATORY, *a.* देशभ्रमणशीलः -ला -लं, परिभ्रमणशीलः -ला -लं, पर्यटनशीलः -ला -लं, देशपरिवर्त्तनशीलः -ला -लं.

MILCH-COW, *s.* धेनुः *f.*, दोग्ध्री, धेनुका, गोधेनुः *f.*, स्त्रीगवी, पयस्विनी, क्षीरिणी, दुग्धवती, पीनोध्नी, पीवरस्तनी, पीतदुग्धा, नवसूतिका; 'a herd,' धैनुकं.

MILD, *a.* (Soft, not harsh) मृदुः -दुी -दु, मृदुलः -ला -लं, कोमलः -ला -लं, सौम्यः -म्या -म्यं, स्निग्धः -ग्धा -ग्धं, शान्तः -न्ता -न्तं, अनुग्रः -ग्रा -ग्रं, अपरुषः -षा -षं, अप्रखरः -रा -रं, अकर्कशः -शा -शं, श्लक्ष्णः -क्ष्णा -क्ष्णं, मसृणः -णा -णं, सुकुमारः -रा -रं, अचण्डः -ण्डा -ण्डं, अखरः -रा -रं.—(Tender or gentle in temper) मृदुस्वभावः -वा -वं, मृदुभावः -वा -वं, कोमलस्वभावः &c., सौम्यवृत्तिः -त्तिः -त्ति, कोमलान्तःकरणः -णा -णं, दयार्द्रभावः -वा -वं, दयालुः -लुः -लु, दयावान् -वती -वत् (त्), सदयः -या -यं, सान्त्विकः -की -कं, सान्त्विकप्रकृतिः -तिः -ति, निर्गर्वः -र्वा -र्वं.—(Lenient) क्षमावान् &c., सामबुद्धिः -द्धिः -द्धि, अतीक्ष्णः -क्ष्णा -क्ष्णं, अतीव्रः -व्रा -व्रं, अनिष्ठुरः -रा -रं, अनुग्रदण्डः -ण्डा -ण्डं, सामोपचारी -रिणी &c., सामोपायी &c.; 'mild remedy,' सौम्योपचारः, सामोपचारः, बालोपचारः; 'mild means,' सामोपायः; 'by mild means,' सामोपायेन, साम्ना; 'mild air,' मृदुवातः, मृदुवायुः *m.*; 'mild speech,' सान्त्ववादः.

MILDEW, *s.* धूषदूषणं, तरुदूषणं, कलङ्कः, शुक्लकलङ्कः, श्वेतकलङ्कः, दूषणवस्तु *n.*, क्लेदजमलं.

To MILDEW, *v. a.* शुक्लकलङ्केन दुष् (c. 10. दूषयति -यितुं), क्लेदजमलेन दुष् or कलङ्क (nom. कलङ्कयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

MILDEWED, *p. p.* शुक्लकलङ्कदूषितः -ता -तं, कलङ्कितः -ता -तं.

MILDLY, *adv.* मृदु, मृदुलं, कोमलं, सौम्यवत्, अनुग्रं, अपरुषं, अकर्कशं, साम्ना, सामोपायेन, मार्दवेन, समार्दवं, अतीक्ष्णं, अतीव्रं, अचण्डं, अप्रखरं, मन्दं.

MILDNESS, *s.* (Softness, not harshness) मृदुता -त्वं, मार्दवं, स्निग्धिमा *m.* (न्), सौम्यता, कोमलता, स्निग्धता, अनुग्रता, अपरुषता, अकार्कश्यं, शान्तता, शान्तिः *f.*—(Of temper) स्वभावमृदुता, प्रकृतिमृदुता, सौम्यवृत्तिता, कोमलस्वभावः, सान्त्विकप्रकृतिः *f.*, दयालुता.—(Leniency) मृदुता, क्षमा, सौम्यता, साम *n.* (न्), सामबुद्धिः *f.*, अतीक्ष्णता, अतैक्ष्ण्यं, अतीव्रता, दण्डानुग्रता, अनुग्रता, अनुग्रदण्डत्वं, कृपा.

MILE, *s.* The measure called क्रोशः, or kos, is about two English miles. One English mile will therefore be expressed by अर्द्धक्रोशः; 'three miles,' सार्द्धक्रोशः; 'four miles,' क्रोशद्वयं; 'five miles,' सार्द्धद्विक्रोशं; 'six miles,' क्रोशत्रयं.

MILE-STONE, *s.* अर्द्धक्रोशमापकप्रस्तरः, क्रोशमापनपाषाणः.

MILITANT, *a.* युद्धोद्युक्तः -क्ता -क्तं, युद्धोद्यतः -ता -तं, युद्धप्रवृत्तः -त्ता -त्तं, युद्धारूढः -ढा -ढं, युध्यमानः -ना -नं, युद्धकारी -रिणी -रि (न्), सङ्ग्रामोद्युक्तः &c.

MILITARY, *a.* (Pertaining to soldiers or arms) युद्धसम्बन्धी -न्धिनी &c., युद्धविषयकः -का -कं, साङ्ग्रामिकः -की -कं, सामरिकः -की -कं, सैनिकः -की -कं, आयुधिकः -की -कं, क्षात्रः -त्री -त्रं, साम्परायिकः -की -कं; 'military duty,' क्षत्रधर्म्मः, क्षात्रधर्म्मः; 'following it,' क्षत्रधर्म्मानुगः -गा -गं; 'military profession,' शस्त्रवृत्तिः *f.*, शस्त्रास्त्रभृत्त्वं.—(Engaged in the profession of arms) युद्धप्रवृत्तः -त्ता -त्तं, योधी -धिनी -धि (न्), शस्त्रजीवी &c., शस्त्राजीवी &c., शस्त्रोपजीवी &c., आयुधजीवी &c., शस्त्रास्त्रभृत्, शस्त्रभृत्.—(Man of the military class) क्षत्रियः, क्षत्रः, क्षत्री *m.* (न्), राजन्यः, विराट् *m.* (ज्), बाहुजः, मूर्द्धाभिषिक्तः; 'a woman of this class,' क्षत्रिया -यी -याणी; 'the duty of this class,' क्षत्रियधर्म्मः; 'the military class,' क्षत्रियजातिः *f.*

MILITARY, *s.* (The body of soldiers) सैनिकवर्गः, सैन्यवर्गः, सैनिकजातिः *f.*, क्षत्रं, क्षत्रियजातिः *f.*, क्षत्रवर्गः.

To MILITATE, *v. n.* विरुध् (c. 7. -रुणद्धि -रोद्धुं), प्रतिरुध्, विरुद्धः -द्धा -द्धं भू, प्रतिकूल (nom. प्रतिकूलयति -यितुं), विपरीतः -ता -तं भू.

MILITIA, *s.* देशरक्षकाः *m. pl.*, देशरक्षिणः *m. pl.*, नैमित्तिकसैन्याः *m. pl.*

MILK, *s.* दुग्धं, क्षीरं, पयस् *n.*, स्तन्यं, गोदुग्धं, गोरसः -सं, धेनुकादुग्धं, गव्यं, गव्यपयस् *n.*, अवदोहः, दोहः, जघस्यं, जघन्यं, दोहजं, दोहापनयः, पायसं, पीयूषं, पेयं, सोमजं; 'made from milk,' पयस्यः -स्या -स्यं; 'the skim of milk,' दुग्धफेनं; 'yielding much milk,' बहुदुग्धा, दोहीयान् -यसी -यः (स्); 'milk diet,' दुग्धाहारः; 'coagulated milk,' दधि *n.*, क्षीरजं; 'inspissated milk,' क्षीरविकृतिः *f.*; 'drinking milk,' क्षीरपः -पा -पं, क्षीरपायी -यिनी &c.; 'giving milk,' क्षीरदः -दा -दं; 'to give milk,' दुह् (c. 4. दुह्यते), क्षीरं दा.

To MILK, *v. a.* दुह् (c. 2. दोग्धि, दुग्धे, दोग्धुं), निर्दुह्. दोहनं कृ, दुग्धं सु (c. 10. सावयति -यितुं), गोस्तनं पीडयित्वा दुग्धं सु or मोक्ष् (c. 10. मोक्षयति -यितुं) or मुच् (c. 10. मोचयति -यितुं), दुग्धमोक्षणं कृ.

MILKED, *p. p.* दुग्धः -ग्धा -ग्धं, निर्दुग्धः -ग्धा -ग्धं, कृतदोहनः -ना -नं; 'a cow easily milked,' सुखदोह्या, सुखसन्दोह्या, सुव्रता.

MILKER, *s.* दोग्धा *m.* (ग्धृ), दोहकः, दोही *m.* (न्), धुक् *m.* (दुह्).

MILKINESS, *s.* दुग्धता, दुग्धवत्ता, दुग्धिता, क्षीरिता, पायसता, पयस्यत्वं, सक्षीरता, सदुग्धता, दुग्धसादृश्यं, दुग्धसगुणता.

MILK-LIVERED, *a.* भीरुहृदयः -या -यं, क्लीवहृदयः &c., कातरः -रा -रं.

MILK-MAID, *s.* गोदोग्ध्री, गोदोहिनी, गोपी, गोपिनी, गोपिका, आभीरी.

MILK-MAN, *s.* गोधुक् *m.* (-दुह्), दोग्धा *m.* (ग्धृ), दुग्धविक्रेता *m.* (तृ), क्षीरविक्रयी *m.* (न्), गोपः, आभीरः.

MILK-PAIL, MILK-PAN, *s.* दोहनं -नी, गोदोहनी, दुग्धभाण्डं, क्षीरभाण्डं, दुग्धपात्रं, दुग्धभाजनं, दोहनपात्रं, दधिभाण्डं, निपानं, दोहः, पारी.

MILK-PORRIDGE, MILK-POTTAGE, *s.* क्षैरेयी.

MILK-SOP, *s.* क्लीवहृदयः, मृदुहृदयः, कोमलहृदयः, कापुरुषः.

MILK-WHITE, *a.* दुग्धसवर्णः -र्णा -र्णं, क्षीरवच्छुक्लः -क्ला -क्लं, क्षीरवर्णः &c.

MILKWOMAN, *s.* दुग्धविक्रेत्री, दोहिनी, गोपिनी, गोपा, आभीरी, महाशूद्री.

MILKY, *a.* दुग्धी -ग्धिनी -ग्धि (न्), क्षीरी -रिणी &c., पायसः -सी -सं, पयसः -स्या -स्यं, पयस्वी -स्विनी &c., दुग्धमयः -यी -यं, क्षैयैः -यी -यैं.—(Resembling milk) दुग्धसगुणः -णा -णं, क्षीरोपमः -मा -मं, दुग्धसदृशः -शी -शं.—(Yielding milk) क्षीरदः -दा -दं, बहुदुग्धः -ग्धा -ग्धं, दुग्धप्रदः -दा -दं.

MILKY-WAY, *s.* मन्दाकिनी, आकाशगङ्गा, स्वर्गङ्गा, स्वर्नदी, सुरनदी, आकाशनदी, देवनदी, वियद्गङ्गा, नागवीथी, हरिताली.

MILL, *s.* पेषणं, पेषणी -णिः *f.*, पेषणयन्त्रं, पेषणचक्रं, चक्रं.

To MILL, *v. a.* पिष् (c. 7. पिनष्टि, पेष्टुं), चूर्ण् (c. 10. चूर्णयति -यितुं), चूर्णीकृ.—(Beat with the fist) मुष्टिभा तड् (c. 10. ताडयति -यितुं) or प्रह् (c. 1. -हरति -हर्तुं).

MILLENARIAN, MILLENARIAL, *a.* सहस्रवर्षीयः -या -यं, सहस्रवर्षीणः -णा -णं, सहस्रवत्सरी -रिणी -रि (न्), सहस्रवार्षिकः -की -कं, सहस्राब्दिकः -की -कं, सहस्री -स्रिणी &c., साहस्रः -स्री -सं.

To MISUSE, *v. a.* अन्यथा or मिथ्या or वृथा or असम्यक् प्रयुज् (c. 7. -युंक्ते -योक्तुं, c. 10. -योजयति -यितुं) or उपयुज् or विनियुज्, कुप्रयोगं कृ, असत्प्रयोगं कृ, अयुक्तं व्यवहृ (c. 10. -हारयति -यितुं), कुव्यवहारं कृ, दुर्व्यवहारं कृ, अनुचितम् अभ्यस् (c. 4. -अस्यति -असितुं), कुव्यापारं कृ, व्यर्थीकृ, कदर्थीकृ, वृथाकृ.

MISUSED, *p. p.* कुप्रयुक्तः -क्ता -क्तं, कुविनियुक्तः &c., असम्यगुपयोजितः -ता -तं, कुव्यवहृतः -ता -तं, कुव्यवहारितः -ता -तं, मिथ्याप्रयुक्तः &c., कदर्थीकृतः &c.

MITE, *s.* (Small piece of money) कपर्दकः, कपर्दिका, काकिणी, काकिनी, वराटकः, धनलवः, धनलेशः.—(Particle of any thing) कणः, कणिका, लवः, लेशः.

MITER, *s.* धर्मोधिपतिकिरीटः, महाधर्मोधिपक्षमुकुटं.

MITHRIDATE, *s.* विषभञ्जनं, विषनाशनं, विषघ्नं, विषापहारकं.

MITIGABLE, *a.* शमनीयः -या -यं, प्रशमनीयः -या -यं, शाम्यः -म्या -म्यं.

MITIGANT, *a.* शमकः -का -कं, प्रशमनः -ना -नं, शान्तिकः -की -कं, शान्तिदः -दा -दं, शान्तिकरः -रा -रं, उपशायी -यिनी -यि (न्).

To MITIGATE, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, शान्तिदा, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, परिशान्त्व्, अभिशान्त्व्.—(Alleviate pain) दुःखं हृ (c. 1. हरति, हर्तुं) or शम्.—(Lighten) लघ (nom. लघयति -यितुं), लघूकृ, मृदूकृ.—(Diminish) न्यूनीकृ, अल्पीकृ, ऊन (nom. ऊनयति -यितुं).

MITIGATED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, प्रशमितः &c., उपशान्तः &c., मृदूकृतः -ता -तं, लघूकृतः -ता -तं; 'to be mitigated,' शम् (c. 4. शाम्यति, शमितुं).

MITIGATION, *s.* शान्तिः *f.*, शमनं, प्रशमनं, उपशान्तिः, प्रशान्तिः *f.*, उपशमनं, शमः, उपशमः, मृदूकरणं, लघूकरणं, लाघवं, न्यूनीकरणं, न्यूनता, सान्त्वनं -ना; 'of a curse,' उच्छापः.

MITIGATIVE, MITIGATOR. *See* MITIGANT.

MITRE. *See* MITER, *s.*

To MIX, *v. a.* मिश्र् (c. 10. मिश्रयति -यितुं), सम्मिश्र्, व्यामिश्र्, विमिश्र्, मिश्रीकृ, सम्मिश्रीकृ, संयुज् (c. 7. -युनक्ति -योक्तुं -योजयति -यितुं), संसृज् (c. 6. -सृजति -स्रष्टुं), सम्पृच् (c. 7. -पृणक्ति -पर्चितुं), सङ्कृ (c. 6. -किरति -करितुं -रीतुं), एकीकृ, एकत्र कृ, संसर्गं कृ, संसृष्टं -ष्टां कृ, व्यतिकरं कृ, सम्मेलनं कृ.—(Mix confusedly) सङ्करीकृ, सङ्कुलीकृ, सङ्कीर्णीकृ, सङ्कृ; 'mix ingredients,' योगं कृ, संस्कारं कृ, प्रक्षेपं कृ.

To MIX, *v. n.* मिश्रीभू, सम्मिश्रीभू, व्यामिश्रीभू, मिल् (c. 6. मिलति, मेलितुं), सम्मिल् सङ्कृ in pass. (-कीर्य्यते), संयुज् in pass., (-युज्यते), संसृज् in pass. (-सृज्यते), संसृष्टीभू, एकीभू, संयोगं इ (c. 2. एति -तुं), सम्पर्कम् इ, संसर्गम् इ, सङ्करीभू.

MIXABLE, *a.* मिश्रणीयः -या -यं, योजनीयः -या -यं, याव्यः -व्या -व्यं.

MIXED, *p. p.* मिश्रितः -ता -तं, सम्मिश्रितः -ता -तं, मिश्रः -श्रा -श्रं, सम्मिश्रः &c., मिश्रीकृतः -ता -तं, व्यामिश्रः -श्रा -श्रं, संयुक्तः -क्ता -क्तं, संयुतः -ता -तं, संसृष्टः -ष्टा -ष्टं, सङ्कीर्णः -र्णा -र्णं, सम्पृक्तः -क्ता -क्तं, मिलितः -ता -तं, सम्मिलितः &c., सङ्कुलितः &c., संवलितः &c., सन्निपतितः &c., समवेतः &c., सङ्करीकृतः &c., एकीकृतः &c., भावितः &c., करम्बितः &c., सङ्कुलः -ला -लं, सम्पर्की -र्किणी -र्कि (न्), संसर्गी &c., कुशितः -ता -तं; 'mixed with water,' जलमिश्रितः &c., जलसंसृष्टः &c.

MIXEN, *s.* पुरीषादिराशिः *m.*; 'mixen-grown,' विड्भवः -वा -वं.

MIXER, *s.* मिश्रकः, सम्मिश्रकः, मिश्रणकृत्, संयोगकारी *m.* (न्).

MIXTURE, MIXTION, MIXING, *s.* (Act) मिश्रणं, सम्मिश्रणं, मिश्रीकरणं, संयोगः, संयोजनं, सम्मेलनं, संसर्गः, सम्पर्कः, सङ्कलनं, सङ्किरणं, एकीकरणं, सङ्करीकरणं.—(State) मिश्रता, सम्मिश्रता, मिश्रीभावः, संसृष्टता, संसर्गः, संयुक्तता, संयोगः, सम्पर्कः, सङ्कीर्णता, साङ्कर्य्यं.—(Mixed mass) सन्निपातः, नानाद्रव्यसमूहः, सम्मिश्रद्रव्यसमूहः, नानावस्तुसमुदायः, समूहः, सङ्घः, सङ्करः; 'mixture with water,' जलसंसर्गः.

MIZZEN, *s.* (Sail) पश्चिमकूपकसन्धि वातवसनं.

MIZZEN-MAST, *s.* पश्चिमकूपकः, नौपश्चाद्भागस्थः कूपकः.

MIZZLE, *s.* शीकरः, सीकरः, तुषारः. *See To* MISTLE, DRIZZLE.

MNEMONIC, *a.* स्मृतिसहायः -या -यं, स्मृतिप्रवर्त्तकः -का -कं, स्मृत्युपकारकः &c.

MNEMONICS, *s.* स्मरणविद्या, स्मृत्युपकरणविद्या, स्मरणशास्त्रं.

To MOAN, *v. n.* वेदनोपहतत्वाद् दीर्घनादं कृ or दीर्घैरावं कृ, विलप् (c. 1. -लपति -पितुं), प्रलप्, लप्, परिदेव् (c. 1. -देवते -वितुं), क्रन्द् (c. 1. क्रन्दति -न्दितुं), आक्रन्द्, रुद् (c. 2. रोदिति -तुं), प्ररुद् क्रुश् (c. 1. क्रोशति, क्रोष्टुं), स्तन् (c. 1. स्तनति -नितुं), विस्तन्, दीर्घं निःश्वस् or निश्वस् (c. 2. -श्वसिति -तुं), दीर्घं रु (c. 2. रौति, रवितुं), दीर्घचित्कारं कृ, दीर्घनिश्वासं कृ, गम्भीरनादं कृ, गम्भीरनिश्वासं कृ, आर्त्तनादं कृ, आर्त्तरावं कृ, हाहाशब्दं कृ, हाहाकारं कृ, वाश् (c. 1. वाशते, c. 4. वाश्यते -शितुं).

MOAN, *s.* आर्त्तनादः, आर्त्तरावः, दुःखार्त्तस्य दीर्घनादः or दीर्घरावः or दीर्घचित्कारः or गम्भीरनादः, दीर्घनिश्वासः, दीर्घनिःश्वासः, विलपितं, विलपनं, विलापः, परिदेवनं -ना, परिदेवितं, स्तनितं, क्रन्दितं, क्रुष्टं, हाहाकारः.

MOANFUL, *a.* विलापकारी -रिणी -रि (न्), परिदेवी -विनी &c., परिदेवनकारी &c., दीर्घनिश्वासी &c., हाहाकारी &c.

MOANFULLY, *adv.* विलापेन, सविलपितं, सपरिदेवनं, दीर्घनिश्वासपूर्व्वं.

MOANING, *s.* विलपनं, परिदेवनं, आर्त्तनादः, दीर्घनिश्वसितं, स्तननं.

MOAT, *s.* परिखा, खातं, खेयं, खातकं, खातभूः *f.*, खातभूमिः *f.*, प्रतिकूपः, उपकुल्या, कुल्या, खल्लः.

MOATED, *a.* परिखावेष्टितः -ता -तं, परिखावृतः &c., परिखान्वितः &c.

MOB, *s.* अधमजनसमूहः, नीचजनसम्मर्दः, प्राकृतजनसम्मर्दः, बहुजनसमूहः, बहुजनमेलकः, जनसम्मर्दः, लोकसङ्घः, जनसङ्कुलं, जनौघं, जनता, अव्यवस्थितसभा.

To MOB, *v. a.* बहुजनाकीर्णे स्थाने वपुषा संघृष् (c. 1. -र्घर्षति -र्घर्षितुं) or सम्मृद् (c. 9. मृद्नाति -मर्दितुं) or सस्राध् (c. 1. -वाधते -धितुं).

MOBBISH, *a.* लौकिकः -की -कं, सामान्यलोकयोग्यः -ग्या -ग्यं.

MOBILE, MOBILITY, *s.* (Mob, common people) सामान्यलोकः, साधारणलोकः, प्राकृतलोकः, असभ्यलोकः, अन्यलोकः, अधमलोकः, पृथग्जनाः *m. pl.*

MOBILITY, *s.* (Aptitude to motion) गमनयोग्यता, गतियोग्यता, गमनशीलता, चरिष्णुता, जङ्गमता, अस्थिरता, चाञ्चल्यं.

To MOCK, *v. a.* (Deride) अवहस् (c. 1. -हसति -सितुं), अपहस्, उपहस्, प्रहस्, विहस्, अवहासभूमिं कृ, अपहासास्पदं कृ, अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), गर्ह् (c. 1. गर्हते -र्हितुं), अवगर्ह्, अवगुर् (c. 6. -गुरते -रितुं), आक्षर् (c. 10. -क्षारयति -यितुं), अवज्ञा (c. 9. -जानाति -ज्ञातुं), अवमन् (c. 4. -मन्यते -मन्तुं), भर्त्स् (c. 10. भर्त्सयते -यितुं), तिरस्कृ, मुखरीकृ, विकत्थ् (c. 1. -कत्थते -त्थितुं), परिभू, अवज्ञां कृ, तुच्छीकृ.—(Mimic) उपहासबुद्ध्या परचेष्टितानुकरणं कृ or विडम्बनं कृ.—(Deceive) वञ्च् (c. 10. वञ्चयते -यितुं), प्रतृ (c. 10. -तारयति -यितुं), प्रलभ् (c. 1. -लभते -लब्धुं), प्रलुभ् (c. 10. -लोभयति -यितुं), मुह् (c. 10. मोहयति -यितुं).

MOCK, *s.* उपहासः, अवहासः, परिहासः, हास्यं, अवक्षेपः, अवज्ञा.

MOCKED, *p. p.* (Mimicked in derision) उपहासबुद्ध्यानुकृतः -ता -तं.—(Derided) उपहसितः -ता -तं, अवहसितः &c., अवक्षिप्तः -प्ता -प्तं, गर्हितः -ता -तं, विगर्हितः &c., तिरस्कृतः -ता -तं, अवज्ञातः &c., मुखरीकृतः &c., कृतोपहासः -सा -सं.—(Deceived) वञ्चितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, मोहितः &c.

MOCKER, *s.* उपहासकः, अवहासकः, परिहासकर्त्ता *m.* (र्त्तृ), क्षेपकः, अवक्षेपकः, अवज्ञाकारी *m.* (न्), अवमानी *m.*, वञ्चकः.

MOCKERY, MOCKING, *s.* (Derision) उपहासः, अवहासः, अपहासः, परिहासः, परीहासः, हास्यं, तिरस्कारः, अवज्ञा, अवक्षेपः, अवमानं, अपमानं, अवहेला -लनं, अवलेपः, परिभवः, मुखरीकरणं, मौखर्य्यं, अवमानसूचको हासः.—(Subject of derision) उपहासास्पदं, उपहासभूमिः *f.*, अवहासस्थानं, उपहासविषयः, तिरस्कारविषयः, हास्यस्थानं, परिभवास्पदं, परिभवपदं, तिरस्कारपदं.—(Counterfeit appearance, deception, imitation) छद्म *n.* (न्), व्याजः, कपटः -टं, कूटं, वञ्चनं -ना, विडम्बनं.—(Vain effort) वृथायत्नः, वृथाप्रयत्नः, वृथोद्यमः, वृथोद्योगः, अनर्थकचेष्टा, निष्फलचेष्टा.

MOCKINGLY, *adv.* उपहासेन, सोपहासं, सावहासं, सतिरस्कारं, सावक्षेपं.

MODAL, *a.* रूपसम्बन्धी -न्धिनी -न्धि (न्), रूपविषयः -या -यं.

MODE, *s.* (Method, manner) रीतिः *f.*, मार्गः, विधिः *m.*, विधानं, प्रकारः, नियमः, वृत्तिः *f.*, कृतिः *f.*, क्रमः, संविधानं, पर्य्यायः, मर्य्यादा, धारा, विधः in comp.; 'mode of living,' वृत्तिः *f.*; 'in this mode,' अनेन विधानेन, एवंविधं -धेन, अनेन प्रकारेण; 'mode of speaking,' वाग्व्यापारः, वाग्वृत्तिः *f.*—(Form) रूपं, आकारः, आकृतिः *f.*,

संस्कारः.—(Custom) आचारः, व्यवहारः, प्रचारः, रीतिः *f.*, नियमः, अभ्यासः, स्थितिः *f.*, आवृत्तिः *f.*, सम्प्रदायः.—(Fashionable custom) सभ्यलोकव्यवहारः, सभ्यरीतिः *f.*, शिष्टव्यवहारः, शिष्टमार्गः, सभ्यसम्प्रदायः, लोकाचारः.—(In metaphysics) विशेषवस्तुरूपं, विशेषद्रव्यरूपं, विशेषद्रव्यप्रकारः.—(In grammar) वाच्यं.—(In music) रागः *m.*, रागिणी *f.*, वर्णः. The musical modes are personified as either male or female. The male are called Rágas; the female are Ráginís, and are considered to be the wives of the Rágas. The following are some of the names for the male: भैरवः, मालवः, सारङ्गः, हिन्दोलः, वसन्तः, वसन्तदूतः, पञ्चमः, दीपकः, मेघः, नटः, नटनारायणः, कल्याणः, कामबोधः, चोटकः, विभासः. The following are some of the Ráginís, or female personifications: दीपिका, नटी, चोटकी, देशकारी, गौटी, जङ्गला, धनेश्वरी, भैरवी, रामकरी or रामकेली or रामकली, सैन्धवी, पूर्वी, भूपाली, मधुमाधवी.

Model, *s.* (Pattern, representation) प्रतिमा -मानं, प्रतिरूपं, प्रतिकृतिः, आदर्शः, उपमा -मानं, प्रतिमूर्त्तिः *f.*, संस्कारः.—(Pattern, exemplar) आदर्शः, प्रतिमा, उपमा.—(Pattern for imitation) प्रमाणं, प्रमा, प्रमाता *m.* (तृ); 'model of propriety,' न्यायाधारः.—(Mould) संस्कारः, आकारः, संस्थानं, संयानः.

To model, *v. a.* or *n.* संस्कारं कृ, संस्कृ, प्रतिमां कृ, प्रतिरूपं कृ, आदर्शं कृ.—(Shape, form) रूप् (c. 10. रूपयति -यितुं), सरूपं -पां -पं कृ.

Modeler, *s.* उपमाता *m.* (तृ), उपमानकृत् *m.*, प्रतिमानकर्त्री *m.* (र्त्तृ).

Moderate, *a.* (Observing reasonable bounds, applied to persons) परिमिताचारी -रिणी -रि (न्), समवृत्तिः -त्तिः -त्ति, नियतवृत्तिः &c., मर्य्यादानतिक्रमी -मिणी &c., अनतिक्रान्तमर्य्यादः -दा -दं.—(Moderate in desires) अल्पाकांक्षी -क्षिणी &c., अल्पाभिलाषी &c., अलुब्धः -ब्धा -ब्धं, अलोभी &c., अल्पसन्तोषी &c., अल्पसन्तुष्टः -ष्टा -ष्टं, भोगाप्रसक्तः -क्ता -क्तं, अप्रसक्तः &c., अल्पभोगी &c., स्वल्पभोगी &c.—(Not extreme, not excessive) परिमितः -ता -तं, मितः -ता -तं, सपरिमाणः -णा -णं, समः -मा -मं, समर्य्यादः -दा -दं, नियतः -ता -तं, संयतः -ता -तं, सावधिकः -का -कं, अल्पः -ल्पा -ल्पं, स्वल्पः &c.—(In eating) मिताशनः -ना -नं, परिमिताहारः -रा -रं, स्वल्पाहारः -रा -रं, —(Middling in size) मध्यमः -मा -मं, मध्यः -ध्या -ध्यं, मध्यमपरिमाणः -णा -णं, न स्थूलो न सूक्ष्मः &c.

To moderate, *v. a.* (Temper) शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्.—(Lessen) न्यूनीकृ, अल्पीकृ, लघ् (c. 10. लघयति -यितुं), लघूकृ.—(Restrain from excess) नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, संयम्, यम्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), संह्रु (c. 1. -हरति -हर्त्तुं), प्रत्याहृ.

To moderate, *v. n.* (Abate, become less severe) शम् (c. 4. शाम्यति, शमितुं), प्रशम्, उपशम्, विगम् (c. 1. -गच्छति -गन्तुं), विरम् (c. 1. -रमति -रन्तुं), उपरम्, न्यूनीभू, ऊनीभू, अल्पीभू.

Moderated, *p. p.* (Tempered) शमितः -ता -तं, प्रशमितः -ता -तं.—(Lessened) न्यूनीकृतः -ता -तं, न्यूनीभूतः -ता -तं.—(Restrained) यतः -ता -तं, नियतः -ता -तं, निगृहीतः -ता -तं.—(Allayed) शान्तः -न्ता -न्तं, उपशान्तः &c.

Moderately, *adv.* परिमितं, नियतं, समर्य्यादं, समं, सपरिमाणं, अल्पं, स्वल्पं, अभृशं, यावन्नावत्; 'moderately warm,' ईषदुष्णः -ष्णा -ष्णं, कोष्णः &c., मन्दोष्णः &c.; 'moderately ripe,' आपक्वः -क्वा -क्वं; 'moderately distant,' नातिदूरः -रा -रं.

Moderation, *s.* (Refraining from excess) परिमिताचारत्वं, नियतवृत्तित्वं, समवृत्तित्वं, समता, परिमितता, मितता, क्षमा, यमः, संयमः, निग्रहः, दमः, अनतिक्रमः, मर्य्यादानतिक्रमः.—(In desires) अल्पाकांक्षा, अल्पाभिलाषः, अलोभः, अलुब्धता, अल्पसन्तुष्टता, अप्रसक्तिः *f.*, अप्रसक्तता, भोगाप्रसक्तिः *f.*—(Equanimity) क्षमा, क्षान्तिः *f.*, समचित्तत्वं, समानवृत्तिः *f.*, समभावः.

Moderator, *s.* (Restrainer) नियन्ता *m.* (न्तृ), विनियन्ता *m.*, यन्ता *m.*—(At disputations) वादमध्यस्थः, वादसभाध्यक्षः, मध्यस्थः.

Modern, *a.* इदानीन्तनः -नी -नं, अधुनातनः -नी -नं, आधुनिकः -की -कं, वर्त्तमानकालीनः -ना -नं, नूतनकालीनः &c., नूतनः -ना -नं, नवः -वा -वं, सद्यस्कालीनः -ना -नं, नव्यः -व्या -व्यं, नवीनः -ना -नं, नूत्नः -त्ना -त्नं, अर्व्वाचीनः -ना -नं, अप्राचीनः -ना -नं, अपुराणः -णा -णं, अपुरातनः -नी -नं.

Modernness, *s.* नूतनता, नवता, नव्यता, अधुनातनत्वं, सद्यस्कालीनता, वर्त्तमानकालीनता, अप्राचीनता, अपुराणता.

Moderns, *s. pl.* सद्यस्कालीनलोकः, नूतनकालीनलोकः, अधुनातनाः *m. pl.*

Modest, *a.* (Not bold, restrained by a sense of shame or propriety) विनीतः -ता -तं, विनयी -यिनी -यि (न्), लज्जाशीलः -ला -लं, लज्जावान् -वती -वत् (त्), लज्जान्वितः -ता -तं, सलज्जः -ज्जा -ज्जं, व्रीडान्वितः -ता -तं, सव्रीडः -डा -डं, व्रीडितः -ता -तं, ह्रीमान् -मती &c., त्रपावान् &c., त्रपायुक्तः -क्ता -क्तं, त्रपान्वितः &c., त्रपितः -ता -तं, सत्रपः -पा -पं, सविनयः -या -यं, विनयभाक् *m. f. n.* (ज्), अप्रगल्भः -ल्भा -ल्भं, अधृष्टः -ष्टा -ष्टं, शालीनः -ना -नं, ह्रीणः -णा -णं, संह्रीणः &c., ह्रीतः -ता -तं, ह्रीकुः -कुः -कु.—(Unassuming, humble, not proud) निर्गर्वः -र्वा -र्वं, अगर्वः &c., निर्गर्वी &c., अगर्वी &c., गर्वहीनः -ना -नं, निरहङ्कारः -रा -रं, अनहङ्कारी &c., निरभिमानः -ना -नं, अनभिमानी &c., अनुद्धतः -ता -तं, अकत्थनः -ना -नं, अविकत्थनः &c., विनम्रः -म्रा -म्रं, नम्रशीलः -ला -लं, विनतः -ता -तं, निभृतः -ता -तं, प्रमृतः -ता -तं, वश्यात्मा -त्मा -त्म (न्), वशी -शिनी &c.—(Chaste, not loose) अव्यभिचारी -रिणी &c., यतेन्द्रियः -या -यं, सङ्वृत्तः -त्ता -त्तं, अलम्पटः; 'a modest wife,' साध्वी, सती, पतिव्रता.—(Moderate) परिमितः -ता -तं, मितः &c.; 'modest speech,' विनयवाक् *f.* (च्).

Modestly, *adv.* सविनयं, विनयेन, विनयपूर्व्वं, विनीतवत्, सलज्जं, सव्रीडं, सत्रपं, लज्जया, लज्जापूर्व्वं, अगर्व्वेण, अनभिमानेन, अनुद्धतं, विनम्रं.

Modesty, *s.* विनयः, विनीतता, लज्जा, ह्रीः *f.*, व्रीडा, त्रपा, ह्रणिया, ह्रीका, लज्जाशीलता, सलज्जत्वं, सत्रपता, शालीनता, अप्रगल्भता, अप्रागल्भ्यं, अधृष्टता, अधार्ष्ट्यं, मर्य्यादा, मन्दाक्षं, मन्दास्यं; 'false modesty,' मिथ्याविनयः.—(Humility) नम्रता, विनम्रता, नम्रशीलता, विनतिः *f.*, अगर्व्वः, गर्व्वहीनता, अनभिमानं, दर्पहीनता, अनुद्धतिः *f.*, अनौद्धत्यं, वश्यता.—(Chastity) अव्यभिचारः, सङ्वृत्तता; 'in a wife,' साध्वीत्वं, सतीत्वं, पातिव्रत्यं.—(Moderation) परिमितता.

Modicum, *s.* अल्पांशः, अल्पभागः, अल्पमात्रं, अत्यल्पांशः, किञ्चित्, किञ्चन, किञ्चिद्भागः, अल्पिका, लेशः.

Modifiable, *a.* रूपविकारशक्यः -क्या -क्यं, रूपान्तरशक्यः &c., विकार्य्यः -र्य्या -र्य्यं, परिणामशक्यः &c., परिणामान्तरशक्यः &c., परिवर्त्तनीयः -या -यं, विवर्त्तनीयः &c.

Modification, *s.* (The act) रूपान्तरकरणं, परिणामान्तरकरणं, रूपपरिवर्त्तनं, विवर्त्तः -र्त्तनं.—(Particular or different form) रूपभेदः, रूपप्रभेदः, रूपविशेषः, रूपान्तरं.—(Diversity, variety) भेदः, प्रभेदः, विभेदः, विशेषः.—(Altered state) विकारः, विकृतिः *f.*, परिणामः, रूपान्तरं, विपरिणामः.

Modified, *p. p.* (Changed in form) विकारितः -ता -तं, विकृतः -ता

-तं, विकृतरूपः -पा -पं, परिणतरूपः &c., विपरिणामी -मिनी -मि (न्), विकृताकारः -रा -रं.—(Tempered, qualified) शमितः -ता -तं, नियमितः -ता -तं.

To MODIFY, *v. a.* (Change the form) रूपान्तरं कृ, रूपान्तरीकृ, रूपविकारं कृ, रूपपरिवर्त्तनं कृ, रूपभेदं कृ, रूपविभेदं कृ, विकृ, विकारं कृ, रूपं विकृ, अन्यरूपं-पां कृ, भिन्नरूपं-पां कृ, रूपपरिणामं कृ, परिणामान्तरं कृ रूपं परिवृत् (c. 10. -वर्त्तयति -यितुं) or विवृत्, रूपविवर्त्तनं कृ.—(Moderate) शम् (c. 10. शमयति -यितुं), उपशम्, प्रशम्.

MODISH, *a.* सभ्यव्यवहारानुसारी -रिणी -रि (न्), शिष्टरीत्यनुसारी &c., संभ्यमार्गानुयायी -यिनी &c., शिष्टमार्गानुरूपः -पा -पं, सभ्यसम्प्रदायानुसारी &c.

MODISHLY, *adv.* सभ्यव्यवहारानुसारेण, शिष्टरीत्यनुसारेण, सभ्यमार्गानुरूपेण.

To MODULATE, *v. a.* कल् (c. 10. कलयति -यितुं), स्वरलयं कृ, कलतां कृ, स्वरानुक्रमं कृ, स्वरानुपूर्व्यं कृ.—(Inflect or vary sound) स्वरभेदं कृ, स्वरविभेदं कृ, स्वरभङ्गं कृ, स्वरविभङ्गं कृ, स्वरपरिवर्त्तनं कृ.

MODULATION, *s.* कलता, लयः, स्वरलयः, कलनं, स्वरभेदः, स्वरविभेदः, स्वरभङ्गः, स्वरविभङ्गः, स्वरानुक्रमः.—(Transition from one key to another) शुद्धान्तयुक् *f.* (ञ्), स्वरपरिवर्त्तनं.—(Melody) सुस्वरानुक्रमः, स्वरमाधुर्य्यं, माधुर्य्यं, सुश्राव्यस्वरः, तालः.

MODULATOR, *s.* स्वरभेदकारी *m.* (न्), स्वरविभेदकः, लयकारी *m.*

MODULE, *s.* *See* MODEL.

MOHAMMEDAN, *a.* यावनः -नी -नं, यवनदेशीयः -या -यं, यवनधर्म्मसम्बन्धी -न्धिनी -न्धि (न्), यवनधर्म्मावलम्बी -म्बिनी &c.

MOIETY, *s.* अर्द्धं -र्द्धः, अर्द्धभागः, अर्द्धांशः; 'of an estate,' रिक्थार्द्धं.

To MOIL, *v. a.* (Make dirty) मलिन (nom. मलिनयति -यितुं), मलिनीकृ, मलेन दुष् (c. 10. दूषयति -यितुं) or लिप् (c. 6. लिम्पति, लेप्तुं).

To MOIL, *v. n.* (Toil) अतिदेहक्लेशेन आयस् (c. 4. -यस्यति -यसितुं) or श्रम् (c. 4. श्राम्यति, श्रमितुं), अतिशरीरायासं कृ, कष्टं कृ.

MOIST, *a.* आर्द्रः -र्द्रा -र्द्रं, सार्द्रः -र्द्रा -र्द्रं. ईषदार्द्रः, &c., जलार्द्रः &c., क्लिन्नः -न्ना -न्नं, ईषत्क्लिन्नः &c., सिक्तः -क्ता -क्तं, ईषत्सिक्तः &c., उन्नः -न्ना -न्नं, समुन्नः &c., सरसः -सा -सं, सद्रवः -वा -वं, रसयुक्तः -क्ता -क्तं, तिमितः -ता -तं, स्तिमितः -ता -तं, क्लेदः -दा -दं; 'to be moist,' क्लिद् (c. 4. क्लिद्यति), तिम् or स्तिम् (c. 4. तिम्यति or तीम्यति).

To MOISTEN, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं), परिक्लिद्, ईषत् क्लिद्, आर्द्रीकृ, ईषदार्द्रीकृ, सिच् (c. 6. सिञ्चति, सेक्तुं), ईषत् सिच्, जलेन सिच्, उक्ष् (c. 1. उक्षति -क्षितुं), समुक्ष्, उन्द् (c. 7. उनत्ति, उन्दितुं).

MOISTENED, *p. p.* क्लिन्नः -न्ना -न्नं, क्लेदितः -ता -तं, परिक्लिन्नः &c., परिक्लेदितः -ता -तं, आर्द्रीकृतः -ता -तं, सिक्तः -क्ता -क्तं, जलसिक्तः &c., उक्षितः -ता -तं, समुक्षितः -ता -तं, उन्नः -न्ना -न्नं, समुन्नः &c., उन्नः -न्ना -न्नं, तिमितः -ता -तं, स्तिमितः -ता -तं.

MOISTENER, MOISTENING, *s.* or *part.* क्लेदकः -का -कं, क्लेदनः -ना -नं.

MOISTENING, *s.* क्लेदनं, सेचनं, जलसेचनं, उक्षणं, उन्दनं, समुन्दनं.

MOISTNESS, *s.* आर्द्रता, सार्द्रता, ईषदार्द्रता, जलार्द्रता, क्लिन्नता, ईषत्क्लिन्नता, सिक्तता, जलसिक्तता, उन्नता, सरसत्वं.

MOISTURE, *s.* क्लेदः -दं, संक्लेदः, क्लिन्नता, आर्द्रता, तेमः, स्तेमः, तेमनं, चिक्लिदं, रसः, स्नेहः, उन्दनं, समुन्दनं; 'of the lips,' अधररसः, अधरमधु *n.*, अधरामृतं, मुखसुरं.

MOLAR, *a.* (Tooth) दाढा, चर्वणदन्तः, महादन्तः, दंष्ट्रा.

MOLASSES, *s.* इक्षुसारः, इक्षुरसक्काथः, मधुधूलिः *f.*, क्षारः, शर्करक्षारः, रसिका, मधुरं, गुडः -डकं, रसजः, द्रवजः, सितादिः *m.*, पाणिः *f.*

MOLE, *s.* (Spot on the body) तिलः -लकः, तिलकालकः, किणः, सामुद्रं, कालकः, जटुलः.—(Mound) वप्रः -प्रं, पिण्डलः, पिण्डनः, सेतुः *m.*, चयः.—(The animal) छुछुन्दः, छुछुन्दरी, गन्धाश्रयः, विलवासी जन्तुभेदः.

MOLECULE, *s.* अणुः *m.*, परमाणुः, कणः, कणिका, लवः, काकिणिका.

MOLECULISM, *s.* अणिमा *m.* (न्), अणुत्वं.

MOLE-EYED, *a.* सूक्ष्मनयनः -ना -नं, सूक्ष्मदृष्टिः -ष्टिः -ष्टि.

MOLE-HILL, *s.* कृमिशैलः, भूश्रवाः *m.* (स्), वल्मीकः -कं, कूलकः, वम्रीकूटं, मृत्तिकाकूटं, वामलूरं, स्मरीकः.

To MOLEST, *v. a.* आयस् (c. 10. -यासयति -यितुं), बाध् (c. 1. बाधते -धितुं), परिबाध्, प्रबाध्, अधिबाध्, उपरुध् (c. 7. -रुणद्धि -रोद्धुं), रुध्, तप् (c. 10. तापयति -यितुं), सन्तप्, पीड् (c. 10. पीडयति -यितुं), उपपीड्, अभिपीड्, क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं), अर्द् (c. 10. अर्दयति -यितुं).

MOLESTATION, *s.* क्लेशः, बाधः -धा, बाधनं, उपरोधः, पीडा, व्यथा, दुःखं, आयासः, प्रयासः, उपद्रवः, उपप्लवः; 'free from molestation, निरुपद्रवः -वा -वं.

MOLESTED, *a.* बाधितः -ता -तं, पीडितः -ता -तं, क्लिष्टः -ष्टा -ष्टं, क्लेशितः -ता -तं, परिक्लिष्टः -ष्टा -ष्टं, उपरुद्धः -द्धा -द्धं, व्यथितः -ता -तं, उपद्रुतः -ता -तं.

MOLLIENT, *a.* मृदुकारी -रिणी -रि (न्), स्निग्धकारी &c. *See* EMOLLIENT.

MOLLIFICATION, *s.* मृदूकरणं, स्निग्धीकरणं, शमनं, प्रशमनं, उपशमनं.

MOLLIFIED, *p. p.* मृदूकृतः -ता -तं, शमितः -ता -तं, उपशान्तः -न्ता -न्तं.

To MOLLIFY, *v. a.* मृदूकृ, स्निग्धीकृ, कोमलीकृ, शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्.

MOLLUSCA, *s. pl.* कोमलशरीरविशिष्टा प्राणिजातिः.

To MOLT, *v. a.* *See To* MOULT.

MOLTEN, *a.* विलीनः -ना -नं, द्रुतधातुमयः -यी -यं, विलीनधातुमयः &c.

MOMENT, *s.* (Minute portion of time) क्षणः, विपलं, पलं, त्रुटिः *f.*, निमेषः, निमिषः, मात्रा; 'the present moment,' आपातः; 'for the present moment,' आपाततस्; 'in a moment,' क्षणात् क्षणेन, निमेषमात्रेण, क्षणमात्रेण, क्षणान्तरे, एकपदे, एकविपले; 'for a moment,' क्षणं -णेन, क्षणमात्रं, निमेषमात्रं, मुहूर्त्तं; 'at that moment,' तत्क्षणात् -णे, तत्काले, तदानीमेव; 'every moment,' प्रतिक्षणं, अनुक्षणं, क्षणे क्षणे; 'the next moment,' क्षणान्तरं; 'auspicious moment,' लग्नं. *See* INSTANT. (Importance) गुरुता -त्वं, गौरवं, प्रभावः, भारः.

MOMENTARILY, *adv.* क्षणे -णं -णात्, तत्क्षणे, प्रतिक्षणं, सद्यस्, सपदि, क्षणमात्रं, निमेषमात्रं.

MOMENTARY, *a.* क्षणिकः -का -की -कं, क्षणी -णिनी -णि (न्), क्षणभूतः -ता -तं, क्षणमात्रस्थायी -यिनी &c., क्षणस्थायी &c., अत्यल्पकालस्थायी &c., अल्पकालीनः -ना -नं, अत्यल्पकालीनः -ना -नं, अचिरः -रा -रं, अचिरस्थायी &c., साद्यस्कः -स्की -स्कं, नैमिषः -षी -षं, नैमिषिकः -की -कं, तत्क्षणिकः -की -कं, तात्कालिकः -की -कं, क्षण in comp.; as, 'a momentary obstacle,' क्षणविघ्नः; 'a momentary flash,' क्षणप्रभा.

MOMENTOUS, *a.* गुरुः -रुी -रु, गुर्वर्थः -र्थी -र्थं, बह्वर्थः &c., महार्थः &c. गुरुप्रभावः -वा -वं, अलघुः -घुः -घु; 'a momentous affair,' गुरुकार्य्यं. *See* IMPORTANT.

MOMENTOUSNESS, *a.* गुरुता -त्वं, गौरवं, गुर्वर्थता, प्रभावः, अलघुता.

MOMENTUM, *s.* वेगः, आवेगः, संवेगः, आपातः, गतिवेगः.

MONACHAL, *a.* मठदाससम्बन्धी -न्धिनी -न्धि (न्). *See* MONASTIC.

MONACHISM, *s.* मठवासः, मठाध्यासनं, वनवासः, वानप्रस्थता, अरण्यवासः, वैखानसवृत्तिः *f.*, संसारत्यागः, उदासीनता.

MONAD, MONADE, *s.* तन्मात्रं, मात्रं, अणुमात्रं, अभेद्यवस्तु *n.*, अच्छेद्यवस्तु *n.*, अदृश्यवस्तु *n.*, अखण्डनीयवस्तु.

MONARCH, *a.* राजा *m.* (न्), नृपतिः *m.*, भूपतिः *m.*, नृपः, पार्थिवः, भूपः, नरपतिः *m.*, महीपतिः *m.*, अधिपः, अधिपतिः *m.*, महाराजः, अधिराजः, ईश्वरः, अधीश्वरः; 'universal monarch,' सम्राट् *m.* (ज्), मण्डलेश्वरः, चक्रवर्त्ती *m.* (न्). *See* KING.

MONARCHAL, MONARCHIC, MONARCHICAL, *a.* (Relating or suited to a monarch) राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजोचितः -ता -तं, आधिराजिकः -की -कं, राज in comp.—(Vested in a single ruler) एकराजाधीनः -ना -नं, एकराजायत्तः -त्ता -त्तं, सम्राडधीनः -ना -नं, एकराजकः -का -कं, एकप्रभुकः -का -कं.

MONARCHY, *s.* एकराजशासनं, एकराजाधिपत्यं, एकाधिपत्यं, एकराजकत्वं, एकभर्त्रैकत्वं, एकस्वामित्वं, राजत्वं, राज्यं, नृपत्वं, नरेन्द्रत्वं.

MONASTERY, *s.* मठः, आश्रमः, वानप्रस्थाश्रमः, मुनिवासः, मुनिवासस्थानं, धर्म्मशाला, पुण्यस्थानं, पुण्यालयः, पुण्यवनं.

MONASTIC, MONASTICAL, *a.* मठवाससम्बन्धी -न्धिनी -न्धि (न्), आश्रमसम्बन्धी &c., आश्रमी -मिणी &c., आश्रमिकः -की -कं, मुनिसम्बन्धी &c

MONDAY, *s.* सोमवारः, चन्द्रवारः, इन्दुवारः, सोमवासरः.

MONETARY, *a.* मुद्रासम्बन्धी -न्धिनी -न्धि (न्), मौद्रिकः -की -कं.

MONEY, *s.* (Coin) मुद्रा, दीनारः, नाणकं, टङ्कः, टङ्ककः, निष्कः -ष्कं, कार्षापणं.—(Riches, wealth) धनं, अर्थः, वित्तं, द्रव्यं, विभवः, वैभवं, सम्पत्तिः *f.*, रिक्थं, धनसम्पत्तिः *f.*, धनबाहुल्यं, धनसमृद्धिः *f.*, धनवैपुल्यं, 'love of money,' धनलोभः, अर्थलोभः, धनाशा; 'making money,' धनार्जनं, द्रव्यार्जनं.

MONEY-BAG, *s.* कोषः, कोशः, धनकोषः, मुद्राकोषः.

MONEY-BOX, *s.* मुद्राभाण्डं, मुद्रापात्रं, धनभाण्डं, दीनारभाण्डं.

MONEY-CHANGER, *s.* मुद्रापरिवर्त्तकः, हुण्डिकापत्रसुवर्णरूप्यादिपरिवर्त्तकः, धनव्यापारी *m.* (न्), मुद्राव्यापारी.

MONEYED, *a.* धनवान् -वती -वत् (त्), धनी -निनी -नि (न्), धनिकः -का -कं, सधनः -ना -नं, धनाढ्यः -ढ्या -ढ्यं, महाधनः -ना -नं, द्रव्यवान् &c., वित्तवान् &c.

MONEY-LENDER, *s.* कुसीदिकः, कुसीदः -दा -दं, कौसीदिकः, कुसीदजीवी *m.* (न्), वार्धुषिकः, वृद्धिजीवी *m.*, निषिद्धवृद्युपजीवी *m.* (न्), कलोपजीवी *m.*, ऋणदाता *m.* (तृ), धनिकः, धनप्रयोगी *m.* (न्).

MONEY-LESS, *a.* धनहीनः -ना -नं, अधनः -ना -नं, निर्धनः -ना -नं, द्रव्यहीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., क्षीणधनः &c., गतार्थः -र्था -र्थं.

MONGER, *s.* व्यापारी *m.* (न्), व्यवसायी *m.* (न्), क्रयविक्रयिकः, विक्रेता *m.* (तृ), वणिक् *m.* (ज्).

MONGREL, *a.* सङ्कीर्णजातीयः -या -यं, सङ्करजातीयः -या -यं, सङ्करजातः -ता -तं, सङ्करजः -जा -जं, विजातीयः -या -यं, सङ्कीर्णः -र्णा -र्णं.

MONITION, *s.* उपदेशः, प्रत्यादेशः, प्रबोधः -धनं, मन्त्रणं, बोधः -धनं.

MONITOR, *s.* (Warner, admonisher) मन्ता *m.* (तृ), अभिमन्ता *m.*, मन्त्री *m.* (न्), बोधकः, प्रबोधकः, उपदेशकः, प्रत्यादेशकः, शिक्षकः.—(In a school) उपशिक्षकः, उपगुरुः *m.*

MONITORIAL *s.* उपशिक्षकसम्बन्धी -न्धिनी &c., उपशिक्षासम्बन्धी &c.

MONITORY, MONITIVE, *a.* उपदेशकः -का -कं, उपदेशात्मकः -का -कं, उपदेशरूपः -पा -पं, शिक्षकः -का -कं, उद्बोधकः -का -कं, प्रबोधकः &c.

MONK, *s.* मठवासी *m.* (न्), मुनिः *m.*, सन्न्यासी *m.* (न्), योगी *m.* (न्), यती *m.* (न्), तपस्वी *m.* (न्), वैखानसः, उदासीनः, वैरागी *m.* (न्), वैरागिकः, वैराग्याश्रमी *m.*, वानप्रस्थः, संसारत्यागी *m.*, लोकत्यागी *m.*, सर्व्वसङ्गपरित्यागी *m.*

MONKEY, *s.* वानरः, कपिः *m.*, प्लवगः, प्लवङ्गः -ङ्गमः, मर्कटः, शाखामृगः, वृक्षचरः, कम्पी *m.* (न्), कम्पाकः, कम्पारुः *m.*, वनौकाः *m.* (स्), बलिमुखः, बलीमुखः, कलिप्रियः, कीशः, हनुमान् *m.* (त्), रामदूतः; 'Female monkey,' वानरी *f.*, मर्कटी; 'monkey-like,' कापेयः -यी -यं; 'monkey-tricks,' वानरचेष्टा, मर्कटचेष्टा.—(Iron weight) लोहभारः.

MONKISH, *a.* मुनिसम्बन्धी -न्धिनी &c., मुनिसदृशः -शी -शं.

MONOCHORD, *s.* एकतन्त्री *m.* (न्), एकतारी *m.* (न्), एकतन्त्रीवाद्यं.

MONOCULAR, MONOCULOUS, *a.* एकाक्षः -क्षा -क्षं, एकलोचनः -ना -नं, एकनेत्रः -त्रा -त्रं, काणः -णा -णं, एकाक्षिविकलः -ला -लं.

MONOGAMIST, *s.* एकपत्नीकः, एकभार्य्यकः, सकृद्विवाही *m.* (न्), अपुनर्विवाही *m.*, एकस्त्रीकः.

MONOGAMY, *s.* एकपत्नीव्रतं, एकभार्य्याव्रतं, एकस्त्रीविवाहः, सकृद्विवाहः, अपुनर्विवाहः.

MONOGRAM, *s.* परस्परसंयुक्तं नामाद्याक्षरं.

MONOLOGUE, *s.* आत्मभाषणं, आत्मगतभाषणं, स्वगतभाषणं, स्वसमीपभाषणं,

MONOMACHY, *s.* द्वन्द्वयुद्धं, द्वन्द्वं, द्वन्द्वायोधनं, नियुद्धं.

MONOMANIA, *s.* एकविषयोन्मादः, एकविषयविक्षेपः, एकविषयभ्रान्तिः *f.*

MONOMANIAC, *s.* एकविषयोन्मत्तः, एकविषयविक्षिप्तः, एकविषयभ्रान्तः.

MONOPETALOUS, *a.* एकदलकः -का -कं, एकदलविशिष्टः -ष्टा -ष्टं.

MONOPOLIST, MONOPOLIZER, *s.* (One who purchases the whole of a commodity) पूर्व्वक्रेता *m.* (तृ), पूर्व्वक्रयी *m.* (न्), सर्व्वभाण्डक्रेता, एकध्यवसायी *m.*—(One who takes the whole) पूर्व्वग्राहकः, सर्व्वग्राहकः.

To MONOPOLIZE, *v. a.* (Purchase the whole of a commodity with the view of selling at higher prices) अधिकमूल्यविक्रयबुद्ध्या सर्व्वभाण्डं पूर्व्वं क्री (c. 9. क्रीणाति -णीते, क्रेतुं) or सर्व्वपण्यद्रव्याणि पूर्व्वं क्री or सर्व्वद्रव्याणां पूर्व्वक्रयं कृ.—(Take or obtain the whole) सर्व्वं ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or प्राप् (c. 5. -आप्नोति -आप्तुं), साकल्यं ग्रह् or पूर्व्वं ग्रह्.—(Have the sole right of dealing) एकव्यवसायं कृ, एकव्यापारं कृ, क्रयविक्रयाधिकारम् एकतो or असामान्येन धृ (c. 10. धारयति -यितुं).

MONOPOLIZED, *p. p.* पूर्व्वगृहीतः -ता -तं, पूर्व्वक्रीतः -ता -तं, पूर्व्वप्राप्तः &c.

MONOPOLY, *s.* एकव्यवसायः, एकव्यापारः, एकव्यवहारः, एकपणायां, एकवाणिज्यं, असामान्यव्यवहारः, एकप्रयोगः, असामान्यप्रयोगः, क्रयविक्रययोर् एकाधिकारः.

MONOSYLLABIC, *a.* एकाक्षरः -रा -रं, एकाक्षरी -रिणी -रि (न्).

MONOSYLLABLE, *s.* एकाक्षरं, एकाक्षरशब्दः, एकाक्षरविशिष्टः शब्दः.

MONOTHEISM, *s.* अद्वैतं, अद्वैतवादः, केवलेश्वरवादः, केवलेश्वरमतं.

MONOTHEIST, *s.* अद्वैतवादी *m.* (न्), अद्वयवादी *m.*, केवलेश्वरवादी *m.*

MONOTONOUS, *a.* (Having but one tone) एकस्वरः -रा -रं, एकतानः -ना -नं, एकस्वनः -ना -नं, समस्वरः -रा -रं, समानस्वरः -रा -रं, अनन्यस्वरः -रा -रं.—(Always the same, tediously uniform) एकरूपः -पा -पं, एकप्रकारः -रा -रं, समरूपः -पा -पं, समानरूपः -पा -पं, समसमानः -ना -नं, एकसारः -रा -रं, निर्विकारः -रा -रं, निर्विक्रियः -या -यं, अविशेषः -षा -षं, एकरङ्गी -ङ्गिणी &c.

MONOTONOUSLY, *adv.* एकस्वरेण, समस्वरेण, एकरूपेण, समरूपेण, समसमानं, निर्विकारं, अविकारेण.

MONOTONY, *s.* (Sameness of tone) एकस्वरः, स्वरैक्यं, स्वराभेदः, स्वरसमता, स्वरसमानता, समानस्वरत्वं, स्वरभेदाभावः.—(Dull uniformity)

एकरूपता, समरूपता, समसमानता, समानरूपता, एकव्यापारत्वं, समव्यापारत्वं, व्यापाराभेदः, विकाराभावः, विशेषाभावः.

Monsoon, *s.* (Rainy season) वृष्टिकालः, मेघागमः, मेघकालः, मेघसमयः, घनसमयः, पर्जन्यकालः, जलदागमः, प्रावृट्कालः.

Monster, *s.* (Something unnatural) अद्भुतं, अद्भुतविषयः, अद्भुतवस्तु *n.*, अपूर्वविषयः, महोद्भुतं.—(Something deformed) अपरूपवस्तु *n.*, विरूपविषयः, अपरूपं, अपरूपता, वैरूप्यं.—(A being enormously large or very frightful) राक्षसशरीरः, भीमशरीरः, विकटाकारः, विकटरूपः, घोररूपी *m.* (न्), सुवृहत्परिमाणः.—(Horribly wicked person) राक्षसः, रावणः, घोरकर्म्मा *m.* (न्).

Monstrosity, *s.* *See* Monster.

Monstrous, *a.* (Unnatural, extraordinary, out of the course of nature) अद्भुतः -ता -तं, महोद्भुतः -ता -तं, अपूर्वः -र्वा -र्वं, विलक्षणः -णा -णं, विलक्षः -क्षा -क्षं, सृष्टिमार्गविहर्गतः -ता -तं, सृष्टिरीतिवाह्यः -ह्या -ह्यं, सृष्टिक्रमवाह्यः &c.—(Deformed) अपरूपः -पा -पं, विरूपः -पा -पं.—(Enormously large) राक्षसशरीरः -रा -रं, अतिवृहच्छरीरः -रा -रं, विकटशरीरः &c., अतिमहान् -हती -हत् (त्), सुमहान् &c., अतिवृहन् -हती &c., सुवृहत्परिमाणः -णा -णं.—(Frightful) घोररूपी -पिणी &c., घोराकृतिः -तिः -ति, विकटाकारः -रा -रं, भीमदर्शनः -ना -नं, रौद्रदर्शनः &c., करालरूपः -पा -पं.—(Atrocious) दारुणः -णा -णं, अघोरः -रा -रं, विकटः -टा -टं.

Monstrously, *adv.* अद्भुतं, विकटं, दारुणं, भृशं, अतिशयं -येन, अतीव.

Monstrousness, *s.* अद्भुतता, अघोरता, घोरता, दारुणता, विकटता.

Month, *s.* मासः, मास् *m.*, पक्षद्वयं, पक्षयुगं, नाक्षत्रं, यव्यः, वर्षांशः, वर्षाङ्गः. The following are the twelve Hindu months, 1. चैत्रः, corresponding to the last half of March and the first half of April, 2. वैशाखः, April, May, 3. ज्येष्ठः, May, June, 4. आषाढः, June, July, 5. श्रावणः, July, August, 6. भाद्रः or भाद्रपदः, August, September, 7. आश्विनः or आश्वयुजः, September, October, 8. कार्त्तिकः, October, November, 9. मार्गशीर्षः, November, December, 10. पौषः, December, January, 11. माघः, January, February, 12. फाल्गुनः, February, March.—(Lunar month) चान्द्रमासः; 'half of a lunar month,' पक्षः; 'light or first half of the month,' शुक्लपक्षः, शुद्धपक्षः, सितपक्षः, पूर्वपक्षः, प्रथमपक्षः, देवपक्षः; 'dark or second half of the month,' कृष्णपक्षः, तमिस्रः, तमिस्रपक्षः, उत्तरपक्षः, अपरपक्षः, बहुलः; 'last day of the half-month,' पक्षान्तः, पक्षावसरः.—(Solar month) सौरमासः, सौरः; 'a month old,' मासजातः -ता -तं, मासीनः -ना -नं.

Monthly, *a.* मासिकः -की -कं, मासीनः -ना -नं, मास्यः -स्या -स्यं, प्रतिमासिकः -की -कं, मासानुमासिकः -का -कं; 'half-monthly,' आर्द्धमासिकः -की -कं, पाक्षिकः -की -कं; 'monthly allowance,' मासिकं.

Monthly, *adv.* प्रतिमासं, मासे मासे, मासि मासि, अनुमासं.

Monument, *s.* (Memorial) स्मरणार्थकचिह्नं.—(Tomb, monument to the dead) चित्यं, चैत्यं, चिताचूडकं, चैत्रः, स्तूपः, समाधिः *m.*

Monumental, *a.* (Memorial) स्मरणार्थकः -का -कं.—(Belonging to a tomb) चैत्यसम्बन्धी -न्धिनी -न्धि (न्).

Mood, *s.* (Temper of mind) वृत्तिः *f.*, चित्तवृत्तिः *f.*, मनोवृत्तिः *f.*, भावः, मनोभावः, प्रकृतिः *f.*, मनःस्थितिः *f.*, मनोवस्था; 'cheerful mood,' आनन्दवृत्तिः *f.*, हास्यवृत्तिः *f.*—(In grammar) वाच्यं, अर्थः.—(In logic) प्रकारः, रूपं.

Moodiness, *s.* उदासीनता, क्रोधशीलता, विषण्णता, काकैश्यं, वक्रता.

Moody, *a.* क्रोधवशाद् उदासीनः -ना -नं or उदासवृत्तिः -त्तिः -त्ति or विषण्णः -ण्णा -ण्णं, क्रोधशीलः -ला -लं, उत्कण्ठितः -ता -तं, दीनमनाः -नाः -नः (स्), उद्विग्नमनाः &c., चिन्तोद्विग्नः -ग्ना -ग्नं, ककैशभावः -वा -वं, वक्रभावः &c., रुष्टः -ष्टा -ष्टं.

Moon, *s.* चन्द्रः -न्द्रकः, चन्द्रमाः *m.* (स्), सोमः -मा *m.* (न्), इन्दुः *m.*, विधुः *m.*—(Marked like a hare or rabbit) शशी *m.* (न्), शशाङ्कः, शशधरः, शशभृत् *m.*, शशविन्दुः *m.*, शशलाञ्छनः.—(Marking the night) रजनीकरः, निशाकरः, क्षपाकरः, निशाकेतुः *m.*—(Lord of the night) निशापतिः *m.*, क्षपानाथः, यामिनीपतिः *m.*, निशीथिनीनाथः, रजनीनाथः.—(Gem of the night) रात्रिमणिः *m.*, निशामणिः.—(Lord of the constellations) नक्षत्रनाथः, नक्षत्रपः, ऋक्षेशः, उडुपः, उडुपतिः, उडुराट् *m.* (ज्), दाक्षायिणीपतिः *m.*, ताराधिपतिः *m.*, भपतिः *m.*—(The repository and producer of nectar or ambrosia, which is supposed to be distilled in its rays) अमृतसूः *m.*, अमृतदीधितिः *m.*, अमृताधारः, अमृतसुत् *m.*, सुधानिधिः *m.*, सुधाधारः, सुधाभृतिः *m.*, सुधासूतिः *m.*, सुधांशुः, सुधाकरः, सुधाङ्कः, पीयूषरुचिः *m.*, पीयूषमहाः *m.* (स्), पीयूषनिधिः *m.*—(Having cool rays or radiance) शीतांशुः *m.*, शीतमयूखः, शीतमरीचिः *m.*, शीतभानुः *m.*, हिमांशुः *m.*, हिमकरः, हिमरश्मिः *m.*, हिमद्युतिः *m.*, शीतरुक् *m.* (च्), शीतगुः *m.*, हिमश्रयः, प्रालेयांशुः *m.*, तुहिनांशुः *m.*—(Having white rays or pale radiance) शुभांशुः *m.*, सितांशुः, सितरश्मिः *m.*, सितदीधितिः *m.*, श्वेतधामा *m.* (न्), श्वेतरोचीः *m.* (स्), शुचिरोचीः *m.* (स्), छायाभृत् *m.*—(Marked like a deer) मृगाङ्कः, मृगविभुः *m.*, हरिणाङ्कः, हरिणकलङ्कः, मृगलाञ्छनः, मृगधरः, छायामृगधरः.—(Containing many digits) कलानिधिः *m.*, कलापूर्णः, कलावान् *m.* (त्), कलाभृत् *m.*, कलापतिः *m.*—(Forming the crest of Siva) शिवशेखरः, हरशेखरः, हरचूडामणिः *m.*—(Brother of Lakshmí, as having been reproduced with that goddess from the ocean when it was churned by the gods and asuras) लक्ष्मीसहजः, श्रीसहोदरः.—(Husband of Rohiní) रोहिणीपतिः *m.*, रोहिणीशः, रोहिणीवल्लभः.—(The butter of the ocean, or produced by the churning of the ocean) अम्भिनवनीतकः.—(Friend, companion or lord of the lotuses, many of these flowers opening their petals in the night and closing them in the day) कुमुदबान्धवः, कुमुदबन्धुः *m.*, कुमुदपतिः, कुमुदेशः, कुमुदप्रियः, कुमुदिनीपतिः *m.*, कुमुदिनीनायकः, अब्जः.—(Lord of plants or herbs) ओषधीनाथः, ओषधीपतिः *m.*, ओषधीशः.—(Drawn by white horses) श्वेतवाजी *m.* (न्), श्वेतवाहनः.—(Drawn by ten horses) दशवाजी *m.*—(Dispeller of darkness) तमोहरः, तमोनुद् *m.*, तमोनुदः, तमोघ्नः, तमोपहः, तिमिररिपुः *m.*—(Regulating the days of the month) तिथिप्रणीः *m.*, पञ्चदिधिः *m.* (Garlanded with stars) तारापीडः.—(King of kings) राजराजः.—(Broken-bodied, having been cut in two by the trident of Siva, as a punishment for having violated the wife of Vrihaspati) भग्नात्मा *m.*—(Lord of Brahmans) द्विजपतिः *m.*, द्विजराजः.—(Lord of the moonlight) कौमुदीपतिः *m.* Other names for the moon of less obvious derivation are जैवातृकः, द्यौः, कैरवी *m.* (न्), कलाधिनी, हरिः *m.*, माम् *m.*, चन्द्रः; 'the autumnal moon,' शरच्चन्द्रः; 'orb or disk of the moon,' चन्द्रबिम्बः, चन्द्रमण्डलं, चन्द्रगोलः -लं; 'day of the moon,' तिथिः.

See LUNAR; 'digit of the moon,' चन्द्रकला, चन्द्ररेखा, इन्दुरेखा, चन्द्रलेखा; 'full moon,' पूर्णचन्द्रः, पूर्णिमा, पूर्णेन्दुः *See* FULL MOON; 'new moon,' नवशशी *m.* (न्), नवचन्द्रः, अमा, अमावसी, अमावासी, अमावस्या, अमावास्या, अमामसी, प्रतिपच्चन्द्रः, दर्शः, सूर्येन्दुसङ्गमः, कुहूः *f.*, तिथिक्षयः, नष्टेन्दुकला; 'moon of the first quarter,' बालचन्द्रः; 'day of new moon,' मासान्तः; 'full or new moon, or the last day of a lunar fortnight,' पञ्चदशी, पक्षान्तः; 'the first day of the moon's increase or wane, or of a lunar fortnight,' प्रतिपद् *f.*; 'fortnight of the waxing moon,' शुक्लपक्षः, सितपक्षः, शुद्धपक्षः; 'fortnight of the waning moon,' कृष्णपक्षः, तमिस्रपक्षः, उत्तरपक्षः; 'the full or change of the moon, or the junction of the 15th and 1st of a half-month, पर्व्वसन्धिः *m.*, प्रतिपत्पञ्चदश्योरन्तरं; 'moon a little gibbous, or one digit less than full,' अनुमतिः *f.*, कलाहीनः; 'moon a little horned,' सिनीवाली; 'half moon,' चन्द्रार्द्धं; 'a false moon,' चन्द्राभासः; 'having a face like the moon,' चन्द्रमुखी *f.*, शशिवदना; 'rise of the moon, चन्द्रोदयः; 'spot's on the moon's disk,' लाञ्छनं, कलङ्कः; 'the wife of the moon,' रोहिणी, चन्द्रकान्ता.

MOON-BEAM, *s.* चन्द्रपादः, शशिपादः, चन्द्रकिरणः, चन्द्ररश्मिः *m.*, शशिकिरणः, शशिकरः, शशिमयूखः, अंशुः *m.*, सोमांशुः *m.*, चन्द्रांशुः *m.*, चन्द्रिका, चन्द्रमरीचिः *m.*, पूर्णानकं.

MOONLESS, *a.* चन्द्रहीनः -ना -नं, शशिहीनः &c., नष्टचन्द्रः -न्द्रा -न्द्रं.

MOONLIGHT, *s.* चन्द्रप्रभा, शशिप्रभा, चन्द्रप्रकाशः, चन्द्रिका, चन्द्रिमा, ज्योत्स्ना, चन्द्रज्योतिस् *n.*, चन्द्रातपः, चन्द्रगोलिका, कौमुदी, चन्द्रशाला, दीपिका, चान्द्री, मालती, तुहिनं, अमृततरङ्गिणी, कैरवी, हरिचन्दनं, मुदी, चन्दकः.

MOONLIGHT, *a.* ज्यौत्स्नः -त्स्नी -त्स्नं, ज्योत्स्नायुक्तः -क्ता -क्तं; 'a moonlight night,' ज्योत्स्नी, ज्यौत्स्नी -त्स्निका.

MOON-PLANT, *s.* चन्द्रवल्लरी, सोमवल्लरी -रिः *f.*, सोमवल्लिका, सोमलता, सोमः, वयस्या, वयःस्था, ब्रह्मी, ब्राह्मी, सत्स्याक्षी.

MOONSHINE, *s.* चन्द्रप्रभा, चन्द्रद्युतिः *f.*, चन्द्रदीप्तिः. *See* MOONLIGHT.

MOON-STONE, MOON-GEM, *s.* चन्द्रकान्तः, चन्द्रमणिः *m.*, सोमकान्तः, चन्द्रोपलः, चन्द्रिकाश्मः.

MOONSTRUCK, *a.* विक्षिप्तबुद्धिः -द्धिः -द्धि, विप्लुतबुद्धिः &c., हतबुद्धिः &c.

MOONY, *a.* अर्द्धचन्द्रध्वजाङ्कितः -ता -तं, अर्द्धचन्द्रध्वजविशिष्टः -ष्टा -ष्टं.

MOOR, *s.* जङ्गलभूमिः *f.*, खिलभूमिः *f.*, अनूपभूः *f.*, कच्छः, कच्छभूः.

To MOOR, *v. a.* रज्जुना or रज्ज्वा नौकां बन्ध् (c. 9. बध्नाति, बन्धुं).

MOORED, *p. p.* रज्जुना or गुणेन बद्धः -द्धा -द्धं, रज्जुबद्धः &c.

MOOR-LAND, *s.* अनूपभूमिः *f.*, कच्छभूमिः *f.*, खिलभूः *f.* *See* MOOR.

MOORY, *a.* अनूपः -पा -पं, आनूपः -पी -पं, कच्छः -च्छा -च्छं, खिलः -ला -लं.

MOOSE, *s.* (Kind of deer) शम्बरः, सम्बरः.

To MOOT, *v. a.* (Discuss) विचर् (c. 10. -चारयति -यितुं), वितर्क् (c. 10. -तर्कयति -यितुं), विवद् (c. 1. -वदति -ते -दितुं), विवादास्पदीकृ, विचारास्पदीकृ, वितर्कास्पदीकृ —(Bring forward) उपन्यस् (c. 4. -अस्यति -अस्तुं).

MOOT, MOOT-CASE, MOOT-POINT, *s.* विचारविषयः, विचारपदं, विचारास्पदं, विचारस्थलं, विवादास्पदं, विवादविषयः, सन्दिग्धविषयः, अनिष्पन्नविषयः, असिद्धान्तः.

MOOTED, *p. p.* विचारितः -ता -तं, वादग्रस्तः -स्ता -स्तं, विचारास्पदीकृतः &c.

MOP, *s.* मार्जनी सम्मार्जनी, शोधनी, विमार्गः, परिष्कारकः.

To MOP, *v. a.* मृज् (c. 2. मार्ष्टि -ष्टुं), सम्मृज्, शुध् (c. 10. शोधयति -यितुं).

To MOPE, *v. n.* विषद् (c. 1. -षीदति -षत्तुं), अवसद्, उदास् (c. 2. -आस्ते -आसितुं), विषण्णीभू, उद्विग्नीभू, दुर्मनस (nom. दुर्मनायते), उन्मनस्, ग्लै (c. 1. ग्लायति, ग्लातुं).

MOPING, MOPISH, *a.* विषण्णः -ण्णा -ण्णं, अवसन्नः -न्ना -न्नं, उदासीनः -ना -नं, उदासी -सिनी -सि (न्), दुर्मनाः -नाः -नः (स्), उद्विग्नमनाः &c., अनर्मनाः &c.

MOPPET, MOPSEY, *s.* पटपुत्रिका, वस्त्रपुत्रिका, वस्त्रखण्डमयी पुत्तलिका.

MORAL, *a.* (Virtuous) सदाचारः -रा -रं, सदाचारी -रिणी -रि (न्), धार्म्मिकः -की -कं, धर्म्माचारी &c., धर्म्मचारी &c., साधुः -धुः -ध्वी -धु, साधुवृत्तः -त्ता -त्तं, सुचरितः -ता -तं, सच्चरितः -ता -तं, साध्वाचारः -रा -रं, धर्म्यः -र्म्या -र्म्यं, धर्म्मी &c., सुधर्म्मा -र्म्मा -र्म्म (न्), धर्म्मभृत *m. f. n.*, न्यायाचारः &c., वृत्तवान् -वती -वत् (त्), अव्यसनी &c., पुण्यः -ण्या -ण्यं, लाक्षिकः -की -कं, नीतिमान् &c.—(Relating to the practice of men, or to actions good or evil) लोकव्यवहारसम्बन्धी &c., लोकाचारविषयकः -का -कं, सदसदाचारसम्बन्धी &c., सदसद्व्यवहारविषयः -या -यं, विधिनिषेधान्वितः -ता -तं.—(Subject to moral laws, bound by precepts and prohibitions) विधिनिषेधाधीनः -ना -नं, विधिनिषेधायत्तः -त्ता -त्तं, विधिनिषेधवान् &c., नियमाधीनः &c.—(Supported by reason or probability, founded on experience) अनुमानसिद्धः -द्धा -द्धं, युक्तिसिद्धः &c., आनुमानिकः -की -कं, यौक्तिकः -की -कं, अनुभूतिसिद्धः &c., युक्तिभाव्यः -व्या -व्यं, अनुमानमूलः -ला -लं; 'moral philosophy,' नीतिशास्त्रं, नीतिविद्या, व्यवहारशास्त्रं, नीतिः *f.*

MORAL, *s.* (Moral doctrine taught by a fiction) तात्पर्य्यं, तात्पर्य्यार्थः, अभिप्रायः, भावार्थः, तात्त्विकं, ध्वनितार्थः, गर्भः.

MORALIST, *s.* (Teacher of moral duties) नीतिशास्त्रोपदेशकः, नीत्युपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः, धर्म्मोपदेशी *m.* (न्), नीतिविवेचकः, सदसद्विवेचकः, नीतिशास्त्रज्ञः, नीतिविद्याज्ञः, कर्त्तव्याकर्त्तव्योपदेशकः.—(Mere moral person) नीतिमार्गावलम्बी *m.*, केवलनीतिमार्गाश्रयी.

MORALITY, *s.* (System of moral duties) नीतिः *f.*, नीतिविद्या, नीतिशास्त्रं, व्यवहारशास्त्रं, नयः, नयविद्या, नयशास्त्रं, अर्थशास्त्रं, विनयविद्या, शीलविद्या, सदसद्विचारः, सदसद्विवेकः, कर्त्तव्याकर्त्तव्यविचारः, कर्त्तव्याकर्त्तव्यविवेकः; 'as invented by Vrihaspati,' बार्हस्त्यं.—(Practice of moral duties, virtue) धर्म्मानुष्ठानं, धर्म्माचरणं, धर्म्माचारता, धर्म्मः, धर्म्मत्वं, सदाचारत्वं, सच्चरितं, सुचरितं, साधुशीलता, पुण्यता, पुण्यशीलत्वं साधुवृत्तं.—(Conformity to the principles of rectitude) धर्म्मानुसारित्वं, न्यायानुसारः, न्यायः, धर्म्यता, धर्म्मत्व.

To MORALIZE, *v. a* Apply to the purposes of moral instruction) हितोपदेशास्पदीकृ, धर्म्मोपदेशास्पदीकृ, नीतिशिक्षास्पदीकृ.

To MORALIZE, *v. n.* (Make moral reflections) हितोपदेशं कृ, धर्म्मोपदेशं कृ, नीत्युपदेशं कृ, हितोपदेशं लिख् (c. 6. लिखति, लेखितुं).

MORALIZER, *s.* हितोपदेशकः, धर्म्मोपदेष्टा *m.* (ष्टृ), नीतिशिक्षकः.

MORALLY, *adv.* (According to the rules of morality) नीतिशास्त्रतस्, नीतिशास्त्रवत्, नीतितस्.—(Virtuously) धर्म्मेण, धर्म्मतस्, न्यायतस्.—(According to reason or the usual course of things) अनुमानेन, युक्त्या, अनुमानतस्, युक्तितस्, यथासम्भवं.

MORALS, *s.* (System of morality) नीतिः *f.*, नीतिशास्त्रं, नीतिविद्या. *See* MORALITY. (Conduct) आचारः, आचरणं, आचरितं, चरितं, व्यवहारः, वृत्तिः *f.*, प्रवृत्तिः *f.*, वृत्तं, रीतिः *f.*; 'good morals,' विनयः, सदाचारः, सच्चरितं, सुचरितं, साधुचरितं, शीलः, सुशीलः.

MORASS, *s.* कच्छः, कच्छभूः *f.*, घनूपः, अनूपभूः *f.*, जलाढ्यभूमिः *f.*, पङ्किलभूः *f.*, आप्यभूः *f.*

MORBID, *a.* अस्वस्थः -स्था -स्थं, असुस्थः &c., रोगी -गिणी -गि (न्), रोगवान् -वती -वत् (त्), सरोगः -गा -गं, विकारी &c., विकृतः -ता -तं, व्याधितः -ता -तं.

MORBIDNESS, *s.* अस्वस्थता, अस्वास्थ्यं, असुस्थता, सरोगता, रोगित्वं.

MORBIFIC, MORBIFICAL, *a.* रोगजनकः -का -कं, रोगकरः -रा -रं, अस्वास्थ्यजनकः &c., व्याधिकरः -रा -रं, अनारोग्यकरः &c., रोगदः -दा -दं.

MORBOSE, *a.* रोगजनितः -ता -तं, रोगजः -जा -जं, असुस्थ. -स्था -स्थं.

MORDACIOUS, *a.* दंशकः -का -कं, दंशनकारी -रिणी -रि (न्).

MORDACITY, *s.* दंशकता, दंशनशीलता, दंशनं, दंशनगुणः.

MORDICANT, *a.* खादकः -का -कं, अरुष्करः -री -रं, दंशकः &c.

MORE, *a.* अधिकः -का -कं, अधिकतरः -रा -रं, अधिकसंख्यकः -का -कं, भूयान् -यसी -यः (स्), भूयिष्ठः -ष्ठा -ष्ठं, उत्तरः -रा -रं, अतिरेकी -किणी -कि (न्), अतिरिक्तः -क्ता -क्तं, परः -रा -रं, परतरः -रा -रं; often expressed by the comparative affixes तर and ईयस्; as, 'more in number,' बहुतरः -रा -रं, वंहीयान् &c.; 'more or less,' न्यूनाधिकः -का -कं, न्यूनातिरेकः -का -कं; 'more than a thousand,' परःसहस्रः -स्रा -स्रं; 'more than a hundred,' परं शतं.

MORE, *s.* आधिक्यं, अधिकता, अतिरेकः, अतिरिक्तता, उद्रेकः, आतिशय्यं; 'more or less,' न्यूनाधिक्यं, न्यूनातिरेकः, न्यूनातिरिक्तं; 'neither more nor less,' अन्यूनानतिरिक्तं; 'no more,' कृतं, अलं with inst. c., as, 'no more of this ceremony!' कृतम् आदरेण, अलम् आदरेण; 'what more need I say?' किम् अन्यत्, किम् बहुना.

MORE, *adv.* अधिकं, अधिकतरं, भूयस्, भूयिष्ठं, अतिरिक्तं, परं; or often expressed by the comparative affixes तर and ईयस्; as, 'more heavy,' गुरुतरः -रा -रं, गरीयान् -यसी -युः (स्); 'more and more,' उत्तरोत्तरं, अधिकाधिकं; 'how much more?' किम्पुनर्, किमुत, मुतरां.—(Any more, again) पुनर्, भूयस्.

MOREOVER, *s.* अपिच, अपरञ्च, अपरं, परं, परञ्च, परन्तु, अपरन्तु, अन्यच्च, किञ्च, अधिकन्तु, अधिकं, पुनश्च, अपितु, अपि, अथ.

MORIBUND, *a.* मुमूर्षुः -र्षुः -र्षु, मृतकल्पः -ल्पा -ल्पं, मृतप्रायः -या -यं.

MORINGA, *s.* *See* MORUNGA.

MORION, *s.* शिरस्त्रं, शिरस्त्राणं, शिरस्कं, मस्तकरक्षणी, शीर्षकं.

MORN, MORNING, *s.* प्रभातं, प्रातःकालः, प्रातःसमयः, प्रभातकालः, प्रत्यूषकालः, प्रत्यूषः, प्रत्यूषस् *n.*, प्रत्युषः, प्रत्युषस् *n.*, उषः, उषस् *n.*, उषाकालः, विभातं -तकं, भातः, च्युष्टं, अरुणः, अरुणोदयः, कल्यं, काल्यं, अहर्मुखं, दिवसमुखं, दिनारम्भः, दिनादिः *m.*, निशावसानं, निशान्तः -न्तं, क्षपान्तः, रात्रिविगमः, प्राचीधिकः, वासरमङ्गः.—(As opposed to afternoon) पूर्वाह्णः or पूर्वाह्णः, प्राह्णः, पूर्वाह्णकालः, प्राह्णकालः; 'in the morning,' प्रातर्, प्रभाते, प्रातःकाले, प्रभातकाले, प्रत्यूषे, उषा, प्रगे, प्राह्णे, पूर्वाह्णे, निशान्ते, पूर्वेद्युस्; 'to be chanted in the morning,' प्रातर्गेयः-या -यं; 'early in the morning,' सुप्रातर्, अतिप्रभाते, अतिप्रगे; 'to-morrow morning,' श्वः प्रभाते; 'good morning,' सुप्रभातं; 'morning, noon, and evening,' त्रिकालं.

MORNING, *a.* प्रातर् in comp., प्रातःकालीनः -ना -नं, प्रातःकालिकः -की -कं, प्रभातीयः -या -यं, प्राभातिकः -की -कं, प्रगेतनः -नी -नं, प्राह्णेतनः -नी -नं, पूर्वाह्णेतनः -नी -नं, उषस्यः -स्या -स्यं, औषिकः -की -कं, औषसः -सी -सं, वैयुष्टः -ष्टी -ष्टं; 'morning duties,' प्रातःकृत्यं; 'morning ablution,' प्रातःस्नानं; morning meal,' प्रातराशः, प्रातर्भोजनं.

MORNING-GOWN, *s.* प्रातःकाले भृतो लघुप्रावारः, प्रातर्वसनं, प्रातर्वस्त्रं.

MORNING-STAR, *s.* प्रभातसूचकतारा, प्रभाततारा, शुक्रः.

MORNING-TWILIGHT, *s.* प्रातःसन्ध्या, प्राक्सन्ध्या, पूर्वसन्ध्या, प्रभातसन्ध्या.

MOROSE, *a.* कर्कशस्वभावः -वा -वं, कटुस्वभावः -वा -वं, कर्कशभावः -वा -वं, कर्कशशीलः -ला -लं, वक्रभावः -वा -वं, सदावक्रः -क्रा -क्रं, रूक्षस्वभावः -वा -वं, नैकृतिकः -की -कं, प्रतीपः -पा -पं, उदासीनः -ना -नं, उदासवृत्तिः -त्तिः -त्ति, अरुन्तुदः -दा -दं, दुःशीलः -ला -लं, वामशीलः &c.

MOROSELY, *adv.* कर्कशस्वभावात्, कटुस्वभावात्, कर्कशं, कार्कश्येन, वक्रभावेन, सदावक्रवत्, दुःशीलत्वात्, रूक्षस्वभावात्.

MOROSENESS, *s.* कार्कश्यं, कर्कशता, कर्कशशीलता, कटुता, कटुशीलता, दुःशीलता, दौःशील्यं, वक्रता, वक्रशीलता, स्वभाववक्रता, स्वभावकार्कश्यं, स्वभावकटुता, उदासीनता, उदासवृत्तित्वं, प्रतीपता, वामशीलता, निकृतिः *f.*, शुक्रता.

MORROW, *s.* (The day next after the present) परदिवसः, परदिनं, श्वस्तनदिवसः, आगामिदिवसः, कल्यं; 'to-morrow, on the morrow,' श्वस्, परेद्युस्, परदिने, परदिवसे, परेद्यवि, कल्ये, कल्ये, अन्येद्युस्.—(The next day subsequent to any day) उत्तरदिवसः, उत्तरदिनं, उत्तरेद्युस्; 'the day after to-morrow,' परश्वस्; 'to-morrow morning,' श्वः प्रभाते.

MORSEL, *s.* (Mouthful, small piece of food) ग्रासः, पिण्डः, कवलः; 'a morsel as big as an egg,' अण्डपरिमाणो ग्रासः.—(Piece, bit) खण्डः -ण्डकः, क्षुद्रभागः, लवः, शकलः, भिन्नं, भिन्नं, भित्तिः *f.*; 'a dainty morsel,' सुग्रासः.

MORSURE, *s.* दंशनं, विदंशनं, दंशः, दंशकरणं.

MORTAL, *a.* (Subject to death) मरणाधीनः -ना -नं, मर्त्यः -र्त्या -र्त्यं, मर्त्यः -र्त्या -र्त्यं, नाशाधीनः -ना -नं, कालाधीनः -ना -नं, मृत्यधीनः -ना -नं, मरणधर्म्मकः -का -कं, मृत्युधर्म्मकः -का -कं, मृत्युवशः -शा -शं, मरणवशः &c., अन्तवान् -वती -वत् (त्), अनित्यः -त्या -त्यं.—(Deadly) प्राणघातकः -का -कं, प्राणहरः -रा -रं, प्राणान्तिकः -की -कं, प्राणान्तकः &c., जीवान्तकः &c., प्राणहारी -रिणी -रि (न्), प्राणनाशकः -का -कं, मारात्मकः -का -कं, मृत्युजनकः -का -कं, मर्म्मभेदी -दिनी &c., मर्म्मान्तिकः &c., अन्तकरः -रा -रं.—(Belonging to man, human) मानुषः -षी -षं -षिकः -की -कं, मनुष्यजातीयः -या -यं, मनुष्यधर्म्मकः -का -कं, पौरुषेयः -यी -यं; 'mortal state,' मानुषदशा.

MORTAL, *s.* (A human being) मर्त्यः, मनुष्यः, मानुषः, मानवः, प्राणी *m.* (न्), प्राणभृत् *m.*, जन्मी *m.* (न्), जन्मवान् *m.*, शरीरी *m.*, देही *m.*, देहभृत् *m.*, तनुभृत् *m.*, चेतनः, मृत्युपात्रं, मरणपात्रं.

MORTALITY, *s.* (Subjection to death) मरणाधीनता, मर्त्यता, मृत्युवशता, नाशाधीनता, मृत्युधर्म्मः, मरणधर्म्मः, अनित्यता.—(Human nature) मनुष्यता -त्वं, मानुष्यं, मानुषत्वं -ता, पुरुषता.—(Death, death of great numbers) मृत्युः *m.*, मरणं, अत्ययः, नाशः, बहुनाशः, बहुजननाशः.

MORTALLY, *adv.* प्राणनाशेन, प्राणघातेन, सनाशं, सप्राणघातं, सप्राणनाशं; mortally wounded,' भिन्नमर्म्मा -र्म्मी -र्म्म (न्).

MORTAR, *s.* (Vessel in which substances are pounded) उलूखलं, उदूखलः -लं, उदूखलं; 'pestle and mortar,' उलूखलमुपले; 'pounded in a mortar,' उलूखलिकः -की -कं.—(Cement) सुधा, लेपः, विलेपः, चूर्णलेपः, कर्करलेपः, उदपेषः; 'very hard,' वज्रलेपः.

MORTGAGE, *s.* आधिः *m.*, स्थावराधिः *m.* क्षेत्राधिः, स्थावरधनाधिः *m.*, आधानं, आधमनं, क्षेत्रन्यासः, स्थावरधनन्यासः, भूमिन्यासः, उपन्यासः, स्थावरबन्धकः, बन्धकः, उपनिधिः *m.*, भूमिनक्षेपः.

To MORTGAGE, *v. a.* आधीकृ, क्षेत्रादि स्थावरधनं न्यस् (*c.* 4. -अस्यति

-असितुं) or निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), न्यासं दा, बन्धकं दा, न्यासीकृ.

Mortgaged, *p. p.* आधीकृतः -ता -तं, न्यासीकृतः -ता -तं, न्यस्तः -स्ता -स्तं, उपन्यस्तः &c.; 'to be mortgaged,' आधेयः -या -यं.

Mortgagee, *s.* आधिधारी *m.* (न्), न्यासधारी *m.* (न्), आधिग्राही *m.* (न्), बन्धकग्राही *m.*, बन्धकधारी *m.*, आधिग्राहकः.

Mortgager, *s.* आधिदाता *m.* (तृ), बन्धकदाता *m.*, आधीकर्त्ता *m.* (र्तृ).

Mortiferous, *a.* मृत्युजनकः -का -वं, मरणावहः -हा -हं, प्राणघातकः &c.

Mortification, *s.* (In surgery, local extinction of life) मांसनाशः, मांसातिपाकः, मांसपाकः, चेतनानाशः, जीवित्वनाशः, मांसकोथः, मांसविद्रधिः *m.*, मांसपूतिः *f.*—(Subjugation of the passions and appetites) दमः, दान्तिः *f.*, दमनं, संयमः -मनं, इन्द्रियदमः, इन्द्रियजयः, इन्द्रियपराजयः, इन्द्रियसंयमः, जितेन्द्रियत्वं, इन्द्रियवशीकरणं, कामावसायः, वीतकामत्वं, विषयपराङ्मुखता.—(By penance, &c.) तपस्, तपश्चर्य्या, तपस्या, कृच्छ्रं, कायक्लेशः, वैराग्यं.—(Humiliation, vexation) अभिभवः, अभिभूतिः *f.*, मानभङ्गः, मानखण्डनं, अभिमानखण्डनं, मानहानिः *f.*, तेजोभङ्गः, दर्पभङ्गः, अपकर्षः -र्षणं, व्यथा, दुःखं, क्लेशः, विडम्बना.—(Disappointment) आशाभङ्गः, मनोभङ्गः, आशानाशः, इच्छानाशः, इच्छाविनाशः, इच्छाक्षयः, उत्साहभङ्गः.

Mortified, *p. p.* (In surgery) नष्टमांसः -सा -सं, नष्टचेतनः -ना -नं, कोथवान् -वती -वत् (त्), अतिपक्वः -क्वा -क्वं.—(Subdued) दान्तः -न्ता -न्तं, दमितः -ता -तं, संयमितः -ता -तं, वशीकृतः -ता -तं, जितः -ता -तं; 'one whose passions are mortified,' जितेन्द्रियः, यतेन्द्रियः, संयतेन्द्रियः, वीतकामः, वीतरागः, वीतस्पृहः, विरक्तः, वैरागी *m.* (न्), जितकामः, जितकामक्रोधादिः *m.*—(Humiliated, vexed) अभिभूतः -ता -तं, पराभूतः -ता -तं, खण्डितः -ता -तं, भग्नमानः -ना -नं. क्लिष्टः -ष्टा -ष्टं, सव्यथः -था -थं, उद्विग्नः -ग्ना -ग्नं, विडम्बितः -ता -तं.

To Mortify, *v. a.* (Destroy the vitality of) जीवित्वं or चैतन्यं नश् (c. 10. नाशयति -यितुं), चेतनानाशं कृ, चैतन्यनाशं कृ.—(Subdue) दम् (c. 10. दमयति -यितुं), वशीकृ, जि (c. 1. जयति, जेतुं), पराजि; 'one's passions,' इन्द्रियाणि दम्, इन्द्रियदमनं कृ; 'the body,' शरीरक्लेशं कृ.—(Humble) अभिभू, अपकृष् (c. 1. -कर्षति -क्रष्टुं), मानं भञ्ज् (c. 7. भनक्ति, भंक्तुं) or खण्ड् (c. 10. खण्डयति -यितुं), अभिमानखण्डनं कृ, मानविध्वंसं कृ.—(Vex) क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं).

To Mortify, *v. n.* (Lose vitality, as flesh) नष्टचैतन्यः -न्या -न्यं भू, नष्टजीवित्वः -त्वा -त्वं भू, नष्टमांसः -सा -सं भू, मांसैकदेशे पूतीभू, कोथीभू.—(Practise austerities) तप् (c. 4. तप्यते), तपस् तप्, तपस् (nom. तपस्यति), तपश्चर्य्यां कृ, वैराग्याचरणं कृ, शरीरक्लेशं कृ, ब्रह्मचर्य्यं कृ.

Mortifying, *a.* मानभञ्जकः -का -कं, दर्पभञ्जकः &c., व्यथाकरः -रा -रं.

Mortise, *s.* काष्ठच्छिद्रं, काष्ठमन्धिः *m.*, काष्ठग्रहणी, काष्ठधरणी, दारुच्छिद्रं, दारुसीवनं, काष्ठसीवनं, काष्ठरन्ध्रं.

To Mortise, *v. a.* अन्यकाष्ठधरणार्थम् एककाष्ठाग्रं छिद् (c. 7. छिनत्ति, छेत्तुं), काष्ठद्वयसन्धानं कृ, काष्ठद्वयं सन्धा (c. 3. -दधाति -धातुं).

Mortmain, *s.* अन्यादेयभोगः, परादेयभोगः, अदेयभोगः.

Morunga, *s.* (Plant) शोभाञ्जनः, शोभनकः, शौभाञ्जनः, सोभाञ्जनः, शिग्रुः *m.*, तीक्ष्णगन्धः -न्धकः, अक्षीवः, आक्षीवः, काक्षीवः, मोचकः; 'its root,' शिग्रुमूलं; 'seed,' शिग्रुजं, शिग्रुबीजं

Mosaic, *a.* नानावर्णैप्रस्तरखचितः -ता -तं, नानाविधप्रस्तरछुरितः -ता -तं, नानावर्णद्रव्यप्रणिहितः &c.; 'mosaic work,' चित्रकर्म्म *n.* (न्).

Mosque, *s.* यावनधर्म्ममण्डपः, यावनधर्म्ममन्दिरं, यावनप्रासादः.

Moss, *s.* शिलावल्का, शैवलः, शैवालः, शेवलः, शेवालः, शेपालः, शैवं, कावारं, सूकरी, शूकरी, शूकराक्रान्ता, वराहक्रान्ता.

Moss-grown, *a.* शैवलावृतः -ता -तं, शैवलाच्छादितः -ता -तं, रूढशैवलः &c.

Mossy, *a.* शैवालमयः -यी -यं, सशैवालः -ला -लं, शैवालयुक्तः -क्ता -क्तं, शैवालितः -ता -तं, शेवालविशिष्टः -ष्टा -ष्टं, शैवली -लिनी -लि (न्).

Most, *a.* भूयिष्ठः -ष्ठा -ष्ठं, अधिकतमः -मा -मं, अधिकतरः -रा -रं, अधिकः -का -कं, अधिकसंख्यकः -का -कं, परमः -मा -मं, उत्तमः -मा -मं; 'the most part,' भूयान् -यसी -यः (स्), भूयिष्ठः &c., बहुतरः -रा -रं, बहुतमः -मा -मं; 'for the most part,' भूयिष्ठं, प्रायस्, प्रायशस्, बाहुल्येन, बहुशस्.

To OVERHANG, *v. n.* वहिर्लम्ब् (c. 1. -लम्बते -म्बितुं), प्रलम्ब्, अवलम्ब्, वहिःप्रलम्ब्, वहिःस्था (c. 1. -तिष्ठति -स्थातुं).

OVERHASTY, *a.* अतिसाहसी -सिनी -सि (न्), एकान्तसाहसी &c.

To OVERHAUL, *v. a.* इतस्ततः समाकृष्य परीक्ष् (c. 1. -ईक्षते -क्षितुं) or निरूप् (c. 10. -रूपयति -यितुं), पुनःपुनः परिवर्त्य परीक्ष्, पुनः परीक्ष्.

OVERHEAD, *adv.* मस्तकोपरि, शीर्षोपरि, उपरिष्टात्, उपरिस्थाने, ऊर्ध्वे, ऊर्ध्वं, उच्चं, विहायसा.

To OVERHEAR, *v. a.* प्रच्छन्ने स्थित्वा द्वयोः संलापं श्रु (c. 5. शृणोति, श्रोतुं) or उपश्रु or आकर्ण् (c. 10. -कर्णयति -यितुं), अकस्माद् आकर्ण्.

OVERHEARD, *p. p.* आकर्णितः -ता -तं, अकस्माद् आकर्णितः &c., श्रुतः -ता -तं.

To OVERJOY, *v. a.* अत्यन्तम् आनन्द् (c. 10. -नन्दयति -यितुं) or प्रहृष् (c. 10. -हर्षयति -यितुं), अतिशयेन प्रहृष्.

OVERJOY, *s.* अत्यानन्दः, परमानन्दः, परमहर्षः, परमाह्लादः.

OVERJOYED, *p. p.* परमहृष्टः -ष्टा -ष्टं, परमसंहृष्टः &c., परमानन्दितः -ता -तं, परमाह्लादितः -ता -तं, हर्षाकुलः -ला -लं, हर्षविह्वलः -ला -लं, रोमाञ्चितः -ता -तं, हर्षरोमाञ्चितः -ता -तं, पुलकितः -ता -तं, हर्षपुलकितः -ता -तं, उल्लासितः -ता -तं, उल्लसितः -ता -तं, उल्लासी -सिनी -सि (न्), परमप्रीतः -ता -तं, हृष्टचित्तः -त्ता -त्तं, प्रहृष्टः &c., प्रहृष्टमनाः -नाः -नः

(स्), अतिहर्षयुक्तः -क्ता -क्तं, अतिहृष्टः &c.; 'to be overjoyed,' परमम् आनन्दं (c. 1. -नन्दति -न्दितुं), परमानन्दं कृ.

OVERLAID, *p. p.* आच्छन्न -न्ना -न्नं, पिहितः -ता -तं, पिनद्धः -द्धा -द्धं; 'with gold,' सुवर्णपत्रपिनद्धः -द्धा -द्धं.

OVERLARGE, *a.* अतिवृहन् -हती -हत् (त्), अतिमहान् -हती &c., अतिस्थूलः -ला -लं, अतिविपुलः &c., एकान्तस्थूलः &c., अतिरिक्तः -क्ता -क्तं.

To OVERLAY, *v. a.* (An infant) शय्यास्तरणभारेण पीडयित्वा शिशुप्राणघातं कृ.—(Cover, spread over) छद् (c. 10. छादयति -यितुं), आछद्, पिधा (c. 3. -दधाति -धातुं), अपिधा.—(Oppress with too great a weight) अतिभारेण पीड् (c. 10. पीडयति -यितुं).

To OVERLEAP, *v. a.* लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, लङ्घनं कृ, उत्प्लु (c. 1. -प्लवते -प्लोतुं).

OVERLENIENT, *a.* अतिमृदुः -दुः -दुी -दु, एकान्तमृदुः &c.

To OVERLOAD, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or आरुह् in caus. (-रोपयति -यितुं), अतिभाराक्रान्तं -न्तां कृ, अत्यन्तं or अतिशयेन पॄ (c. 10. पूरयति -यितुं), अतिपूर्णं -र्णां कृ.

OVERLOADED, *p. p.* अतिभाराक्रान्तः -न्ता -न्तं, अतिभारार्त्तः -र्त्ता -र्त्तं, अतिभारी -रिणी -रि (न्), अतिपूर्णः -र्णा -र्णं, अतिपूरितः &c. *See* OVERBURDENED.

OVERLOADING, *s.* अतिभारन्यासः, अतिभारारोपणं, आक्रमः -मणं.

To OVERLOOK, *v. a.* (View from a high place) उन्नतस्थानाद् अवलोक् (c. 10. -लोकयति -यितुं, c. 1. -लोकते -कितुं) or निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or अवेक्ष् or अभिवीक्ष्.—(Superintend, preside over) अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, कार्य्याणि अवेक्ष्, अध्यक्षः -क्षा -क्षं भू.—(Let pass, excuse) उपेक्ष्, अवसृज् (c. 6. -सृजति -सर्ष्टुं), मुच् (c. 6. मुञ्चति, मोक्तुं), क्षम् (c. 1. क्षमते -ति, क्षन्तुं), दोषाच्छादनं कृ, दोषक्षालनं कृ, उपेक्षां कृ, उपेक्षणं कृ.

OVERLOOKED, *p. p.* (Viewed from above) उन्नतस्थानाद् or उन्नतप्रदेशाद् अवलोकितः -ता -तं.—(Superintended) अधिष्ठितः -ता -तं, अवेक्षितः -ता -तं.—(Passed over, excused) उपेक्षितः -ता -तं, अवसृष्टः -ष्टा -ष्टं.

OVERLOOKER, *s.* अवेक्षिता *m.* (तृ), अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), कार्य्यद्रष्टा.

OVERMUCH, *a.* अति or अतिशय prefixed, अधिकः -का -कं, अत्यन्तः -न्ता -न्तं, एकान्तः -न्ता -न्तं, अतिमात्रः -त्रा -त्रं, अतिमर्य्यादः -दा -दं, अतिरिक्तः -क्ता -क्तं.

OVERMUCH, *s.* अतिबाहुल्यं, आधिक्यं, अधिकता, अतिरिक्तता, एकान्तत्वं.

OVERMUCH, *adv.* अति prefixed, अतिशयेन, अत्यन्तं, अतिमर्य्यादं, एकान्ततम्.

OVER-OFFICIOUS, *a.* अत्युपचारी -रिणी -रि (न्), अत्युपकारी &c., अत्युपचारः &c.

To OVERPASS, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), अतिचर् (c. 1. -चरति -रितुं).

OVERPAST, *p. p.* अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, गतः -ता -तं.

To OVERPAY, *v. a.* अतिमूल्यं or अधिकमूल्यं दा (c. 3. ददाति, दातुं).

OVERPLUS, *s.* उद्वृत्तः, उद्वृत्तं, अवशिष्टं, उच्छिष्टं, शिष्टं, परभागः.

To OVERPOWER, *v. a.* अभिभू, पराभू, पराजि (c. 1. -जयते -जेतुं), निर्जि, दम् (c. 10. दमयति -यितुं), प्रदम्, आक्रम् (c. 1. -क्रामति -क्रमितुं), पराक्रम्, वशीकृ. *See To* OVERCOME.

OVERPOWERED, *p. p.* पराजितः -ता -तं, आक्रान्तः -न्ता -न्तं. *See* OVERCOME.

To OVERRATE, OVERPRIZE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ.

To OVERREACH, *v. a.* अतिसन्धा (c. 3. -दधाति -धातुं), अभिसन्धा, प्रलभ् (c. 1. -लभते -लब्धुं), विप्रलभ्, प्रतॄ (c. 10. -तारयति -यितुं).

OVERREACHED, *p. p.* अतिसंहितः -ता -तं, प्रलब्धः -ब्धा -ब्धं, प्रतारितः -ता -तं.

OVERREACHING, *s.* अतिसन्धानं, अतिसन्धिः *m.*, प्रलम्भः, प्रतारणं -णा.

OVERRIPE, *a.* अतिपक्वः -क्वा -क्वं, कालप्ररूढः -ढा -ढं, विनाशोन्मुखः &c.

To OVERRULE, *v. a.* अधिकृ, प्रभू, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, सन्नियम्, संयम्, यम्, शास् (c. 2. शास्ति, शासितुं), अनुशास्, अधिकारं कृ.

OVERRULER, *s.* अधिकारी *m.* (न्), अधिष्ठाता *m.* (तृ), प्रभुः *m.*, अनुशास्ता.

To OVERRUN, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, उपद्रु (c. 1. -द्रवति -द्रोतुं), उपद्रवं कृ, उपप्लवं कृ.

OVERRUN, *p. p.* आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं, उपद्रुतः -ता -तं, उपप्लुतः &c., आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं.

To OVERSEE, *v. a.* उपदृश् (c. 1. -पश्यति -द्रष्टुं), अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्येक्षणं कृ, अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं).

OVERSEER, *s.* अध्यक्षः, उपद्रष्टा *m.* (ष्टृ), अवेक्षिता *m.* (तृ), कार्य्यावेक्षिता *m.*, अधिष्ठाता *m.*, अधिकर्म्मिकः, कार्य्यद्रष्टा *m.*, कार्य्याधीशः, अधिकारी *m.* (न्), अधिकृतः; 'of a village,' स्थायुकः.

To OVERSET, *v. a.* पर्यस् (c. 4. -अस्यति -असितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), निपत् (c. 10. -पातयति -यितुं), अधः कृ.

To OVERSET, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं). *See To* UPSET.

To OVERSHADOW, *v. a.* छायया छद् (c. 10. छादयति -यितुं) or प्रच्छद्, छायां कृ, छायावृतं -तां कृ, वितानीकृ.

OVERSHADOWED, *p. p.* छायावृतः -ता -तं, छायाच्छादितः &c., छायाच्छन्नः -न्ना -न्नं.

To OVERSHOOT, *v. a.* लक्ष्यम् अतिक्रम् (c. 1. -क्रामति -क्रमितुं) or लङ्घ् (c. 10. लङ्घयति -यितुं) or उल्लङ्घ्, लक्ष्यातिक्रमं कृ, लक्ष्योल्लङ्घनं कृ, लक्ष्यातिक्षेपं कृ.

OVERSIGHT, *s.* (Error) दृष्टिदोषः, भ्रमः, भ्रान्तिः *f.*, प्रमादः.

To OVERSLEEP, *v. a.* अतिशयेन or अतिदीर्घं or सुदीर्घं स्वप् (c. 2. स्वपिति, स्वप्तुं), अतिनिद्रां कृ, अतिस्वापं कृ.

To OVERSPREAD, *v. a.* आक्रम् (c. 1. -क्रामति -क्रमितुं), आछद् (c. 10. -छादयति -यितुं), आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, अवतन् (c. 5. -तनोति -नितुं), वितन्, वितानीकृ, अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, आकॄ, पॄ (c. 10. पूरयति -यितुं).

OVERSPREAD, *p. p.* आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आच्छादितः -ता -तं, आच्छन्नः -न्ना -न्नं, प्रच्छादितः &c., आवृतः -ता -तं, आकीर्णः -र्णा -र्णं, आस्तीर्णः &c., व्याप्तः -प्ता -प्तं, संवीतः &c., परिवीतः &c., पूरितः &c., गाहितः &c., श्रितः &c., वितानीकृतः &c., पूर्णः -र्णा -र्णं.

To OVERSTATE, *v. a.* अतिशयेन or वागाधिक्येन वद् (c. 1. वदति -दितुं), अत्युक्तिं कृ, अतिशयोक्तिं कृ.

To OVERSTEP, *v. a.* अतिक्रम् (c. 1. -क्रामति -क्रमितुं), लङ्घ् (c. 10. लङ्घयति -यितुं), उल्लङ्घ्, विलङ्घ्, अभिलङ्घ्.

OVERSTOCK, *s.* अतिसञ्चयः, अधिकसञ्चयः, अतिसम्भारः, अतिसङ्ग्रहः.

To OVERSTOCK, *v. a.* अतिशयेन सम्भृ (c. 1. -भरति -भर्त्तुं) or उपकॢप् (c. 10. -कल्पयति -यितुं) or पॄ (c. 10. पूरयति -यितुं), अतिसम्भारं कृ, अतिसञ्चयं कृ, अधिकसम्भारं कृ, अतिपूर्त्तिं कृ, अधिकपूर्त्तिं कृ.

OVERSTOCKED, *p. p.* अतिसम्भृतः -ता -तं, अतिपूरितः -ता -तं, अतिपूर्णः -र्णा -र्णं.

To OVERSTRAIN, *v. n.* अतियत्नं कृ, अतिप्रयत्नं कृ, अतिशयेन यत् (c. यतते -तितुं).

OVERT, *a.* प्रकाशः -शा -शं, स्पष्टः -ष्टा -ष्टं, व्यक्तः -क्ता -क्तं, विस्पष्टः -ष्टा -ष्टं, अभिव्यक्तः &c., विवृतः -ता -तं, प्रकटः -टा -टं, अगूढः -ढा -ढं, आविर्भूतः &c., प्रत्यक्षः -क्षा -क्षं.

To OVERTAKE, *v. a.* ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), प्राप् (c. 5. -आप्नोति -आप्तुं), सम्प्राप्, धृ (c. 1. धरति, धर्तुं), ग्रस् (c. 1. ग्रसते -सितुं), आक्रम (c. 1. -क्रामति -क्रमितुं), पश्चाद्धावन् or पश्चाद् अनुधाव्य आक्रम् or आक्रमणं कृ.—(Come upon unexpectedly) अकस्माद् आसद् (c. 10. -सादयति -यितुं) or प्राप्.

OVERTAKEN, *p. p.* प्राप्तः -प्ता -प्तं, सम्प्राप्तः -प्ता -प्तं, ग्रस्तः -स्ता -स्तं, धृतः -ता -तं, गृहीतः -ता -तं, आक्रान्तः -न्ता -न्तं, आक्रमितः -ता -तं.—(Come upon suddenly) अकस्माद् आसादितः -ता -तं.

To OVERTASK, OVERTAX, *v. a.* अतिभारं न्यस् (c. 4. -अस्यति -असितुं) or न्यस् in caus. (अपयति -यितुं), अधिकभारं न्यस्.

To OVERTHROW, *v. a.* (Defeat) पराजि (c. 1. -जयते -जेतुं), विजि, निर्जि, जि, पराहन् (c. 2. -हन्ति -न्तुं), अभिभू, पराभू, परास् (c. 4. -अस्यति -असितुं), दम् (c. 10. दमयति -यितुं), प्रदम्, पर्यामृश् (c. 6. -मृशति -मर्ष्टुं), वशीकृ.—(Turn upside down, upset, subvert) पर्यस्, पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. क्षेपयति -यितुं), परिवृत् (c. 10. -वर्त्तयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्.—(Destroy, &c.). *See* OVERTURN.

OVERTHROW, *s.* (Defeat) पराजयः, अपजयः, जयः, पराभवः, अभिभवः, अभिभूतिः *f.*, परिभवः.—(Ruin, destruction) नाशः, विनाशः, प्रणाशः, क्षयः, ध्वंसः, विध्वंसः, प्रध्वंसः, उच्छेदः, समुच्छेदः, सादः -दनं घातः, विघातः, भङ्गः, भेदः, व्यसनं; 'of an army,' बलव्यसनं.—(Upsetting, subverting) पर्यासः, पर्यसनं, परिवर्त्तनं, पातनं, निपातनं.

OVERTHROWN, *p. p.* पराजितः -ता -तं, जितः &c., पराभूतः &c., अभिभूतः &c., पराहतः &c., परास्तः -स्ता -स्तं, उपास्तः &c., नष्टः -ष्टा -ष्टं, नाशितः -ता -तं, विनाशितः &c., हतः &c., भग्नः -ग्ना -ग्नं, पातितः -ता -तं, निपातितः &c., ध्वंसितः &c., ज्ञातव्यसनः -ना -नं.

OVERTLY, *adv.* प्रकाशं, स्पष्टं, विस्पष्टं, व्यक्तं, प्रकटं, आविस्, प्रादुस्, अगूढं, प्रत्यक्षं -क्षेण -क्षतस्.

OVERTURE, *s.* (Opening) विवृतिः *f.*, विवरणं, प्रकाशः -शनं.—(Proposal) उपन्यासः, निवेदनं, प्रसङ्गः, अभिधानं; 'secret overture,' उपजपः -जापः.—(Musical or dramatic prelude) पूर्वरङ्गः, प्रस्तावना, प्रकरणं, उपोद्घातः, नान्दी; 'player or speaker of it,' नान्दीवादी, नान्दीकरः.

To OVERTURN, *v. a.* परावृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, अपवृत्, पर्यस् (c. 4. -अस्यति -असितुं), पराक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप् (c. 10. -क्षेपयति -यितुं), पत् (c. 10. पातयति -यितुं), निपत्, उत्सद् (c. 10. सादयति -यितुं), संक्षुभ् (c. 10. -क्षोभयति -यितुं), अधोमुखीकृ, अधरोत्तरीकृ, अधः कृ, न्युब्जीकृ.—(Destroy, &c.) नश् (c. 10. नाशयति -यितुं), विनश्, प्रणश्, ध्वंस् (c. 10. ध्वंसयति -यितुं), विध्वंस्, प्रध्वंस्, उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), हन् (c. 2. हन्ति -न्तुं, c. 10. घातयति -यितुं), सद्.

OVERTURN, *s.* पर्यासः, पर्यसनं, परिवर्त्तनं, परावर्त्तनं, पातनं, निपातनं, उत्सादनं, क्षोभः, संक्षोभः, ध्वंसः, ध्वंसनं, प्रध्वंसः. *See* OVERTHROW.

OVERTURNED, *p. p.* पर्यस्तः -स्ता -स्तं, पराक्षिप्तः -प्ता -प्तं, परावर्त्तितः -ता -तं, परिवर्त्तितः &c., परावृत्तः -त्ता -त्तं, अपवृत्तः &c., पातितः &c., निपातितः &c., उत्सादितः &c., संक्षोभितः &c., अधःकृतः &c., ध्वंसितः &c. *See* OVERTHROWN.

OVERTURNING, *s.* परावर्त्तनं, परिवर्त्तनं, पर्यसनं, उत्सादनं. *See* OVERTURN.

To OVERVALUE, *v. a.* अधिकं or अतिशयेन मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं), अधिकमूल्यं or अतिमूल्यं कृ or स्था in caus. (स्थापयति -यितुं).

OVERWEENING, *a.* अत्यभिमानी -निनी -नि (न्), अतिमानी &c., अत्यहङ्कारी &c., अत्यहंयुः -युः -यु, आत्मश्लाघी &c.

OVERWEENINGLY, *adv.* अत्यभिमानेन, अत्यहङ्कारेण, अत्यभिमानपूर्वं.

OVERWEIGHT, *s.* अतिभारः, अधिकभारः, भाराधिक्यं, अतिशयभारः.

To OVERWHELM, *v. a.* (Crush, beat down) अवमृद् (c. 9. -मृद्नाति -मर्दितुं), प्रमृद्, आमृद्, अवपत् (c. 10. -पातयति -यितुं), निपत्, पुष् (c. 10. पोषयति -यितुं), निष्पिष् (c. 7. -पिनष्टि -पेष्टुं), सम्पिष्, विनिष्पिष्.—(Overspread) आछद् (c. 10. छादयति -यितुं), समाछद्, आवृ (c. 5. -वृणोति -वरितुं -रीतुं), समावृ, आक्रम् (c. 1. क्रामति -क्रमितुं), अवकॄ (c. 6. -किरति -करितुं -रीतुं), समवकॄ, अवाकॄ; 'he overwhelms them with arrows,' तान् अवाकिरति शरैः.—(Immerge, submerge) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, अवगाह् (c. 10. -गाहयति -यितुं), समाप्लु (c. 10. -प्लावयति -यितुं, c. 1. -प्लवते), समभिप्लु, अभिप्लु, परिप्लु, अभिपरिप्लु, उपप्लु, विप्लु, समाप्लुतं -तां कृ, परिप्लुतं -तां कृ, समभिप्लुतं &c. कृ, मग्नं -ग्नां कृ.

OVERWHELMED, *p. p.* मर्दितः -ता -तं, अवमर्दितः &c., अवपातितः &c., सम्पिष्टः -ष्टा -ष्टं, आच्छन्नः -न्ना -न्नं, आच्छादितः -ता -तं, आवृतः -ता -तं, आक्रान्तः -न्ता -न्तं, समाक्रान्तः &c., आकीर्णः -र्णा -र्णं, मग्नः -ग्ना -ग्नं, निमग्नः &c., प्रमग्नः &c., गाहितः &c., अभिप्लुतः &c., अभिपरिप्लुतः &c., समभिप्लुतः &c., उपप्लुतः &c., परिप्लुतः &c., समाप्लुतः &c., सम्प्लुतः &c., उपद्रुतः &c., ग्रस्तः -स्ता -स्तं, परिगतः &c., आकुलः -ला -लं; 'with care,' चिन्तामग्नः &c., चिन्ताकुलः &c.; 'with shame,' ह्रीपरिगतः &c.

OVERWHELMING, *part.* or *a.* अवमर्दी -र्दिनी -र्दि (न्), उपप्लवी &c., विप्लवकारी &c., उपप्लवकारकः -का -कं.

OVERWISE, *a.* अतिप्राज्ञः -ज्ञा -ज्ञं, अतिज्ञानी -निनी -नि (न्), एकान्तप्राज्ञः &c., अतिपण्डितः -ता -तं, पण्डितम्मन्यः -न्या -न्यं.

To OVERWORK, *v. a.* अतिशयेन or एकान्ततः or अधिकम् आयस् (c. 10. -यासयति -यितुं), अत्यायासं or अतिक्लेशं कृ or दा.

OVERWORK, *s.* अत्यायासः, अतिक्लेशः, एकान्तक्लेशः, अतिश्रमः.

OVERWORKED, *p. p.* अत्यायासितः -ता -तं, अतिक्लेशितः &c., अतिक्लिष्टः -ष्टा -ष्टं.

OVERWROUGHT, *a.* अतिसंस्कृतः -ता -तं, अतिपरिष्कृतः &c., अतिसिद्धः -द्धा -द्धं.

OVERZEALOUS, *a.* अत्युत्सुकः -का -कं, अत्यासक्तः -क्ता -क्तं, अतिव्ययः -या -यं, अत्युद्यमः -मा -मं, अतिचण्डः -ण्डा -ण्डं, अत्युत्कण्ठितः &c.

OVIFORM, *a.* अण्डाकारः -रा -रं, अण्डाकृतिः -तिः -ति, अण्डरूपः -पा -पं.

OVIPAROUS, *a.* अण्डजः -जा -जं, अण्डजनकः -का -कं, अण्डप्रजः -जा -जं, अण्डप्रसूः -सूः -सु, अण्डोत्पादकः -का -कं, द्विजः -जा -जं, द्विजन्मा -न्मा -न्म (न्), द्विजातिः -तिः -ति, अयोनिजः &c.; 'any oviparous animal,' द्विजः, द्विजातिः &c.

To OWE, *v. a.* (Owe money) धृ (c. 10. धारयति -यितुं) with acc. and dat.; as, 'he owes a hundred pieces of money to Devadatta,' देवदत्ताय शतं मुद्रा धारयति; 'he repaid me the money which he owed me,' धारयन् मह्यं वसूनि प्रत्यपद्यत.—(Be indebted) ऋणी -णिनी -णि भू, ऋणवान् -वती -वद् भू, ऋणवद्भः -द्भा -द्भं भू, ऋणं कृ.—(Be obliged) अनुगृहीतः -ता -तं भू; 'I owe you many thanks for your advice,' अनुगृहीतोऽस्मि तवोपदेशेन. The sense of 'owe' may be expressed by the fut. pass.

part.; as, 'I owe him money,' मया तस्मै धनं प्रतिदेयं or प्रतिदातव्यं, or by changing the construction of the sentence thus, 'I owe my deliverance to you,' भवान् मम रक्षाकारणम् इति ज्ञातव्यं. *See* the next word.

OWING, *part.* (Due) देयः -या -यं, प्रतिदेयः -या -यं, दातव्यः -व्या -व्यं, प्रतिदातव्यः &c., दानीयः -या -यं, शोधनीयः -या -यं.—(Following as effect and cause) प्रयुक्तः -क्ता -क्तं, जनितः -ता -तं, उत्पादितः &c., उद्भवः -वा -वं, प्रभवः &c., कारणभूतः -ता -तं; 'my deliverance is owing to you,' भवान् मम रक्षाकारणं or मम रक्षणं भवत्प्रयुक्तं.—(Imputable) आरोपणीयः -या -यं, अध्यारोपणीयः -या -यं, सम्बन्धनीयः &c.

OWL, *s.* उलूकः, ऊलूकः, पेचकः, कौशिकः, वायसारातिः *m.*, दिवान्धः, दिवाभीतः, निशाटः, निशाचरः, नक्तञ्चरः, निशादर्शी *m.* (न्), नक्तचारी *m.* (न्), रजनीचरः, काकभीरुः *m.*, कावरुकः, घूकः, वक्रनासिकः, रक्तनासिकः.

OWL-LIGHT, *s.* ईषत्प्रकाशः, मन्दप्रकाशः, मन्दप्रभा, निशादिः *m.*

OWN, *a.* स्वः स्वा स्वं, आत्म in comp., स्व in comp., स्वकीयः -या -यं, आत्मीयः -या -यं, स्वीयः -या -यं, स्वकः -का -कं, निजः -जा -जं, नैजः -जी -जं प्रातिस्विकः -की -कं, आत्मसम्बन्धी -न्धिनी -न्धि (न्), आत्माधीनः -ना -नं, आत्मभूतः -ता -तं; 'my own,' मदीयः -या -यं; 'thy own,' त्वदीयः -या -यं; 'our own,' अस्मदीयः -या -यं; 'of one's own self or own accord,' स्वयं.—(Belonging to no other) अनन्यसम्बन्धी &c., अनन्यस्वामिकः -का -कं, अनन्याधीनः -ना -नं, अनन्यवर्ती &c. Compounds with स्व and आत्म, are most frequent to express 'own,' as applicable to the first, second, or third person; thus, 'one's own act,' स्वकर्म्म *n.* (न्), आत्मकर्म्म, स्वयङ्कृतं; 'one's own son,' स्वपुत्रः, आत्मजः, स्वजः; 'own nature,' स्वभावः; 'own fancy,' स्वछन्दस् *n.*; 'own duty,' स्वधर्म्मः; 'own country,' स्वदेशः; 'own caste or tribe,' स्वजातिः *f.*; 'own family,' स्वकुलं; 'own advantage,' स्वार्थः, आत्महितं; 'for one's own sake,' आत्मार्थं -र्थे; 'one's own wife,' स्वकीया, स्वीया, स्वभार्य्या; 'to make one's own,' आत्मसात्कृ.

To OWN, *v. a.* (Have the legal right to) अधिकारी -रिणी -रि भू or अस्, स्वामी &c. भू, ईश्वरः -रा -री -रं भू; 'to own land,' क्षेत्राधिकारी &c. भू, क्षेत्रस्वामी &c. भू; or expressed by the use of अस् or भू with the gen. c., or with मदीयः -या -यं, आत्मीयः -या -यं, स्वकीयः -या -यं, आत्माधीनः -ना -नं, स्वाधीनः &c.; as, I own that land,' तत् क्षेत्रं मदीयम् अस्ति or आत्माधीनं or मम भवति; 'the king owns this money,' एतद् धनं राजाधीनम् अस्ति. *See To* BELONG. (Acknowledge to belong to one's self, claim to one's self) स्वीकृ, आत्मसात्कृ, स्वीयमिति वद् (c. 1. वदति -दितुं), ममेति वद्, स्वत्वम् अभिमन्, स्वत्वं ज्ञा (c. 10. ज्ञापयति -यितुं, c. 9. जानाति) or अभिज्ञा or बुध् (c. 10. बोधयति -यितुं), स्वकीयं -यां कृ, आत्मीयं -यां कृ.—(Confess, acknowledge) स्वीकृ, अङ्गीकृ, उरीकृ, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), ग्रह्, अभिमन् (c. 4. -मन्यते -मन्तुं), अभिज्ञा (c. 9. -जानाति -ज्ञातुं), प्रतिज्ञा, प्रत्यभिज्ञा, समभिज्ञा, अनुभाष् (c. 1. -भाषते -षितुं), स्वीकारं कृ.

OWNED, *p. p.* (Confessed, acknowledged) स्वीकृतः -ता -तं, अङ्गीकृतः &c., अभिज्ञातः -ता -तं, प्रतिज्ञातः &c.—(The legal right vested in) स्वत्वविशिष्टः -ष्टा -ष्टं; 'owned by me,' मत्स्वत्वविशिष्टः &c.

OWNER, *s.* अधिकारी *m.* -रिणी *f.* (न्), स्वामी *m.* -मिनी *f.* (न्), ईश्वरः -रा -री, पतिः *m.*, प्रभुः *m.*, अधिभूः *m.*, अधिपः, ईशिता *m.* (तृ), नेता *m.* (तृ), नायकः, परिवृढः, भरणः; 'of cattle,' गवीश्वरः; 'of land,' क्षेत्राधिकारी *m.*

OWNERSHIP, *s.* स्वाम्यं, स्वामित्वं, स्वत्वं, अधिकारः -रिता -त्वं, प्रभुत्वं -ता, ऐश्वर्य्यं, नायकत्वं.

OWNING, *s.* (Confession) स्वीकारः, स्वीकरणं, अङ्गीकारः, अङ्गीकरणं.

OX, *s.* (Male of the bovine genus) गौः *m.* (गो), वृषभः, वृषः, ऋषभः, बलीवर्दः, उक्षा *m.* (न्), वहः -तिः -तुः *m.*, ककुद्मान् *m.* (त्), अनड्वान् *m.* (दुह्), शक्करः, शाक्करः, धाकः, वित्सनः; 'stupid as an ox,' गोमूढः; 'relating to an ox,' औक्षः -क्षी -क्षं.—(Draft ox) शङ्कुः.

OXEN, *pl.* गावः *m. pl.*; 'herd of oxen,' गोकुलं, गोवृन्दं, औक्षकं, गोसमूहः, पशुगणः, गव्या, गोत्रा, पाशवं, उक्षणां संहतिः *f.*, गवां व्रजः; 'yoke of oxen,' गोयुगं, गोगोयुगं; 'property in oxen,' गोधनं; 'carriage drawn by oxen,' गोयानं.

OX-FLY, *s.* गोमक्षिका, गोमशकः.

OXYD, OXIDE, *s.* रीतिः *f.*; 'of iron,' सारं; 'of mercury,' रसभस्म *n.* (न्).

To OXYDATE, OXYDIZE, *v. a.* जारणं कृ, साधनं कृ, भस्मीकृ, आतक्षनं कृ, प्रतीवापं कृ; 'oxydized iron,' सारणं.

OXYDATION, *s.* जारणं, साधनं, आतक्षनं, प्रतीवापः, भस्मीकरणं.

OXYGEN, *s.* The word used in modern treatises is अम्लकरः.

OYEZ, OYES, शृणुत शृणुत आर्य्याः.

OYSTER, *s.* शुक्तिः *f.*, शुक्तिका, तोयशुक्तिका, पटोलकः, पुटिका, मुक्तास्फोटः, मुक्तागारं, मुक्ताप्रसूः *f.*; 'oyster-shell,' शुक्तिपुटं, शुक्तिपेशी.

OYSTER-WOMAN, OYSTER-WENCH, *s.* शुक्तिविक्रयिणी, शुक्तिविक्रेत्री.

P.

PABULAR, PABULOUS, *a.* पौष्टिकः -की -कं, पोषकः -का -कं, पुष्टिकरः &c.

PABULUM, *s.* भोजनं, आहारः, भोज्यं, भक्ष्यं, पौष्टिकं. *See* FOOD.

PACE, *s.* (A step) पदपातः, पादपातः, पदक्रमः, पदन्यासः, पादन्यासः, पदविक्षेपः, पादविक्षेपः, पदनिक्षेपः, पदक्रमः, पदं, क्रमः.—(Gait) गतिः, गमनं, चारः, चरणं, चलनं, अयनं.—(Of horses) धारः -रा, चारः, वारकः पदविक्षेपः, अयनं; 'a horse with a good pace,' सुखायनः, सुखचारः. A horse's paces are, 'walk,' आस्कन्दितं; 'trot,' धौरितकं; 'sidling,' रेचितं; 'gallop,' वलितं; 'vaulting,' प्लुतं.—(Of an elephant) गजव्रजं.—(Degree of celerity) क्रमः, पदक्रमः, गतिवेगः; 'a quick pace,' द्रुतपदं; 'at a good pace,' चित्रपदक्रमं; 'going at a quick pace,' द्रुतगामी -मिनी -मि (न्), द्रुतक्रमः -मा -मं, अविलम्बितक्रमः &c.

To PACE, *v. n.* क्रम् (c. 1. क्रामति, c. 4. क्राम्यति, क्रमितुं), क्रमे क्रमे चल् (c. 1. चलति -लितुं) or व्रज् (c. 1. व्रजति -जितुं) or चर् (c. 1. चरति -रितुं) or गम् (c. 1. गच्छति, गन्तुं) or पदन्यासं कृ; 'to pace up and down,' इतस्ततः क्रम् or चल् or भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिक्रमं कृ; 'pacing to and fro,' चङ्क्रम्यमाणः -णा -णं.

To PACE, *v. a.* पदन्यासेन मा (c. 2. माति -तुं, c. 10. मापयति -यितुं).

PACED, *a.* (Having a particular gait) गति in comp., गतिक in comp.; as, 'slow-paced,' मन्दगतिः -तिः -ति, मन्दगतिकः -का -कं.

PACIFIC, PACIFICATORY, *a.* शमकः -का -कं, शान्तिकः -की -कं, शमी -मिनी -मि (न्), शमकारी &c., शमकारकः -का -कं, उपशमकः &c., प्रशमकः &c., शान्तिकरः -रा -रं, शान्त्यात्मकः &c., सामोपचारकः &c., सामोपायकः &c.

PACIFICATION, *s.* शमनं, प्रशमनं, उपशमनं, शान्तिः *f.*, उपशान्तिः *f.*, प्रशान्तिः *f.*, शान्तिकरणं, सान्त्वनं -ना, साम *n.* (न्), सामोपचारः

सामोपायः, सामोपायप्रयोगः, कलहशान्तिः *f.*, विग्रहशान्तिः, क्रोधशान्तिः, क्रोधहरणं.—(Making peace) सन्धिकरणं, ऐक्यकरणं.—(Peace made) सन्धिः *m.*

PACIFICATOR, PACIFIER, *s.* सन्धिकर्त्ता *m.* (र्त्तृ), शमकः. *See* PACIFIC.

PACIFIED, *p. p.* शान्तः -न्ता -न्तं, शमितः -ता -तं, उपशान्तः &c., प्रशान्तः &c., कृतशान्तिः -न्तिः -न्ति, शान्तक्रोधः -धा -धं, गतक्रोधः &c.; 'to be pacified,' शम् (c. 4. शाम्यति, शमितुं), प्रसद् (c. 1. -सीदति -सत्तुं), तुष् (c. 4. तुष्यति, तोष्टुं).

To PACIFY, *v. a.* शम् (c. 10. शमयति -यितुं), प्रशम्, उपशम्, सान्त्व् or शान्त्व् (c. 10. सान्त्वयति -यितुं), उपसान्त्व्, अभिशान्त्व्, परिशान्त्व्, प्रसद् (c. 10. -सादयति -यितुं), अभिप्रसद्, साम् (c. 10. सामयति -यितुं), तुष् (c. 10. तोषयति -यितुं), सन्तुष्, परितुष्, सम्परितुष्.

PACK, *s.* (Bundle, bale) भाण्डकं, भाण्डं, भारः, कूर्चः, पोटलिका, पोट्टली, गुच्छः -च्छकः, वासनं, वरण्डः -ण्डकः.—(Of hounds or dogs) श्वगणः, कुक्कुरगणः, श्वसंघः, कुक्कुरसमूहः, शुनीरः; 'one who keeps a pack of hounds,' श्वागणिकः.—(Number of persons) गणः, जनसमूहः, संघः, मण्डलं, सङ्घः.—(Heap) राशिः *m.*, सङ्घहः, सञ्चयः, वृन्दं, समवायः.

To PACK, *v. a.* (Bundle up, press together) पुट् (c. 10. पुटयति -यितुं), पुटीकृ, सम्पुटीकृ, वासनीकृ, भाण्डीकृ, कूर्चीकृ, कूर्चं कृ, गुच्छीकृ, पोटलिकां कृ, कोशीकृ.—(In a box) भाण्डे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), कोशे or कोषे निविश् or निधा.—(Put together or unite with fraudulent design) कुकर्म्मसम्पादनार्थं संयुज् (c. 10. -योजयति -यितुं) or सङ्गम् (c. 10. -गनयति -यितुं) or एकीकृ.—(A jury or assembly of any kind) स्वार्थसम्पादनार्थं स्वपक्षपातिनो धर्म्मसभां प्रविश् or स्वपक्षपातिनः सभ्यपदे or सभासदधिकारे नियुज्.—(Pack off, dismiss) प्रस्था in caus. (-स्थापयति -यितुं), अपसृ (c. 10. -सारयति -यितुं).

To PACK, *v. n.* (Be pressed together, or bundled together) पुटीभू, सम्पुटीभू, वासनीभू.—(Be placed in a box) भाण्डस्थः -स्था -स्थं भू, कोषस्थः &c. भू.—(Depart in haste) त्वरितम् अपगम् (c. 1. -गच्छति -गन्तुं).

PACKAGE, *s.* भाण्डकं, भाण्डं, वासनं, वरण्डः -ण्डकः, कूर्चः, पोटलिका.

PACK-CLOTH, *s.* वासनं, वासनपटः, वेष्टनं, वेष्टनपटः.

PACKED, *p. p.* (Bound together in a bundle) पुटीकृतः -ता -तं, सम्पुटीकृतः &c., कूर्चीकृतः &c.—(In a box) भाण्डस्थः -स्था -स्थं, वासनस्थः &c., भाण्डीकृतः &c., वासनीकृतः &c.

PACKET, *s.* (Small package) कूर्चः, पोटलिका, पोट्टली, समुद्गका.—(Ship employed in carrying despatches) पत्रवाहिनी नौः, राजपत्रवाहका नौः, लेखहारिणी नौका, वेगवती नौका; 'steam-packet,' वाष्पीयनौः *f.*

PACK-HORSE, *s.* स्थूरी *m.* (न्), स्थौरी *m.*, स्थुरी *m.*, स्थोरी *m.*, पृष्ठ्यः.

PACK-SADDLE, *s.* पर्य्याणं, पर्य्ययणं, पल्यनं, पल्यानं.

PACK-THREAD, *s.* शणसूत्रं, सणसूत्रं, सनसूत्रं, शणतन्तुः *f.*, पवित्रकं.

PACT, PACTION, *s.* समयः, नियमः, संविद् *f.*, उपगमः, सङ्केतः.

PACTIONAL. PACTITIOUS, *a.* सामयिकः -की -कं, साङ्केतिकः -की -कं.

PACTOLUS, *s.* (A fabulous river) जम्बुः *m.*, जम्बुनदी.

PAD, *s.* (An easy paced horse) सुखायनः, सुखचारः.—(Foot-pad) सारणिकाम्रः, पादविकाम्रः, परिपन्थी *m.* (न्), पारिपन्थिकः.—(Bolster, cushion) उपधानं -नीयं, विष्टरः, विस्तरः, बालिशं, आस्तरणं, उपबर्हः, अजिनं, पट्टः, पटः.—(Hair or other soft substance) लोमादि मृदुवस्तु *n.*

To PAD, *v. a.* (Stuff or furnish with hair or other soft substance) लोमादिमृदुवस्तुना आस्तृ (c. 5. -स्तृणोति -स्तरितुं -रीतुं), मृदुलोमादिना पॄ (c. 10. पूरयति -यितुं) or युज् (c. 10. योजयति -यितुं) or समायुज्.

To PAD, *v. n.* (Travel slowly) क्रमे क्रमे or शनैः शनैर् व्रज् (c. 1. व्रजति -जितुं).

PADDED, *p. p.* or *a.* मृदुलोमादिपूरितः -ता -तं, मृदुवस्तुपूरितः -ता -तं.

PADDING, *s.* मृदुलोमादि *n.*, लोमादिमृदुवस्तु *n.*, पूरणं, भरणं.

To PADDLE, *v. n.* (Beat the water with an oar) नौकादण्डेन जलं क्षिप् (c. 6. क्षिपति, क्षेप्तुं) or तड् (c. 10. ताडयति -यितुं), जलक्षेपणं कृ.—(Play in the water) जले क्रीड् (c. 1. क्रीडति -डितुं), जलक्रीडां कृ.—(Finger) अङ्गुलिचेष्टां कृ, अङ्गुलिव्यापारं कृ.

To PADDLE, *v. a.* (Propel by a paddle) नौकादण्डेन चल् (c. 10. चालयति -यितुं).

PADDLE, *s.* (Oar) नौकादण्डः, क्षेपणिः -णी *f.*, क्षिपणिः -णी *f.*, अरित्रं, नौचालनी. *See* OAR.—(Blade of the oar) क्षेपणिफलकं.

PADDLE-BOX, *s.* क्षेपणिकोशः, क्षेपणिकोषः, क्षेपण्याधारः.

PADDLE-WHEEL, *s.* क्षेपणिचक्रं, नौचालनचक्रं, नौचालनी.

PADDOCK, *s.* वाटी, वाटिका, वाटः -टं, विवीतः, प्राचीरपरिवृतं क्षेत्रं.

PADLOCK, *s.* तालकं, तालः -ला, तालयन्त्रं, प्रतिताली, द्वारकीलः.—(Clasp) कुडुपः.

To PADLOCK, *v. a.* तालकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), तालबद्धं -द्धां कृ.

PÆAN, PEAN, *s.* जयगानं, जयशब्दः, जयध्वनिः *m.*, जयगीतं.

PAGAN, *s.* देवतार्चकः, देवतापूजकः, प्रतिमापूजकः, मूर्त्तिपूजकः, देवतासेवी *m.* (न्), असद्धर्म्मसेवी *m.* (न्), असद्धर्म्मावलम्बी *m.* *See* IDOLATER.

PAGAN, *a.* प्रतिमापूजकसम्बन्धी -न्धिनी -न्धि (न्), मूर्त्तिपूजकसम्बन्धी.

PAGANISM, *s.* प्रतिमापूजा, मूर्त्तिपूजा, देवतार्चा, देवतार्चनं -ना, मूर्त्तिसेव -वनं, असद्धर्म्मावलम्बनं. *See* IDOLATRY, HEATHENISM.

PAGE, *s.* (Of a book) पृष्ठं, फलकः -कं, पत्रं, पत्रिका.—(Boy attendant) पार्श्वानुचरः, पार्श्वपरिचरः, बालसेवकः, बालानुचरः.

To PAGE, *v. a.* पृष्ठाङ्कनं कृ, पत्राङ्कनं कृ, पृष्ठसंख्याङ्कनं कृ.

PAGEANT, *s.* (Statue in show, &c.) शोभामूर्त्तिः *f.*, शोभाप्रतिमा.—(Show, spectacle) कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चमत्करणं, आडम्बरं, प्रेक्षा, प्रेक्षणं, शोभा, यात्रा.

PAGEANT, *a.* कौतुकी -किनी -कि (न्), आडम्बरी &c., चमत्कारकः -का -कं, शोभनः -ना -नं, अतिशोभनः &c., याचिकः -की -कं.

PAGEANTRY, *s.* कौतुकं, चमत्कारः, आडम्बरं, शोभा. *See* PAGEANT, *s.*

PAGINAL, *a.* पृष्ठ्यः -ष्ठ्या -ष्ठ्यं, पुस्तकपत्रसम्बन्धी &c.

PAGODA, *s.* देवतामन्दिरं, देवताभवनं, देवतायतनं, देवमन्दिरं.

PAID, *p. p.* शोधितः -ता -तं, परिशोधितः &c., परिशुद्धः -द्धा -द्धं, अपाकृतः -ता -तं, सिद्धः -द्धा -द्धं, साधितः -ता -तं, विगणितः -ता -तं, निस्तारितः -ता -तं, निरादिष्टः -ष्टा -ष्टं, गृहीतवेतनः -ना -नं,

PAIL, *s.* पात्रं, भाजनं, काष्ठपात्रं, जलपात्रं, जलभाजनं; 'for milk,' दोहनं -नी, गोदोहनी, दुग्धभाण्डं. *See* MILK-PAIL.

PAIN, *s.* दुःखं, पीडा, वेदना -नं, व्यथा, आर्त्तिः *f.*, तापः, सन्तापः, परितापः, बाधा, विबाधा, आबाधा, यातना, कृच्छ्रं, कष्टं, क्लेशः, खेदः, उद्वेगः, यन्त्रणं, दुष्खं, दुःखितं, असुखं, तोदः -दनं, रायणं, विधानकं, विराधानं, प्रसूतिजं, आमनस्यं, आमानस्यं, अमानस्यं, आभीलं; 'bodily pain as opposed to mental,' शरीरपीडा, वेदना, कृच्छ्रं, व्याधिः *m.*; 'pain in the head,' शिरोवेदना, शिरःपीडा, शिरोर्त्तिः *f.*; 'in the teeth,' दन्तवेदना; 'sharp pain,' शूलः -लं, तीव्रवेदना; 'creeping or flying pain,' वेगः; 'rheumatic pains in the bones,' अस्थिशूलः -लं; 'in the loins,' कटिवेदना; 'pains of hell,'

यातना, कारणा, याम्ययातना; 'of labor,' प्रसववेदना, गर्भवेदना, प्रसवव्यथा; 'of death,' प्राणान्तवेदना; 'suffering pain,' दुःखभागी -गिनी -गि (न्), दुःखभोगी &c., दुःखी &c.; 'accession of pain,' दुःखसंयोगः; 'causing pain,' पीडाकरः -रा -रं, दुःखकरः &c.; 'act of causing pain,' पीडाकरणं, पीडनं; 'freed from pain,' दुःखातीतः -ता -तं.—(Mental pain, disquietude) मनोदुःखं, मनःपीडा, मनस्तापः, मनोव्यथा, मानसी व्यथा, चित्तवेदना, चित्तोद्वेगः, आधिः *m.*—(Pains, toil, effort) यत्नः, प्रयत्नः, कष्टं, आयासः, प्रयासः, उद्योगः, उत्साहः, व्यवसायः, चेष्टा, उद्यमः, श्रमः, परिश्रमः, क्लेशः, आस्था; 'to take pains,' यत् (c. 1. यतते -तितुं), प्रयत्, व्यवसो (c. 4. -स्यति -सातुं), उद्यम् (c. 1. -यच्छति -यन्तुं), चेष्ट् (c. 1. चेष्टते -ष्टितुं), विचेष्ट्, घट् (c. 1. घटते -टितुं), उद्योगं कृ, यत्नं कृ, उत्साहं कृ.—(Penalty) दण्डः, साहसं, शिष्टिः *f.*, शिक्षा.

To PAIN, *v. a.* पीड् (c. 10. पीडयति -यितुं), आपीड्, उपपीड्, दुःख् (c. 10. दुःखयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), तप् (c. 10. तापयति -यितुं), सन्तप्, परितप्, उपतप्, बाध् (c. 1. बाधते -धितुं), उद्विज् (c. 10. -वेजयति -यितुं), क्लिश् (c. 9. क्लिश्नाति, क्लेशितुं, क्लेष्टुं), अर्द् (c. 10. अर्दयति -यितुं), दुःखं कृ or दा, पीडां कृ, व्यथां कृ.

PAINED, *p. p.* पीडितः -ता -तं, दुःखितः -ता -तं, व्यथितः &c., आर्तः -र्ता -र्तं in comp., दुःखार्तः &c., दुःखी -खिनी खि (न्), दुःखान्वितः -ता -तं, दुःखोपेतः &c., बाधितः -ता -तं, तापितः &c., सन्तापितः &c., तप्तः -प्ता -प्तं, सन्तप्तः &c., उद्वेजितः &c., क्लेशितः &c., क्लिष्टः &c., आतुरः -रा -रं, अर्दितः &c., अभ्यर्दितः &c., अनुभूतवेदनः -ना -नं, कृच्छ्रगतः &c., क्लेशी &c., कष्टी &c., कष्टः -ष्टा -ष्टं, आधिमान् -मती -मत् (त्), दूनः -ना -नं, सव्यथः -था -थं, सवेदनः -ना -नं; 'being pained,' पीड्यमानः -ना -नं, तप्यमानः &c., आतप्यमान. &c., क्लिश्यमानः &c., धूपायितः -ता -तं; 'to be pained,' पीड् in pass. (पीड्यते), दुःख (nom. दुःखायते, दुःखीयति), दुःखार्तीभू, व्यथ् (c. 1. व्यथते -यितुं), प्रव्यथ्, तप् in pass. (तप्यते), परितप्, सन्तप्, क्लिश् (c. 4. क्लिश्यते).

PAINFUL, *a.* (Causing pain) पीडाकरः -रा -रं, दुःखकरः -रा -रं, पीडाकारकः -का -कं, पीडाजनकः -का -कं, दुःखजनकः &c., दुःखदः -दा -दं, दुःखप्रदः -दा -दं, दुःखावहः -हा -हं, वेदनाकारकः -का -कं, वेदनाजनकः &c., व्यथाकरः &c., व्यथकः -का -कं, कष्टकरः &c., कष्टकारकः &c., कष्टावहः -हा -हं, क्लेशकरः &c., क्लेशदः &c., क्लेशावहः -हा -हं, क्लेशकः -का -कं, बाधकः -का -कं, उद्वेजकः -का -कं, सन्तापकः -का -कं, दूदः -दा -दं.—(Full of pain) दुःखमयः -यी -यं, दुःखी -खिनी -खि (न्), क्लेशी &c., सबाधः -धा -धं, सव्यथः -था -थं, सवेदनः -ना -नं.—(Requiring labor or toil) कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c., दुःसाध्यः &c., दुष्करः -रा -रं, कठिनः -ना -नं.

PAINFULLY, *adv.* (With pain) सव्यथं, सवेदनं, सबाधं, सदुःखं, सक्लेशं, सोद्वेगं, सकष्टं, दुःखपूर्वं.—(With toil) श्रमेण, सश्रमं, आयासेन, सायासं, कृच्छ्रेण, सकृच्छ्रं.

PAINFULNESS, *s.* दुःखकारकत्वं, पीडाजनकत्वं, कष्टकारकत्वं, दुःखिता, सदुःखत्वं, दुःखं, सक्लेशत्वं, सोद्वेगता, कष्टं, सकष्टत्वं, सकष्टता.

PAINLESS, *a.* दुःखहीनः -ना -नं, दुःखरहितः -ता -तं, व्यथाहीनः -ना -नं, दुःखशून्यः -न्या -न्यं, निर्दुःखी -खिनी -खि (न्), निर्व्यथः -था -थं.

PAINS, *s. pl.* यत्नः, प्रयत्नः, उद्योगः, कष्टं. *See* PAIN.

PAINSTAKER, *s.* उद्योगी *m.* (न्), उत्साही *m.*, उद्यमी *m.*, व्यवसायी.

PAINSTAKING, *a.* कृतप्रयत्नः -त्ना -त्नं, कृतयत्नः &c., प्रयत्नवान् -वती -वत् (त्), यत्नशीलः -ला -लं, प्रयत्नशीलः -ला -लं, उद्योगशीलः &c.,

उद्यमशीलः &c., उद्योगी -गिनी -गि (न्), व्यवसायी &c., कृतश्रमः -मा -मं, प्रसितः -ता -तं. *See* INDUSTRIOUS.

To PAINT, *v. a.* (Draw in colors) चित्र् (c. 10. चित्रयति -यितुं), लिख् (c. 6. लिखति, लेखितुं), आलिख्, अभिलिख्.—(Cover or besmear with color) रञ्ज् (c. 10. रञ्जयति -यितुं), वर्ण् (c. 10. वर्णयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), रञ्जेण लिप्, रञ्जनं कृ.—(Describe) वर्ण्, अनुवर्ण्, उपवर्ण्, संवर्ण्, वर्णनं कृ, विलिख्.

PAINT, *s.* रङ्गः, वर्णकः -का, चित्रं, लेपः, विलेपः, रञ्जनलेपः, रञ्जनं.

PAINTED, *p. p.* चित्रितः -ता -तं, चित्रगतः -ता -तं, चित्रार्पितः -ता -तं, आलिखितः &c., अभिलिखितः &c., आलेख्यगतः &c., आलेख्यसमर्पितः &c., वर्णितः -ता -तं, वर्णगतः &c., रञ्जितः &c., चित्रः -त्रा -त्रं; 'painted on the surface,' चित्रतलः -ला -लं.

PAINTER, *s.* चित्रकरः, चित्रकारः, चित्रलेखकः, चित्रलिक् (ख्), चित्रकृत् *m.*, चित्रकः, चित्रकर्मविद् *m.*, रङ्गाजीवः -वी *m.* (न्), रञ्जकः, वर्णी *m.* (न्), वर्णोचारकः, वर्णोटः, लेखकः, आलेखकः, आलेख्यकृत् *m.*, पटकारः, तौलिकः, तौलिकिकः; 'painter's brush,' तूलिः *f.*, तूलिका, ईषिका, वर्त्तिका.

PAINTING, *s.* (The act) चित्रलिखनं, चित्रलेखनं, चित्रलिपिः *f.*, लिपिः *f.*, आलेखनं, लेखनं, लिखनं, चित्रकरणं, रञ्जनं, वर्णनं.—(The art or business) चित्रकर्म *n.* (न्), चित्रविद्या, चित्रक्रिया.—(A painting or picture) चित्रलेखा, चित्रं, आलेख्यं, चित्रलिखितं, चित्रगतं.—(Painting the body) पत्रलेखा, पत्राङ्कुलिः *f.*, पत्रावली -लिः *f.*, वर्णः,

PAIR, *s.* मिथुनं, द्वयं, द्वन्द्वं, युगं, युग्मं, युगलं, यमलं, यामलं, यमः, यमकं, युतकं; 'a pair of doves,' पारावतमिथुनं; 'a pair of oxen,' गोमिथुनं, गोयुगं; 'a pair of birds,' पक्षिणोर् मिथुनं, पक्षिमिथुनं, पक्षिद्वयं; 'a married pair,' दम्पती *m.* du., भार्य्यापती *m.* du., स्त्रीपुरुषौ. The word द्वन्द्वः is used to denote that form of grammatical combination which unites two or more words of similar or opposite signification; thus, 'hand and foot,' पाणिपादं; 'affection and hatred,' रागद्वेषौ *m.* du.

To PAIR, *v. n.* (Suit, fit) युज् in pass. (युज्यते), संयुज्, उपयुज्.—(Be joined in pairs) स्त्रीपुरुषवत् or दम्पतिवत् सङ्गम् (c. 1. -गच्छति -गन्तुं) or संयुज्, मैथुनार्थं सङ्गम्, मैथुनं कृ.

To PAIR, *v. a.* संयुज् (c. 7. -युनक्ति -योक्तुं, c. 10. -योजयति -यितुं), युज्, संयोगं कृ, मिथुनसंयोगं कृ, मैथुनार्थं संयुज्.

PALACE, *s.* राजगृहं, राजमन्दिरं, नृपगृहं, नृपमन्दिरं, राजवेश्म *n.* (न्), नृपवेश्म *n.*, राजधाम *n.* (न्), नृपधाम *n.*, राजभवनं, राजसदनं, राजप्रासादः, राजहर्म्यं, राजवसतिः *f.*, नृपतिवसतिः *f.*, राजशाला, राजधानी, प्रासादः, हर्म्यं, मन्दिरं -रा, भवनं, सौधं, अट्टालः -लिका, विमानं, शाला, विशिपं, विश्रदैकः, माडिः *m.*, उपकार्य्या, उपकारी -रिका; 'palace-court,' राजसभा; 'palace-yard,' राजाङ्गनं.

PALÆSTRA, *s.* मल्लभूः *f.*, मल्लभूमिः *f.*, यष्टिराट् *m.* (ज्), मल्लयाशा.

PALANKEEN, PALANQUIN, *s.* शिबिका, डयनं, डलकं, याप्ययानं, नरयानं, प्रवहणं, इत्या, शिरस्का.

PALATABLE, *a.* रुचिकरः -री -रं, रुच्यः -च्या -च्यं, आस्वाद्यः -द्या -द्यं, स्वादुः -दुी -दु, सुरसः -सा -सं, सरसः -सा -सं, रसिकः -का -की -कं, मुखप्रियः -या -यं.

PALATABLENESS, *s.* रुच्यता -त्वं, आस्वाद्यता, स्वादुता, सरसता, रसिकत्वं.

PALATAL, PALATIAL, PALATIC, *a.* (Pertaining to the palate) तालव्यः -व्या -व्यं, तालुसम्बन्धी &c.; 'a palatal letter,' तालव्यं.

PALATE, *s.* तालु *n.*, तालुका, काकुदं -दः; 'soft palate,' शुषिरका,

शूना, सूना, अलिजिह्वा, अधोजिह्विका. *See* UVULA.

PALATIAL, *a.* राजप्रासादीयः -या -यं, प्रासादीयः &c., राजगृहयोग्यः -ग्या -ग्यं. राजमन्दिरयोग्यः &c.

PALAVER, *s.* चाटूक्तिः *f.*, चाटुकारः, सान्त्वोक्तिः *f.*, मधुरवाक्यं, मिथ्योक्तिः.

To PALAVER, *v. a.* चाटूक्त्या सान्त्व् (c. 10. सान्त्वयति -यितुं), मिथ्या सान्त्व्

PALE, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुरः -रा -रं, पाण्डरः -रा -रं, विपाण्डुरः &c., विवर्णः -र्णा -र्णं, गतवर्णः &c., नीरक्तः -क्ता -क्तं, रागहीनः -ना -नं; 'pale in color,' पाण्डुवर्णः &c.; 'having a pale face,' विवर्णवदनः -ना -नं.—(Dim, not bright) मन्दप्रभः -भा -भं, हततेजाः -जाः -जः (स्), मन्दच्छायः -या -यं, निस्तेजाः &c., हतकान्तिः -न्तिः -न्ति, न्यूनकान्तिः &c., न्यूनप्रभः &c., मलिनप्रभः &c., म्लानतेजाः &c., म्लानकान्तिः &c.—(Light in color) expressed by ईषत्, आ, श्वेत; as, 'pale red,' ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., श्वेतरक्तः &c.; 'pale blue,' आनीलः -ला -लं, श्वेतनीलः &c.

PALE, *s.* (Stake) शङ्कुः *m.*, कीलः, स्थाणुः *m.*, शल्यं, शूलं.—(Inclosure, limit) आवरणं, वृतिः *f.*, वेष्टनं, आवेष्टनं, अवरोधकं, वारणं, वरणः, वलयः.

To PALE, *v. a.* शङ्कुवलयेन परिवृ (c. 5. -वृणोति -वरितुं -रीतुं) or परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or अवरुध् (c. 7. -रुणद्धि -रोद्धुं).

PALE-EYED, *a.* पाण्डुनेत्रः -त्रा -त्रं, पाण्डुनयनः &c., न्यूनप्रभाक्षः &c.

PALE-FACED, *a.* विवर्णवदनः -ना -नं, पाण्डुमुखः -खी -खं, म्लानवदनः &c.

PALENESS, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, पाण्डुवर्णः, पाण्डुरागः, विवर्णता, वैवर्ण्यं, मुखवैवर्ण्यं, नीरक्तता, रागहीनता.—(Dimness) प्रभाहानिः *f.*, तेजोहानिः *f.*, न्यूनप्रभा, न्यूनकान्तिः *f.*

PALETTE, *s.* *See* PALLET.

PALFREY, *s.* स्त्रीलोकारोहणयोग्यः क्षुद्रघोटकः.

PALINDROME, *s.* अनुलोमविलोमश्लोकः, मुरजबन्धः.

PALING, *s.* शङ्कुपंक्तिः *f.*, आवरणं, आवारः, वारणं -णी, कटघ्नं.

PALISADE, *s.* दुर्गपरिगता स्तम्भपंक्तिः or शङ्कुपंक्तिः शङ्कुवलयः, यष्टिवलयः, स्तम्भवलयः, दुर्गावरोधका स्तम्भपंक्तिः, दुर्गावरोधकं.

PALISH, *a.* ईषत्पाण्डुः -ण्डुः -ण्डु, आपाण्डुः &c., आपाण्डुरः -रा -रं.

PALL, *s.* (Mantle of state) राजप्रावारः, राजकीयप्रावारः.—(Cloak) प्रावारः, प्रच्छदपटः, आच्छादनपटः.—(For a dead body) शवाच्छादनं.

To PALL, *v. n.* विरसीभू, विरसः -सा -सं भू, अरुचिरः -रा -रं भू.

To PALL, *v. a.* विरसीकृ, अरुचिं or वीभत्सं जन् (c. 10. जनयति -यितुं).

PALLADIUM, *s.* पुरदेवता, नगरदेवता.—(Defence) रक्षा -क्षणं.

PALLET, *s.* (Board for mixing colors) वर्णपत्रं -त्रः, रङ्गपत्रं.—(Small bed) खट्वा, क्षुद्रखट्वा, तल्पः, क्षुद्रतल्पः.

To PALLIATE, *v. a.* (As a fault, crime, &c.) दोषं or पापं शम् (c. 10. शमयति -यितुं) or उपशम् or छद् (c. 10. छादयति -यितुं) or आछद् or मृज् (c. 2. मार्ष्टि -ष्टुं), पापशमनं कृ, दोषमार्जनं कृ, दोषक्षालनं कृ, पापापनोदनं कृ, पापाच्छादनं कृ, न्यूनीकृ.

PALLIATED, *p. p.* शमितः -ता -तं, आच्छादितः -ता -तं, न्यूनीकृतः &c.

PALLIATION, *s.* (Of a fault or crime) पापशमनं, पापशान्तिः *f.*, दोषाच्छादनं, पापशान्तिः *f.*, पापमार्जना, दोषक्षालनं, दोषप्रक्षालनं, पापापनोदनं, पापापनुत्तिः *f.*, दोषन्यूनीकरणं, उपशमः, उपशमनं, लघूकरणं, उपशान्तिः *f.*

PALLIATIVE, *a.* (Extenuating) पापशमनः -ना -नं, दोषशमकः -का -कं, दोषाच्छादकः &c.—(Mitigant) शान्तिकः -की -कं. *See* MITIGANT.

PALLIATIVE, *s.* (That which extenuates) पापशमनं, दोषशमनं, शान्तिकं.—(That which mitigates pain) वेदनाशान्तिकं, वेदनाशमकम् औषधं, क्लेशापहं, शूलघ्नं, उपशमनं.

PALLID, *a.* पाण्डुः -ण्डुः -ण्डु, पाण्डुवर्णः -र्णा -र्णं, पाण्डुरः -रा -रं, विपाण्डुरः -रा -रं, विवर्णः -र्णा -र्णं &c. *See* PALE.

PALLOR, *s.* पाण्डुता -त्वं, पाण्डुरता -त्वं, विवर्णता. *See* PALENESS.

PALM, *s.* (Of the hand) तलः -लं, हस्ततलः -लं, करतलः -लं, तालः -लिका, प्रतलः, प्रहस्तः, प्रपाणिः *m.*, चपेटः, चपेटः, चपटः, फणैरीकं, अलसुषः, गोछालः; 'the palms joined,' संहतलः, सिंहतलः, संहततलः; 'the hollowed palm,' प्रसृतः, प्रसृतिः *f.*, चुलुकः; 'the hollowed palms joined,' अञ्जलिः *m.*; 'having the palms hollowed and placed one above the other in sign of reverence,' कृताञ्जलिः -लिः -लि, कृताञ्जलिपुटः -टा -टं, बद्धाञ्जलिः &c.—(Tree) तालः, तृणद्रुमः, दीर्घतरुः *m.*, दीर्घद्रुः *m.*, गुच्छपत्रः, लेख्यपत्रकः, द्रुमश्रेष्ठः, द्रुमेश्वरः, दुरारोहः; 'date-palm,' खर्जूरः -री -खर्जूरवृक्षः; 'cocoa-nut palm,' नारिकेलः &c. *See* COCOA-NUT. 'Palm-leaf,' तालपत्रं, तालपर्णं; 'fibres,' तालजटा, तालप्रलम्बं; 'spirituous juice of the palm,' ताली, तालकी.

To PALM, *v. a.* (Conceal in the palm) करतले गुप्, करतलगुप्तं -प्तां कृ, हस्ततलस्थं -स्थां कृ.—(Impose by fraud) छल् (c. 10. छलयति -यितुं), छलेन प्रचलीकृ, वञ्च् (c. 10. वञ्चयते -ति -यितुं), प्रतृ &c.

PALMA-CHRISTI, *s.* (Castor-oil tree) एरण्डः -ण्डकः, उरुवूकः, उरुवुकः, रुवूकः, रूवुकः, रुवुकः, रुवुः *m.*, रुचकः, व्याडघ्नकः, व्याडघ्नः, व्याडघ्नरः, व्याघ्रपुच्छः, गन्धर्वहस्तकः, चञ्चुः *m.*, मण्डः, अमण्डः, आमण्डः, वर्धमानः, पञ्चाङ्गुलः.

PALMATE, PALMATED, *a.* हस्ततलाकारः -रा -रं, करतलाकृतिः -तिः -ति.

PALMER, *s.* तालपत्रभृत् कार्पटिकविशेषः or याचिकविशेषः.

PALMER-WORM, *s.* लोमावृतः कीटविशेषः or कृमिप्रभेदः.

PALMIFIED, *a.* जालपादः -दा -दं, जालपाद् *m. f. n.*, जालाकारपादः &c.

PALMISTER, *a.* हस्तरेखादिनिरीक्षणाद् दैवकथकः or शुभाशुभदर्शकः, करतलरेखानिरीक्षणेन भविष्यत्सूचकः, सामुद्रिकः, सामुद्रविद् *m.*, हस्तरेखाविद्.

PALMISTRY, *s.* हस्तरेखादिनिरीक्षणाद् दैवकथनं or शुभाशुभदर्शनं, करतलरेखादिनिरीक्षणेन भविष्यत्सूचनं, हस्तरेखाविद्या, हस्तसामुद्रिकं, सामुद्रविद्या.

PALMY, *a.* (Bearing or abounding with palms) तालवान् -वती -वत् (त्), तालावृतः -ता -तं, तालसङ्कीर्णः -र्णा -र्णं.—(Flourishing) समृद्धः -द्धा -द्धं, वर्धिष्णुः -ष्णुः -ष्णु, श्रीमान् -मती &c., अधिकर्द्धिः -र्द्धिः -र्द्धि.

PALMYRA, *s.* (Tree) तृणद्रुमः, तृणराजः, आसवद्रुः *m.*, महोन्नतः. *See* PALM.

PALPABILITY, PALPABLENESS, *s.* स्पृश्यता, स्पर्शनीयता, स्पर्शेन्द्रियग्राह्यता, स्पर्शगोचरता.—(Clearness) व्यक्तता, प्रत्यक्षता.

PALPABLE, *a.* (Perceptible by the touch) स्पृश्यः -श्या -श्यं, स्पर्शनीयः -या -यं, स्पर्शेन्द्रियग्राह्यः -ह्या -ह्यं, स्पर्शगोचरः -रा -रं, स्पर्शवेद्यः -द्या -द्यं, स्पर्शज्ञेयः -या -यं, त्वगिन्द्रियज्ञेयः &c., सूचीभेद्यः -द्या -द्यं.—(Gross, thick) स्थूलः -ला -लं, घनः -ना -नं; 'palpable darkness' घनान्धकारः.—(Plain, clear) व्यक्तः -क्ता -क्तं, स्पष्टः -ष्टा -ष्टं, प्रत्यक्षः -क्षा -क्षं, सुग्राह्यः &c.

PALPABLY, *adv.* व्यक्तं, सुव्यक्तं, स्पष्टं, सुस्पष्टं, प्रत्यक्षतस्, प्रत्यक्षेण, स्फुटं, प्रादुस्.

To PALPITATE, *v. n.* स्पन्द् (c. 1. स्पन्दते -न्दितुं), प्रतिस्पन्द्, परिस्पन्द्, कम्प् (c. 1. कम्पते -म्पितुं), विकम्प्, वेप् (c. 1. वेपते -पितुं), स्फुर् (c. 6. स्फुरति -रितुं), क्षुभ् (c. 4. क्षुभ्यति, क्षोभितुं), उच्छ्वस् (c. 2. -श्वसिति -तुं, rt. श्वस्), पिद् (c. 1. पेठति -ठितुं); 'my heart palpitates,' वेपते मे हृदयं.

PALPITATING, *part.* स्पन्दमानः -ना -नं, वेपमानः -ना -नं, कम्पमानः -ना -नं, स्फुरितः -ता -तं, उच्छ्वासी -सिनी -सि (न्).

PALPITATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, वेपनं, वेपथुः *m.*, कम्पः -म्पन,

स्फुरणं, क्षोभः; 'of the heart,' हृदयवेपनं, हृदयकम्पः, हृत्कम्पः.

Palsical, palsied, *a.* पक्षाघाती -तिनी -ति (न्), पक्षवायुग्रस्तः -स्ता -स्तं, कम्पवायुग्रस्तः &c., अर्द्धाङ्गवायुग्रस्तः &c.

Palsy, *s.* (Paralysis) स्तम्भः, संस्तम्भः, विष्टम्भः, अवष्टम्भः, स्वापः, सुप्तिः *f.*—(Hemiplegia) पक्षाघातः, पक्षवायुः *m.*, अर्द्धाङ्गवायुः *m.*, अर्द्धाङ्गं, भङ्गः.—(Shaking palsy) कम्पवायुः *m.*, कम्पवातः.

To palsy, *v. a.* स्तम्भं or स्वापं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, जडीकृ.

Paltriness, *s.* तुच्छता, लघुता, लाघवं, असारता, कुत्सितत्वं, क्षुद्रता.

Paltry, *a.* तुच्छः -च्छा -च्छं, लघुः -घुः -घ्वी -घु, क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, असारः -रा -रं, सारहीनः -ना -नं, तृणप्रायः -या -यं, लघुप्रभावः -वा -वं, क्षुल्लकः -का -कं, अपकृष्टः -ष्टा -ष्टं, अधमः -मा -मं, or expressed by कु prefixed; as, 'a paltry action,' कुकर्म्म *n.* (न्).

To pamper, *v. a.* परमान्नेन तृप् (c. 10. तर्पयति -यितुं) or सन्तृप् or पृ (c. 10. पूरयति -यितुं) or परिष or भृ (c. 3. बिभर्त्ति, c. 1. भरति, भर्त्तुं) or संवृध् (c. 10. -वर्धयति -यितुं) or पुष् (c. 10. पोषयति -यितुं) or आप्यै (c. 10. -प्याययति -यितुं), अत्यन्तं पुष् or आप्यै.

Pampered, *p. p.* अतिपुष्टः -ष्टा -ष्टं, सुपुष्टः &c., अतिपोषितः -ता -तं, सुपोषितः &c., दृष्टपुष्टः &c., परमान्नपोषितः &c., परमान्नभृतः &c.

Pampering, *s.* अतिपोषणं, परमान्नपोषणं, परमान्नसंवर्धनं, भरणं, अतिभरणं, परमान्नभृतिः *f.*, आप्यायनं, सुपोषणं.

Pamphlet, *s.* पत्रिका, पुस्तकं -की, क्षुद्रपुस्तकं, लघुपुस्तकं.

Pan, *s.* पात्रं, भाजनं, भाण्डं, आधारः, कटाहः, पिठरः, स्थाली, कन्दुः -न्दूः *m. f.*, स्वेदनी -निका; 'frying pan,' अङ्गारीयं, भाष्टः, भृज्जीयं.

Panacea, *s.* सर्व्वरोगशमकभेषजं, सर्व्वरोगघ्नभेषजं, सर्व्वरोगप्रतीकारकम् औषधं, सर्व्वौषधिचूर्णं, त्रैलोक्यचिन्तामणिः *m.*

Pan-cake. *s.* कन्दुपक्वपिष्टकः, अङ्गारीपक्वपिष्टकः, भृष्टपिष्टकः.

Pancratic, pancratical, *a.* मल्लयुद्धकुशलः -ला -लं, मल्लयुद्धनिपुणः -णा -णं.

Pancratium, *s.* मल्लयुद्धं, मल्लक्रीडा, बाहुयुद्धं, बाहुप्रहरणं.

Pandect, *s.* विद्यासङ्ग्रहः.—(Of laws) संहिता, स्मृतिशास्त्रसंहिता.

Pandemic, *a.* सार्व्वलौकिकः -की -कं, सर्व्वव्यापकः -का -कं, सर्व्वजनव्यापकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, विश्वजनीनः -ना -नं, सर्व्वसाधारणः -णी -णं.

Pandemonium, *s.* पिशाचसभं, सर्व्वपिशाचसभा, सर्व्वभूतसभा.

Pander, *s.* पिटः, कुण्डाशी *m.* (न्), रततालो *m.* (न्), सञ्चारकः, दूतः, वेश्याचार्य्यः, कौट्टिन्यकर्त्ता *m.* (र्त्तृ), सन्धानकर्त्ता *m.*, लाम्पट्यप्रयोजकः.

To pander, *v. a.* or *n.* परकामान् सम्पद् (c. 10. -पादयति -यितुं) or प्रयुज् (c. 10. -योजयति -यितुं), कौट्टिन्यं कृ, लाम्पट्यं प्रयुज्.

Pandering, panderism, *s.* कौट्टिन्यं, पिटकर्म्म *n.* (न्), लाम्पट्यप्रयोजकत्वं.

Pandiculation, *s.* जृम्भणं, विजृम्भणं, हाफिका. *See* Yawning.

Pandit, *s.* (Learned Brahman) पण्डितः. *See* Pundit.

Pane, *s.* (Of glass) काचशिला, काचमयरूपानशिला.

Panegyric, *s.* स्तुतिवादः, स्तुतिवाक्यं, प्रशंसावादः, स्तुतिपाठः, वन्दिपाठः, स्तुतिः *f.*, गुणस्तुतिः *f.*, गुणोत्कीर्त्तनं, गुणगानं, स्तोत्रं, श्लाघा, वन्दना, वर्णना. *See* Encomium.

Panegyrical, *a.* स्तुतिमयः -यी -यं, प्रशंसकः -का -कं, प्रशंसाकरः -रा -रं, गुणवर्णकः -का -कं, गुणश्लाघी -घिनी -घि (न्). *See* Laudatory.

Panegyrist, *s.* स्तुतिपाठकः, वन्दी *m.* (न्), वन्दिजनः, स्तोता *m.* (तृ), वर्णकः.

Panel, *s.* (Of a door) कपाटः -टी -टं, द्वारकपाटः, कवाटः -टा -टं, द्वारशाखा.—(Whole body of the jury) शपितप्रमाणपुरुषगणः, स्थेयगणः.

Pang, *s.* व्यथा, यातना, वेदना, शूलः -लं, अतिवेदना, अतिव्यथा; 'of childbirth,' गर्भवेदना, प्रसववेदना.

Panic, *s.* (Sudden fright) आकस्मिकभयं, आकस्मिकत्रासः, अकस्मादुत्पन्नभयं, निष्कारणभयं, विद्रवः, विप्लवः, त्रासः; 'general panic in a country,' पाकः; 'struck with panic,' भयविप्लुतः -ता -तं; 'as an army,' पिन्नः -न्ना -न्नं, पिन्नलः -ला -लं, समुत्पिन्नः &c., समुत्पिन्नलः &c.—(Sort of seed or grain) अणुः *m.*, प्रियङ्गुः -ङ्गूः *f.*, कङ्गुः -ङ्गूः *f.*, कङ्गुनी; 'field of it,' अणव्यं.

Pánini, *s.* (The grammarian) पाणिनिः *m.*, पाणिनः, दाक्षीपुत्रः, दाक्षेयः, शालातुरीयः, शालातुरीयः; 'connected with him,' पाणिनीयः -या -यं.

Panjáb, *s.* (The country) पञ्चनदः, वाह्लीकः; 'the Chenáb river,' चन्द्रभागा.

Pannel, *s.* (Kind of saddle) पर्य्याणं.—(Of a door). *See* Panel.

Pannier, *s.* (Basket) करण्डः, डलकं, डल्लकं, करण्डोलः, पेटकः.

Panoplied, *a.* संवर्म्मितः -ता -तं, कवचसंवृतः -ता -तं. कृतसन्नाहः -हा -हं.

Panoply, *s.* सर्व्वाङ्गकवचः -चं, सर्व्वशरीरवर्म्म *n.* (न्), सर्व्वगात्ररक्षणी.

Panorama, *s.* चतुर्दिग्दर्शकचित्रं, सर्व्वदिग्दर्शकचित्रं.

To pant, *v. n.* (Palpitate) स्पन्द्, परिस्पन्द्, कम्प्, विकम्प्, वेप्, उच्छ्वस्.—(Have the breast heave with difficult respiration) कृच्छ्रेण श्वस् (c. 2. श्वसिति -तुं), कृच्छ्रेण श्वासप्रश्वासं कृ, उद्गमं कृ, उद्ध्मा (c. 1. -धमति -ध्मातुं), प्राणकृच्छ्रोपहतः -ता -तं भू.—(Long for) अभिलष्, आकांक्ष्, अभिवाञ्छ् &c.

Pant, *s.* स्पन्दनं, प्रतिस्पन्दनं, कम्पः -म्पनं, वेपनं, उद्गमः.

Pantaloon, *s.* (Kind of trowsers) अशिथिलकञ्चुकविशेषः, जङ्घाच्छादनयोग्यम् अशिथिलवस्त्रं, जङ्घापरिधानं.—(Buffon) भण्डः, विदूषकः.

Pantheism, *s.* जगदीश्वरमतं, जगदीश्वरवादः, अद्वैतमतं, अद्वैतवादः, अभेदमतं, अभेदवादः, विराट्स्वरूपमतं.

Pantheist, *s.* जगदीश्वरवादी *m.* (न्), जगदीश्वरमतावलम्बी *m.*, जगदीश्वरमताश्रयी *m.*, अद्वैतवादी *m.*, अभेदवादी *m.*, अद्वैतमतावलम्बी *m.*

Pantheistic, pantheistical, *a.* जगदीश्वरमतसम्बन्धी -न्धिनी &c., जगदीश्वरमतविषयकः -का -कं, अद्वैतमतसम्बन्धी &c., अद्वैतमतविषयकः &c.

Pantheon, *s.* सर्व्वदेवतामन्दिरं, सर्व्वदेवालयं, सर्व्वदेवतायतनं, सर्व्वदेवभवनं.

Panther, *s.* द्वीपी *m.* (न्), अतिक्रूरशीलो वनमार्जारभेदः or क्षुद्रव्याघ्रभेदः.

Panting, *s.* उच्छ्वासः, दुःश्वासः, श्वासकृच्छ्रं, प्राणकृच्छ्रं, उद्गमः, स्पन्दनं.

Panting, *part.* उच्छ्वसन् -सन्ती &c., कृच्छ्रेण श्वसन् &c., स्पन्दमानः -ना -नं, कम्पमानः &c. *See* Gasping, Heaving.

Pantomime, *s.* (One that represents by dumb show) मुग्धाभिनयी *m.* (न्), मुग्धाभिनेता *m.* (तृ), मुग्धनर्त्तकः, मुग्धनाटकः, केवलाभिनयी *m.* (न्), हस्तपादादिसञ्चालनमात्रेण अभिनयी *m.* or अभिनेता *m.*, रङ्गायतारी *m.*—(Representation by dumb show) मुग्धनाट्यं, मुग्धनृत्यं, मुग्धाभिनयः, हस्तपादादिसञ्चालनं, हस्तपादादिसञ्चालनाभिनयः, लास्यं, ताण्डवं.

Pantomime, pantomimic, *a.* मुग्धनाट्यसम्बन्धी &c., मुग्धाभिनयविषयकः &c.

Pantry, *s.* कोष्ठः -ष्ठकं, खाद्यद्रव्यागारः -रं, खाद्यकोष्ठकं, कुटिः -टी *m. f.*

Pap, *s.* (Nipple) स्तनाग्रं, स्तनमुखः -खं, कुचाग्रं.—(Breast) स्तनः, कुचः, कुचतटं; 'the paps,' स्तनौ *m.* du.—(Soft food for infants) बालकपोषणयोग्यं मृदुवं, मृद्वाहारः, मृदुखाद्यं, बालकाहारः.

Papa, *s.* पिता *m.* (तृ), तातः &c. *See* Father.

Papal, *a.* रोमीयधर्म्माधिपतिसम्बन्धी -न्धिनी &c., रोमीयधर्म्मोय्यक्षसम्बन्धी.

Papaverous, *a.* खस्खसगुणोपेतः -ता -तं, खस्खसतुल्यगुणः -णा -णं.

Paper, *s.* (The substance) कार्पासं, कार्पासिकपत्रं.—(For writing) पत्रं, लिखनपत्रं, लेखनपत्रं, लेख्यपत्रं.—(Written sheet) पत्रं, पत्रकं,

पत्रिका, लेखः.—(Document, deed) पत्रं -त्री, लेख्यं, लेख्यपत्रं, साधनपत्रं, लेख्यप्रसङ्गः.

PAPER, *a.* (Made of paper) कार्पासिकः -की -कं, कार्पासः -सी -सं.

To PAPER, *v. a.* चित्रकार्पासेन or कार्पासिकपत्रेण छद् (c. 10. छादयति -यितुं) or आछद् or आस्तृ (c. 5. -स्तृणोति -स्तरितुं, -रीतुं).

PAPER-MAKER, *s.* कार्पासकृत्, कार्पासकारः, कार्पासिकपत्रकृत्.

PAPESCENT, *a.* मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं.

PAPILIO, *s.* चित्रपतङ्गः, पतङ्गः. *See* BUTTERFLY.

PAPILLARY, PAPILLOUS, *a.* स्तनाग्रसदृशः -शी -शं, कुचाग्रोपमः -मा -मं.

PAPIST, *s.* रोमीयधर्म्मावलम्बी *m.* (न्), रोमीयधर्म्मनिश्चितः, रोमीयधर्म्मस्थः. रोमीयमतधारी *m.* (न्).

PAPPY, *a.* मज्जामयः -यी -यं, मज्जावान् -वती -वत् (न्), मज्जागुणकः -का -कं, समज्जः -ज्जा -ज्जं, मृदुः -दुी -दु, आर्द्रमृदुः &c., कोमलः -ला -लं.

PAPULÆ, *s. pl.* दद्रुः *m.*, खर्ज्जूः *f.*, वरटी, वरणडकः, रक्तस्फोटः.

PAPULOSE, PAPULOUS, *a.* दद्रुणः -णा -णं, सस्फोटः -टा -टं.

PAR, *s.* (State of equality) समता, साम्यं, समभावः, समानता, तुल्यता, साम्यता; 'that is at par,' समानकक्षः -क्षा -क्षं, समकक्षः &c.; 'that is above par,' अधिकोत्तरः -रा -रं.

PARABLE, *s.* दृष्टान्तः, दृष्टान्तरूपकथा, उत्प्रेक्षा, उपमा, समासोक्तिः *f.*, समासोक्तिरूपकथा, निदर्शनं, उदाहरणं, हितोपदेशः.

PARABOLA, *s.* (A conic section) समकलच्छिन्नं.

PARABOLIC, PARABOLICAL, *a.* (Allegorical, expressed by parable) दृष्टान्तरूपः -पा -पं, दृष्टान्तोक्तः -क्ता -क्तं, दार्ष्टान्तिकः -की -कं.—(Having the form of a parabola) समकलच्छिन्नाकारः -रा -रं.

PARABOLICALLY, *adv.* दृष्टान्तरूपेण, दृष्टान्ततस्, दृष्टान्तपूर्व्वं.

PARACENTRIC, PARACENTRICAL, *a.* मण्डलत्यागी -गिनी -गि (न्).

PARADE, *s.* (Ostentation) कौतुकं, दम्भः, आडम्बरः. *See* the word.—(Place for military exercise) खलूरिका, प्रेक्षणं.—(Military exercise) अस्त्रशिक्षा, योग्या, युद्धाभ्यासः, शस्त्राभ्यासः, सैन्यव्यायामः.—(Procession) यात्रा, सैन्ययात्रा.

To PARADE, *v. a.* (Exhibit ostentatiously) दम्भार्थं or कौतुकार्थं or प्रेक्षार्थं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश् or प्रकाश्.—(Marshal soldiers) सैन्यान् अस्त्रशिक्षार्थं or युद्धाभ्यासार्थं व्यूह् or विन्यस्.

To PARADE, *v. n.* (Go about in military procession) प्रेक्षार्थं or अस्त्रशिक्षार्थं यात्रां कृ.

PARADIGM, *s.* (Example) प्रतिमा, प्रतिरूपं, उपमा.—(In grammar) निदर्शनार्थप्रदर्शितविभक्तिः *f.*, निदर्शनार्थप्रदर्शितक्रियारूपं.

PARADISE, *s.* स्वर्गः, आनन्दलोकः, आनन्दभुवनं, नन्दनं, सुखलोकः, सुखभुवनं, सुखाधारः, सुखदं, सुखधाम *n.* (न्), अमर्त्यभुवनं, स्वर्लोकः, त्रिदिवः -वं, दिवं, द्यौः *f.* (दिव्), द्यौ *f.* (द्यो), नाकः, अपरलोकः, तार्क्षिः, क्ष्मभुजः, वैकुण्ठं; the last word refers properly to the paradise of Vishnu, that of Indra is स्वर्गः.

PARADISIACAL, *a.* स्वर्गीयः -या -यं, स्वर्गेयः -र्य्या -र्य्यं, स्वर्गयोग्यः -ग्या -ग्यं, आनन्दलोकसम्बन्धी -न्धिनी &c., स्वर्गसम्बन्धी &c.

PARADOX, *s.* लोकविरुद्धाभासः, असत्याभासः, अयुक्ताभासः, लोकविरुद्धमतं.

PARADOXICAL, *a.* (Said of opinions) लोकमतविरुद्धः -द्धा -द्धं, अयुक्ताभासरूपः -पा -पं.—(Of persons) लोकविरुद्धाभासवादी *m.* (न्), लोकविरुद्धाभाससेवी *m.* (न्), लोकविरुद्धमतावलम्बी *m.*, अयुक्ताभासवादी *m.*

PARAGON, *s.* (Model) प्रतिमा, प्रमाणं, प्रमाता *m.* (तृ), उपमा, प्रतिरूपं, उत्तमप्रमाणं.—(An unequalled object) अनुपमवस्तु *n.*, निरुपमवस्तु *n.*, अद्वितीयवस्तु *n.*, अप्रतिरूपवस्तु.

PARAGRAPH, *s.* परिच्छेदः, विच्छेदः, खण्डः, लेखपरिच्छेदः, लेखखण्डः, वाक्यपरिच्छेदः, वाक्यखण्डः, वाक्यं.

PARALIPOMENA, *s.* शेषग्रन्थः, उपग्रन्थः, परिशिष्टं, उत्तरखण्डः.

PARALLAX, *s.* (In astronomy) शीघ्रः, लम्बनं, स्थानभेदः.

PARALLEL, *a.* (In geometry) एकदिङ्मुखसमान्तरः -रा -रं, एकदिग्गतसमान्तरः -रा -रं, समान्तरः -रा -रं, सरलसमान्तरः -रा -रं; 'two parallel lines,' एकदिग्गतसमान्तररेखाद्वयं, सरलसमान्तररेखाद्वयं, सरलरेखाद्वयं.—(Like, similar) समः -मा -मं, समानः -ना,-नं, तुल्यः -ल्या -ल्यं, सदृशः -शी -शं, अनुरूपः -पा -पं, समभावः -वा -वं, समरूपः -पा -पं.

PARALLEL, *s.* (A line equidistant from another) समान्तररेखा; 'of latitude,' स्पष्टपरिधिः *m.*, अक्षवृत्तं, अक्षांशवृत्तं.—(Likeness, conformity) सादृश्यं, सदृशता, सारूप्यं, अनुरूपता, आनुरूप्यं, समरूपता, समता, साम्यं, समानता.—(Comparison) उपमा, औपम्यं.

To PARALLEL, *v. a.* (Make parallel) समान्तरीकृ, समान्तरं -रां कृ.—(Compare) उपमा, तुल्, साधारणीकृ, समीकृ.—(Correspond, be equal to) समीभू, सदृशीभू, अनुरूपः -पा -पम् अस् or भू.

PARALLELISM, *s.* समान्तरता -त्वं, समान्तरभावः.—(Resemblance) सादृश्यं, सदृशता, अनुरूपता, आनुरूप्यं, समता, तुल्यता.

PARALLELOGRAM, *s.* दीर्घचतुरस्रं, दीर्घचतुर्भुजः, आयतचतुरस्र, दीर्घचतुष्कोणः, समद्विभुजः, समसमद्विभुजः.

PARALLELOGRAMIC, PARALLELOGRAMICAL, *a.* दीर्घचतुरस्रः -स्रा -स्रं, समद्विभुजः -जा -जं.

PARALLELOPIPED, *s.* (In geometry) समखातः.

PARALOGISM, PARALOGY, *s.* आभासः, सिद्धान्ताभासः, हेत्वाभासः, पक्षाभासः, मिथ्याहेतुः *m.*, अयुक्तिः *f.*

PARALYSIS, *s.* स्तम्भः, अवष्टम्भः, विष्टम्भः, संस्तम्भः, सुप्तिः *f.*, त्वक्सुप्तिः *f.*, स्वापः, जाड्यं; 'of the thigh,' ऊरुस्तम्भः.—(Paralytic stroke) पक्षाघातः, पक्षवायुः *m.*, अङ्गैकाङ्गवायुः *m.*, अङ्गैकाङ्गं, भङ्गः.

PARALYTIC, PARALYTICAL, *a.* (Affected with paralysis) पक्षाघाती -तिनी -ति (न्), पक्षाघातरोगी &c., पक्षवायुग्रस्तः -स्ता -स्तं, अङ्गैकाङ्गरोगी &c., सुप्तत्वक् *m. f. n.* (च्).

To PARALYZE, *v. a.* स्तम्भं जन् (c. 10. जनयति -यितुं), स्तम्भीकृ, स्तम्भ् (c. 5. स्तभ्नोति, c. 9. स्तभ्नाति, c. 10. स्तम्भयति -यितुं), विष्टम्भ्, जडीकृ, जाड्यं कृ, स्वापं जन्.

PARALYZED, *p. p.* स्तम्भितः -ता -तं, स्तम्भीकृतः -ता -तं, जडीकृतः -ता -तं, स्तब्धः -ब्धा -ब्धं, विष्टब्धः &c., अवष्टब्धः &c., निस्तब्धः &c., स्तम्भितः -ता -तं. *See* NUMB, *a.*

PARAMOUNT, *a.* परमः -मा -मं, सर्व्वश्रेष्ठः -ष्ठा -ष्ठं, श्रेष्ठः &c., अधिकः -का -कं, सर्व्वाधिकः &c., प्रमुखः -खा -खं, प्रधान in comp.; 'possessing paramount dominion,' साम्राजिकः -की -कं, सार्व्वभौमः -मी -मं; 'paramount sovereign,' सम्राट् *m.* (ज्), सर्व्वेश्वरः, सर्व्वेशः, सर्व्वस्वामी *m.* (न्); 'sway of a lord paramount,' साम्राज्यं.

PARAMOUR, *s.* (Gallant) जारः, उपपतिः *m.*, पापपतिः *m.*, रमणः, विटः, चेटकः.—(Mistress) उपपत्नी, उपपत्नी, जारिणी.

PARAPET, *s.* वक्षःपर्य्यन्तः प्राकारः, भित्तिः *f.*, परिसरः.

PARAPHERNALIA, *s. pl.* (Articles which a wife brings with her) स्त्रीधनं, यौतकं, औद्वाहिकं, पारिणाय्यं.—(Appendages, trappings) परिच्छदः, सामग्र्यं, पारिणाह्यं, उपकरणं, व्यञ्जनं.

PARAPHRASE, *s.* टीका, सविस्तरव्याख्या, सविस्तरभाषान्तरं सविस्तरार्थैकथनं, सविस्तरविवरणं, मूलशब्दविस्तारः, भाष्यं, टिप्पनी.

To PARAPHRASE, *v. a.* विस्तरशस् or विस्तरेण or मूलशब्दविस्तारेण व्याख्या (c. 2. -ख्याति -तुं) or भाषान्तरीकृ or मूलार्थविवरणं कृ or मूलशब्दव्याख्यां कृ, मूलशब्दविस्तारं कृ, मूलशब्दाधिक्यं कृ.

PARAPHRASED, *p. p.* मूलशब्दविस्तारेण व्याख्यातः -ता -तं or विवृतः -ता -तं.

PARAPHRAST, *s.* मूलशब्दविस्तारेण व्याख्याता *m.* (तृ), टीकालेखकः.

PARAPHRASTIC, PARAPHRASTICAL, *a.* अधिकशब्दकः -का -कं, मूलाधिकशब्दकः &c., मूलशब्दविस्तारूपः -पा -पं, विस्तारूपः -पा -पं.

PARAPHRASTICALLY, *adv.* मूलशब्दविस्तारेण, मूलशब्दाधिक्यपूर्व्वं.

PARAQUET, PARAQUITO, *s.* क्षुद्रशुकः, अल्पशरीरः कीरभेदः.

PARASITE, *s.* (One who dines with others or sponges on his neighbor) परान्नः, परान्नभोजी *m.* (न्), परान्नभक्षी *m.*, परान्नपुष्टः, परान्नरुचिः *m.*, परपाकरुचिः *m.*, परपिण्डादः, पात्रेसमितः, पीठकेलिः *m.*, पीठमर्द्दः.—(In botany, a plant which attaches itself to others) वृक्षरुहा, तरुरुहा, तरुरोहिणी, तरुभुक् *m.* (ज्), वृक्षादनी, पराश्रया, वन्दा, वन्दाका, वन्दका, जीवन्तिका, आकाशवल्ली, खवल्ली, उपदी.

PARASITIC, PARASITICAL, *a.* (As a plant) वृक्षरुहः -हा -हं, तरुरुहः &c., तरुरोही -हिणी -हि (न्), तरुभुक् *m. f. n.* (ज्), पराश्रयः -या -यं.—(Sponging on others) पराश्रयी &c., परान्नपुष्टः -ष्टा -ष्टं.

PARASOL, *s.* आतपत्रं, आतपवारणं, छत्रं, उष्णवारणः -णं, जनत्रा; 'royal one,' नृपछत्रं, नृपलक्ष्म *n.* (न्).

To PARBOIL, *v. a.* ईषत् क्वथ्, अर्द्धेन क्वथ्, ईषत् स्थाल्यां पच् or श्रा.

PARBOILED, *p. p.* अर्द्धक्वथितः -ता -तं, ईषत्क्वथितः &c., अर्द्धश्राणः -णा -णं.

PARCEL, *s.* (Small bundle) पोटलिका, पोट्टली, कूर्च्चः, वीटिका.—(Portion, part) भागः, विभागः, अंशः, वण्टः -ण्टकः, उद्धारः, भाजितं, खण्डः.—(Quantity) राशिः *m.*, सञ्चयः, निचयः, चयः, सङ्घः, समूहः.—(Number of persons) गणः, समूहः, वृन्दं, मण्डलं.

To PARCEL, *v. a.* विभज् (c. 1. -भजति -ते -भक्तुं), प्रविभज्, विभागशः or अंशांशि कृप् (c. 10. कल्पयति -यितुं) or विन्यस् (c. 4. -अस्यति -असितुं), वण्ट् (c. 10. वण्टयति -यितुं).

PARCENARY, *s.* समांशिता, समाधिकारिता, अविभक्तदायभोगः.

PARCENER, *s.* समांशी *m.* (न्), समभागी *m.*, समाधिकारी *m.*, अंशकः.

To PARCH, *v. a.* तप् (c. 1. तपति, तप्तुं, c. 10. तापयति -यितुं), सन्तप्, दह् (c. 1. दहति, दग्धुं), परिदह्, भर्ज्ज् (c. 6. भृर्ज्जति -ते, भर्ष्टुं, भर्ष्टुं), भृज् (c. 1. भर्जते -र्जितुं).

PARCHED, *p. p.* तप्तः -प्ता -प्तं, उपतप्तः &c., अभितप्तः &c., तापितः -ता -तं, दग्धः -ग्धा -ग्धं, भृष्टः -ष्टा -ष्टं, भर्ष्टः &c., भर्जितः -ता -तं, निर्जलः -ला -लं, शोषितजलः &c.; 'having the throat parched with thirst,' पिपासाशुष्ककण्ठः -ण्ठा -ण्ठं.

PARCHMENT, *s.* चर्म्मपटः, चर्म्मपत्रं -त्रकं, झिल्ली, झिल्लिका, लेखनधर्म्म *n.* (न्), लिखनचर्म्म *n.*, चर्म्म *n.*

To PARDON, *v. a.* क्षम् (c. 1. क्षमते -ति, क्षन्तुं), संक्षम्, मुच् (c. 6. मुचति, मोक्तुं), विमुच्, अवमृज्, मृष्, मृज्, अनुज्ञा, सह्, निर्यत्, क्षमां कृ, अपराधक्षमां कृ, अपराधमोचनं कृ, पापमुक्तिं कृ; 'deign to pardon my offence,' अपराधं मे क्षन्तुम् अर्हसि. *See To* FORGIVE.

PARDON, *s.* क्षमा, क्षान्तिः *f.*, मोचनं, विमोचनं, पापमोचनं, अपराधमुक्तिः *f.*, अपराधमोचनं, दोषमुक्तिः *f.*, अपराधक्षमा, अपराधमार्जना -नं, पापमार्जना, निष्कृतिः *f.*, दया, कृपा; 'to beg pardon,' क्षम् (c. 10. क्षमयति -यितुं), क्षमां प्राप्, क्षमस्व or क्षम्यताम् इति वद्.

PARDONABLE, *a* क्षन्तव्यः -व्या -व्यं, क्षमणीयः -या -यं, क्षमार्हः -र्हा -र्हं, क्षमायोग्यः -ग्या -ग्यं, क्षमोचितः -ता -तं, सहनीयः -या -यं, उपेक्षणीयः -या -यं.

PARDONABLY, *adv.* यथाक्षन्तव्यं, यथाक्षमणीयं, यथासहनीयं, क्षमणीयं.

PARDONED, *p. p.* क्षान्तः -न्ता -न्तं, दोषमुक्तः -क्ता -क्तं, दण्डमुक्तः &c., शासनमुक्तः &c., मुक्तदण्डः -ण्डा -ण्डं, मुक्तदोषः -षा -षं, मुक्तशासनः -ना -नं, मुक्तापराधः -धा -धं, दण्डमोचितः -ता -तं.

To PARE, *v. a.* (Clip, chip, cut off) तक्ष् (c. 1. तक्षति -क्षितुं), त्वक्ष् (c. 1. त्वक्षति -क्षितुं), तनूकृ, छिद्, अवच्छिद्, अवकृत्, कृत्, लू, खण्ड्, खण्डीकृ, विदलीकृ, कल्प्; 'to pare the nails,' नखखण्डनं कृ, नखरञ्जनं कृ, नखकल्पनं कृ.—(Peel, skin) त्वच (nom. त्वचयति -यितुं), निस्त्वचीकृ, त्वक्परिपुटनं कृ, निस्त्वचीकृ.

PARED, *p. p.* तक्षः -क्षा -क्षं, त्वक्षः &c., तनूकृतः -ता -तं, कल्पः -प्ता -प्तं, छिन्नः -न्ना -न्नं, अवच्छिन्नः &c., खण्डितः -ता -तं, उल्लिखितः -ता -तं, 'pared nails,' खण्डकः; 'having pared nails,' कल्पनखः -खा -खं.

PAREGORIC, *a.* दुःखशमकः -का -कं, उपशमकः &c., शान्तिदः -दा -दं.

PARENT, *s.* (He or she that produces) जननः *m.* -नी *f.*, जनकः *m.*, जनिका *f.*, जनयिता *m.* -त्री *f.* (तृ), जन्मदः, धाता *m.* (तृ), सम्भूः *m.*, जः, पिता *m.*, माता *f.* *See* FATHER, MOTHER. 'Parents,' मातापितरौ *m. du.*, मातरपितरौ *m. du.*, तातजनयित्र्यौ *f. du.*, जनकजनन्यौ *f. du.*; 'parent of all,' विश्वधाता *m.*—(Cause, source) कारणं, हेतुः *m.*, उत्पादकः, जन्महेतुः *m.*, प्रभवः.

PARENTAGE, *s.* जन्म *n.* (न्), जातिः *f.*, वंशः, कुलं, उत्पत्तिः *f.*; 'of royal parentage,' राजवंश्यः -श्या -श्यं, नृपात्मजः -जा -जं, राजबीजी &c.; 'of honorable parentage,' महाकुलः -ला -लं.

PARENTAL, *a.* (Pertaining to parents) मातापितृसम्बन्धी -न्धिनी &c., जननसम्बन्धी &c., पैतृकः -की -कं.—(Becoming parents) मातापितृयोग्यः -ग्या -ग्यं, मातापितृसदृशः -शा -शं; 'parental affection,' अपत्यस्नेहः, पुत्रस्नेहः, सुतस्नेहः, वात्सल्यं, वत्सलता.

PARENTHESIS, *s.* निवेशितवाक्यं, प्रक्षिप्तवाक्यं, अप्रधानवाक्यं, प्रासङ्गिकवाक्यं, उपवाक्यं, प्रक्षिप्ताप्रधानवाक्यं, अनन्वितवाक्यं.

PARENTHETIC, PARENTHETICAL, *a.* प्रासङ्गिकः -की -कं, अनन्वितः -ता -तं, अप्रधान in comp., मूलवाक्यानन्वितः &c.

PARENTHETICALLY, *adv.* प्रसङ्गतस्, प्रसङ्गक्रमेण, मूलवाक्यानन्वितं.

PARENTLESS, *a.* मातापितृहीनः -ना -नं, मातापितृरहितः -ता -तं.

PARER, *s.* तक्षा *m.* (क्षृ), त्वक्षा *m.*; 'nail-parer,' नखरञ्जनी.

PARHELION, *s.* सूर्य्याभासः, मिथ्यासूर्य्यः, कृत्रिमसूर्य्यः.

PARING, *s.* (The act) तक्षणं, त्वक्षणं.—(That which is pared off) तक्षं, तक्षितं, विदलं, शकलं, खण्डः, भिदं.

PARISH, *s.* पुरोहिताधीनः प्रदेशः or ग्रामः, धर्म्माध्यापकाधीनो देशः or ग्रामः, पौरोहित्यदेशः, पौरोहित्यभूमिः *f.*; 'parish-priest,' ग्रामयाजकः, ग्रामपुरोहितः.

PARISHIONER, *s.* ग्रामवासी *m.* (न्), ग्रामस्थः, ग्रामेवासी *m.*, ग्रामिकः, ग्रामीयः, पुरोहितायीनदेशस्थः.

PARITY, *s.* समता, साम्यं, समानता, तुल्यता -त्वं, तौल्यं, साम्यता, समभावः, कक्षा; 'parity of reason,' न्यायसाम्यं, न्यायसमता, समानन्यायत्वं, तुल्यन्यायत्वं; 'by parity of reason,' न्यायसाम्यात्.

PARK, *s.* उद्यानं, राजोद्यानं, क्रीडावनं, क्रीडावाटिका, आक्रीडः -ड्डं, प्रमदवनं, साधारणवनं, साधारणोद्यानं, कृत्रिमवनं, मृगयास्थानं, मृगयालयं, मृगणभूमिः *f.*; 'open space in a town,' सन्निवेशः, निकर्षणं.

PARKER, PARK-KEEPER, *s.* उद्यानपालः -लकः, उद्यानरक्षकः.

PARLANCE, *s.* सम्भाषणं, संवादः, संलापः, आलापः, कथोपकथनं.

To PARLEY, *v. n.* (Confer) सम्भाष्, संवद्, संलप्; 'with an enemy,' युद्धमध्ये शत्रुणा सह सम्भाष्, सन्धिप्रसङ्गं कृ.

PARLEY, *s.* सम्भाषा -षणं, संलापः, वादः, संवादः; 'in war,' युद्धमध्ये शत्रुणा सह सम्भाषा, सन्धिसम्भाषणं, सन्धिप्रसङ्गः.

PARLIAMENT, *s.* विचारसभा, सम्मन्त्रणसभा, वादशाला, संवादशाला, मन्त्रशाला, महासभा, शिष्टसभा, प्रजाप्रतिनिधिसभा.

PARLOR, *s.* आलापशाला, संलापशाला, कथोपकथनशाला, उपवेशनशाला.

PAROCHIAL, *a.* पुरोहिताधीनदेशसम्बन्धी -न्धिनी &c., पौरोहित्यदेशसम्बन्धी &c., ग्रामिकः -की -कं, ग्रामीयः -या -यं, ग्राम्यः -म्या -म्यं.

PARODY, *s.* विनोदार्थानुकरणकविता, हास्यकरणार्थम् अनुकरणकाव्यं.

To PARODY, *v. a.* विनोदार्थं or हास्यकरणार्थं शब्दपरिवर्त्तनं कृ.

PAROLE, PAROL, *s.* वचनं, प्रतिज्ञा, अङ्गीकारः, स्वीकारः, उरीकारः.

PARONOMASIA, PARONOMASY, *s.* श्लेषः, श्लेषवाक्यं, द्व्यर्थवाक्यं.

PARONYCHIA, *a.* नखम्यचः, कुणिः *m.*, चिप्पं, नखरोगः.

PAROTIS, *s.* (The parotid gland) लालाशयः, लालाधारः.

PAROXYSM, *s.* आवेशः, अवतारः -रणं, आक्रमः -मणं, वेगः; 'of anger,' क्रोधावेशः; 'of lust,' कामावेशः. *See* FIT, *s.*

PARRICIDAL, PARRICIDIOUS, *a.* (Pertaining to parricide) पितृहत्यासम्बन्धी &c., पितृवधविषयकः -का -कं, पितृहत्यारूपः -पा -पं, पितृवधात्मकः -का -कं.—(Committing parricide) पितृघ्नः -घ्नी -घ्नं, पितृघातकः &c.

PARRICIDE, *s.* (One who murders his father) पितृहा *m.* (न्), पितृहन्ता *m.* (न्तृ), पितृघ्नः, पितृघाती *m.* (न्), पितृघातकः, पितृघातुकः, —(Murder of a father) पितृहत्या, पितृवधः, पितृघातः, पितृहिंसा.

PARROT, *s.* शुकः, कीरः, वक्रचञ्चुः *m.*, वक्रतुण्डः, रक्ततुण्डः, चिपिः *m.*, चिरिः *m.*, रक्तपादः, कुमारः, किङ्किरातः, फलाशनः, फलादनः, दाडिमप्रियः, मेधावी *m.* (न्); 'a flock of parrots,' शौकं.

To PARRY, निवृ (c. 10. -वारयति -यितुं), वृ, प्रतिहन् (c. 2. -हन्ति -न्तुं), प्रतिषिध् (c. 1. -षेधति -षेद्धुं), प्रतिघातं कृ, वारणं कृ.

To PARSE, *v. a.* पदभञ्जनं कृ, पदच्छेदं कृ, लिङ्गनिर्देशं कृ, शब्दान्वयनिरूपणं कृ.

PARSEE, *s.* (Persian) पारसीकः, पारसिकः.

PARSIMONIOUS, *a.* अल्पव्ययी -यिनी -यि (न्), व्ययशङ्कितः -ता -तं, व्ययपराङ्मुखः -खा -खं, परिमितव्ययी &c., मितव्ययी &c., कृपणः -णा -णं, अर्थपरः &c. *See* MISERLY.

PARSIMONIOUSLY, *adv.* अल्पव्ययेन, अल्पव्ययपूर्व्वं, सकार्पण्यं, कृपणवत्.

PARSIMONIOUSNESS, PARSIMONY, *s.* अल्पव्ययः, स्वल्पव्ययः, कार्पण्यं, कृपणता-त्वं, व्ययशङ्का, व्ययपराङ्मुखता, परिमितव्ययः, मितव्ययः, दृढमुष्टित्वं,

PARSING, *s.* पदभञ्जनं, पदच्छेदः, शब्दान्वयनिरूपणं, लिङ्गनिर्देशः.

PARSLEY, *s.* (Apium involucratum) अजमोदा.

PARSON, *s.* ग्रामपुरोहितः, ग्रामयाजकः, ग्रामधर्म्माध्यक्षः, ग्रामगुरुः *m.*, ग्रामाचार्य्यः, धर्म्माध्यापकः, उपाध्यायः.

PARSONAGE, *s.* धर्म्माध्यापकगृहं, ग्रामपुरोहिताध्युषितं गृहादि.

PART, *s.* (Portion, piece) भागः, अंशः, खण्डः -डकः, विभागः, शकलः -लं, भिन्नं, भिन्नं, भित्तिः *f.*, लवः, दलं, विदलं, अङ्गैः.—(A portion or division considered by itself, but not really separated) देशः, प्रदेशः, उद्देशः, एकदेशः, भागः, अङ्गं, अवयवः; 'part of a wood,' वनैकदेशः, वनोद्देशः.—(Component part, member) अङ्गं, अवयवः; 'inward part,' अन्तरङ्गं.—(Particular division) प्रकरणं, विषयः, अङ्गं; 'minor part,' प्रत्यङ्गं.—(Share, portion allotted) विभागः, भागः, अंशः, उद्धारः, भाजितं, भाज्यं, वण्टः -टकः. —(Interest, concern in) सम्बन्धः, अभिसम्बन्धः.—(Side, party) पक्षः; 'to take one's part,' पक्षं ग्रह् or उद्ग्रह्, पक्षोद्ग्राही or पक्षपाती &c. भू.—(Particular business or duty) कर्म्म *n.* (न्), कार्य्यं, धर्म्मः, स्वकर्म्म *n.*, स्वधर्म्मः, वृत्तिः *f.*, प्रवृत्तिः *f.*, गुणः.—(Character in a drama) भूमिका, वृत्तिः *f.*; 'act the part of a dear friend towards the rival wives,' कुरु प्रियसखीवृत्तिं सपत्नीजने.—(Parts, qualities) गुणाः *m. pl.*, बुद्धिः *f.*—(Parts, region) देशः, प्रदेशः, उद्देशः; 'for the most part,' प्रायस्, प्रायशस्, प्रायेण, भूयस्, भूयिष्ठं, बाहुल्येन, बहुशस्, बहुतरं; 'by parts, in parts,' अंशतस्, भागतस्, भागशस्, अवयवशस्; 'in part, partly,' अंशतस्, भागतस्, किञ्चित्, ईषत्; 'in two parts,' द्विधा; 'in four parts,' चतुर्धा; 'in many parts,' बहुधा; 'in how many parts?' कतिधा; 'in good part,' सानुग्रहं, प्रसन्नं, हितं, प्रियं, अनुकूलं.

To PART, *v. a.* (Disunite, divide, separate) वियुज्, विश्लिष्, भिद्, विभिद्, विच्छिद्, विधिच्, पृथक्कृ, शकलीकृ.—(Distribute, divide into shares) विभज्, प्रविभज्, संविभज्, पृथक् पृथग् विभज्, अंश् (c. 10. अंशयति -यितुं), व्यंस् (c. 10. -संसयति -यितुं), वण्ट्, परिकॢप्.—(Part the hair) सीमन्त (nom. सीमन्तयति -यितुं).

To PART, *v. n.* (Be separated or divided) वियुज् in pass. (-युज्यते), विभिद् in pass. (-भिद्यते), भिद्, विश्लिष् (c. 4. (-श्लिष्यति -श्लेष्टुं), विच्छिद् in pass., विगम् (c. 1. -गच्छति -गन्तुं), वियुक्त -क्ता -क्तं भू.—(Open in two, cleave open) स्फुट् (c. 1. स्फोटति, c. 6. स्फुटति -टितुं), दल् (c. 1. दलति -लितुं), विदल्, विदलीभू, विदलितः -ता -तं भू.—(Depart) अपगत्, व्यपगम्, अप्या, व्यपया.—(Bid farewell) आमन्त्र्, अनुमन्त्र्.—(art with) त्यज् (c. 1. त्यजति, त्यक्तुं), परित्यज्. *See* RESIGN.

To PARTAKE, *v. n.* अंशं or भागं ग्रह् (c. 9. गृह्णाति, गृहीतुं) or हृ (c. 1. हरति, हर्त्तुं), भागी -गिनी -गि भू, भज् (c. 1. भजते, भक्तुं), संविभज्, अंशं भुज् (c. 7. भुनक्ति, भुंक्ते, भोक्तुं); 'in common with another,' अन्येन सह भुज् or भज्.

PARTAKER, *s.* भागी *m.* -गिनी *f.* (न्), अंशी *m.* -शिनी *f.* (न्), संविभागी &c., भागहारी *m.* (न्), भागहरः, भागग्राही *m.*, अंशहारी *m.*, अंशहरः, अंशग्राही *m.*, अंशकः, अंशभोगी *m.*, सहभोगी *m.*, सहभागी *m.*, भाक् *m.* (ज्) in comp., भुक् *m.* (ज्) in comp.

PARTED, *p. p.* (Separated) वियुक्तः -क्ता -क्तं, विश्लिष्टः -ष्टा -ष्टं, विभक्तः &c., विविक्तः &c., विगतः -ता -तं; 'as the hair,' सीमन्त्यमानः -ना -नं.

PARTERRE, *s.* पुष्पवाटी -टिका, कुसुमाकरः, पुष्पाकरः, उद्यानं.

PARTIAL, *a.* (Inclined to favor one side) पक्षपाती -तिनी -ति (न्), पक्षस्नेही &c., स्वपक्षस्नेही &c., पक्षानुरागी &c., पक्षोद्ग्राही &c., सपक्षपातः -ता -तं, पक्षपातकृतस्नेहः -हा -हं, स्वपक्षकृतस्नेहः &c., सङ्गी &c., सङ्गवान् -वती -वत् (त्), सङ्गयुक्तः -क्ता -क्तं, पार्श्विकः -की -कं, —(Not fair) असमः -मा -मं, असमदर्शी &c., असमदृष्टिः -ष्टिः -ष्टि, असमानवृत्तिः -त्तिः -त्ति.—(Not general or total) असार्व्वत्रिकः -की -कं, अपूर्णः -र्णा -र्णं, असम्पूर्णः &c., असकलः -ला -लं, असमग्रः -ग्रा -ग्रं, अव्यापी &c., अव्यापकः -का -कं, अव्याप्तः -प्ता -प्तं, असाधारणः -णा -णी -णं, असर्व्वत्रव्यापी &c., एकाङ्गी &c., एकदेशी &c., एकपक्षी &c., खण्डितः -ता -तं, खण्ड in comp.; 'partial deluge,' खण्डप्रलयः; 'partial shower,' खण्डवृष्टिः *f.*; 'partial eclipse,' खण्डग्रासः.

PARTIATITY, *s.* (Inclination to favor one side) पक्षपातः -तिता, पक्षस्नेहः, स्वपक्षस्नेहः, पक्षोद्ग्राहः -हित्वं, सङ्गः, स्नेहः, असमता, असमदृष्टिः *f.*, असमबुद्धिः *f.*, पक्षता, पक्षानुरागः.—(Fondness for) स्नेहः, रुचिः *f.*, अभिरुचिः *f.*, अनुरागः, अनुरक्तिः *f.*, प्रणयः, प्रेम *n.* (न्).

PARTIALLY, *adv.* (With undue bias to one side) सपक्षपातं, सपक्षस्नेहं, पक्षपातपूर्व्वं, सङ्गपूर्व्वं, असमं, असमदृष्ट्या.—(Not generally or totally) असर्व्वतस्, असर्व्वत्र, खण्डतस्, खण्डशस्, भंशतस्, असकलं, असाकल्येन, अकृत्स्नशस्, असमग्रं, भागतस्, एकदेशेन, एकभागेन, एकाङ्गतस्, अपूर्णं, असम्पूर्णं, खण्ड or खण्डित in comp.; as, 'partially learned,' खण्डविद्यः -द्या -द्यं or खण्डितविद्यः.

PARTIBLE, *a.* विभाज्यः -ज्या -ज्यं, अंशनीयः -या -यं, अंश्यः -श्या -श्यं, अंशयितव्यः -व्या -व्यं, वण्टनीयः -या -यं, पृथक्करणीयः &c.

PARTICIPANT, *a.* भागी -गिनी -गि (न्), संविभागी &c., अंशी &c., समांशी &c., अंशग्राही -हिणी &c., भाक् *m.f.n.* (ज्). *See* PARTAKER.

To PARTICIPATE, *v. n.* भज्, संविभज्, भागं or अंशं ग्रह् or हृ. *See To* PARTAKE.

PARTICIPATION, *s.* अंशग्रहणं, भागग्रहणं, अंशहरणं, भागहरणं, भजनं, संविभागः -गित्वं, संविभजनं, अंशभोगः, अंशप्राप्तिः *f.*, अंशप्रापणं, सहभोगः, सहभुक्तिः *f.*

PARTICIPIAL, *a.* सकालकृदन्तरूपः -पा -पं, कृदन्तधर्म्मकः -का -कं.

PARTICIPLE, *s.* सकालकृदन्तः, कालबोधककृदन्तः, कृदन्तः.

PARTICLE, *s.* कणः, कणिका, कणिकः, लवः, लेशः, अणुः *m.*, परमाणुः *m.*, कला, काकिणिका, सूक्ष्मः, सूक्ष्माणुः, तिलः, अंशुः *m.*, अंशः, क्षुद्रांशः, सूक्ष्मांशः, तूलं, रेणुः *m.*; 'very minute particle,' अणुरेणुः *m.f.*, अतिसूक्ष्माणुः *m.*, सूच्यग्रमृत्तिका.—(In grammar) अव्ययः -यं, अव्ययशब्दः, निपातः; 'declinable particle,' अङ्गीव्ययं.

PARTICULAR, *a.* (Noting something peculiar or distinctive) विशेष in comp., विशिष्टः -ष्टा -ष्टं, विशेषकः -का -कं, सविशेषः -षा -षं, विशेषवान् -वती -वत् (त्), विशेषणः -णा -णं, अवच्छेदकः -का -कं, विच्छेदकः &c., परिच्छेदकः &c.; 'particular mark,' विशेषलक्षणं; 'particular duty,' विशेषधर्म्मः; 'particular condition,' दशाविशेषः; 'at particular times,' विशेषकाले, कालविशेषे.—(Distinct individual) विशिष्टः &c., विशेष in comp., व्यक्तः -क्ता -क्तं, व्यक्तिकः -का -कं, पृथग्व्यक्तिकः &c., पृथगात्मकः &c., उद्दिष्टः -ष्टा -ष्टं, उद्देशकः -का -कं, भिन्नः -न्ना -न्नं, विविक्तः &c.; 'particular person,' अमुकजनः, अमुकव्यक्तिः *f.*—(Not general) असाधारणः -णा -णी -णं, असामान्यः -न्या -न्यं, अव्यापी -पिनी -पि (न्), अव्यापकः -का -कं, अव्याप्यः -प्या -प्यं.—(Not common) अप्राकृतः -ती -तं, अलौकिकः -की -कं, अप्रसिद्धः -द्धा -द्धं,—(Special, more than ordinary) विशेष in comp., विशेषकः &c., अधिकोत्तरः -रा -रं, लोकोत्तरः &c.; 'particular rule,' विशेषविधिः *m.*; 'particular occasion,' समयविशेषः.—(Odd, singular) विलक्षणः -णा -णं, अपूर्व्वः -र्व्वा -र्व्वं, अलौकिकः -की -कं.—(Minute, attentive to particulars, strict) सूक्ष्मदर्शी -र्शिनी &c., सूक्ष्मदृष्टिः -ष्टिः -ष्टि, सूक्ष्मः -क्ष्मा -क्ष्मं.

PARTICULAR, *s.* विशेषः, अवच्छेदः, व्यवच्छेदः, विच्छेदः.—(Single or distinct point) अर्थः, विषयः, प्रकरणं, विशेषः; 'the particulars of a story,' वृत्तान्तः; 'he told all the particulars,' सर्व्ववृत्तान्तम् अकथयत्; 'in particular,' विशेषतस्.

PARTICULARITY, *s.* (Distinct notice of particulars) एकैकशो निर्देशः or समुद्देशः or उद्देशः, विशेषकथनं, सर्व्ववृत्तान्तकथनं, विशेषनिर्देशः, अवच्छेदः.—(Individuality) व्यक्तता, अव्याप्तिः *f.*, अव्यापकत्वं, असाधारणता.—(Distinctness) भिन्नता, व्यक्तिः *f.*, पार्थक्यं, विशिष्टता.—(Detail) विवरणं, विस्तारः.

PARTICULARIZATION, *s.* विशेषवर्णनं -ना, विशेषनिर्देशः, विशेषकथनं, सर्व्ववृत्तान्तकथनं, समुद्देशः, व्यवच्छेदः, परिसंख्या -ख्यानं.

To PARTICULARIZE, *v. a.* एकैकशो निर्दिश् (c. 6. -दिशति -देष्टुं) or उद्दिश् or समुद्दिश् or कथ् (c. 10. कथयति -यितुं) or वर्ण् (c. 10. वर्णयति -यितुं), विशेषवर्णनं कृ, विशेषनिर्देशं कृ, विशेषकथनं कृ, विशेष (nom. विशेषयति -यितुं), विशिष् (c. 7. -शिनष्टि -शेष्टुं).

PARTICULARIZED, *p. p.* एकैकशो निर्दिष्टः -ष्टा -ष्टं or समुद्दिष्टः &c. or उद्दिष्टः &c. or कथितः -ता -तं, विशेषितः &c., व्यवच्छिन्नः -न्ना -न्नं.

PARTICULARLY, *adv.* (In an especial manner) विशेषतस्, विशेषेण, सविशेषं, मुख्यशस्, प्रधानतस्.—(Distinctly, severally) व्यक्तं, विविक्तं, पृथक्, अवयवशस्.—(Minutely) अतिसूक्ष्मत्वेन.

PARTING, *s.* (Separation) वियोगः, विप्रयोगः, विगमः, विरहः, विश्लेषः प्रविश्लेषः, विप्रलम्भः, भेदः, विभेदः, विभागः, प्रविभागः, पृथग्भावः, पृथक्त्वं, अपगमः.—(Of the hair) सीमन्तः.

PARTING, *a.* (Given at parting) प्रस्थानिकः -की -कं, प्रास्थानिकः -की -कं, प्रस्थान or प्रयाण in comp.; as, 'a parting embrace,' प्रस्थानालिङ्गनं.

PARTISAN, *s.* पक्षपाती *m.* (न्), सपक्षः, एकपक्षः, पक्षकः, पक्षधारी *m.*, पक्षधरः, पक्षावलम्बी *m.* (न्), पक्षः, पार्श्वकः, पार्श्विकः, सहोत्थायी *m.* (न्), अर्थी *m.*, अनुग्राहकः, सङ्गी *m.*, अनुषङ्गी *m.* (न्).

PARTISANSHIP, *s.* पक्षपातिता, पक्षपातः, पक्षधारणं -रिता, पक्षावलम्बनं.

PARTITION, *s.* (Separation) परिच्छित्तिः *f.*, परिच्छेदः. *See* PARTING, *s.*—(Division of shares) विभागः, विभागकल्पनं -ना, भागकरणं, भागः, अंशनं, उद्धारः, उद्धारविभागः, वण्टनं.—(That by which separation is made, a wall, &c.) भित्तिः *f.*, भित्तिका, व्यवधानं, व्यवधा, सन्धिः *m.*

To PARTITION, *v. a.* (Divide) विभिद्, भिद्, विच्छिद्, परिच्छिद्, छिद्, विभज्, पृथक्कृ.—(Distribute into shares) विभज्, प्रविभज्, संविभज्, अंश्, व्यंस्, अंशांशि दा or कॢप् or परिकॢप्, वण्ट्, वण्टनं कृ.

PARTITIONED, *p. p.* विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c., उद्धृतः &c., कृतवण्टनः -ना -नं.

PARTLY, *adv.* अंशतस्, भागतस्, किञ्चित्, ईषत्, कियत्, कियत्पर्य्यन्तं, अल्पं, अल्पमात्रं.

PARTNER, *s.* सहायः, सहकारी *m.* (न्), सङ्गी *m.* (न्), सम्भूयकारी *m.*, अंशी *m.*, समांशी *m.*, संसर्गी *m.*, अंशग्राही *m.*, अंशभोगी *m.*, सहभोगी *m.*, सहभागी *m.*, सहवर्त्ती *m.*, भागी *m.*, प्रतियोगी *m.*, उत्सङ्गी *m.*, अनुषङ्गी *m.*, सजूः *m.* (स्), पक्षकः.—(Partner of joys and sorrows, as a husband or wife) समदुःखसुखः -खा. *See* HUSBAND, WIFE, MATE, &c.

PARTNERSHIP, *s.* समांशिता -त्वं, सहायता, सम्भूयकारिता -त्वं, सम्भूयसमुत्थानं, संसर्गिता -त्वं, प्रतियोगिता, सहकारिता.

PARTRIDGE, *s.* तित्तिरः, तित्तिरिः *m.*, चकोरः -रकः, कृकणः, क्रकणः, क्रकरः, कपिञ्जलः, टिट्टिभः; 'flock of partridges,' तैत्तिरं.

PARTURIENT, *a.* आसन्नप्रसवा, आसन्नप्रसववेदना, प्रसवोन्मुखा, उपस्थितप्रसवकाला, आसन्नप्रसवकाला.

PARTURITION, *s.* प्रसवः, प्रसूतिः *f.*, सूतिः *f.*, सूः *f.*, सूत्या, जननं, उत्पादनं.

PARTY, *s.* (Side, cause) पक्षः, मतं; 'one's own party,' आत्मपक्षः, स्वपक्षः; 'belonging to one's own party,' स्वपक्षावलम्बी *m.*, स्वपक्षपाती, आत्मपक्षधारी *m.* (न्); 'one of the opposite party,' विपक्षः, प्रतिपक्षः; 'attachment to a party,' पक्षपातः. *See* PARTIALITY, PARTISANSHIP.—(Number of persons associated in opposition to others) पक्षः, सपक्षिणः *m. pl.*, सपक्षिणां गणः

or संसर्गः or समूहः or सङ्घातः or सङ्घः, शाखा.—(One of two litigants) वादी *m.* (न्), अर्थी *m.*—(Set of people) गणः, पंक्तिः *f.*, समूहः, सङ्घः, सङ्घातः, मण्डलं, दलं; 'a party of men,' पुरुषगणः, जनसमूहः; 'of soldiers,' सैन्यदलं; 'of rogues,' धूर्त्तमण्डलं.—(Assembly) सभा, पंक्तिः *f.*, समाजः, रासेरसः.—(Convivial party) सहभोजनं, सम्भोजनं, सहपानं, सम्पीतिः *f.*, उच्चतालं.—(Person particularized) विवक्षितजनः, व्यक्तिः *f.*, मनुष्यः, जनः, विवक्षितमनुष्यः.—(One concerned or interested) सम्बन्धी *m.* (न्), भागी *m.*, संशी *m.*

Party, *a.* पक्ष in comp., पाक्षिकः -की -कं, पाक्षः -क्षी -क्षं.

Party-colored, *a.* नानावर्णः -र्णा -र्णं, नानारङ्गः -ङ्गा -ङ्गं, चित्रविचित्रः -त्रा -त्रं, विचित्रवर्णः &c., विचित्ररङ्गः &c.

Partyism, *s.* पक्षपातिता. *See* Partisanship, Partiality.

Party-man, *s.* पक्षपाती *m.* (न्), पक्षकः, पार्श्विकः. *See* Partisan.

Party-wall, *s.* भित्तिः *f.*, भित्तिका, कुड्यं -ड्यकं. *See* Partition.

Párvatí, *s.* (The goddess Durgá, the wife of Śiva and mother of Kártikeya and Ganeśa, called Párvatí in her capacity of daughter of Himála, the sovereign of the snowy mountains. She has many names, some of which will be found under the head of Bhaváni and Durgá. They are here all collected together) पार्व्वती, हैमवती, हिमवत्सुता, हिमशैलजा, हिमजा, देवी, महादेवी, उमा, दुर्गा, काली, चण्डी, चण्डिका, कालिका, भवानी, गौरी, मङ्गलागौरी, सर्व्वमङ्गला भैरवी, भद्रकाली, रुद्राणी, सर्व्वाणी, ईश्वरी, शिवा, मृडानी, अम्बा, अम्बिका, जगदम्बा, जगन्माता *f.* (तृ), दक्षजा, श्यामा, भगवती, ज्येष्ठागौरी, महामाया, शाकम्भरी, कात्यायनी, अपर्णा, शाम्भवी, शाबरी षष्ठी.

Parvenu, *s.* (An upstart) आगन्तुकः, आगन्तुः *m.*

Pasquinade, *s.* निन्दालेखः, निन्दार्थकलेखः, उपहासककविता.

To pass, *v. n.* (Move, go) गम्, या, चल्, चर्, सृ, इ &c.—(Be spent, go on, as time, &c.) वृत् (c. 1. वर्त्तते -र्त्तितुं), प्रवृत्, गम्—(Gain currency) प्रचलीभू, प्रचलितः -ता -तं भू, प्रचल्, प्रचर्.—(Be enacted) सिध् (c. 4. सिध्यति, सेद्धुं), सिद्धीभू, निष्पन्नीभू, व्यवस्थापितः -ता -तं भू.—(Be approved) सम्मतः -ता -तं भू.—(Occur, come to pass) उपस्था, समुपस्था, उपपद्, सम्पद्, उपपन्नः -न्ना -न्नं भू, आपत्, सम्भू, संवृत्, संवृत्तः -त्ता -त्तं भू, आगम्, उपागम्, घट्.—(Be transferred) सङ्क्रम् (c. 1. -क्रामति -क्रमितुं), उपसङ्क्रम्.—(Pass away, disappear, fade away) नश्, प्रणश्, क्षि, प्रली, विली, प्रविली, तिरोगम्, तिरोभू, क्षर्.—(Pass away, as time, &c.) अतिक्रम्, अतिवृत्, अती, व्यती, समती, गम्; 'six months passed away,' षण्मासम् अत्यवर्त्तत; 'six seasons passed away,' ऋतूनां षट् समत्ययुः; 'let not the moment pass away,' नातिपर्त्तेत क्षणं.—(Pass by) अतिक्रम्, अती, अतिगम्, अतिचर्, अतिया, समतिया.—(Pass on) प्रया, प्रगम्, प्रवृत्, प्रसृ, गम्, या; 'jokes pass,' प्रवर्त्तते हासः.—(Pass over, cross) तॄ, अतितॄ, निस्तॄ, अतिक्रम्, अती.—(Let pass, omit) त्यज्, परित्यज्, उत्सृज्, विसृज्, उपेक्ष्; 'let it pass,' यातु; 'that which passes in the mind,' मनोगतं, अन्तर्गतं मनः.

To pass, *v. a.* (Go over, through, beyond, cross or pass over) तॄ (c. 1. तरति -रितुं -रीतुं), अतितॄ, सन्तॄ, निस्तॄ, उत्तॄ, समुत्तॄ, अतिक्रम्, व्यतिक्रम्, अती, व्यती, अतिगम्, पारं गम् (c. 1. गच्छति, गन्तुं); 'to pass a river,' नदीपारं गम्.—(Spend time, &c.) गम् (c. 10. गमयति -यितुं), परिगम्, वृत् (c. 10. वर्त्तयति -यितुं), नी (c. 1. नयति, नेतुं), वह् (c. 10. वाहयति -यितुं), विह् (c. 1. -हरति -ते -हर्त्तुं), विवस् (c. 1. -वसति -वस्तुं); 'eight years were passed,' अष्टौ समाः परिगमिताः; 'he passes his days,' दिवसानि गमयति; 'he passed the night,' निशां निनाय; 'passing the night there,' तत्र रात्रिं व्युष.—(Cause to move) चल् (c. 10. चालयति -यितुं), सञ्चल्, सञ्चर् (c. 10. -चारयति -यितुं), स्थानान्तरीकृ.—(Transfer) सङ्क्रम् (c. 10 -क्रामयति -यितुं), उपसङ्क्रम्.—(Enact) सिद्धं -द्धां कृ, सिद्धीकृ, निष्पन्नं -न्नां कृ, निष्पद् (c. 10. -पादयति -यितुं), व्यवस्था in caus. (-स्थापयति -यितुं), स्था, व्यवस्थां कृ.—(Pass sentence) निर्णयं कृ, प्रणयनं कृ.—(Pass by) अतिक्रम्, व्यतिक्रम्, समतिक्रम्, अतिवृत्, अतिचर्, अतिगम्, अतिया, समतिया, अती, व्यती, अत्यभिसृ.—(Pass by, neglect) त्यज्, परित्यज्, हा, अपहा, अपास्, उत्सृज्, अतिसृज्, लङ्घ्, उल्लङ्घ्.—(Pass off). *See To* palm.—(Pass over, overlook) उपेक्ष्, समुपेक्ष्, क्षम् &c. *See* Overlook.—(Pass through the bowels, &c.) *See To* evacuate.

Pass, *s.* (Narrow passage, defile) सङ्कटपथः, सङ्कटमार्गः, दुर्गमार्गः, सङ्कटं, सञ्चरः, सञ्चारः, दुर्गं, घर्घरः.—(Fissure between hills) दरी -रा, विदरः, रन्ध्रं.—(Passport) अभिज्ञानपत्रं, अभयपत्रं.—(Thrust in fencing) प्रहारः, यष्टिप्रसारणं.—(State, distressed state) दशा, अवस्था, गतिः *f.*, दुर्दशा, दुर्गतिः *f.*, कष्टं.

Passable, *a.* (That may be crossed or travelled over) तार्य्यः -र्य्या -र्य्यं, तरणीयः -या -यं, गम्यः -म्या -म्यं, गमनीयः -या -यं, गमनयोग्यः -ग्या -ग्यं, सुगमः -मा -मं, उल्लङ्घ्यः -ङ्घ्या -ङ्घ्यं.—(Tolerable) विगुणः -णा -णं, सहनीयः -या -यं, सह्यः -ह्या -ह्यं.—(Current) प्रचलः -ला -लं.

Passably, *adv.* विगुणं, सहनीयं, यावज्ज्ञावत्. *See* Tolerably.

Passage, *s.* (Act of passing) गमनं, तरणं, उत्तरणं, चलनं, गतिः *f.*, तरः; 'to and fro,' गमनागमनं, गतागतं, यातायातं.—(Passing through or beyond) सङ्क्रमः -मणं, सङ्क्रान्तिः *f.*, सञ्चारः, क्रान्तिः *f.*, अतिक्रमः -मणं, पारगमनं, उल्लङ्घनं.—(Time of passing) गमनकालः, सङ्क्रमकालः, पारगमनकालः.—(Road, way) पथः, मार्गः, द्वारं.—(Difficult passage) संक्रमः -मं, संक्रामः, सञ्चारः, सञ्चरः, दुर्गमार्गः, दुर्गपथः, दुर्गं.—(Liberty to pass) गमनशक्तिः *f.*, गमनाधिकारः.—(Of a book) स्थलं, देशः, एकदेशः, वचनं; 'a passage of scripture,' वेदस्य एकदेशः.—(Occurrence) वृत्तं, भूतं.

Passage-money, *s.* आतारः, आतरः, तरमूल्यं, तरपण्यं, तारिकं, तार्य्यं.

Passed, *p. p.* (Gone by) अतिक्रान्तः -न्ता -न्तं, अतीतः -ता -तं, व्यतीतः &c., सम्प्रवृत्तः -त्ता -त्तं.—(Crossed, gone through or over) तीर्णः -र्णा -र्णं, उत्तीर्णः &c., सङ्क्रान्तः -न्ता -न्तं, पारगतः -ता -तं; hard to be passed,' दुस्तरः -रा -रं, दुरत्ययः -या -यं, दुर्गमः -मा -मं.—(Passed over) लङ्घितः -ता -तं, उल्लङ्घितः &c.—(Spent, as time) गमितः -ता -तं, नीतः -ता -तं.—(As fæces, &c.) हृतः -त्ता -त्तं, गूनः -ना -नं, उच्चरितः -ता -तं, उच्चारितः &c.—(Ended, gone). *See* Past.

Passenger, *s.* (Traveller) पथिकः, यात्रिकः, यायी *m.* (न्), गामी *m.*, गमी *m.*, मार्गस्थः, पथस्थः, पादचिकः, सारणिकः.—(One who crosses) तरी *m.*, तरः, तरिता *m.* (तृ), तरङ्गरीकः, उत्तरणकृत् *m.*—(In a vessel) नौयायी *m.*, नौगामी *m.*, नौकाप्लवङ्गी *m*, नौकारूढः, औडुपिकः.

Passer. *s.* तरी *m.* (न्), तरः, तरिता *m.* (तृ), तरङ्गरीकः, गामी *m.*

PASSIBILITY, *s.* सुखदुःखक्षमता, सुखदुःखवेदनक्षमता, सुखदुःखयोग्यता, सुखदुःखसहत्वं, सुखदुःखवेदित्वं.

PASSIBLE, *a.* सुखदुःखक्षमः -मा -मं, सुखदुःखवेदनक्षमः -मा -मं, सुखदुःखयोग्यः -ग्या -ग्यं, सुखदुःखवेदी -दिनी -दि (न्).

PASSING, *s.* (The act) तरणं, उत्तरणं, गमनं, चलनं. *See* PASSAGE. (Passing by) अत्ययः, अतिक्रमः.

PASSING, *part.* तरन् -रन्ती -रत् (त्), गामी -मिनी -मि (न्), यायी &c. —(Surpassing) अतिगः -गा -गं, अतिक्रामकः -का -कं.

PASSING, *a.* (Eminent) उत्तमः -मा -मं, परमः -मा -मं, श्रेष्ठः -ष्ठा -ष्ठं.

PASSING, *adv.* अत्यन्तं, अतिशयेन, अतिमात्रं, अति or अतिशय in comp.

PASSION, *s.* (Feeling or affection of the mind) मनोभावः, भावः, मनोविकारः, मनोविकृतिः *f.*, विकारः, विकृतिः *f.*, मनोवृत्तिः *f.*, वृत्तिः *f.*, रागः, मनोरागः, रसः, मनोधर्म्मः; 'passion of love,' कामविकारः, कामविकृतिः *f.*; 'of anger,' क्रोधविकारः; 'of lust,' लोभविकारः. The word इन्द्रियाणि *n. pl.*. may sometimes be used generally to express 'the passions'; as, 'restraint of the passions,' इन्द्रियनिग्रहः, इन्द्रियदमनं, कामक्रोधलोभादिदमनं; 'having the passions subdued,' जितेन्द्रियः -या -यं; 'void of passions,' वीतरागः -गा -गं, विरक्तः -क्ता -क्तं, विरागी &c.; 'absence of passion,' वैराग्यं, विरागः, विरक्तिः, रागहीनता; 'having passions,' रागी &c., अनुरागी &c.; 'the class of six passions, viz. desire, wrath, avarice, bewilderment, pride, and envy,' षड्वर्गः.—(Anger, warmth of temper, rage) क्रोधः, कोपः, प्रकोपः, रोषः, अमर्षः, संरम्भः, प्रतिरम्भः, उन्नाषः, उग्रता -त्वं, चण्डता, तिग्मता, उष्मः, खर्ष्यं, भामः, कैशिकः; 'fit of passion,' क्रोधावेशः; 'in a passion,' क्रुद्धः -द्धा -द्धं, क्रोधी &c., जातक्रोधः -धा -धं, जातामर्षः -र्षा -र्षं.—(Mental agitation or excitement) मनःक्षोभः, चित्तक्षोभः, चित्तवेगः, मनस्तापः, मनोव्याकुलता, उन्नाषः, व्याक्षोभः.—(Love, lust) कामः, कामिता, कामुकत्वं, मदः, मदनः, स्मरः, अनुरागः, स्मरमोहः, कैशिकः.—(Eager desire) लालसा, लोभः, उत्कण्ठा, उत्सुकता, औत्सुक्यं.—(Suffering) दुःखभोगः, दुःखं, व्यथा, पीडा, क्लेशः, श्रमः.—(As opposed to action) सहनं, सहत्वं, ग्रहणं, कर्म्माश्रयत्वं, कर्म्मपात्रता.—(The quality or property of passion) रजस् *n.*

PASSIONATE, *a.* (Easily moved to anger) शीघ्रकोपी -पिनी -पि (न्), शीघ्रक्रोधी &c., सुलभकोपः -पा -पं, क्रोधी &c., क्रोधनः -ना -नं, कोपी &c., कोपनः -ना -नं, क्रोधशीलः -ला -लं, कोपशीलः &c., अमर्षी &c., संरम्भी &c., अमर्षणः -णा -णं, रोषणः -णा -णं, रोषशीलः &c., संरम्भशीलः &c., कोपिष्ठः -ष्ठा -ष्ठं, क्रोधिष्ठः &c., पित्तवेगी &c., भामी &c., पित्तस्वभावः -वा -वं; 'very passionate,' अत्यन्तकोपनः -ना -नं.—(Highly excitable, warm, ardent) सन्तापशीलः -ला -लं, उन्नापशीलः &c., चण्डः -ण्डा -ण्डं, उन्नाडः &c., चण्डवान् -वती -वत् (त्), उष्णः -ष्णा -ष्णं, उग्रः -ग्रा -ग्रं, रौद्रः -द्री -द्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं—(Full of strong feeling) रागी &c., रागवान् &c., रागान्वितः -ता -तं, सरागः -गा -गं, संरक्तः -क्ता -क्तं, सानुरागः &c.. अनुरागी &c., रागिष्ठः &c., अनुरक्तः &c., सरसः -सा -सं, रसी &c., रसिकः &c., उत्कण्ठितः -ता -तं.—(Having the quality or property of passion) रजोगुणी &c.; 'a passionate woman,' कोपना, भामिनी.

PASSIONATELY, *adv.* (With strong feeling) सरागं, रागेण, रागपूर्व्वं, सानुरागं, सरसं.—(Ardently) अतिकौतूहलेन, तीक्ष्णं, सतैक्ष्ण्यं, चण्डं, प्रचण्डं, उच्चण्डं, उत्कण्ठापूर्व्वं.—(With anger) सकोपं, सक्रोधं, सरोषं, सामर्षं, संरम्भपूर्व्वं.

PASSIONATENESS, *s.* शीघ्रकोपिता, कोपशीलता, क्रोधशीलता, क्रोधवशता, क्रोधाधीनता, पित्तस्वभावः.—(Strong feeling) सानुरागता, सरागता, अनुरागः.

PASSIONLESS, *a.* वीतरागः -गा -गं, रागहीनः -ना -नं, शान्तरागः &c., विरागी -गिणी -गि (न्), विरक्तः -क्ता -क्तं, अनुरागी &c.

PASSIVE, *a.* (Suffering without resistance) सहनः -ना -नं, सह -हा -हं, सहिष्णुः -ष्णुः -ष्णु, सहनधर्म्मकः -का -कं, सहनवृत्तिः -त्तिः -त्ति, सहनशीलः -ला -लं, सहनधर्म्मा -र्म्मा -र्म्म (न्), तितिक्षुः -क्षुः -क्षु, अनिवारकः -का -कं, अप्रतीकारकः &c.—(Opposed to active, not an actor) निश्चेष्टः -ष्टा -ष्टं, निष्क्रियः -या -यं, अप्रवर्त्तकः -का -कं, क्रियाशून्यः -न्या -न्यं, कर्म्मपात्रं, कर्म्माधारः, कर्म्माश्रयः.—(In grammar, the passive voice) कर्म्मणिवाच्यं, कर्म्मणि आत्मनेपदं; 'reflective passive,' कर्म्मणिकर्त्तृवाच्यं; 'impersonal passive,' भाववाच्यं. The grammatical symbol for the passive is दभावः.

PASSIVENESS, PASSIVITY, *s.* सहनत्वं, सहिष्णुता, सहनशीलता, सहनधर्म्मः, सहनवृत्तिः *f.*—(Opposed to activity) निश्चेष्टता -त्वं, निष्क्रियता, कर्म्मपात्रता, कर्म्माश्रयता.

PASSPORT, *s.* अभयपत्रं, अभयवाक् *f.* (च्), अभिज्ञानपत्रं, अभिज्ञामुद्रा, अभिज्ञानं, मुद्रा.

PAST, *p. p.* or *a.* (Gone by, not present) गतः -ता -तं, भूतः -ता -तं, अतीतः -ता -तं, व्यतीतः &c., समतीतः &c., व्यपेतः &c., वृत्तः -त्ता -त्तं, संवृत्तः &c., अतिक्रान्तः -न्ता -न्तं, निभूतः -ता -तं, परोक्षः -क्षा -क्षं, प्रतीतः -ता -तं. *See* PASSED. (Former, relating to the past) पूर्व्वः -र्व्वा -र्व्वं, पौर्व्वः -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पूर्व्वतनः -नी -नं, प्राक्तनः -नी -नं; 'in past times,' पुरा, पूर्व्वं, परोक्षे.—(Ended, accomplished) वृत्तः -त्ता -त्तं, निर्वृत्तः &c., समाप्तः -प्ता -प्तं.—(Past tense) अद्यतनभूतः -तं, परोक्षभूतं, अतीतकालः.

PAST, *s.* (Past time) गतकालः, भूतकालः, अतीतकालः, प्राक्कालं, पूर्व्वकालं, परोक्षं; 'knowing past and future,' परावरदृक् *m.f.n.* (श्).

PAST, *adv.* (Beyond) अति prefixed; as, 'past mortal strength,' अतिमानुषशक्ति. Expressed also by अ or निर् prefixed, or by the use of the passive participle अतीत, हीन, त्यक्त, नष्ट, अतिक्रान्त &c. in comp.; as, 'past cure,' असाध्यः -ध्या -ध्यं, निरुपचारः -रा -रं, ओषधिपथातिगः -गा -गं; 'past the range of sight,' चक्षुर्विषयातिक्रान्तः -न्ता -न्तं; 'past work,' अतीतव्यवहारः -रा -रं; 'past remedy,' उपायातीतः -ता -तं; 'past age,' वयोतीतः &c.; 'past all sense of shame,' निर्लज्जः -ज्जा -ज्जं, लज्जाहीनः -ना -नं, नष्टलज्जः &c., त्यक्तलज्जः &c.

PASTE, *s.* उदपेषं, उदकपेषं, जलपेषं, उदकचूर्णं, गोधूमसम्भवं.

To PASTE, *v. a.* उदपेषेण बन्ध् (c. 9. बध्नाति, बन्द्धुं) or सबन्ध्, उदपेषेण लिप् (c. 6. लिम्पति, लेप्तुं).

PASTEBOARD, *s.* स्थूलकार्पासं, घनपत्रं, दृढकार्पासं, स्थूलपत्रं.

PASTERN, *s.* अश्वखुरसन्धिः *m.*, अश्वस्य खुरोपरिस्थः पादभागः.

PASTIME, *s.* विनोदः, क्रीडा, विहारः, खेला -लनं, विलासः, कौतुकं, क्रीडाकौतुकं, केलिः -लो *m. f.*, लीला, देवनं, परीहासः, नर्म्म *n.* (न्), क्रूर्दनं, रासेरसः; 'juvenile,' बालक्रीडा, बाललीला, बालचरित्रं.

PASTOR, *s.* (Shepherd) मेषपालः -लकः, मेषपोषकः.—(Religious instructor) धर्म्मोपदेशकः, धर्म्माध्यापकः, आचार्य्यः, गुरुः *m.*, उपाध्यायः.

PASTORAL, *a.* (Pertaining to shepherds) मेषपालसम्बन्धी &c.,

मेषपालविषयः -या -यं.—(Pertaining to a minister of religion) धर्म्मोपदेशकसम्बन्धी &c., धर्म्माध्यापकसम्बन्धी &c., धर्म्मोपदेशविषयः-या-यं.

PASTORAL, *s.* (Poem) मेषपालनादिविषयकं काव्यं, गोमेषादिविषयं गीतं.

PASTRY, *s.* पिष्टकं, पिष्टिकं, पिष्टान्नं, मिष्टान्नं, आपूपिकं, शाष्कुलिकं.

PASTRY-COOK, *s.* पिष्टककारी *m.* -रिणी *f.* (न्), पिष्टान्नकृत् *m.*, मिष्टान्नकृत्, पिष्टकविक्रयी *m.* -यिणी *f.* (न्), आपूपिकः -की.

PASTURAGE, *s.* (Grazing ground) गोचरः, गोप्रचारः, गोमेषादिचारणस्थानं, गोचारणक्षेत्रं, गोचारणभूमिः.—(Meadow grass) यवसः, यावसः, क्षेत्रियं, पाशवपालनं, पशव्यं, घासः, तृणं, गवादनं.

PASTURE, *s.* (Grass for cattle) गवादनं, गोभक्षणं, यवसः, पशव्यं, पशुभोजनं, पशुखाद्यं, घासः, तृणं.—(Ground covered with grass for grazing) यावसभूमिः *f.*, यवसीयभूमिः *f.*, गोचारणभूमिः *f.*, पशुचारणभूः *f.*, शाद्वलभूः *f.*, शाद्वलभूमिः. *See* PASTURAGE.

To PASTURE, *v. a.* (Graze) चर् (c. 10. चारयति -यितुं), तृणं भुज् or खाद् or दा.

To PASTURE, *v. n.* (Graze) चर् (c. 1. चरति -रितुं), तृण्, तृणं खाद् &c.

PASTY, *a.* शौदपेषिकः -की -कं, उदपेषगुणकः -का -कं.

PASTY, *s.* (Pie made of paste) पिष्टकः -कं, पिष्टिकं, शष्कुली.

PAT, *a.* युक्तः -क्ता -क्तं, योग्यः -ग्या -ग्यं, सङ्गतः -ता -तं. *See* FIT.

PAT, *adv.* युक्तं, यथायोग्यं, सम्यक्, अञ्जसा, समञ्जसं. *See* FITLY.

PAT, *s.* (Light blow) लघुप्रहारः, लघ्वाघातः, चपेटः, चपेटाघातः.—(Flattish lump) ईषन्निष्पिण्डः; 'of butter,' नवनीतपिण्डः.

To PAT, *v. a.* चपेटेन प्रह् or आहन्, लघुप्रहारं कृ, लघु प्रह्.—(A horse, &c.) स्फाल् (c. 10. स्फालयति -यितुं), आस्फाल्, स्फालनं कृ.

PATCH, *s.* (Piece of cloth) वस्त्रखण्डः, पटखण्डः; 'patched garment,' कर्पटः, कन्था; 'weaving one,' कन्थाधारणं, कर्पटधारणं; 'a beggar who wears one,' कर्पटधारी *m.* (न्), कन्थाधारी *m.*, कर्पटी *m.*, कर्पटिकः.—(Piece of any thing) खण्डः -ण्डं, शकलः -लं.

To PATCH, *v. a.* वस्त्रखण्डं निधिव् (c. 4. -धीव्यति -धेवितुं) or निविश् (c. 10. -वेशयति -यितुं), जीर्णवस्त्राणि समाधा (c. 3. -दधाति -धत्ते -धातुं) or सन्धा, कन्था (nom. कन्थायति), कर्पट (nom. कर्पटायति).

PATCHED, *p. p.* or *a.* खण्डी -ण्डिनी -ण्डि (न्), खण्डमयः -यी -यं, खण्डयुक्तः -क्ता -क्तं, खण्डरूपः -पा -पं; 'patched garments.' *See* PATCH, *s.*

PATCHER, *s.* वस्त्रखण्डसन्धाता *m.* (तृ), जीर्णवस्त्रसमाधाता *m.*

PATCH-WORK, *s.* खण्डकर्म्म *n.* (न्), कन्थाकरणं, कर्पटकरणं.

PATE, *s.* मस्तकाग्रं, मस्तकः -कं, मुण्डः -ण्डं -ण्डकं. *See* HEAD, *s.*

PATENT, *a.* (Plain) स्पष्टः -ष्टा -ष्टं, विस्पष्टः &c., व्यक्तः -क्ता -क्तं, प्रव्यक्तः &c., प्रत्यक्षः -क्षा -क्षं, प्रकाशः -शा -शं, सुगमः -मा -मं.

PATENT, *s.* विशेषाधिकारपत्रं -त्रिका, प्रकाशपत्रं, प्रकाशलेख्यं.

PATENTEE, *s.* प्रकाशपत्रधारी *m.* (न्), अधिकारपत्रधारी *m.* (न्).

PATER-FAMILIAS, *s.* कुटुम्बी *m.* (न्), कौटुम्बिकः, कुलपतिः *m.*, कुलोद्वहः.

PATERNAL, *a.* पैतृकः -की -कं, पैत्रिकः &c., पितृकः -का -कं, पैत्रः -त्री -त्रं, पित्र्यः -त्र्या -त्र्यं, पितृ in comp.; 'paternal mansion,' पितृमन्दिरं; 'paternal aunt,' पितृष्वसा *f.* (स्); 'paternal affection,' पुत्रस्नेहः, सुतस्नेहः, वात्सल्यं.—(Like a father) पितृतुल्यः -ल्या -ल्यं, पितृसदृशः -शी -शं, पितृसन्निभः -भा -भं, पितृसमः -मा -मं.—(Derived from a father) पितृप्राप्तः -प्ता -प्तं, पित्र्यागतः -ता -तं, पितृक्रमायातः -ता -तं; 'paternal estate,' पैतृकभूमिः *f.*

PATERNALLY, *adv.* पितृवत्, तातवत्, जनकवत्, पितृरूपेण.

PATERNITY, *s.* पितृत्वं -ता, जनकता -त्वं, पितृभावः, पैतृकत्वं, पितृधर्म्मः

PATH, *s.* पथः, पन्थाः *m.* (पथिन्), मार्गः, पद्धतिः -तीः *f.*, पदविः -वीः *f.*, सरणिः -णीः *f.*, सृतिः *f.*, वर्त्म *n.* (न्), वर्त्मनिः *f.*, वर्त्तनिः -नीः *f.*, अध्वा *m.* (न्), अयनं, पद्या, एकपदी; 'of the planets,' कक्षः -क्षा; 'the right path,' सत्पथः, सन्मार्गः; 'the wrong path,' उत्पथः, कुपथः, उन्मार्गः, विमार्गः; 'going on the wrong path,' उन्मार्गगामी &c.; 'to seduce from the right path,' उत्पथं नी (c. 1. नयति, नेतुं).

PATHETIC, PATHETICAL, *a.* करुणारसमयः -यी -यं, करुणारसात्मकः -का -कं, रसिकः -का -कं, करुणाजनकः -का -कं, करुणोत्पादकः -का -कं, कारुणिकः -की -कं, करुणात्मकः -का -कं, हृदयङ्गमः -मा -मं, हृदयवेधकः &c., हृदयाविद् *m. f. n.* (ध्), मनोद्रावकः &c., चित्तमोहकः &c., चित्तमोहजनकः &c. *See* MOVING, *a.*

PATHETICALLY, *adv.* सरसं, करुणारसपूर्व्वं, सकारुण्यं, करुणं, यथा करुणा जायते or यथा हृदयं स्पृश्यते तथाप्रकारेण.

PATHIC, *s.* (Catamite) विटः, वेश्याचार्य्यः, नारङ्गः; 'keeper of pathics,' विटपः.

PATHLESS, *a.* अपथः-था-थं, निष्पथः-था-थं, अमार्गः-र्गा-र्गं, अगम्यः-म्या-म्यं.

PATHOLOGIC, PATHOLOGICAL, *a.* निदानविषयकः -का -कं, रोगनिदानसम्बन्धी &c.

PATHOLOGY, *s.* निदानविद्या, रोगनिदानविद्या, निदानशास्त्रं, रोगलक्षणविद्या, रोगलक्षणशास्त्रं, रोगनिरूपणविद्या.

PATHOS, *s.* करुणारसः, कारुण्यरसः, रसः, रागः करुणा, कारुण्यं, रसिकता -त्वं, चित्तद्रावकत्वं, करुणाजनकता.

PATHWAY, *s.* पथः, मार्गः, पदविः -वीः *f.*, वर्त्म *n.* (न्), गमनागमनपथः.

PATIENCE, *s.* क्षमा, क्षान्तिः *f.*, सहिष्णुता -त्वं, सहनं, सहनशीलता, सहनशक्तिः *f.*, सहत्वं, तितिक्षा, धैर्य्यं, धृतिः *f.*, धीरता, दमः, दमथः, दमथुः *m.*, मर्षः -र्षणं, उत्साहः, साहनं.

PATIENT, *a.* सहिष्णुः -ष्णुः -ष्णु, सहनः -ना -नं, सहनशीलः -ला -लं, क्षमावान् -वती -वत् (त्), सहः -हा -हं, क्षमः -मा -मं, तितिक्षुः -क्षुः -क्षु, क्षमी -मिणी -मि (न्), क्षमायुक्तः -क्ता -क्तं, क्षान्तिमान् -मती -मत् (त्), क्षन्ता -न्त्री -न्तृ (तृ), क्षमिता &c., क्षमाशीलः -ला -लं, तितिक्षाशीलः &c., धीरः -रा -रं, धैर्य्यवान् &c., धृतिमान् &c., मर्षी &c., मर्षणः -णा -णं, मर्षितः -ता -तं, मर्षितवान् &c., क्षान्तः -न्ता -न्तं, सासहिः -हिः -हि, सहमानः -ना -नं, दान्तः -न्ता -न्तं. The words सह and क्षम are especially used in comp.; as, 'patient of labor,' क्लेशसहः -हा -हं; 'of austerities,' तपःसहः, तपःक्षमः &c.; 'very patient,' बहुक्षमः -मा -मं, बहुसहः &c., विश्वसहः &c.; 'to be patient of,' सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं), तिज् in des. (तितिक्षते -क्षितुं), मृष् (c. 4. मृष्यति, मर्षितुं).

PATIENT *s.* (As apposed to agent) कर्म्मपात्रं, कर्म्माधारः, कर्म्माश्रयः.—(Sick person) रोगी *m.* -गिणी *f.* (न्), आतुरः -रा, रोगार्त्तः -र्त्ता, सरोगः -गा.

PATIENTLY, *adv.* क्षमापूर्व्वं, तितिक्षापूर्व्वं, तितिक्षया, सधैर्य्यं, समर्षं, तितिक्षितं.

PATLY, *adv.* युक्तं, यथायोग्यं, सङ्गतं. *See* PAT, *adv.*

PATRIARCH, *s.* आदिपुरुषः, मूलपुरुषः, वृद्धपिता *m.* (तृ), गोत्रपतिः *m.*, प्रजापतिः *m.*, गोत्रस्वामी *m.* (न्), वंशपतिः *m.*, गोत्रजनकः.—(Venerable person) वृद्धजनः, गुरुजनः.

PATRIARCHAL, *a.* आदिपुरुषसम्बन्धी -न्धिनी &c., मूलपुरुषसम्बन्धी &c.

PATRICIAN, *a.* कुलीनः -ना -नं, महाकुलीनः &c., सत्कुलीनः &c., सङ्गशः -शा -शं, सङ्गशीयः -या -यं, अप्राकृतः -ती -तं, असामान्यः &c., अभिजातः &c. *See* NOBLE.

PATRICIAN, *s.* कुलीनजनः, कुलीनपुरुषः, शिष्टजनः, अभिजनवान् *m.* (न्).

PATRIMONIAL, *a.* (Inherited from a father, &c.) पैतृकः -की -कं, पितृप्राप्तः -प्ता -प्तं, पित्रागतः -ता -तं, पितृक्रमायातः &c., दायप्राप्तः &c., दायलभ्यः -भ्या -भ्यं, दायोपागतः &c.—(Relating to a patrimony) पैतृकरिक्थसम्बन्धी &c., दायसम्बन्धी &c.

PATRIMONY, *s.* पैतृकरिक्थं, पैतृकं रिक्थं or ऋक्थं, गोत्ररिक्थं, पैतृकधनं, ऋक्थभागः, गोत्रधनं, दायः, पैतृकं, औद्धारकं, क्रमागतरिक्थं, पित्रागतरिक्थं, पित्रागतधनं; 'confiscation of it,' वृत्तिच्छेदः; 'title deed of it,' रिक्थपत्रं.

PATRIOT, *s.* स्वदेशाभिमानी *m.* (न्), स्वदेशानुरागी *m.* (न्), जन्मभूम्यनुरागी *m.*, जन्मभूमिवत्सलः, स्वदेशभक्तः, स्वदेशहितैषी *m.*

PATRIOTIC, *a.* स्वदेशाभिमानी -निनी -नि (न्), स्वदेशानुरागी -गिणी &c., स्वदेशानुरक्तः -क्ता -क्तं, जन्मभूम्यनुरक्तः &c., जन्मभूमिवत्सलः -ला -लं, स्वदेशभक्तः -क्ता -क्तं, स्वदेशासक्तः &c., स्वदेशहितैषी -षिणी &c., स्वदेशहितकारी &c., स्वदेशपालकः -का -कं.

PATRIOTISM, *s.* स्वदेशाभिमानं, स्वदेशानुरागः, स्वदेशानुरक्तिः *f.*, देशाभिमानं, देशानुरागः, जन्मभूम्यनुरागः, जन्मभूमिवात्सल्यं, स्वदेशभक्तिः *f.*, स्वदेशासक्तिः *f.*, स्वदेशप्रीतिः *f.*, स्वदेशप्रतिपालनं, स्वदेशहितैषा.

PATROL, *s.* (Walking round by a guard in the night) रक्षकेण रात्रौ परिक्रमणं or परिभ्रमणं.—(The guard who goes the round) रात्रिपरिचरः, रात्रिचरः, रात्रिरक्षकः, रक्षकः, आरक्षकः, रक्षी *m.* (न्).

To PATROL, *v. n.* रक्षकवद् रात्रौ परिक्रम् (c. 1. -क्रामति, c. 4. -क्राम्यति -क्रमितुं) or परिभ्रम् (c. 4. -भाम्यति -भमितुं).

PATRON, *s.* (One who supports and protects) पालकः, प्रतिपालकः, अनुपालकः, उपकारकः, उपकारी *m.* (न्), संवर्धकः, अनुग्राही *m.*, पक्षधारी *m.*, पोषकः, रक्षकः, आश्रयः, आश्रयभूतः, शरणं, शरणभूतः, आश्रयस्थानं, नाथः, पुरस्कारी *m.*, पुरस्कर्त्ता *m.* (र्तृ), उपकर्त्ता *m.*, साहाय्यकारी *m.*, सहायः, पितृहः.—(Appreciator of merit) गुणग्राही *m.* (न्), गुणग्राहकः, गुणज्ञः, गुणदर्शी *m.*; 'patron of learning,' विद्यानुपालकः.

PATRONAGE, *s.* पालनं, अनुपालनं, प्रतिपालनं. उपकारः, आश्रयः, संश्रयः, अनुग्रहः, उपग्रहः, सङ्ग्रहः. आग्रहः, आधारः, अवष्टम्भः, वर्धनं, संवर्धनं, अवलम्बः -म्बनं, शरण्यता, पुरस्कारः, रक्षा -क्षणं, अभिरक्षा, पोषणं, पालनपोषणं, साहाय्यं, सहायत्वं, साहित्यं, प्रतिपालकता.—(Appreciation of merit) गुणग्रहणं, गुणज्ञानं.

PATRONAL, *a.* पालकः -का -कं, उपकारकः &c., संवर्धकः &c., रक्षकः &c.

PATRONESS, *s.* प्रतिपालिका, उपकारिणी, अभिरक्षिका, रक्षाकारिणी.

To PATRONIZE, *v. a.* प्रतिपाल् (c. 10. -पालयति -यितुं), अनुपाल्, अनुग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), उपग्रह् संवृध् (c. 10. -वर्धयति -यितुं), अभिरक्ष् (c. 1. -रक्षति -क्षितुं), उपकृ, साहाय्यं कृ; 'to patronize learning,' विद्यानुपालनं कृ.

PATRONIZED, *p. p.* प्रतिपालितः -ता -तं, अनुपालितः &c., संवर्धितः &c., अवलम्बितः &c., अभिरक्षितः &c., अनुगृहीतः &c.

PATRONLESS, *a.* निराश्रयः -या -यं, अनाश्रयः &c., अशरणः -णा -णं, निरवलम्बः -म्बा -म्बं, निःसहायः -या -यं, निराधारः -रा -रं.

PATRONYMIC, *s.* अपत्यवाचकः, अपत्यवाचकनाम *n.* (न्), पैतृकनाम *n.*, पितृप्राप्तनाम *n.*, पित्रागतनाम *n.*, गोत्रनाम *n.*, उपाधिः *m.*

PATTEN, *s.* काष्ठपादुका, स्त्रीजनव्यवहारिता काष्ठमयपादुका.

To PATTER, *v. n.* पटपट (nom. पटपटायते -तितुं), पटपटशब्दं कृ.

PATTER, PATTERING, *s.* पटपटशब्दः; 'of rain,' धाराध्वनिः *m.*

PATTERN, *s.* (Model, exemplar) उपमा -मानं, प्रतिमा -मानं, आदर्शः, निदर्शनं, प्रतिरूपं, प्रतिकृतिः *f.*, प्रतिमूर्त्तिः *f.*, संस्कारः, प्रमाणं, प्रतिरूपदृक् *m.* (श्); 'of propriety,' न्यायाधारः.—(Specimen) आदर्शः, निदर्शनं.—(Figure) आकारः, संस्कारः, रूपं.

PAUCITY, *s.* अल्पता, स्वल्पता, स्वाल्पं, संख्याल्पता, अबहुत्वं, स्तोकता.

PAUNCH, *s.* (Belly) उदरं, जठरं, तुन्दं -न्दि *n.*, कुक्षिः *m.*, पिचिण्डः; 'having one,' उदरी -रिणी &c., तुन्दी &c., पिचिण्डिलः -ला -लं.—(Protuberant belly) लम्बोदरं.

To PAUNCH, *v. a.* निरुदरीकृ, निरन्त्रीकृ, उदरादि बहिष्कृ.

PAUPER, *s.* (Poor person who lives on alms) भिक्षोपजीवी *m.* -विनी *f.*, भैक्षजीवी *m.* (न्), भिक्षाजीवी *m.* &c., भिक्षुः *m.*, भिक्षुकः *m.* -की *f.*, अन्यदन्नोपजीवी *m.* &c., दरिद्रः, निर्ग्रन्थः खिद्रः.—(In law) आकाशेशः.

PAUPERISM, *s.* भिक्षोपजीवनं, भैक्षोपजीवनं, भैक्षजीविका, भिक्षोपजीविका, अन्यदन्नोपजीविका, भिक्षावृत्तिः *f.*, भिक्षुकवृत्तिः *f.*

PAUSE, *s.* (Temporary stop) विरामः, विरतिः *f.*, अवरतिः *f.*, उपरतिः *f.*, उपरमः, निवृत्तिः *f.*, विश्रामः, विच्छेदः, उपशमः, शमः, शान्तिः *f.*, अपशमः, अवसायः, अवसानं, आश्वासः, खण्डः, यतिः *f.*, यामः, सन्धिः *m.*—(Interval) अन्तरं, कालान्तरं, अवकाशः, व्यवधानं, सन्धिः *m.*—(Suspense) कर्म्मान्तरं, भावसन्धिः *m.*—(In poetry or music) यतिः *f.*, अवसानं.

To PAUSE, *v. n.* विरम् (c. 1. -रमति -रन्तुं), उपरम्, निवृत् (c. 1. -वर्त्तते -र्त्तितुं), विनिवृत्, निवृत्, विश्रम् (c. 4. -श्राम्यति -श्रमितुं), विच्छिद् in pass. (-छिद्यते), शम् c. 4. शाम्यति, शमितुं), विरामं कृ, अवसानं कृ.

To PAVE, *v. a.* प्रस्तरैः or इष्टकाभिर् आस्तृ (c. 9. -स्तृणाति -स्तरितुं).

PAVED, *p. p.* प्रस्तरास्तीर्णः -र्णा -र्णं, पाषाणास्तीर्णः &c., इष्टकास्तीर्णः &c.

PAVEMENT, *s.* परिस्तरः, पाषाणस्तरः, प्रस्तरास्तरणं, शिलास्तरः, शिलाफलकं, इष्टकाफलकं, इष्टकास्तरः -रणं.

PAVER, PAVIER, *s.* प्रस्तरास्तरणकृत् *m.*, परिस्तरकृत् *m.*, शिलाफलकास्तरिता *m.* (तृ), इष्टकास्तरिता *m.*

PAVILION, *s.* मण्डपः -पं, पटमण्डपः, हर्म्यं, मान्दिरं, वातायनं.

PAW, *s.* (Foot of a beast) पशुपादः, पशुपदं.—(Hand) हस्तः, करः.

To PAW, *v. a.* or *n.* (As a horse) खुराभिघातं कृ, खुरप्रसारणं कृ.—(Handle) हस्तेन स्पृश् or परिस्पृश् or परामृश् or आलभ् or समालभ्.

PAWN, *s.* (Pledge) न्यासः, उपन्यासः, निक्षेपः, आधिः *m.*, बन्धकः -कं, उपनिधिः *m.*, उपनिधानं, उपनिक्षेपः, आधानं, अन्वाधिः *m.*, पणः, परिपणनं, आधीकरणं, प्रतिदेयं.—(At chess) नरः, शारः -रिः *m.*

To PAWN, *v. a.* आधीकृ, न्यासीकृ, न्यस् (c. 4. -अस्यति -असितुं), उपन्यस्, निक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), पण् (c. 1. पणते -णितुं), परिपण्, परिपणनं कृ, न्यासं कृ, बन्धकं कृ or दा; 'having pawned,' आधीकृत्य.

PAWNBROKER, *s.* बन्धकव्यापारी *m.* (न्), निक्षेपव्यापारी *m.*, निक्षेपव्यवसायी *m.*

PAWNED, *p. p.* न्यस्तः -स्ता -स्तं, उपन्यस्तः &c., न्यासीकृतः -ता -तं, आधीकृतः &c., निक्षिप्तः -प्ता -प्तं, पणितः -ता -तं, परिपणितः &c.

To PAY, *v. a.* (Discharge a debt) ऋणं शुध् or अपनी or विनी or अपाकृ or अपवृज् or साध् or तॄ, ऋणशोधनं कृ ऋणसिद्धिं कृ, ऋणमुक्तिं कृ.—(Liquidate) शुध्, परिशुध्, संशुध् विनी, अपनी.—(Fulfil, perform) सम्पद्, निष्पद्, सम्पॄ, साध्.—(Give, render) दा, कृ.—(Give pay to) वेतनं दा, वर्त्तनं दा.—(Pay the price of any thing bought) मूल्यं दा.—(Pay for atone for) निस् (c. 10. -तारयति -यितुं), उज्झ्, निष्कृ, निष्कृतिं दा or कृ, प्रायश्चित्तं कृ,

—(Pay off, discharge) वेतनं दत्त्वा विसृज् or मुच्.—(Pay off, retaliate) प्रतिकृ.

PAY, *s.* वेतनं, मूल्यं, वर्त्तनं, भृतिः *f.*, भृत्या, भाटिः *f.*, भाटकः-कं; 'monthly pay,' मासिकं; 'yearly pay,' वार्षिकं.

PAYABLE, *a.* देयः -या -यं, शोध्यः -ध्या -ध्यं, शोधनीयः -या -यं, संशोध्यः &c., परिशोधनीयः -या -यं, दातव्यः -व्या -व्यं, दानीयः -या -यं, दानयोग्यः -ग्या -ग्यं, दानोचितः -ता -तं.

PAY-DAY, *s.* वेतनदानदिवसः, वर्त्तनदानदिवसः, शोधनदिनं, परिशोधनदिवसः, भृतिदानदिवसः.

PAYER, *s.* दाता *m.* (तृ), शोधयिता *m.*, शोधकः, परिशोधकः.

PAY-MASTER, *s.* वेतनदाता *m.* (तृ), वर्त्तनदाता *m.*, भृतिदाता *m.*, वेतनाध्यक्षः.

PAYMENT, *s.* शोधनं, परिशोधनं, संशोधनं, शुद्धिः *f.*, परिशुद्धिः *f.*, दानं, साधनं, सिद्धिः *f.*, अपकरणं, अपाकरणं, अपनयनं, निस्तारः, निस्तरणं, उद्धरणं; 'of a debt,' ऋणशोधनं, ऋणसिद्धिः *f.*, ऋणापाकरणं, ऋणापनयनं, ऋणमुक्तिः *f.*, ऋणापनोदनं, विगणनं, निरादेशः, आनृण्यं; 'of wages, &c.,' वेतनदानं, वर्त्तनदानं, भृतिदानं; 'non-payment,' अनपक्रिया, अनपकरणं, अनपाकरणं, अनपाकर्म्म *n.* (न्), अनपकर्म्म *n.*

PEA, *s.* कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, खण्डिकः, हरेणुः *m.*, वर्त्तुलः.

PEACE, *s.* (Freedom from war) सन्धिः *m.*, सन्धानं, अयुद्धं, युद्धाभावः, अविग्रहः, विग्रहाभावः, असङ्गामः, निर्द्वन्द्वं; 'peace and war,' सन्धिविग्रहौ *m. du.*; 'to make peace,' सन्धिं कृ, सन्धा (c. 3. -दधाति -धत्ते -धातुं); 'made peace with,' सन्धितः -ता -तं; 'wishing to make peace,' सन्धित्सुः -त्सुः -त्सु.—(State of rest or quiet) निर्वृतिः *f.*, शान्तिः *f.*, विश्रामः, विश्रान्तिः *f.*, शमः, उपशमः, प्रशान्तिः *f.*, निवृत्तिः *f.*, सुखं, सौख्यं, स्वस्थता, स्वास्थ्यं, समाधानं, निरुद्वेगः; 'peace of mind,' मनःशान्तिः *f.*; 'internal peace,' अन्तःसुखं.—(Harmony) ऐकं, सन्धिः *m.*, सख्यं, मैत्र्यं, सङ्गः, अविरोधः, विरोधाभावः.—(Freedom from commotion or riot) निरुपद्रवता, उपद्रवाभावः, निरुपप्लवता -त्वं, उपप्लवाभावः, निष्कण्टकत्वं, कण्टकाभावः, स्वस्थता, स्वास्थ्यं.—(Silence) मौनं, मौन्यं, अभाषणं, तूष्णीम्भावः; 'to hold one's peace,' तूष्णीम्भू, मौनीभू, वाचं यम् or नियम्, निःशब्दीभू; 'peace,' तूष्णीम्भव, मौनीभव, नियच्छ वाचं, शान्तं.—(Peace be with thee) स्वस्ति.

PLOUGHER, *s.* कृषकः, कर्षकः, कर्षी *m.* (न्), हालिकः, सैरिकः

PLOUGH-GEAR, *s.* हलोपकरणं, लाङ्गलोपकरणं, लाङ्गलसामग्री, हलसज्जा.

PLOUGH-HANDLE, *s.* ईषादण्डः, ईशादण्डः, इषायष्टिः *m. f.*

PLOUGHING, *s.* कर्षणं, कृषिः *f.*, कार्षिः *f.*, उत्कर्षणं, प्रकर्षणं, सङ्कर्षणं, लाङ्गलकर्षणं, भूमिकर्षणं, क्षेत्रकर्षणं, भूमिदारणं, हलहतिः *f.*, हलभृतिः *f.*, लाङ्गलग्रहणं, उत्कषणं.

PLOUGH-LAND, *s.* हल्यक्षेत्रं, हल्यभूमिः *f.*, फालकृष्टं, हल्यं, सीत्यं, शीत्यं, हालिकं, हालिकक्षेत्रं, लाङ्गलिकं. *See* PLOUGHED.

PLOUGH-MAN, *s.* हालिकः, लाङ्गलिकः, लाङ्गली *m.* (न्), लाङ्गलग्रहः, हलधरः, लाङ्गलधरः, हलभृत् *m.*, लाङ्गलभृत् *m.*, हलवाहकः, कृषिकः, कृषकः, कर्षकः, कृषिजीवी *m.* (न्), कर्षी *m.* (न्), कर्षिकः -र्षिकः, कृषीवलः, क्षेत्रकर्षकः, भूमिकर्षकः, सैरिकः, शैरिकः.

PLOUGH-SHARE, *s.* फालः, कृषिकः -का, कृषकः, फलं, जित्या, कुशी, कूटकं.

PLOUGH-TAIL, *s.* लाङ्गलपृष्ठं, लाङ्गलस्य पश्चाद्भागः or पश्चिमभागः.

To PLUCK, *v. a.* (Pull off, out or from) उत्कृष् (c. 1. -कर्षति -क्रष्टुं), निष्कृष्, कृष्, उद्धृ (c. 1. -हरति -हर्त्तुं), निर्हृ, हृ, उत्पट् (c. 10. -पाटयति -यितुं), उत्पाटनं कृ.—(As the hair) लुञ्च् (c. 1. लुञ्चति -ञ्चितुं) उल्लुञ्च्, अवलुञ्च्, केशान् उत्पट्, केशोत्पाटनं कृ, केशोल्लुञ्चनं कृ.—(As feathers, &c.) पक्षान् or पर्णान् उत्पट् or निष्कृष् or निर्हृ or हृ, पक्षोत्पाटनं कृ, निष्पक्षीकृ, निष्पर्णीकृ, निष्पत्रीकृ.—(Gather by plucking) अङ्गुलिभिर् ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or आदा (c. 3. -ददाति -दत्ते -दातुं) or चि or अवचि or लू or छिद्.—(Pluck up) उत्पट्, उद्धृ, समुद्धृ, उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, उच्छिद्, उत्खन्.

PLUCK, *s.* (Of an animal) पशोर् हृद्यकृदादि *n.*—(Mettle, courage) वीर्य्यं, सत्त्वं, साहसं, पौरुषं.

PLUCKED, *p. p.* हृतपर्णः -र्णा -र्णं, उद्धृतपर्णः &c., हृतलोमा -मा -म (न्).

PLUCKER, *s.* उत्पाटयिता *m.* (तृ), उत्पाटी *m.* (न्), उद्धर्त्ता *m.* (र्त्तृ).

PLUCKING, *s.* उत्पाटः -टनं, उत्कर्षणं, निष्कर्षणं, उद्धरणं.—(As of hair) उल्लुञ्चनं, अवलुञ्चनं.—(Gathering) चयः -यनं, अवचयः, ग्रहणं.

PLUG, *s.* रोधनी, निरोधनी, स्तम्भनी, पिधानं.

To PLUG, *v. a.* रुध् (c. 7. रुणद्धि, रोद्धुं), निरुध्, स्तम्भ् (c. 10. स्तम्भयति -यितुं), पिधा (c. 3. -दधाति -धातुं).

PLUM, *s.* (Fruit) अम्रफलभेदः.—(Sum of one hundred thousand) लक्षं -क्षा, लक्ष्यं; 'one who is worth a plum,' लक्षाधीशः.

PLUMAGE, *s.* पक्षः, पर्णः, पक्षिपर्णीः *m. pl.*, पक्षिपत्राणि *n. pl.*, पतत्रं, पिच्छं, गरुत् *m.*; 'of a peacock,' गुच्छः -च्छकः, वृषं; 'having good or beautiful plumage,' सुपर्णः -र्णा -र्णं, सुपर्णी -र्णिनी -र्णि (न्), सुपक्षवान् -वती -वत् (त्), चारुपर्णः &c., चारुपर्णी &c.

PLUMB, *s.* लक्षः -क्षकः, लक्षसीसकं, लक्षसीसकसूत्रं. *See* PLUMMET.

PLUMB, *a.* लक्षः -क्षा -क्षं, लक्षरूपः -पा -पं, ऋजुः -जुः -जु.

To PLUMB, *v. a.* (Adjust with a line) सूत्र् (c. 10. सूत्रयति -यितुं), सूत्रेण समायुज् (c. 10. -योजयति -यितुं) or युज्.—(Sound depth) सूत्रेण क्षेपपरिमापणं कृ or गाम्भीर्यपरिमापणं कृ.

PLUMBEAN, PLUMBEOUS, *a.* सीसमयः -यी -यं, सीसगुणकः -का -कं, सैसकः &c.

PLUMBER, *s.* सीसकारः -रकः, सीसकज्ञः *m.* (ज्ञ्), सीसकव्यापारी *m.*

PLUMB-LINE, *s.* लक्षसीसकं, लक्षसूत्रं. *See* PLUMB, *s.*

PLUM-CAKE, *s.* चित्रापूपः, चित्रपिष्टकः, शुष्कफलपूरितापूपः.

PLUME, *s.* (Feather) पक्षः, पर्णः, पिच्छं.—(Feather worn as ornament, crest) शेखरः, चूडा, शिखा, किराटः, मुकुटं, मौलिः *m. f.*

PLUME, *v. a.* (Adjust feathers) पक्षान् or पर्णान् रच् (c. 10. रचयति -यितुं) or विरच्.—(Strip of feathers) पक्षान् or पर्णान् उत्कृष् or निष्कृष् or हृ or उत्पट्, निष्पक्षीकृ. *See To* PLUCK.—(Pride one's self) अभिमन् (c. 4. -मन्यते -मन्तुं), आत्मानं श्लाघ् (c. 1. श्लाघते -घितुं); 'to plume one's self on one's learning,' परिज्ञतम्मन्यः -न्या -न्यं भू or अस्.

PLUMELESS, *a.* पक्षहीनः -ना -नं, चूडाहीनः &c., अपक्षः -क्षा -क्षं.

PLUMIGEROUS, *a.* पक्षवान् -वती -वत् (त्), पक्षी -क्षिणी -क्षि (न्), सपक्षः -क्षा -क्षं.

PLUMIPED, *a.* सपक्षपादः -दा -दं, सपर्णपादः &c., सपक्षचरणः &c.

PLUMMET, *s.* लम्बः -म्बकः, लम्बसीसकं, समीसकसूत्रं, सीसालम्बितसूत्रं, सीसलग्नसूत्रं, सूत्रलग्नसीसकं, लम्बसूत्रं, लम्बकसूत्रं.

PLUMOSE, PLUMOUS, *s.* सपक्षः -क्षा -क्षं, सपिच्छः -च्छा -च्छं, पक्षवान् -वती -वत् (त्), पिच्छिलः -ला -लं. *See* FEATHERED.

PLUMP, *a.* पीवरः -रा -रं, पीनः -ना -नं, घनः -ना -नं, घनमांसः -सा -सं, उन्नतमांसः &c., उन्नतः -ता -तं, पुष्टः -ष्टा -ष्टं, परिपुष्टः &c., मांसपुष्टः &c., स्थूलमांसः &c., मुललितः -ता -तं, मुललितमांसः &c., आप्यानः -ना -नं, स्थूलः -ला -लं, उच्छूनः -ना -नं, तुन्दी -न्दिनी -न्दि (न्), तुन्दिकः -का -कं, स्फीतः -ता -तं, स्फातः &c., फुल्लः -ल्ला -ल्लं.

PLUMP, *adv.* अकस्मात्, आकस्मिकशब्देन, आस्फोटनशब्देन.

PLUMP, *v. a.* आप्यै (c. 10. -प्याययति -यितुं), स्थूलीकृ, पीवरीकृ, स्फाय् (c. 10. स्फाययति -यितुं), श्वि (c. 10. श्वाययति -यितुं), उच्छूनीकृ, शूनीकृ.

PLUMP, *v. n.* अकस्मात् or आकस्मिकशब्देन or आस्फोटनशब्देन पत् c. 1. पतति -तितुं), अतिभारेण पत्.

PLUMPLY, *adv.* मुच्यक्कं, सुस्पष्टं, अतिव्यक्कं, व्यक्तार्थतस्, अवक्रं.

PLUMPNESS, *s.* घनता, स्थूलता -त्वं, पीवरत्वं, पीनत्वं, पुष्टता, सुपुष्टता, पुष्टिः *f.*, सुपुष्टिः *f.*, स्फीतिः *f.*, स्फीतता -त्वं, स्फातिः *f.*, फुल्लता, आप्मानं, उन्नतिः *f.*

PLUM-PUDDING, *s.* चित्रापूपः, चित्रवोलिका, मोदकादिपूरितवोलिका.

PLUMY, *a.* सपक्षः -क्षा -क्षं, पक्षविशिष्टः -ष्टा -ष्टं. *See* FEATHERED.

PLUNDER, *s.* लोष्ट्रं, लोष्टं, लुभ्रं, लोप्त्रं, लुण्ठनं, लुण्ठा, लुण्टनं, लुण्टा, हरणं, अपहारः, अभिग्रहः, धनापहारः -हरणं, नष्टाप्तिसूत्रं, होडं.

PLUNDER, *v. a.* धनद्रव्यादि हृ (c. 1. हरति, हर्तुं) or अपहृ or अभिहृ, लुण्ठ् (c. 1. लुण्ठति -ण्ठितुं) or लुण्ट् or लुण्ड् or रुण्ठ् or रुण्ट्, चुर् (c. 10. चोरयति -यितुं), विलुप् (c. 6. -लुम्पति -लोप्तुं), लुप्, कल् (c. 10 कालयति -यितुं), प्रकल्, साहसेन or साहसपूर्व्वम् अपहृ.

PLUNDERED, *p. p.* हृतधनः -ना -नं, हृतद्रव्यः -व्या -व्यं, हृतस्वः -स्वा -स्वं, अपहृतस्वः &c., लुण्ठितः -ता -तं, साहसेन or साहसपूर्व्वम् अपहृतः -ता -तं, लुप्तः -प्ता -प्तं, होढः -ढा -ढं.

PLUNDERER, *s.* अपहारकः, अपहारी *m.* (न्), हारकः, हारी *m.*, अपहर्त्ता *m.* (र्त्तृ), लुण्टाकः, लुण्टनकृत् *m.*, साहसेन or साहसपूर्व्वम् अपहारी *m.*, साहसिक..

PLUNDERING, *s.* अपहारः, अपहरणं, हरणं, धनापहारः, लुण्ठनं, लुण्टनं.

PLUNGE, *v. a.* (Immerse) मज्ज् (c. 10. मज्जयति -यितुं), निमज्ज्, प्लु (c. 10. प्लावयति -यितुं), आप्लु, अवगाह् (c. 10. -गाहयति -यितुं), जलं प्रविश् in caus., जले निविश्, स्ना in caus.

PLUNGE, *v. n.* (Dive) मज्ज् (c. 6. मज्जति -ज्जितुं, मंक्तुं), निमज्ज्, अवगाह् (c 1. -गाहते -हितुं -गाढुं), व्यवगाह्, विगाह्, आप्लु (c. 1. प्लवते -प्लोतुं), जलमध्ये प्रविश्, जलान्तः प्रविश्, जलं प्रविश्, जलान्तःप्रवेशं कृ, जलान्तःप्लवनं कृ, स्ना.

PLUNGE, PLUNGING, *s.* मज्जनं, निमज्जनं, प्रमज्जनं, प्लवनं, आप्लवः, आप्लावः -वनं, अवगाहनं, विगाहः -हनं, गाहनं, जलप्रवेशः, जलान्तःप्लवनं, जलान्तःप्रवेशः, निष्णानं; 'of an elephant,' निर्वाणं.

PLUNGED, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., मज्जितः -ता -तं, निमज्जितः &c., प्रमग्नः &c., गाहितः -ता -तं, अवगाहितः &c., अवगाढः -ढा -ढं, विगाढः &c.. आप्लुतः -ता -तं, निवेशितः &c., अभिनिवेशितः &c., निविष्टः -ष्टा -ष्टं, अभिनिविष्टः &c., लीनः -ना -नं, निर्वाणः -णा -णं; 'in a sea of sorrow,' शोकसागरमग्नः &c., शोकसागरावगाढः -ढा -ढं. *See* IMMERSED.

PLUNGEON, *s.* (The Diver bird) प्लवः, प्लावी *m.* (न्).

PLUNGER, *s.* गाहिता *m.* (तृ), अवगाहिता *m.*, मंक्ता *m.* (क्तृ), निमंक्ता *m.*

PLURAL, *a.* अनेकः -का -कं, बहुः -हुः -ह्वी -हु, बहुलः -ला -लं.—(Plural number, in grammar) अनेकवचनं, बहुवचनं.

PLURALITY, *s.* अनेकत्वं -ता, अनैक्यं, बहुत्वं -ता, बाहुल्यं, अनेकसंख्यत्वं; 'of gods,' देवबहुत्वं; 'of wives,' सापत्न्यं.

PLUS, *s.* (In Algebra) धनं, स्वं.

PLUSH, *s.* स्थूलदुकूलं, घनदुकूलं, घनलोमवद् दुकूलं.

PLUTO, *s.* (God of the infernal regions) यमः. *See* YAMA.

PLUTUS, *s.* (God of wealth) कुवेरः, धनपतिः *m.* *See* KUVERA.

PLUVIAL, PLUVIOUS, *a.* वृष्टिमान् -मती -मत् (त्), वर्षुकः -का -कं, वर्षिकः -की -कं, वार्षिकः &c., वृष्टिमयः -यी -यं, प्रचुरवृष्टिः -ष्टिः -ष्टि, बहुवृष्टिः &c.

PLUVIAMETER, *s.* वृष्टिमापनयन्त्रं, वृष्टिमापकः, वृष्टिमापनी.

To PLY, *v. a.* (Lay on) कृ in caus. (कर्षयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं), न्यस्, आधा, धा, पत् in caus.: 'to ply with repeated blows,' पुनः पुनः पत्, मुहुर्मुहुः पत् or दण्डपातनं कृ.—(Employ diligently) यत्नतः or निर्बन्धेन प्रयुज् or उपयुज् or प्रवृत्.—(Keep in motion) प्रयत्नतस् or अविरतं चल् (c. 10. चालयति -यितुं), or मञ्चल्.—(Urge, press perseveringly) निर्बन्धेन प्रत्युपस्था (c. 1. -तिष्ठति -ष्ठातुं) or उपस्था or आक्रम् (c. 1. -क्रामति -क्रमितुं); 'with entreaties,' अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or प्रार्थनं कृ.

To PLY, *v. n.* (Be steadily employed) अनालस्येन or अतन्द्रितस् or अविरतं व्याप् in pass. (-प्रियते) or व्यापृतः -ता -त भू or निविष्टः -ष्टा -ष्टं भू or प्रवृत् or यत्, अविरतयत्नं कृ.

PLY, *s.* (Fold) ऊर्म्मिः *m. f.*, ऊर्म्मी -र्म्मिका, व्यावर्त्तनं, तरङ्गः, पुटः.

PNEUMATIC, PNEUMATICAL, *a.* (Consisting of air) वायुमयः -यी -यं, वायुरूपः -पा -पं.—(Pertaining to air) वायवः -वी -वं, वायुसम्बन्धी -न्धिनी -न्धि (न्), वायुविषयकः -का -कं, वायु in comp.—(Moved or played by air) वायु in comp., वायुसञ्चारितः -र्त्ता -तं, वायुवादितः -ता -तं; 'pneumatic instrument,' वायुयन्त्रं, वायुवाद्यं.

PNEUMATICS, *s. pl.* वायुविद्या, वायुधर्म्मविद्या, वायुगुणविद्या, वायुशास्त्रं, वायुगुणविषयका विद्या.

PNEUMONIA, *s.* (Inflammation of the lungs) फुप्फुसदाहः.

PNEUMONIC, *a.* फुप्फुससम्बन्धी &c., फुप्फुसविषयकः -का -कं.

To POACH, *v. a.* (Boil eggs slightly) अण्डानि तप्तजलान्तः कृत्वा ईषत् पच् (c. 1. पचति, पक्तुं) or क्वथ् or अर्द्धसिद्धानि कृ.—(Steal or pocket game) वनपक्ष्यादि or जङ्गलपक्ष्यादि चुर् or गूढकोपात्तः कृत्वा अपहृ. *See* the next.

To POACH, *v. n.* कूटयन्त्रेण वनपक्षिणो ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), कूटोपायेन जङ्गलपक्ष्यादि ग्रह् or चुर् (c. 10. चोरयति -यितुं) or अपहृ (c. 1 -हरति -हर्त्तुं), जाङ्गलजन्तुचौर्य्यं कृ, वन्यजन्तुहरणं कृ, वन्यजन्तुस्तेयं कृ, मृगयाचौर्य्यं कृ.

Poacher, *s.* कौटिकः, कौटकिकः, कौटिलिकः, कूटयन्त्रेण वनपक्षिग्राहकः, कूटोपायेन वन्यजन्तुहारी *m.* (न्) or जाङ्गलपशुपहारकः, जाङ्गलचौरः, मृगयाचौरः, वनचौरः, मृगयाचोरः, वैतंसिकः.

Poaching, *s.* कूटयन्त्रेण वनपक्षिग्रहणं, कूटोपायेन जङ्गलपक्षिग्रहणं or जाङ्गलजन्तुहरणं, मृगयाचौर्य्यं, जाङ्गलचौर्य्यं, वन्यजन्तुचौर्य्यं, वन्यजन्तुस्तेयं, वनचौर्य्यं, वनस्तेयं.

Pock, *s.* रक्तवरटी, रक्तवटी, वटी, वरटी, रक्तस्फोटः, सूक्ष्मस्फोटः -टकः, स्फोटः -टकः, विस्फोटः, सिध्मं, मिध्म *n.* (न्), गुटिका,

Pocket, *s.* वस्त्रान्तःस्थकोषः, वस्त्रस्थकोषः, वस्त्रान्तरस्थकोषः, कोषः, कोशः, आधारः.

To pocket, *v. a.* कोषान्तः कृ, कोषे or कोशे निविश् (c. 10. -वेशयति -यितुं) or निधा (c. 3. -दधाति -धातुं), वस्त्रान्तर्गतं -तां कृ, कोषान्तः स्था in caus. (स्थापयति -यितुं), कोषस्थं -स्थां कृ.—(Put up with) सह् (c. 1. सहते, सोढुं), क्षम् (c. 1. क्षमते, क्षन्तुं).

Pocket-book, *s.* कोषस्थपुस्तकं, कोषगतपुस्तकं, कोषपुस्तकं.

Pocketed, *p. p.* कोषान्तःकृतः -ता -तं, कोषान्तः स्थापितः -ता -तं, कोषनिवेशितः &c., कोषगतः -ता -तं, कोषान्तर्गतः &c., कोषान्तर्हितः &c., कोषगुप्तः -प्ता -प्तं.

Pocket-handkerchief, *s.* नासामार्जनी, नासिकामार्जनी, मुखमार्जनी, नक्तकः, वरकं.

Pocket-hole, *s.* कोषच्छिद्रं, कोशच्छिद्रं, वस्त्रान्तःस्थकोषच्छिद्रं.

Pocket-money, *s.* क्षुद्रद्रव्यक्रयणार्थं वारे वारे दत्तं धनं.

Pocky, *a.* रक्तवरटीपूर्णः -र्णा -र्णी, रक्तस्फोटविशिष्टः -ष्टा -ष्टं.

Pod, *s.* बीजकोशः, बीजगुप्तिः *f.*, सिक्षा -क्षिः -क्षी *f.*, शिक्षा क्षिः -क्षी *f.*, शिक्षिका, शमिः *f.*, शमी, पुटः; 'grain in pods,' शमीधान्यं.

Podagrical, *a.* वातकी -किनी -कि (न्), वातरोगी -गिणी &c., वातिकः -की -कं, वातुलः -ला -लं, सन्धिवायुरोगी &c., सन्धिवायुग्रस्तः -स्ता -स्तं.

Podded, *a.* सिक्षियुक्तः -क्ता -क्तं, शिक्षीयुक्तः &c., शमियुक्तः &c.

Poem, *s.* काव्यं, कविता, कवनं, काव्यबन्धः; 'interspersed with prose,' खण्डकाव्यं.

Poesy, *s.* (Art of composing poems) कविता, काव्यविद्या, काव्यरचनविद्या, काव्यलेखनविद्या, काव्यरचना, श्लोकरचना, कविताशक्तिः *f.*, कविकर्म्म *n.* (न्), रसविद्या, रसज्ञता.—(Metrical composition) कविता, काव्यं, वाङ्मयावृत्तिः *f.* *See* Poetry.

Poet, *s.* कविः *m.*, काव्यरचकः, कवितारचकः, पद्यरचकः, काव्यकर्त्ता *m.* (र्त्तृ). कविताकर्त्ता *m.*, रसज्ञः, वप्रा *m.* (प्र्), भविनः, वागीशः; 'a quasi poet,' कविकल्पः; 'a ready poet,' शीघ्रकविः *m.*

Poetaster, *s.* कुकविः *m.*, कविकल्पः, कविदेशीयः, कविदेश्यः.

Poetess, *s.* काव्यकर्त्री, कविताकर्त्री, काव्यरचका.

Poetic, poetical, *a.* (Relating to poetry, suitable to it) कवितासम्बन्धी -न्धिनी &c., कविताविषयः -या -यं, काव्यरचनयोग्यः -ग्या -ग्यं, काव्ययोग्यः &c.—(Possessing the beauties of poetry) रमिकः -का -कं, सरसः -सा -सं, रसी -सिनी &c., रसवान् -वती -वत् (त्), काव्यरसवान् &c., कविता or काव्य in comp.; as, 'poetical genius,' कविताशक्तिः *f.*—(Expressed in poetry or measure) श्लोकबद्धः -द्धा -द्धं, पद्यरूपः -पा -पं, श्लोकरूपः &c., काव्यरूपः -पा -पं. कवितारूपः &c., कवितामयः -यी -यं, श्लोकमयः &c., छन्दोरूपः &c., छन्दोबद्धः &c.

Poetically, *adv.* कवितायोग्यं, कवितारूपेण, पद्यरूपेण, कवितापूर्द्धं, छन्दोनुसारेण, काव्यरसपूर्द्धं, सरसं.

Poetics, *s.* काव्यशास्त्रं, कविताशास्त्रं, रसशास्त्रं, पद्यशास्त्रं,

To poetize, *v. n.* काव्यं रच् (c. 10. रचयति -यितुं), काव्यरचनां कृ, कवितां कृ.

Poet-laureate, *s.* वन्दी *m.* (न्), वन्दारुः *m.*, राजवन्दी *m.*, राजस्तुतिपाठकः.

Poetry, *s.* (Metrical composition, verse) कविता -त्वं, काव्यं, कवनं, पद्यं.—(Art or practice of composing in verse) कविता -त्व, काव्यरचना, श्लोकरचना, काव्यविद्या, काव्यरचनविद्या, कविकर्म्म *n.* (न्), कविताविद्या, रसविद्या, रसज्ञता.—(Poetical works) काव्यशास्त्रं, पद्यशास्त्रं, साहित्यं.

Poignancy, *s.* तीक्ष्णता, तीव्रता, तिग्मता, उग्रता -त्वं, कटुता मर्म्मिकत्वं.

Poignant, *a.* तीक्ष्णः -क्ष्णा -क्ष्णं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, अरुन्तुदः -दा -दं, मर्म्मस्पृक् *m. f. n.* (ग्), मर्म्मभेदी -दिनी -दि (न्), मार्म्मिकः -की -कं.

Point, *s.* (Sharp end) अग्रं, शिखा, शिखरं, अणिः *m.*, आणिः *m.*, अंशुः *m.*, अग्रांशुः *m.*, मुखं, कण्टकः, शलाका; 'of a needle,' सूच्यग्रं, कण्टकः; 'of the foot,' पादाग्रं, प्रपदं.—(Of a blade, &c.) धारा -रं, कोटिः *f.*, अश्रिः *f.*, पालिः -ली *f.* -लिका, अणिः *m.*, शिखरं, अग्रं; 'a sharp point,' तीक्ष्णाग्रं.—(Of land, head-land) भूमिनासिका, उदग्रभूमिः *f.*, उदग्रस्थलं, भृशलाका.—(Sting, wit of an epigram, &c.) दंशः, उपदंशः, मर्म्म *n.* (न्), रसः, रहस्यं.—(Of space or time) अणुः *m.*, परमाणुः *m.*, सन्धिः *m.*—(Of the compass) दिक् *f.* (श्), दिशा, ककुभ् *f.*, काष्ठा, आशा, हरित् *f.*, दिग्विभागः; 'intermediate point,' विदिक् *f.*, प्रदिक् *f.*, अपदिशं.—(Dot) विन्दुः *m.*, शून्यं, विप्रुट् *f.* (ष्), अङ्कः, चिह्नं.—(Mark in punctuation) चिह्नं, विश्रामचिह्नं, विरामचिह्नं.—(Particular subject, case under discussion) विषयः, अर्थः, पदं, स्थलं, आस्पदं प्रकरणं, प्रसङ्गः, प्रस्तावः; 'being to the point,' प्रासङ्गिकः -की -कं, प्रास्ताविकः &c.; 'on this point at least,' अत्र तावत्.—(Aim, object) लक्षं, लक्ष्यं, अर्थः, आशयः, उद्देशः, अभिप्रायः.—(Characteristic mark, as of a horse, &c.) लक्षणं, विशेषणं, गुणः.—(Degree, pitch) पर्य्यन्तं, अन्तः -न्तं, परिमाणं, पदं, आस्पदं, पर्य्यायः, क्रमः; 'highest point,' उत्तमपदं, परमपदं, परमास्पदं; 'to such a point,' एतावत्पर्य्यन्तं, एतावत्; 'to what point?' किम्पर्य्यन्तं, कियत्पर्य्यन्तं; 'to that point,' तदन्तं, तत्पर्य्यन्तं.—(Critical moment) सन्धिः *m.*, कालसन्धिः *m.*, समयः; 'on the point of, at the point of,' उद्यतः -ता -तं, उद्युक्तः -क्ता -क्तं, उन्मुखः -खा -खं, or expressed by the desiderative or other forms of adjective. thus, 'on the point of dying, at the point of death,' मरणोन्मुखः -खा -खं, मुमूर्षुः -र्षुः -र्षु, आसन्नमृत्युः -त्युः -त्यु, आसन्नमरणः -णा -णं, मृतप्रायः -या -यं, मृतकल्पः -ल्पा -ल्पं, अन्त्यावस्थः -स्था -स्थं; 'on the point of going,' गमनोद्यतः -ता -तं, गन्तुमुद्यतः &c., गमनोन्मुखः &c., जिगमिषुः -षुः -षु, गन्तुकामः -मा -मं; 'on the point of bringing forth,' प्रसवोन्मुखी, आसन्नप्रसवा, आसन्नप्रसवकाला; 'he is on the point of rising,' उत्थातुमुद्यतोऽस्ति, उत्थातुम् इच्छति.—(Point of view) दृष्टिः *f.*—(Punctilio, nicety सूक्ष्मता, सौक्ष्म्यं.

To point, *v. a.* (Sharpen to a point) तीक्ष्णाग्रीकृ, तीक्ष्णीकृ, तीक्ष्णधारीकृ, शिताग्रीकृ, निशो (c. 4. -श्यति -शातुं), तिज् (c. 10. तेजयति -यितुं), सायीकृ.—(Direct towards, aim at) लक्षीकृ, उद्दिश्, समुद्दिश्, निर्दिश्, अभिसन्धा, लक्ष्; 'pointing to,' उद्दिश्य.—(Punctuate) विश्रामचिह्नानि or विरामचिह्नानि अङ्क् (c. 10. अङ्कयति -यितुं) or कृ.—(Point out, shew by the finger, &c.) प्रदिश्

(c. 6 -दिशति -देष्टुं), निर्दिश्, उद्दिश्. विनिर्दिश्, व्यादिश्, आदिश्, अङ्गुल्या निर्दिश् or प्रदिश् or दृश् (c. 10 दर्शयति -यितुं) or प्रदृश् or सूच् (c. 10. सूचयति -यितुं) or संसूच्; 'point out the way,' मार्गम् आदेशय.

To POINT, *v. n.* (With the finger) अङ्गुलिनिर्देशं कृ, अङ्गुल्या निर्दिश् or प्रदिश्. *See* the last.—(Have direction or aim) उद्दिश् उद्देशकः -का -कं भू, उद्देशं कृ, लक्षीकृ or expressed by दिश्य or मुख or अग्र in comp.; as, 'to point towards the south,' दक्षिणदिश्यः -श्या -श्यं भू, दक्षिणमुखः &c. भू, दक्षिणाग्रः &c. भू.

POINT-BLANK, *a.* or *adv.* समसूत्रः -त्रा -त्रं, एकसूत्रः &c., समरेखः -खा -खं, क्षितिजैकसूत्रः &c., समसूत्रेण, एकसूत्रेण.

POINTED, *p. p.* or *a.* (Have a sharp end) तीक्ष्णाग्रः -ग्रा -ग्रं, शिताग्रः &c., साग्रः &c., तीक्ष्णजिह्वः -ह्वा -ह्वं, ज्ञातशिखः &c., अंशुमान् -मती -मत् (न्), तीक्ष्णांशुमान् &c., शिखावलः -ला -लं, शिखाधरः -रा -रं, शितः -ता -तं. निशितः &c., शैख्यः -ख्या -ख्यं.—(Epigrammatical, keen, witty) रसिकः -का -कं, सरसः -सा -सं, रसवान् &c., मार्मिकः -की -कं, मर्मस्पृक् *m. f. n.* (ज्), अरून्तुदः -दा -दं, दंशकः -का -कं; 'pointed words,' वागसिः *f.*—(Pointed out) निर्दिष्टः -ष्टा -ष्टं, उद्दिष्टः &c., प्रदिष्टः &c., सूचितः -ता -तं, अङ्गुलिनिर्दिष्टः &c.

POINTEDLY, *adv.* अमुकमुद्दिश्य, उद्दिश्य, उद्देशपूर्वं, समर्मभेदं.

POINTEDNESS, *s.* रसिकता -त्वं, सरसता, दंशकता -त्वं, मार्मिकत्वं.

POINTER, *s.* निर्देशकः, देशकः, प्रदेशकः, निर्देष्टा *m.* (ष्टृ), निदेष्टा *m.*, निर्देशी *m.* (न्), प्रदेशी *m.*, देशी *m.*, दर्शकः, प्रदर्शकः, सूचकः.—(Dog) वन्यपक्षिनिर्देशको मृगयाकुक्कुरः, वन्यपक्षिनिर्देशने शिक्षितो मृगयाश्वा *m.* (न्).

POINTING, *s.* निर्देशः -शनं, अङ्गुलिनिर्देशः, निदेशः, सूचनं, अङ्गुलिप्रदर्शनं.

POINTLESS, *a.* (Having no point or edge) निरग्रः -ग्रा -ग्रं, अग्रहीनः -ना -नं, धाराहीनः &c., अतीक्ष्णः -क्ष्णा -क्ष्णं.—(Destitute of wit) विरसः -सा -सं, अरसिकः -का -कं, रसहीनः &c., फल्गुः -ल्गुः -ल्गु.

POISE, *s.* (Weight) भारः, तुला, तोलः.—(Balance, equilibrium) भारतुल्यता, भारसमता, भारसाम्यं, समतौल्यं, समतोलः, तुल्यता, तुलासाम्यं.

To POISE, *v. a.* समभारीकृ, तुल्यभारीकृ, समतोलीकृ, समीकृ, तुल्यीकृ, तुल् (c. 10 .तुलयति -यितुं).

POISON, *s.* विषं, गरं-रः, गरलं, गरदं, भूगरं, जीवनाघातं, जङ्गुलं, जाङ्गुलं, हलाहलं -लः, हालाहलं, हालहालं, हालहलं, हलहलं, हाहलं -लः, कालकूटं -टः, कलाकुलं, काकोलं -लः, सौराष्ट्रिकं, सोराष्ट्रिकं, दारदः, प्रदीपनः, ब्रह्मपुत्रः, शौक्लिकेयः, वत्सनाभः, धूलकं, निदः, क्ष्वेडः; 'administering poison,' विषप्रयोगः, विषविधानं, विषदानं; 'taking poison,' विषभक्षणं; 'worthy of death by poison,' विष्यः -ष्या -ष्यं; 'yielding poison,' विषदः -दा -दं; 'removing or curing poison,' विषघ्नः -घ्नी -घ्नं, विषनाशी -शिनी -शि (न्), विषघाती &c., विषहरः -री -रं, विषापहः -हा -हं. गरघ्नः &c.; 'art of curing poisons,' विषविद्या, विषनाशनविद्या; 'curer of poisons,' विषवैद्यः, विषभिषक् *m.* (ज्), जाङ्गुलिकः, जाङ्गुलिः *m.*, गारुडिकः; 'charm against poison,' गारुडः -डं.

To POISON, *v. a.* (Infect with poison) विषाक्तं -क्तां कृ, विषयुक्तं -क्तां कृ, विषेण दुष् (c. 10. दूषयति -यितुं), विषदिग्धं -ग्धां कृ.—(Administer poison, kill by it) विषं दा, विषप्रयोगं कृ, विषेण हन् or मृ in caus., विषदानेन हन्.—(Poison one's self, take or eat poison) विषं भुज् or भक्ष् or खाद्. विषेण or विषप्रयोगेण आत्मानं हन्.—(Corrupt, taint) दुष्, चन्दुष्, लिप्, नश् in caus.

POISONED, *p. p.* or *a.* (Infected with poison) विषाक्तः -क्ता -क्तं, विषदिग्धः -ग्धा -ग्धं, विषलिप्तः -प्ता -प्तं, विषदूषितः -ता -तं; 'a poisoned arrow,' दिग्धः, लिप्तकः.—(Killed by poison) विषमारितः -ता -तं, विषनाशितः &c.

POISONER, *s.* विषदः, विषदायी *m.* (न्), गरदः, गरदायी *m.*, तीक्ष्णरसदायी.

POISONING, *s.* विषप्रयोगः, विषदानं, विषविधानं, विषेण मारणं.

POISONOUS, *a.* विषालुः -लुः -लु, गरली -लिनी -लि (न्), विषमयः -यी -यं, सविषः -षा -षं, विषधरः -रा -रं, विषगुणकः -का -कं, विषधर्म्मकः -का -कं, विषदः -दा -दं, सगरः -रा -रं, तीक्ष्णविषः -षा -षं, विषपूर्णः -र्णा -र्णं, विषभुष्टः -ष्टा -ष्टं, दूषकः -का -कं, विष in comp.; as, 'poisonous snake,' विषभुजङ्गः.

POISONOUSLY, *adv.* सविषं, सगरं, सगरलं, सदूषणं, दूषकप्रकारेण.

POISONOUSNESS, *s.* विषालुता, सविषत्वं, सगरत्वं, विषपूर्णता, दूषकत्वं.

POITREL, *s.* उरस्त्राणं, वक्षस्त्राणं, उरश्छदः, वक्षस्त्रं.

To POKE, *v. a.* (Thrush, push against, stick) तद् (c. 10. ताडयति -यितुं), दण्डादि प्रसारयित्वा तद् or आहन् (c. 2. -हन्ति -न्तुं) or अभ्याहन् or प्रहृ (c. 1. -हरति -हर्तुं), प्रसृ (c. 10. -सारयति -यितुं), प्रविश् (c. 10. -वेशयति -यितुं), ताडनं कृ, आघातं कृ, प्रहारं कृ.—(Search for, grope for, with a long instrument) दण्डादि प्रसारयित्वा परामृश् (c. 6. -मृशति- मर्ष्टुं) or अन्विष् (c. 4. -इष्यति -एषितुं).

To POKE, *v. n.* (Grope) तमः प्रविश्य परामृश् or परिमृश्, अन्धकारे दण्डादि प्रसारयित्वा अन्विष् or निरूप्.—(Dawdle, trifle) विलम्बेन किञ्चित् कृ, विलम्ब्. *See To* PEDDLE.

POKE, *s.* ताडनं, आघातः, प्रहारः, अभिघातः, आहतिः *f.*, दण्डप्रसारणं.

POKER, *s.* शलाका, लोहशलाका, अङ्गारचालनशलाका, अङ्गारचालकः, अङ्गारचालकदण्डः, अङ्गारोत्थापकः.

POLAR, *a.* ध्रुवसम्बन्धी -न्धिनी -न्धि (न्), मेरुसम्बन्धी &c., ध्रुवविषयकः -का -कं, ध्रुवस्थः -स्था -स्थं, केन्द्रस्थः &c., ध्रुवनिकटस्थः &c.; 'polar star,' ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः, नक्षत्रनेमिः *m.*, द्युतिकरः, ज्योतीरथः· 'polar circle,' कदम्बमण्डलं; 'polar distance,' ध्रुवज्याचापांशाः.

POLARITY, *s.* ध्रुवाभिसरणशीलता, ध्रुवाभिगमनशीलता, ध्रुवाभिजिगमिषा, ध्रुवाभिमुखशीलता, ध्रुवाभिमुखता, केन्द्राभिमुखता.

POLARY, *a.* ध्रुवाभिसरणशीलः -ला -लं, ध्रुवाभिगमनशीलः &c., ध्रुवाभिजिगमिषुः -षुः -षु, ध्रुवाभिगामी -मिनी -मि (न्), ध्रुवाभिसारी &c., ध्रुवाभिमुखशीलः &c.

POLE, *s.* (Long piece of wood) दण्डः -ण्डं, याष्टिः *m. f.*, दीर्घकाष्ठं. काष्ठं; 'for carrying burdens,' भारयष्टिः *m. f.*, विहङ्गिका; 'raised on a pole,' उद्गतः -ता -तं.—(Of a carriage) धूः *f.* (धुर्), धुरा, धूर्वी. कूबरः, युगन्धरः, यानमुखं.—(Of a plough) ईषा, ईशा, हलदण्डः, लाङ्गलदण्डः.—(The measure) दण्डः.—(In astronomy) ध्रुवः, मेरुः *m.*, केन्द्रं; 'north pole,' उत्तरध्रुवः, ध्रुवः, मेरुः *m.*, उत्तरार्धं; 'south pole,' दक्षिणध्रुवः, कुमेरुः *m.*, दक्षिणार्धं; 'elevation of the pole,' ध्रुवोन्नतिः *f.*; 'pole of the ecliptic,' कदम्बः.

POLE-AXE, *s.* परशुः *m.*, कुठारः, दीर्घयष्टिलग्नपरशुः *m.*, दीर्घटङ्कः.

POLE-CAT, *s.* पूतिशारिका, लोमशमार्जारः, गन्धमार्जारः, गन्धोतुः *m.*, पूतिका, जाहकः, मृगचेटकः, कस्तूरीमृगः, गात्रसङ्कोची *m.* (न्), खट्टाशः -शी.

POLEMIC, POLEMICAL, *a.* विवादी -दिनी -दि (न्), विवादात्मकः -का -कं, वादानुवादात्मकः -का -कं, वादानुवादार्थकः -का -कं, वादानुवादी &c.

वादप्रतिवादी &c., विसंवादी &c., विप्रतिपत्तिकः -का -कं.

Polemic-polemical, *s.* वादानुवादशीलः, वादानुवादप्रियः, वादानुवादकुशलः, विवादप्रियः, विवादकुशलः, वादरतः, वादानुवादकारी *m.* (न्), वादविवादकर्त्ता *m.* (र्तृ).

Polemics, *s.* धर्म्मविषयो वादानुवादः or विवादः or विसंवादः.

Pole-star, *s.* (Fabled as the son of Uttanapáda, and grandson of the first Manu) ध्रुवः, औत्तानपादिः *m.*, उत्तानपादजः. *See* Polar, *a.*

Police, *s.* (Government of a city or town) नगरव्यवस्था, नगरव्यवस्थितिः *f.*, नगरानुशासनं, नगरकार्य्यानुशासनं.—(Internal regulation of a kingdom) राष्ट्रानुशासनं, देशानुशासनं, देशकार्य्यानुशासनं, राष्ट्रव्यवस्था, देशव्यवस्था, राष्ट्रव्यवस्थितिः *f.*—(Body of police-officers) नगररक्षिणः *m.pl.*, नगररक्षकाः *m.pl.*, नगररक्षिपुरुषाः *m.pl.*, नगरपालाः *m. pl.*, नगरपालकाः *m. pl.*, नगररक्षिगणः, नगरपालगणः, नगरपालवर्गः; 'rural police,' ग्रामरक्षिणः *m. pl.*, ग्रामरक्षकाः *m. pl.*, ग्रामपालाः; 'highway police,' मार्गपालाः -लकाः, मार्गरक्षकाः *m.pl.*

Police-magistrate, *s.* दण्डनायकः, दण्डप्रणेता *m.* (तृ), दण्डाधिकारी *m.* (न्).

Police-man, police-officer, *s.* नगररक्षी *m.* (न्), नगररक्षकः, नगररक्षिपुरुषः, नगरपालः -लकः, आरक्षकः, राजपुरुषः.

Policy, *s.* (Art or manner of governing or managing public affairs) नीतिः *f.*, नीतिविद्या, नयः, नयनं, नयप्रयोगः, राजनीतिः *f.*, राजनयः, राज्यशासनरीतिः *f.*, राज्यनयनं, राज्यनयनरीतिः *f.*, राज्यनिर्व्वाहरीतिः *f.*, राज्यव्यवहारमार्गः, राज्यानुशासनमार्गः; 'good policy,' सुनीतिः *f.*, सुनयः; 'bad policy,' दुर्नीतिः *f.*, दुर्नीतं, दुर्नयः, दुर्नीतिः &c.—(Prudence or skill in the management of public affairs) नीतिकौशल्यं, नीतिकुशलता, नीतिचातुर्य्यं, राज्यनयनयुक्तिः *f.*, राज्यकरणयुक्तिः *f.*, राज्यशासनयुक्तिः *f.*, राज्यचातुर्य्यं, राज्यकौशल्यं, नीतिज्ञता.—(In the management of affairs generally, prudence) व्यवहारयुक्तिः *f.*, व्यवहारचातुर्य्यं, व्यवहारदक्षता, व्यवहारकौशल्यं, कर्म्मनिर्व्वाहयुक्तिः *f.*; 'good policy,' सुयुक्तिः *f.*; 'prudential policy,' समीक्ष्यकारित्वं, सुविमृश्यकारित्वं, समीक्षापुरःसरं उपायप्रयोगः.

To polish, *v. a.* (Make smooth and glossy) तिज् (c. 10. तेजयति -यितुं), परिष्कृ, निष्टप् (c. 10. निष्टापयति -यितुं, rt. तप्), कान्तिं दा, स्निग्धीकृ, श्लक्ष्णीकृ, मृज् (c. 2. मार्ष्टि -ष्टुं), प्रमृज्.—(Refine, make polite) परिष्कृ, संस्कृ, शिष्टीकृ, सभ्यं -भ्यां कृ, सभ्यतां or शिष्टतां जन् (c. 10. जनयति -यितुं) or दा.

Polish, *s.* (Glossiness) कान्तिः *f.*, शोभा, स्निग्धता, स्नैग्ध्यं, श्लक्ष्णता.—(Finish) परिष्कारः, परिष्कृतिः *f.*, संस्कारः, संस्कृतिः *f.*—(Refinement) शिष्टता, परिष्कारः, सभ्यता, सभाचातुर्य्यं, सुजनता, सौजन्यं, शिष्टाचारसम्पन्नता, सभ्याचारसम्पन्नता.

Polished, *p. p.* (Made glossy) परिष्कृतः -ता -तं, तेजितः -ता -तं, निष्टप्तः -प्ता -प्तं, स्निग्धीकृतः &c., श्लक्ष्णीकृतः &c., मृष्टः -ष्टा -ष्टं, प्रमृष्टः &c., निर्धौतः -ता -तं, निशातः -ता -तं, उज्ज्वलितः -ता -तं—(Refined) परिष्कृतः -ता -तं, संस्कृतः &c., शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., अग्राम्यः -म्या -म्यं.

Polisher, *s.* परिष्कर्त्ता *m.* (र्तृ), परिष्कारकः, तेजकः, कान्तिदः, कान्तिदायकः, निर्णेजकः, मार्जकः, सम्मार्जकः.

Polishing, *s.* परिष्कारः, परिष्कृतिः *f.*, संस्कारः, तेजनं, श्लक्ष्णीकरणं.

Polite, *a.* (Refined in manners) शिष्टः -ष्टा -ष्टं, सभ्यः -भ्या -भ्यं, शिष्टाचारी -रिणी -रि (न्), सभ्याचारी &c., सभ्यशीलः -ला -लं, शिष्टाचारसम्पन्नः -न्ना -न्नं, सभ्याचारसम्पन्नः &c., सुजनः -ना -नं, विनीतः -ता -तं, विनयवान् -वती -वत् (त्), सविनयः -या -यं, अग्राम्यः -म्या -म्यं.—(Courteous, obliging) सुशीलः -ला -लं, आदरशीलः &c., वन्दारुः -रुः -रु, दक्षिणः -णा -णं, अनुनयी &c., सानुनयः -या य, अनुरोधी &c., अनुकूलः -ला -लं, प्रियंवदः -दा -दं, अभिवादकः -का -कं, शक्कु -क्कुः -क्कु, सत्कारी &c.

Politely, *adv.* सभ्यवत्, शिष्टवत्, विनीतवत्, सविनयं, सानुनयं, सुशीलवत्, सदाक्षिण्यं, सभ्याचारानुसारेण, शिष्टाचारानुसारात्.

Politeness, *s.* (Refinement of manners) शिष्टता, सभ्यता, सभ्यशीलता, शिष्टाचारित्वं, सभ्याचारित्वं, विनीतता -त्वं, विनयः, सुजनता, सौजन्यं, अग्राम्यता.—(Courteousness) सुशीलता, आदरशीलता, दाक्षिण्यं, अनुनयः, आनन्दनं, अनुरोधः, अनुकूलता.—(Polite behaviour) शिष्टाचारः, शिष्टाचरणं, सभ्याचारः, सभ्याचरणं.

Politic, *a.* (Skilful in managing public affairs) नीतिकुशलः -ला -लं, नीतिज्ञः -ज्ञा -ज्ञं, नीतिविद्याज्ञः -ज्ञा -ज्ञं, नीतिविशारदः -दा -दं, नीतिदक्षः -क्षा -क्षं, नीतिमान् -मती -मत् (त्), नीतिविद् *m. f. n.*, नयविद्, नीतिचतुरः -रा -रं.—(Skilful in the management of affairs generally) व्यवहारकुशलः -ला -लं, व्यवहारदक्षः -क्षा -क्षं, कर्म्मनिर्व्वाहकुशलः -ला -लं, कुशलः -ला -लं, विचक्षणः -णा -णं, निपुणः -णा -णं.—(Wise, well devised, adapted to its end) सुनीतः -ता -तं, सुयुक्तः -क्ता -क्तं, सुप्रयुक्तः &c., सुघटितः &c., सम्यङ्नीतः &c., यौक्तिकः -की -कं, सुसमीक्ष्य or सुविमृश्य or सुसमीक्षापूर्व्वं कृतः -ता -तं, अर्थसम्पादकः -का -कं, अर्थसाधकः -का -कं, कार्य्यसाधकः &c., अर्थकरः -रा -री -रं, हितः -ता -तं.

Political, *a.* नीतिसम्बन्धी -न्धिनी &c., नीतिविद्यासम्बन्धी &c., राजनीतिसम्बन्धी &c., राज्यनयनसम्बन्धी &c., राज्यव्यवहारसम्बन्धी &c., नीतिविषयकः -का -कं, राजनीतिविषयः -या -यं, राजकीयः -या -यं, नीति or देश or राष्ट्र or राज्य in comp.; as, 'political lore,' नीतिविद्या, नीतिशास्त्रं; 'political rights,' देशाधिकारः, पौरजनाधिकारः.

Political economy, *s.* नीतिविद्या, देशपोषणविद्या, देशपालनविद्या, राष्ट्रपालनविद्या, राष्ट्रपोषणविद्या, राज्यव्यवस्थाविद्या, राज्यनिर्व्वाहविद्या, राज्यकर्म्मनयः -यनं.

Politically, *adv.* नीतिमपेक्ष्य, नीतिविद्यामपेक्ष्य, राज्यव्यवस्थामपेक्ष्य.

Politician, *s.* नीतिज्ञः, नीतिकुशलः, नीतिविद् *m.*, नीतिवेदी *m.* (न्), नीतिविशारदः, नीतिविद्याज्ञः, राजनीतिकुशलः, राजनीतिविशारदः, नयविशारदः.

Politics, *s.* (Science of government) नीतिः *f.*, नीतिविद्या, नयः, राजनीतिः *f.*, राजनीतिविद्या, नीतिशास्त्रं, राजनीतिशास्त्रं, राज्यनयनविद्या, राज्यशासनविद्या.—(Political or public affairs) राज्यविषयाः *n. pl.*, राज्यकर्म्माणि *n. pl.*, राज्यकार्य्याणि *n. pl.*, देशव्यवहारः, राष्ट्रव्यवहारः.

Polity, *s.* (System of government) राज्यनीतिः *f.*, राज्यरीतिः *f.*, राज्यनीतिरूपं, राज्यव्यवस्था राज्यस्थितिः *f.*, राज्यनियमः, राज्यविधिः *m.*, राज्यप्रवृत्तिः *f.*, राज्यकरणनियमः, नीतिः *f.*, दण्डनीतिः *f.*

Poll, *s.* (Head) मुण्डः -ण्डं -ण्डकं, शिरस् *n.*, शीर्षं, मस्तकः -कं.—(Entry of the names of electors) नामाभिलेखनं, नामलिखनं, नामलेखनं, नामारोपणं नामसमारोपणं.—(List of names) नामावलिः -ली *f.*, नामपरिसंख्या.

To poll, *v. a.* (Cut off the hair) केशान् छिद् or लू or शातय्.—(Enter names of electors, &c., in a list) नामावलिपत्रे or नामपरिसंख्यापत्रे नामानि समारुह् in caus. or आरुह् or अभिलिख् or लिख्,

POLLARD, *s.* छिन्नाग्रवृक्षः, छिन्नाग्रद्रुमः, लूनाग्रवृक्षः, लूनाग्रतरुः *m.*

POLLED, *p. p.* (Lopped) छिन्नः -न्ना -न्नं, लूनः -ना -नं.—(Registered as the names of voters) नामावलिपत्त्रारोपितः -ता -तं, अभिलिखितः -ता -तं.

POLLEN, *s.* (Of a flower) परागः. रजस् *n.*, पुष्परजस् *n.*, पुष्परेणुः *m.*, पांशुः *m.*; 'laden with pollen,' परागवान् -वती -वत् (त्), परागी -गिणी -गि (न्).

To POLLUTE, *v. a.* दुष् (c. 10. दूषयति -यितुं), सन्दुष्, प्रतिदुष्, मलिनीकृ. मलिन (nom. मलिनयति -यितुं), कलुषीकृ, कलुष (nom. कलुषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, दिह् (c. 2. देग्धि -ग्धुं), मलेन दुष् or लिप् or अञ्ज् (c 7. अनक्ति, अंक्तुं), कलङ्क (nom. कलङ्कयति -यितुं), समलीकृ, अमेध्येन लिप्, अमेध्यीकृ, मलीमसीकृ, अपवित्रीकृ.—(Taint with guilt) दुष्, भ्रंश् (c. 10. भ्रंशयति -यितुं), भ्रष्टीकृ, भ्रष्टं -ष्टां कृ.—(A virgin) कन्यां दुष् or धृष् (c. 10. धर्षयति -यितुं).

POLLUTED, *p. p.* दूषितः -ता -तं, दुष्टः -ष्टा -ष्टं. मलदूषितः &c., मलिम्लिम्लिः -ता -तं, मलग्लिम्नः -म्ना -म्नं, लिप्तः &c., अमेध्यलिप्तः &c., अमेध्याक्तः -क्ता -क्तं, कलुषितः -ता -तं. कलुषीकृतः &c., मलीमसः -सा -सं. समलः -ला -लं, मलवान् -वती -वत् (त्), कलङ्कितः -ता -तं —(As a virgin) दूषिता, भ्रष्टा, धर्षिता.

POLLUTER, *s.* दूषकः, दूषणः, कलुषकारी *m.* (न्), मलावहः, अशौचकृत्.

POLLUTION, *s.* (The act) दूषणं, मलदूषणं, मललेपनं, मलिनीकरणं, कलुषीकरणं, अमेध्यदूषणं, अमेध्यलेपः, अपवित्रीकरणं.—(The state) मलिनत्वं, मालिन्यं, समलता -त्वं, अमेध्यता -त्वं, मलदूषितत्वं, अमेध्यलिप्तता, अमेध्याक्तत्वं, अशुचित्वं, अशौचं -चत्वं, अपवित्रता -त्वं, दुष्टता -त्वं.—(Nocturnal) स्वप्नदोषः स्वप्नावस्था, स्वप्नमध्ये शुक्रपातः.

POLTROON, *s.* कापुरुषः, कुपुरुषः, क्लीवः, कातरः, हतकः, कृपणः, भीरुजनः, निर्वीर्यः, धैर्यहीनः, शौर्यहीनः, अधीरः.

POLTROONERY, *s.* क्लीवता, कापुरुषत्वं, अपौरुषं, कातरता, भीरुता.

POLYANDROUS, POLYANDRIST, *s.* बहुभर्तृका, बहुपतिका, अनेकभर्तृका.

POLYANDRY, *s.* बहुभर्तृत्वं, बहुभर्तृधारणं, अनेकपतिधारणं.

POLYCHORD, *a.* बहुतन्त्री -न्त्रिणी -न्त्रि (न्), बहुतन्तुः -न्तुः -न्तु, अनेकतन्त्री &c.

POLYGAMIST, *s.* (Practiser of polygamy) बहुभार्यः अनेकभार्यः, बहुपत्नीकः, दारी *m.* (न्), अनेकस्त्रीकः.—(Defender of it) बहुपत्नीवादी *m.* (न्).

POLYGAMY, *s.* बहुपत्नीत्वं, बहुभार्यत्वं -ता, अनेकभार्यता, सापत्न्यं.

POLYGENOUS, *a.* बहुविधः -धा -धं, अनेकविधः &c., बहुप्रकारः -रा -रं.

POLYGLOT, *a.* बहुभाषः -षा -षं, अनेकभाषः -षा -षं.

POLYGLOT, *s.* बहुभाषग्रन्थः, अनेकभाषग्रन्थः, बहुभाषपुस्तकं.

POLYGON, *s.* बहुकोणः -णा, बहुभुजः. बह्वस्रं -स्री, अनेकास्रं -स्री, बहुकोणाकृतिः *f.*, बह्वस्राकृतिः *f.*, बहुकोणा मूर्त्तिः.

POLYGONAL, POLYGONOUS, *a.* बहुकोणः -णा -णं, बहुभुजः -जा -जं, बह्वस्रः -स्रा -स्रं, अनेकास्रः -स्रा -स्रं.

POLYMATHY, *s.* बहुविद्याज्ञानं, अनेकविद्याज्ञानं, बहुशास्त्रज्ञानं.

POLYPETALOUS, *a.* बहुदलः -ला -लं, अनेकदलः &c., बहुदली -लिनी &c.

POLYPHAGOUS, *a.* बहुभक्षः -क्षा -क्षं, बहुखादकः -का -कं, बह्वाशी -शिनी &c.

POLYPHONOUS, *a.* बहुस्वरः -रा -रं, बहुस्वनः -ना -नं. बहुध्वनिः -निः -नि.

POLYPUS, *s.* बहुपादः, बहुपाद् *m.*, अनेकपाद्, बहुमूलः, अनेकमूलः,

POLYSPERMOUS, *a.* बहुबीजः -जा -जं, प्रचुरबीजः &c.. अनेकबीजः &c.

POLYSYLLABIC, *a.* बह्वक्षरः -रा -रं, अनेकाक्षरः &c., बह्वक्षरी -रिणी -रि (न्).

POLYSYLLABIC, *s.* बह्वक्षरं, बह्वक्षरशब्दः, अनेकाक्षरशब्दः.

POLYTHEISM, *s.* बहुदेवमतं. बहुदेववादः, अनेकदेवमतं. अनेकवादः.

POLYTHEIST, *s.* बहुदेवमतावलम्बी *m.* (न्), अनेकदेववादी *m.*, अनेकवादी *m.*

POMANDER, *s.* भाविनं, वासितं, वासितचूर्णं, सुगन्धिचूर्णं.

POMATUM, POMADE, *s.* विलेपनं, सुगन्धिलेपः, गात्रानुलेपनी, यक्षकर्दमः.

POMEGRANATE, *s.* (The tree) दाडिमः -मी, दाडिमः, दालिमः, डालिमः, करकः, रक्तबीजः, शुकवल्लभः, फलशाडवः, मणिबीजः, मधुबीजः, सत्फलः, कुचफलः, सुनीलः, पिण्डीरः, नीरसः.—(Its fruit) दाडिमं, दालिमं, दाडिमफलं.

POMMEL, *s.* (Knob) पिण्डः, गण्डः, गुल्मः, आभोगः.—(Of a saddle) पर्य्याणपिण्डः, पर्य्याणदहिःस्थपिण्डः, पर्य्याणगुल्मः.

To POMMEL, *v. a.* ताड् (c. 10. ताडयति -यितुं), वेत्राघातं कृ, दण्डाघातं कृ.

POMP, *s.* (Procession) यात्रा, यात्राप्रसङ्गः.—(Show) आडम्बरं, ऐश्वर्य्यं, शोभा, प्रतापः, अतिप्रतापः, अतिशोभा, दम्भार्थं शोभा or तेजस् *n.*, चमत्कारः, कौतुकं. *See* PARADE, PAGEANTRY.

POMPOUS, *a.* (Displaying pomp, showy) महाप्रतापः -पा -पं, अतिप्रतापी -पिनी -पि (न्), अतिशोभनः -ना -नं. आडम्बरी &c., कौतुकी &c.—(Ostentatious) दाम्भिकः -की -कं, दम्भी &c., दम्भार्थकः -का -कं, साटोपः -पा -पं, अतिगर्व्वितः -ता -तं, दर्पाध्मातः &c., गर्व्वितः &c., गर्व्वितवाक्यः -क्या -क्यं, विकत्थनः -ना -नं.

POMPOUSLY, *adv.* (Magnificently) अतिप्रतापेन, अतिशोभापूर्व्वं, आडम्बरं.—(Ostentatiously) दम्भार्थं, सदम्भं, दम्भपूर्व्वं, सगर्व्वं, गर्व्वितप्रकारेण, लोकदर्शनार्थं, विकत्थनपूर्व्वं, साटोपं.

POMPOUSNESS, *s.* (Magnificence) ऐश्वर्य्यं, सप्रतापत्वं. *See* POMP.—(Ostentatiousness) दम्भः, दाम्भिकत्वं, साटोपत्वं, गर्व्वितत्वं, विकत्था, दर्पाध्मातता.

POND, *s.* तडागः, जलाशयः, जलाधारः, सरस् *n.*, ह्रदः, खातं, सरोवरः -रं, क्रीडासरोवरः, वापी -पिः *f.*, कासारः, पुष्करिणी, सरसी, पद्माकरः, मीनगोधिका; 'a natural pond,' अखातं, देवखातकं; 'an oblong pond,' दीर्घिका.

To PONDER, *v. a.* and *n.* मनसा विचर् (c. 10. -चारयति -यितुं) or विगण् (c. 10. -गणयति -यितुं), चिन्त् (c. 10. चिन्तयति -यितुं), विचिन्त्, सञ्चिन्त्, ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, अभिध्यै, सन्ध्यै, भू (c. 10 भावयति -यितुं), विभू, सम्भू, विमृश् (c. 6. मृशति -ष्टुं), परिमृश्, वितर्क् (c. 10. -तर्कयति -यितुं), अनुतर्क्.

PONDERABLE, *a.* (That may be weighed) तुलायोग्यः -ग्या -ग्यं तुलनीयः -या -यं.—(To be pondered) चिन्यः -न्या -न्यं, चिन्तनीयः -या -यं.

PONDERATION, *s.* (Act of weighing) तुलाधारणं.—(Act of pondering) सुविचारणं -णा, सुचिन्तनं, विगणनं -ना, सम्भावना.

PONDERED, *p. p* चिन्तितः -ता -तं, सुविचारितः &c. विगणितः &c., सुचिन्तितः &c.

PONDEROSITY *s.* भारित्वं, सभारत्वं, अतिभारित्वं, गुरुता, अतिगुरुता -त्वं, गरिमा *m.* (न्), भारवत्त्वं.

PONDEROUS, *a.* भारी -रिणी -रि (न्), अतिभारी &c.. सभारः -रा -रं, भारवान् -वती -वत् (त्). गुरुः -रुः -वी -रु, अतिगुरुः &c.

PONDEROUSLY, *adv.* अतिभारेण, सुभारेण, सभारं, सगौरवं, अतिगुरु.

PONIARD, *s.* कट्टारः, कृपाणी, शङ्कुः *m.*, छुरिका, असिपुत्रिका, कत्तरी.

To PONIARD, *v. a.* कट्टारेण व्यध् (c. 4. विध्यति, व्यद्धुं), छुर् (c. 6. छुरति -रितुं).

PONTAGE, *s.* सेतुकरः, सेतुशुल्कः -ल्कं, सेतुदेयं.

PONTIFF, *s.* प्रधानधर्म्माध्यक्षः, प्रधानधर्म्माधिकारी *m.* (न्), मुख्यधर्म्माध्यक्षः महाधर्म्माध्यक्षः, महाधर्म्माधिकारी *m.* (न्), प्रधानयाजकः, मुख्यपुरोहितः महायाजकः.

PONTIFICAL, *a.* प्रधानधर्म्माध्यक्षसम्बन्धी -न्धिनी &c., प्रधानयाजकीयः -या -यं.

PONTIFICATE, *s.* प्रधानधर्म्माध्यक्षस्य पद or स्थानधिकारः, धर्म्माध्यक्षता -त्वं.

PONTOON, *s,* सेतुबन्धने प्रयुक्तम् तरालुः or तरान्युः; 'bridge,' तरालुबद्धसेतुः.

PONY, *s.* क्षुद्रघोटकः, क्षुद्राश्वः, क्षुद्रशरीरी घोटकः or अश्वः.

POOL *s.* तडागः, जलाशयः, जलाधारः, पल्वलं, कुण्डं, सरस् *n.*, ह्रदः, कासारः, पुष्करिणी, निपानं, परिवापः, कूपं.

POOP, *s.* नावः पश्चिमभागः or पश्चाद्भागः, नौपृष्ठं, नौकापृष्ठ.

POOR, *a.* (Destitute of money or property) दरिद्रः -द्रा -द्रं, निर्धनः -ना -नं, अधनः -ना -नं, धनहीनः &c., अल्पधनः &c., निर्धनकः -का -कं, क्षीणधनः -ना -नं, धनशून्यः -न्या -न्यं, दीनः -ना -नं, अर्थहीनः &c., वित्तहीनः &c., द्रव्यहीनः &c., द्रव्यशून्यः &c., विभवहीनः &c., अल्पद्रव्यः -व्या -व्यं, निःस्वः -स्वा -स्वं, गतार्थः -र्था -र्थं, दुर्गतः -ता -तं, अनर्थः -र्था -र्थं, निष्किञ्चनः -ना -नं, निःकाञ्चनः &c., अकाञ्चनः &c., निष्किञ्चनः &c., दारिद्र्यग्रस्तः -स्ता -स्तं, दरिद्रितः -ता -तं, दरिद्रायकः -का -कं, दरिद्रिता -त्री -तृ (तृ), कृपणः -णा -णं, अधन्यः -न्या -न्यं, दुराढ्यः -ढ्या -ढ्यं, किंवान् -वती -वत् (त्); 'to be poor,' दरिद्रा (c. 2. दरिद्राति -द्रितुं), दरिद्रीभू.—(Paltry, mean, inferior) तुच्छः -च्छा -च्छं, कृपणः -णा -णं, कुत्सितः -ता -तं, गर्हितः &c., निर्गुणः -णा -णं, विगुणः &c., क्षुद्रकः -का -कं, अधमः -मा -मं, जघन्यः -न्या -न्यं, खलः -ला -लं, तृणप्रायः -या -यं, अनुत्तमः -मा -मं, or expressed by दुर्, कु, कल्प, पाश, देशीय in comp.; as 'a poor poet,' कुकविः *m.*, कविकल्पः &c.; 'a poor grammarian,' कुवैयाकरणः, वैयाकरणपाशः; 'poor fare,' कदन्नं.—(Wretched, pitiable) दीनः -ना -नं, कृपणः -णा -णं, दुर्बलः -ला -लं, अनुकम्प्यः -म्पा -म्प्यं, दुःखी -खिनी &c., दुःखान्वितः &c., वराकः -की -कं; 'poor wretch,' तपस्वी *m.* (न्), कृपणजनः.—(As soil) रूक्षः -क्षा -क्षं, ईरिणः -णा -णं.—(Word of endearment) प्रियः -या, दयितः -ता, वत्सः -त्सा.

POOR-HOUSE POOR-ASYLUM, *s.* धर्म्मशाला, दरिद्रशाला, दरिद्रालयः -यं, दरिद्राश्रयः, दरिद्रगृहं.

POORISH, *a.* (Somewhat indisposed) अस्वस्थः -स्था -स्थं, ईषदस्वस्थः &c., ईषद्रोगी -गिणी -गि (न्), असुस्थः -स्था -स्थं, ईषद्रोगार्त्तः -र्त्ता -र्त्तं.

POORLY, *adv.* (Without wealth, in indigence) दारिद्र्येण, सदारिद्र्यं, दरिद्रवत्, निर्धनवत्, कृपणं, दीनं, सदैन्यं, धनेन विना.—(With little success) असिद्धिपूर्व्वं, असिद्ध्या, सिद्धिं विना, फलं विना, निष्फलं.

POORNESS, *s.* (Want of money or property) दरिद्रता, दारिद्र्यं, दारिद्र्यं, निर्धनता -त्वं, अधनता, धनहीनता, धनशून्यता, दीनता, दैन्य, अर्थहीनता, वित्तहीनता. *See* POVERTY.—(Meanness, paltriness) तुच्छता, कृपणता, कार्पण्यं, निर्गुणता, खलता.—(Barrenness, unproductiveness) रूक्षता, शुष्कता -त्वं, निष्फलता, विफलता -त्वं, अफलदत्वं, अफलोत्पादकता.

POOR-SPIRITED, *a.* कृपणबुद्धिः -द्धिः -द्धि, दीनबुद्धिः &c., दीनमनस्कः -स्का -स्कं.

POP, *s.* (Sharp, sudden sound) स्फुत्कारः, स्फुत् indecl., आकस्मिकशब्दः, पट्शब्दः, क्षणितं, आकस्मिकध्वनिः *m.*, अकस्मात्क्षणितं.

To POP, *v. n.* (Enter suddenly) अकस्मात् प्रविश् (c. 6. -विशति -वेष्टुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्, आकस्मिकप्रवेशं कृ.—(Pop out) अकस्मात् or आकस्मिकध्वनिपूर्व्वं निर्गम् (c. 1. -गच्छति -गन्तुं) or निर्गतः -ता -तं भू; 'in and out,' गमनागमनं कृ.—(Make a sudden sound) स्फुत् शब्दं कृ, आकस्मिकध्वनिं कृ, अकस्मात् क्षण् (c. 1. क्षणति -णितुं) or ध्वन्, पट् शब्दं कृ.

To POP, *v. a.* (Cause to enter suddenly) अकस्मात् प्रवेशय् (c. 10. -वेशयति -यितुं) or निविश्, आकस्मिकध्वनिपूर्व्वं प्रविश्.—(Cause to issue suddenly, pop out) अकस्मात् निर्गम् (c. 10. -गमयति -यितुं) or निःसृ (c. 10. -सारयति -यितुं).

POP, *adv.* स्फुत्कारेण, स्फुत् शब्देन, अकस्मात्, आकस्मिकध्वनिपूर्व्वं.

POPE, *s.* रोमीयधर्म्माध्यक्षः, रोमीयधर्म्माधिपतिः *m.*, महाधर्म्माध्यक्षः.

POPINJAY, *s.* शुकः, कीरः. *See* PARROT.

POPISH, *a.* रोमीयधर्म्माध्यक्षसम्बन्धी &c., रोमीयधर्म्मसम्बन्धी &c.

POPLAR, *s.* दीर्घवृक्षः, दीर्घतरुः *m.*, दीर्घपादपः, दीर्घद्रुमः.

POPPY, *s.* खस्खसः; 'its juice,' खस्खसरसः; 'seed,' लिक्षा, लिख्या.

POPULACE, *s* लोकाः, प्रजा, सामान्यलोकाः -काः *m. pl.*, साधारणलोकाः -काः *m. pl.*, प्राकृतलोकाः, प्राकृतजनाः *m. pl.*, अवरजनाः, अवरलोकाः *m. pl.*, अवरवर्णाः *m. pl.*

POPULAR, *a.* (Pertaining to the common people) लौकिकः -की -कं, साधारणलोकसम्बन्धी &c., सामान्यलोकसम्बन्धी &c., लोक or जन in comp.; 'courting popular favor,' लोकरञ्जनं, जनरञ्जनं, लोकानुरञ्जनं.—(Prevailing among the people, general) लौकिकः -की -कं, सार्व्वलौकिक &c., लोकसिद्धः -द्धा -द्धं, लोकप्रसिद्धः &c., लोकरूढः -ढा -ढं, रूढः &c., लोकसम्मतः -ता -तं लोकमतः &c., लोक or जन in comp.; 'popular usage or custom,' लोकव्यवहारः, जनव्यवहारः, लोकाचारः, जनाचारः, लौकिकाचारः, लोकमर्य्यादा, जनमर्य्यादा, जनरीतिः *f.*, लौकिकरीतिः *f.*, लोकरीतिः *f.*, लोकप्रवादः; 'popular rumour or report,' लोकप्रवादः, जनप्रवादः, लोकवादः, जनवादः, लोकवार्त्ता, जनवार्त्ता, जनश्रुतिः *f.*, जनरवः, लोकवदन्ती, जनवदन्ती, 'popular story,' लोककथा, जनकथा, 'popular accusation,' जनापवादः; 'odium,' जनविद्वेषः; 'tumult,' प्रकृतिक्षोभः; 'apprehension or acceptation,' लोकग्रहः; 'conforming to popular opinion,' लोकानुसरणं, लौकिकानुसरणं, गतानुगमनं; 'one who does so,' लोकानुसारी *m.* (न्), गतानुगतिकः.—(Suitable to common people) सामान्यलोकयोग्यः -ग्या -ग्यं, सामान्यलोकोपयोगी -गिनी -गि (न्), सर्व्वलोकयोग्यः &c., साधारणः -णी -णं.—(Pleasing to the people, enjoying the favor of people) लोकप्रियः -या -यं, सर्व्वलोकप्रियः &c., जनप्रियः &c., लोकानुकूलः -ला -लं, श्लोकग्राह्यः -ह्या -ह्यं, सर्व्वप्रियः &c., सकलप्रियः &c.

POPULARITY, *s.* लोकप्रीतिः *f.*, जनप्रीतिः *f.*, लोकप्रियता, सर्व्वलोकप्रीतिः *f.*, लोकानुकूल्य, लोकानुकूलता, जनानुकूल्यं, जनानुकूलता, जनप्रियता, सर्व्वप्रियता, लोकानुरागः, जनानुरागः, लोकरञ्जनं, लोकसम्मानं, लोकग्राह्यता; 'desire of it,' लोकरञ्जनेच्छा, लोकानुरञ्जनैषा.

POPULARLY, *adv.* लोकतस् लोकयोग्यं, लौकिकप्रकारेण, लोकरञ्जनाय.

To POPULATE, *v. a* (People) सजनीकृ, सजनं -नां कृ, जनविशिष्टं -ष्टां कृ, वस् in caus.

To POPULATE, *v. n.* प्रजोत्पत्तिं कृ, प्रजोत्पादनं कृ, प्रजावृद्धिं कृ or जन्, प्रजन् (c. 4. -जायते -जनितुं), प्रजाम् उत्पद् (c. 10. -पादयति -यितुं).

POPULATION, *s.* प्रजा, प्रजासंख्या, जनसंख्या, लोकसंख्या, जनाः *m. pl.*, जनता, देशजनता, देशजनाः *m. pl.*, देशप्रजा, लोकः, देशलोकः.

POPULOUS, *a.* बहुप्रजः -जा -जं, बहुजनः -ना -नं, प्रचुरजनः &c., प्रचुरपुरुषः -षा -षं, प्रचुरप्रजः &c., जनसमाधः -धा -धं, प्रजाबहुलः -ला -लं, जनपदायुतः -ता -तं, वासितः -ता -तं.

POPULOUSNESS, *s.* बहुप्रजत्वं, प्रजाप्राचुर्य्यं, प्रजाबाहुल्यं, बहुजनत्वं, जनबाहुल्यं, लोकबाहुल्यं, पुरुषप्राचुर्य्यं, पुरुषबाहुल्यं.

PORCELAIN, *s.* कौलालकं, मृण्मयभाण्डानि *n. pl.*, मृद्भाण्डानि *n. pl.*, मार्त्तिकं.

PORCH, *s.* देहली -लिः *f.*, द्वारमण्डपः -पं, वातायनं, द्वारप्रकोष्ठकं, निष्काशः 'side seat of a portico,' मृगासनं; 'portico before a temple सभामण्डपः -पं.

PORCUPINE, *s.* शल्यकगृहः, शल्यः -ल्यकः, शलाका, शल्लकी *m.* (न्), आविद् *m.* (ध्), कण्टकागारः, सेधा; 'his quills,' शललं -ली, शलः -लं

PORE, *s.* (Of the skin) रोमकूपः, तनुकूपः, रोमरन्ध्रं, लोमरन्ध्रं, लोमकूपः, स्वेदद्वारं, स्वेदमार्गः.—(Small spiracle) सूक्ष्मरन्ध्रं.

To PORE, *v. n.* (Read books with fixed application) बद्धदृष्ट्या or स्थिरदृष्ट्या or अनिमिषनयनाभ्यां or अनन्यदृष्ट्या ग्रन्थान् अधी (c. 2. अधीते, अध्येतुं, rt. इ), अत्यभिनिवेशेन or अभिनिविष्टचेतसा or अनन्यमनसा ग्रन्थाध्ययनं कृ, अनन्यदृष्टिर् अध्ययनं कृ.

PORK, *s.* शूकरमांसं, सूकरमांसं, वराहमांसं, वाराहं, शौकरं.

PORKER, *s.* शूकरः, वराहः, पचनयोग्यः शूकरशावकः, क्षुद्रशूकरः.

POROUS, *a.* (Having interstices in the skin) रोमकूपयुक्तः -क्ता -क्तं रोमकूपविशिष्टः -ष्टा -ष्टं—रोमकूपमयः -यी -यं, सरोमकूपः -पा -पं.—(Having minute spiracles) सूक्ष्मरन्ध्रयुक्तः -क्ता -क्तं सूक्ष्मरन्ध्रपूर्णः -र्णा -र्णं, सूक्ष्मरन्ध्रावाशष्टः -ष्टा -ष्टं, सरन्ध्रः -न्ध्रा -न्ध्रं.—(Having interstices for exudation) विरलावयवकः -का -कं, शिथिलावयवकः &c., द्रावकावयवकः &c., स्वेदमार्गविशिष्टः -ष्टा -ष्टं.

POROUSNESS, POROSITY, *s.* सरोमकूपत्वं, रोमकूपपूर्णता, सूक्ष्मरन्ध्रपूर्णता बहुरन्ध्रपूर्णता, सूक्ष्मरन्ध्रबाहुल्यं, सरन्ध्रता, विरलावयवत्वं, शिथिलावयवत्वं द्रावकावयत्वं.

PORPOISE, *s.* शिशुकः, शिशुमारः, उलुपी *m.* (न्), चुलुकी *m.* (न्), असृक्कर्म्मी, असृक्कीडः, सीरकः, घाःकिटिः *m.*, जलशूकरः, वारिशूकरः, समुद्रीयशूकरः.

PORRIDGE, *s.* जूषं, यूषः -षं, जुष्कः, मन्थः, चूर्णधान्यमन्थः.

PORRINGER, *s.* जूषपात्रं, यूषपात्रं, पात्रं, भाजनं, भाण्डं.

PORT, *s.* (Harbour, haven) नौकाशयः, नौकाश्रयः, आशयः, आश्रयस्थानं, उत्तरणस्थानं, खातं, उत्तरणखातं, नौकोत्तरणयोग्यं खातं, नौबन्धनखातं, नौबन्धनयोग्यं खातं, नौरक्षणस्थानं; 'reaches the desired port,' इष्टस्थानं or इष्टदेशं गच्छति.—(Gate) द्वारं.

PORTABILITY, *s.* वाह्यता, सवाह्यता, सुवहनीयता, हस्तवाह्यत्वं, लघुता.

PORTABLE, *a.* सुवाह्यः -ह्या -ह्यं, वाह्यः &c., वहनीयः -या -यं, सुवहनीयः &c., सुखवाह्यः &c., अनायाभवाह्यः &c., सुखवहनीयः &c., हस्तवाह्यः &c., सहजवाह्यः &c., लघुः -घ्वी -घु.

PORTAL, *s.* द्वारं, द्वार् *f.*, उपद्वारं, प्रतीहारः, प्रवेशद्वारं, मुखं.

PORTCULLIS, *s.* नगरद्वारोपरिस्थो जङ्गमकपाटः तेन च शत्रोरागमनकाले पातितेन द्वारवर्त्म रुध्यते, द्वारवर्त्मरोधनयन्त्रं.

To PORTEND, *v. a.* अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्वं or पूर्वं दृश् (c. 10. दर्शयति -यितुं) or प्रदृश्, अनिष्टं सूच् or आविद् (c. 10. वेदयति -यितुं), पूर्वचिह्नं or पूर्वलक्षणं दा or पूर्वलक्षणेन भविष्यत् सूच् or अनिष्टसूचनं कृ or भाविव्यसनसूचनं कृ, भाविक्षयं or उत्पातं or विनिपातं शंस् (c. 1. शंसति -सितुं), कुलक्षणं दा.

PORTENT, *s.* (Omen) पूर्वलक्षणं, पूर्वचिह्नं, पूर्वलिङ्गं, शकुनं, भाविसूचकचिह्नं, भविष्यत्सूचकचिह्नं.—(Omen of ill, prodigy) उत्पातः, उपसर्गः, विनिपातः, व्यतीपातः, अद्भुतं, अरिष्टं, दुर्लक्षणं, अवलक्षणं, दुश्चिह्नं, अवचिह्नं, अपशकुनं, उपप्लवः, उपलिङ्गं, उपद्रवः, अत्याहितं, उपाकृतं अजन्यं, विनिहतः, अशुभलक्षणं, अनिष्टसूचकचिह्नं, भाविव्यसनसूचकं or भाविक्षयसूचकं चिह्नं, कुलक्षणं; 'ceremonies to avert portents,' अद्भुतशान्तिः *f.*

PORTENTOUS, *a.* उत्पातशंसी -सिनी -सि (न्), विनिपातशंसी &c., औत्पातिकः -की -कं, औपसर्गिकः -की -कं, अनिष्टशंसी &c., अनिष्टसूचकः -का -कं, अनिष्टावेदी &c., अशुभशंसी &c., अशुभसूचकः &c., भविष्यत्सूचकः &c., अभद्रसूचकः &c., अद्भुतशंसी &c., अद्भुतसूचकः &c., अद्भुतः -ता -तं, अत्याहितः &c., शाकुनः -नी -नं, शाकुनिकः -की -कं.

PORTENTOUSLY, *adv.* सोत्पातं, अद्भुतं, उत्पातपूर्वं, दुर्लक्षणेन, कुलक्षणेन

PORTER, *s.* (Gate-keeper) द्वारपालः, द्वारी *m.* (न्), द्वाररक्षकः, द्वाःस्थः द्वारस्थः, द्वाराध्यक्षः, दौवारिकः, द्वारिकः, प्रतिहारः, प्रतीहारः -री *f.* द्वाःस्थितः, द्वाःस्थितदर्शकः, दर्शकः.—(Carrier of burdens) भारवाह -हकः, भारवाही *m.* (न्), भारवाहिकः, भारिकः, भारी *m.* (न्), भारहरः भारहारी *m.*, भारहारकः, वोढा *m.* (ढृ).

PORTERAGE, *s.* (Cost of carriage) वहनमूल्यं, वाहनमूल्यं, भारवाहनमूल्यं.—(Business of a porter) भारवाहनं, भारिककर्म्म *n.* (न्)

PORTFOLIO, *s.* पत्राधारः, पृथुपत्राधारः, महापत्राधारः, वृहत्पत्राधारः.

PORTHOLE, *s.* नौपार्श्वच्छिद्रं, नौपार्श्वमुखं, नौपार्श्ववातायनं.

PORTICO, *s.* वरण्डः, द्वारप्रकोष्ठकं, बहिर्द्वारप्रकोष्ठकं, द्वारमण्डपः -पं, देहली -लिः *f.*, निष्काशः, वरण्डकः, वातायनं, पिण्डः, द्वारपिण्डः.

PORTION, *s.* (Part) अंशः, भागः, विभागः, खण्डः -ण्डकः, अवयवः, अङ्गं, भित्तं, छेदः, भित्तं, शकलः -लं.—(Portion allotted, share) विभागः, अंशः, भागः, भाजितं, भाज्यं, वण्टः -ण्टकः, उद्धारः.—(Share of an estate) ऋक्थांसः, ऋक्थभागः, रिक्थभागः, पैतृकरिक्थभागः, दायः, उद्धारः, औद्धारिकं.—(Wife's fortune) स्त्रीधनं, यौतकं, यौतुकं, युतकं, शुल्कः, औद्वाहिकं, अध्यावहनिकं कन्याधनं, परिवर्हं.

To PORTION, *v. a.* (Parcel out) विभज् (c. 1 -भजति -ते -भक्तुं), प्रविभज्, वण्ट् (c. 10. वण्टयति -यितुं), विभागशः or अंशांशि कृ or परिकृ or विन्यस्, अंश, अंशय्.—(Endow) यौतकं or शुल्कं or वृत्तिं दा, प्रतिष्ठां कृ, प्रतिष्ठा.

PORTIONABLE, *a.* विभाज्यः -ज्या -ज्यं, भाज्यः &c., वण्टनीयः &c., औद्धारिकः &c.

PORTIONED, *p. n.* (Divided out) विभक्तः -क्ता -क्तं, प्रविभक्तः &c., संविभक्तः &c., अंशितः -ता -तं, परिकल्पितः &c.—(Endowed) प्रतिष्ठितः -ता -तं, गृहीतशुल्कः -ल्का -ल्कं, गृहीतयौतकः &c.

PORTIONING, *s.* विभागः, विभाजनं, प्रविभागः, विभागकरणं, भाजनं, अंशनं, उद्धारविभागः, विभागकल्पना, वण्टनं.

PORTIONLESS, *a.* अनंशः -शा -शं, अंशहीनः -ना -नं, शुल्कहीनः -ना -नं.

PORTLINESS, *s.* उदरविस्तारः, कायविस्तारः, शरीरगौरवं, शरीरस्थूलता, स्थूलशरीरत्वं, स्थूलकायत्वं, शरीरवृहत्त्वं.

PORTLY, *a.* (Dignified in mien) गौरवशाली -लिनी -लि (न्), साटोपगामी &c., गौरवगतिः -तिः -ति, गौरववृत्तिः &c.—(Bulky, corpulent) विस्तीर्णोदरः -रा -रं, विस्तीर्णकायः -या -यं, पृथूदरः -रा -रं, स्थूलकायः &c., वृहत्कायः &c., स्थूलशरीरः &c.

PORTMANTEAU, *s.* चर्म्ममयं वस्त्रपात्रं or वस्त्रभाजनं, वस्त्राधारः.

PORTRAIT, *s.* प्रतिमा प्रतिमानं, उपमा, उपमानं, उपमितिः *f.*, प्रतिमूर्त्तिः *f.*, प्रतिकृतिः *f.*, चित्रलेखा, आलेख्यं, चित्राकृतिः *f.*, चित्रं, प्रतिच्छन्दः -न्दकं, प्रतिच्छाया, जीवितचित्रप्रतिमा.

PORTRAIT-PAINTER, *s.* उपमाता *m.* (तृ), चित्रलेखकः, चित्रकारः, चित्रकरः, चित्रलिक् *m.* (ख्), आलेख्यकृत् *m.*, उपमानकृत् *m.* प्रतिमानकृत् *m.*

PORTRAIT-PAINTING, *s.* चित्रलिखनं चित्रलेखनं, उपमानकरणं, रूपकरणं

To PORTRAY, *v. a.* (Paint) आलिख्, विलिख्, लिख्, चित्र्, वर्ण्, उपवर्ण्.—(Describe) वर्ण् अनुवर्ण्, उपवर्ण् निरूप्.

PORTRAYED, *p. p.* वर्णितः -ता -तं, आलिखितः &c., चित्रितः &c., चित्रगतः &c.

PORTRESS, PORTERESS, *a.* दौवारिकी, द्वारपालका, प्रतीहारी, द्वाररक्षकी -

To POSE, *v. a.* निरुत्तरीकृ, वाग्रोधं कृ, उत्तररोधं कृ, वाक्यरोधं कृ, प्रतिवाक्यरोधं कृ, वाक्यस्खलनं कृ, उपमर्दं कृ, बाध् (c. 1. बाधते -धितुं), मुह् (c. 10. मोहयति -यितुं), विमुह्, शल्यं कृ.

POSED, *p. p.* निरुत्तरः -रा -रं, निरुत्तरीकृतः -ता -तं, बाधितः -ता -तं

मोहितः -ता -तं, विमोहितः &c., कुण्ठितः &c., इतिकर्त्तव्यतामूढः -ढा -ढं.

Poser, *s.* उपमर्दकः, बाधकः, वाग्रोधकः, मोहकः, विमोहकः.

Position, *s.* (Situation) स्थानं, स्थितिः *f.*, अवस्थितिः *f.*, संस्थानं, पदं, आस्पदं, पदविः -वी *f.*—(Attitude) अङ्गस्थितिः *f.*, शरीरस्थितिः *f.*, आकारः; 'of the feet,' पदन्यासः, पादविन्यासः.—(Principle laid down, proposition advanced) पक्षः, प्रतिज्ञा, झक्किका, प्रमेयं, प्रतिज्ञेयं, प्रतिज्ञातं, भाषा, हेतुः *m.*, पूर्वपक्षः, उपन्यासः, अर्थः; 'false position,' हेत्वाभासः, पक्षाभासः, आभासः, मिथ्याहेतुः *m.*—(State, circumstances) अवस्था, स्थितिः *f.*, दशा, संस्थितिः *f.*, भावः, वृत्तिः *f.*, गतिः *f.*

Positive, *a.* (Explicit, express, direct) स्पष्टः -ष्टा -ष्टं, स्पष्टार्थः -र्था -र्थं, व्यक्तः -क्ता -क्तं, सुव्यक्तः &c., सुस्पष्टः &c., अवक्रः -क्रा -क्रं, अवक्रार्थः -र्था -र्थं, असन्दिग्धार्थः &c., अगूढः -ढा -ढं, अगर्भितः -ता -तं, प्रत्यक्षः -क्षा -क्षं.—(Peremptory, definite) नियतः -ता -तं, अवश्यकः -का -कं, आवश्यकः -की -कं, सुनियतः -ता -तं, निश्चितः &c., सुनिश्चितः &c., निर्णीतः &c., अवैकल्पिकः -की -कं, अविकल्पकः -का -कं, (Absolute, real, existing in fact) वास्तवः -वी -वं, वास्तविकः -की -कं, तथ्यः -थ्या -थ्यं, सत्यः -त्या -त्यं, यथार्थः -र्थी -र्थं, सन् सती सत् (त्), विद्यमानः -ना -नं, भूतः -ता -तं, तात्त्विकः -की -कं; 'positive charge,' तत्त्वाभियोगः.—(Settled by arbitrary appointment, not inbred) नियोगसिद्धः -द्धा -द्धं, नियोगप्रयुक्तः -क्ता -क्तं, नियोगहेतुकः -का -कं, अभावसिद्धः &c., अस्वाभाविकः -की -कं, अनैसर्गिकः -की -कं, असहजः -जा -जं, बहिर्जातः -ता -तं.—(Confident, sure) दृढनिश्चयः -या -यं, कृतनिश्चयः &c., जातनिश्चयः &c., निश्चितमनाः -नाः -नः (स्), निश्चितमनस्कः -स्का -स्कं, निश्चयी -यिनी -यि (न्), बद्धनिश्चयः -या -यं, दृढमतिः -तिः -ति, निःसंशयः -या -यं, निःसन्देहः -हा -हं.—(Confident in assertion) दार्ढ्येन स्वमतवादी &c., or स्वमताग्रही &c., मताग्रही &c., स्वमताभिमानी &c., मताभिमानी &c., दृढोक्तिः -क्तिः -क्ति, उक्तनिर्वाही &c., प्रोक्तनिर्वाही &c.

PRE-ENGAGED, *p. p.* पूर्वनियमबद्धः -द्धा -द्धं, पूर्वसङ्केतबद्धः &c., पूर्वनियमितः -ता -तं, पूर्वप्रतिज्ञातः &c., पूर्वसङ्केतितः &c.

PRE-ENGAGEMENT, *s.* पूर्वनियमः, पूर्वसङ्केतः, पूर्वप्रतिज्ञा, पूर्वसमयः.

PRE-EXAMINATION, *s.* पूर्वनिरूपणं, अग्रनिरूपणं, पूर्वविचारणं, पूर्वपरीक्षा.

To PRE-EXIST, *v. n.* अग्रे or अग्रतः or पूर्वं भू or वृत् or विद् or जीव्.

PRE-EXISTENCE, *s.* प्राग्भावः, पूर्वभावः, पूर्वभवः, पूर्वभूतिः *f.*, पूर्वजन्म *n.* (न्), पूर्वसत्त्वं, पूर्ववृत्तिः *f.*, प्राग्वृत्तिः *f.*, पूर्वदेहः, पूर्वजीवनं, पूर्वसत्ता, पूर्ववर्त्तनं.

PRE-EXISTENT, *a.* पूर्वभवः -वा -वं, पूर्वभूतः -ता -तं, पूर्वजीवी -विनी -वि (न्), पूर्ववर्त्ती &c., पूर्वदेहवान् -वती -वत् (त्).

PREFACE, *s.* प्रस्तावना -नं, प्रस्तावः, आभासः, परिभाषा, उपोद्घातः, उपन्यासः, वाङ्मुखं, प्रकरणं, प्रारम्भः, प्रारम्भोक्तिः *f.*, आरम्भोक्तिः *f.*, उपक्रमोक्तिः *f.*, सूची.

To PREFACE, *v. a.* प्रस्तावनां कृ or लिख् (c. 6. लिखति, लेखितुं), प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं), प्रब्रू (c. 2. -ब्रवीति -वक्तुं), अग्रतः or पूर्वतो ब्रू or वद् or वच् or भाष्, वाक्यारम्भं कृ, परिभाषां कृ, सप्रस्तावनं -नां कृ.

PREFATORY, *a.* पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं, आभाषिकः &c., उपोद्घातरूपः -पा -पं, आरम्भकः &c.

PREFECT, *s.* पुराध्यक्षः, पुराधिपतिः *m.*, नगराध्यक्षः, नगराधिष्ठाता *m.* (तृ), अधिष्ठाता *m.*, अधिपतिः *m.*, नगराधिकारी *m.*

PREFECTURE, *s.* पुराध्यक्षता, नगराध्यक्षता, अध्यक्षता, अधिष्ठातृत्वं.

To PREFER, *v. a.* (Esteem more, value more, have greater liking for) अधिकं मन् (c. 4. मन्यते, मन्तुं, c. 10. मानयति -यितुं) or प्रशंस् (c. 1. -शंसति -सितुं), अधिकं रुच् (c. 10. रोचयति -यितुं, c. 1. रोचते -चितुं) or अनुरुच् or अभिरुच् or इष् with abl., अधिकानुरागं कृ, अधिकानुरक्तः -क्ता -क्तं भू, अधिकाभिमतः -ता -तं भू: The construction of the sentence will vary as the Sanskrit verb may have an active or neuter sense; thus, 'I prefer this to that,' इतत् तस्मान् मह्यम् अधिकं रोचते, इतत् तस्माद् अधिकं रोचयामि or इच्छामि or प्रशंसामि, or मया अधिकं प्रशस्यते or मया अधिकम् अनुमतं or मम अधिकम् अभिमतं. The adverb वरं or the root शिष् with वि may be used to express the sense of 'prefer'; thus, 'I prefer death to poverty,' वरं मृत्युर् न च दारिद्र्यं (*i. e.* 'better death and not poverty'); 'I prefer death to dishonour,' अपमानात् प्राणत्यागो विशिष्यते.—(Choose before) पूर्वं वृ (c. 5. वृणोति -णुते, c. 9. वृणाति -णीते, c. 1. वरति -रितुं, c. 10. वरयति -यितुं), पूर्वं or अग्रे ग्रह् (c. 9. गृह्णाति, ग्रहीतुं) or वावृत्, पुरोधा (c. 3. -दधाति -धातुं); 'I prefer retirement to all pleasures,' अपक्रमणं सर्वैकामैः or सर्वैकामेभ्यो वृणे.—(Exalt, promote to an office, &c.) पदं वृध् (c. 10. वर्धयति -यितुं) or संवृध्, श्रेष्ठपदे or उत्कृष्टपदे नियुज् or प्रतिपद्, पदवृद्धिं कृ, प्रतिपत्तिं दा, पुरस्कृ.—(Present, offer) सम् in caus., निविद् in caus., उपहृ, निवेदनं कृ, समर्पणं कृ.

PREFERABLE, *a.* (Worthy to be chsoen before, more desirable or excellent) वरं indec., वरीयान् -यसी -यः (स्), वरिष्ठः -ष्ठा -ष्ठं, वरणीयः -या -यं, पूर्ववरणीयः &c., अधिकवरणीयः &c., पूर्वग्राह्यः -ह्या -ह्यं, प्रथमग्राह्यः &c., अग्रग्राह्यः &c., श्रेयान् &c., श्रेष्ठः &c., गरीयान् &c., अधिकं प्रार्थनीयः -या -यं. The adverb वरं is usually followed by न च or न पुनर्; as, 'death is preferable to poverty,' वरं मृत्युर् न च दारिद्र्यं; 'death is preferable to intercourse with the base,' वरं प्राणत्यागो न पुनर् अधमानाम् उपगमः. *See* examples under *To* PREFER.

PREFERABLENESS, *s.* वरता -त्वं, पूर्वग्राह्यता, प्रथमग्राह्यता, श्रेष्ठता, श्रैष्ठ्यं, श्रेयस्त्वं, वरीयस्त्वं, गरीयस्त्वं.

PREFERABLY, *adv.* वरं, वरीयस्, श्रेयस्, गरीयस्, वरिष्ठं, श्रेष्ठं.

PREFERENCE, *s.* अधिकरुचिः *f.*, अधिकाभिरुचिः *f.*, पूर्वरुचिः *f.*, अग्ररुचिः *f.*, अधिकानुरागः, पूर्वानुरागः, अधिकमानं, अभिप्रेतं, वरता -त्वं, वरणं, वृतिः *f.*

PREFERMENT, *s.* (Advancement to a higher office) पदवृद्धिः *f.*, पदवर्धनं, स्थानवृद्धिः *f.*, प्रतिपत्तिः *f.*, वर्धनं, संवर्धनं -ना, प्रवर्धनं.—(Act of presenting) निवेदनं, समर्पणं.

PREFERRED, *p. p.* (Chosen before others) पूर्वगृहीतः -ता -तं, वृतः -ता -तं, पूर्ववृतः &c., मनोनीतः -ता -तं, पुरोहितः -ता -तं—(Advanced in rank) संवर्धितः -ता -तं, श्रेष्ठपदनियुक्तः -क्ता -क्तं, पुरस्कृतः &c.

PREFIGURATION, *s.* प्रतिरूपद्वारेण पूर्वप्रदर्शनं or पूर्वसूचनं, दृष्टान्तद्वारा प्राक्प्रदर्शनं, प्रतिरूपकद्वारेण अग्रप्रदर्शनं, सादृश्येन पूर्वदर्शनं, पूर्वलक्षणदर्शनं, पूर्वलक्षणकरणं.

PREFIGURATIVE, *a.* उद्बोधकः -का -कं, पूर्वप्रदर्शकः &c., पूर्वलाक्षणिकः -की -कं, लाक्षणिकः &c., बोधकः -का -कं, पूर्वसूचकः &c.

To PREFIGURE, *v. a.* प्रतिरूपद्वारेण पूर्वं प्रदृश् (c. 10. -दर्शयति -यितुं) or पूर्वतो दृश् or अग्रे प्रदृश्, दृष्टान्तद्वारा पूर्वं प्रदृश् or सूच् (c. 10. सूचयति -यितुं), प्रतिरूपकं दा or कृ, प्रतिविंबं दा, पूर्वलक्षणं दा or दृश्.

PREFIGURED, *p. p.* प्रतिरूपकद्वारा पूर्वप्रदर्शितः -ता -तं or पूर्वसूचितः &c.

To PREFIX, *v. a.* (Put or place before) पुरस्कृ, पुरतस्कृ, अग्रतस्कृ, पुरोधा (c. 3. -दधाति -धातुं), अग्रे or पुरतः स्था in caus.—(In writing) अग्रे or अग्रतः or पुरतः or मुखे लिख्.—(Settle beforehand) अग्रे or पूर्वं निश्चि or निर्णी or निरूप् or प्रकूप् or नियुज्.

PREFIX, *s.* (In grammar, particle prefixed) उपसर्गः.

PREFIXED, *p. p.* (Put before) पुरस्कृतः -ता -तं, पुरतस्कृतः &c., पुरःकृतः &c., पुरोहितः &c., अग्रे स्थापितः &c.—(Settled before) पूर्वनिश्चितः -ता -तं, पूर्वनिरूपितः -ता -तं.

PREGNANCY, *s.* गर्भधारणं, गर्भिणीत्वं, गर्भिणीभावः, गर्भग्रहणं, सगर्भता, धृतगर्भता, पूर्णगर्भता, सञ्जातगर्भता, गर्भपोषणं, ससत्त्वता, आपन्नसत्त्वता, सगर्भावस्था, अन्तरापत्यता, गर्भः.

PREGNANT, *a.* (Being with young) गर्भिणी, गर्भवती, सगर्भा, धृतगर्भा, गर्भधारिणी, गृहीतगर्भा, पूर्णगर्भा, आपन्नगर्भा, सञ्जातगर्भा, प्ररूढगर्भा, ससत्त्वा, आपन्नसत्त्वा, अन्तर्वत्नी, उदरिणी, गुर्विणी, अन्तरापत्या, द्विहृदया; 'a pregnant woman longing for any thing,' दोहदवती, अद्रालुः *f.*; 'number of pregnant women,' गार्भिणं -ण्यं.—(Full of, abounding with) पूर्णः -र्णा -र्णं, सम्पूर्णः &c., गर्भः -र्भा -र्भं in comp., सङ्कुलः -ला -लं, आढ्यः -ढ्या -ढ्यं.—(Fruitful) सफलः -ला -लं, अवन्ध्यः -न्ध्या -न्ध्यं.

PREGUSTATION, *s.* पूर्वास्वादनं, पूर्वाश्वादनं, अग्रास्वादनं, पूर्वप्राशनं.

To PREJUDGE, PREJUDICATE, *v. a.* अग्रे or पूर्वं विचर् (c. 10. -चारयति -यितुं) or निर्णी (c. 1. -र्णयति -र्णेतुं) or निश्चि, पूर्वविचारं कृ, पूर्वविचारणं कृ, पूर्वनिर्णयं कृ, पूर्वनिश्चयं कृ, वृत्तान्तम् अनिरूप्य or अविचार्य्य निर्णयं कृ, अविचारपूर्वं निर्णयं कृ or निष्पत्तिं कृ, वृत्तान्तनिर्णयम् अकृत्वा निष्पत्तिं कृ, वृत्तान्तनिरूपणम् अकृत्वा निर्णयं कृ.

PREJUDGED, *p. p.* पूर्वविचारितः -ता -तं, पूर्वनिर्णीतः &c., पूर्वनिष्पन्नः -न्ना -न्नं.

PREJUDGMENT, *s.* पूर्वनिर्णयः, पूर्वविचारः -रणं, पूर्वनिष्पत्तिः *f.*, पूर्वनिश्चयः.

PREJUDICE, *s.* (Decision or opinion formed without due examination) अविचारपूर्वो निर्णयः, अनिरूपणपूर्वो निश्चयः, अपरीक्षापूर्वा बुद्धिः *f.*, अविचारपूर्विका मतिः *f.*, अविचारबुद्धिः *f.*, अविचारमतिः *f.*, अविचारितनिश्चयः, अविचारितनिर्णयः.—(Bias) दुराग्रहः, सङ्गः, मनोवक्रता, बुद्धिवक्रता, वक्रमतं, साचीकृतं, वक्रीकृतं, वक्रीभावः, आग्रहः, ग्रहः; 'free from prejudice,' मुक्तसङ्गः -ङ्गा -ङ्गं.—(Partiality for) पक्षपातः.—(Damage, detriment) क्षतिः *f.*, हानिः *f.*, अपचयः, अपायः, अपकारः, नाशः, हिंसा, क्षयः, बाधः, दूषणं, ध्वंसः.

To PREJUDICE, *v. a.* (Bias) साचीकृ, वक्रीकृ, बुद्धिवक्रतां कृ or जन्, दुराग्रहं कृ, दुराकर्षणं कृ, आकृष्, आवृज् (c. 10. -वर्जयति -यितुं), दुरावर्जनं कृ, चित्ताकर्षणं कृ, चित्तावर्जनं कृ.—(Injure, damage)

क्षतिं कृ, अपकृ, हिंस्, क्षण्, दुष्, क्षि, नश्, बाध्.

PREJUDICED, *p. p.* (Biased) साचीकृतः -ता -तं, वक्रीकृतः &c., सङ्गी -ङ्गिनी -ङ्गि (न्), सङ्गयुक्तः -क्ता -क्तं, साचीकृतबुद्धिः -द्धिः -द्धि, वक्रीकृतबुद्धिः &c., साचीकृतमतिः -तिः -ति.—(Damaged) अपकृतः -ता -तं, प्राप्तहानिः -निः -नि.

PREJUDICIAL, *a.* अहितः -ता -तं, अपकारकः -का -कं, क्षतिजनकः &c., अहितकरः -रा -रं, हानिजनकः &c., हिंसकः &c., घातुकः &c. *See* INJURIOUS.

PREJUDICIALLY, *adv.* अहितं, सापकारं, सापायं, हिंसया, सक्षतं.

PREKNOWLEDGE, *s.* पूर्वज्ञानं, अग्रज्ञानं, पूर्वबोधः, अग्रबोधः.

PRELACY, PRELATE. *See* EPISCOPACY, BISHOP, &c.

PRELECTION, *s.* पाठः -ठनं, पठनं, अध्यायः. *See* LECTURE.

PRELECTOR, *s.* पाठकः, पाठकारी *m.* (न्). *See* LECTURER.

PRELIBATION, *s.* पूर्वभोगः, पूर्वभुक्तिः *f.*, पूर्वानुभवः, आदिभोगः. *See* FORETASTE.

PRELIMINARY, *a.* प्राथमिकः -की -कं, आरम्भकः -का -कं, प्रारम्भकः &c., पूर्वः -र्वी -र्वं, पौर्विकः -की -कं, प्रथमः -मा -मं, पूर्वकर्त्तव्यः -व्या -व्यं, पूर्वकरणीयः -या -यं, अग्रकर्त्तव्यः &c., अग्रकरणीयः -या -यं, आद्यः -द्या -द्यं, आदि in comp., आदिकः -का -कं, आदिस्थः -स्था -स्थं, आरम्भस्थः &c., उपक्रमस्थः &c.—(Prefatory) पारिभाषिकः -की -कं, प्रस्तावनारूपः -पा -पं.

PRELIMINARY, *s.* पूर्वविषयः, पूर्वाङ्गं, पूर्वकर्म्म *n.* (न्), आद्याङ्गं, पूर्वोपायः, आरम्भकर्म्म *n.*, प्रारम्भककर्म्म *n.*, उपकरणं.—(Preliminary remarks) परिभाषा, आभाषः. *See* PREFACE.

PRELUDE, *s.* (In music) पूर्वरङ्गः, पूर्ववादनं, आरम्भवाद्यं.—(Dramatic) प्रस्तावना -नं, प्रस्तावः, आमुखं.—(Something introductory) आरम्भः, प्रारम्भः, उपक्रमः, प्रकरणं.—(Forerunner, something indicatory) पूर्वलक्षणं, पूर्वसूचकं, पूर्वचिह्नं, पूर्वरूपं.

To PRELUDE, *v. a.* प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. स्तावयति -यितुं), प्रस्तावनां कृ, पूर्वरङ्गं कृ, आरभ् (c. 1. -रभते -रब्धुं), समारभ्, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रकृ, सम्यक्कृ.

PRELUDER, *s.* प्रस्तावनाकृत्, पूर्वरङ्गकारी *m.* (न्), पूर्ववादकः, आरम्भकः.

PRELUSIVE, PRELUSORY, *a.* आरम्भकः -का -कं, पूर्वसूचकः -का -कं.

PREMATURE, *a.* कालपूर्वपक्वः -क्वा -क्वं, प्राक्पूर्णकालात्पक्वः &c., अपूर्णकालः -ला -लं, अपूर्णकालिकः -का -कं, असम्पूर्णकालः &c., पूर्णकालपूर्वजः -जा -जं, अपूर्णकालजः -जा -जं, अकालपक्वः -क्वा -क्वं, अपक्वः &c., अपूर्णकालोत्पन्नः -न्ना -न्नं, अकालजः &c., अकालोत्पन्नः &c., अकालभवः -वा -वं, अकालिकः -की -कं, अप्राप्तकालः -ला -लं, असामयिकः -की -कं.—(Not waiting for the proper time) अकालसहः -हा -हं. *See* PRECIPITATE.

PREMATURELY, *adv.* प्राक्पूर्णकालात्, पूर्णकालात्पूर्वं, अपूर्णकाले, असम्पूर्णकाले, अकाले, असमये; 'prematurely born,' अपूर्णकालजः -जा -जं, अपूर्णकालोत्पन्नः -न्ना -न्नं, पूर्णकालपूर्वजातः -ता -तं; 'prematurely grey-haired,' युवपलितः -ता -तं; 'prematurely old,' युवजरन् -रती -रत् (त्), युवाजरन् &c.; 'prematurely bald,' युवखलतिः -तिः -ती -ति.

PREMATURENESS, PREMATURITY, *s.* कालपूर्वपक्वता, अपूर्णकालत्वं, अपूर्णकालिकत्वं -ता, अकालपक्वता, अकालोत्पत्तिः *f.*, अपूर्णकालोत्पत्तिः *f.*, अकालजत्वं, अकालिकत्वं.

To PREMEDITATE, *v. a.* पूर्वं or अग्रे चिन्त् or मनसा कॢप्, पूर्वकल्पनां कृ.

To PREMEDITATE, *v. n.* पूर्वं or अग्रे चिन्त् or ध्यै or विचर् or विमृश् or विगण्, पूर्वचिन्तां कृ, पूर्वविवेचनां कृ, पूर्वोपायं चिन्त्, पूर्वविचारणं कृ.

PREMEDITATED, *p. p.* or *a.* पूर्वकल्पितः -ता -तं, पूर्वचिन्तितः &c., पूर्वघटितः &c., बुद्धिपूर्वः -र्वा -र्वं, मतिपूर्वः &c., बुद्धिकृतः -ता -तं, पूर्वसङ्कल्पितः -ता -तं, साङ्कल्पिकः -की -कं, सङ्कल्पकृतः &c., पूर्वरचितः &c., पूर्वयोजितः &c.

PREMEDITATION, *s.* पूर्वकल्पना, पूर्वसङ्कल्पः, पूर्वपरिकल्पना, पूर्वघटना, पूर्वरचना, पूर्वयोजना, पूर्वानुसन्धानं, पूर्वचिन्ता -न्तनं, पूर्वविचारणा, पूर्वविवेचना.

PREMICES, *s. pl.* (First-fruits) नवान्नं, प्रथमफलं. *See* the word.

PREMIER, *a.* मुख्यः -ख्या -ख्यं, प्रमुखः -खा -खं, प्रधानः -ना -नं.

PREMIER, *s.* (Prime-minister) मुख्यमन्त्री *m.* (न्), प्रधानमन्त्री *m.*, प्रधानामात्यः, महामन्त्री *m.*, प्रधानसचिवः, मुख्यप्रधानः.

PREMIERSHIP, *s.* मुख्यमन्त्रिता -त्वं, प्रधानमन्त्रिता -त्वं.

To PREMISE, *v. a.* उपन्यस् (c. 4. -अस्यति -असितुं), पूर्वं or अग्रे or वाङ्मुखे कथ् (c. 10. कथयति -यितुं) or ब्रू (c. 2. ब्रवीति, वक्तुं) or वद् (c. 1. वदति -दितुं) प्रस्तावपूर्वं कथ् or व्याख्या (c. 2. -ख्याति -तुं), पूर्वव्याख्यां कृ, पूर्वकथनं कृ, प्राक्कथनं कृ, प्रस्तावपूर्वकथनं कृ, उपक्रम् (c. 1. -क्रमते -मितुं), प्रक्रम्, प्रस्तु (c. 2. -स्तौति -स्तुते, c. 10. -स्तावयति -यितुं).

PREMISE, *s.* (In logic) पक्षः, अवयवः, प्रतिज्ञा, उपन्यासः, साधनं; 'major premise,' गुर्ववयवः, गुरुपक्षः, पूर्वपक्षः, आद्यपक्षः, हेत्वादिपक्षः; 'minor premise,' लघ्ववयवः, उत्तरपक्षः.

PREMISED, *p. p.* उपन्यस्तः -स्ता -स्तं, पूर्वकथितः -ता -तं, प्रस्तावपूर्वकथितः &c., प्रस्तावपूर्वसूचितः &c., प्रस्तुतः -ता -तं, प्रक्रान्तः -न्ता -न्तं; 'having premised,' उपन्यस्य, प्रतिपाद्य.

PREMISES, *s. pl.* (In logic) *See* PREMISE.—(In law, house with its adjuncts) गृहवाटिकादि *n.*, गृहक्षेत्रादि *n.*, गृहादि *n.*

PREMIUM, *s.* पारितोषिकं, मूल्यं, फलं, लभ्यं, लाभः, अधिकमूल्यं, अतिरिक्तमूल्यं, मूल्यातिरिक्तपारितोषिकं.

To PREMONISH, *v. a.* (Forewarn) अग्रे or पूर्वं बुध् in caus. or प्रबुध् or प्रत्यादिश् or उपदिश् or ज्ञा in caus., पूर्वं सूच् (c. 10. सूचयति -यितुं), पूर्वसूचनं कृ, पूर्वलक्षणं दा, पूर्वरूपं दा.

PREMONISHED, *p. p.* पूर्वबोधितः -ता -तं, पूर्वोपदिष्टः -ष्टा -ष्टं, पूर्वसूचितः &c.

PREMONITION, PREMONISHMENT, *s.* पूर्वबोधः -धनं, पूर्वप्रबोधः, पूर्वसूचना -नं, पूर्वलक्षणं, पूर्वरूपं.

PREMONITORY, *a.* पूर्वसूचकः -का -कं, पूर्वबोधकः -का -कं, उद्बोधकः &c., पूर्वसूचनकारी -रिणी -रि (न्), पूर्वलक्षणदः -दा -दं, पूर्वलाक्षणिकः -की -कं, पूर्वज्ञापकः &c.

PRENOMEN, *s.* व्यक्तिनाम *n.* (न्), उपाधिः *m.*

PRENTICE, *s.* अन्तेवासी *m.* (न्), छात्रः, सङ्केतपत्रबद्धशिष्यः, शिष्यः.

PRENTICESHIP, *s.* अन्तेवासित्वं, अन्तवासित्वं, अन्तेवासिभावः, अन्तेवासित्वकालः.

PRE-OCCUPATION, PRE-OCCUPANCY, *s.* पूर्वभोगः, पूर्वभुक्तिः *f.*, पूर्वधारणं, पूर्वग्रहणं.

PRE-OCCUPIED, *p. p.* पूर्वगृहीतः -ता -तं, पूर्वाविष्टः -ष्टा -ष्टं, पूर्वभुक्तः -क्ता -क्तं.

To PRE-OCCUPY, *v. a.* पूर्वं or अग्रे धृ or ग्रह् or भुज्, पूर्वधारणं कृ.

To PRE-ORDAIN, *v. a.* अग्रे or पूर्वं विधा or कॢप् or प्रकॢप् or निर्दिश् or स्था in caus., पूर्वविधानं कृ, पूर्वविधिं कृ, पूर्वस्थापनां कृ.

PREPARATION, *s.* (Act of getting ready, providing or fitting for any purpose) सज्जनं -ना, सज्जीकरणं, सज्जकर्म्म *n.* (न्), साधनं, सिद्धीकरणं, आयोजनं, उपकल्पनं -ना, परिकल्पनं -ना, कल्पनं -ना,

पुरस्करणं, पुरस्कारः, संस्कारः, संस्करणं, रचनं -ना, विरचनं -ना, उपाकर्म्म *n.* (न्), सम्भारः, सम्भृतिः *f.*, सन्धानं, समवधानं, प्रतिविधानं, उद्योगः, प्रस्तुतीकरणं.—(State of preparation) सिद्धिः *f.*, सिद्धता -त्वं.—(Previous or preparative measure) उपायः, साधनोपायः, अभ्युपायः, साधनं.—(That which is prepared or compounded, a compound) योगः, रसायनं; 'a preparation of mercury,' रसगर्भं, रसपुष्पं.—(Of medicine or food) संस्कारः, पाकः, पचनं.—(Prepared food) पक्वान्नं, सिद्धान्नं.

PREPARATIVE, PREPARATORY, *a.* सिद्धिजनकः -का -कं, सिद्धिकारकः -का -कं, सिद्धताजनकः -का -कं, साधकः -का -कं, उपक्रमसाधकः &c., आरम्भसाधकः &c., सिद्धिसाधकः &c., उपक्रमसहायः -या -यं, आरम्भोपकारी -रिणी -रि (न्), उपक्रमोपकारी &c., उपकल्पकः &c., परिकल्पकः &c., आयोजनकारी &c., उपक्रमप्रवर्त्तकः &c., प्रस्तुतकारी &c., योग्यताजनकः &c., आरम्भकारी &c.

PREPARATIVE, *s.* उपक्रमसाधनं, आरम्भसाधनं, सिद्धिसाधनं, सिद्धिजनकविषयः, सिद्धिजनककर्म्म *n.* (न्), परिकर्म्म *n.*, सिद्धताजनकविषयः.

PREPARATIVELY, *adv.* आयोजनपूर्व्वं, उपक्रमसाधनार्थं, आरम्भसाधनार्थं.

To PREPARE, *v. a.* (Make ready, fit for any purpose) सज्जीकृ, उपकॢप् (c. 10. -कल्पयति -यितुं, c. 1. -कल्पते -ल्पितुं), परिकॢप्, प्रकॢप्, कॢप्, युज् (c. 10. योजयति -यितुं), आयुज्, समायुज्, सिद्धीकृ, प्रस्तुतीकृ, उपस्कृ, संस्कृ, पुरस्कृ, रच् (c. 10. रचयति -यितुं), विरच्, सम्भृ (c. 1. -भरति -भर्त्तुं), सज्ज् (c. 1. सज्जति -ज्जितुं), साध् (c. 10. साधयति -यितुं), प्रतिविधा (c. 3. -दधाति -धातुं), विधा, विनिमा (c. 2. -माति -तुं), योग्यं -ग्यां कृ, उपयुक्तं -क्तां कृ, कार्य्यक्षमं -मां कृ, कार्य्योपयुक्तं -क्तां कृ.—(Provide with all necessary articles) सोपकारद्रव्यैः समायुज्, उपयुक्तद्रव्याणि परिकॢप् or उपकॢप् or सम्प्रकॢप् or उपस्था in caus. (-स्थापयति -यितुं) or उपपद् (c. 10. -पादयति -यितुं) or विधा, सोपकारद्रव्ययुक्तं -क्तां कृ, उपयुक्तद्रव्यसाधनं कृ.—(Dress) रच्, विरच्, प्रसाध्, विन्यस्.—(Prepare food) अन्नं संस्कृ or सिद्धीकृ or पच् or सन्धा.

To PREPARE, *v. n.* (Make all things ready) उपयुक्तद्रव्याणि परिकॢप् or उपकॢप्, सोपकारद्रव्यसम्भारं कृ, द्रव्यसम्भारं कृ, उपकरणसम्भारं कृ, सज्जनं कृ, संस्कारं कृ.—(Make one's self ready, be ready) उद्यतः -ता -तं भू, समुद्यतः -ता -तं भू, अभ्युद्यतः -ता -तं भू, उद्युक्तः -क्ता -क्तं भू, प्रस्तुतः -ता -तं भू; 'he prepared to kill the child,' स बालं हन्तुम् उद्यतः.

PREPARED, *p. p.* or *a.* सज्जीकृतः -ता -तं, सज्जितः -ता -तं, सज्जः -ज्जा -ज्जं, प्रस्तुतः -ता -तं, उपकल्पितः &c., परिकल्पितः &c., कल्पितः &c., उपकॢप्तः -प्ता -प्तं, प्रकॢप्तः &c., सम्भृतः -ता -तं, सिद्धः -द्धा -द्धं, सम्प्रस्तुतः -ता -तं, पुरस्कृतः -ता -तं, उद्यतः -ता -तं, समुद्यतः &c., अभ्युद्यतः &c., उद्युक्तः -क्ता -क्तं, आयुक्तः &c., संस्कृतः &c., संस्कारितः &c., संहितः &c., सोपकारद्रव्ययुक्तः &c., उपपादितः -ता -तं, परिनिर्मितः &c.; 'to be prepared,' उद्यतः -ता -तं भू or अस्, उद्युक्तः &c. भू, सज्जीभू.

PREPAREDNESS, *s.* सिद्धता -त्वं, सिद्धिः *f.*, प्रस्तुतत्वं, उद्यतत्वं, उद्युक्तत्वं.

PREPARER, *s.* उपकल्पकः, परिकल्पकः, आयोजनकर्त्ता *m.* (र्त्तृ), सिद्धिकर्त्ता *m.*, साधकः, रचकः, विरचकः, संस्कर्त्ता *m.* (र्त्तृ).

PRE-PAYMENT, *s.* पूर्व्वशोधनं, पूर्व्वशुद्धिः *f.*, पूर्व्वसिद्धिः *f.*, पूर्व्वदानं.

PREPENSE, PREPENSED, *a.* *See* PREMEDITATED.—(Malice prepense) द्रोहचिन्ता -न्तनं, व्यापादः -दनं; 'with malice prepense,' द्रोहचिन्तापूर्व्वं, बुद्धिपूर्व्वं, मतिपूर्व्वं, कामतस्; 'without malice prepense,' अबुद्धिपूर्व्वकं, अमतिपूर्व्वकं, अकामात् -मतस्.

PREPONDERANCE, *s.* (Superiority of weight) भाराधिक्यं, भारातिरिक्तता, भारातिरेकः, अधिकभारः, अतिरिक्तभारः, गुरुतरभारः.—(Superiority of power or force) अधिकप्रभावः, प्रभावाधिक्यं, प्रधानता, प्राधान्यं, प्रभविष्णुता, प्रभावः, प्राबल्यं, प्रबलता, गौरवं, अधिकशक्तिः *f.*, बलाधिक्यं.

PREPONDERANT, *a.* अधिकभारी -रिणी -रि (न्), अतिरिक्तभारी &c., अतिभारी &c.

To PREPONDERATE, *v. n.* अधिकभारी -रिणी -रि भू or अस्, अतिरिक्तभारी &c. भू, अतिभारी &c. भू, गुरुतरभारी &c. भू, गुरुतरः -रा -रं भू, भारेण अतिरिच् in pass. (-रिच्यते) or वृध् (c. 1. वर्धते -र्धितुं), गौरवेण अतिरिच् or वृध्, प्रभावेण अतिरिच्, अधिकः -का -कं भू, अधिकप्रभावः &c. भू or अस्, अधिकशक्तिः -क्तिः -क्ति भू.

PREPOSITION, *s.* (In grammar) उपसर्गः, शब्दयोगी अव्ययशब्दः.

PREPOSITIONAL, PREPOSITIVE, *a.* औपसर्गिकः -की -कं, उपसर्गसम्बन्धी -न्धिनी &c.

To PREPOSSESS, *v. a.* (Pre-occupy). *See* the word.—(Bias in favor of) चित्तापकर्षणं, चित्तावर्जनं कृ, चित्तम् आकृष् or आवृज्.—(Bias against). *See To* PREJUDICE.

PREPOSSESSED, *p. p.* आकृष्टचित्तः -त्ता -त्तं, आकर्षितचित्तः &c., पूर्व्वाकर्षितः -ता -तं, प्रथमदर्शनादपि or दर्शनमात्राद् आकृष्टचित्तः &c., दृष्टमात्राद् एव आकृष्टचित्तः &c., सङ्गी -ङ्गिनी -ङ्गि (न्), ससङ्गः -ङ्गा -ङ्गं.

PREPOSSESSING, *a.* दर्शनमात्रात् or अवलोकनक्षणात् or प्रथमदर्शनात् चित्ताकर्षकः -का -कं, दृष्टमात्रचित्ताकर्षकः &c., चित्तापहारी -रिणी -रि (न्).

PREPOSSESSION, *s.* (Pre-occupation). *See* the word.—(Previous impression). *See* PRECONCEPTION.—(Inclination in favor of) चित्ताकर्षणं, सङ्गः, ग्रहः, आग्रहः, पक्षपातः.

PREPOSTEROUS, *a.* (Inverted in order) विपरीतः -ता -तं, विपरीतक्रमः -मा -मं, विपर्य्यस्तः &c. *See* INVERTED.—(Absurd) असङ्गतः -ता -तं, अयुक्तः -क्ता -क्तं, अनर्थकः -का -कं, युक्तिविरुद्धः -द्धा -द्धं, असम्बद्धः -द्धा -द्धं, अयुक्तिकः -का -कं, न्यायविरुद्धः &c., असमञ्जसः -सा -सं, अयथोचितः -ता -तं.

PREPOSTEROUSLY, *adv.* असङ्गतं, अयुक्तं, अयुक्तिपूर्व्वं, युक्तिविरुद्धं, विपरीतक्रमेण.

PREPOSTEROUSNESS, *s.* असङ्गतत्वं, अयुक्तता -त्वं, युक्तिविरुद्धता, अयुक्तिः *f.*, अनर्थकता, असम्बद्धता -त्वं, न्यायविरुद्धता, असामञ्जस्यं, वैपरीत्यं, क्रमविपर्य्यासः, विपरीतता.

PREPOTENCY, *s.* प्रभावाधिक्यं, बलाधिक्यं, प्रबलता. *See* PREDOMINANCE.

PREPUCE, *s.* लिङ्गाग्रत्वक् *f.* (च्), शिश्नाग्रत्वक् *f.*, लिङ्गाग्रचर्म्म *n.* (न्), अग्रत्वक् *f.*; 'frenum of the prepuce,' सेवनं, सीवनी.

PREREQUISITE, *a.* पूर्व्वाकांक्षितः -ता -तं, पूर्व्वाकाङ्क्षितः &c., पूर्व्वावश्यकः -का -कं.

PREREQUISITE, *s.* पूर्व्वावश्यकविषयः, पूर्व्वाकांक्षितविषयः, पूर्व्वावश्यकवस्तु *n.*

PREROGATIVE, *s.* विशेषाधिकारः, असाधारणाधिकारः, अद्वितीयाधिकारः, असामान्याधिकारः, विशेषशक्तिः *f.*, असाधारणशक्तिः *f.*, अद्वितीयक्षमता, विशेषसत्ता.

PRESAGE, *s.* पूर्व्वलक्षणं, पूर्व्वलिङ्गं, पूर्व्वचिह्नं, पूर्व्वसूचना, भविष्यत्सूचना.

To PRESAGE, *v. a.* पूर्व्वं or अग्रे सूच् (c. 10. सूचयति -यितुं), पूर्व्वलक्षणं दा or कृ, पूर्व्वचिह्नं दा, पूर्व्वसूचनं कृ, अग्रसूचनं कृ.

PRESCIENCE, *s.* पूर्व्वज्ञानं, अग्रज्ञानं, अग्रनिरूपणं, भविष्यज्ञानं, भाविज्ञानं, भविष्यज्ञानं, भविष्यदर्शनं, प्रवेक्षणं. *See* FOREKNOWLEDGE.

PRESCIENT, *a.* भविष्यज्ञानी -निनी -नि (न्), भाविज्ञानी &c., भविष्यदर्शी &c., भविष्यज्ञानी &c., भविष्यद्दर्शी &c., प्रवेक्ष्यन् -क्ष्यन्ती -क्ष्यत् (न्), प्रपश्यन् &c., अनागतदर्शी &c.

To PRESCRIBE, *v. a.* (Direct) निर्दिश् (c. 6. -दिशति -देष्टुं), आदिश्,

प्रदिश्, विनिर्दिश्, कूप्, प्रकूप्, विधा, संविधा, आज्ञा in caus., चुद्, प्रचुद्, शास्, प्रशास्, अनुशास्, सूच्, आज्ञां कृ, नियमं कृ, विधिं कृ.—(Direct medically) उपचारं कृ, औषधं विधा or निर्दिश्.

To PRESCRIBE, *v. n.* (Direct remedies) उपचारं कृ, औषधोपचारं कृ, औषधविधानं कृ, औषधविधिं कृ, औषधप्रयोगं कृ, भेषजप्रयोगं कृ, औषधनिर्देशं कृ.

PRESCRIBED, *p. p.* निर्दिष्टः -ष्टा -ष्टं, निदिष्टः -ष्टा -ष्टं, विहितः -ता -तं, नियमितः &c., चोदितः &c., प्रचोदितः &c., विधियुक्तः -क्ता -क्तं, विधिप्रोक्तः &c., उदितः -ता -तं, वैधिकः -की -कं, वैधः -धी -धं, वाचनिकः -की -कं, उद्दिष्टः -ष्टा -ष्टं, विधीयमानः -ना -नं.

PRESCRIBER, *s.* निर्देष्टा *m.* (ष्टृ), निर्देशकः, आदेष्टा *m.*, विधायी *m.* (न्), अनुशासकः.

PRESCRIPT, *s.* निर्देशः, आदेशः, विधिः *m.*, विधानं, आज्ञा. *See* COMMAND.

PRESCRIPTION, *s.* (Direction) निर्देशः, आदेशः, निदेशः, विधानं, विधिः *m.*, चोदनं -ना, प्रचोदनं, नियमः, शासनं, शास्तिः *f.*, अनुशासनं, प्रेरणा, वचनं.—(Recipe, prescribed medicine) उपचारलेखः, उपचारपत्रं, चिकित्सालेखः, चिकित्सापत्रं, औषधविधिः *m.*, औषधविधानं, उपचारविधिः *m.*—(Immemorial use) अनादिपरम्परा, चिरकालभोगः, चिरकालव्यवहारः, चिरकालीनव्यवहारः, चिरकालपरम्परा, प्राचीनव्यवहारः, प्राचीनभोगः, आचारः.

PRESCRIPTIVE, *a.* (Consisting in or acquired by immemorial use) अनादिपरम्पराप्राप्तः -प्ता -प्तं, अनादिपरम्परायातः -ता -तं, चिरकालभुक्तः -क्ता -क्तं, चिरकालव्यवहृतः -ता -तं, चिरकालव्यवहारितः &c., चिरकालभोगाश्रयी -यिणी -यि (न्), चिरव्यवहारसिद्धः -द्धा -द्धं, आचारिकः -की -कं, व्यवहारिकः &c.

PRESENCE, *s.* (As opposed to absence) प्रत्यक्षता, समक्षता, अभिमुख्यं, अभिमुखता -त्वं, सन्निधानं, सान्निध्यं, सन्निधिः *m.*, पारिमुख्यं, सम्मुखता -त्वं, विद्यमानता -त्वं, वर्त्तमानता, अन्तिकं -कता -त्वं, अपरोक्षता, उपस्थानं, उपस्थितिः *f.*; 'in my presence,' मत्सन्निधाने; 'in presence of,' प्रत्यक्षे -क्षतस्, समक्षं -क्षे, साक्षात्, अग्रे, सम्मुखं -खे, प्रतिमुखं, अभितस्; 'into the presence of,' सकाशं, समीपं, अन्तिकं, साक्षात्; 'they took him into the presence of the magistrate,' धर्म्माधिकारिसमीपं तम् आनीतवन्तः; 'into the presence of her husband,' भर्त्तुः सकाशं or समीपं; 'into my presence,' मत्सकाशं, ममान्तिकं.—(Mien, personal appearance) आकारः, आकृतिः *f.*, रूपं, शरीररूपं, शरीराकारः, शरीरसंस्थानं.—(Presence of mind) चित्तप्रभाप्तिः *f.*, अव्यग्रचित्तत्वं, अव्यग्रता, अभ्रान्तचित्तत्वं, स्वस्थचित्तत्वं, स्थिरचित्तता -त्वं, असम्भ्रमः, अव्यस्तता, अव्याकुलता, सावधानता, चित्तसत्त्वं, सत्त्वं, अस्तब्धता; 'having presence of mind,' अव्यग्रचित्तः -त्ता -त्तं, तत्कालधीः -धीः -धि. *See* PRESENT.

PRESENCE-CHAMBER, *s.* दर्शनशाला, दर्शनगृहं, राजदर्शनशालां.

PRESENT, *a.* (Not absent) प्रत्यक्षः -क्षा -क्षं, विद्यमानः -ना -नं, वर्त्तमानः -ना -नं, अभिमुखः -खा -खी -खं, पारिमुखिकः -की -कं, उपस्थायी -यिनी -यि (न्), उपस्थितः -ता -तं, सन्निहितः -ता -तं, अपरोक्षः -क्षा -क्षं, सम्मुखः -खा -खं, सम्मुखीनः -ना -नं, सन्निधिस्थः -स्था -स्थं, अभिमुखस्थः &c., अन्तिकः -का -कं, समीपः -पा -पं; 'to be present,' उपस्था, वृत्, समास्.—(Now in view or under consideration) प्रस्तुतः -ता -तं, विद्यमानः -ना -नं, उपस्थितः -ता -तं, प्रकृतः -ता -तं; 'present matter,' प्रस्तुतविषयः.—(Now existing, not past or future) वर्त्तमानः -ना -नं, तात्कालिकः -की -कं, तत्क्षणिकः -का -की -कं, सद्यस्कालीनः -ना -नं, सद्यस्कः -स्का -स्कं, वर्त्तमानकालीनः -ना -नं, अधुनातनः -नी -नं, इदानीन्तनः -नी -नं, आधुनिकः -की -कं, साम्प्रतिकः -की -कं, प्रस्तुतकालीनः -ना -नं, अद्यतनः -नी -नं, ऐहिकः -की -कं, ऐहकालिकः &c., अनपेतः -ता -तं; 'present time,' वर्त्तमानकालः, तत्कालः, तत्क्षणः -णं, सद्यस्कालः, तदात्वं, इहकालः, साम्प्रतकालः, इहसमयः, अस्ति indec. भवन्तिः *m.*; 'at the present time,' वर्त्तमानकाले, तत्काले, तत्क्षणे, सद्यस्काले, इहकाले, इहसमये, इदानीं, अधुना, इह, अधुनातनकाले, सम्प्रति, साम्प्रतं, साम्प्रतकाले, एतर्हि, अद्य, प्रस्तुतकाले; 'for the present,' प्रस्तुतकालं, साम्प्रतकालं, इहकालं, साम्प्रतं.—(Present tense) वर्त्तमानं, विद्यमानं; 'the grammatical symbol is की.—(Having presence of mind) सावधानः -ना -नं, अभ्रान्तचित्तः -त्ता -त्तं, स्थिरचित्तः &c., अव्यग्रचित्तः &c., स्वस्थचित्तः &c., समाहितचित्तः &c., समाहितमनाः -नाः -नः (स्), सुसमाहितः -ता -तं, अव्याकुलचित्तः &c., तत्कालधीः -धीः -धि, अवहितः -ता -तं.

PRESENT, *s.* (Gift) दानं, प्रदानं, सम्प्रदानं, दत्तं, उपदा, उपदानकं, उपायनं, दक्षिणा, उपहारः -रकं, उपग्राह्यं, उपढौकनं, प्रीतिदानं, प्रदेशनं, प्रादेशनं, पारितोषिकं, प्राभृतं, वितरणं &c. *See* GIFT.—(The time being, the present) वर्त्तमानकालः, तत्कालः, तत्क्षणः, सद्यस्कालः, तदात्वं, साम्प्रतकालः, अधुनातनकालः, इदानीन्तनकालः, प्रस्तुतकालः, आपातः, भवन्तिः *m.*, अस्ति indec., प्रमुखं; 'present and future,' दृष्टादृष्टं.

To PRESENT, *v. a.* (Introduce to the presence of another) प्रविश् (c. 10. -वेशयति -यितुं), दर्शनं कृ in caus., दृश् in caus., पुरस्कृ, प्रवेशनं कृ, परसमीपं or परसकाशम् आनी.—(Present one's self or itself) आत्मानं दृश् in caus. (दर्शयति -यितुं), उपस्था (c. 1. -तिष्ठति -स्थातुं), प्रविश् (c. 6. -विशति -वेष्टुं), दर्शनं दा, प्रवेशं कृ, उपस्थितः -ता -तं भू, आविर्भू, प्रादुर्भू, दृश् in pass., लक्ष् in pass.—(Exhibit) दृश् in caus., प्रदृश्, प्रत्यक्षीकृ, प्रकटीकृ, प्रादुष्कृ, आविष्कृ, व्यक्तीकृ, सूच्, प्रकाश्, प्रसू in caus.—(Offer, present for acceptance) आहृ, उपाहृ, अभ्याहृ, उपहृ, समुपहृ, उपहारीकृ, प्रदा, अभिदा, सम्प्रदा, उपदा, दा, प्रयम्, ग्रह् in caus., प्रतिग्रह्, प्रतिपद् in caus., उपपद्, क्षु in caus., समृ, निविद् in caus., निक्षिप्, उपढौक्, ढौक्, उपस्था in caus., उपनिधा, उपहरणं कृ.—(Present an oblation) उपहृ, उपहारीकृ, निविद्, निवेदनं कृ, निर्वप्, निर्वपणं कृ, उत्सृज्, उत्सर्गं कृ, बलिदानं कृ, उपायनं कृ.—(Give) दा, प्रदा, उपदा, उपायनं कृ.—(Lay before) उपन्यस्, निविद्, क्षु in caus., समृ.

PRESENTABLE, *a.* (That may be introduced) प्रवेशनीयः -या -यं.—(That may be exhibited) दर्शनीयः -या -यं.—(That may be offered) देयः -या -यं, प्रदेयः -या -यं, उपहार्य्यः -र्य्या -र्य्यं, निवेदनीयः -या -यं.—(Admissible into society) सभ्यः -भ्या -भ्यं, सभायोग्यः -ग्या -ग्यं, पांक्तेयः -या -यं, पांक्त्यः -क्त्या -क्त्यं; 'not presentable,' असभ्यः &c., अपांक्तेयः &c., अपांक्तः &c., अपांक्त्यः &c.

PRESENTATION, *s.* उपहरणं, प्रतिपादनं, प्रतिपत्तिः *f.*, अर्पणं, समर्पणं, निवेदनं, प्रदानं, अभिवाद्यं.—(Of an oblation) बलिदानं, निर्वपणं, निर्वापणं, निर्वापः, उत्सर्गकरणं.—(To a benefice) धर्म्माध्यापकवृत्तिप्रतिपादनं, धर्म्मवृत्तिनियोजनाधिकारः.—(Bad presentation of the child at birth) मूढगर्भः.

PRESENTED, *p. p.* (Introduced to the presence of another) प्रवेशितः -ता -तं, पुरस्कृतः &c., परसमीपं or परसकाशं or परसाक्षाद् आनीतः -ता -तं.—(Exhibited) दर्शितः -ता -तं, प्रदर्शितः &c., प्रत्यक्षीकृतः &c., प्रसारितः &c.—(Presented for acceptance) उपहृतः

-ता -तं, समुपहृतः &c., प्रदत्तः -त्ता -त्तं, प्रत्तः &c., अर्पितः -ता -तं, समर्पितः &c., प्रतिपादितः &c., उपपादितः &c., उपनीतः &c., उपनिहितः &c., उपस्थापितः &c., ढौकितः &c., उपढौकितः &c.—(As an oblation, &c.) उपहृतः &c., उपहारीकृतः &c., निवापितः &c., निवेदितः &c., उत्सृष्टः -ष्टा -ष्टं, अर्पितः &c.—(Given) दत्तः -त्ता -त्तं, प्रदत्तः &c., नीतः &c., निहितः &c., निक्षिप्तः -प्ता -प्तं, विश्राणितः -ता -तं, वितीर्णः -र्णा -र्णं.—(Laid before) उपन्यस्तः -स्ता -स्तं, समर्पितः -ता -तं.

PRESENTIMENT, *s.* पूर्ववोधः, अग्रवोधः, पूर्ववासना, पूर्ववेदनं, अग्रवेदनं, पूर्वभावना, पूर्वकल्पना.

PRESENTLY, *adv.* (At present) तत्काले, तत्क्षणे, सद्यस्काले. *See* under PRESENT, *a.*—(Soon, in a short time) अनन्तरं, अचिरेण, अचिरात्, क्षणान्तरे, नचिरेण, नचिरात्, शीघ्रं, सद्यस्, आशु, झटिति, सपदि, द्राक्,—(Immediately) अनन्तरं.

PRESERVABLE, *a.* रक्षणीयः -या -यं, संरक्षणीयः &c., रक्ष्यः -क्ष्या -क्ष्यं, संरक्ष्यः &c., रक्षितव्यः -व्या -व्यं, गोपनीयः -या -यं, गोप्यः -प्या -प्यं, पालनीयः -या -यं, अवनीयः -या -यं.

PRESERVATION, *s.* रक्षणं, रक्षा, परिरक्षणं, अभिरक्षा -क्षणं, संरक्षा -क्षणं, संरक्षः, गुप्तिः *f.*, त्राणं, परित्राणं, पालनं, प्रतिपालनं, परिपालनं, गोपनं, संगोपनं, अवनं, तारणं, पोषणं, स्थितिः *f.*

PRESERVATIVE, *a.* रक्षकः -का -कं, संरक्षकः &c., रक्षी -क्षिणी -क्षि (न्), रक्षणकारी -रिणी -रि (न्), पालकः -का -कं, गोपकः -का -कं, गोपिलः -ला -लं, पौष्टिकः -की -कं, रक्षिता -त्री -तृ (तृ), तारकः -का -कं, रक्षणसाधकः -का -कं.

PRESERVATIVE, *s.* रक्षणं, रक्षणसाधनं, रक्षणोपायः, त्राणं in comp., त्राणसाधनं, त्रं in comp., गुप्तिसाधनं, पात्त्रं.

To PRESERVE, *v. a.* (Save from injury) रक्ष् (c. 1. रक्षति -क्षितुं), अभिरक्ष्, परिरक्ष्, संरक्ष्, प्रतिरक्ष्, त्रै (c. 1. त्रायते, त्रातुं), परित्रै, संत्रै, पाल् (c. 10. पालयति -यितुं), परिपाल्, अभिपाल्, प्रतिपाल्, अनुपाल्, सम्पाल्, उपपाल्, पा (c. 2. पाति -तुं), परिपा, गुप् (c. 1. गोपायति, गोतुं, c. 10. गोपयति -यितुं), अभिगुप्, अनुगुप्, प्रगुप्, तॄ in caus. (तारयति -यितुं), अव् (c. 1. अवति -वितुं), धृ (c. 10. धारयति -यितुं), पर्याप् in des. (परीप्सति -ते -प्सितुं), परिप्राप् in des., रक्षणं कृ, रक्षां कृ, पालनं कृ, गुप्तिं कृ, गोपनं कृ, अवनं कृ.—(Maintain) धृ, सन्धृ, भृ, सम्भृ, भरणं कृ, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ.—(Conserve, pickle) सन्धा, उपस्कृ, मिष्टीकृ.

PRESERVE, *s.* (Fruit preserved in sugar) मिष्टफलं, सन्धितफलं, सन्धितं.—(Place for the shelter of game) वीतंसः, वितंसः, जङ्गलपक्ष्यादिरक्षणस्थानं.

PRESERVED, *p. p.* रक्षितः -ता -तं, संरक्षितः &c., अभिरक्षितः &c., त्राणः -णा -णं, त्रातः -ता -तं, गुप्तः -प्ता -प्तं, गोपितः -ता -तं, संगोपितः &c., पालितः -ता -तं, प्रतिपालितः &c., परिपालितः &c., गोपायितः -ता -तं, तारितः &c., अवितः -ता -तं, धारितः &c., भृतः &c., पोषितः -ता -तं.—(Pickled) सन्धितः -ता -तं, उपस्कृतः &c.

PRESERVER, *s.* रक्षकः, रक्षी *m.* (न्), त्राता *m.* (तृ), पालकः, पालः, पालयिता *m.* (तृ), रक्षिता *m.* (तृ), संरक्षकः, गोप्ता *m.* (प्तृ), गोपकः, संगोपकः, गोपः, गोपी *m.* (न्), गुप्तकः, गोपिलः, गोपायकः, तारकः, रक्षणकारी *m.*, रक्षणकर्त्री *m.* (र्त्रृ), पालनकारी *m.*, पालनकृत् *m.*, पः in comp., गुप्तिकर्त्री *m.* (र्त्रृ), स्थितिकर्त्री *m.*

To PRESIDE, *v. a.* अधिष्ठा (c. 1. -तिष्ठति -ते -ष्ठातुं), समधिष्ठा, अध्यास् (c. 2. -आस्ते -आसितुं), अधीश् (c. 2. -ईष्टे -ईशितुं), अध्यक्षः -क्षा -क्षं भू or अस्, अधिकृतः -ता -तं भू, अधिकारी -रिणी -रि भू, अधिभू, प्रभू, अधिपतिर् भू or अस्.—(Exercise superintendence, watch over) अवेक्ष् (c. 1. -ईक्षते -क्षितुं), कार्य्यावेक्षणं कृ, कार्य्येक्षणं कृ, कार्य्यदर्शनं कृ, कार्य्याधीशो भू; 'the deity who presides over learning,' विद्याधिष्ठात्री देवता.

PRESIDED OVER, *p. p.* अधिष्ठितः -ता -तं, समधिष्ठितः &c., अध्यासितः &c., प्रभूतः &c.

PRESIDENCY, *s.* (Superintendence) अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः *f.*, अधिष्ठानं, अध्यासं. *See* the word.—(Office of a president) अधिष्ठातृत्वं -ता, अध्यक्षता, अध्यक्षपदं, अधिकारित्वं, अधीशता, आधिपत्यं, प्रभुता, उपद्रष्टृत्वं.—(Country under the jurisdiction of a president) अध्यक्षाधीनः प्रदेशः or देशः or विषयः, मण्डलं.

PRESIDENT, *s.* अध्यक्षः, अधिष्ठाता *m.* (तृ), अध्यासीनः, अधिकारी *m.* (न्), अधिकृतः, अधीशः, अधिपतिः *m.*, अधिपः, पतिः *m.*, प्रभुः *m.*, अधीश्वरः, कर्माध्यक्षः, श्रेष्ठी *m.* (न्), नायकः, प्रामाणिकः, उपद्रष्टा *m.*, मुख्यः, उदास्थितः; 'of an assembly,' सभापतिः *m.*, सभाध्यक्षः, सभानायकः, गोष्ठीपतिः *m.*

PRESIDENTSHIP, *s.* अध्यक्षता -त्वं, अधिष्ठातृत्वं, आधिपत्यं. *See* PRESIDENCY.

PRESIDING, *part.* or *a.* अध्यासीनः -ना -नं, अध्यक्षः -क्षा -क्षं, अधिष्ठाता -त्री -तृ (तृ); 'presiding deity,' अधिष्ठात्री देवता; 'the deity presiding over learning,' विद्याधिष्ठात्री देवता.

To PRESS, *v. a.* (Squeeze, compress) पीड् (c. 10. पीडयति -यितुं), सम्पीड्, निपीद्, अभिनिपीड्, आपीड्, संकुच्, संदृ, प्रतिसंदृ, घट्ट्, संघट्ट्, संवृ, संहन्.—(Urge, drive) प्रेर्, कृष्, आकृष्, समाकृष्, प्रणुद्.—(Urge, importune) अतिनिर्बन्धेन प्रार्थ् or अभ्यर्थ् or याच्, आग्रहेण प्रार्थ्, वारं वारं प्रार्थ्, पुनः पुनः प्रार्थ्, अतिप्रार्थनेन परम् उद्विज् or आयस् or आक्रम् or उपस्था.—(Inculcate urgently) अतिनिर्बन्धेन or मुहुर्मुहुर् उपदिश् or शिक्ष्.—(Force, constrain) बलेन or बलात्कारेण or बलात् कृ in caus. or प्रवृत् in caus., or expressed generally by the causal form.—(Distress, straiten) बाध् (c. 1. बाधते -धितुं), प्रबाध्, परिबाध्, अधिबाध्, पीड्, उपपीड्, अभिपीड्, क्लिश्, व्यथ्, तप्, सन्तप्, उद्विज् in caus., क्लेशं कृ or दा.—(Impress seamen) बलात्कारेण पुरुषान् धृत्वा नाविकादिकर्म्मणि व्याप् in caus.

To PRESS, *v. n.* (Go forward with force or effort) यत्नतस् or महायत्नेन or सोद्योगं or सोत्साहं प्रया or प्रगम् or अग्रे गम् or अग्रे सृ.—(Bear on, encroach upon) आक्रम्, अभिक्रम्, अध्याक्रम्, उपस्था (c. 1. -तिष्ठति -स्थातुं), समुपस्था, प्रत्युपस्था.—(Crowd, press upon) बाध् (c. 1. बाधते -धितुं), प्रबाध्.

PRESS, *s.* (Instrument for pressing) चक्रयन्त्रं, चक्रं, पीडनयन्त्रं, पेषणयन्त्रं; 'oil-press,' परञ्चः, तैलिकयन्त्रं, तैलिकचक्रं.—(For printing) मुद्राङ्कनयन्त्रं, मुद्राङ्कनचक्रं.—(Printed publications in general) मुद्रितपुस्तकगणः, मुद्राङ्कितपुस्तकसमूहः.—(Crowd, throng) जनसम्मर्दः, जनसङ्कुलं, लोकसंघः, लोकसम्मर्दः.—(Urgency, urgent pressure) बाधा -धः -धनं, निर्बन्धः, पीडा, भारः.

PRESSED, *p. p.* (Squeezed) पीडितः -ता -तं, निपीडितः &c., सम्पीडितः &c., घट्टितः &c., संघट्टितः &c.—(Urged) प्रेरितः -ता -तं.—(Importuned) अतिनिर्बन्धेन प्रार्थितः -ता -तं.—(Distressed, straitened) बाधितः -ता -तं, पीडितः &c., क्लेशितः &c.

PRESSER, *s.* पीडकः, पीडयिता *m.* (तृ), बाधकः, प्रबाधकः.

PRESSING, *a.* अतिप्रार्थकः -का -कं, निर्बन्धेन प्रार्थकः &c., अतियाचकः &c., निर्बन्धशीलः -ला -लं, बाधकः &c.

PRESSINGLY, *adv.* निर्बन्धेन, सनिर्बन्धं, आग्रहेण, साग्रहं, सबाधं.

PRESSURE, *s.* पीडा, पीडनं, निपीडनं.—(Force) शक्तिः *f.*, बलं, वेगः, भारः, प्रभावः.—(Impulse) प्रेरणा, प्रवर्त्तनं, प्रणोदः, प्ररोचनं, प्रोत्साहः.—(Distress) बाधः -धा -धनं, क्लेशः, पीडा, आकुलता.

PRESTIGE, *s.* मायाशक्तिः *f.*, माया, मोहनशक्तिः *f.*, आकर्षणशक्तिः, इन्द्रियजालं, इन्द्रजालं, वञ्चनशक्तिः *f.*, प्रतारणशक्तिः *f.*

PRESTIGIOUS, *a.* मायाकरः -रा -रं, मायावी -विनी -वि (न्), मायामयः -यी -यं, मायी &c., ऐन्द्रजालिकः -की -कं, मोही &c.

PRESTO, *adv.* द्रुतं, ओघः, शीघ्रं, क्षिप्रं, त्वरितं, सत्वरं, अविलम्बितं.

To PRESUME, *v. a.* अविचार्य्य or अविचारपूर्व्वं or अनिर्णीयपूर्व्वं or अनिश्चित्य or अनिश्चयपूर्व्वम् अनुमा (c. 2. -माति -तुं, c. 3. -मिमीते) or तर्क् (c. 10. तर्कयति -यितुं) or अनुतर्क् or अवगम् or ऊह् or अनुमानं कृ.

To PRESUME, *v. n.* (Venture without leave, be bold or arrogant) धृष् (c. 5. धृष्णोति, धर्षितुं), प्रधृष्, धृष्टत्वात् or प्रगल्भत्वात् किञ्चिद् अननुज्ञातः कृ, धृष्टत्वात् or प्रगल्भशीलत्वाद् अननुज्ञापूर्व्वं or अनधिकारपूर्व्वं किञ्चित् कृ, धर्षेण आक्रम् (c. 1. -क्रामति -क्रमितुं) or अतिक्रम्, मर्य्यादातिक्रमं कृ, प्रगल्भवद् आचर् (c. 1. -चरति -रितुं), धृष्टवत् or धार्ष्ट्यपूर्व्वं किञ्चित् कृ, प्रगल्भ् (c. 1. -गल्भते -ल्भितुं), दृप् (c. 4. दृप्यति -ते).

PRESUMPTION, *s.* (Supposition without direct proof) अनुमानं, अनुमितिः *f.*, अनुमा, अनुमेयत्वं, अनिर्णीयपूर्व्वम् or अनिश्चयपूर्व्वम् or असिद्धान्तपूर्व्वम् अनुमानं, अनिर्णीयपूर्व्वा कल्पना, तर्कः, अनुमानग्रहणं.—(Strong probability) सम्भावना, सम्भावनीयता -त्वं, सम्भवः, सत्यसद्भाशता -त्वं.—(Arrogance) धृष्टता, धार्ष्ट्यं, धर्षः, प्रगल्भता, प्रागल्भ्यं, दर्पः, अभिमानं, अत्यभिमानं, निर्लज्जत्वं, अहङ्कारः, अवलेपः, स्मयः, प्रगल्भत्वाद् मर्य्यादातिक्रमः or अत्याचारः -रित्वं.

PRESUMPTIVE, *a.* आनुमानिकः -की -कं, अनुमानसिद्धः -द्धा -द्धं, सम्भावितः -ता -तं, सम्भाव्यः -व्या -व्यं, सम्भावनीयः -या -यं, अनुमानावलम्बी -म्बिनी -म्बि (न्); 'presumptive proof or evidence,' अनुमानं, आनुमानिकप्रमाणं. अनुमाननिर्णीयः, अर्थापत्तिः *f.*; 'heir-presumptive,' सम्भावितस्थानाधिकारी *m.* (न्), सप्रतिबन्धस्थानाधिकारी *m.*, सलोपस्थानाधिकारी *m.*, उत्तराधिकारी *m.*

PRESUMPTUOUS, *a.* (Arrogant) धृष्टः -ष्टा -ष्टं, धृष्णुः -ष्णुः -ष्णु, प्रगल्भः -ल्भा -ल्भं, प्रधृष्टः &c., प्रधर्षितः -ता -तं, दृप्तः -प्ता -प्तं, अवलिप्तः -प्ता -प्तं, अभिमानी -निनी -नि (न्), अत्यभिमानी &c., साहसिकः -की -कं, धृष्णक् *m. f. n.* (ञ्), निर्लज्जः -ज्जा -ज्जं.—(Founded on presumption) अभिमानमूलः -ला -लं.

PRESUMPTUOUSLY, *adv.* सधर्षं, सधार्ष्ट्यं, धृष्टं, प्रधर्षितं, धृष्टवत्, सप्रागल्भ्यं, प्रागल्भ्येन, प्रगल्भं, प्रगल्भवत्, साभिमानं, अभिमानपुरःसरं.

PRESUMPTUOUSNESS, *s.* धार्ष्ट्यं, धृष्णुत्वं, धृष्टता, प्रगल्भता, प्रागल्भ्यं, प्रधृष्टता, दृप्तता, अवलिप्तता, अभिमानं, अत्यभिमानं, अभिमानिता, साहसिकत्वं.

To PRESUPPOSE, *v. a.* पूर्व्वं or अग्रे कॢप् or भू in caus., or सूच् (c. 10. सूचयति -यितुं), पूर्व्वसूचनं कृ, पूर्व्वकल्पनां कृ, पूर्व्वग्रहणं कृ, पूर्व्वभावनां कृ.

PRESUPPOSED, *p. p.* पूर्व्वकल्पितः -ता -तं, पूर्व्वभावितः &c., पूर्व्वगृहीतः &c.

PRESUPPOSITION, *s.* पूर्व्वकल्पना, पूर्व्वभावना, पूर्व्वग्रहणं, पूर्व्वमतं.

PRETENCE, *s.* (Pretext, feint) छद्म *n.* (न्), अपदेशः, व्यपदेशः, छलं, व्याजः, उपधा, कूटः -टं, कपटः, कैतवं, ध्वजीकरणं, मिषं.—(False plea) मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, हेतुः *m.*, निमित्तं; 'under pretence of studying the Shástras,' शास्त्राध्ययनहेतुना.—(Claim) अधिकारः, अभिमानं, अभियोगः; 'false claim' मिथ्याभिमानं, मिथ्याभियोगः.

To PRETEND, *v. a.* or *n.* (Sham, feign) छद्म कृ, कूटं कृ, व्याजं कृ, छलं कृ, कपटं कृ, ध्वजीकृ, छल् (c. 10. छलयति -यितुं), वेशं धृ (c. 10. धारयति -यितुं) or भृ, छद्मवेशं धृ. Often expressed by the root दृश् in caus., or by मिथ्या in comp.; as, 'he pretends to be asleep,' आत्मानं प्रसुप्तम् इव or प्रसुप्तवद् दर्शयति, मिथ्याप्रसुप्तो or मिथ्याप्रसुप्तो भवति; 'he pretends to be dead,' आत्मानं मृतवत् सन्दर्शयति; 'to pretend to be just,' साधुवेशं धृ, आर्य्यवेशं धृ, धर्म्मध्वजी -जिनी -जि भू, आर्य्यरूपः -पा -पं भू.—(Allege a false plea) मिथ्याहेतुं वद्, मिथ्यानिमित्तं वद्, मिथ्या वद्.—(Lay claim, pretend to) अभिमन् (c. 4. -मन्यते -मन्तुं), मिथ्या अभिमन्, मिथ्याभिमानं कृ, मिथ्या ग्रह्, अनधिकारपूर्व्वं ग्रह्, अभिप्रेतः -ता -तं भू; 'to pretend to learning,' विद्याभिमानं कृ, विद्याभिप्रेतः -ता -तं भू, विद्याभिमानी -निनी -नि भू. *See* PRETENDER, *s.*

PRETENDED, *p. p.* छाद्मिकः -की -कं, कौटिकः -की -कं, कौटः -टी -टं, सव्याजः -जा -जं, सछलः -ला -लं, ध्वजीकृतः -ता -तं, ध्वजी &c. in comp., छद्म or कपट or कूट or मिथ्या in comp.; as, 'a pretended ascetic,' तापसध्वजी *m.* (न्), छद्मतापसः, कूटतापसः; 'pretended services,' मिथ्योपचारः; 'pretended reason,' मिथ्याहेतुः *m.*, मिथ्यानिमित्तं.

PRETENDEDLY, *adv.* मिथ्या, सकपटं, सव्याजं, सकूटं, छलेन, छद्म or कपट in comp.; as, 'pretendedly asleep,' मिथ्याप्रसुप्तः -प्ता -प्तं; 'pretendedly religious,' कपटधर्म्मी &c.

PRETENDER, *s.* छाद्मिकः, सव्याजः, वेशधारी *m.* (न्), अभिमानी *m.* (न्), अभियोक्ता *m.* (क्तृ), अभियोगी *m.* (न्), ध्वजी *m.*, मन्य or मिथ्या in comp.; as, 'a pretender to learning,' विद्याभिमानी *m.*, विद्याभिप्रेतः, मिथ्यापण्डितः, पण्डितमन्यः, विद्याध्वजी *m.* (न्); 'pretender to virtue or religion,' कपटधर्म्मी *m.*, धर्म्मध्वजी *m.*, सव्याजधर्म्मी *m.*, धर्म्माभिमानी *m.*, साधुमन्यः आर्य्यवेशधारी *m.*, धार्म्मिकवेशधारी *m.*; 'to the sovereignty,' राज्याभियोगी *m.* (न्), राज्यस्वत्ववादी *m.*, राज्यलिप्सुः *m.*

PRETENSION, *s.* अभिमानं, अधिकारः, स्वत्ववादः, स्वाधिकारवादः, स्वामित्ववादः, स्वार्थवादः, अभियोगः; 'pretension to learning,' विद्याभिमानं; 'false pretension,' मिथ्याभिमानं, मिथ्याभियोगः.—(Desire of obtaining honor, power, fame, &c.) यशोलिप्सा, यशोलोभः, प्रभावाकांक्षा, प्रभावलिप्सा, प्रभुत्वलिप्सा, महत्त्वलिप्सा, महत्त्वाकांक्षा, प्रतिष्ठालिप्सा, जिगीषा; 'pretension to the sovereignty,' राज्यलिप्सा, राज्यस्वत्ववादः, राज्याभियोगः.

PRETER-IMPERFECT, *a.* (In grammar) अपूर्णभूतः -ता -तं.

PRETERIT, *a.* (In grammar) भूतः -ता -तं, परोक्षः -क्षा -क्षं; 'tense,' भूतं, परोक्षं, परोक्षभूतं.

PRETERITION, *s.* अतिक्रमः -मणं, अत्ययः, व्यतिक्रमः, अतिचारः, अतिचरणं.

PRETERMISSION, *s.* त्यागः, परित्यागः, अपासनं, उपात्ययः, लंघनं.

To PRETERMIT, *v. a.* (Omit) परित्यज्, त्यज्, अपास्, अतिक्रम्, व्युत्क्रम्.

PRETERMITTED, *p. p.* परित्यक्तः -क्ता -क्तं, अपासितः -ता -तं, अन्तरितः &c.

PRETERNATURAL, *a.* प्रकृतिक्रमवाह्यः -ह्या -ह्यं, प्रकृतिक्रमबहिर्भूतः -ता -तं, निसर्गक्रमवाह्यः &c., प्रकृतिनियमवाह्यः &c., निसर्गनियमवाह्यः &c., प्रकृतिक्रमातीतः -ता -तं, प्रकृतिमार्गातीतः &c., प्रकृतिमार्गवाह्यः &c., अतिप्रकृतिः -तिः -ति, अप्रकृतः -ता -तं, विलक्षणः -णा -णं, अद्भुतः -ता -तं, आश्चर्य्यः -र्य्या -र्य्यं.

PRETERNATURALLY, *adv.* प्रकृतिमार्गवहिस्, प्रकृतिक्रमवहिस्, अद्भुतं, वैलक्षण्येण.

PRETERPERFECT, *a.* (In grammar) पूर्णभूतः -ता -तं, परोक्षभूतः &c.

PRETERPLUPERFECT, *a.* (In grammar) प्राक्पूर्णभूतः -ता -तं.

PRETEXT, *s.* छद्म *n.* (न्), अपदेशः, व्यपदेशः, उपधा, व्याजः, छलं, उपदेशः, निमित्तं, ध्वजीकरणं, मिथ्याहेतुः *m.*, मिथ्यानिमित्तं, संवरणं.

PRETTILY, *adv.* चारु, सुन्दरं, सौन्दर्य्येण, मञ्जु, चारु or मञ्जु in comp.; 'singing prettily,' मञ्जुस्वनः -ना -नं; 'smiling prettily,' चारुहासी -सिनी -सि (न्).

PRETTINESS, *s.* चारुता -त्वं, सौन्दर्य्यं, सुरूपता, चारुरूपता, सुदृश्यता, दर्शनीयता, वामता -त्वं, विनीतता -त्वं, मञ्जुता -त्वं, रूपलावण्यं.

PRETTY, *a.* चारुः -ष्वी -रु, चारुदर्शनः -ना -नं, सुन्दरः -रा -री -रं, चारुमान् -मती -मत् (त्), सुदृश्यः -श्या -श्यं, सुरूपः -पी -पं, रूपवान् -वती -वत् (त्), चारुरूपः &c., सुरूपी -पिणी -पि (न्), सुरेखः -खा -खं, दर्शनीयः -या -यं, विनीतः -ता -तं, आकारशुद्धः -द्धा -द्धं, वामः -मा -मं, मञ्जुः -ञ्जुः -ञ्जु, मञ्जुलः -ला -लं; 'having a pretty face,' चारुवदनः -ना -नी -नं, सुमुखः -खा -खी -खं; 'having pretty eyes,' चारुलोचनः -ना -नी -नं, सुनयनः -ना -नी -नं; 'having pretty teeth,' सुदनः -ना -नं, चारुदनः &c.

PRETTY, *adv.* (Moderately, in some degree) ईषत्, कियत्, अल्पं, अल्पमात्रं, स्तोकं, अभृशं, परिमितं, आ prefixed, कल्प or देश्य or देशीय affixed; 'pretty warm,' ईषदुष्णः -ष्णा -ष्णं, मन्दोष्णः &c., 'pretty ripe,' आपक्वः -क्वा -क्वं; 'pretty clever,' पटुकल्पः -ल्पा -ल्पं, पटुदेश्यः -श्या -श्यं, पटुदेशीयः -या -यं.—(Pretty nearly) प्रायम्, प्रायशस्, भूयिष्ठं, ईषदूनं, अल्पोनं; 'pretty nearly finished,' समाप्तभूयिष्ठः -ष्ठा -ष्ठं; 'pretty nearly dead,' मृतप्रायः -या -यं.

To PREVAIL, *v. n.* (Overcome) प्रभू, अभिभू, पराभू, जि, पराजि, विजि, निर्जि, अतिक्रम्, अधिक्रम्, अतिशी.—(Be predominant, efficacious) अतिरिच् in pass. (-रिच्यते), व्यतिरिच्, उद्रिच्, प्रभू, प्रबलीभू, प्रबलः -ला -लं भू, प्रोथ् (c. 1. प्रोथति -थितुं), सबलः -ला -लं भू, क्षमः -मा -मं भू, अलन्तमः -मा -मं भू.—(Be in force) प्रभू, प्रबलीभू, प्रचलः -ला -लं भू, प्रचरितः -ता -तं भू, प्रचलीभू, सिद्धः -द्धा -द्धं भू, प्रसिद्धः -द्धा -द्धं भू, सिद्धीभू, प्रसिद्धीभू, निष्पन्नः -न्ना -न्नं भू.—(Succeed) सिध् (c. 4. सिध्यति -ते), सिद्धीभू.—(Persuade, induce) अनुनी, आकृष्, प्रोत्सह्, उत्सह्, प्रवृत् in caus., नियुज् in caus., प्रयुज् or expressed by the causal form. *See To* PERSUADE, &c.

PREVAILING, *part.* or *a.* (Predominant) प्रबलः -ला -लं, प्रभूतः -ता -तं, प्रसिद्धः -द्धा -द्धं, अतिरिक्तः -क्ता -क्तं, अतिरेकी -किणी &c., अधिकः -का -कं, प्रधानः -ना -नं भू, प्रचलः -ला -लं.—(Efficacious) प्रभावी &c., सप्रभावः -वा -वं, प्रभविष्णुः -ष्णुः -ष्णु, साधकः -का -धिका -कं, सफलः -ला -लं.—(General) साधारणः -णा -णी -णं, प्रसिद्धः -द्धा -द्धं, सर्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं. *See* PREVALENT.

PREVALENCE, PREVALENCY, *s.* प्रचारः, प्रचलत्वं, प्रसिद्धिः *f.*, प्रसिद्धता, प्रभावः, प्राबल्यं, प्रचरणं, प्रचलनं, प्रचलितत्वं, सर्वत्र व्याप्तिः *f.* or अभिव्याप्तिः *f.* or विस्तारः, व्यापकता -त्वं, प्रभूतता -त्वं, प्रबलता, प्रभविष्णुता, प्रवृत्तिः *f.*, प्रधानता, प्राधान्यं, प्राभवं, अतिरेकः, अतिरिक्तता, आधिक्यं, साधारण्यता, साधारण्यं, सर्वसाधारणव्यवहारः.

PREVALENT, *a.* प्रचलः -ला -लं, प्रचलितः -ता -तं, प्रचरितः -ता -तं, प्रसिद्धः -द्धा -द्धं, प्रभूतः -ता -तं, प्रबलः -ला -लं, प्रभविष्णुः -ष्णुः -ष्णु, प्रवृत्तः -त्ता -त्तं, व्यापकः -का -कं, साधारणः -ण्या -ण्यी -ण्यं; 'universally prevalent,' सर्वत्र प्रचलः &c. or प्रसिद्धः &c.

PREVALENTLY, *adv.* प्रसिद्धं, प्रचलं, प्राबल्येन, अतिरिक्तं, सप्रभावं.

To PREVARICATE, *v. n.* अर्थवैकल्यं कृ, वक्रोक्त्या सत्यवैकल्यं कृ or यथार्थवैकल्यं कृ, वक्रोक्तिं कृ, वक्रं वद् (c. 1. वदति -दितुं), वाक्छलं कृ, निह्नु (c. 2. -ह्नुते -ह्नोतुं), अपदिश् (c. 6. -दिशति -देष्टुं), व्यपदिश्, अपदेशं कृ, व्यपदेशं कृ, निह्नवेन वद्, अपदेशेन वद्, निह्नवोत्तरं कृ, हीनवादं कृ, अन्यवादं कृ, अपलापं कृ.

PREVARICATING, *a.* हीनवादी -दिनी -दि (न्), अन्यवादी &c., निह्नववादी &c., वक्रवादी &c., वक्रोक्तिवादी &c., व्यपदेशवादी &c.

PREVARICATION, *s.* वक्रोक्तिः *f.*, हीनवादः, वाक्छलं, अर्थवैकल्यं, यथार्थवैकल्यं, सत्यवैकल्यं, अन्यवादः, अन्यवचनं, हीनवचनं, निह्नुतिः *f.*, निह्नवोत्तरं, अपलापः, अपदेशः, व्यपदेशः, व्यपदेशवादः, छद्मवादः, उत्तराभासः.

PREVARICATOR, *s.* हीनवादी &c., निह्नववादी &c., अन्यवादी *See* PREVARICATING.

PREVENIENT, *a.* अग्रगः -गा -गं, अग्रवर्त्ती -र्त्तिनी -र्त्ति (न्), अग्रगामी &c., पृष्ठेसरः -रा -रं, अग्रसरः &c. *See* PRECEDENT, *a.*

To PREVENT, *v. a.* (Hinder) निवृ (c. 10. -वारयति -यितुं), विनिवृ, प्रतिवृ, आवृ, वृ, रुध्, प्रतिरुध्, निरुध्, संरुध्, अवरुध्, उपरुध्, प्रतिषिध्, निषिध्, बाध्, प्रतिबन्ध्, विहन्, व्याहन्, प्रतिहन्, स्तम्भ्, विष्टम्भ्, निवृत् (c. 10. -वर्त्तयति -यितुं), प्रत्याख्या (c. 2. -ख्याति -तुं), विघ्न, रोधं कृ, अवरोधं कृ, प्रतिबन्धं कृ, प्रतिकृ.—(Go before) अग्रे गम् or सृ, अग्रे या or वृत्. *See To* PRECEDE.

PREVENTABLE, *a.* निवारणीयः -या -यं, निवार्य्यः -र्य्या -र्य्यं, वारणीयः &c.

PREVENTED, *p. p.* निवारितः -ता -तं, वारितः &c., रुद्धः -द्धा -द्धं, निरुद्धः &c., विरुद्धः &c., अवरुद्धः &c., उपरुद्धः &c., प्रतिषिद्धः -द्धा -द्धं, निषिद्धः &c., बाधितः -ता -तं, प्रतिबद्धः -द्धा -द्धं, विहतः -ता -तं, व्याहतः &c., प्रतिहतः &c., विघ्नितः &c., स्तम्भितः &c., निवर्त्तितः &c., आप्रतिनिवृत्तः -त्ता -त्तं; 'prevented from seeing by the smoke,' धूमोपरुद्धदृष्टिः -ष्टिः -ष्टि.

PREVENTION, *s.* निवारणं, वारणं, निवारः, रोधः -धनं, अवरोधनं, निरोधः, प्रतिरोधः, उपरोधः, संरोधः, प्रतिबन्धः -न्धनं, प्रतिषेधः -धनं, निषेधः, विघातः, व्याघातः, प्रतीकारः. *See* HINDERANCE.—(Going before) अग्रगमनं, पुरोगमनं.

PREVENTIVE, *a.* वारकः -का -कं, निवारकः &c., बाधकः &c., प्रतिषेधकः &c., प्रतिबाधकः &c., रोधकः &c., प्रतिरोधकः &c., व्याघातकः &c.

PREVENTIVE, *s.* वारणं, निवारणं, बाधकः, प्रतिबन्धकं, निवारकं.

PREVIOUS, *a.* पूर्व्वः -र्व्वा -र्व्वी -र्व्वं, पौर्व्विकः -की -कं, पूर्व्वकः &c., पूर्व्वगतः -ता -तं, पूर्व्वभूतः -ता -तं, पूर्व्ववृत्तः -त्ता -त्तं, पूर्व्वसिद्धः -द्धा -द्धं, पूर्व्वजातः &c., भूतपूर्व्वः -र्व्वा -र्व्वं, पूर्व्वतनः -नी -नं, वृत्तपूर्व्वः &c., जातपूर्व्वः &c., प्रागागतः -ता -तं, प्राग्भूतः &c., प्राग्भवः -वा -वं, अग्रः -ग्रा -ग्रं, अग्रभूतः -ता -तं, प्रथमः -मा -मं, प्राक् in comp.; 'previous possession,' पूर्व्वभुक्तिः *f.*; 'previous existence,' प्राग्भावः.

PREVIOUSLY, *adv.* पूर्व्वं, पूर्व्वकं, पूर्व्वतस्, अग्रे, अग्रतस्, पुरस्, पुरस्तात्, प्राक्, प्रथमतस्; 'done previously,' पूर्व्वकृतः -ता -तं.

PREVIOUSNESS, *s.* पूर्व्वत्वं -ता, अग्रत्वं -ता, प्रथमता -त्वं, प्राथम्यं, आदित्वं.

PREVISION, *s.* पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, प्रदर्शनं, अग्रनिरूपणं.

PREY, *s.* (That which is seized to be devoured) आमिषं, मांसं, भक्ष्यं, भक्षणीयं, खाद्यं, भोज्यं.—(Booty) लोप्त्रं, लोत्रं, लोतं, लुप्तं, लुण्टा. *See* PLUNDER.—(Beast of prey) हिंस्रपशुः *m.*, पशुभक्षकः, पशूपजीवी *m.* (न्), आमिषाशी *m.*, आमिषभुक् *m.* (ज्), आमिषप्रियः, मांसाशी *m.*, मांसखादकपशुः *m.*, दंशेरः, ग्रसहः -हनः.—(Bird of prey) प्रतुदः, विष्किरः, नखविष्किरः बलिभुक् *m.* (ज्), बलिप्रियः.

To PREY, *v. a.* (Seize and devour) आमिषं धृत्वा or हृत्वा भक्ष् or खाद् or ग्रस्.—(Corrode) क्रमशः क्षि in caus. or नश् in caus.—(Prey upon) लुण्ट् or लुण्ठ्. *See To* PLUNDER.

PRIAPISM, *s.* ध्वजोच्छ्रायः, ध्वजोच्छ्रयः, शिश्नोच्छ्रयः, लिङ्गोच्छ्रायः.

PRICE, *s.* (Value set or paid) मूल्यं, अर्घः, अवक्रयः, वस्नः, भाटकः, पर्ण्यं, पणता; 'high price,' बहुमूल्यं, महामूल्यं, दुर्मूल्यं, महार्घः, माहार्घ्यं; 'low price,' अल्पमूल्यं, सुमूल्यं; 'what is the price?' कियता मूल्येन विक्रीयते; 'I will not give such a price,' एतावन् मूल्यं न दित्सामि.—(Reward, recompense) फलं, वेतनं.

PRICED, *a.* (High-priced) महामूल्यः -ल्या -ल्यं, दुर्मूल्यः &c., बहुमूल्यः &c., महार्घः -र्घा -र्घं, महार्ग्यः -र्ग्या -र्ग्यं.—(Low-priced) अल्पमूल्यः &c., अल्पार्घः -र्घा -र्घं, सुमूल्यः &c.

PRICELESS, *a.* अनर्ग्यः -र्ग्या -र्ग्यं, अनर्घः -र्घा -र्घं, अमूल्यः -ल्या -ल्यं.

To PRICK, *v. a.* (Puncture) व्यध् (*c.* 4. विध्यति, व्यद्धुं), तुद् (*c.* 6. तुदति, तोत्तुं), वितुद्, छिद्र् (*c.* 10. छिद्रयति -यितुं), भिद् (*c.* 7. भिनत्ति, भेत्तुं), निर्भिद्; 'with a thorn or sharp-pointed substance,' कण्टकेन or शल्येन व्यध् or वितुद्; 'with a needle,' सूच्या व्यध् or भिद्.—(Pain by puncture, sting) व्यध् (*c.* 10. व्यधयति -यितुं), पीड्, तप्, सन्तप्, मर्म्म व्यध्.—(Goad) प्रतोदेन तुद् or वितुद्.—(Incite) प्रेर्, प्रचुद्, प्रणुद्, उत्तिज्, प्रोत्सह्.—(Erect the ears) कर्णौ स्तब्धीकृ or उन्नम् or उच्छ्रि or उन्नी or उच्चीकृ; 'an animal that pricks its ears,' स्तब्धकर्णः -र्णी -र्णं, स्तब्धश्रोत्रः -त्रा -त्रं.—(Designate by a puncture) सूच्या अङ्क् or चिह्न्.

PRICK, *s.* (Puncture) वेधः -धनं, तोदः, सूचिः -ची *f.*, सूचनं -ना, व्यधः -धनं, उन्नुडितं.—(Instrument for pricking) तोदनं, प्रतोदः, तोत्रं, सूचिः -ची -चिनी -चिका, शल्यं, कण्टकः.—(Sharp pain) तोदः, शूलः -लं, व्यथा, यातना, तीक्ष्णव्यथा.

PRICKED, *p. p.* विद्धः -द्धा -द्धं, वेधितः -ता -तं, तोदितः -ता -तं, तुन्नः -न्ना -न्नं, छिद्रितः -ता -तं, भिन्नः -न्ना -न्नं, सशल्यः -ल्या -ल्यं, शल्यविद्धः &c., कण्टकविद्धः &c., सूचिभिन्नः &c.; 'at heart,' विद्धमर्म्मा -र्म्मा -र्म्म (न्), भिन्नमर्म्मा &c., विद्धहृदयः -या -यं.—(Pained) व्यथितः -ता -तं, अनुभूततीक्ष्णव्यथः -था -थं.

PRICKER, *s.* (Instrument for pricking) तोदनं, तोत्रं, प्रतोदः, सूचिः -ची *f.*, सूचिका, शल्यं.—(One who pricks) वेधकः.

PRICKING, *s.* (Act of piercing with a sharp point) वेधः -धनं, व्यधः -धनं, शल्यवेधनं, कण्टकवेधनं, तोदः -दनं, प्रतोदः -दनं, सूचिः -ची *f.*, सूचनं -ना.—(Sensation of sharp pain) तोदः, शूलः -लं, तीक्ष्णव्यथा.

PRICKLE, *s.* कण्टकः -कं, शूकः -कं, सूचिः -ची *f.*, त्वक्कण्टकः.

PRICKLINESS, *s.* कण्टकितत्वं, सकण्टकत्वं, सशूकत्वं, बहुकण्टकत्वं.

PRICKLY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः -का -कं, प्रचुरकण्टकः &c., शूकी &c., शूकवान् -वती -वत् (त्), सशूकः -का -कं, बहुशूकः &c.

PRICKLY-PEAR, *s.* विदरं, विश्वसारकं.

PRIDE, *s.* गर्व्वः, दर्पः, अहङ्कारः, अहङ्कृतिः *f.*, अभिमानं -नता, अभिमानिता, मानं, मानिता, उद्धतिः *f.*, औद्धत्यं, चित्तसमुन्नतिः *f.*, चित्तोन्नतिः *f.*, मदः, मादः, दृप्तता, अवलेपः, अवहेला -लनं, अहम्मानं, अहम्मतिः *f.*, ममता, दम्भः, म्भ्नुः *m.*, आत्माभिमानं, उन्मादः, आटोपः, साटोपत्वं, प्रतिभानं, प्रौढत्व, धर्षः, प्रगल्भता, उन्माथः, शौटीर्य्यं, शौण्डीरता, आवेशः, उत्सेकः, उत्सिक्तता; 'pride of caste,' जात्यभिमानं; 'of riches,' धनदर्पः; 'of strength,' बलदर्पः, बलावलेपः.—(Generous or proper pride) अभिमानं, गुणाभिमानं, स्वगुणाभिमानं.

To PROVISION, *v. a.* (Furnish with provisions) खाद्यद्रव्ययुक्तं -क्तां कृ, खाद्यद्रव्याणि सम्भृ or उपकॢप्, खाद्यद्रव्यसम्भारं कृ, अन्नसम्भारं कृ, खाद्यद्रव्यसम्भृतं -तां कृ.

PROVISIONAL, *a.* आपातिकः स्थापितः -ता -तं, आपाततो नियोजितः -ता -तं, सामयिकः -की -कं, प्रासङ्गिकः &c., समयोपयोगी -गिनी -गि (न्), समयानुरूपः -पा -पं, अल्पकालीनः -ना -नं.

PROVISIONALLY, *adv.* आपाततस्, यथासमयं, यथाप्रयोजनं, अल्पकालमात्रं.

PROVISIONARY, PROVISORY, *a.* *See* PROVISIONAL.

PROVISO, *s.* उपनियमः, प्रकरणं, नियमप्रकरणं, सङ्केतः, उपसङ्केतः, प्रतिबन्धः, अनुबन्धः, नियमानुबन्धः, नियमपत्रानुबन्धः, नियमपत्राङ्गं, नियमपत्रखण्डः, नियमपत्रावयवः, नियमैकदेशः; 'to annex one,' अर्थान्तरोपन्यासं कृ.

PROVISORY, *a.* (Conditional) साङ्केतिकः -की -कं, सप्रतिबन्धः -न्धा -न्धं.

PROVOCATION, *s.* (Act of exciting anger) प्रकोपः -पणं, क्रोधकरणं, कोपकरणं, क्रोधोत्पादनं, कोपोत्पादनं, क्रोधोद्दीपनं, क्रोधोत्तेजनं.—(Cause of anger) कोपकारणं, क्रोधकारणं, कोपहेतुः *m.*—(Act of exciting) उत्तेजनं, उद्दीपनं, उद्बोधनं, प्रवर्त्तनं.

PROVOCATIVE, *a.* उद्दीपकः -का -कं, अग्निवर्धकः &c., क्षुधाजनकः &c.

PROVOCATIVE, *s.* अग्निवर्धनं, रोचकः -कं, रूचकं, प्ररोचनं, खर्जिका.

To PROVOKE, *v. a.* (Excite to anger) प्रकुप् (c. 10. -कोपयति -यितुं), कुप्, क्रुध् (c. 10. क्रोधयति -यितुं), कोपं or क्रोधं जन् or उत्तिज् or उद्दीप् or उत्पद् (c. 10. -पादयति -यितुं), कोपोत्पादनं कृ, क्रोधोत्तेजनं कृ, क्रोधोद्दीपनं कृ.—(Excite) उद्दीप् (c. 10. -दीपयति -यितुं), उत्तिज् (c. 10. -तेजयति -यितुं), उत्तप् in caus., प्रवृत् in caus., प्ररुच् in caus.—(Challenge) आह्वे, समाह्वे, उपाह्वे.

PROVOKED, *p. p.* प्रकोपितः -ता -तं, प्रकुपितः &c., कुपितः &c., कोपितः &c., उपजातकोपः -पा -पं, जातकोपः &c., इद्धमन्युः -न्युः -न्यु, इद्धक्रोधः -धा -धं, उद्दीप्तमन्युः &c., कोपदीप्तः -प्ता -प्तं, उत्पन्नमन्युः &c., उत्तेजितः -ता -तं, उद्दीपितः &c., उत्तापितः &c., उत्तप्तः -प्ता -प्तं, सन्तप्तः &c., सन्तापितः &c.

PROVOKING, *part.* or *a.* प्रकोपजनकः -का -कं, कोपजनकः &c., क्रोधजनकः &c., प्रकोपकः -का -कं, क्रोधोत्पादकः &c., क्रोधोद्दीपकः &c., कोपोद्दीपकः &c., क्रोधोत्तेजकः &c., उत्तेजकः &c., उद्दीपकः &c., उद्बोधकः &c.

PROVOKINGLY, *adv.* यथा कोपो जायते तथा, यथा क्रोध उद्दीप्यते तथा.

PROVOST, *s.* अध्यक्षः, अधीशः, अधिकारी *m.* (न्), अधिपतिः, श्रेष्ठी *m.*

PROW, *s.* नौकाग्रं, नौकाग्रभागः, नौपूर्व्वभागः, नौकोदग्रभागः.

PROWESS, *s.* पराक्रमः, विक्रमः, सुविक्रमः, शौर्य्यं, वीर्य्यं, सुवीर्य्यं, रणशौर्य्यं, रणोत्साहः, पौरुषं, कृतपौरुषं, अतिशक्तिता, जनौजस् *n.*, प्रौढिः *f.*, कर्म्मोदारं; 'personal prowess,' बाहुवीर्य्यं; 'gained by one's own prowess,' स्वहस्तार्जितः -ता -तं, स्वभुजोपार्जितः &c.; 'man of great prowess,' सुपराक्रमी *m.* (न्), सुविक्रमी *m.*, पराक्रान्तः, अतिशक्तिमान् *m.* (त्); 'to show prowess,' पराक्रम् (c. 1. -क्रामति -क्रमति -मितुं), विक्रम्.

To PROWL, *v. n.* मांसार्थं or आमिषार्थं भ्रम् (c. 4. भाम्यति, भमितुं) or परिभ्रम्, मांसान्वेषणार्थं भ्रम् or पर्य्यट् (c. 1. -अटति -टितुं).

PROWLER, *s.* मांसार्थं भ्रमणकारी *m.* (न्) or परिभ्रमणकारी *m.*, परिभ्रमी *m.*

PROWLING, *s.* मांसार्थं or मांसान्वेषणार्थं भ्रमणं or परिभ्रमणं or पर्य्यटनं.

PROXIMATE, *a.* समीपः -पा -पं, निकटः -टा -टं, समीपस्थः -स्था -स्थं, निरन्तरः -रा -रं, सन्निहितः -ता -तं, निरन्तरालः -ला -लं, उपस्थः -स्था -स्थं, उपस्थायी -यिनी -यि (न्), आसन्नः -न्ना -न्नं, अन्तिकः -का -कं, उपश्लिष्टः -ष्टा -ष्टं, संसक्तः -क्ता -क्तं, सन्निकृष्टः -ष्टा -ष्टं, समीपगः &c. *See* NEAR, NEXT; 'proximate cause,' उपादानकारणं, उपादानं.

PROXIMATELY, *adv.* समीपतस्, सन्निहितं, सन्निकृष्टं, निरन्तरालं, अनन्तरालं.

PROXIMITY, *s.* समीपता, सामीप्यं, सन्निकर्षः, सन्निकृष्टता, सन्निधिः *m.*, सान्निध्यं, सन्निधानं, सन्निधं, अन्तिकं -कता, उपस्थानं, उपस्थितिः *f.*, नैकट्यं, प्रत्यासत्तिः *f.*, प्रत्यासन्नता, संसक्तिः *f.*, संसर्गः, उपश्लेषः, आनन्तर्य्यं, तातस्थ्यं. *See* NEARNESS.

PROXY, *s.* (Agency of another who acts as substitute) प्रतिनिधित्वं -ता.—(Person who acts) प्रतिनिधिः *m.*, प्रतिपुरुषः, प्रतिहस्तः -स्तकः; 'by proxy,' प्रतिनिधिद्वारा, प्रतिनिधिद्वारेण; 'one who signs a paper by proxy,' लेखनिकः.

PRUDE, *s.* मिथ्याविनीता, अत्यन्तविनयनिष्ठा, विनयाभिमानिनी, अतिविनीताम्मन्या, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारिणी, अत्याचारसेविनी, सुव्रीडिताम्मन्या, अतिविनयसेविनी, अत्यन्तविनीता.

PRUDENCE, *s.* पूर्व्वविचारः -रणा, परिणामदृष्टिः *f.*, पूर्व्वसमीक्षा, प्रसमीक्षा, समीक्षा -क्षणं, समीक्ष्यकारिता -त्वं, विमृश्यकारिता, परिणामदर्शनं, दीर्घदृष्टिः, सदसद्विवेकः, विनयः, विनीतता, नीतिः *f.*, नीतिज्ञता, प्राज्ञता, प्रज्ञता, विज्ञता, विवेकः, मनस्विता, विचारशीलता, पूर्व्वापरविचारः, मतिमत्त्वं, बुद्धिः *f.*, मनीषा, हिताहितविवेकः, पूर्व्वचिन्ता, चिन्ता, कार्य्यचिन्ता, परिवेदना, सावधानता, पूर्व्वदृष्टिः *f.*, अग्रदृष्टिः *f.*, विमर्शः, विवेचना, पूर्व्वविवेचना.

PRUDENT, *a.* परिणामदर्शी -र्शिनी -र्शि (न्), पूर्व्वविचारशीलः -ला -लं, दीर्घदर्शी &c., दीर्घदृष्टिः -ष्टिः -ष्टि, समीक्ष्यकारी -रिणी &c., विमृश्यकारी &c., समीक्षाकारी &c., प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., विज्ञः &c., मनस्वी -स्विनी &c., मतिमान् -मती -मत् (त्), बुद्धिमान् &c., प्रज्ञावान् &c., मनीषी -षिणी &c., परिवेदी -दिनी &c., परिवेदकः -का -कं, बुधः -धा -धं, सुबोधः -धा -धं, विनीतः &c., विनयवान् &c., नीतिमान् &c., नीतिज्ञः -ज्ञा -ज्ञं, पूर्व्वापरविचारी &c., विचारशीलः -ला -लं, सदसद्दर्शी &c., सदसद्विवेकी &c., दूरदर्शी &c., हिताहितविवेकी &c., पूर्व्वचिन्तकः -का -कं, पूर्व्वचिन्ताशीलः &c., कार्य्यचिन्तकः &c., धीरः -रा -रं, सावधानः -ना -नं, कृतावधानः -ना -नं, कृतधीः -धीः -धि, प्रयतः -ता -तं.

PRUDENTIAL, *a.* पूर्व्वविचारप्रयुक्तः -क्ता -क्तं, पूर्व्वसमीक्षाप्रयुक्तः &c., प्रसमीक्षाप्रयुक्तः &c., सविचारः -रा -रं, सविवेकः -का -कं.

PRUDENTLY, *adv.* सविचारं, समीक्षापूर्व्वं, प्रसमीक्ष्य, सुसमीक्ष्य, सुविमृश्य, परिणामदर्शनात्, परिणामदृष्ट्या, पूर्व्वविचारेण, सावधानं, सपरिवेदनं, प्राज्ञवत्, विज्ञवत्.

PRUDERY, *s.* मिथ्याविनयः, मिथ्यालज्जा, एकान्तविनयः, सूक्ष्मविनयनिष्ठा, सूक्ष्माचारनिष्ठा, अत्याचारनिष्ठा, विनयाभिमानं, अतिसूक्ष्मशीलता, अतिसूक्ष्मता, अतिविनीतता.

PRUDISH, *a.* मिथ्याविनीतः -ता -तं, एकान्तविनीतः &c., अत्यन्तविनीतः &c., अतिसूक्ष्मः -क्ष्मा -क्ष्मं, विनयाभिमानी -निनी &c. *See* PRUDE, *s.* PRECISE, *a.*

To PRUNE, *v. a.* क्षुद्रपल्लवान् or निरर्थकविटपान् अवच्छिद् (c. 7. -च्छिनत्ति -च्छेत्तुं) or अवकृत् (c. 6. -कृन्तति -कर्त्तितुं) or लू (c. 9. लुनाति लवितुं) or लुप् (c. 6. लुम्पति, लोप्तुं).

PRUNED, *p. p.* छिन्नपल्लवः -वा -वं, छिन्नविटपः -पा -पं, लूनविटपः &c.

PRUNER, *s.* विटपच्छिद् *m.*, पल्लवच्छिद् *m.*, निरर्थकविटपच्छेत्ता *m.* (त्र्).

PRUNING, *s.* पल्लवावच्छेदः, विटपावच्छेदः, निरर्थकविटपावकर्त्तनं.

PRUNING-HOOK, PRUNING-KNIFE, *s.* पल्लवच्छेदनी, विटपच्छेदनी, पल्लवकर्त्तनी.

PRURIENCE, PRURIENCY, *s.* कण्डूतिः *f.*, कण्डूः *f.*, कण्डुः *f.*, कण्डूया, कण्डूयनं.—(Longing desire for any thing) अतिस्पृहा, अत्यन्तस्पृहा, अतिशयेच्छा, अत्यभिलाषः.

PRURIENT, *a.* कण्डूलः -ला -लं, कण्डूतिमान् -मती -मत् (त्), सकण्डूतिः -तिः -ति.

PRURIGO, *s.* कण्डूः *f.*, कण्डुः *f.*, खर्জ্জूः *f.*, कच्छूः *f.*, कच्छुः *f.*, सुकण्डुः *f*

To PRY, *v. a.* सूक्ष्मं निरूप् (c. 10. -रूपयति -यितुं), सूक्ष्मं निरीक्ष् (c. 1. -ईक्षते -क्षितुं) or दृश् (c. 1. पश्यति, द्रष्टुं), सूक्ष्मदर्शनं कृ, सूक्ष्मम् अन्विष् (c. 4. -इष्यति -एषितुं) or अनुसन्धा (c. 3. -दधाति -धातुं), सूक्ष्मान्वेषणं कृ, सूक्ष्मानुसन्धानं कृ, सूक्ष्मं चर्च् (c. 1. चर्चति -चितुं), सूक्ष्मचर्चां कृ, चर्चां कृ, अनधिकारचर्चां कृ, मर्म्मान्वेषणं कृ, सूक्ष्मगवेषणं कृ, मर्म्मगवेषणं कृ.

PRYING, *s.* सूक्ष्मनिरूपणं, सूक्ष्मनिरीक्षणं, सूक्ष्मदर्शनं, सूक्ष्मदृष्टिः *f.*, सूक्ष्मान्वेषणं, सूक्ष्मानुसन्धानं, सूक्ष्मचर्चा, अनधिकारचर्चा, चर्चा, मर्म्मान्वेषणं,

PSALM, *s.* गीतं, स्तुतिगीतं, गानं, स्तुतिगानं, स्तोत्रं, सङ्गीतं, सद्गीतं, ईश्वरस्तुतिगीतं, भक्तिगीतं, भक्तिगानं, धर्म्मगीतं.

PSALMIST, *s.* गीतरचकः, स्तुतिगीतरचकः, स्तोत्ररचकः, गीतकारः, गीतकविः *m.*

PSALMODY, *s.* स्तुतिगानं, स्तोत्रगानं, स्तोत्रगीतिः *f.*, ईश्वरस्तुतिगानं.

PSALMOGRAPHY, *s.* गीतरचनं, स्तुतिगीतरचनं, स्तोत्ररचनं, गीतकरणं.

PSALTER, *s.* गीतपुस्तकं, गीतसंहिता, गीतसंहारः, स्तोत्रपुस्तकं, खिलं.

PSEUDO. A prefix expressed in Sanskrit by मिथ्या, मृषा, कृत्रिम, कु &c. prefixed, or कल्प, देशीय &c. affixed; as, 'a pseudo-poet,' मिथ्याकविः *m.*, कुकविः, कविकल्पः, कविदेशीयः; pseudology,' मिथ्यावादः, मृषावादः; 'pseudo-morphous,' कृत्रिमरूपः -पा -पं; 'pseudonymous,' कृत्रिमनामा &c.

PSHAW, *exclam.* धिक्, थै, अवे, अरे, रै, किम्, हुम्, अपैहि.

PSYCHOLOGICAL, *a.* आत्मतत्त्वविषयः -या -यं, अध्यात्मविषयकः -का -कं.

PSYCHOLOGY, *s.* आत्मतत्त्वविद्या, अध्यात्मविद्या, अध्यात्मशास्त्रं.

PUBERTY, PUBESCENCE, *s.* यौवनं, यौवनावस्था, तारुण्यं, तारुण्यावस्था, तरुणत्वं, युवत्वं, यौवनकालः, प्रौढता, प्रौढिः *f.*, प्रौढदशा; 'attained to puberty,' प्राप्तयौवनः -ना -नं, प्राप्तयौवनकालः -ला -लं; 'not attained to it,' अप्राप्तयौवनः &c.

PUBESCENT, *a.* प्राप्तयौवनः -ना -नं, अङ्कुरितयौवनः &c., प्राप्ततारुण्य -ण्या -ण्यं.

PUBLIC, *a.* (Pertaining to the community) सर्व्वसम्बन्धी -न्धिनी -न्धि (न्), सर्व्वलोकसम्बन्धी &c., प्रजासम्बन्धी &c., लोक in comp., प्रजा in comp. (General, common to many,) साधारणः -णा -णी -णं, सामान्यः -न्या -न्यं, सर्व्वसाधारणः &c., सर्व्वसामान्यः &c., सार्व्वलौकिकः -की -कं, लौकिकः &c., सार्व्वजनिकः -की -कं, सर्व्वजनीनः -ना -नं, सर्व्वजनीयः -या -यं, विश्वजनीनः &c., विश्वजनीयः -या -यं, सर्व्वः -र्व्वा -र्व्वं, सार्व्वः -र्व्वी -र्व्वं, सर्व्वीयः -या -यं, लोक or जन in comp., (Commonly known or current) प्रसिद्धः -द्धा, लोकप्रसिद्धः &c., सर्व्वप्रसिद्धः &c., जनप्रसिद्धः &c., सर्व्वजनप्रसिद्धः &c., सर्व्वलोकप्रसिद्धः &c., जगत्प्रसिद्धः &c., देशप्रसिद्धः &c., लोकविश्रुतः -ता -तं, सर्व्वत्र प्रचलः -ला -लं or प्रचलितः -ता -तं, लोक or जन in comp., *see* POPULAR.—(Open to all) प्रकाशः -शा -शं, सर्व्वप्रकाशः &c., सर्व्वलोकप्रकाशः &c., प्रकटः -टा -टं, सर्व्वप्रकटः &c., लोकप्रकाशः &c., अविविक्तः -क्ता -क्तं; 'public sale,' प्रकाशविक्रयः प्रकाशक्रयः; 'public benefit,' लोकोपकारः; 'public business,' लोकव्यवहारः व्यवहारः; 'public odium,' जनविद्वेषः; 'public property,' गणद्रव्यं; 'public feeling,' लोकचित्तं, प्रकृतिचित्तं.

PUBLIC, *s.* लोकः, सर्व्वलोकः, सर्व्वजनाः *m. pl.*, प्रजा, प्रजालोकः; 'for the benefit of the public,' प्रजार्थं, लोकार्थं, लोकोपकारार्थं; 'in public,' प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, सर्व्वप्रकाशं, लोकसाक्षात्, लोकसम्मुखं; 'in public and in private,' प्रकाशं विविक्तं च, प्रकाशम् एकान्ततश्च; 'regard for the public or public opinion,' लोकलज्जा, जनलज्जा.

PUBLICAN, *s.* (Collector of tribute or toll) करग्रहः, करग्राही *m.* (न्), करसंग्राही *m.*, शुल्कग्राही *m.*—(Retailer of beer and spirits) शौण्डिकः, शुण्डी *m.* (न्), यवसुरादिविक्रयी *m.* (न्) शुण्डादिविक्रेता *m.* (तृ) सुराविक्रयी *m.*

PUBLICATION, *s.* (The act) प्रकाशनं, प्रकटनं, प्रकटीकरणं, प्रसिद्धीकरणं, प्रकाशीकरणं.—(A published book) प्रकाशितपुस्तकं, प्रसिद्धपुस्तकं.

PUBLIC-HOUSE, *s.* शुण्डास्थानं, मद्यस्थानं, पानगोष्ठिका, शुण्डापानं, शुण्डा, मदिरागृहं, मदिराशाला, आपानं, यवसुरादिविक्रयस्थानं, शुण्डादिविक्रयस्थानं, सुराविक्रयस्थानं.

PUBLICITY, *s.* प्रकाशता, लोकप्रकाशता, लोकप्रकाशः, जनप्रकाशः, प्रकाशः, प्राकट्यं, लोकप्राकट्यं, प्रसिद्धिः *f.*, लोकप्रसिद्धिः *f.*, प्रसिद्धता, लोकप्रसिद्धता -त्वं, लोकविश्रुतिः *f.*, विश्रुतिः, जनप्रसिद्धिः *f.*, प्रख्यातिः *f.*, विख्यातिः *f.*, ख्यातिः *f.*, लौकिकता -त्वं, स्फुटता, व्यक्तता, स्पष्टता.

PUBLICLY, *adv.* (Openly, before the world) प्रकाशं, प्रकाशतस्, प्रकटं, प्राकट्येन, लोकप्रकाशं, सर्व्वप्रकाशं, प्रसिद्धं, अविविक्तं; 'publicly and privately,' *see* PUBLIC, *s.*—(Without concealment) व्यक्तं, सुव्यक्तं, स्पष्टं, स्फुटं, साक्षात्, प्रादुस्, आविस्, साविष्कारं, अगूढं.

PUBLIC-SPIRITED, PUBLIC-MINDED, *a.* लोकोपकारशीलः -ला -लं, लोकोपकारबुद्धिः -द्धिः -द्धि, लोकार्थबुद्धिः &c., जनार्थबुद्धिः &c., लोकार्थी -र्थिनी -र्थि (न्), जनार्थी &c., लोकहितेच्छुः -च्छुः -च्छु, लोकहितः -ता -तं, सर्व्वजनहितैषी &c., साधारणमङ्गलेच्छुः &c.

PUBLIC-SPIRITEDNESS, *s.* लोकोपकारशीलता, लोकोपकारबुद्धिः *f.*, लोकहितेच्छा.

To PUBLISH, *v. a.* (Make generally known) प्रकाश् (c. 10. -काशयति -यितुं), विकाश्, प्रकटीकृ, प्रकट (nom. प्रकटयति -यितुं), प्रसिद्धीकृ, ख्या in caus. (ख्यापयति -यितुं), प्रख्या, विख्या, आख्या, घुष् (c. 10. घोषयति -यितुं), विघुष्, आघुष्, प्रचर् (c. 10. -चारयति -यितुं), विज्ञा in caus. (-ज्ञापयति -ज्ञपयति -यितुं), बुध् (c. 10. बोधयति -यितुं), प्रथ् (c. 10. प्रथयति -यितुं), निविद् (c. 10. -वेदयति -यितुं), विद्, आविष्कृ, प्रादुष्कृ.—(Publish a book) पुस्तकं प्रकाश् or प्रसिद्धीकृ.—(Put into circulation) प्रचलीकृ, प्रचल् (c. 10. -चलयति -यितुं), प्रचर्.

PUBLISHED, *p.p.* प्रकाशितः -ता -तं, प्रकटीकृतः -ता -तं, प्रकटितः -ता -तं, प्रसिद्धीकृतः &c., ख्यापितः -ता -तं, घोषितः &c., विघोषितः &c., आघोषितः &c., विज्ञापितः &c., प्रख्यातः -ता -तं, प्रचलीकृतः &c., प्रचारितः &c., आविष्कृतः &c., प्रादुष्कृतः &c., प्रथितः &c.

PUBLISHER, *s.* प्रकाशकः, प्रकाशयिता *m.* (तृ), ख्यापकः, विज्ञापकः, प्रसिद्धकर्त्ता *m.* (र्त्तृ), आविष्कर्त्ता *m.*, प्रादुष्कर्त्ता *m.*

To PUCKER, *v. a.* संकुच् (c. 1. -कोचति -चितुं), कुच् (c. 1. कुच्चति -चितुं), आकुच्, संह (c. 1. -हरति -हर्त्तुं), पुटीकृ, सम्पुटीकृ, सङ्कोचं कृ.

PUCKER, PUCKERING, *s.* पुटः, पुटीकरणं, सङ्कोचः -चनं, कुच्चनं, आकुच्चनं,

PUDDEL, *s.* तुमुलं, कोलाहलः, सम्भ्रमः, विप्लवः, व्यग्रता, व्यस्तता.

PUDDING, *s.* पोलिका, पोलिका; 'plum-pudding,' *see* the word.

PUDDLE, *s.* वर्च्चरूकः, पङ्कजलौघः, कर्दमजलौघः, सपङ्कजलौघः, पङ्कजलगुल्मः, मलिनजलौघः, समलजलौघः, पङ्कगुल्मः.

To PUDDLE, *v. a.* समलीकृ, पङ्किलीकृ, कलुषीकृ, आविलीकृ. *See* MUDDLE.

PUDENCY, PUDICITY, *s.*, *see* MODESTY.

PUDENDUM, PUDENDA, *s.* (Of a woman) भगं, योनिः *f.*, अधोङ्गं, अधोपरं, अधोवशः, अधस्, अधस्तात्, उपस्थः, गुह्याङ्गं, रतिकुहरं, रतिमन्दिरं, रतिगृहं. *See* PRIVITY.

PUERILE, *a.* बालिशः -शा -शं, बालेयः -या -यं, बालकीयः -या -यं, बालयोग्यः -ग्या -ग्यं, शिशुयोग्यः &c., बालधर्म्मकः -का -कं, बालबुद्धिः -द्धिः -द्धि

PUERILITY, *s.* बालिश्यं, बालेयत्वं -ता, बालकीयता, बालयोग्यता.

PUERPERAL, *a.* प्रासूतिकः -की -कं, प्रसवसम्बन्धी -न्धिनी -न्धि (न्).

PUERPEROUS, *a.* बालप्रसविनी, बालप्रसवन्ती, प्रसूतिका, सूतिका.

PUFF, *s.* (Breath from the mouth) श्वासः, श्वसितं, मुखमरुतः, वदनमरुतः.—(A puff or sudden whiff) फुत्कृतं, फुत्कारः, फूत्कृतं, फूत्कारः फूत् indec.—(Blast, gust) ध्मानं, आध्मानं, ध्मातं, वातः, वातरूपः, वात्या, निर्घातः, प्रभञ्जनः.—(Kind of cake) पिष्टकं, आपूपिकं.—(Tumid commendation) अतिशयप्रशंसा, अत्युक्तिरूपा प्रशंसा, अधिकप्रशंसा, अतिशयोक्तिः *f.*

To PUFF, *v. n.* (Breathe) श्वस् (c. 2. श्वसिति -तुं), श्वासं कृ, प्रश्वासं कृ.—(Pant) कृच्छ्रेण श्वस्, कृच्छ्रेण श्वासप्रश्वास कृ, उद्ध्मा (c. 1. -ध्मति -ध्मातुं), उद्धमं कृ, प्राणकृच्छ्रोपहतः -ता -तं भू.—(Blow) वा, प्रवा.—(Eject air from the mouth suddenly) अकस्माद् वदनमरुतं or मुखमरुतं निरस् (c. 4. -अस्यति -असितुं) or निःसृ in caus.—(Blow upon with a puffing noise) फुत्कृ, फूत्कृ, फुत्कारं कृ, फूत्कारं कृ, फुत्कारेण or फुत्शब्देन प्रश्वस्.—(Swell or be inflated with air) ध्मा in pass. (ध्मायते), आध्मा, वातेन पॄ in pass. (पूर्य्यते).

To PUFF, *v. a.* (Inflate, dilate with air) ध्मा (c. 1. धमति, ध्मातुं), आध्मा, समाध्मा, प्रध्मा, उपध्मा, वातेन पॄ (c. 10. पूरयति -यितु). श्वासेन पॄ, वायुपूरितं -तां कृ.—(Blow away) अपध्मा, विध्मा.—(Puff up with pride, &c.) दर्पाध्मातं -तां कृ, गर्वाध्मातं -तां कृ, उद्धतीकृ, उन्मत्तीकृ.—(Praise with exaggeration) अत्युक्त्या or अतिशयोक्त्या प्रशंस्, अतिशयप्रशंसां कृ.

PUFFED, *p.p.* (Inflated) ध्मातः -ता -तं, आध्मातः &c., समाध्मातः &c., प्रध्मातः &c., वातपूरितः -ता -तं, वायुपूर्णः -र्णा -र्णं, श्वासपूरितः &c.—(Puffed up with pride, &c.) दर्पाध्मातः -ता -तं, गर्वाध्मातः &c., उद्धतः &c., दर्पोद्धतः &c., मदोद्धतः &c.

PUFFY, *a.* श्वाध्मातः -ता -तं, वातमयः -यी -यं, शब्दमात्रः -त्रा -त्रं.

PUG-DOG, *s.* मर्कटमुखः क्षुद्रकुक्कुरभेदः.

PUG-FACED, *a.* वानरमुखः -खी -खं, मर्कटवदनः -ना -नं, कपिमुखः &c.

PUG-NOSE, *s.* चिपिटः, चिपिटकः, चिपुटः, चिक्किनः, अवभटः.

PUGILISM, *s.* मुष्टियुद्धं, मुष्टियोधनं, मुष्टिपातः, मल्लयुद्धं, मुष्टीमुष्टि, बाहुयुद्धं.

PUGILIST, *s.* मुष्टियोद्धा *m.* (द्धृ), मुष्टियोधः, मुष्टियोधी *m.* (न्), बाहुयोधी *m.*

PUGILISTIC, *a.* मुष्टियुद्धसम्बन्धी -न्धिनी -न्धि (न्), बाहुयुद्धसम्बन्धी &c.

PUGNACIOUS, *a.* युयुत्सुः -त्सुः -त्सु, कलहप्रियः -या -यं, युद्धप्रियः &c., रणप्रियः &c., युद्धेच्छुः -च्छुः -च्छु, युद्धकारी -रिणी -रि (न्), कलहकारी &c., रणकामी -मिनी &c., युद्धकामी &c.

PUGNACITY, *s.* युयुत्सा, युद्धेच्छा, युद्धप्रियता, कलहप्रियता, कलहेच्छा.

PUISNE, *a.* अवरः -रा -रं, अवरपदस्थः -स्था -स्थं, अवरजः -जा -जं.

PUISSANCE, *s.* पराक्रमः, विक्रमः, प्रभावः, ऐश्वर्य्यं, तेजस् *n.*, प्राबल्यं.

PUISSANT, *a.* पराक्रमी -मिणी -मि (न्), विक्रमी &c., पराक्रान्तः -न्ता -न्तं, विक्रान्तः &c., महाबलः -ला -लं, बलवान् -वती -वत् (त्), महाशक्तिः -क्तिः -क्ति, महाविक्रमः -मा -मं.

To PUKE, *v. n.* वम् (c. 1. वमति -मितुं), वमनं कृ, छर्द् (c. 10. छर्दयति -यितुं).

PUKE, *s.* वान्तिकारकम् औषधं, वान्तिकृत्, छर्दनकृत्.

PUKING, *s.* वान्तिः *f.*, वमनं, छर्दनं; *part.*, वमी -मिनी -मि (न्).

PULCHRITUDE, *s.* *See* BEAUTY.

To PULE, *v. n.* (Like a child) बालकवद् रु (c. 2. रौति, रवितुं), शिशुवद् रुद् (c. 2. रोदिति -तुं); 'like a chicken,' पक्षिशावकवत् कूज् (c. 1. कूजति -जितुं).

To PULL, *v. a.* or *n.* (Draw, drag) कृष् (c. 1. कर्षति, c. 6. कृषति -ते, क्रष्टुं, कर्ष्टुं), आकृष्, समाकृष्, परिकृष्, प्रतिकृष्, संकृष्, कर्षणं कृ.—(Pull forcibly) हृ (c. 1. हरति, हर्त्तुं), हरणं कृ.—(Pluck, gather by plucking) ग्रह् (c. 9. गृह्णाति, ग्रहीतुं), आदा (c. 3. -ददाति -दत्ते -दातुं), अङ्गुलिभिर् ग्रह् or आदा or चि or अवचि; 'to pull the hair,' केशग्रहं कृ, केशग्रहणं कृ, केशान् ग्रह्.—(Pull down) अपकृष्, अवकृष्, व्यपकृष्, पत् in caus., अधःपत्.—(Pull off) अपकृष्, अवकृष्, व्यपकृष्, उत्कृष्, अपहृ, व्यपहृ, अपनी, अवतॄ in caus. (-तारयति -यितुं); 'he pulls off his clothes,' वस्त्रम् अवतारयति.—(Pull out) उत्कृष्, निष्कृष्, उद्धृ, निर्हृ, उत्पद् (c. 10. -पाटयति -यितुं), उत्खन् (c. 1. -खनति -नितुं), निर्या in caus., उत्पाटनं कृ; 'the hair,' लुञ्च् (c. 1. लुञ्चति -ञ्चितुं), उल्लुञ्च्, अवलुञ्च्, विलुञ्च्, उत्पद्, केशोल्लुञ्चनं कृ, केशोत्पाटनं कृ.—(Pull towards) आकृष्, समाकृष्, प्रतिकृष्.—(Pull in pieces, pull in two) विदृ (c 10. -दारयति -यितुं), अवदृ, विभिद्, विदलीकृ, खण्डशः कृ, खण्डं खण्डं कृ.—(Pull up) उत्पद्, उद्धृ, समुद्धृ, उच्छिद्, उत्खन्; 'by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, समूलं or आमूलम् उद्धृ.

PULL, *s.* कर्षणं, कृष्टिः *f.*, कर्षः, आकर्षः -र्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षणं.

PULLED, *p. p.* कर्षितः -ता -तं, कृष्टः -ष्टा -ष्टं, आकर्षितः &c., आकृष्टः &c., अवकृष्टः &c., विकर्षितः &c., विकृष्टः &c., हृतः -ता -तं, गृहीतः -ता -तं 'pulled by the hair,' केशगृहीतः &c., केशेषु गृहीतः; &c.; pulled off, as clothes, &c.,' अवतारितः -ता -तं; pulled out,' उत्कृष्टः -ष्टा -ष्टं, निष्कर्षितः &c., उद्धृतः &c., उत्पाटितः &c.; 'as the hair,' उल्लुञ्चितः &c.; 'pulled up,' उन्मूलितः -ता -तं, उत्पाटितः &c., उत्खातः &c., व्यपरोपितः &c.

PULLET, *s.* कुक्कुटीशावकः, कुक्कुटशावकः, पक्षिशावकः, पक्षिणीशावकः.

PULLEY, *s.* काष्ठानर्गतं क्षुद्रचक्रं, काष्ठान्तःस्थं सूक्ष्मचक्रं तच्च रज्जुसङ्गं भूत्वा कीलकोपरि परिवर्त्तते, कीलकोपरि परिवर्त्तमानं क्षुद्रचक्रं.

PULLING, *s.* कर्षणं, कृष्टिः *f.*, आकर्षणं, आकृष्टिः *f.*, संकर्षणं, विकर्षः -र्षणं, उत्कर्षः, हरणं, ग्रहणं, अङ्गुलिग्रहणं; 'pulling the hair,' केशग्रहः -हणं; 'mutual pulling of the hair,' केशाकेशि indec.; 'pulling up the hair,' केशलुञ्चनं, केशोल्लुञ्चनं.

To PULLULATE, *v. n.* (Germinate) स्फुट्, फुल्ल्, अङ्कुर, विकस्.

PULLULATION, *s.* स्फुटनं, फुल्लतिः *f.*, फुल्लिः *f.*, उद्भेदः, विकसनं.

PULMONARY, PULMONIC, *a.* फुप्फुससम्बन्धी -न्धिनी -न्धि (न्), फुप्फुसनिष्ठः -ष्ठा -ष्ठं, फुप्फुसस्थः -स्था -स्थं, फुप्फुसीयः -या -यं.

PULP, *s.* मज्जा, मज्जा *m.* (न्), मज्जनं, सारः, गर्भः.—(Of fruit) फलसारः, फलगर्भः, फलस्य कोमलभागः or मृदुभागः.

PULPINESS, *s.* समज्जता, मज्जावत्त्वं, मज्जागुणकत्वं, कोमलता, मृदुता.

PULPIT, *s.* उपदेशासनं, उपदेशपीठं, धर्म्मोपदेशपीठं, पीठं, पुरोहितासनं, धर्म्मोपदेशकासनं, धर्म्माध्यापकासनं, धर्म्माध्यापकपीठं.

PULPOUS, PULPY, *a.* मज्जागुणकः -का -कं, मज्जोपमः -मा -मं, मज्जामयः -यी -यं, समज्जः -ज्जा -ज्जं, मांसलः -ला -लं, मांसगुणकः -का -कं, कोमलः -ला -लं, आर्द्रमृदुः -ड्डी -दु, मृदुः &c.

To PULSATE, *v. n.* (Palpitate) स्पन्द्, स्फुर्, कम्प्, वेप्.

PULSATION, *s.* स्पन्दनं, प्रतिस्पन्दनं, स्पन्दितं, कम्पः -म्पनं, स्फुरणं, विष्पन्दः, चलत्वं; 'of the heart,' हृदयस्पन्दनं, हृत्कम्पः; 'of an artery,' नाडिस्फुरणं, नाड्याघातः.

PULSE, *s.* (Of the blood or an artery) नाडिः -डी *f.*, नाली -लिः *f.*, नाडीस्फुरणं, नालीस्फुरणं, नाडीस्पन्दनं, नाड्याघातः; 'feeling the pulse,' नाडीपरीक्षा; 'to feel the pulse,' नाडीपरीक्षां कृ.—(Leguminous plant) कलायः, सतीनः -नकः, सतीलः -ला -लकः, सितीलकः, सातीलकः, सातिलकः, द्विदलं, त्रिपुटः, खण्डिकः, हरेणुः *m.*, शमीधान्यं, वनसङ्कटः, धान्यवीरः, मुनः, वर्त्तुलः; 'pulse ground and fried, वडा, वटकः,

PULVERABLE, *a.* क्षोदनीयः -या -यं, चूर्णनीयः &c., चूर्णीकरणयोग्यः &c.

PULVERIZATION, *s.* चूर्णीकरणं, क्षोदीकरणं, चूर्णनं, सञ्चूर्णनं, क्षोदनं.

To PULVERIZE, *v. a.* चूर्ण् (c. 10. चूर्णयति -यितुं), संचूर्ण्, प्रचूर्ण्, विचूर्ण्, चूर्णीकृ, क्षुद् (c. 7. क्षुणत्ति, क्षोत्तुं), प्रक्षुद्, संक्षुद्, क्षोदीकृ, पिष्, गुड् &c. *See To* POUND, POWDER.

PULVERIZED, *p. p.* चूर्णितः -ता -तं, चूर्णीकृतः -ता -तं, संचूर्णितः &c., चूर्णीभूतः -ता -तं, क्षोदितः -ता -तं, क्षोदीकृतः &c., पिष्टः -ष्टा -ष्टं, गुडितः -ता -तं, गुण्डितः -ता -तं.

PULVERULENT, *a.* चूर्णमयः -यी -यं, पांशुलः -ला -लं. *See* POWDERY.

PUMMEL, *s.* (Of a saddle) वक्त्रा.

PUMP, *s.* जलोत्क्षोलनयन्त्रं, जलोत्क्षोलननाडिः -डी *f.*, जलोत्क्षेपणयन्त्रं, जलोत्क्षेपकयन्त्रं, जलोत्क्षेपकनाडी, जलोत्क्षोलनी, जलोत्क्षेपणी, जलनाडी, जलनाली; 'place where water is distributed,' प्रपा.

To PUMP, *v. a.* or *n.* नाडीद्वारेण जलम् उत्तुल् (c. 10. -तोलयति -यितुं) or उत्क्षिप् (c. 6. -क्षिपति -क्षेप्तुं) or जलोत्क्षोलनं कृ or जलोत्क्षेपणं कृ, जलनाडीं सञ्चल् (c. 10. -चालयति -यितुं), जलोत्क्षोलनयन्त्रं सञ्चल्.—(Interrogate artfully) सव्याजं प्रच्छ् or अनुप्रच्छ् or परिप्रच्छ्, प्रश्नेन परीक्ष् or अनुसन्धा.

PUMPKIN, *s.* कुष्माण्डः -ण्डा -ण्डी, कुष्माण्डकः, कूष्माण्डः -ण्डी -ण्डकः, अलाबूः *f.*, अलाबुः *f.*, आलाबुः *f.*, तुम्बी, ककारुः *m.*

PUN, *s.* श्लेषः, श्लेषोक्तिः *f.*, श्लेषवाक्यं, श्लेषालङ्कारः, द्व्यर्थवाक्यं, अर्थापत्तिः *f.*

To PUN, *v. n.* श्लेषोक्तिं कृ, श्लेषवाक्यं वद् (c. 1. वदति -दितुं)

PUNCH, *s.* (Instrument for perforating) वेधनी, वेधनिका.—(Thrust, blow) आघातः, अभिघातः, प्रहारः; 'with the elbow,' कील्:

-ला, कीलाघातः, अरत्निप्रहारः.—(Kind of drink) शर्करादिमिश्रितं मद्यजसौरादिरसमयं पानीयं.—(In a puppet show) पुत्तलिकाक्रीडायां वैहासिकः or विदूषकः.

To PUNCH. *v. a.* (Pierce with a punch) पूर्वीकृत्यन्त्रेण व्यध्.—(With the elbow) अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं) or प्रहृ (c. 1. -हरति -हर्तुं), अरत्निं प्रसार्य्य तड्, कीलाघातं कृ.

PUNCHEON, *s.* (Instrument), *see* PUNCH.—(A measure), *see* CASK.

PUNCHY, *a.* ह्रस्थूलः -ला -लं स्थूलह्रस्वः -स्वा -स्वं, घनह्रस्वः &c.

PUNCTILIO, *s.* सूक्ष्मविधयः, सूक्ष्मविधिः *m.*, सूक्ष्मनियमः, सूक्ष्मता, अतिसूक्ष्मता, सौक्ष्म्यं, अतिसौक्ष्म्यं, शिष्टाचारसौक्ष्म्यं, सभ्याचारसूक्ष्मता.

PUNCTILIOUS, *a.* अतिसूक्ष्मदृष्टिः -ष्टिः -ष्टि, अतिसूक्ष्मदर्शी -र्शिनी -र्शि (न्), अतिसूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मोपचारदर्शी, सूक्ष्माचारनिष्ठः -ष्ठा -ष्ठं, अतिसूक्ष्माचारी &c., सूक्ष्मनियमनिष्ठः &c., सूक्ष्मोपचारनिष्ठः &c., सूक्ष्मोपचारशीलः -ला -लं, सूक्ष्मादरनिष्ठः &c., सूक्ष्मनियमी &c., नियमनिष्ठः &c., अत्याचारी &c.

PUNCTILIOUSNESS, *s.* अतिसूक्ष्मदर्शनं, अतिसूक्ष्मदृष्टिः *f.*, सूक्ष्मोपचारनिष्ठा, सूक्ष्मनियमनिष्ठा, सूक्ष्मादरनिष्ठा, सूक्ष्मसत्कारनिष्ठा, सूक्ष्मादरशीलता, अत्याचारः.

PUNCTUAL, *a.* समयपालकः -का -कं, समयरक्षकः -का -कं, समयनिष्ठः -ष्ठा -ष्ठं, समयसेवी -विनी -वि (न्), कालरक्षकः -का -कं, कालनिष्ठः -ष्ठा -ष्ठं, कालपालकः -का -कं, कालसेवी &c., सामयिकः -की -कं, सङ्केतपालकः -का -कं, सङ्केतनिष्ठः &c., नियमपालकः &c., नियमनिष्ठः &c., वचननिष्ठः &c., प्रतिज्ञानिष्ठः &c., प्रतिज्ञापालकः &c., दृढनियमी &c.

PUNCTUALITY, PUNCTUALNESS, *s.* समयपालनं, समयनिष्ठा, समयसेवनं, कालनिष्ठा, कालसेवनं, कालपालनं, समयरक्षणं, कालरक्षणं, सङ्केतपालनं, सङ्केतनिष्ठा, नियमनिष्ठा, नियमपालनं, वचननिष्ठा, प्रतिज्ञानिष्ठा.

PUNCTUALLY, *adv.* यथासमयं, समयतस्, यथाकालं, कालतस्, नियमतस्, यथानियमं, यथासङ्केतं, समयनिष्ठापूर्व्वं, कालनिष्ठापूर्व्वं.

To PUNCTUATE, *v. a.* विरामचिह्नैर् अङ्क् (c. 10. अङ्कयति -यितुं) विरामचिह्नानि लिख् (c. 6. लिखति, लेखितुं) or कृ, विरामचिह्नाङ्कनं कृ, विरामचिह्नाङ्कितं -तां कृ.

PUNCTUATED, *p. p.* विरामचिह्नाङ्कितः -ता -तं, अवसानचिह्नाङ्कितः -ता -तं.

PUNCTUATION, *s.* विरामचिह्नाङ्कनं, अवसानचिह्नाङ्कनं, विरामचिह्नलिखनं.

To PUNCTURE, *v. a.* सूक्ष्मकीलकाग्रेण व्यध् (c. 4. विध्यति, व्यद्धुं). *See To* PRICK.

PUNCTURE, *s* वेधः -धनं, सूक्ष्मकीलकवेधः, व्यधः -धनं. *See* PRICK.

PUNCTURED, *p. p.* वेधितः -ता -तं, कीलकवेधितः &c., कीलकविद्धः -द्धा -द्धं,

PUNDIT, *s.* पण्डितः, विद्वान् *m.* (स्), प्राज्ञः, बहुश्रुतः, अधीयानः. श्रोत्रियः, वेदविद् *m.*, वेदविद्वान् *m.*, अनूचानः. *See* LEARNED.

PUNGENCY, *s.* कटुता -त्वं, उग्रता -त्वं, तीव्रता, तिग्मता -त्वं, खरता, प्रखरता, प्राखर्य्यं, तैग्म्यं, तीक्ष्णता, तैक्ष्ण्यं, अरुन्तुदत्वं, चण्डता -त्वं, उष्णता -त्वं, औषण्यं, ओषणः, दाहः, विदाहः.

PUNGENT, *a.* कटुः -टुः -टुी -टु, उग्रः -ग्रा -ग्रं, तीव्रः -व्रा -व्रं, तिग्मः -ग्मा -ग्मं, तीक्ष्णः -क्ष्णा -क्ष्णं, खरः -रा -रं, प्रखरः रा -रं, अरुन्तुदः दा -दं, चण्डः -ण्डा -ण्डं, उष्णः -ष्णा -ष्णं, तिक्तः -क्ता -क्तं, विदाही -हिनी -हि (न्), दाही &c.

PUNINESS, *s.* अल्पता, क्षुद्रता -त्वं, शरीरक्षुद्रता, अल्पशरीरता, तनुता

To PUNISH, *v. a.* दण्ड् (c. 10. दण्डयति -यितुं), शास् (c. 2. शास्ति, -सितुं, c. 10. शासयति -यितुं) अनुशास्, ताड् (c. 10. ताडयति -यितुं), निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), दम् (c. 10. दमयति -यितुं) वियत् (c. 10. -यातयति -यितुं) बन्ध् (c. 9. बध्नाति बन्धुं), दण्डं प्रणी. *See* INFLICT.—(Pain) पीड्, व्यथ्, तप्, सन्तप्.

PUNISHABLE, *a.* दण्डनीयः -या -यं, दण्ड्यः -ण्ड्या -ण्ड्यं, दण्डार्हः -र्हा -र्हं, दण्डनार्हः &c., ताडनीयः -या -यं, ताड्यः -ड्या -ड्यं, शासनीयः -या -यं, शास्यः -स्या -स्यं, शासनार्हः -र्हा -र्हं, दमनीयः -या -यं, दण्डयोग्यः -ग्या -ग्यं, शिक्षणीयः &c., शिक्ष्यः -क्ष्या -क्ष्यं, शिक्षार्हः &c., विनेयः -या -यं.

PUNISHED, *p. p.* दण्डितः -ता -तं, शासितः -ता -तं, शिष्टः -ष्टा -ष्टं, ताडितः -ता -तं, निगृहीतः &c., पीडितः &c., विनीतः &c., शिक्षितः &c.

PUNISHER, *s.* दण्डयिता *m.* (तृ), शासिता *m.*, शास्ता *m.*, शासकः, ताडयिता *m.*, ताडकः, दण्डप्रणेता *m.*, शिक्षकः.

PUNISHMENT, *s.* दण्डः, दण्डनं, शासनं, अनुशासनं, शास्तिः *f.*, शिष्टिः *f.*, ताडनं, साहसं, दमः, दमनं, दमथः -थं, दमथुः *m.*, निग्रहः, शिक्षणं; 'corporal punishment,' शरीरदण्डः -ण्डनं, शारीरदण्डः, शारीरिकदण्डः, शारीरः, देहदण्डः -ण्डनं; 'just punishment,' सम्यग्दण्डनं; 'infliction of punishment,' दण्डयोगः, दण्डप्रयोगः, दण्डप्रणयनं, *see* INFLICTION; 'capital punishment,' वधदण्डः, प्राणदण्डः, प्राणान्तदण्डः, जीवान्तदण्डः, देहान्तदण्डः, उत्तमसाहसं; 'severity of punishment,' दण्डपारुष्यं; 'repeated punishment,' त्रिवारदण्डः; 'fear of punishment,' दण्डभीतिः *f.*, दण्डभयं; 'through fear of it,' दण्डभयात्.

PUNITIVE, PUNITORY, *a.* दाण्डः -ण्डी -ण्डं, दाण्डिकः -की -कं, दण्डसम्बन्धी -न्धिनी &c., साहसिकः -की -कं, दण्डविषयकः -का -कं, दण्ड in comp.

PUNJÁB, *s.* (The country) पञ्चनदः. *See* PANJÁB.

PUNKA, *s.* तालवृन्तः -न्तकं, धवित्रं, मरुदान्दोलः.

PUNSTER, *s.* सश्लेषवक्ता *m.* (क्तृ), सश्लेषवादी *m.* (न्).

PUNT, *s.* तरालुः *m.*, तरान्धुः *m.*, तरण्डः -ण्डं. वहित्रं.

PUNY, *a.* क्षुद्रः -द्रा -द्रं, अल्पः -ल्पा -ल्पं, क्षुद्रशरीरः -रा -रं.

PUP, *s.* कुक्कुरशिशुः *m.*, कुक्कुरशावकः, शिशुः *m.*, डिम्भः.

To PUP, *v. n.* कुक्कुरशावकान् सु or प्रसु or जन्, कुक्कुरशिशून् सु.

PUPIL, *s.* (Scholar) शिष्यः, विद्यार्थी *m.* (न्), छात्रः, अन्तेवासी *m.* (न्), अन्तेवासिजनः, अध्यायी *m.*, अध्येता *m.* (तृ), प्राचार्य्यः, बालः, शिशुः *m.*, माणवकः, मृडङ्गणः, प्रबालः.—(Of the eye) तारा, तारका, अक्षितारा-रका, तारः -रकं, कनीनिका, दृष्टिः *f.*, लोचकः, ज्योतिस् *n.*, नयना.

PUPILAGE, *s.* शिष्यत्वं, शिष्यावस्था, शिष्यदशा, विद्यार्थित्वं -ता, अन्तेवासित्वं, बालत्वं, शिशुत्वं -ता, शैशवं.

PUPILARY, *a.* शैष्यः -ष्यी -ष्यं, शिष्यसम्बन्धी &c., शैशव, -वी -वं.

PUPPET, *s.* पुत्रिका, दारुपुत्रिका, पाञ्चालिका, पाञ्चलिका, पाञ्चाली, पुत्तली -लिका, शालाङ्गी, शालभञ्जी -ञ्जिका, दारुस्त्री, दारुगौः, कुरुण्टी, अञ्जलिकारिका, यावा.

PUPPET-SHOW, *s.* पुत्तलिकाक्रीडा, पुत्रिकाक्रीडा, पाञ्चलिकाक्रीडा.

PUPPY, *s.* कुक्कुरशावकः, कुक्कुरशिशुः *m.*, शिशुः *m.*, डिम्भः.—(Conceited person) दर्शनीयमानी *m.* (न्), आत्माभिमानी *m.*, मानी *m.*, रूपगर्वितः, दाम्भिकः.

To PUR, *v. n.* मार्जारवत् सन्तोषसूचकं रणरणशब्दं कृ or रणत्कारं कृ.

PURÁNA, *s.* (Sacred and mythological poem, derived from the same religious system as the Rámáyana and Mahábhárata. or from the mytho-heroic style of Hindu belief: being a departure from the purer system of the Vedas They are eighteen in number, and each one is supposed to treat of five topics, viz. 1. the creation, 2. the destruction and renovation of worlds, 3. the genealogy of gods and heroes, 4. the reign of the Manus, 5. the transac-

tions of their descendants. From this five-fold division, and from the antiquity of the stories narrated, come the general names पुराणं, पञ्चलक्षणं. The specific titles are as follows: 1. ब्रह्मपुराणं or ब्राह्मपुराणं, 2. पद्मपुराणं, 3. विष्णुपुराणं, 4. शिवपुराणं, 5. भागवतपुराणं or भगवत्पुराणं, 6. नारदपुराणं, 7. मार्कण्डपुराणं, मार्कण्डेयपुराणं, 8. अग्निपुराणं, 9. भविष्यपुराणं, 10. ब्रह्मवैवर्त्तपुराणं, 11. लिङ्गपुराणं, 12. वराहपुराणं, 13. स्कन्दपुराणं, 14. वामनपुराणं, 15. कूर्म्मपुराणं, 16, मत्स्यपुराणं, 17. गारुडपुराणं, 18. ब्रह्माण्डपुराणं. Sometimes a Purána called the वायुपुराणं or वायवीयपुराणं is substituted for the शिवपुराणं, and another called the नरसिंहपुराणं for the ब्रह्माण्डपुराणं. These eighteen mythological works are the repository of the modern and popular religious creed of the Hindús. They are amplifications of the two great heroic and historical poems or Itihása, called Rámáyana and Mahábhárata, giving a more connected and definite explanation of the mythical fictions and historical traditions contained in those works. They are consequently remarkable for attributing paramount importance to the two divinities, Śiva and Vishnu, who, under one form or other, are almost the sole objects that are made to claim homage. Each separate Purána cannot, therefore, be taken as a guide to Hindú belief as a whole, but rather to some separate branch of it, in which the worship of either one of these deities in particular incarnations is encouraged in preference to that of the other. The most celebrated of them all is the fifth in the above list, or Bhágavata Purána, designed for the glorification of Bhagavat or Vishnu, in the form of Krishna. This exerses a more direct and powerful influence on the opinions of the natives of India than any other. The third, or Vishnu Purána, translated by Professor Wilson, is also a work of great celebrity, and conforms most closely to the definition of Panchalakshanam, *i. e.* treating of five specified topics. There are also eighteen upapuranas, or similar poems of inferior sanctity and different appellations, viz.: 1. सनत्कुमारं, 2. नारसिंहं, 3. नारदीयं, 4. शिवं, 5. दुर्वाससं, 6. कापिलं, 7. मानवं, 8. औशानसं, 9. वरुणं, 10. कालिकां, 11. शाम्बं, 12. नन्दिकेश्वरं, 13. सौरं, 14. पाराशरं, 15. आदित्यं, 16. माहेश्वरं, 17. भागवतं, 18. वशिष्ठं. The collector and arranger of the Puránas, as well as of the more ancient Vedas, was a sage named Krishna कृष्णः, or Dwaipayana द्वैपायनः, or Krishnadwaipáyana कृष्णद्वैपायनः. The surname of Vyása व्यासः or 'Arranger' (from the root अस् with वि, meaning to 'dispose' or 'set in order'), was given to him, and is now used to denote any expounder of the Vedas or Puránas. His seat is called व्यासनं, व्यासपीठं.

PURANIC, *a.* पौराणिकः -की -कं, पौराणः -णी -णं, पुराणविषयकः &c.

PURBLIND, *a.* अस्पष्टदृक् *m. f. n.* (ग्), अव्यक्तदृक् *m. f. n.*, हतदृष्टिः -ष्टिः -ष्टि, सदीर्घदृष्टिः &c., ईषदन्धः -न्धा -न्धं.

PURCHASABLE, *a.* क्रेयः -या -यं, क्रेतव्यः -व्या -व्यं, क्रय्यः -य्या -य्यं.

To PURCHASE, *v. a.* क्री (c. 9. क्रीणाति -णीते, क्रेतुं) उपक्री, संक्री, मूल्यं दत्त्वा लभ् or प्राप्, पण् (c. 1. पणते -णितुं), पणीकृ.

PURCHASE, *s.* (The act of buying) क्रयः, क्रयणं, संक्रयणं, उपक्रयः, क्रीणनं.—(Thing purchased) क्रीतवस्तु *n.*, क्रीतद्रव्यं.—(Hold, force) ग्रहणं, ग्राहः, संग्राहः, संग्रहणं, ग्रहः, आग्रहः, धृतिः *f.*, ग्रहणशक्तिः *f.*, शक्तिः *f.*

PURCHASED, *p. p.* क्रीतः -ता -तं, क्रयक्रीतः &c., संक्रीतः &c., उपक्रीतः &c.

PURCHASE-MONEY, *s.* क्रयमूल्यं, क्रयणमूल्यं, मूल्यं, अर्घः.

PURCHASER, *s.* क्रयी *m.* (न्), क्रेता *m.* (तृ), क्रायकः, क्रयिकः, क्रयकर्त्ता *m.*

PURE, *a.* (Clean, free from dirt) निर्मलः -ला -लं, विमलः -ला -लं, अमलः &c., अमली -लिनी -लि (न्), मलहीनः -ना -नं, शुद्धः -द्धा -द्धं, विशुद्धः &c., पवित्रः -त्रा -त्रं, स्वच्छः -च्छा -च्छं, अच्छः &c शुचिः -चिः -चि.—(Free from sin or guilt, morally pure) शुद्धः -द्धा -द्धं, शुचिः -चिः -चि, पुण्यः -ण्या -ण्यं, अनघः -घा -घं, निष्कलङ्कः -ङ्का -ङ्कं, निष्पापः -पा -पं, अदृष्टपापः &c., अपापः &c., पापहीनः -ना -नं, अकृतपापः &c., अज्ञातपापः &c., अकल्मषः -षा -षं, धूतकल्मषः &c., अलिप्तः -प्ता -प्तं, साधुः -ध्वी -धु, अदृष्टदोषः -षा -षं, सात्त्विकः -की -कं, प्राञ्जलः -ला -लं.—(Ceremonially clean) पवित्रः -त्रा -त्रं, पूतः -ता -तं, पावनः -ना -नं, पवनः -ना -नं, शुचिः -चिः -चि, शौचवान् -वती -वत् (त्), शौचोपेतः -ता -तं, मेध्यः -ध्या -ध्यं.—(Unadulterated, incorrupted) अदूषितः -ता -तं, अदुष्टः -ष्टा -ष्टं, शुद्धः -द्धा -द्धं, अविकारितः -ता -तं, अभ्रष्टः -ष्टा -ष्टं, असंसृष्टः -ष्टा -ष्टं.—(Mere, simple) केवलः -ला -लं, केवली &c., मात्रकः -का -कं, मात्र in comp., शुद्धः &c.—(Free from corrupt words, as speech) अपशब्दहीनः -ना -नं, अपशब्दरहितः -ता -तं, अपशब्दशून्यः -न्या -न्यं, शुद्धः -द्धा -द्धं, अपप्रयोगहीनः -ना -नं.—(Chaste, ignorant of carnal intercourse) अज्ञातव्यवायः -या -यं, अज्ञातमैथुनः -ना -नं; 'as a woman,' पुरुषास्पृष्टा.—(Of pure descent or blood) मौलः -ली -लं.—(Pure in heart or mind) शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), शुद्धहृदयः &c., *see* PURE-MINDED; 'to be pure,' शुध् (c. 4. शुध्यति -ते, शोद्धुं), शुद्धीभू, शुचि (nom. शुचीयते), पवित्रीभू.

PURELY, *adv.* (Cleanly) निर्मलं, विमलं, शुद्धं, पवित्रं, शुचि.—(Merely) मात्रं, केवलं. *See* MERELY.

PURE-MINDED, *a.* शुद्धमतिः -तिः -ति, शुद्धात्मा -त्मा -त्म (न्), विमलात्मा &c., अमलात्मा &c., निर्मलान्तःकरणः -णा -णं, शुद्धहृदयः -या -यं, प्रयतात्मा &c.

PURENESS, *s.* निर्मलता, शुचिता, शुद्धता -त्वं, शुद्धिः *f.* *See* PURITY.

PURGATION, *s.* रेचनं, विरेचनं, रेकः, विरेकः, शोधनं, शुद्धिः *f.*

PURGATIVE, *a.* रेचकः -की -कं, विरेचकः &c., शोधकः -का -कं, उदरशोधकः &c., अधोभागहरः -रा -रं, अतिसारी -रिणी -रि (न्), सारकः -का -कं, अतिसारकः &c.

PURGATIVE, *s.* (Medicine) रेचकं, रेचनं, विरेचनं, विरेकः, अधोभागहरं, उदरशोधनं, अधोभागशोधकं, सारकं, सारकौषधं.

PURGATORY, *a.* शोधकः -का -कं, पावनः -ना -नं, पावकः -का -कं, पापशोधनः -ना -नं, पापनाशकः &c., पापनाशनः -ना -नं, पापघ्नः -घ्नी -घ्नं, अघनाशनः &c., अघमर्षणः -णी -णं.

PURGATORY, *s.* पापशोधनस्थानं, अघशोधनस्थानं, यातनास्थानं; 'pain of purgatory.' यातना, भैरवी यातना.

To PURGE, *v. a.* (The bowels, &c.) विरिच् (c. 7. -रिणक्ति -रिंक्ते -रेक्तुं),

रिच्, उदरं or अधोभागं शुध् (c. 10. शोधयति -यितुं), उदरशोधनं कृ, मलं सृ in caus. (सारयति -यितुं), मलशोधनं कृ, मलशुद्धिं कृ.—(Cleanse from guilt) पापात् शुध् or परिशुध् or विशुध्, पापशोधनं कृ, अघशोधनं कृ.—(Cleanse in general) पू, परिपू, शुध्, मलापकर्षणं कृ.

PURGE, *s.* रेचन, विरेचनं, रेचकं, विरेकः, उदरशोधनं, अधोभागहरं.

PURGED, *p. p.* (As the bowels) रेचितः -ता -तं, विरेचितः &c., रिक्तः -क्ता -क्तं, विरिक्तः &c., शोधितः -ता -तं, सारितः &c.—(Cleared) शोधितः &c., पूतः &c., पावितः &c.

PURGING, *s.* (Of the bowels) रेचना -नं, रेकः, विरेकः, सारणः, अतिसारः. *See* DIARRHŒA, DYSENTERY.

PURIFICATION, *s.* शोधनं, संशोधनं, विशोधनं, परिशोधनं, शोधः, परिशोधः, शुद्धिः *f.*, संशुद्धिः *f.*, विशुद्धिः *f.*, पावनं, पवित्रीकरणं, मार्जनं, परिमार्जनं, निर्मलीकरणं, विमलीकरणं, मलापकर्षणं, मलापनयनं, मलहरणं, शुचीकरणं, क्षालनं, प्रक्षालनं, निर्णेकः, स्वच्छीकरणं.—(State) शुद्धिः *f.*, संशुद्धिः, शुद्धता -त्वं, विशुद्धता, शोधितत्वं, शौचं, शुचिता, पवित्रता, पूतत्वं, पावितत्वं, पूतिः *f.*, निर्मलता; 'of a new house,' शल्योद्धारः, वास्तुसंशमनं.

PURIFICATIVE, PURIFICATORY, *a.* पावकः -का -कं, पावनः -ना -नं, पावी -विनी -वि (न्), पावमानः -ना -नं, शोधकः -का -कं, शोधनः -ना -नं, संशोधकः &c., विशोधकः &c., शुद्धिकरः -रा -री -रं, मलापकर्षकः -का -कं.

PURIFIED, *p. p.* पावितः -ता -तं, पूतः &c., परिपूतः &c., शोधितः -ता -तं, शुद्धः -द्धा -द्धं, संशोधितः &c., संशुद्धः &c., विशुद्धः &c., पवित्रः त्रा -त्रं, पवित्रितः &c., पवित्रीकृतः -ता -तं, कृतशौचः -चा -चं, मार्जितः &c., प्रक्षालितः &c., निर्णिक्तः -क्ता -क्तं, धौतः -ता -तं, अवदातः &c.; 'from sin' पापशोधितः -ता -तं, पापपूतः -ता -तं, अघनिष्कृतः -ता -तं; 'by austerity,' प्रयतः -ता -तं; 'to be purified,' शुध् (c. 4. शुध्यति -ते, शोद्धुं), पू in pass. (पूयते), पवित्रीभू, शुद्धीभू.

To PURIFY, *v. a.* पू (c. 9. पुनाति -नीते, पवितुं, c. 10. पावयति -यितुं), परिपू, विपू, शुध् (c. 10. शोधयति -यितुं), विशुध्, परिशुध्, संशुध्, शुद्धीकृ, पवित्रीकृ, पवित्र (nom. पवित्रयति -यितुं), निर्मलीकृ, विमलीकृ, मृज् (c. 1. मार्जति, c. 2. मार्ष्टि -ष्टुं), सम्मृज्, निर्णिज् (c. 3. -णेनक्ति -णेक्तुं), धाव् (c. 10. धावयति -यितुं), शचीकृ, मलं हृ (c. 1. हरति, हर्तुं) or अपनी (c. 1. -नयति -नेतुं), मलापकर्षणं कृ, परिष्कृ, प्रक्षाल्.

PURIFYING, *part.* or *a.* पुनानः -ना -नं, पावमानः -ना -नं, पवमानः &c., पावनः -ना -नं, पावकः -का -कं. *See* PURIFICATIVE.

PURITAN, *s.* पवित्रमतावलम्बी *m.* (न्), पवित्रमतधारी *m.* (न्).

PURITY, *s.* (Freedom from dirt, defilement &c.) निर्मलता -त्वं, नैर्मल्यं, निर्मल्यं, विमलता, वैमल्यं, मलहीनता, मलराहित्यं, शुद्धता -त्वं, शुद्धिः *f.*, विशुद्धिः *f.*, पवित्रता, पूतता, पूतिः *f.*, शुचिता, शौचं, मेध्यता, अलिप्तता.—(Clearness, transparency) प्रसादः, प्रसन्नता, प्रसत्तिः, *f.*, स्वच्छता, वैशद्यं, विशदत्वं.—(Freedom from guilt, moral purity) शुचिता -त्वं, शुद्धता, शुद्धिः *f.*, अनघता, पापहीनता, अघहीनता, निष्पापत्वं, पुण्यता, साधुता, निष्कलङ्कता.—(Purity of mind) चित्तशुद्धिः *f.*, मतिशुद्धता, विमलचित्तत्वं, शुद्धमतित्वं.—(Chastity in a woman) सतीत्वं, पुरुषास्पृष्टता, साध्वीत्वं.—(Of language) शुद्धिः अपशब्दहीनता.

To PURL, *v. n.* नदीप्रकारेण रणरणशब्दं कृ or सुभगस्तनितं कृ.

PURLIEU, *s.* समन्तः, सामन्तदेशः, पर्य्यन्तदेशः, उपान्तदेशः, सामन्तं, परिसरः.

To PURLOIN, *v. a.* चुर्, हृ, अपहृ, मुष्, परिमुष्. *See To* PILFER.

PURLOINED, *p. p.* अपहृतः -ता -तं, मूषितः -ता -तं, चौरहृतः -ता -तं.

PURLOINER, *s.* अपहर्त्ता *m.* (र्तृ), परिमोषी *m.* (न्), स्तेयकृत्. *See* PILFERER.

PURPLE, *a.* धूम्रः -म्रा -म्रं, धूम्रवर्णः -र्णा -र्णं, धूमलः -ला -लं, कृष्णलोहितः -ता -तं, नीललोहितः &c., धूमाभः -भा -भं, बालसन्ध्याभः &c., धूम्ररुक् *m. f. n.* (च्).

PURPLE, *s.* धूम्रवर्णः, धूम्रः, धूमलः, धूमलवर्णः, रक्तः.

To PURPLE, *v. a.* धूम्रीकृ, लोहितीकृ, धूम्रवर्णेन रञ्ज् (c. 10. रञ्जयति -यितुं).

PURPLISH, *a.* ईषद्धूम्रः -म्रा -म्रं, आधूम्रः &c., आधूमलः -ला -लं.

PURPORT, *s.* अर्थः, अभिप्रायः तात्पर्य्यं, आशयः, अभिप्रेतं, उद्देशः, भावार्थः, भावः, विवक्षितं, विवक्षा, अन्वयः, छन्दः. *See* MEANING.

To PURPORT, *v. a.* or *n.* अभिप्रे, उद्दिश्, वच् in des., अर्थवान् &c. भू or अस्. *See To* MEAN.

PURPOSE, *s.* अभिप्रायः, अभिप्रेतं, चिकीर्षितं, चिकीर्षा, आशयः, सङ्कल्पः, मनःसङ्कल्पः, उद्देशः, अर्थः, तात्पर्य्यं, इच्छा, आकांक्षा, कार्य्यं, बुद्धिः *f.*, कल्पना, परिकल्पना, आकूतं, मनोनिरूपणं, चिन्ता, प्रयोजनं, उपयोगः, *See* INTENTION; 'fixed purpose,' निश्चयः, निश्चितं; 'of unfailing purpose,' सत्यसङ्कल्पः -ल्पा -ल्पं; 'declared purpose,' ईरिताकूतं, 'one who does not effect his purpose,' अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अचरितार्थः &c., वृथार्थः &c., अकृतकृत्यः -त्या -त्यं; 'one who effects it,' कृतार्थः &c.; 'for the purpose of,' अर्थं or अर्थे or हेतोः affixed, कृते, निमित्ते; 'for the purpose of religion, or for religious purposes,' धर्म्मार्थं; 'to no purpose,' वृथा, मुधा, व्यर्थः -र्था -र्थं; 'for what purpose,' किमर्थं, किमुद्दिश्य; 'on purpose,' बुद्धिपूर्व्वं, बुद्ध्या. *See* PURPOSELY.

To PURPOSE, *v. a.* अभिप्रे, अभिप्रायं कृ, कृ in des., उद्दिश्, मनसा उद्दिश्, अभिसन्धा, इप्, परिकॢप्, सङ्कल्पं कृ, बुद्धिं कृ. *See To* INTEND.

PURPOSED, *p. p.* अभिप्रेतः -ता -तं, चिकीर्षितः &c., उद्दिष्टः -ष्टा -ष्टं.

PURPOSELY, *adv.* बुद्धिपूर्व्वं -र्व्वकं, बुद्धिपुरःसरं, मतिपूर्व्वं, साभिप्रायं, अभिप्रायपूर्व्वं, बुद्ध्या, कामतस्, इच्छातस्. *See* INTENTIONALLY.

PURSE, *s.* कोषः धनकोषः, मुद्राकोषः, कटिबन्धः, ग्रन्थिः *m.*, क्रौलिकं.

To PURSE, *v. a.* (Put in a purse) कोषे निविश्; in caus.—(Contract) संकुच्, संदृ, संकृ, आकुच्.

PURSE-CUTTING, *s.* ग्रन्थिभेदः, ग्रन्थिभेदनं, ग्रन्थिछेदः, कोषछेदः.

PURSE-PRIDE, *s.* धनगर्वः, धनदर्पः, धनाभिमानं, अर्थगर्वः, द्रव्याभिमानं.

PURSE-PROUD, *a.* धनगर्वितः -ता -तं, द्रव्यगर्वितः &c., धनाभिमानी -निनी &c.

PURSER, *s.* युद्धनावि कोषाधिकारी *m.* (न्), or धनभोजनादिपरिकल्पकः.

PURSUANCE, *s.* अनुसरणं, अनुसारः, अनुवर्त्तनं, अनुगमनं. 'in pursuance of,' अनुसारेण, अनुसारतस्, अनुरूपेण.

PURSUANT, *a.* अनुसारी -रिणी -रि (न्), अनुरूपः -पा -पं, अनुवर्त्ती &c.

PURSUANTLY, *adv.* अनुसारेण -रात्, अनुसारतस्, अनुरूपेण.

To PURSUE, *v. a.* (Follow) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुगम् (c. 1. -गच्छति -गन्तुं) अनुया (c. 2. -याति -तुं), अनुवृत्, अनुव्रज्, अनुक्रम्.—(Chase) अनुधाव्, (c. 1. -धावति -वितुं), पश्चाद् धाव्, अनुसृ, पश्चाद् वृत्.—(Prosecute, practise), अनुष्ठा (c. 1. -तिष्ठति -ष्ठातुं) आस्था, आचर् (c. 1. -चरति -रितुं), समाचर्, सेव्, निषेव्, अनुसेव्. *See* PROSECUTE.—(Carry on) निर्वह् in caus., प्रवृत् in caus., प्रणी, सम्प्रणी, विधा.—(Endeavour to obtain) आप् in des. (ईप्सति -प्सितुं), अभ्याप् in des., प्राप् in des., लभ् in des. (लिप्सते -प्सितुं) अभिलभ्.—Imitate) अनुकृ, अनुगम्.

PURSUED, *p. p.* (Followed) अनुसृतः -ता -तं, अनुगतः &c., अनुयातः

&c., अनुगम्यमानः -ना -नं, अन्वीयमानः &c.—(Chased) अनुधावितः -ता-तं.—(Prosecuted, practised) अनुष्ठितः -ता -तं, आचरितः &c., सेवितः -ता -तं, निषेवितः &c.

Pursuer, *s.* अनुगामी *m.* (न्), अनुयायी *m.*, अनुसारी *m.*, अनुधावकः.

Pursuit, *s.* (Following) अनुसरणं, अनुवर्त्तनं, अनुगमनं, अनुव्रजनं.—(Running after, chasing) अनुधावनं, अभिधावनं, पश्चाद् धावनं, अनुसरणं, अनुसारः, अन्वेषणं, मार्गणं, मृगणं.—(Prosecution, carrying on with a view to obtain) अनुष्ठानं, सेवनं, निषेवनं, अनुसेवनं, आचरणं, प्रवृत्तिः *f.*, प्रवर्त्तनं, व्यापारः, व्यवसायः, निष्ठता, अभियोगः, अनुशीलनं, परिशीलनं, अनुसन्धानं.—(Course of occupation, employment) व्यापारः, व्यवसायः, कर्म्म *n.* (न्), उद्योगः, उद्यमः, प्रवृत्तिः *f.*, व्यवहारः, कार्य्यं; 'interesting pursuit,' विनोदः, विनोदजनकव्यापारः.

Pursuivant, *s.* राजदूतः, राजदूतपरिचरः, वेत्रधरः, याष्टीकः

Pursy, *a.* दुःश्वासी -सिनी &c., प्राणकृच्छ्रग्रस्तः -स्ता -स्तं, ह्रस्वस्थूलः &c.

Purulence, purulency, *s.* पूयत्वं, सपूयत्वं -ता, पूयपूर्णता, पूययुक्तता.

Purulent, *s.* सपूयः -या -यं, पूयमयः -यी -यं, पूयरूपः -पा -पं, पूययुक्तः -क्ता -क्तं, पूयपूर्णः -र्णा -र्णं.—(Running with pus) पूयस्रावी -विणी -वि (न्).

To purvey, *v. a.* and *n.* खाद्यद्रव्याणि परिकॢप् (c. 10. -कल्पयति -यितुं) or उपकॢप् or सम्भृ (c. 1. -भरति -भर्त्तुं) or युज् (c. 10. योजयति -यितुं) or समायुज्, भोजनपरिकल्पनं कृ, भोजनसम्भारं कृ, आहारयोजनां कृ, आहारनिर्व्वाहं कृ.

Purveyance, *s.* खाद्यद्रव्यपरिकल्पनं, भोजनपरिकल्पनं, अन्नादिपरिकल्पनं, भोजनसम्भारः, आहारयोजना, आहारनिर्व्वाहः, परिकल्पनं, निर्व्वाहः.

Purveyor, *s.* भोजनपरिकल्पकः, अन्नादिपरिकल्पकः, भोजनाधिकारी » (न्), भोजनाधिकृतः, आहारयोजकः.

Pus, *s.* पूयं, पूयरक्तं, पूयशोणितं, दूष्यं, मलजं, क्षतजं, प्रमितं, अवक्लेदः.

To push, *v. a.* and *n.* (Make a thrust) तुद् (c. 10. तोदयति -यितुं), प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ, आहन् (c. 2. -हन्ति -न्तुं), अभिहन्, अभ्याहन्.—(Impel, move by pressure) हस्ताभ्याम् अवलम्ब्य चल् (c. 10. चालयति -यितुं) or सञ्चल् or सृ (c. 10. सारयति -यितुं) or स्थानान्तरीकृ or प्रेर् or प्रणुद् or नुद् or कृष् or समाकृष्.—(Push aside, push out) अपसृ in caus., बहिष्कृ, बहिःकृ.—(Push forward) प्रसृ, प्रचल् in caus., अग्रे चल् or सृ, अग्रे नी.

Push, pushing, *s.* ताडनं, आहतिः *f.*, आघातः, अभिघातः, अभ्याघातः, प्रहारः, प्रसारणं, अपसारणं, सारणं.—(Impelling) प्रणोदः प्रेरणं -णा, वेगः.—(Vigorous effort, onset) सुयत्नः, आक्रमः -मणं.

Pushed, *p. p.* ताडितः -ता -तं, आहतः &c., अभिहतः &c., प्रसारितः -ता -तं, अपसारितः &c., सारितः &c., चालितः &c., प्रेरितः -ता -तं, प्रणोदितः &c., प्रणुन्नः -न्ना -न्नं, स्थानान्तरीकृतः &c., बहिष्कृतः &c.

Pushing, *a.* (Enterprising) साहसिकः -की -कं, साहसशीलः -ला -लं, साहसबुद्धिः -द्धिः -द्धि, उद्योगी -गिनी &c., अनुद्योगी &c., उद्योगशीलः -ला -लं, अनुद्यमी &c., धृष्टः -ष्टा -ष्टं, प्रगल्भः -ल्भा -ल्भं, प्रतिभानवान् -वती -वत् (त्).

Pusillanimity, *s.* भीरुता, कातरता, धैर्य्यहीनता, शौर्य्यहीनता, वीर्य्यहीनता, निर्व्वीर्य्यं, कार्पण्यं, कृपणबुद्धित्वं, क्लीवता, भीरुहृदयत्वं, कापुरुषत्वं.

Pusillanimous, *a.* भीरुहृदयः -या -यं, कृपणबुद्धिः -द्धिः -द्धि, कातरबुद्धिः &c., धैर्य्यहीनः -ना -नं, शौर्य्यहीनः &c., वीरुपहीनः &c.

Puss, pussy, *s.* मार्जारः, विडालः. *See* Cat.

Pustule, *s.* स्फोटः -टकः, विस्फोटः, रक्तवटी, रक्तवरटी, वटा, वरटी, व्रणः, तनुव्रणः, गण्डः, गुटिका. *See* Pimple.

Pustulous, *a.* स्फोटपूर्णः -र्णा -र्णं, स्फोटमयः -यी -यं, सस्फोटः -टा -टं.

To put, *v. a.* (Lay, place, set) धा (c. 3. दधाति, धातुं), स्था in caus. (स्थापयति -यितुं), क्षि in caus. (क्षपयति -यितुं), निविश् (c. 10. -वेशयति -यितुं), सन्निविश्, न्यस् (c. 4. -अस्यति -असितुं), विन्यस्, आरुह् in caus. (-रोपयति -यितुं), दा (c. 3. ददाति, दातुं), धृ (c. 1. धरति, धर्त्तुं), कृ (c. 8. करोति, कर्त्तुं). *See To* lay, place.—(Apply) आधा, संयुज् (c. 10. -योजयति -यितुं), आयुज्, युज्, क्षु or सम्भृ in caus.—(Incite) प्रवृत् in caus., प्रोत्सह् in caus., प्रेर्.—(Put a question), *see To* propose.—(Put about, as a ship, &c.) नौमार्गं परिवृत् (c. 10. -वर्त्तयति -यितुं), मार्गपरिवर्त्तनं कृ, गतिपरिवर्त्तनं कृ.—(Put away) अपसृ (c. 10. -सारयति -यितुं), निःसृ, वरिष्कृ, दूरीकृ.—(Put aside, put by) न्यस्, सन्यस्, व्युदस्, निधा, रक्ष्, परिरक्ष्.—(Put down, lay down) न्यस्, उपन्यस्, निधा, अवधा, निक्षिप्.—(Put down), *see To* repress, degrade.—(Put forth, extend) प्रसृ in caus.—(Put forth), *see To* sprout, bud.—(Put forth), *see To* exert; 'he puts forth his strength,' कृतशक्तिर् भवति.—(Put off), *see To* postpone.—(Put off, divest one's self) वस्त्राणि अवतॄ (c. 10. -तारयति -यितुं), उत्कृष्, उन्मुच्, अवमुच्, विमुच्, उच्छद्, अपनह्.—(Put off), *see To* discard.—(Put off from land) तीराद् अपगम् or अपया or अपसृ.—(Put on clothes, dress) वस्त्रं परिधा or पिधा, वस्, प्रवस्, विवस्, प्रतिवस्, वेष्ट्, परिवेष्ट्, प्रवेष्ट्, आछद्, प्रवृ, संव्ये, परिव्ये, परिधा, वस्त्राणि परिधा or आछद् or आमुच्, प्रसाध्, वस्त्र, संवस्त्र, *see To* dress, invest.—(Put on armour) नह् (c. 4. नह्यति -ते, नद्धुं), सन्नह्, दंशनं सन्नह्, वर्म्म (c. 10. वर्म्मयति -यितुं), संवर्म्म.—(Put on shoes) पादुके अधिरुह् (c. 1. -रोहति -रोढुं) or रुह् or आरुह् in caus.—(Put on, assume) ग्रह्, धृ (c. 10. धारयति -यितुं), स्वीकृ, अङ्गीकृ.—(Put out, extinguish) शम् in caus., उपशम्, प्रशम्, निशम्, निर्व्वा in caus.; 'having put out the fire,' अग्निं शमयित्वा or निशाम्य.—(Put out, extend) प्रसृ in caus.—(Put out), *see To* confuse, disconcert.—(Put out the eyes) लोचने उत्पद् in caus. or उत्कृष् or उच्छद्.—(Put to it), *see To* distress, perplex.—(Put together) सन्धा, समाधा, संयुज्.—(Put up, lodge) उषॄ, उत्तरणगृहे वस्, रथाद् अवतॄ.—(Put up with) सह् (c. 1. सहते, सोढुं), विषह्.—(Put up), *see To* pack.—(Put up), *see To* expose.—(Put upon), *see To* deceive.—(Put in order) विरच्, रच्, विन्यस्, सज्जीकृ.—(Put in mind), *see To* remind.—(Put in practice), *see To* exercise, practise.—(Put in fear), *see To* frighten.—(Put in writing), *see To* commit to writing.—(Put in jeopardy) संशयितं -तां कृ, *see To* jeopardy.—(Put to death), *see To* kill.

Put, *p. p.* स्थापितः -ता -तं, क्षपितः &c., निहितः &c., निवेशितः &c., न्यस्तः -स्ता -स्तं. *See* Placed.—(Put on, as clothes) परिहितः -ता -तं.—(Put off, discarded) अवतारितः -ता -तं, अपास्तः -स्ता -स्तं, सन्यस्तः &c., व्युदस्तः &c., त्यक्तः -क्ता -क्तं.

Put, *s.* (Clown) वृषलः, ग्राम्यजनः.—(Harlot) वेश्या.

Putative, *a.* लोकप्रसिद्धः -द्धा -द्धं, जनप्रसिद्धः &c., लोकमतः -ता -तं.

Putid, *a.* क्षुद्रः -द्रा -द्रं, कुत्सितः -ता -तं, कृपणः -णा -णं, तुच्छः &c.

Putidness, *s.* क्षुद्रता, कुत्सितत्वं, तुच्छता -त्वं, कृपणता, कार्पण्यं.

Put-off, *s.* (An excuse) अपदेशः, व्यपदेशः, छद्म *n.* (न्), छलं

PUTREFACTION, *s.* पूतिः *f.*, पूतत्वं -ता, गलितत्वं, गलनं, विगलनं, गलितावस्था, विलयः -यनं, दौर्गन्ध्यं, दौर्गन्धिः *m.*, दुर्गन्धता, पूतिगन्धः.

PUTREFIED, *p. p.* गलितः-ता-तं, विगलितः &c., पूतीभूतः &c., विलीनः-ना-नं.

To PUTREFY, *v. a.* पूतीकृ, गल् in caus. (गालयति, गलयति -यितुं), विगल्, गलितीकृ, विली in caus. (-लापयति -यितुं).

To PUTREFY, *v. n.* गल् (c. 1. गलति -लितुं), विगल्, गलितः -ता -तं भू, पूतीभू, विली (c. 4. -लीयते -लेतुं), प्रविली, दुर्गन्धः -न्धा -न्धं भू, पूतिगन्धिकः -का -कं भू.

PUTRESCENCE, *s.* गलनं, विगलनं, विलयः -यनं, पूतिः *f.*, पूतत्वं.

PUTRESCENT, *a.* गलन् -लन्ती -लत् (त्), विगलन् &c., विलीयमानः-ना-नं.

PUTRID, *a.* पूतः -ता -तं, पूतिगन्धः -न्धा -न्धं, दुर्गन्धः -न्धा -न्धं, दुर्गन्धी -न्धिनी -न्धि (न्), पूतिगन्धिकः -का -कं, उग्रगन्धिः -न्धिः -न्धि, गलितः -ता -तं, विगलितः &c., विलीनः -ना -नं.

PUTRIDNESS, PUTRIDITY, *s.* पूतत्वं -ता, पूतिः *f.*, दुर्गन्धता, दौर्गन्ध्यं, दौर्गन्धिः *m.*, पूतिगन्धिता, गलितत्वं -ता, विगलितत्वं, विलीनता.

PUTTY, *s.* काचबन्धनलेपः, काचबन्धनयोग्यो विलेपः, उदपेषं.

To PUTTY, *v. a.* पूर्व्वोक्तलेपेन काचं बन्ध् (c. 9. बध्नाति, बन्द्धुं).

To PUZZLE, *v. a.* मुह् (c. 10. मोहयति -यितुं), विमुह्, व्यामुह्, भ्रम् (c. 10. भ्रमयति -यितुं), भ्रान्तिं जन्, निरुत्तरीकृ, बुद्धिभ्रान्तिं कृ, शल्यं कृ. *See To* POSE.

PUZZLE, *s.* (Enigma) गूढं, कूटं, प्रवह्लिः *f.* -ह्लिका, प्रहेलिका, अन्तर्लापिका.—(Perplexity) व्यस्तता, मोहः, व्यामोहः, भ्रान्तिः *f.*, भ्रमः, व्याकुलता, व्यग्रता, बुद्धिभ्रान्तिः *f.*, बुद्धिभ्रमः.

PUZZLED, *p. p.* मोहितः -ता -तं, विमोहितः &c., भ्रान्तः -न्ता -न्तं, सम्भ्रान्तः &c., भ्रान्तहृदयः -या -यं, व्यस्तः -स्ता -स्तं, निरुत्तरीकृतः -ता -तं, इतिकर्त्तव्यतामूढः -ढा -ढं.

PUZZLE-HEADED, *a.* भ्रान्तबुद्धिः -द्धिः -द्धि, व्यस्तबुद्धिः &c., जडबुद्धिः &c.

PUZZLING, *part.* or *a.* भ्रमजनकः-का-कं, मोहजनकः &c. *See* PERPLEXING.

PYGMY, *s.* वामनः, खर्वः, खर्वः, वाममूर्त्तिः *m.*, ह्रस्वमूर्त्तिः, ह्रस्वकायः.

PYGMY, PYGMEAN, *a.* वामनः -ना -नं, वामनतनुः -नुः -नु. *See* DWARFISH.

PYLORUS, *s.* जठरस्य अधःस्थमुखं, जठराधोमुखं, जठराधोद्वारं.

PYRAMID, *s.* सूच्यग्रस्तम्भः, सूच्याकारस्तम्भः, शुण्डाकारस्तम्भः, सूचिः -ची *f.*, शिखा, शङ्कुः *m.*, सूक्ष्माग्रस्तम्भः.

PYRAMIDAL, PYRAMIDICAL, *a.* सूच्यग्रः -ग्रा -ग्रं, सूच्याकारः -रा -रं, सूच्यग्रस्तम्भाकारः &c., शुण्डाकारः &c., सूक्ष्माग्रस्तम्भाकृतिः -तिः -ति, शङ्कुरूपः -पा -पं, शिखावलः -ला -लं, शिखरी -रिणी &c.

PYRE, *s.* चितिः -ती *f.*, चिता, चित्या, श्मशानाग्निः *m.* *See* PILE.

PYRITES, *s.* विटमाक्षिकं, सुवर्णमाक्षिकं, स्वर्णमाक्षिकं, माक्षिकं, आवर्त्तः, सुवर्णमुखी, कामारिः *m.*, मधुधातुः *m.*, आग्नेयप्रस्तरः; 'iron pyrites,' नीलमृत्तिका, तराटुलीयः -यकः; 'hepatic iron pyrites,' रूप्यमाक्षिकं, कांस्यमाक्षिकं.

PYRITIC, *a.* माक्षिकमम्बन्धी -न्धिनी &c., माक्षिकगुणकः -का -कं.

RIGID, *a.* (Stiff, not pliant) दृढः -ढा -ढं, स्तब्धः -ब्धा -ब्धं, स्तब्धीकृतः -ता -तं, घनः -ना -नं, कठिनः -ना -नं, स्तिमितः -ता -तं, अशिथिलः -ला -लं, अमृदुः -दुः -द्वी -दु.—(Strict, severe) कठोरः -रा -रं, कर्कशः -शा -शं, उग्रः -ग्रा -ग्रं, नियतः -ता -तं. सूक्ष्मः -क्ष्मा -क्ष्मं, सूक्ष्मदर्शी &c.

RIGIDITY, RIGIDNESS, *s.* दृढता, स्तब्धता, घनता, कठिनता, काठिन्यं, दार्ढ्यं, कठोरता, कर्कशता, कार्कश्यं, उग्रता -त्वं, अशिथिलता, अशैथिल्यं; 'of the eye-lids,' वर्त्मावबन्धः

RIGIDLY, *adv.* दृढं, मुदृढं. स्तब्धं, स्तब्धतया, स्तब्धत्वेन, सगाठिन्यं, सदार्ढ्यं, सकार्कश्यं, कठोरं, कठिनं. अशिथिलं.

RIGMAROLE, *s.* अनर्थककथा, निरर्थककथा, असम्बद्धार्थका दीर्घकथा.

RIGOR, *s.* (Stiffness) दृढता, कठिनता, कठोरता, काठिन्यं, *see* RIGIDITY.—(Severity) उग्रता, उग्रदण्डता -त्वं, कठोरता, कर्कशता, निष्ठुरता, नैष्ठुर्यं.—(Intensity) *see* the word.

RIGOROUS, *a.* (Severe) उग्रदण्डः -ण्डा -ण्डं, उग्रः -ग्रा -ग्रं उग्रतदण्डः &c., कठोरः -रा -रं, निष्ठुरः -रा -रं, कठिनः -ना -नं, क्रूरः &c., कर्कशः -शा -शं.—(Exact) सूक्ष्मः -क्ष्मा -क्ष्मं. *See* STRICT.

RIGOROUSLY, *adv.* उग्रत्वेन, उग्रं, उग्रदण्डेन, कठोरं, निष्ठुरं, नैष्ठुर्येण

RILL, *s.* अल्पनदी, क्षुद्रनदी, अल्पसरित् *f.*, सूक्ष्मसरित्, क्षुद्रसरित् *f.*

RIM, *s.* प्रान्तः, अन्तः, धारः -रा, प्रान्तभागः, अन्तभागः, उत्सङ्गः, पार्श्वः; 'of a cup,' पात्रप्रान्तः, पात्रकरङ्गः, पात्रपार्श्वः.

RIME, *s.* तुषारः, नीहारः, कुज्झटिः *f.* -टिका. *See* HOAR-FROST.

RIMY, *a.* तुषारमयः -यी -यं, नीहारमयः &c., कुज्झटिकामयः &c.

RIND, *s.* त्वक् *f.* (च्), त्वचा, वल्कं -ल्कलं, शल्कं -ल्कलं, चर्म्म *n.* (न्), छल्लिः -ल्ली *f.*, शल्लकं, चोचं -चकं, चोलकं, चीरं, अण्डकोषः; 'having rind,' त्वचीयान् -यसी -यः (स्), त्वचिष्ठः -ष्ठा -ष्ठं.

RING, *s.* (Circle) मण्डलं, परिमण्डलं, चक्रं, चक्रवालं, वलयः -यं, वर्त्तुलः. —(Of metal) लोहचक्रं, लोहवलयः -यं; 'of a chain,' लोहलः.—(Ornament for the finger) अङ्गुलीयकं, अङ्गुरीयकं, अङ्गुरीयः -यं, अङ्गुलीकः -कं, ऊर्म्मिका, करारोटः, वालकः; 'seal-ring,' अङ्गुलिमुद्रा -द्रिका, मुद्रा, वंदिः -दी *f.*; 'ring for the toes or feet,' नूपुरः, पादाङ्गदं, पादकटकः, मञ्जीरं; 'marriage-ring,' कौतुकं, मङ्गलसूत्रं, *see* MARRIAGE; 'sacred ring of kuśa grass worn during religious ceremonies,' पवित्रं -त्रकं.—(Circle of persons) मण्डलं; 'dancing in a ring,' मण्डलनृत्यं, हल्लीषं -षकं.—(Arena) रङ्गः.—(Ringing sound) क्वणितं, शिञ्जितं, झणः, घण्टाशिञ्जितं, घण्टाशब्दः, झनत्कारः, झम्झा -म्झनं.

To RING, *v. a.* (Cause to ring or sound, as a bell) घण्टां वद् (c. 10. वादयति -यितुं) or क्वण् (c. 10. क्वणयति -यितुं) or नद् (c. 10. नादयति -यितुं), घण्टाम् आहन् (c. 2. -हन्ति -न्तुं), घण्टाक्वणनं कृ, घण्टावादनं कृ.

To RING, *v. n.* (Sound, as a bell) क्वण् (c. 1. क्वणति -णितुं), शिञ्ज् (c. 2. शिञ्क्ते, c. 1. शिञ्जते -ञ्जितुं), विशिञ्ज्, किङ्किण (nom. किङ्किणायते), ध्वन् (c. 1. ध्वनति -नितुं), प्रक्ष्वेड् (c. 1. क्ष्वेडति -डितुं), झम्झा (nom. झम्झायते), क्वणितं कृ, शिञ्जितं कृ, झनत्कारं कृ, घण्टावत् शब्दं कृ.

RINGED, *a.* (Fitted with rings) साङ्गुलीयः -या -यं, सवलयः -या -यं.

RINGER, *s.* घण्टावादकः, घण्टाघाती *m.* (न्), घण्टाताडकः.

RINGING, *s.* घण्टावादनं, क्वणनं, क्वणितं, शिञ्जितं, झम्झनं, झनत्कारः.

RING-LEADER, *s.* मुख्यः, मुखरः, प्रमुखः, प्रवर्त्तकः, प्रयोजकः, नायकः.

RINGLET, *s.* अलकः, अलकान्तः, ककैरालः, कुरलः. *See* CURL.

RING-WORM, *s.* कोठः, दद्रुः *m.*, दद्रूः *m.*, गजकर्णी, खर्ज्जूः *f.*

To RINSE, *v. a.* (Wash out the mouth) आचम् (c. 1. -चामति -चमितुं), आचमनं कृ, जलम् or उदकम् उपस्पृश् (c. 6. -स्पृशति -स्प्रष्टुं), उपस्पर्शं कृ, गण्डूषं कृ, शुचिप्रणीं कृ.—(Cleanse by the introduction of water) जलं निक्षिप्य शुध् (c. 10. शोधयति -यितुं) or प्रक्षल् or परिष्कृ; 'one who has rinsed his mouth,' आचान्तः.

RINSING, *s.* (The mouth) आचमनं, आचाम्यं, उपस्पर्शः, गण्डूषः, शुचिप्रणीः *f.*; 'water for rinsing the mouth,' आचमनीयं, आचाम्यं.

RIOT, *s.* (Tumult, uproar) तुमुलं, कोलाहलः, डिम्बः, डिम्बाहवः, डमरः, डामरः, विप्लवः, आहवः, कालकीलः, सम्भ्रमः, चमत्कारः.—(Popular disturbance) प्रकृतिक्षोभः, प्रजाक्षोभः, प्रकृतियुद्धं, ग्रामयुद्धं, ग्राममण्डलिका.—(Noisy festivity) अतिशयशब्देन or अतिशयतुमुलेन उत्सवकरणं, *see* REVEL.—(To run riot) मर्य्यादाम् अतिक्रम् or लंघ्.

To RIOT, *v. n.* (Raise an uproar) तुमुलं कृ, कोलाहलं कृ, डिम्बं कृ, विप्लवं कृ.—(Revel) अतिशयशब्देन or अतिशयतुमुलेन उत्सवं कृ.

RIOTER, *s.* तुमुलकारी *m.* (न्), डिम्बकारी *m.*, क्षोभकारी *m.*, क्षोभकृत् *m.*

RIOTOUS, *a.* तुमुलकारी -रिणी -रि (न्), कोलाहलकारी &c., डिम्बकारी &c., महाशब्दकारी &c., क्षोभकारी &c., महाशब्देन or अतिशयतुमुलेन उत्सवकारी &c.

RIOTOUSLY, *adv.* अतिशयतुमुलेन, अतितुमुलेन, कोलाहलेन, महाशब्देन.

To RIP, *v.a.* (Tear) दृ (c. 10. दारयति -यितुं), विदृ, पद् (c. 10. पाटयति -यितुं), विपद्, विभिद्, निकृत्, विनिकृत्, विदारणं कृ; 'ripping open,' विदार्य्य.

RIP, *s.* विदारः -रणं -णा, विदरः, पाटनं, विपाटनं, विभेदः.

RIPE, *a.* (As fruit, &c.) पक्वः -क्वा -क्वं, परिपक्वः &c., पक्त्रिमः -मा -मं, विपक्त्रिमः &c., सुपक्वः -क्वा -क्वं, पाकिमः -मा -मं, पक्वतापन्नः -न्ना -न्नं, पक्वदशापन्नः &c., पक्वदशाप्राप्तः -प्ता -प्तं, परिणतः -ता -तं, पाकोन्मुखः -खा -खं, फलोन्मुखः &c., विनाशोन्मुखः &c., शृतः -ता -तं.—(Brought to perfection, complete) सिद्धः -द्धा -द्धं, सम्पन्नः -न्ना -न्नं, व्युत्पन्नः &c., प्रौढः -ढा -ढं.—(In years, &c.) प्रवृद्धः -द्धा -द्धं, वृद्धः &c., प्रौढः &c.—(Ready) उद्यतः -ता -तं, उन्मुख in comp., *see* READY.

To RIPEN, *v. n.* पक्वः -क्वा -क्वं भू, परिपक्वः -क्वा -क्वं भू, पच् in pass. (पच्यते), परिपच्, पक्वीभू, पक्वतां गम्. *See To* MATURE, *v. n.*

To RIPEN, *v. a.* पच् (c. 1. पचति, पक्तुं, c. 10. पाचयति -यितुं), पक्वं -क्वां कृ, परिपक्वं -क्वां कृ, पक्वीकृ, पाकं कृ or जन्. *See To* MATURE, *v. a.*

RIPENED, *p. p.* पक्वः -क्वा -क्वं, परिपक्वः &c., परिणतः &c., *see* MATURED.

RIPENING, *part.* (Making ripe) पाचकः -का -कं, पाचनः -ना -नं, परिपाकी -किणी &c.—(Becoming ripe) पच्यमानः -ना -नं, परिपच्यमानः &c.

RIPENESS, *s.* पाकः, परिपाकः, पक्वता -त्वं, परिपक्वता, पक्तिः *f.*, विपाकः, पक्वभावः, पक्वदशा, पक्वावस्था, परिणामः, परिणतिः *f.*, परिणतता. *See* MATURITY.

RIPPED, *p. p.* विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, विपाटितः &c.

RIPPLE, *s.* वीचिः -ची *f.*, वीचिका, ऊर्म्मिः -र्म्मी *f.*, ऊर्म्मिका, सूक्ष्मोर्म्मिः, भङ्गिः *f.*

To RIPPLE, *v. n.* चलोर्म्मिः -र्म्मिः -र्म्मि भू, चलवीचिः -चिः -चि भू, ऊर्म्मिमान् -मती -मद् भू, सवीचिः -चिः -चि भू, वीचिभङ्गुरः -रा -रं भू.

To RIPPLE, *v. a.* वीचियुक्तं -क्तां कृ, वीचिमन्तं -मतीं -मत् कृ, चलवीचिं कृ.

RIPPLING, *part.* चलोर्म्मिः -र्म्मिः -र्म्मि, चलवीचिः &c., वीचिमाली -लिनी &c.

To RISE, *v. n.* (Get up) उत्था (c. 1. उत्तिष्ठति -थातुं, rt. स्था), समुत्था; 'he rose from his seat,' आसनाद् उदस्थात् or उदतिष्ठत्; 'from bed,' शयनाद् उत्था, शयनं or शय्यां त्यज्, सुप्तोत्थितः -ता -तं भू.—(Move upward, ascend) ऊर्द्धं गम् (c. 1. गच्छति, गन्तुं), उद्गम्, समुद्गम्, उच्चैर् गम्, उच्चैर् व्रज् (c. 1. व्रजति -जितुं), उदि (c. 1. उदयति c. 2. उदेति -तुं, rt. इ), समुदि, अभ्युदि, उत्पत् (c. 1. -पतति -तितुं), ऊर्द्धम् आक्रम् (c. 1. -क्रमते -मितुं), आक्रम्, उद्वृत् (c. 1. -वर्त्तते -र्त्तितुं), आरुह् (c. 1. -रोहति -रोढुं), उच्चर् (c. 1. -चरति -रितुं), ऊर्द्धगतः -ता -तं भू, उद्गतः -ता -तं भू, आरोहणं कृ; 'the sun rises,' उदयति सूर्य्यः. The mountain behind which the heavenly bodies are supposed by the Hindus to rise is called उदयः, उदयपर्वतः &c., *see* MOUNTAIN.—(Become erect) उन्नम् (c. 1. -नमति -नन्तुं), उन्नतः -ता -तं भू, समुन्नम्, उत्था.—(Appear) दृश् in pass. (-दृश्यते), लक्ष् in pass., उत्पद् in pass., प्रतिभा (c. 2. -भाति -तुं), उद्भा, निर्भा, प्रभू, आविर्भू, प्रादुर्भू, आत्मानं दृश् in caus.—(Originate, issue, take rise) उत्पद् (c. 4. -पद्यते -पत्तुं), समुत्पद्, जन् (c. 4. जायते, जनितुं), प्रजन्, उपजन्, प्रभू, उद्भू, सम्भू, प्रसू (c. 1. -सरति -सर्त्तुं), निःसृ, विनिःसृ, उद्गम्, निर्गम्, प्रवृत् (c. 1. -वर्त्तते -र्त्तितुं), उदि, उत्पन्नः -न्ना -न्नं भू.—(Increase) वृध् (c. 1. वर्धते -र्धितुं), प्रवृध्, अधिकीभू, अधिकतरीभू, अधिकतरः -रा -रं भू, उत्तरोत्तरं वृध्.—(Be excited) उद्दीप्तः -प्ता -प्तं भू, उद्दीप् (c. 4. -दीप्यते -दीपितुं), उत्पद् in pass.—(From death) श्मशानाद् उत्था or समुत्था; 'all the dead

rose, सद्यो मृता उदतिष्ठत्.—(To heaven) स्वर्गारोहणं कृ.—(Be promoted) प्रतिपत्तिं or पदवृद्धिं प्राप्, श्रेष्ठपदे or उत्कृष्टपदे नियुक्तः -क्ता -क्तं भू.—(As the sea) क्षुभः -भा -भं भू.

Rise, *s.* (Getting up) उत्थानं, समुत्थानं, उत्थितिः *f.*—(Moving upwards, ascent) ऊर्द्ध्वगमनं, उर्द्ध्वगतिः *f.*, उद्गमः -मनं, समुद्गमः -मनं, उन्नतिः *f.*, उदयः -यनं, समुदयः, उद्वर्त्तनं, समुत्क्रमः, उत्पातः, उत्पतनं; 'falls and rises,' पातोत्पाताः *m. pl.*; 'rise of the sun,' सूर्य्योदयः.—(Origin, production) उत्पत्तिः *f.*, उद्भवः, उद्गमः, सम्भवः, प्रभवः, प्रवृत्तिः *f.*, मूलं, आरम्भः, आगमः, उपक्रमः, उपस्थितिः *f.*, उपस्थानं.—(Promotion) पदवृद्धिः *f.*, प्रतिपत्तिः *f.*—(Increase) वृद्धिः *f.*, प्रवृद्धिः *f.*, वर्धनं.—(To give rise to) उत्पद् (c. 10. -पादयति -यितुं), समुत्पद्, जन् (c. 10. जनयति -यितुं).

Risen, *p. p.* उत्थितः -ता -तं, अभ्युत्थितः &c., समुत्थितः &c., उद्गतः -ता -तं, समुद्गतः &c., प्रत्युद्गतः &c., उदितः &c., समुदितः &c., अभ्युदितः &c., उत्पतितः -ता -तं, समुत्पतितः &c., ऊर्द्ध्वगतः &c., उद्वर्त्तितः &c., उद्वृत्तः -त्ता -त्तं; 'from bed or sleep,' शयनोत्थितः -ता -तं, सुप्तोत्थितः &c., त्यक्तशय्यः -य्या -य्यं, त्यक्तल्पः -ल्पा -ल्पं.

Risibility, *s.* हसनशीलता, हसनशक्तिः *f.*, हसनेच्छा, हसनसामर्थ्यं.

Risible, *a.* हसनशीलः -ला -लं, हसनशक्तिकः -का -कं, हसनसमर्थः &c.

Rising, *s.* (Getting up) उत्थानं, समुत्थानं, उत्थितिः *f.*, समुत्थितिः *f.*, अभ्युत्थानं; 'from a seat,' आसनादुत्थानं; 'from bed,' शयनादुत्थानं; 'rising to receive a visitor,' प्रत्युत्थानं, प्रत्युद्गमः -मनं, अभ्युत्थानं.—(Ascent, going upwards) उदयः -यनं, उद्गमः, उन्नतिः *f.*, ऊर्द्ध्वगमनं, ऊर्द्ध्वगतिः *f.*, समुदयः, अभ्युदयः, समुद्गमः, उत्पतनं, समुत्पतनं, उत्पातः, उद्वर्त्तनं, आरोहः -हणं; 'of the sun,' सूर्य्योदयः; 'of a planet,' उच्चत्वः; 'of a sign,' लग्नं, होरा.—(Insurrection) प्रजाक्षोभः, प्रकृतिक्षोभः.—(Tumor), *see* the word.

Rising, *part.* उदयी -यिनी -यि (न्), उदयमानः -ना -नं, उत्पतन् -तन्ती -तत् (त्), उत्पतिता -त्री -तृ (तृ), उत्पतिष्णुः -ष्णुः -ष्णु, उदितः -ता -तं; 'rising sun,' प्रथमोदितसूर्य्यः; 'warmth of it,' प्रथमोदितादित्यतापः.

Rising-ground, *s.* उन्नतभूभागः, उन्नतभूमिभागः, उच्चभूभागः, उच्चस्थानं.

Risk, *s.* संशयः, शङ्का, सन्देहः, विकल्पः, भयं, भयहेतुः *m.*, सङ्कटं; 'of life,' जीवितसंशयः, *see* Jeopardy, Peril, Danger.

To risk, *v. a.* संशयस्थं -स्थां कृ, सन्देहस्थं -स्थां कृ, शङ्कास्थं -स्थां कृ, शङ्कास्पदीकृ, शङ्कास्पदं कृ. *See To* jeopard, hazard.

Risked, *p. p.* संशयितः -ता -तं, शङ्कास्पदीकृतः &c., सन्देहास्पदीकृतः &c.

Rite, *s.* (Religious observance) क्रिया, विधिः *m.*, विधानं, कर्म्म *n.* (न्), देवकर्म्म *n.*, दैवकर्म्म *n.*, दैवक्रिया, दैवक्रिया, दैवकार्य्यं, दैवकार्य्यं, संस्कारः, नियमः, रीतिः *f.*, कल्पः, संविधानं, आचारः, आचरणं, शास्त्रविधानं, शास्त्रविधिः *m.*, शास्त्रकर्म्म *n.*, शास्त्रोक्तकर्म्म *n.*, शास्त्रविधानं, शास्त्रविधिः *m.*, अनुष्ठानं, व्रतं, यमः, नियामः; 'marriage rite,' विवाहविधिः *m.*, *see* Marriage; 'funeral rite,' उत्तरक्रिया, अन्त्यक्रिया, अन्तसत्क्रिया, मृतशरीरसत्कर्म्म *n.* (न्), *see* Obsequies, Funeral; 'rite of investiture with the sacrificial thread,' उपनयनं, *see* Investiture; 'rite of oblation to the manes,' पितृकर्म्म *n.*, पितृक्रिया, *see* Manes. The following are the sanskaras, or rites purificatory of the bodies of the three classes in this life, and qualifying them for the next, explained in Manu Bk 2. 27 *et seq.*: 1. Sacrifice on conception, गर्भाधानं. 2. On the quickening of the fœtus, पुंसवनं. 3. A rite consisting of partition and arrangement of the hair of the mother in the fourth, sixth, or eighth month of gestation, सीमन्तोन्नयनं. 4. Giving the new-born infant honey and clarified butter out of a golden spoon, before separating the navel-string, जातकर्म्म *n.* 5. Naming the child on the tenth or twelfth day after birth, नामकर्म्म *n.* or नामकरणं. 6. Carrying the child out to see the sun in the fourth month after birth, निष्क्रमणं. 7. Feeding the child with boiled rice in the sixth month after birth, or on the cutting of the first tooth, अन्नप्राशनं. 8. Tonsure, or shaving the head all but one lock, in the first or third year after birth, चूडाकर्म्म *n.* or चूडाकरणं or चूडाकार्य्यं. 9. Investiture with a peculiar thread or cord, called the sacrificial thread, worn over the left shoulder and under the right, performed on youths of the three classes at ages varying from eight to sixteen, from eleven to twenty-two, and from twelve to twenty-four, respectively, उपनयनं. 10. Cutting off the hair entirely, performed on Brahmans at sixteen on Kshatriyas at twenty-two, and on Vaiśyas at twenty-four years of age, केशान्तः. 11. Ceremony performed by youths of the first class on returning from the house of their preceptor to that of their natural parents, समावर्त्तनं. 12. Marriage, in the thirty-sixth or eighteenth year, विवाहः.—(Inauspicious rite) अशुभकर्म्म *n.* (न्), अशुभकार्य्यं; 'rites and ceremonies,' आचारविचाराः *m. pl.*; 'performing a rite,' क्रियानुष्ठानं; 'mode of performing a rite,' क्रियाविधिः *m.*, प्रयोगः.

Ritual, *a.* (Pertaining to rites, consisting of them) वैधिकः -की -कं, वैधः -धी -धं, विधि in comp., विधिरूपः -पा -पं, विधिमयः -यी -यं, विध्युक्तः -क्ता -क्तं, विधिसम्बन्धी -न्धिनी &c., विधिविषयकः -का -कं, क्रियासम्बन्धी &c., क्रियाविषयकः &c., क्रिया in comp., शास्त्रोक्तः -क्ता -क्तं, आचारिकः -की -कं, काल्पः -ल्पी -ल्पं.

Ritual, *s.* क्रियापद्धतिः -तीं, संस्कारपद्धतिः *f.*, कर्म्मपद्धतिः *f.*, विधिपद्धतिः *f.*, विधानपद्धतिः *f.*, पद्धतिः -तीं, संस्कारशास्त्रं, विधिशास्त्रं, क्रियाविधिः *m.*, विधिः *m.*

Ritualist, *s.* क्रियाविधिज्ञः, संस्कारशास्त्रज्ञः, क्रियावान् *m.* (त्).

Rival, *s.* स्पर्धी *m.* (न्), प्रतिस्पर्धी *m.*, प्रतियोगी *m.* (न्), प्रतिपक्षः, सपत्नः, विजिगीषुः *m.*, जिगीषुः *m.*, *see* Rival, *a.*; 'a kingdom without a rival,' असपत्नं राज्यं; 'a rival wife,' सपत्नी.

Rival, *a.* स्पर्धी -र्धिनी -र्धि (न्), विस्पर्धी &c., प्रतिस्पर्धी &c., परिस्पर्धी &c., प्रतियोगी &c., विजिगीषुः -षुः -षु, जिगीषुः &c., परस्परविजिगीषुः &c., परस्पराभिवेच्छुः -च्छुः -च्छु, एकार्थेच्छुः &c., एकार्थाभिलाषी &c., एकार्थी &c., एकार्थदृष्टिः -ष्टिः -ष्टि, एकार्थप्रवृत्तः -त्ता -त्तं, एकार्थोद्युक्तः -क्ता -क्तं, संघर्षी &c., परस्परसंघर्षी &c., जयेच्छुः &c. अभिभवेच्छुः &c.

To rival, *v. a.* स्पर्ध् (c. 1. स्पर्धते -र्धितुं), विस्पर्ध्, प्रतिस्पर्ध्, आस्पर्ध् with instr. c., जि in des. (जिगीषति -षितुं), विजि in des., पराभिभवनाय or परस्पराभिवनाय यत् (c. 1. यतते -तितुं) or उद्योगं कृ, परजयार्थं यत्, परस्परं संघृष् (c. 1. -घर्षति -र्षितुं), एकार्थम् अभिलष् or आकांक्ष्, एकार्थप्रापणाय यत्; 'he rivals Indra,' शक्रेण or शक्रेण सह स्पर्धते; 'one who rivals the beauty of the moon,' चन्द्रच्छायापरिस्पर्धी.

Rivaling, rivalling, *part.* स्पर्धी -र्धिनी &c. *See* Rival, *a.*

RIVALRY, *s.* स्पर्धा or स्पर्द्धा, प्रतिस्पर्धा, आस्पर्धा, जिगीषा, विजिगीषा, प्रतियोगिता -त्वं, प्रतिपक्षता -त्वं, सापत्न्यं, सपत्नत्वं, संघर्षः, परस्परसंघर्षः, पराभिभवेच्छा, परस्पराभिभवेच्छा, परस्पराभिभवनाय उद्योगः, परजयेच्छा, परस्परजयेच्छा, एकार्थाभिलाषः, एकार्थाकांक्षा, एकार्थप्रापणाय परस्परोद्योगः, एकार्थदृष्टिः *f.*, एकार्थप्रवृत्तिः *f.*, अहम्पूर्विका.

RIVEN, *p. p.* विदीर्णः -र्णा -र्णं, विदारितः -ता -तं, छिन्नः -न्ना -न्नं, विभिन्नः &c.

RIVER, *s.* नदी, सरित् *f.*, सिन्धुः *f.*, अपगा, निम्नगा, स्रोतस् *n.*, कुल्या, स्रोतोवहा, श्रोतोवहा, स्रोतस्वती, स्रोतस्विनी, पयस्विनी, स्रवन्ती, द्रवन्ती, समुद्रगा, जलधिगा, सागरगामिनी, तरङ्गिणी, तटिनी, शैवलिनी, ह्रदिनी, ह्रादिनी, पश्चेतजा, रोधोवक्रा, रोधवक्रा, समुद्रदयिता, समुद्रकान्ता, कूलवती, कूलङ्कषा, धुनी, धेना, जन्नालिनी, द्वीपवती, निर्घूरिणी, उद्यः, नदः. This last is applied only to a river of which the personification is male, as the Indus सिन्धुः, Brahmaputra ब्रह्मपुत्रः, Sona शोणः, हिरण्यबाहुः; 'bed of a river,' नदीपात्रं, नदीभाण्डं; 'bank of a river,' नदीतीरं, नदीकूलं; 'current,' नदीवेगः, नदीरयः, नदीवेला; 'water of a river,' सरिज्जलं; 'source,' सरिन्मुखं; 'mouth,' सिन्धुसङ्गमः, सम्भेदः; 'watered by rivers,' नदीमातृकः -का -कं, जलमातृकः &c.; 'one who knows the course of rivers,' नदीज्ञः; 'bathing in a river,' नदीष्णः -ष्णा -ष्णं; 'the bend of a river,' नदीवङ्कः; 'relating to a river, नादेयः -यी -यं.—(River of heaven), स्वर्णदी, सुरनदी, *see* GANGES, MILKY-WAY.

RIVET, *s.* कीलः -लकः, लोहकीलकः, सूक्ष्मकीलकः, शलाका.

To RIVET, *v. a.* (Fasten with a rivet) कील् (c. 10. कीलयति -यितुं), कीलकेन बन्ध् (c. 9. बध्नाति, बन्द्धुं), कीलकबद्धं -द्धां कृ.—(Fix or fasten firmly) दृढं बन्ध्, दृढीकृ; 'to rivet the attention,' चित्ताभिनिवेशं कृ or जन्, अभिनिविष्टचित्तं -त्तां कृ.

RIVETED, *p. p.* कीलकबद्धः -द्धा -द्धं, कीलितः -ता -तं, दृढीकृतः -ता -तं; 'having the attention riveted,' अभिनिविष्टचित्तः -त्ता -त्तं; 'by sound,' नादलुब्धः &c.

RIVULET, *s.* अल्पनदी, क्षुद्रनदी, अल्पसरित् *f.*, क्षुद्रसरित् *f.*, अल्पाम्भस् *n.*, अल्पस्रोतस् *n.*, क्षुद्रस्रोतस् *n.*, कुसरित् *f.*

ROAD, *s.* मार्गः, पथः, पन्थाः *m.* (पथिन्), अध्वा *m.* (न्), वर्त्म *n.* (न्), वर्त्मनिः -नी *f.*, अयनं, वर्त्तनं -नी, वर्त्तनिः *f.*, सरणिः -णी *f.*, सृतिः *f.*, पदविः -वी, पद्धतिः -ती *f.*, पद्या, पद्वा *m.* (न्), पद्वः, उपनिष्क्रमणं, सञ्चरः, एकपदी, एकपाद्, तरः, वीथिः *f.*, शरणिः *f.*, माचः, माठः, माठ्यः, प्रपाथः, पित्सलं, खुल्लमः; 'public road, high road,' राजमार्गः, राजपथः, महापथः, महावर्त्म *n.*; 'a good road,' सुपथः, सुपन्थाः *m.*, अतिपन्थाः *m.*, सत्पथः, सन्मार्गः; 'a bad road,' कुपथः, कुमार्गः, कापथः, विपथः, कदध्वा *m.* (न्), दुरध्वः, व्यध्वः; 'a wrong road,' विमार्गः, उन्मार्गः, विपथः, उत्पथः; 'unbeaten road,' अक्षुण्णमार्गः; 'a common road,' प्रचारः; 'difficult road,' दुर्गः, दुर्गमार्गः, दुर्गसञ्चरः, दुर्गमवर्त्म *n.*, कान्तारः -रं; long and lonesome road,' प्रान्तरं, शून्यमार्गः; 'place where four roads meet,' चतुष्पथं, शृङ्गाटं -टकं; 'where three roads meet,' त्रिकं; 'the want of a road,' अपथं, अपन्थाः *m.*; 'road-side,' मार्गपार्श्वः; 'on the road-side,' मार्गपार्श्वे; 'on the road,' पथि, मार्गमध्ये, अध्वनि, अध्वमध्ये.

To ROAM, *v. n.*, भ्रम् (c. 4. भ्राम्यति, भ्रमितुं), परिभ्रम्, अट् (c. 1. अटति -ते -टितुं), पर्यट्, विचर् (c. 1. -चरति -रितुं), संचर्, इतस्ततो भ्रम् or चर् or विह् (c. 1. -हरति -हर्त्तुं), गाह् (c. 1. गाहते -हितुं), भ्रमणं कृ, परिभ्रमणं कृ, विहारं कृ; 'as a mendicant,' परिव्रज्, व्रज्.

ROAMING, *s.* भ्रमणं, परिभ्रमणं, इतस्ततो भ्रमणं, नानादिग्भ्रमणं, विहारः, विहरणं, अटनं, पर्यटनं, अटाट्या; 'as of a religious mendicant,' व्रज्या, परिव्रज्या, व्रजनं, व्रजितं.

ROAMING, *part.* भ्राम्यन् -म्यन्ती -म्यत् (त्), भ्रमन् &c., परिभ्रमन्, भ्रमणकारी -रिणी -रि (न्), अटमानः -ना -नं, विहारी &c., परिव्रजन् &c., व्रज्यावान् -वती, वत् (त्).

ROAN, *a.* (Horse) शुक्लबिन्दुचित्रितो नीलवर्णोश्वः or श्यामवर्णोश्वः.

To ROAR, *v. n.* (Make a loud continued sound) गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, नर्द् (c. 1. नर्दति -र्दितुं), विनर्द्, रु (c. 2. रौति, रवितुं), विरु, संरु, रस्, वाश्, रट्, गज्, हम्भ (nom. हम्भायते -यितुं), हुङ्कृ, हूङ्कृ, हुङ्कारं कृ, अनुहुङ्कृ, गर्जनं कृ.—(Cry out, bawl) नद् (c. 1. नदति -दितुं), विनद्, प्रणद्, उत्क्रुश् (c. 1. -क्रोशति -क्रोष्टुं), विक्रुश् प्रक्रुश्, चित्कारं कृ, चीत्कारं कृ, चीत् शब्दं कृ, घुघ्, प्रक्ष्विड् (c. 1. क्ष्वेडति -डितुं), नादं कृ; 'from pain,' आर्त्तनादं कृ.

ROAR, ROARING, *s.* (Loud continued sound) गर्जनं -ना, गर्जितं, परिगर्जनं, नर्दनं, नर्दितं, रावः, विरावः, दीर्घध्वनिः *m.*, दीर्घरावः, दीर्घरुतं, दीर्घनिर्घोषः, रासः, हम्भा, हम्भारवः, घनध्वनिः *m.*, गम्भीरशब्दः, गम्भीरध्वनिः *m.*, हुङ्कारः, हुङ्कृतं, हुङ्कृतिः *f.*, सूत्कारः, चुक्कारः, घर्घरितं.—(Crying out) नादः, उत्क्रोशः, चित्कारः, चीत्कारः, घोषः, निर्घोषः, उद्घोषः, उत्क्रुष्टं, विक्रुष्टं, क्ष्वेडितं, प्रक्ष्वेडितं.—(Of a lion) सिंहनादः -दकः, सिंहध्वनिः *m.*, सिंहनर्दः -र्दनं.—(Of the clouds) मेघनिर्घोषः, घनध्वनिः *m.*, मेघनादः, मेघगर्जनं, घनशब्दः, घनस्वनः.—(Of the sea) समुद्रनादः, महार्णवस्वनः.

ROARING, *part.* गर्जन् -र्जन्ती -र्जत् (त्), गर्जनकारी -रिणी -रि (न्), नर्दन् &c., विनर्दन् &c., नर्दी &c., नर्दमानः -ना -नं, नादी &c., रावी -विणी &c.; 'like a lion,' सिंहनर्दी &c., सिंहनादी &c.

To ROAST, *v. a.* भर्ज्ज् (c. 1. भृर्ज्जति -ते, भर्ष्टुं, भर्ष्टुं), भृज् (c. 1. भर्जते -र्जितुं), पच् (c. 1. पचति, पक्तुं); 'on a spit,' शूले आरोप्य or समारोप्य पच्, शूलाकृ, भट्टित्रीकृ, भट्टित्रं -त्रां कृ, शूलाकृत्य पच् or संस्कृ or सिद्धीकृ.—(Heat) तप्, दह्.

ROASTED, ROAST, *a.* भृष्टः -ष्टा -ष्टं, भर्ष्टः &c., भर्जितः -ता -तं, पाचितः -ता -तं, परिपाचितः &c., अङ्गारपरिपाचितः &c.; 'on a spit,' शूलाकृतः -ता -तं, शूल्यः -ल्या -ल्यं, भट्टित्रः -त्रा -त्रं, 'roast meat,' शूलिकं, शूल्यं, शूल्यमांसं, भट्टित्रं.

ROASTING, *s.* भर्जनं, पाचनं, अङ्गारपरिपाचनं, शूलाकरणं.

To ROB, *v. a.* धनद्रव्यादि हृ (c. 1. हरति, हर्त्तुं) or अपहृ or अभिहृ, चुर् (c. 10. चोरयति -यितुं), स्तेन् (c. 10. स्तेनयति -यितुं), मुष् (c. 9. मुष्णाति, मोषितुं), परिमुष्, प्रमुष्, लुण्ट्, लुण्ठ्, कल्, लुप्, विलुप्. *See To* STEAL, PLUNDER.

ROBBED, *p. p.* हृतधनः -ना -नं, हृतद्रव्यः -व्या -व्यं, अपहृतद्रव्यः &c., हृतस्वः -स्वा -स्वं, लुण्ठितः -ता -तं, मुषितः -ता -तं, अपहारितः &c.

ROBBER, *s.* चौरः, प्रसह्यचौरः, दस्युः *m.*, धनहारी *m.* (न्) धनहर्त्ता *m.* (र्त्तृ), अपहारकः, अपहारी *m.* (न्), अभिहर्त्ता *m.*, परस्वापहारी *m.*, धनहरः, स्तेनः, साहसिकः, तस्करः, लुण्टाकः, स्तेयकृत् *m.*, स्तेयकारी *m.*, परास्कन्दी *m.*, रजनीचरः, निशाचरः, मोषकः, परिमोषी *m.*, माचलः, वटावीकः, प्रतिरोधी *m.* (न्), प्रतिरोधकः

ROBBERY, *s.* चौर्य्यं, स्तेयं, चौरिका, चौरत्वं, स्तैन्यं, अपहारः, धनापहारः -रणं, अपहरणं, अपहारणं, धनापहरणं, अभिहारः, अभ्याहारः, धनाभिहारः, अभिग्रहणं, हरणं, धनहरणं, परस्वहरणं, परस्वापहरणं, लुण्ठनं, लुण्टनं, मोषणं, मुष्टं, तास्कर्य्यं, साहसं.

ROBE, *s.* वसनं, मानवसनं, वस्त्रं, मानवस्त्रं, मानपरिच्छदः, मानसूचकवस्त्रं,

सभावस्त्रं, सभावसनं, उत्कृष्टवस्त्रं, राजकीयवस्त्रं, राजवस्त्रं, राजवसनं.

To ROBE, *v. a.* or *n.* वसनं or वस्त्रं परिधा, मानवस्त्रं परिधा. *See To* DRESS.

ROBED, *p. p.* मुनस्त्रवेष्टितः -ता -तं, मानवस्त्रवेष्टितः &c., सवसनः -ना -नं.

ROBUST, *a.* दृढाङ्गः -ङ्गा -ङ्गं, दृढशरीरः -रा -रं, मांसलः -ला -लं, वज्रदेहः -हा -हं, दृढदेहः &c., व्यूढोरस्कः -स्का -स्कं, पृथुशरीरः -रा -रं, उरस्वान् -स्वती -स्वत् (त्), उरसिलः -ला -लं, बलवान् &c., महाबाहुः &c., *see* LUSTY; 'to be robust,' उरस् (nom. उरस्यति).

ROBUSTLY, *adv.* मांसलवत्, बलवत्, महाबलेन, सवीर्य्यं, समस्त्रं, सबलं.

ROBUSTNESS, *s.* दृढाङ्गता, मांसलता -त्वं, शरीरदृढता, वीर्य्यं. *See* LUSTINESS

ROCK, *s.* शिला, स्थूलपाषाणः, स्थूलप्रस्तरः, स्थूलोपलः, बृहदुपलः, बृहत्पाषाणः, बृहदश्मा *m.* (न्), स्थूलदृषद् *f.*, पाषाणः, अश्मा *m.* (न्), प्रस्तरः, दृषद् *f.*, उपलः, ग्रावा *m.* (न्), शैलः, अलघूपलः, निश्चलाङ्गः, काठः, कूपकः, कूपिका, पाराहकः, पराहकः, पारटीटः; 'a rock fallen from a height,' गडशैलः; 'hard as a rock,' शिलाघनः -ना -नं, शिलादृढः -ढा -ढं, शैलसारः -रा -रं.

To ROCK, *v. a.* इतस्ततः प्रचल् (c. 10. -चालयति -यितुं) or संचल् or विचल् or चल्, आन्दोलनं कृ, आन्दोल (c. 10. आन्दोलयति -यितुं).

To ROCK, *v. n.* इतस्ततो विचल् (c. 1. -चलति -लितुं) or प्रचल्, दोल. *See To* REEL.

ROCKED, *p. p.* इतस्ततो विचालितः -ता -तं or सञ्चालितः &c., प्रचालायितः &c.

ROCKET, *s.* अग्निबाणः, खधूपः, भुशुण्डी, शतघ्नी, तारा.

ROCKING, *part.* or *a.* दोलायमानः -ना -नं, इतस्ततो विचलमानः -ना -नं.

ROCK-SALT, *s.* सिन्धुलवणं, सिन्धुजं, सिन्धूद्भवं, सिन्धुमन्थजं, सिन्धूपलं, सिन्धुजन्म *n.* (न्) सितशिवं.

ROCKY, *a.* शैलः -ली -लं, शिलेयः -यी -यं, शिलामयः -यी -यं, शैलमयः &c., शिलापूर्णः -र्णा -र्णं, शिलावान् -वती -वत् (त्), अश्मरः -रा -रं, अश्ममयः &c., आश्मनः -नी -नं, दार्ढदः -दी -दं, औपलः -ली -लं, प्रस्तरमयः &c., उपलपूर्णः &c.

ROD, *s.* दण्डः, वेत्रं, यष्टिः *m. f.*, वेणुः *m.*, वेणुदलं, शलाका, शल्यं; 'metallic rod,' लोहदण्डः, लोहयष्टिः *m. f.*—(For punishing) दण्डः, ताडनी, वेणुः *m.*, वेणुदलं.

RODOMONTADE, *s.* गर्वितकाक्यं, अम्भिकवाक्यं, शून्यकथा. *See* RANT.

ROE, *s.* (Female deer) हरिणी, मृगी मृगवधूः *f.*—(Of fish) मीनाण्डं.

ROGUE, *s.* धूर्त्तः, कितवः, वञ्चकः, प्रवञ्चकः, कूटकः, कूटकारः, शठः प्रतारकः, तस्करः, कुहकः, कपटिकः, छित्वरः, कैरवः, चाटः, शोठः, स्थगः, आन्वीक्षकः, पिशुनः.

ROGUERY, ROGUISHNESS, *s.* धूर्त्तता, कैतवं, कूटता, तस्करता, तस्करविद्या, तास्कर्य्यं, शठता, शाठ्यं, वञ्चनं, कपटः, वञ्चकता, पैशुन्यं, पैशुनं, दण्डाजिनं.

ROGUISH, *a.* धूर्त्तः -र्त्ता -र्त्तं, शठः -ठा -ठं, कितवः &c. *See* KNAVISH.

To ROLL, *v. a.* (Cause to turn or revole) लुड् (c. 10. लोठयति -यितुं), प्रलुड्, आवृत् (c. 10. -वर्त्तयति -यितुं), व्यावृत्, अनुवृत्, विवृत्, भ्रम् (c. 10. भ्रमयति -यितुं), संसृ (c. 10. -सारयति -यितुं), सृ, संचल् (c. 10. -चालयति -यितुं), घूर्ण् (c. 10. घूर्णयति -यितुं), परिघूर्ण्; 'he rolls the wheel along the ground,' चक्रम् अनुवर्त्तयति भूमौ; 'to roll back,' पश्चाद् अनुवृत्, पश्चाद् वृत्, व्यावृत्, पश्चात् संसृ; 'to roll away,' अपवृत्, अपसृ, समपसृ.—(Roll up into a ball) गुटिकीकृ, गलिकीकृ, गोलीकृ, पिण्डीकृ, वर्त्तुलीकृ, लुण्डीकृ.—(Wrap around) अवगुण्ठ् (c. 10. -गुण्ठयति -यितुं), परिवेष्ट्.

To ROLL, *v. n.* (Turn round) लुड् (c. 6. लुठति -ठितुं), प्रलुड्, परिलुड्, लुड् (c. 1. लोटति -टितुं), लुड्, लुल्, आवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, व्यावृत्, परिवृत्, विपरिवृत्, उपावृत्, परावृत्, सम्परिवृत्, भ्रम् (c. 1. भ्रमति -नितुं), परिभ्रम्, घूर्ण् (c. 1. घूर्णति -ते -र्णितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, लुठनं कृ: 'the dog rolled at his master's feet,' कुक्कुरः स्वामिचरणयोर् लुलोठ; 'he rolls on the ground,' भूमौ परावर्त्तते or लुठनं करोति.—(Roll about, toss about) इतस्ततः विचल् (c. 1. -चलति -लितुं) or प्रचल्, इतस्ततो लुड् or लुल्, दोल् (nom. दोलायते), घूर्ण्; 'one who rolls about in sleep,' प्रचलायितः, घूर्णितः; 'one whose eyes roll about,' प्रचलितनयनः, लोलाक्षिः.—(Roll on) अतिवृत्; 'time rolls on,' अतिवर्त्तते कालः.—(A horse that rolls itself on the ground) उपावृत्तः, लुठितः.

ROLL, *s.* (Act of rolling) लुठनं.—(A mass made round, thing rolled up) वर्त्तुलः, गोलकः, पिण्डः, गुटिका, दीर्घगोलकः; 'a roll of cotton,' तूलनाली.—(Round loaf) उण्डेरकः, संयावः.—(List) नामावलिः -ली *f.*, *see* LIST.

ROLLED, *p. p.* लुठितः -ता -तं, लोठितः &c प्रलोठितः &c., आवर्त्तितः -ता -तं, विवर्त्तितः &c., अनुवर्त्तितः &c.; 'rolled back,' व्यावृत्तः -त्ता -त्तं, व्यावर्त्तितः -ता -तं; 'rolled up,' वर्त्तुलीकृतः -ता -तं, पिण्डीकृतः &c., लुण्डीकृतः &c., संश्यानः -ना -नं.

ROLLER, *s.* (Instrument) चक्रं, वर्त्तनयन्त्रं, वर्त्तनी, परिवर्त्तकयन्त्रं, परिवर्त्तनी, वर्त्तुलयन्त्रं.—(For cakes) वेल्लनं.—(Bandage) पट्टः

ROLLING, *s.* लुठनं, लोठनं, लोटनं, लुण्ठनं, परिलोठनं, प्रलोठनं, लुण्ठा, लुण्टा, लुण्ठी, आवर्त्तनं, उपावर्त्तनं, वेल्लनं, आघूर्णनं.

ROLLING, *part.* लुठन् -ठन्ती -ठत् (त्), लुण्ठन् &c., लोलमानः -ना -नं, लोलः -ला -लं, लुठितः -ता -तं, प्रचलितः &c., प्रचलायितः -ता -तं, इतस्ततो विचलमानः -ना -नं; 'having a rolling eye,' लोलनयनः -ना -नं, प्रचलितनयनः &c.; 'a river rolling gold,' कनकवाहिनी; 'rolling and tossing about in sleep,' प्रचलायितः -ता -तं, घूर्णितः &c.

ROLLING-PIN, *s.* (For making cakes) वेल्लनं

ROMANCE, *s.* अद्भुतकथा, कल्पितकथा, कूटार्थकथा, कूटार्थोपाख्यानं, अभूतकथा, असम्भवकथा, मृषार्थककथा, भण्डपुराणं, माहात्म्यं, अद्भुतरसात्मका कथा.

To ROMANCE, *v. n.* अद्भुतकथां कृ or रच् or लिख्, अद्भुतकथोपाख्यानं कृ.

ROMANTIC, *a.* (Said of persons) अद्भुतप्रियः -या -यं, असम्भवप्रियः &c., विलक्षणप्रियः &c., विचित्रप्रियः &c., लोलः -ला -लं, अद्भुतवृत्तिः -त्तिः -त्ति, अशृङ्खलवृत्तिः &c., लोलवृत्तिः &c.—(Said of things) अद्भुतरसरूपः -पा -पं, अद्भुतरसात्मकः -का -कं, अद्भुतः -ता -तं, विलक्षणः -णा -णं, विचित्रः -त्रा -त्रं, वासनाकल्पितः -ता -तं, आश्चर्य्यकरः -रा -रं, चित्तापहारी -रिणी &c., हृदयग्राही &c., मनोहरः &c.—(Improbable) असम्भवः -वा -वं.

ROMP, *s.* (Boisterous girl) प्रगल्भा, प्रचण्डा, चण्डी, अधीरा, निर्लज्जा, विलासिनी, अविनीता, चञ्चला, चपला, क्रीडाशीला, खेलाशीला.—(Noisy or rude play) अविनयक्रीडा, अविनयखेला, अविनीतक्रीडा, अशिष्टक्रीडा, शब्दसहितक्रीडा.

To ROMP, *v. n.* अविनयेन क्रीड् (c. 1. क्रीडति- ते -डितुं) or दिव् (c. 4. दीव्यति -ते, देवितुं), अतिशब्देन क्रीड्, महाशब्देन क्रीड् or क्रीडां कृ or खेलां कृ.

ROMPING, *part.* or *a.* अविनयक्रीडापरः -रा -रं, अविनीतः -ता -तं, अविनयदेवी -विनी &c.

ROOD, *s.* No exact equivalent in Sanskrit. दण्डः is a pole

of four cubits. *See* the measures of length under MEASURE.

ROOF, *s.* पटलः-लं -ला, छादनं, आच्छादनं, छादं, चालः, कुटलं, कटनं, छदिस् *f.*; 'the wooden frame of a roof,' वलभिः -भी *m. f.*, गोपानसी; 'the edge,' वलीकः -कं, नीधी, नीव्रं.—(Of the mouth) तालु *n.*, तालुका.

To ROOF, *v. a.* पटलेन आच्छद् (c. 10. -छादयति -यितुं) or आवृ (c. 5. -वृणोति -वरितुं -रीतुं), सपटलं -लां कृ, पटल (nom. पटलयति -यितुं).

ROOFED, *p.p.* सपटलः -ला -लं, पटलाच्छादितः -ता -तं, पटलाच्छन्नः -न्ना -न्नं.

ROOFLESS, *a.* पटलहीनः -ना -नं, निष्पटलः -ला -लं, निराश्रयः -या -यं.

ROOK, *s.* काकजातीयः पक्षी, काकः, वायसः. *See* CROW.

ROOKERY, *s.* काकाश्रयः, काकालयः, काकाशयः, काकस्थानं, काकायतनं.

ROOM, *s.* (Space, compass, free course) अवकाशः, प्रसरः, अवसरः, अन्तरं, विषयः, अपसारणं; 'want of room,' अनवकाशः; 'the water flows out to make room for the stone,' पाषाणाय विषयं दत्त्वा जलं वहिर्गच्छति; 'room! make room!' अपसर, अवसर.—(Place for reception or admission of any thing) स्थानं, आस्पदं, पदं, भूमिः *f.*, प्रदेशः; 'room for suspicion,' शङ्कास्पदं; 'room for fear,' भयस्थानं; 'there was no room to hold all,' सर्वधारणाय स्थानं नाभवत्.—(Opportunity) अवसरः, अवकाशः.—(Stead, lieu) स्थानं, स्थलं, भूमिः *f.*; 'in the room of,' स्थाने, भूमौ, स्थले.—(Apartment) शाला -लिका, आगारः -रं, कोष्ठः -ष्ठकं, गृहं, कक्षः, कुटी, आवासः, प्रकोष्ठः, स्थलं -ली; 'inner room,' उपरोधकं, अन्तर्गृहं, गर्भगृहं, गर्भागारं, गर्भः; 'top room, upper room,' शिरोगृहं, चन्द्रशालिका, उपरिशाला.

ROOMINESS, *s.* सावकाशत्वं, विस्तीर्णता, विशालता, असम्बाधता, विपुलता.

ROOMY, *a.* सावकाशः -शा -शं, असम्बाधः -धा -धं, विस्तीर्णः -र्णा -र्णं, विपुलः -ला -लं, विशालः -ला -लं, विस्तृतः -ता -तं.

ROOST, *s.* पक्षिणां वासयष्टिः *m.* or निवासयष्टिः *m.* or शयनयष्टिः, पक्षिणां वासदण्डः or वासस्थानं or निलयनस्थानं.

To ROOST, *v. n.* पक्षिवत् तरुशाखायां or दण्डाग्रे स्वप् (c. 2. स्वपिति -तुं) or शी (c. 2. शेते, शयितुं), यष्ट्यग्रे or तरुशाखायां स्वप्नार्थं निली (c. 4. -लीयते -लेतुं) or निवस् or अधिवस् or वस् or निषद् or अवस्था or आश्रि.

ROOSTING, *part.* तरुशाखायां निलीयमानः -ना -नं, तरुशायी -यिनी -यि (न्).

ROOT *s.* (That part of a plant or tree which enters the earth) मूलं, अंघ्रिः *m.*, अंहिः *m.*, ब्रध्नः, ब्रघ्नः, पादः, चरणः -णं, पदं, वृक्षमूलं, वृक्षांघ्रिः *m.*; 'firm roots,' दृढमूलं, धरणमूलं; 'having firm roots,' दृढमूलः -ला -लं, बद्धमूलः &c.; 'to the roots, by the roots,' आमूलं, समूलं, मूलतस्; 'to pluck up by the roots,' उन्मूल् (c. 10. -मूलयति -यितुं), समूलं or आमूलम् उत्पद्; 'from root to top,' आमूलशिखरं, आमूलचूडं; 'to take root,' मूलं बन्ध्; 'fibrous root,' शिफा, जटा; 'from a radicant branch,' अवरोहः; 'bulbous root,' कन्दः -न्दं; 'root-digger,' मूलोत्पाटजीवी *m.*—(Lower part of any thing) अधोभागः, अधमभागः, जाहः; the latter is only applied to parts of the body of animals; as, 'the root of the tail,' पुच्छजाहः; 'of the hair,' केशजाहः.—(Original, source, first cause) मूलं, बीजं, योनिः *m. f.*, आदिः *m.*, हेतुः *m.*, मूलहेतुः *m.*, प्रथमहेतुः *m.*, निदानं, कारणं, मूलकारणं, आदिकारणं, आदिहेतुः *m.*, गर्भः; 'having for its root,' मूल or मूलक in comp.; as, 'happiness, having its root in contentment,' सन्तोषमूलकं सुखं; 'strife having its root in avarice,' लोभमूलः कलहः.—(Root of a word, radical word) शब्दयोनिः *f.*, प्रकृतिः *f.*; 'relation of a root to its ramification,' प्रकृतिविकृतिभावः.—(Of a number) मूलं.—(Of a square or cube) पदं, मूलं; 'square root,' वर्गमूलं, वर्गपदं; 'cube-root,' घनमूलं, घनपदं.

To ROOT, *v. a.* (Plant deep in the earth) बद्धमूलं -लां कृ, दृढमूलं -लां कृ, दृढं रुह् in caus. (रोपयति -यितुं), दृढं निखन्, दृढरोपणं कृ.—(Root up) उन्मूल् (c. 10. -मूलयति -यितुं), समुन्मूल्, मूलात् or समूलम् उद्धृ (c. 1. -हरति -हर्तुं) or समुद्धृ or उत्पद् (c. 10. -पाटयति -यितुं) or उच्छिद् (c. 7. -च्छिनत्ति -छेत्तुं) or व्यपरुह् in caus.

To ROOT, *v. n.* मूलं बन्ध् (c. 9. बध्नाति, बन्द्धुं), बद्धमूलः -ला -लं भू.

ROOTED, *p. p.* बद्धमूलः -ला -लं, दृढमूलः &c.; 'rooted up,' उन्मूलितः -ता -तं, उच्छिन्नमूलः -ला -लं, निकृत्तमूलः &c., उद्धृतमूलः &c., उत्पाटितः -ता -तं, उत्खातः &c.

ROPE, *s.* रज्जुः *m. f.*, गुणः, सूत्रं, दामा *f.* (न्), दाम *n.* (न्), दामनी, वराटकः, वराटः, वटाकरः, शुल्वः, पाशः, सन्दानं, शुल्बं, गलः, पवित्रकं, वटः -टी -टं, उड्डाहिनी, सुष्मं, पाणिसंख्या, वटीगुणः; 'of a ship,' नौरज्जुः *m. f.*; 'of a well,' उड्डाटनं, घटीयन्त्रं; 'hanging by a rope,' रज्ज्वलम्बी *m.* (न्).

To ROPE, *v. n.* रज्जुं बन्ध्, सूत्रं बन्ध्, सूत्ररूपेण विततीभू.

ROPE-DANCER, *s.* कलायनः, सूत्रायनः, रज्जुयायी *m.* (न्), प्लवकः, केलकः.

ROPE-LADDER, *s.* रज्जुनिर्म्मितसोपानं, सूत्रसोपानं, रज्जुसोपानं.

ROPE-MAKER, *s.* रज्जुकारः -रकः, रज्जुकारी *m.* (न्), रज्जुकृत्, गुणकारः.

ROPINESS, *s.* रज्जुत्वं, गुणत्वं, ससूत्रता, सूत्रपूर्णता, सान्द्रता, श्यानता.

ROPY, *a.* रज्जुगुणकः -का -कं, श्यानः -ना -नं, सूत्रमयः -यी -यं.

ROSARY, *s.* जपमाला, अक्षमाला, अक्षसूत्रं, जपसूत्रं, माला, सूत्रं, स्मरणी; 'fingers used as a rosary,' करमाला.

ROSE, *s.* (The tree) जवापुष्पः, ओड्रपुष्पः, पिण्डपुष्पः, हेमपुष्पः, जवा, जपा, ओड्रः, उड्रः, उद्रः.—(Flower) जवा, जपा, जवापुष्पं, ओड्रपुष्पं, हेमपुष्पं.

ROSE-APPLE, *s.* (The tree) जम्बूः *f.*, जम्बुः *f.*, जम्बुकः, जम्बूकः; 'a large kind,' राजजम्बूः *f.*—(The fruit) जम्बूः *f.*, जम्बुः *f.*, जम्बु *n.*, जाम्बवं, जम्बुफलं.

ROSE-COLORED, ROSEATE, *a.* पाटलः -ला -लं, पाटलवर्णः -र्णा -र्णं, जवावर्णः &c.

ROSE-WATER, *s.* पुष्पद्रवः, जवापुष्पद्रवः, जवापुष्पजलं.

ROSIN, *s.*, *see* RESIN.

ROSY, *a.* (Rose-colored) पाटलः -ला -लं, जवावर्णः -र्णा -र्णं.—(Formed like a rose, full of roses) जवारूपः -पा -पं, जवामयः -यी -यं.

To ROT, *v. n.* गल् (c. 1. गलति -लितुं), विगल्, गलितः -ता -तं भू, विगलितः -ता -तं भू, विली (c. 4. -लीयते -लेतुं), प्रविली, क्षि (c. 4. क्षीयते), दुर्गन्धः -न्धा -न्धं भू.

To ROT, *v. a.* गल् (c. 10. गलयति, गालयति -यितुं), विगल्, गलितीकृ, विगलितीकृ, विली in caus. (-लापयति -यितुं).

ROTATION, *s.* (Circular motion of a wheel, &c.) आवर्त्तः -र्त्तनं, आवृत्तिः *f.*, परिवर्त्तः -र्त्तनं, परिवृत्तिः *f.*, चक्रावर्त्तनं, चक्रावर्त्तः, चक्रगतिः *f.*, भ्रमणं, भ्रान्तिः *f.*, घूर्णनं, घूर्णिः *f.*—(Vicissitude of succession) पर्य्यायः, पर्य्ययः, विपर्य्ययः, आनुपूर्व्यं, आनुपूर्वी, क्रमः, परिवर्त्तनं; 'in rotation,' पर्य्यायेण, पर्य्यायानुसारेण, पर्य्यायानुक्रमेण, चक्रवत्.

ROTATORY, ROTARY, *a.* चक्रवदावर्त्ती -र्त्तिनी -र्त्ति (न्), चक्रावर्त्ती &c., चक्रवत्परिवर्त्ती &c., चाक्रिकः -की -कं, चक्रगतिः -तिः -ति, चक्रगामी -मिनी &c.; 'rotatory motion,' चक्रावर्त्तः, चक्रवदावर्त्तः.

ROTE, *s.* शब्दावर्त्तनं, शब्दावृत्तिः *f.*, शब्दमात्रावर्त्तनं, आवर्त्तनं, अभ्यासः, अभ्यसनं, रूपं; 'to learn by rote,' शब्दावर्त्तनं कृ, अभ्यस् (c. 4.

-अस्यति -सितुं); 'learnt by rote,' मुखस्थः -स्था -स्थं, कण्ठस्थः &c., अभ्यस्तः -स्ता -स्तं.

ROTTEN, *a.* गलितः -ता -तं, विगलितः &c., विलीनः -ना -नं, विशीर्णः -र्णा -र्णं, शीर्णः &c., क्षीणः -णा -णं, पूतः -ता -तं, पूतीभूतः &c., दुर्गन्धः -न्धा -न्धं.—(Unsound) क्षीणसारः -रा -रं, क्षीणसत्त्वः -त्त्वा -त्त्वं, असारः -रा -रं.

ROTTENNESS, *s.* गलितत्वं -ता, विगलितत्वं, क्षीणता, विलीनता, पूतत्वं, असारता.

ROTUND, ROTUNDITY, *s.* *See* ROUND, ROUNDNESS.

ROTUNDA, ROTUNDO, *s.* वर्तुलगृहं, वर्तुलभवनं, वर्तुलशाला.

To ROUGE, *v. a.* सौन्दर्यवर्धनार्थं कपोलौ रञ्ज् (c. 10. रञ्जयति -यितुं) or रक्तवर्णीकृ or रक्तेण लिप्.

ROUGH, *a.* (Not smooth or even) विषमः -मा -मं, असमः -मा -मं, असमानः -ना -नं, अश्लक्ष्णः -क्ष्णा -क्ष्णं, रूक्षः -क्षा -क्षं, रूक्षः -क्षा -क्षं.—(Rugged) रूक्षः -क्षा -क्षं, रूक्षः &c., परूषः -षा -षं.—(To the touch) दुःस्पर्शः -र्शा -र्शं, दुःखस्पर्शः -र्शा -र्शं.—(Harsh, not soft) परूषः -षा -षं, रूक्षः -क्षा -क्षं, रूक्षः &c., परूषवृत्तिः -त्तिः -त्ति, कर्कशः -र्शा -र्शं, कठिनः -ना -नं, अमृदुः -दुः -दु, असमृणः -णा -णं, असौम्यः -म्या -म्यं, अस्निग्धः -ग्धा -ग्धं, अकोमलः -ला -लं.—(Severe) निष्ठुरः -रा -रं, कर्कशः -र्शा -र्शं, उग्रः -ग्रा -ग्रं, कटुः -टुः -टु, कठोरः -रा -रं. (Coarse, not finished, not polished) असंस्कृतः -ता -तं, अपरिष्कृतः &c., असंस्कारितः &c., अशिष्टः -ष्टा -ष्टं, असभ्यः -भ्या -भ्यं, घनः -ना -नं, स्थूलः -ला -लं; 'rough measurement,' स्थूलमानं; 'to measure in a rough way,' स्थूलान्तरेण मा.—(Clumsy) स्थूलः -ला -लं, अनिपुणः -णा -णं, अदक्षः -क्षा -क्षं, अकुशलः -ला -लं, अपटुः -टुः -टु.—(With waves or tempest, as the sea) क्षुभ्रः -भ्रा -भ्रं, व्याक्षुभ्रः &c., विक्षुभ्रः &c., संक्षुभ्रः &c., अनिलक्षुभ्रः &c., पवनक्षुभ्रः &c., वायुक्षुभ्रः &c., पवनाहतः -ता -तं, तरङ्गाकुलः -ला -लं, महातरङ्गः -ङ्गा -ङ्गं, वृहत्तरङ्गः &c., तरङ्गितः -ता -तं, वेलाकुलः -ला -लं; 'a rough sea,' क्षुभ्रार्णवः, वायुक्षुभ्रसमुद्रः, वानं.—(Having a rough or hairy skin) दृढलोमा -मा -म (न्), स्थूललोमा &c., लोमावृतः -ता -तं, लोमशः -शा -शं.

To ROUGH-CAST, *v. a.* स्थूलाकारेण कॢप् (c. 10. कल्पयति -यितुं), स्थूलरूपेण कृ or निर्मा or विधा, स्थूलाकारं दा, स्थूलरूपं कृ or दा, स्थूलसंस्कारं कृ or दा.

ROUGH-DRAUGHT, *s.* पाण्डुलेख्यं, स्थूललेख्यं, पाण्डुलेख्यमात्रं, वस्तुमात्रं.

To ROUGH-DRAW, *v. a.* स्थूलरूपेण लिख् (c. 6. लिखति -लेखितुं) or आलिख्, स्थूललेख्यं कृ, पाण्डुलेख्यं कृ, आलेख्यारम्भं कृ, चित्रारम्भं कृ.

To ROUGH-HEW, *v. a.* स्थूलरूपेण तक्ष् (c. 1. तक्षति -क्षितुं) or छिद्, स्थूलाकारं दा.

ROUGH-HEWN, *p. p.* स्थूलरूपेण कल्पितः -ता -तं, स्थूलाकारेण तष्टः -ष्टा -ष्टं, असंस्कृताकारः -रा -रं, असंस्कृतरूपः -पा -पं, अपरिष्कृताकारः -रा -रं.

ROUGHLY, *adv.* रूक्षं, रूक्षं, सरौक्ष्यं, विषमं, परूषं, सपारूष्यं, पारूष्येण, कर्कशं, सकार्कश्यं, कठोरं, कठिनं, सकाठिन्यं, निष्ठुरं, सनैष्ठुर्यं, स्थूलं.

ROUGHNESS, *s.* (Unevenness) विषमता, वैषम्यं, रूक्षता, रूक्षता, रौक्ष्यं, असमता, अश्लक्ष्णता, असमानता.—(Ruggedness) रूक्षता, रूक्षता, परूषता -त्वं, पारूष्यं.—(To the touch) दुःखस्पर्शता, दुःस्पर्शता.—(Harshness) परूषता, पारूष्यं, रूक्षता, कर्कशता, कार्कश्यं, कठिनता, काठिन्यं, अमृदुता, असौम्यता, अकोमलता.—(Severity) निष्ठुरता, नैष्ठुर्यं, उग्रता, कटुता, कठोरता.—(Want of finish) असंस्कृतता, अपरिष्कारः, अशिष्टता, स्थूलता.—(Of the sea, &c.) क्षुभ्रता, संक्षुभ्रता, ऊर्म्मिप्रलोठनं, तरङ्गप्रलोठनं, तरङ्गाकुलत्वं, सवानत्वं, वानं.

ROUGH-RIDER, *s.* अश्वदमकः, अश्वदमी *m.* (न्). *See* HORSE-BREAKER.

ROUGH-SHOD, *a.* साग्रपादुकायुक्तः -क्ता -क्तं, साग्रखुरत्रयुक्तः -क्ता -क्तं.

ROUND, *a.* (Circular) वर्तुलः -ला -लं, वर्तुलाकारः -रा -रं, वर्तुलाकृतिः -तिः -ति, वर्तुलरूपः -पा -पं, चक्राकारः -रा -रं, चक्राकृतिः -तिः -ति, चाक्रिकः -की -कं, चाक्रेयः -यी -यं, वृत्तः -त्ता -त्तं, वृत्ताकारः -रा -रं, मण्डलाकारः -रा -रं, मण्डलाकृतिः -तिः -ति, मण्डलरूपः -पा -पं, मण्डली -लिनी -लि (न्), वलयाकारः &c., वलयाकृतिः &c., कङ्कणाकारः &c., कुण्डलाकारः &c.—(Globular) गोलाकारः -रा -रं, गोलाकृतिः -तिः -ति, वर्तुलः -ला -लं, वर्तुलाकारः &c., मण्डलाकारः &c., गुडः -डा -डं, वटी -टिनी &c., निस्तलः -ला -लं.—(Cylindrical) दीर्घवर्तुलः -ला -लं, लम्बवर्तुलः &c., लम्बवर्तुलाकारः &c., दीर्घगोलाकारः &c.—(Plump) पीनः -ना -नं, उन्नतः -ता -तं, *see* PLUMP.—(Plain) अवक्रः -क्रा -क्रं, व्यक्तः -क्ता -क्तं.—(As a number) शून्यान्तकः -का -कं; 'a round number,' शून्यान्तकसंख्या.

ROUND, *s.* (Circle) मण्डलं, परिमण्डलं, चक्रं, वर्तुलः, गोलः, वलयः, निधः, वटः.—(Revolution) आवृत्तिः *f.*, आवर्त्तनं, परिवर्त्तनं, पर्य्यायः, चक्रं, *see* REVOLUTION.—(Circuitous course) वक्रमार्गः, वक्रगतिः *f.*

ROUND, *adv.* चक्रवत्, मण्डलवत्, वलयवत्, गोलवत्, मण्डलतस्, मण्डलरूपेण, चक्ररूपेण, परि prefixed; 'to turn round,' परिवृत्, *see To* REVOLVE; 'to come round, change opinion,' मतिं परिवृत्, अन्यमानसीभू; 'to look round,' अङ्गैमुखः परिवृत्.—(On all sides) समन्ततस्, समन्तात्, आसमन्तात्, सर्व्वतस्, विश्वतस्, परितस्, सर्व्वदिक्षु, चतुर्दिक्षु.—(Circuitously) वक्रमार्गेण, वक्रं.

ROUND, *prep.* परि or अभि prefixed, परितस् or अभितस् affixed; 'the planets move round the sun,' रविं परितो ग्रहा भ्रमन्ति; 'the moon moves round the earth,' पृथिवीम् अभितो भ्रमति चन्द्रः; 'to get round one,' *see To* CIRCUMVENT.

To ROUND, *v. a.* (Make round) वर्तुलीकृ, मण्डलीकृ, परिमण्डलीकृ, मण्डल (nom. मण्डलयति -यितुं), परिमण्डल, गोलीकृ.—(Go round) परितो गम्, परितो या, परिगम्, अभितो गम्.

ROUNDABOUT, *a.* (Circuitous) वक्रः -क्रा -क्रं, जिह्मः -ह्मा -ह्मं, कुटिलः &c.

ROUNDABOUT, *adv.* (On all sides) समन्ततस्, समन्तात्, परितस्, *see* ROUND, *adv.*

ROUNDED, *p. p.* मण्डलीकृतः -ता -तं, मण्डलितः -ता -तं, परिमण्डलितः &c., वर्तुलीकृतः &c., वृत्तः -त्ता -त्तं; 'well-rounded,' सङ्गतः &c.

ROUNDLY, *adv.* (Plainly, openly) अवक्रं, व्यक्तं, स्पष्टं, सुस्पष्टं, सुव्यक्तं.—(Peremptorily) सुनियतं, दृढोक्त्या, दार्ढ्येन.

ROUNDNESS, *s.* वर्तुलता -त्वं, वर्तुलाकारता, मण्डलाकारता, चक्राकारता, गोलाकारता, गोलत्वं, मण्डलत्वं, परिमण्डलता, मण्डलाकृतिः *f.*, वर्तुलाकृतिः *f.*—(Plumpness) पीनता, उन्नतिः *f.*, स्थूलता.—(Plainness) अवक्रता, व्यक्तता, स्पष्टता.

ROUND-SHOULDERED, *a.* कुब्जः -ब्जा -ब्जं, उच्चस्कन्धः -न्धा -न्धं, वक्रपृष्ठः &c.

To ROUSE, *v. a.* (Awake) प्रबुध् (c. 10. -बोधयति -यितुं), प्रतिबुध्, विबुध्, बुध्, जागृ in caus. (जागरयति -यितुं), निद्रां भञ्ज्, शयनाद् उत्था in caus., निद्राभङ्गं कृ, प्रबोधनं कृ, बोधनं कृ.—(Excite, stimulate) उत्तिज् (c. 10. -तेजयति -यितुं), प्रोत्सह् (c. 10. -साहयति -यितुं), उत्सह्, उत्था in caus. (उत्थापयति -यितुं, rt. स्था), व्युत्था, उद्युज् (c. 10. -योजयति -यितुं), उद्बुध्, प्रबुध्, उद्दीप्, दीप्, उत्तप्, प्रवृत्, प्ररुच्, चुद्, प्रचुद्, संचुद्, चेष्ट in caus.

To ROUSE, *v. n.* प्रबुध् (c. 4. -बुध्यते -बोद्धुं), प्रतिबुध्, जागृ (c. 2. जागर्त्ति,

-मा -र्म, संरम्भः -म्भा -म्भं.

ROUT, *s.* (Mob) अधमलोकसंघः, जनसम्मर्दः. *See* MOB, RABBLE.—(Of an army) विद्रावः, विद्रवः, प्रद्रावः, उद्रावः, सन्द्रावः, द्रावः, द्रवः, सन्दावः, सैन्यभङ्गः, व्यूहभङ्गः, व्यूहभेदः, सैन्यव्यूहभङ्गः, भङ्गः, भेदः, पलायनं, विपलायनं, प्रपलायनं, पलायितं, बलव्यसनं, व्यसनं, डमरं, डामरः -रं; 'total rout,' सुपलायितं.—(Fashionable assembly) शिष्टलोकसभा, सभ्यलोकसमाजः.

To ROUT, *v. a.* विद्रु (c. 10. -द्रावयति -यितुं), प्रद्रु, सन्द्रु, द्रु, विद्रुतीकृ, सैन्यव्यूहान् भञ्ज् (c. 7. भनक्ति, भंक्तुं) or भिद्, विध्वंस् (c. 10. -ध्वंसयति -यितुं).

ROUTE, *s.* मार्गः, पथः, पदवी, गतिः *f.* *See* ROAD.

ROUTED, *p. p.* विद्रुतः -ता -तं, विद्रावितः &c., भयद्रुतः &c., भयविप्लुतः -ता -तं, पलायितः -ता -तं, विपलायितः &c., प्रपलायितः &c., पिञ्जलः -ला -लं, उत्पिञ्जलः &c. समुत्पिञ्जः -ञ्जा -ञ्जं, समुत्पिञ्जलः &c., भग्नव्यूहः -हा -हं, कान्दिशीकः -का -कं, कान्दिशीकः &c.

ROUTINE, *s.* नित्यकर्म्म *n.* (न्), नित्यकृत्यं, नित्यक्रमः, पर्य्यायः, नित्यपर्य्यायः, नित्यपाठः, परिपाठः; 'daily routine,' दैनिकक्रमः, आह्निकक्रमः, आह्निकं.

To ROVE, *v. n.* भ्रम् (c. 4. भाम्यति, भमितुं), परिभ्रम्, भ्रमणं कृ, परिभ्रमणं कृ, अट् (c. 1. अटति -टितुं), पर्यट्, अटनं कृ, पर्यटनं कृ, गाह् (c. 1. गाहते -हितुं), विचर् (c. 1. -चरति -रितुं), संचर्, विह्, व्रज्, प्रव्रज्.

ROVER, *s.* परिभ्रमकः, भ्रमणकारी *m.* (न्), परिभ्रमणकारी *m.*, पर्यटनकृत् *m.*, विहारी *m.*, यथेष्टचारी *m.*, अवनिचरः.—(Robber) परिपन्थी *m.*, दस्युः *m.*

ROVING, *s.* भ्रमणं, परिभ्रमणं, अटनं, पर्यटनं, विहारः, विहरणं.

ROW, *s.* (Line, rank) पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.*, आवलिः -ली *f.*, पङ्क्तिः -क्तीं *f.*, राजिका, ततिः *f.*, वीथिः -थी *f.*, आलिः -ली *f.*, पालिः -ली *f.*, धारणी, रेखा, सरणिः -णी *f.*, माला, विस्रोली; 'in a row,' पंक्तिक्रमेण; 'row of teeth,' दन्तपंक्तिः *f.*; 'two rows of teeth,' द्वे दन्तपंक्ती; 'row of trees,' तरुपंक्तिः *f.*, पादपश्रेणी, पादपवीथिः *f.*; 'of curls,' अलकसंहतिः *f.*; 'of swords,' खड्गश्रेणी, खड्गलेखा; 'row of houses,' वीथिः -थी, गृहपंक्तिः *f.*; 'of four houses,' चतुःशालं, सभ्रवनं, संयवनं.—(Riot, disturbance) कोलाहलः, तुमुलं, विप्लवः, डमरः -रा -रं, डामरः, डिम्बः; 'festive turbulence,' चमत्कारः, चर्चरी.

To ROW, *v. a.* (Impel a boat by means of an oar) नौकां दण्डेन वह् (c. 10. वाहयति -यितुं) or संचल् (c. 10. -चालयति -यितुं) or चल् or सृ in caus.—(Scold) भर्त्स्, तर्ज्, उपालभ्.

To ROW, *v. n.* पोतवाहनं कृ, नौकावाहनं कृ, नौदण्डसञ्चालनं कृ, क्षेपणिसञ्चालनं कृ, क्षिपणिसञ्चालनं कृ.

ROWEL, *s.* (Of a spur) अश्वतोदनचक्रकं, प्रतोदकण्टकः, कण्टकः.

ROWER, *s.* पोतवाहः -हकः, नौकावाहः -हकः, नौदण्डसञ्चालकः, नौदण्डचालकः, क्षेपणिसञ्चालकः, क्षेपणिधरः, नियामकः.

ROYAL, *a.* राजकीयः -या -यं, राजयोग्यः -ग्या -ग्यं, राजार्हः -र्हा -र्हं, राजोचितः -ता -तं, नृपोचितः &c., ऐशिकः -की -कं, ऐश्वरः -री -रं, राज or नृप in comp., *see* KINGLY, PRINCELY, REGAL, MAJESTIC, &c.; 'royal attendant,' राजपुरुषः, राजसेवकः, राजपरिचरः; 'royal city,' राजधानं -नी राजनगरी, राजपुरी, संस्थानं; 'royal 'insignia,' राजलक्षणं, राजलक्ष्मा *m.* (न्), राजचिह्नं; 'mansion,' राजमन्दिरं, राजसदनं, राजवसतिः *f.*; 'seat,' राजशय्या; 'road,' राजमार्गः, राजवर्त्म *n.* (न्); 'elephant,' राजहस्ती *m.* (न्), राजेभः, राजवाह्यः; 'revenue,' राजस्वं, राजधनं; 'audience,' राजदर्शनं; 'audience-chamber,' राजदर्शनशाला; 'seal,' राजमुद्रा, राजचिह्नं; 'amusement,' राजविलासः, राजनर्म्म *n.* (न्); 'circle or court,' राजमण्डली -लं; 'polity,' राजनीतिः *f.*, राजनयः; 'royal will,' राजेच्छा, नृपेच्छा; 'favourite,' राजवल्लभः, नृपवल्लभः; 'sacrifice,' राजसूयं; 'of royal race,' राजवंश्यः -श्या -श्यं, नृपात्मजः -जा -जं, राजवीजी -जिनी -जि (न्).

ROYALIST, *s.* राजानुगतः, राजानुषङ्गी *m.* (न्), राजपक्षीयः, राजपक्षपाती.

ROYALLY, *adv.* राजवत्, नृपवत्, राजरूपेण, राजसदृशं, नृपसदृशं.

ROYALTY, *s.* राजत्वं -ता, राज्यं, नृपत्वं, राजभूयं, राजसायुज्यं, राजाधिकारः, भूपता -त्वं, नरेन्द्रत्वं -ता, ऐश्वर्य्यं, आधिपत्यं, प्रभुत्वं, प्रजैश्वर्य्यं, महीपत्वं; 'requisites of royalty,' प्रकृतयः *f. pl.*; 'ensigns of royalty,' राजलक्षणानि *n. pl.*, छत्रचामरं.

To RUB, *v. a.* घृष् (c. 1. घर्षति -र्षितुं), आघृष्, निघृष्, मृद् (c. 9. मृद्नाति मर्दितुं), परिमृद्, पिष् (c. 7. पिनष्टि, पेष्टुं), प्रतिपिष्, निष्पिष्, घर्षणं कृ, मर्दनं कृ.—(The body) संवाह् (c. 1. -वाहति, c. 10. -वाहयति -यितुं); 'they both rubbed his feet with their hands,' कराभ्यां तस्य पादौ संववाहतुः; 'I will rub your feet,' तव चरणौ संवाहयामि.—(Rub, so as to clean) मृज् (c. 2. मार्ष्टि -ष्टुं), प्रमृज्, परिमृज्, सम्मृज्, अवमृज्, आमृज्, परिष्कृ, प्रक्षाल् (c. 10. -क्षालयति -यितुं), श्लक्ष्णीकृ.—(Grind in a mortar, &c.) चूर्ण्, चूर्णीकृ, पिष्, मृद्, क्षुद्, क्षोदीकृ.—(Polish by friction) घर्षणेन तिज् (c. 10. तेजयति -यितुं) or निष्टप् or मृज् or परिष्कृ.—(Rub one against the other) परस्परं घृष्, परस्परघर्षणं कृ; 'to rub the hands together,' करं करेण घृष् or निष्पिष् or प्रतिपिष्, पाणिं पाणौ विनिष्पिष्; 'the teeth together,' दन्तान् दन्तैर् घृष् or निष्पिष्, दन्तघर्षणं कृ.—(Rub in, spread over, smear with, as unguents, &c.) लिप् (c. 6. लिम्पति, लेप्तुं), अनुलिप्, आलिप्, अञ्ज्, अभ्यञ्ज्, मृद्.—(Rub down, as a horse) अश्वलोम मृज्.—(Rub off) अपमृज्, अवमृज्.—(Rub out) अपमृज्, व्यामृज्, प्रमृज्, अवमृज्, व्यामृश् (c. 6. -मृशति -मर्ष्टुं), अवमृश्, व्यामर्षं कृ, अवमर्षणं कृ, लोपं कृ.—(Rub up) मृज्, परिष्कृ.

To RUB, *v. n.* घृष् (c. 1. घर्षति -र्षितुं), संघृष्, संघट्ट (c. 1. -घट्टते -ट्टितुं), संघर्षणं कृ, संघर्षं कृ, परस्परसंघर्षं कृ.—(Wear away by friction) घर्षणेन क्षि in pass.—(Pass through with difficulty) दुःखेन or कृच्छ्रेण तॄ.

RUB, *s.* घर्षणं, आघर्षः -र्षणं, संघर्षः, मर्दनं, विमर्दनं, परिमर्दनं, माजनं.—(Collision, obstruction) संघट्टः -ट्टनं, समाघातः, सम्मर्दः, प्रतिघातः.—(Difficulty) दुःखं, कृच्छ्रं, दुर्गं, कष्टं, शल्यं, वैषम्यं.

RUBBED, *p. p.* घर्षितः -ता -तं, आघर्षितः &c., संघर्षितः &c., अभिघर्षितः &c., मर्दितः -ता -तं, मृदितः &c., परिमृदितः &c., घृष्टः -ष्टा -ष्टं, मृष्टः &c., प्रमृष्टः &c., परिमृष्टः &c., माजितः -ता -तं, परिमाजितः &c., प्रमाजितः &c., सम्माजितः &c., प्रक्षालितः &c., आघट्टितः &c.—(Rubbed out) अपमृष्टः -ष्टा -ष्टं, व्यामृष्टः &c., निर्मृष्टः &c.

RUBBER, *s.* (One that rubs) घर्षकः, मर्दकः, माजकः, घर्षणकारी *m.*

(न्), मर्दनकारी *m.*, निर्घर्षणकः, आघट्टकः.—(Instrument for rubbing) मार्जनी.

RUBBING, *s.* घर्षणं, आघर्षः -र्षणं, संघर्षः -र्षणं, निर्घर्षणं, मर्दनं, परिमर्दनं, आघट्टनं, घिघट्टनं, मार्जनं, परिमार्जनं.

RUBBISH, *s.* उच्छिष्टं, अवस्करः, अपस्करः, मलं, तुच्छद्रव्यं, कुत्सितद्रव्यं.

RUBBISH-HOLE, *s.* उच्छिष्टप्रक्षेपणार्थं गर्तः, मलाधारः, अवस्कराधारः.

RUBICUND, *a.* ईषद्रक्तः -क्ता -क्तं, आरक्तः &c., पाटलवर्णः -र्णा -र्णं.

RUBRIC, *s.* रक्ताक्षरलिखितसूत्रं, प्रार्थनापद्धतिसूत्रं, प्रार्थनाग्रन्थसूत्रं.

RUBY, *s.* पद्मरागः, माणिक्यं, लोहितकः, शोणरत्नं, शोणितोपलं -लः, पाटलोपलं -लः, अरुणोपलं -लः, अर्कोपलः, भास्करप्रियं, लक्ष्मीपुष्पः, कुरुविन्दः, पद्मरागमणिः *m.*, महामूल्यः.

RUBY, *a.* (Of the color of the ruby) रक्तवर्णः -र्णा र्णं, लोहितवर्णः &c., शोणितवर्णः &c., पाटलवर्णः &c., पद्मरागवर्णः &c.; 'having ruby lips,' विम्बोष्ठः -ष्ठा -ष्ठं, (*i. e.* like the fruit of the vimba or bimba) विद्रुमोष्ठः &c. (*i. e.* like coral).

RUDDER, *s.* कर्णः, नौकर्णः, अरित्रं, केनिपातः -तकः, पोतरन्ध्रः.

RUDDINESS, *s.* रक्तता, अरुणिमा *m.* (न्), रक्तिमा *m.* (न्), अरुणता; 'of countenance,' मुखरागः, कपोलरागः, कपोलरक्तता, मुखारुणिमा *m.* (न्),

RUDDY, *a.* रक्तवर्णः -र्णा -र्णं, अरुणः -णा -णं, अरुणवर्णः &c.; 'ruddy-faced,' रक्तमुखः -खा -खं, अरुणमुखः &c., रक्तकपोलः -ला -लं; 'ruddy-goose, or Brahmany duck,' चक्रवाकः, चक्रः, रात्रिविश्लेषगामी *m.*

RUDE, *a.* (Uncivilized, untaught) अशिष्टः -ष्टा -ष्टं, अशिक्षितः -ता -तं, असभ्यः -भ्या -भ्यं, अनक्षरः -रा -रं, निरक्षरः &c., अविद्यः -द्या -द्यं, अपरिष्कृतः -ता -तं, अकृतबुद्धिः -द्धिः -द्धि, विद्याहीनः -ना -नं, विद्याशून्यः -न्या -न्यं, विद्याचारहीनः &c., दुराचारः -रा -रं, दुर्जनः -ना -नं, असभ्यवृत्तिः -त्तिः -त्ति, दौर्जन्यवृत्तिः &c., ग्राम्यः -म्या -म्यं.—(Uncivil, impolite, rough in manner) अविनीतः -ता -तं, अविनयः -या -यं, नष्टविनयः &c., प्रणष्टविनयः &c., कुशीलः -ला -लं, वामशीलः &c., दुःशीलः &c., विशीलः &c., दुर्मर्य्यादः -दा -दं, निर्मर्य्यादः &c., अमर्य्यादः &c., धृष्टः -ष्टा -ष्टं, उद्धतः -ता -तं, समुद्धतः &c., असभ्यः &c., अनार्य्यः -र्य्या -र्य्यं.—(Coarsely executed) स्थूलः -ला -लं, असंस्कृतः -ता -तं, रूक्षः -क्षा -क्षं, रूक्षः &c.—(Clumsy) अदक्षः -क्षा -क्षं, अकुशलः -ला -लं, अनिपुणः -णा -णं, स्थूलः &c.

RUDELY, *adv.* अशिष्टं, अशिष्टवत्, असभ्यवत्, अविनीतवत्, अविनयेन, धृष्टवत्, सधार्ष्ट्यं, कुशीलवत्, अनार्य्यवत्.—(Roughly) रूक्षं, रूक्षं, सरौक्ष्यं, स्थूलं, असंस्कृतं.

RUDENESS, *s.* (Absence of civilization) अशिष्टता -त्वं, असभ्यता, विद्याहीनता, अनक्षरता -त्वं, निरक्षरता -त्वं, विद्याशून्यता, विद्याचारहीनता, अपरिष्कारः.—(Incivility, impoliteness) अविनीतता -त्वं, अविनयः, कुशीलता, दुःशीलता, वामशीलता, अशीलता, अमर्य्यादा, दुर्मर्य्यादता, धृष्टता, धार्ष्ट्यं, असभ्यता, दौर्जन्यं, औद्धत्यं, अननुनयः, विनयाभावः, अनार्य्यता, अदाक्षिण्यं.—(Roughness, clumsiness) रूक्षता, रूक्षता, स्थूलता, अदक्षता.

RUDIMENT, *s.* (First principle) मूलतत्त्वं, मूलं, आरम्भः, प्रारम्भः, मूलसूत्रं, प्रथममूत्रं, प्रथमतत्त्वं, तत्त्वं, सूत्रं, आदिः *m.*, उपक्रमः, परिभाषा; 'the rudiments of learning,' विद्यारम्भः, विद्यातत्त्वानि *n. pl.*; 'of grammar,' व्याकरणारम्भः.—(Original or elemental part of any thing) मूलवस्तु *n.*, मूलावयवः, मूलाङ्गं, मूलद्रव्यं, मूलं, बीजं, मात्रं, भूतमात्रं, तन्मात्रं, वस्तु *n.*, धातुः *m.*

RUDIMENTAL, RUDIMENTARY, *a.* मूलिकः -का -कं, मौलः -ली -लं, मूल in comp., आरम्भकः -का -कं, प्रारम्भकः &c., प्राथमिकः -की -कं, आदि in comp., प्रथमः -मा -मं, मूलतत्त्वरूपः -पा -पं, मूलतत्त्वसम्बन्धी -न्धिनी &c., मूलतत्त्वविषयकः -का -कं.

To RUE, *v. a.* पश्चात् शुच् or खिद् or विषद्, पश्चात्तापं कृ. *See To* REGRET.

RUE, *s.* (Sort of pot-herb) ब्राह्मी, ब्राह्मिका, ब्रह्मी.

SUFFICIENT, *a.* पर्य्याप्तः -प्ता -प्तं, उपयुक्तः -क्ता -क्तं, यथेष्टः -ष्टा -ष्टं, उचितः -ता -तं, समर्थः -र्था -र्थं, योग्यः -ग्या -ग्यं; 'food sufficient for a month,' मासवृत्त्युचितम् अन्नं, *see* ENOUGH, *a.*; 'to be sufficient for,' कॢप् (c. 1. कल्पते -ल्पितुं).

SUFFICIENTLY, *adv.* पर्य्याप्तं, अलं, यथेष्टं, उपयुक्तं. *See* ENOUGH, *adv.*

To SUFFOCATE, *v. a.* श्वासरोधं कृ, श्वासावरोधं कृ, श्वासं रुध् (c. 7. रुणद्धि, रोद्धुं) or अवरुध्, प्राणं रुध् or अवरुध्, कण्ठं रुध्. *See To* CHOKE, STIFLE.

SUFFOCATED, *p. p.* रुद्धश्वासः -सा -सं, रुद्धप्राणः -णा -णं, निरुद्धकण्ठः &c.

SUFFOCATING, *a.* श्वासरोधकः -का -कं, श्वासावरोधकः &c., प्राणरोधकः &c.

SUFFOCATION, *s.* श्वासरोधः -धनं, श्वासावरोधः, श्वासप्रतिरोधः, प्राणरोधः -धनं, प्राणावरोधः, कण्ठरोधः -धनं, श्वासप्रतिबन्धः, उद्बन्धनं.

SUFFRAGE, *s.* सम्मतं, सम्मतिः *f.*, सम्मतिख्यापनं, स्वीकारः. *See* VOTE.

To SUFFUSE, *v. a.* समाप्लु (c. 10. -प्लावयति -यितुं), व्याप्, आकॄ.

SUFFUSED, *p. p.* समाप्लुतः -ता -तं, व्याप्तः -प्ता -प्तं, परिगतः -ता -तं, *see* OVERSPREAD; 'eyes suffused with tears,' नेत्राणि समाप्लुतानि वारिणा, बाष्पोपप्लुताक्षः -क्षी -क्षं, बाष्पाविलेक्षणः -णा -णं; 'face suffused with blushes,' ह्रीपरिगतमुखं.

SUFFUSION, *s.* व्याप्तिः *f.*, व्यापनं, व्याप्तता, समाप्लावनं, आच्छादनं.

SUGAR, *s.* शर्करा, गुडशर्करा, गुडोद्भवा, सिता, मिष्टं, इक्षुसारः, बालुकाभिका; 'coarse sugar,' गुडः; 'raw sugar,' मत्स्यण्डी, फाणितं; sugar-mill,' इक्षुयन्त्रं, इक्षुचक्रं.

To SUGAR, *v. a.* शर्करान्वितं -तां कृ, शार्करीकृ, सशर्करं -रां कृ, मिष्टीकृ

SUGAR-CANDY, *s.* खण्डमोदकः, खण्डः, माक्षिकशर्करा, उपला, शुक्लोपला शर्करा, सिताखण्डः, दृढगात्रिका.

SUGAR-CANE, *s.* इक्षुः *m.*, इक्षुरः, इक्षुकाण्डं, इक्षुदण्डः, मधुयष्टिः *f.*, मधुतृणं गुडदण्डः, गुडदारुः *m.*, गुडतृणं, रसालः, महाशीरः, विपुलरसः, अरिपत्रः, पयोधरः, मृत्युपुष्पः; 'varieties of it,' पुण्ड्रः, पौण्ड्रः, कान्तारकः खण्डं; 'root of it,' मोरटं, इक्षवमूलं.

SUGARED, SUGARY, *a.* शर्करान्वितः -ता -तं, शर्करायुक्तः -क्ता -क्तं, सशर्करः -रा -रं, शार्करः -री -रं, ऐक्षवः -वी -वं, मिष्टः -ष्टा -ष्टं.

To SUGGEST, *v. a.* उपन्यस् (c. 4. -अस्यति -सितुं), समुपन्यस्, सूच् (c. 10 सूचयति -यितुं), सूचनं कृ, मन्त्र् (c. 10. मन्त्रयते -ति -यितुं), मन्त्रणं कृ, प्रबुध् (c. 10. -बोधयति -यितुं), उद्दिश् (c. 6. -दिशति -देष्टुं), आदिश्, उपदिश्, चित् (c. 10 चेतयति -यितुं), प्रयुज् (c. 10. -योजयति -यितुं समुपस्था in caus.

SUGGESTED, *p. p.* उपन्यस्तः -स्ता -स्तं, सूचितः -ता -तं, मन्त्रितः &c.

SUGGESTION, *s.* उपन्यासः, सूचना -नं, प्रबोधः, मन्त्रणं, बुद्धिः *f.*

SUGGESTIVE, *a.* सूचकः -का -कं, प्रबोधकः &c., चेतकः -का -कं.

SUICIDAL, *a.* आत्मघातकः -का -कं, आत्मघाती -तिनी -ति (न्).

SUICIDE, *s.* (Self-murder) आत्मघातः, आत्महत्या, आत्मवधः, आत्महननं, आत्मव्यापादनं, प्राणत्यागः, देहत्यागः, जीवितत्यागः, जीवोत्सर्गः, प्राणपरित्यागः, काम्यमरणं, आत्मद्रोहः, स्वप्राणहिंसा.—(Self-murderer) आत्मघाती *m.* (न्), आत्मघातकः, आत्महा *m.* (न्), आत्मत्यागी *m.*, आत्मभुक् *m.* (-ड्भुज्), आत्मद्रोही *m.*, कृतजीवितत्यागः.

SUI-GENERIS, एकप्रकारः -रा -रं, स्वसदृशः -शी -शं, स्वप्रख्यः -ख्या -ख्यं.

SUIT, *s.* (Set) गणः, समूहः, *see* SET; 'as of clothes, &c.,' युगं, युग्मं, युगलं, युतकं, यमकं, यमलं; 'a suit of clothes,' वस्त्रयुगं, वस्त्रयुग्मं, वासोयुगं, आच्छादः.—(Petition) अर्थः, प्रार्थनं -ना, अभ्यर्थना, प्रणयः.—(In law) अर्थः, वादः, अक्षः, व्यवहारः.—(Retinue), *see* SUITE.

To SUIT, *v. n.* युज् in pass. (युज्यते), उपपद् in pass. *See To* FIT, *v. n.*

To SUIT, *v. a.* युज् (c. 10. योजयति -यितुं). *See To* FIT, ADAPT, *v. a.*

SUITABLE, *a.* योग्यः -ग्या -ग्यं, युक्तः -क्ता -क्तं, उपयुक्तः &c., यथायोग्यः &c., उपयोगी -गिनी &c., उचितः -ता -तं, सदृशः -शी -शं, प्रयोक्तव्यः -व्या -व्यं, *see* FIT, FITTING, *a.*; 'suitable to the occasion,' प्रस्तावसदृशः &c., *see* OPPORTUNE.

SUITABLENESS, *s.* योग्यता, युक्तता, उपयुक्तता, उपयोगिता -त्वं, उपयोगः, यथायोग्यता, उपपत्तिः *f.*, याथातथ्यं. *See* FITNESS.

SUITABLY, *adv.* युक्तं, योग्यं, यथायोग्यं, यथोचितं, *see* FITLY.—(Agreeably to) अनुसारेण -रतस्, अनुरूपेण.

SUITE, *s.* परिवारः, अनुचरवर्गः, पोष्यवर्गः. *See* RETINUE.

SUITED, *p. p.* उपयुक्तः -क्ता -क्तं, युक्तः &c., पर्य्याप्तः &c. *See* SUITABLE.

SUITOR, *s.* प्रार्थकः, प्रार्थयिता *m.* (तृ), अर्थी *m.* (न्), आवेदकः, *see* PETITIONER, PROSECUTOR.—(Wooer) विवाहार्थी *m.*, पाणिग्रहार्थी *m.*, प्रणयी *m.*

SULKILY, SULLENLY, *adv.* उदासीनं, उदासीनवत्, अन्तःक्रोधेन, अन्तःकोपेन.

SULKINESS, SULLENNESS, *s.* उदासीनता, अन्तःक्रोधत्वं, अन्तःक्रोधिता, अन्तःकोपिता, अन्तःक्रोधः, मलिनमुखत्वं, मुखमालिन्यं, प्रतीपता. *See* MOROSENESS.

SULKY, SULLEN, *a.* उदासीनः -ना -नं, अन्तःक्रोधी -धिनी -धि (न्), अन्तःकोपी &c., उदासवृत्तिः -त्तिः -त्ति, प्रतीपः &c. *See* MOROSE.

SULLIED, *p. p.* दूषितः -ता -तं, मलिनः &c., कलङ्कितः &c., *see* SOILED.

To SULLY, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus. *See To* SOIL.

SULLY, *s.* कलङ्कः, मालिन्यं, दूषणं, ग्लानिः *f.* *See* SOIL, STAIN.

SULPHATE, *s.* (Of copper) ताम्रगर्भं, तुत्थं.—(Of iron) कासीसं, काशीशं, हंसलोमशं, धातुशेखरः, नयनौषधं; 'green sulphate,' *see* under IRON, *s.*

SULPHUR, *s.* गन्धकः; गन्धिकः, गन्धाश्मा *m.* (न्), सौगन्धिकः, सुगन्धिकः, गन्धमोदनं, अतिगन्धः, क्रूरगन्धः, गन्धपाषाणः, स्वर्णारिः *m.*, धातुवैरी *m.* (न्), शुल्वारिः *m.*, पामारिः *m.*, पामघ्नः, कीटघ्नः, शुकपुच्छः.

SULPHUREOUS, *a.* गन्धकमयः -यी -यं, गन्धकयुक्तः -क्ता -क्तं, गन्धकगुणकः -का -कं, गन्धकगुणविशिष्टः -ष्टा -ष्टं, गन्धकधर्म्मकः -का -कं.

SULPHURET, *s.* (Of iron) पांशुकासीसं, ताप्यं, धातुमाक्षिकं.—(Of mercury) कज्जली.

SULTRINESS, *s.* निर्वातत्वं -ता, अत्युष्णता, वातहीनता, वायुहीनता.

SULTRY, *a.* निर्वातः -ता -तं, अत्युष्णः -ष्णा -ष्णं, वातहीनः -ना -नं, वायुहीनः &c., अत्युष्णवाष्पविशिष्टः -ष्टा -ष्टं; 'sultry vapour,' उष्णवाष्पः, मरीचिका, मृगतृष्णा.

SUM, *s.* (Aggregate, total) संख्या, साकल्यं, समुदायः, समाहारः, समवायः, गणनं.—(Substance, amount) सारः, अर्थः, सारांशः, गर्भः, तात्पर्य्यं.—(Compendium), *see* SUMMARY, *s.*—(Sum of money) धनभागः, धनांशः, कियद्धनं, किञ्चिद्धनं; 'small sum of money,' धनलेशः, धनाल्पिका, किञ्चिद्धनं, अल्पधनं; 'large sum,' धनबाहुल्यं, बहुधनं; 'any very large sum,' परार्द्धं.—(In arithmetic, figures set for an arithmetical operation) राशिः *m.f.*, पिण्डः.—(In sum) संक्षेपतस्, *see* SUMMARILY.

To SUM, *v. a.* (Add together) राशीकृ, संख्या, परिसंख्या, परिगण्, संकल् (c. 10. -कलयति -यितुं), सङ्कलनं कृ, समाहृ, समाहरणं कृ, समीकृ.—(Sum up, condense) उक्तोपसंहारं कृ, उक्तसमाहारं कृ, उक्तप्रत्याहारं कृ, उक्तोपसंक्षेपं कृ, उक्तसारं वद्.

SUMMARILY, *adv.* संक्षेपतस्, संक्षेपात् -पेण, समासतस्, *see* CONCISELY; 'to declare summarily,' संक्षेपतो वद्, सम्यवच्.

SUMMARY, *a.* सं. पक्षः -क्षी -क्षं, सामासिकः -की -कं. *See* CONCISE, *a.*

SUMMARY, *s.* संक्षेपः, संग्रहः, सारः, संक्षिप्तग्रन्थः, ग्रन्थस्यविषयानुक्रमणिका. *See* COMPENDIUM.

SUMMED, *p. p.* राशिगतः -ता -तं.—(Summed up) उपसंहृतः -ता -तं.

SUMMER, *s.* ग्रीष्मः, ग्रीष्मकालः, ग्रीष्मसमयः, निदाघकालः, निदाघः, उष्णकालः, उष्णसमयः, उष्णः, उष्णकः, उष्मः, ऊष्मा *m.* (न्), उष्णागमः, उष्मागमः, ऊष्मोपगमः, तपः, तपाः *m.* (स्).

SUMMER-HOUSE, *s.* विलासमन्दिरं, केलिगृहं; 'with water-works,' जलमन्दिरं, जलयन्त्रगृहं, जलयन्त्रमन्दिरं, जलयन्त्रनिकेतनं, जलहं, धारागृहं, धारायन्त्रगृहं, समुद्गृहं.

SUMMIT, *s.* अग्रं, शिखा, शिखरं, शेखरं, शृङ्गं, चूडा, कूटः -टं, पृष्ठं, उच्छ्रायः, उच्छ्रयः. *See* TOP.

To SUMMON, *v. a.* आह्वे (c. 1. -ह्वयति -ह्वातुं), आह्वानं कृ, आह्वान (nom. आह्वानयति -यितुं), आकृ in caus. (-कारयति -यितुं), आकारणं कृ.

SUMMONED, *p. p.* आहूतः -ता -तं, कृताह्वानः -ना -नं, आकारितः &c., आवाहितः &c. 'one who does not appear when summoned,' आहूतप्रपलायी *m.*

SUMMONER, *s.* आह्वाता *m.* (तृ), आह्वायकः, आह्वानकारी *m.* (न्).

SUMMONS, *s.* आह्वानं आहूतिः *f.*, हूतिः *f.*, आह्वायः, आकारणं, आवाहनं.

SUMMUM-BONUM, *s.* परमार्थः, परार्थः, उत्तमार्थः.

SUMPTER, SUMPTER-HORSE, *s.* स्थूरी *m.* (न्), स्थौरी. *See* PACK-HORSE.

SUMPTUARY, *a.* व्ययविषयकः -का -कं, व्ययसम्बन्धी -न्धिनी -न्धि (न्).

SUMPTUOUS, *a.* महामूल्यः -ल्या -ल्यं, बहुमूल्यः &c. *See* COSTLY.

SUMPTUOUSLY, *adv.* अतिव्ययपूर्व्वं, महाव्ययपूर्व्वं, अतिव्ययेन.

SUMPTUOUSNESS, *s.* महामूल्यता, बहुमूल्यता, महार्घता, अतिव्ययः.

SUN, *s.* सूर्य्यः, रविः *m.*, भानुः *m.*, अर्कः, आदित्यः, भास्करः, सविता *m.* (तृ), अर्य्यमा *m.* (न्), विवस्वान् *m.* (त्), दिवाकरः, सूरः. The sun has innumerable names in Sanskrit, many of which are more properly epithets than names. Some of them are here collected with their meanings.—(As begetter and nourisher of all things, he is called) सविता *m.* (तृ), सावित्रः, पूषा *m.* (न्), विश्वपाः *m.*—(As causing day-light) दिनकरः, दिवसकरः, दिवाकरः, दिनकृत् *m.*, प्रभाकरः, विभाकरः, अहस्करः, भास्करः.—(As lord of the day) अहर्पतिः *m.*, दिनपतिः, द्युपतिः *m.*, दिनप्रणीः *m.*—(As gem of the day) दिनमणिः *m.*, दिवामणिः *m.*—(As gem of the sky) नभोमणिः *m.*, खमणिः *m.*, वियन्मणिः *m.*—(Enemy of darkness) तिमिररिपुः *m.*, ध्वान्तारातिः *m.*, तमोनुदः, तमोपहः.—(Receptacle of light) भाकोषः, तेजःपुञ्जः.—(Circle of light) भानेमिः *m.*—(Meteor of the sky) खस्फोटः.—(The illuminator of the sky) खद्योतनः, प्रद्योतनः, विरोचनः.—(Eye of the sky) नभश्चक्षुः *m.*—(Eye of the world) जगच्चक्षुः *m.* (स्), लोकचक्षुः *m.*—(Beholder of the deeds of the world) कर्म्मसाक्षी *m.* (न्), जगत्साक्षी *m.*—(Lord of the constellations) ग्रहराजः, ग्रहपतिः *m.*, तपताम्पतिः *m.*, त्विषाम्पतिः *m.*—(Having a thousand rays) सहस्रकिरणः, सहस्रांशुः *m.*—(Garlanded with rays) किरणमाली *m.* (न्), अंशुमाली *m.*, मरीचिमाली *m.*—(Possessed of rays) अंशुमान् *m.* (त्), गभस्तिमान् *m.*, अंशुधरः, किरणः, गभस्तिः *m.*—(Lord of the rays) अंशुभर्त्ता *m.*—(Wielding rays) अंशुहस्तः, गभस्तिहस्तः, अंशुपाणिः.—(Having hot rays) चण्डांशुः *m.*, चण्डकिरणः, घर्म्मांशुः *m.*, तिग्मांशुः *m.*, तीक्ष्णांशुः *m.*, खरांशुः *m.*, चण्डरश्मिः *m.*, चण्डमरीचिः *m.*, उष्मरश्मिः *m.*, चण्डदीधितिः *m.*, अशीतमरीचिः *m.*, अशीतकरः.—(Having bright rays) शुभ्ररश्मिः *m.*—(Possessed of light) प्रतिभावान् *m.* (त्), भास्वान् *m.*, विभावान् *m.*, ज्योतिष्मान् *m.*, विभावसुः *m.*—(The inflamer, or warmer) तपनः, तापनः.—(The Ripener) पचनः, पचेलिमः.—(The scorcher) शुणः.—(Burner of the forehead) ललाटन्तपः.—(The surprising light) चित्रभानुः *m.*—(Sporting or roaming in the sky) गगणविहारी *m.*, गगणाध्वगः, खगः, खचरः.—(Symbol in the sky) गगणध्वजः.—(Friend of the lotuses) पद्मबन्धुः *m.*, पद्मिनीकान्तः, पद्मिनीवल्लभः.—(Sprung from the lotus) पद्मगर्भः.—(Seated on a lotus) पद्मासनः.—(Holding a lotus in his hand) पद्मपाणिः *m.*, पद्मकरः.—(Drawn by seven horses) सप्ताश्वः.—(Drawn by green horses) हरिदश्वः.—(Ever-moving) सदागतिः *m.*—(Lord of life) जीवितेशः.—(Possessed of jewels) मणिमान् *m.*—(Best of deities) सुरोत्तमः.—(As son of Kaśyapa) काश्यपेयः, काश्यपिः *m.*—(As descended from Mṛitanda) मार्त्तण्डः, मृतण्डः, मृतण्डजः.—(As having been shorn of his beams by Visvakarma, the architect of the gods) विकर्त्तनः.—(As identified with the 12 ádityas) द्वादशात्मा *m.* (न्), द्वादशात्मकः. The 12 ádityas are the offspring of Aditi, and are the emblems of the sun in each month of the year. Hence they are

identified with the sun itself. Their names are सूर्य्यः, वरुणः, वेदाङ्गः, भानुः *m.*, इन्द्रः, रविः *m.*, गभस्तिः *m.*, यमः, स्वर्णरेताः *m.*, दिवाकरः, मित्रः, विष्णुः *m.* Other names for the sun, of less obvious derivation, are the following: पतङ्गः, पषीः *m.* (स्), हंसः, इनः, हेलिः *m.*, मिहिरः, भगः, तरणिः *m.*, मित्रः, भट्टारकः, ब्रध्नः, अरुणः, विश्वकर्म्मा *m.*, वरुणः, विष्णुः, कृष्णः. The following are the names of some of the sun's wives: छाया, अश्विनी, प्रभा, संज्ञा, विश्वकर्म्मसुता, त्वाष्ट्री, सवर्णा, शनिप्रसूः *f.*, तपती, त्वसरेणुः *m.*, वरी सौरी, सूर्य्या. His sons are यमः or वैवस्वतः, शनिः *m.*, अश्विनौ *m. du.* or अश्विनीकुमारौ *m. du.*, कर्णः, सावर्णिः *m.*, सुग्रीवः, रेवन्तः, रैवतः; 'his daughter, or the personified Taptí river,' तपती, तपनतनया, अर्कतनया; 'his charioteer,' अरुणः, अनूरुः *m.*, काश्यपिः *m.*, गरुडाग्रजः, सूरसूतः, सूर्य्यसारथिः *m.*; 'three of his attendants,' माठरः, पिङ्गलः, दण्डः; 'a worshipper of the sun,' सौरः; 'the sun's disk,' सूर्य्यमण्डलं, *see* Disk: 'early morning sun,' बालार्कः, बालातपः, बालमित्रः; 'figure of the sun as drawn for worship,' सूर्य्ययन्त्रं; 'half-yearly passage of the sun,' अयनं, *see* Solstice; 'mansion of the sun,' सूर्य्यनक्षत्रं, महानक्षत्रं; 'region of the sun,' सूर्य्यलोकः.—(Sun and moon) सूर्य्याचन्द्रमसौ *m. du.*, चन्द्रार्कौ *m. du.*, दिवाकरनिशाकरौ *m. du.*, पुष्पवन्तौ *m. du.*, पुष्पदन्तौ *m. du.*

Sun-beam, *s.* सूर्य्यरश्मिः *m.*, सूर्य्यकिरणः, सूर्य्यमयूखः, सूर्य्यकरः, सूर्य्यांशुः *m.*, तपनांशुः *m.*, तपनकरः, भानुकरः. *See* Ray, *s*

Sun-burnt, *a.* सूर्य्यतप्तः -प्ता -प्तं, रविप्रतप्तः &c., सूर्य्यव्याप्तः &c.

Sunday, *s.* भानुवारः, रविवारः, अर्कवारः, आदित्यवारः, भट्टारकवारः, रविवासरः, भानुवासरः, अर्कदिनं, अर्कः.

To sunder, *v. a.* वियुज्, विप्रयुज्, पृथक्कृ. *See To* part, separate.

Sundered, *p. p.* (Divided in sunder) पृथक्कृतः -ता -तं, द्वैधीभूतः -ता -तं, द्वैधीकृतः -ता -तं, विश्लिष्टः -ष्टा -ष्टं, विच्छेदितः -ता -तं, विप्रयुक्तः -क्ता -क्तं.

Sun-dial, *s.* छायायन्त्रं, छायामण्डलं, प्रतोदः, सूर्य्यघटी.

Sun-dried, *p. p.* आतपशुष्कः -ष्का -ष्कं, आतपशोषितः -ता -तं.

Sundry, *a.* नाना *indecl.*, विविधः -धा -धं, नानाविधः &c., पृथग्विधः &c., *see* Divers; 'sundries,' नानाद्रव्याणि *n. pl.*, नानाविधवस्तूनि *n. pl.*

Sun-flower, *s.* सूर्य्यकमलः, श्रीहस्तिनी, वेशदानः, भासकः, दिवाकरः, जामाता *m.* (तृ), विधात्रायुः *m.*, वनालिका; 'the flower,' सूर्य्यकमलं.

Sung, *p. p.* गीतः -ता -तं, परिगीतः &c.; 'by bards,' उपगीतः &c.

Sunk, *p. p.* मग्नः -ग्ना -ग्नं, निमग्नः &c., अवसन्नः -न्ना -न्नं, सन्नः &c., अवगाढः -ढा -ढं, निष्णातः -ता -तं; 'in mud,' पङ्कमग्नः &c.

Sunken, *a.* जलतलस्थः -स्था -स्थं, जलोपगूढः -ढा -ढं.

Sunless, *a.* असूर्य्यः -र्य्या -र्य्यं, अनादित्यः -त्या -त्यं, सूर्य्यहीनः &c.

Sunny, *a.* सूर्य्यतप्तः -प्ता -प्तं, रविप्तप्तः &c., सूर्य्यव्याप्तः &c., सूर्य्यातपव्याप्तः &c., सातपः -पा -पं, सार्कः -र्का -र्कं.

Sun-rise, *s.* सूर्य्योदयः, सूर्य्योदयकालः, अरुणोदयः, उदयः, उदयकालः, अभ्युत्थानं; 'before sun-rise,' सूर्य्ये अनुदिते.

Sun-set, *s.* सूर्य्यास्तं -स्तः, सूर्य्यास्तकालः अस्तः -स्तं, दिनान्तः, दिवावसानं, तिष्ठद्गु *n.*, उत्सूरः; 'at sun-set,' अस्तङ्गते सूर्य्ये.

Sun-shine, *s.* सूर्य्यातपः, आतपः, सूर्य्यप्रकाशः, प्रकाशः, सूर्य्यतापः, सूर्य्यकान्तिः *f.*, सूर्य्यतेजस् *n.*, सूर्य्यद्युतिः *f.*, सूर्य्यालोकः, द्योतः, सूर्य्यकिरणः, रुलाः.

To sup, *v. n.* or *a.* रात्रिभोजनं कृ, नक्तभोजनं कृ.—(Sip), *see To* sip.

Super. A prefix rendered by अति, अधिक, अतिशय &c., in comp.

To super-abound, *v. n.* अतिबहुलीभू, अतिविपुलीभू, अतिप्रचुरीभू.

Super-abundance, *s.* अतिबाहुल्यं, अतिवैपुल्यं, अतिप्राचुर्य्यं, आधिक्यं, अतिरिक्तता, आतिरेक्यं, उपचयः. *See* Exuberance.

Super-abundant, *a.* अतिबहुलः -ला -लं, अतिविपुलः &c., अतिप्रचुरः &c., अतिरिक्तः -क्ता -क्तं, अतिशयी -यिनी -यि (न्), अधिकः &c. *See* Exuberant.

To super-add, *v. a.* अधिकं समायुज् or संयुज्, अधिकसंयोगं कृ.

Super-annuated, *a.* अतिवयस्कः -स्का -स्कं, वयोधिकः -का -कं, वयोतीतः -ता -तं, वार्धक्याक्षमः -मा -मं, वार्धक्याशक्तः -क्ता -क्तं.

Super-annuation, *s.* अतिवयस्कता, वयोतीतता, वार्धक्याक्षमता.

Superb, *a.* अतिशोभनः -ना -नं, स्पर्धी &c. *See* Magnificent.

Supercilious, *a.* ऊर्द्वदृष्टिः -ष्टिः -ष्टि, दर्पादुपेक्षकः -का -कं, *see* Lofty.

Superciliousness, *s.* दर्पादुपेक्षा, दर्पात् परोपेक्षा. *See* Haughtiness.

Supererogation, *s.* अत्याचारः, अतिरिक्ताचारः, अत्याचरणं, अतिरिक्ताचरणं, नियमातिरेकः, विध्यतिरेकः, कर्त्तव्याधिक्यं, काम्यत्वं.

Supererogatory, *a.* नियमातिरिक्तः -क्ता -क्तं, कर्त्तव्यातिरिक्तः &c., विध्यतिरिक्तः &c., अतिरिक्तः -क्ता -क्तं, काम्यः -म्या -म्यं.

Superexcellence, *s.* अत्युत्कृष्टता, अत्युत्तमता, सर्व्वश्रेष्ठता.

Superexcellent, *a.* अत्युत्कृष्टः -ष्टा -ष्टं, अत्युत्तमः -मा -मं, सर्व्वोत्कृष्टः -ष्टा -ष्टं, सर्व्वश्रेष्ठः &c., सर्व्वोत्तमः -मा -मं, श्रेष्ठः &c.

Superficial, *a.* (Pertaining to, or being on the surface) बाह्यः -ह्या -ह्यं, बाह्यीकः -का -कं, बहिःस्थः -स्था -स्थं, बहिर्भागस्थः &c., बहिर्लग्नः -ग्ना -ग्नं, पृष्ठस्थः &c., बहिस् or पृष्ठ in comp.; 'superficial view,' बाह्यदृष्टिः *f.*; 'superficial contents,' पृष्ठफलं.—(Shallow, not deep) अनिम्नः -म्ना -म्नं, अल्पः -ल्पा -ल्पं, *see* Slight; 'superficial scholar,' किञ्चिज्ज्ञः, अल्पज्ञः, चुसकः, शास्त्रगण्डं, *see* Smatterer.

Superficially, *adv.* बाह्यतस्, बहिर्भागे, बहिस्. *See* Slightly.

Superficies, *s.* तलं, पृष्ठं, विस्तारः, बहिर्भागः, उपरिस्थभागः.

Superfine, *a.* अत्युत्तमः -मा -मं, अत्युत्कृष्टः -ष्टा -ष्टं, अतिसूक्ष्मः &c.

Superfluity, *s.* अतिरेकः, आतिरेक्यं, अतिरिक्तता, आधिक्यं, आतिशय्यं, प्रयोजनातिरेकः, प्रयोजनातिरिक्तता, वैयर्थ्यं.

Superfluous, *a.* अतिरिक्तः -क्ता -क्तं, अधिकः -का -कं, प्रयोजनातिरिक्तः &c., अवश्यकातिरिक्तः &c., अनर्थकः -का -कं, विफलः -ला -लं.

Superhuman, *a.* अतिमानुषः -षी -षं, अतिमनुष्यः -ष्या -ष्यं, अतिमर्त्यः -र्त्या -र्त्यं, मानुषातिगः -गा -गं, जनातिगः &c., पुरुषातिगः &c., अपौरुषः -षी -षं; 'having superhuman intellect,' अतिमनुष्यबुद्धिः -द्धिः -द्धि; 'superhuman power,' विभूतिः भूतिः *f.*, प्रभावः; 'possessed of it,' विभूतिमान् -मती -मत् (त्).

Superincumbent, *a.* उपरिस्थः -स्था -स्थं, उपरिवर्त्ती -र्त्तिनी -र्त्ति (न्).

To superinduce, *v. a.* अध्यानी (c. 1 -नयति -नेतुं), अनुनी, अध्यारुह् in caus.

To superintend, *v. n.* अधिष्ठा (c. 1. -तिष्ठति -ष्ठातुं), अध्यक्षः -क्षा -क्षं भू, अध्यक्षतां कृ, अवेक्ष्, उपदृश्, कार्य्यावेक्षणं कृ. *See To* oversee.

Superintendence, *s.* अध्यक्षता -त्वं, अधिकारः, अधीकारः, अधिष्ठितिः *f.*, अधिष्ठातृत्वं, अधिष्ठानं, अधिकर्म्म *n.* (न्), अधीशता, अवेक्षणं, कार्य्यावेक्षणं, कार्य्यदर्शनं, कार्य्येक्षणं, कार्य्याधीशता.

Superintendent, *s.* अध्यक्षः, अधीशः, आधिकारी *m.* *See* Overseer

Superior, *a.* (Upper) उपरिस्थः -स्था -स्थं, ऊर्द्वस्थः &c., ऊर्द्वः -र्द्धा -र्द्धं.—(In rank or excellence) श्रेयान् -यसी -यः (स्), श्रेष्ठः -ष्ठा -ष्ठं. गरीयान् &c., वरीयान् &c., वरिष्ठः -ष्ठा -ष्ठं, ज्यायान् &c., ज्येष्ठः &c..

विशिष्टः -ष्टा -ष्टं, प्रमुखः -खा -खं, प्रधानः -ना -नं, मुख्यः -ख्या -ख्यं, उत्कृष्टः &c., प्रकृष्टः &c., अधिकः -का -कं, प्रभविष्णुः -ष्णुः -ष्णु, वरः -रा -रं, गुरुः -वी -रु, सकनिष्ठः &c., *see* PRE-EMINENT; 'of superior worth,' गुणोत्कृष्टः &c., गुणाधिकः -का -कं; 'superior to the best,' परात्परः -रा -रं; 'to be superior,' विशिष्; in pass. (-शिष्यते), अतिरिच् in pass. (-रिच्यते); 'action is superior to inaction,' अकर्म्मणः कर्म्म विशिष्यते or अकर्म्मणः कर्म्म ज्यायः; 'intellect is superior to action,' कर्म्मणो बुद्धिर् विशिष्यते or कर्म्मणो बुद्धिर् ज्यायसी.—(Beyond the influence of).

SUPERIOR, *s.* श्रेष्ठः, ज्येष्ठः, गुरुः.—(Of a convent) आश्रमगुरुः.

SUPERIORITY, *s.* श्रेष्ठता, श्रैष्ठ्यं, विशिष्टता, वैशिष्ट्यं, वैशेष्यं, प्रधानता, प्राधान्य, उत्कृष्टता, उत्कर्षः, प्रमुखत्वं, प्रभविष्णुता, प्राग्भावः, आधिक्यं, ऊर्द्धस्थितिः *f.*, प्राबल्यं, ज्येष्ठता, वरिष्ठता, बलीयस्त्वं, परिवृढिमा *m.* (न्), *see* PRE-EMINENCE.

SUPERLATIVE, *a.* परमः -मा -मं, अत्यन्तः -न्ता -न्तं, आत्यन्तिकः -की -कं, अतिशय or अति prefixed, *see* EXCESSIVE, SUPREME.—(In grammar) अतिशयार्थवाचकः -का -कं, परमावधिवाचकः &c.

SUPERLATIVELY, *adv.* अत्यन्तं, अतिशयेन, अति prefixed. *See* EXCESSIVELY.

SUPERNATURAL, *a.* अलौकिकः -की -कं, अतिमानुषः -षा -षं, मानुषासाध्यः -ध्या -ध्यं, अपौरुषेयः -यी -यं, मानवासाध्यः &c., अद्भुतः &c. *See* SUPERHUMAN.

SUPERNATURALLY, *adv.* अलौकिकं, अतिमानुषं, अलौकिकप्रकारेण.

SUPERNUMERARY, *a.* or *s.* अतिसंख्यः -ख्या -ख्यं, संख्यातिरिक्तः -क्ता -क्तं, नियतसंख्यातिरिक्तः &c., नियमातिरिक्तः &c., अधिकः -का -कं, अतिरिक्तः &c.

SUPERSCRIPTION, *s.* उपरिलेखः, उपरिस्थलेखः, बहिर्लेखः.

To SUPERSEDE, *v. a.* (Render void) लुप् (c. 6. लुम्पति, लोप्तुं), लोपं कृ; 'this system has superseded all the others,' अयं मार्गः सर्व्वेषाम् अपरेषां लोपस्य कारणं बभूव.—(Set aside, displace) निरस् (c. 4. -अस्यति -सितुं), निराकृ, निःसृ in caus., अपसृ.

SUPERSEDED, *p. p.* निरस्तः -स्ता -स्तं, निराकृतः -ता -तं; 'a superseded wife,' अध्यूढा, अधिविन्ना, कृतसापत्निका, कृतसापत्नका, कृतसापत्नी, कृतसापत्नीका, कृतसपत्निका.

SUPERSTITION, *s.* (Over exactness in religion) अतिभक्तिः *f.*, अत्याचारः. अतिरिक्तभक्तिः *f.*, अतिरिक्ताचारः.—(Belief in supernatural agency, &c.) शकुनपिशाचादिविश्वासः, शकुनपिशाचादिभक्तिः *f.*, पिशाचादिनिष्ठा, शकुनादिविश्वासः.—(False religion) अन्यथाधर्म्मः, मिथ्याधर्म्मः, अन्यथाभक्तिः *f.*, अन्यथामार्गः, अशास्त्रीयभक्तिः *f.*, अविधिनिष्ठा, अविधिश्रद्धा, अवैधक्रिया.

SUPERSTITIOUS, *a.* (Over exact in religion) अत्याचारी -रिणी -रि (न्), अतिरिक्ताचारी &c.—(Credulous regarding supernatural agency, &c.) पिशाचादिविश्वासी &c., शकुनपिशाचादिविश्वासी &c., शकुनादिनिष्ठः -ष्ठा -ष्ठं, पिशाचादिनिष्ठः &c.—(Falsely religious) अन्यथाधर्म्मी -र्म्मिणी &c., अन्यथामार्गी &c., अवैधकर्म्मी &c., असत्यधर्म्मी &c., मिथ्याधर्म्मी &c.—(Proceeding from superstition) मिथ्याधर्म्ममूलकः -का -कं, अत्याचारमूलकः &c., पिशाचादिनिष्ठाप्रयुक्तः -क्ता -क्तं.

SUPERSTRUCTURE, *s.* वास्तूपरिस्थभवनं, उपरिव्यूहनं. *See* STRUCTURE.

To SUPERVENE, *v n.* अकस्माद् उपस्था (c. 1. -तिष्ठति -स्थातुं) or आगम्.

To SUPERVISE, SUPERVISION, *see To* SUPERINTEND, INSPECT, &c.

SUPINE, *a.* (Lying with the face upward) उत्तानशयः -या -यं, उत्तानः -ना -नं, ऊर्द्धमुखः -खा -खी -खं.—(Indolent) अलसः -सा -सं

SUPINENESS, *s.* अलसता, आलस्यं, तन्द्रा. *See* INDOLENCE.

SUPPER, *s.* नक्तभोजनं, रात्रिभोजनं, साय्यभोजनं, निशिभोजनं.

To SUPPLANT, *v. a.* (Trip up), *see* the word.—(Displace by stratagem) छलेन निरस् (c. 4. -अस्यति -सितुं) or निराकृ or अपसृ (c. 10. -सारयति -यितुं), वञ्च् (c. 10. वञ्चयति -यितुं), *see To* DISPLACE.

SUPPLE, *a.* कोमलः -ला -लं, मृदुः -दुः -दुी -दु, सुनम्यः -म्या -म्यं, सुखनम्यः &c., नमनशीलः -ला -लं. *See* PLIANT, FLEXIBLE.

SUPPLEMENT, *s.* परिशिष्टं, परिवृंहणः, उत्तरखण्डः, अतिदेशः, अतिनिर्देशः, न्यूनतापूरणं, न्यूनताभरणं.

SUPPLEMENTAL, SUPPLEMENTARY, *a.* अतिनिर्दिष्टः -ष्टा -ष्टं, अतिदिष्टः &c., अतिनिर्देशकः -का -कं, न्यूनतापूरकः -का -कं, न्यूनताभरकः &c.

SUPPLENESS, *s.* कोमलता, मृदुता, सुनम्यता, नमनशीलता.

SUPPLIANT, SUPPLICANT, *a.* or *s.* अर्थी -र्थिनी -र्थि (न्), प्रार्थकः -का -कं, प्रार्थयिता -त्री -तृ (तृ), मार्गणकः &c., अभ्यर्थयमानः -ना -नं, कृताञ्जलिः -लिः -लि, बद्धाञ्जलिः &c., शरणार्थी &c., शरणागतः -ता -तं.

SUPPLIANTLY, *adv.* कृताञ्जलिवत्, बद्धाञ्जलिवत्, अञ्जलिकर्म्मपूर्व्वं.

To SUPPLICATE, *v. a.* अञ्जलिकर्म्मपूर्व्वं प्रार्थ् (c. 10. -अर्थयते -ति -यितुं) or अभ्यर्थ् or सम्प्रार्थ् or अर्थ्, अञ्जलिं कृत्वा याच्. *See To* ENTREAT.

SUPPLICATED, *p. p.* प्रार्थितः -ता -तं, अनुनीतः -ता -तं. *See* ENTREATED.

SUPPLICATION, *s.* प्रार्थनं -ना, अर्थः, याच्ञा, अनुनयः. *See* ENTREATY.

SUPPLIED, *p. p.* सम्पन्नः -न्ना -न्नं, युक्तः -क्ता -क्तं, सम्भृतः -ता -तं; 'as an ellipsis,' अध्याहृतः -ता -तं; 'is plentifully supplied,' आपूर्य्यते.

To SUPPLY *v. a.* उपस्था in caus. (-स्थापयति -यितुं), उपकॢप्, परिकॢप्. सम्भृ, पॄ (c. 10. पूरयति -यितुं), सम्पॄ, *see To* FURNISH, PROVIDE.—(Serve instead of), *see To* SERVE.—(Supply an ellipsis अध्याहृ, अभ्यूह्, ऊह्, अभ्यूहं कृ, समासाध्याहारं कृ.

SUPPLY, *s.* सम्भारः, सम्भृतिः *f.*, सामग्री, *see* STOCK, STORE.—(Supplies) निर्वाहः, यात्रिकं, पाथेयं, *see* PROVISIONS.

To SUPPORT, *v. a.* (Uphold, sustain) आलम्ब् (c. 10. -लम्बयति -यितुं, c. 1. -लम्बते -म्बितुं), अवलम्ब्, समवलम्ब्, धृ (c. 10. धारयति -यितुं, c. 1. धरति, धर्त्तुं), संधृ, परिधृ, अभिधृ, संस्तम्भ्, उपस्तम्भ्, अवष्टम्भ्, विष्टम्भ्, संग्रह्, *see To* MAINTAIN; 'how shall I support life?' कथं जीवितं धरिष्ये; 'to support with the hand,' करालम्बनं कृ; 'this point being supported on the finger,' तस्मिन् विन्दौ अङ्गुल्या अवलम्बिते.—(Support with food, &c.) भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सम्भृ, भरणं कृ, भृतिं दा, पुष् (c. 10. पोषयति -यितुं), पोषणं कृ, पुष्टिं कृ, पाल् (c. 10. पालयति -यितुं), आलम्ब्, आलम्बनं कृ, वृध् in caus., संवृध्, भू in caus.; 'to support a family,' कुलभरणं कृ, कुलालम्बनं कृ, तन्त्र् (c. 10. तन्त्रयते -यितुं); 'to support one's self,' निर्वाहं कृ.—(Bear, endure) सह्, विषह्, *see To* ENDURE, SUFFER.—(Help) उपकृ, उपग्रह्, अनुग्रह्.—(Vindicate, make good), *see To* MAINTAIN.—(Support the courage, &c.), *see To* ENCOURAGE, CONSOLE, &c.

SUPPORT, *s.* (Act of supporting) आलम्बनं, अवलम्बनं, धारणं, उपस्तम्भनं, अवष्टम्भनं, संस्तम्भनं, संग्रहः -हणं; 'support of life,' प्राणधारणं, प्राणोपस्तम्भः, प्राणयात्रा, प्राणस्थितिः *f.*—(Supporting with food, &c.) भरणं, पोषणं, पुष्टिः *f.*, पालनं, प्रतिपालनं, भृत्या, पालनपोषणं, सम्भारः, सम्भृतिः *f.*, संवर्धनं.—(Means of subsistence) उपजीवनं, उपजीविका, *see* MAINTENANCE, SUBSISTENCE.—(That

which upholds) आधारः, धारणं, आलम्बः -म्बनं, अवलम्बनं, उपस्तम्भः, अवष्टम्भः, उपग्रः, आश्रयः, उपलब्धयः; 'contiguous support,' अन्तिकाश्रयः.—(Help), *see* HELP.

SUPPORTABLE, *a.* सह्यः -ह्या -ह्यं, सहनीयः -या -यं. *See* TOLERABLE.

SUPPORTED, *p. p.* (Upheld) आलम्बितः -ता -तं, अवलम्बितः &c., उन्नम्भितः -ता -तं, उपस्तम्भितः &c., अवष्टम्भितः &c., उपष्टब्धः -ब्धा -ब्धं, अवष्टब्धः &c., आधृतः -ता -तं, धारितः &c., आधारितः &c., साधारः -रा -रं; 'with the hand,' करालम्बितः &c., दत्तहस्तः -स्ता -स्तं.—(Maintained) भृतः -ता -तं, सम्भृतः &c., पोषितः &c., *see* MAINTAINED.

SUPPORTER, *s.* (Upholder) आलम्बी *m.* (न्), धारकः, धारी *m.* (न्), धरः, उपस्तम्भकः, अवष्टम्भकः, आलम्बकारी *m.*, उपस्तम्भकारी *m.*, उद्वहः.—(Maintainer) भर्त्ता *m.* (र्तृ), पोषकः, *see* MAINTAINER; 'of a family,' कुलालम्बी *m.* -म्बिनी *f.*, कुलोद्वहः, उपाधिः *m.*

SUPPOSABLE, *a.* मन्तव्यः -व्या -व्यं, भावनीयः -या -यं, कल्पनीयः &c.

To SUPPOSE, *v. a.* (Conceive to be, assume) कॢप् (c. 10. कल्पयति -यितुं), मनसा कॢप्, सम्भू (c. 10. -भावयति -यितुं), विभू, भू, उपन्यस्, अप्रमाणपूर्वम् उपन्यस्, आहार्य्यारोपं कृ.—(Imagine, infer) मन् (c. 4. मन्यते, मन्तुं), विभू, तर्कै, अवगम्, अनुमा, आशङ्क्, *see To* THINK, INFER.—(Required to exist, presuppose) पूर्व्वं or अग्रे कॢप् or भू in caus., अस्तित्वदर्शनं कृ, अस्तित्वप्रदर्शनं कृ.

SUPPOSED, *p. p.* कल्पितः -ता -तं, भावितः &c., मतः &c., अनुमितः &c.; 'for various reasons it is supposed,' अनेकहेतुभिर् अनुमीयते.

SUPPOSITION, SUPPOSAL, *s.* कल्पना, भावना, अनुमानं, अनुमितिः *f.*, तर्कः, वितर्कः, बुद्धिः *f.*, उपन्यासः, पक्षः. *See* HYPOTHESIS.

SUPPOSITITIOUS, *a.* कृत्रिमः -मा -मं, कल्पितः -ता -तं, छलेन सद्वस्तुस्थाने स्थापितः -ता -तं; 'child,' पुत्रप्रतिनिधिः *m.*

To SUPPRESS, *v. a.* (Conceal) उपगुह् (c. 1. -गूहति -हितुं), निगुह्, गुह्.—(Restrain, obstruct) नियम् (c. 1. -यच्छति -यन्तुं), विनियम्, निरुध् (c. 7. -रुणद्धि -रोद्धुं), अवरुध्, संरुध्, रुध्, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), स्तम्भ् (c. 9. स्तभ्नाति, c. 10. स्तम्भयति -यितुं), निवृ (c. 10. -वारयति -यितुं), धृ in caus., विधृ, यन्त्र् (c. 10. यन्त्रयति -यितुं), जि (c. 1. जयति, जेतुं), निवृत् (c. 10. -वर्त्तयति -यितुं); 'to suppress one's passions,' इन्द्रियाणि जि or निग्रह् or दम्; 'one who suppresses his passions,' जितेन्द्रियः; 'to suppress anger,' क्रोधं जि or निग्रह्; or expressed by अन्तर् in comp.; as, 'one who suppresses his anger,' अन्तःक्रोधी *m.* (न्), जितक्रोधः; 'his tears,' अन्तर्वाष्पः; 'to suppress disturbances,' कण्टकमर्दनं कृ; 'the voice,' वाक्स्तम्भं कृ, वाग्रोधं कृ; 'the breath,' श्वासावरोधं कृ.

SUPPRESSED, *p. p.* (Concealed) उपगूढः -ढा -ढं, निगूढः &c.—(Restrained, obstructed) स्तम्भितः -ता -तं, रुद्धः -द्धा -द्धं, निगृहीतः -ता -तं, यतः &c., समुपोढः &c., *see* RESTRAINED; or expressed by अन्तर् in comp.; as, 'suppressed anger,' अन्तःक्रोधः; 'suppressed fever,' अन्तर्दाहः.

SUPPRESSION, *s.* (Restraint, stoppage) नियमनं, निगृहीतिः *f.*, निग्रहः -हणं, यन्त्रणं, संयमः -मनं, रोधः, अवरोधः, स्तम्भः -म्भनं, अवष्टम्भः, आयामः, निवारः -रणं; 'of the breath,' श्वासरोधः, श्वासावरोधः; 'of the voice,' वाक्स्तम्भः; 'of the urine,' मूत्रावरोधः, मूत्रावष्टम्भः; 'of the passions,' इन्द्रियजयः, इन्द्रियनिग्रहः, कामावसायः; 'of feeling,' मतिसन्धानं.—(Concealment) गोपनं, अपवारणं, संवरणं, अप्रकाशनं, अपलापः.

To SUPPURATE, *v. n.* पूय् (c. 1. पूयते -यितुं), सपूयः -या -यं भू, पक्वः -क्वा -क्वं भू, पक्वीभू, परिपक्वीभू. *See To* MATURATE, *v. n.*

SUPPURATION, *s.* पाकः, परिपाकः, पूयत्वं, संस्रावः, *see* MATURATION.

SUPPURATIVE, *a.* पाचकः -का -कं, पाचनः &c. *See* MATURATIVE.

SUPREMACY, *s.* आधिपत्यं, प्रभुत्वं -ता, प्रधानता -त्वं, प्राधान्यं, प्रधानाधिकारः, ईशिता -त्वं, प्रभविष्णुता -त्वं, ऐश्वर्य्यं मुख्यता -त्वं, मुख्याधिकारः, स्वाम्यं, स्वामित्वं, श्रेष्ठत्वं.

SUPREME, *a.* (Highest in authority) प्रधानः -ना -नं, सर्व्वप्रधानः &c., ऐशिकः -की -कं, ऐश्वरः -री -रं, सर्व्वोपरिस्थः &c., प्रभुः -भ्वी -भु, प्रभविष्णुः -ष्णुः -ष्णु, आधिकारिकः -की -कं, *see* PRE-EMINENT.—(Highest) परमः -मा -मं, पारमिकः -की -कं, परः -रा -रं, *see* CHIEF; 'supreme monarch,' परमराजः; 'supreme authority,' परमाधिकारः, प्रधानाधिकारः, ऐकपत्यं; 'supreme Being,' प्रधानं, परमब्रह्म *n.* (न्), परब्रह्म *n.*, ब्रह्म *n.*, जगदात्मा *m.* (न्), चिद्रूपं, निर्गुणः, अखिलात्मा *m.*

SUPREMELY, *adv.* परमं, परं, अत्यन्तं, अतिशय or अति prefixed.

SURAT, *s.* (Country on the western side of India) सुराष्ट्रः.

SURD, *s.* (In algebra) करणीगतराशिः *m.*, करणीगतसंख्या, करणीगतः.

SURE, *a.* (Fixed, certain) स्थिरः -रा -रं, आवश्यकः -की -कं, अवश्यकः -का -कं, ध्रुवः -वा -वं, निश्चितः -ता -तं, सुनिश्चितः -ता -तं, असन्दिग्धः -ग्धा -ग्धं, निःसंशयः -या -यं, निःसन्देहः -हा -हं, अवश्यम्भावी -विनी &c.—(Having full confidence, certainly knowing) कृतनिश्चयः -या -यं, सनिश्चयः &c., जातनिश्चयः &c., दृढनिश्चयः &c., निश्चितमनस्कः -स्का -स्कं, निश्चितमनाः -नाः -नः (स्), संशयहीनः -ना -नं, सन्देहहीनः &c., निश्चयी &c.—(Secure) निर्भयः -या -यं; 'I am sure,' मम दृढनिश्चयो विद्यते, मम दृढज्ञानं जायते, मम स्थिरज्ञानं जायते, मम दृढप्रत्याशा विद्यते; 'to be sure,' अवश्यं, *see* CERTAINLY.

SURE, SURELY, *adv.* अवश्यं, नूनं, ध्रुवं, निश्चितं. *See* CERTAINLY.

SURETY, *s.* प्रतिभूः *m.*, प्रातिभाव्यं, पारिभाव्यं, प्रतिनिधिः *m.*, लग्नकः, प्रात्ययिकः, बन्धकः, न्यासः. *See* SECURITY.

SURF, *s.* भङ्गिः -ङ्गी *f.*, भङ्गः, लहरिः -री *f.*, कल्लोलः, तरङ्गायितः.

SURFACE, *s.* पृष्ठं, पृष्ठभागः, तलं -लः, बहिर्भागः, उपरिभागः, उपरिस्थभागः, विस्तारः, तलपर्य्यन्तः, दृश्याङ्गं, दर्शनाङ्गं, मुखं; 'of the earth,' भूतलं, भूपृष्ठं, पृथिवीतलं, क्षितितलं, क्षौणितलं, क्षितिपीठं, भूमुखं, कुथलं, धरोपस्थः; 'of a rock,' शिलातलं.

To SURFEIT, *v. a.* अत्यन्तभोजनदानेन वमनेच्छां जन् (c. 10. जनयति -यितुं), अत्यन्तं तृप् in caus., अतिसौहित्यं जन्. *See To* GLUT, *v. a.*

To SURFEIT, *v. n.* अतिभोजनेन वमनेच्छुः -च्छुः -च्छु भू.

SURFEIT, *s.* अतितृप्तिः *f.*, अतिसौहित्यं, अतिभोजनप्रयुक्ता वमनेच्छा.

SURFEITED, *p. p.* अतितृप्तः -प्ता -प्तं, अतिभोजनेन वमनेच्छुः -च्छुः -च्छु.

SURGE, *s.* कल्लोलः, उल्लोलः, महोर्म्मिः *m. f.*, ऊर्म्मिः *m. f.*, भङ्गः, भङ्गिः -ङ्गी *f.*, तरङ्गः, अर्गलः. *See* BILLOW.

SURGEON, *s.* शस्त्रवैद्यः, अस्त्रचिकित्सकः, शालाकी *m.* (न्), कायशल्यादिभिषक् *m.* (ज्), शल्यशास्त्रज्ञः; 'veterinary,' अश्ववैद्यः.

SURGERY, *s.* अस्त्रचिकित्सा, कायचिकित्सा, शस्त्रवैद्यकं, शस्त्रवैद्यकर्म्म *n.* (न्), शल्यशास्त्रं, राक्षसं, आसुरी.

SURGICAL, *a.* अस्त्रचिकित्सासम्बन्धी &c., शस्त्रवैद्यकर्म्मसम्बन्धी &c.

SURLINESS, *s.* कर्कशता, कार्कश्यं, वक्रशीलता, *see* MOROSENESS.

SURLY, *a.* कर्कशः -शा -शं, वक्रशीलः -ला -लं. *See* MOROSE.

To SURMISE, *v. a.* शङ्क्, आशङ्क्, तर्कै, सम्भू in caus. *See To* SUSPECT.

SURMISE, *s.* वितर्कः, शङ्का, आशङ्का, संशयः. *See* SUSPICION.

To SURMOUNT, *v. a.* अतिक्रम (c. 1. -क्रामति -क्रमितुं), अधिक्रम्, अभ्यतिक्रम्, अधिरुह (c. 1. -रोहति -रोढुं), आरुह्, तीर् (c. 10. तीरयति -यितुं), पार् (c. 10. पारयति -यितुं), तॄ. *See To* OVERCOME.

SURMOUNTABLE, *a.* अतिक्रमणीयः -या -यं, अतिक्रम्यः &c., अधिगम्यः &c.

SURMOUNTED, *p. p.* अतिक्रान्तः -न्ता -न्तं, उत्तीर्णः -र्णा -र्णं, तीर्णः &c.

SURNAME, *s.* पद्धतिः -ती *f.*, कुलनाम *n.* (न्), उपनाम *n.*, उपपदं, रूढिः *f.* Examples of surnames in Sanskrit are शर्म्मन् in विष्णुशर्म्मन्, and दासः in कालिदासः.

To SURNAME, *v. a.* उपनाम दा or कृ, पद्धतिं दा, कुलनाम दा.

SURNAMED, *p. p.* उपनामकः -का -कं, उपनामविशिष्टः -ष्टा -ष्टं.

To SURPASS, *v. a.* अतिक्रम (c. 1. -क्रामति -क्रमितुं), अतिशी (c. 2. -शेते -शयितुं), अतिचर (c. 1. -चरति -रितुं), अतिरिच in pass. (-रिच्यते), विशिष in pass., श्रेष्ठः -ष्ठा -ष्ठं भू. *See To* EXCEED, EXCEL.

SURPASSABLE, *a.* अतिक्रमणीयः -या -यं, अतिक्रम्यः -म्या -म्यं.

SURPASSED, *p. p.* अतिक्रान्तः -न्ता -न्तं, जितः -ता -तं, विजितः &c., उत्क्रान्तः -न्ता -न्तं, प्रक्रान्तः &c., अतीतः &c., अन्तरितः &c. *See* EXCEEDED.

SURPASSING, *part.* or *a.* अत्यन्तः -न्ता -न्तं, अतिक्रामकः &c., *see* EXCEEDING, *a.*; often expressed by अति; as, 'surpassing the wind,' अत्यनिलः.

SURPLUS, *s.* उद्वर्तः, उद्वृत्तं, उच्छिष्टं, अधिकभागः, परभागः, समभिहारः.

SURPLUS, *a.* अधिकः -का -कं, उद्वृत्तः -त्ता -त्तं, उद्वर्तः -र्त्ता -र्त्तं.

To SURPRISE, *v. a.* (Strike with wonder) विस्मि in caus. (-स्माययति -स्मापयति -ते -यितुं), विस्मयं जन् (c. 10. जनयति -यितुं), विस्मयं कृ, विस्मापनं कृ. आश्चर्य्यत्वं जन्, चमत्कारं जन्, चमत्कृ.—(Come upon unawares) अकस्मात् or अचिन्तितम् आक्रम् or उपक्रम् or उपस्था or आगम or आसद or अवस्कन्द्.

SURPRISE, SURPRISAL, *s.* (Wonder) विस्मयः, आश्चर्य्यत्वं, आश्चर्य्यं, चमत्कारः चमत्कृतिः *f.*, चमत्क्रिया, चित्रं, अद्भुतरसः, वीक्षां -क्ष्यं, चोद्यं. —(Coming upon unawares) अकस्माद् आक्रमणं or अवस्कन्दः -न्दनं.

SURPRISED, *p. p.* (Struck with wonder) विस्मितः -ता -तं, विस्मयान्वितः &c., विस्मयापन्नः -न्ना -न्नं, आगतविस्मयः -या -यं, जातविस्मयः &c., सविस्मयः &c., विस्मयाकुलः -ला -लं, चमत्कृतः -ता -तं, जातचमत्कारः -रा -रं; 'to be suprised,' विस्मितः -ता -तं भू or अस्, विस्मि (c. 1. -स्मयते -स्मेतुं), विस्मयं गम्.—(Come upon unawares) अकस्माद् आक्रान्तः -न्ता -न्तं or अवस्कन्दितः -ता -तं.

SURPRISING, *part.* or *a.* विस्मयजनकः -का -कं, विस्मयकारकः &c., विस्मापकः &c., विस्मापनः -ना -नं, आश्चर्य्यः -र्य्या -र्य्यं, आश्चर्य्यकरः -रा -रं, आश्चर्य्यकारकः -का -कं, चमत्कारी -रिणी -रि (न्), चमत्कारिकः &c., अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रः &c.; 'a very surprising thing,' महदाश्चर्य्यं.

To SURRENDER, *v. a.* (Resign, give up) त्यज्, परित्यज्, उत्सृज्, विसृज्, अवसृज्, उत्सर्गं कृ, उत्सर्जनं कृ, हा, विहा, प्रोञ्छ्, सदयस्, प्रत्यादिश्, पराद.—(Commit) समृ in caus. (-अर्पयति -यितुं), क्षु in caus., न्यस्, निक्षिप्, प्रतिपद् in caus., प्रद, परिद, दा, प्रयम् (c. 1. -यच्छति -यन्तुं).

To SURRENDER, *v. n.* वशं गम or उपगम or अभ्युपे, वशीभू.

SURRENDER, *s.* त्यागः, परित्यागः, उत्सर्गः, उत्सर्जनं. *See* SUBMISSION.

SURRENDERED, *p. p.* त्यक्तः -क्ता -क्तं, परित्यक्तः &c., उत्सृष्टः -ष्टा -ष्टं.

SURREPTITIOUS, *a.* (Done by stealth) छलेन कृतः -ता -तं, *see* CLANDESTINE-(Introduced fraudulently) छलेन निवेशितः, *see* FRAUDULENT.

SURREPTITIOUSLY, *adv.* छलेन, सकपटं. *See* CLANDESTINELY, FRAUDULENTLY.

SURROGATE, *s.* धर्म्माध्यक्षप्रातिनिधिः *m.*, धर्म्माधिपतिप्रतिनिधिः.

To SURROUND, *v. a.* परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं, c. 10. -वेष्टयति -यितुं), संवेष्ट्, उपवेष्ट्, प्रवेष्ट्, परिवृ, आवृ, परिक्षा, उपस्था, परिगम्, परिसृ, परिचर्, परी, अभिपरी, परिधा, संवल्, प्रदक्षिणीकृ. *See To* ENCOMPASS, INCLOSE.

SURROUNDED, *p. p.* परिवेष्टितः -ता -तं, वेष्टितः &c., परिवृतः -ता -तं, आवृतः &c., वृतः &c., परिगतः -ता -तं, परिवीतः -ता -तं, संवीतः &c., परीतः &c., वलयितः &c., परिक्षिप्तः -प्ता -प्तं, पर्यवस्थः -स्था -स्थं, अभिजुष्टः -ष्टा -ष्टं. *See* ENCOMPASSED.

SURROUNDING, *s.* (The act) परिवेष्टनं. *See* ENCOMPASSMENT.

SURROUNDING, *part.* परिवेष्टकः -का -कं, परिवेष्टनकारी -रिणी &c., परिगतः -ता -तं, आवरकः -का -कं, परिवरकः &c.—(Neighbouring), *see* the word; 'surrounding place,' परिष्टलं.

SURTOUT, *s.* उत्तरीयं, प्रावारः -रकः, निचोलः -लो, चलिः *m.*

SURVEILLANCE, *s.* अध्यक्षता, निरूपणं, अवेक्षा. *See* INSPECTION.

To SURVEY, *v. a.* आलोक् (c. 10. -लोकयति -यितुं), अवलोक्, समवलोक्, समालोक्, विलोक्, निरीक्ष् (c. 1. -ईक्षते -क्षितुं), अवेक्ष्, समवेक्ष्, परीक्ष्, निरूप् (c. 10. -रूपयति -यितुं), दृश्, अनुदृश्, सन्दृश्, *see To* INSPECT, EXAMINE, SCRUTINIZE.—(Land) भूमापनं कृ, भूमिमापनं कृ, भूमिं परिमा.

SURVEY, *s.* निरीक्षा -क्षणं, अवलोकनं, निरूपणं, *see* INSPECTION.—(Of land) भूमापनं, भूमिमापनं.

SURVEYED, *p. p.* निरीक्षितः -ता -तं, आलोकितः &c. *See* INSPECTED.

SURVEYOR, *s.* (Of land, &c.) भूमापकः, भूमापनकृत्.

To SURVIVE, *v. a.* (Outlive another) अन्योत्तरं or परोत्तरं जीव् (c. 1. जीवति -वितुं), अन्यमरणोत्तरं जीव्, उत्तरं जीव्, उत्तरजीवी -विनी &c. भू, अधिककालं जीव्, *see To* OUTLIVE.

To SURVIVE, *v. n.* मृ (c. 6. म्रियते), म्रियमाणः -णा —अभू, अवस्था.

SURVIVOR, SURVIVING, *s.* or *part.* म्रियमाणः -णा -णं, उत्तरजीवी -विन् -वि (न्), परोत्तरजीवी &c., अन्योत्तरजीवी &c., परमरणोत्तरजीवी &c अवस्थितः -ता -तं, अनुगतः &c.—(Left alive on the field of battle) हतशेषः -षा -षं, हतशिष्टः -ष्टा -ष्टं.

SUSCEPTIBILITY, *s.* ग्रहणशीलता ग्रहणक्षमता, ग्रहणशक्तिः *f.*, ग्राहकत्वं, वेदनक्षमता, वेदनग्राहकत्वं, ग्रहणोपयुक्तता, वेदनशीलता, वेदनपात्रता, ग्रहणपात्रता.

SUSCEPTIBLE, *a.* ग्राहकः -का -कं, ग्राही -हिणी -हि (न्), ग्रहणशीलः -ला -लं, ग्रहणक्षमः -मा -मं, ग्रहणशक्तः -क्ता -क्तं, वेदनक्षमः &c., वेदनग्राहकः -का -कं, गमनीयः -या -यं; 'of pain,' मृदुभद्दुःखः -खा -खं, शीघ्रदुःखी &c.; 'of disease,' मृदुभरोगः -गा -गं, शीघ्ररोगी -गिणी &c.; 'of anger,' मृदुभकोपः -पा -पं, शीघ्रकोपी &c.; of warm passions,' शीघ्रमनोविकारी &c.

To SUSPECT, *v. a.* (Mistrust, doubt) शङ्क् (c. 1. शङ्कते -ङ्कितुं), आशङ्क्, परिशङ्क्, संशङ्क्, न विश्वस् (c. 2. -श्वसिति -तुं), रेक् (c. 1. रेकते -कितुं), आरेक्, संशयं कृ. संशी, संशयारोपं कृ, भी (c. 3. बिभेति, भेतुं), 'to suspect a fault,' दोषं or अपराधं शङ्क्; 'he suspects me of the crime,' मां दोषिणं परिशङ्कते or मां दोषेण परिशङ्कते; 'why do you suspect me?' किं मां शङ्कसे; 'I suspect the truth of what he says,' तथ्यं वचस् तस्य परिशङ्के, 'I suspect the sincerity of your repentance,' दक्षिणस्य ते कृतप-

आत्मापस्य बिभेमि.—(Imagine, conjecture) तर्क्, सन्तर्क्, मन्, शङ्क्, *see To* SUPPOSE.

SUSPECTED, *p. p.* शङ्कितदोषः -षा -षं, शङ्कितापराधः -धा -धं. शङ्कितः -ता -तं, आशङ्कितः &c., तर्कितः &c., अविश्वस्तः -स्ता -स्तं; 'to be suspected,' शङ्कनीयः -या -यं, शङ्क्यः -ङ्क्या -ङ्क्यं.

To SUSPEND, *v. a.* (Hang up) उद्बन्ध् (c. 9. -बध्नाति -बन्द्धुं), बन्ध्, उद्बन्धनं कृ, प्रलम्ब् in caus., *see To* HANG.—(Make to depend) अवलम्ब् in caus. (-लम्बयति -यितुं), समवलम्ब्, समालम्ब्.—(Debar) निषिध्, निवृ in caus., वृ in caus.—(Cause to stop for a time) कियत्कालपर्य्यन्तं निवृत् (c. 10. -वर्त्तयति -यितुं), *see To* STAY, DELAY, *v. a.*

SUSPENDED, *p. p.* (Hung up, made to hang) उद्बद्धः -द्धा -द्धं, प्रलम्बितः -ता -तं, लम्बितः &c., आलम्बितः &c., आन्दोलितः &c.; 'in a swing or loop.' शिक्यितः -ता -तं, काञ्चितः &c.; 'suspended round the throat,' कण्ठलग्नः -ग्ना -ग्नं.—(Caused to cease for a time) कियत्कालपर्य्यन्तं निवर्त्तितः -ता -तं.

SUSPENSE, *s.* अनिश्चयः, अनिर्णयः, सन्देहः, संशयः, विकल्पः, अनिधारः -रणं, भावसन्धिः *m.*, कृताकृतं; 'in suspense,' दोलायमानः -ना -नं, आन्दोलितमनाः -नाः -नः (स्), सन्देहदोलस्थः -स्था -स्थं. संशयस्थः &c.

SUSPENSION, *s.* (Hanging up) उद्बन्धनं.—(Delaying) विलम्बः -म्बनं.—(Suspension of work, cessation) कर्म्मनिवृत्तिः *f.*, कर्म्मविच्छेदः, निवृत्तिः *f.*, कर्म्मान्तरं, अवसानं.—(Interruption or intermission for a time) कियत्कालपर्य्यन्तं विच्छेदः or निवृत्तिः *f.* or रोधः or निरोधः.—(Causing to depend) अवलम्बनं.

SUSPICION, *s.* शङ्का, आशङ्का, संशयः, वितर्कः, तर्कः, विकल्पः, निह्नवः, अविश्वासः, अप्रत्ययः, कुतर्कः; 'on suspicion,' शङ्क्यया; 'the suspicion arose,' इति शङ्कितं, इति तर्कितं.

SUSPICIOUS, *a.* (Inclined to suspect) शङ्काशीलः -ला -लं, शङ्काबुद्धिः -द्धिः -द्धि, संशयशीलः -ला -लं, संशयबुद्धिः &c., सन्देहशीलः &c., सन्देहबुद्धिः &c., सन्दिग्धचित्तः -त्ता -त्तं, सन्दिग्धमतिः -तिः -ति, संशयालुः -लुः -लु, शङ्की -ङ्किनी &c., अविश्वासी &c., कुतर्कशीलः -ला -लं, कुतर्कस्वभावः -वा -वं, अप्रत्ययी &c., कुहकचकितः -ता -तं.—(Giving rise to suspicion) शङ्कनीयः -या -यं, आशङ्कनीयः &c., शङ्काजनकः -की -कं, शङ्कावहः -हा -हं, शङ्कोत्पादकः &c., संशयजनकः &c., सन्देहजनकः &c., वितर्क्यः -र्क्या -र्क्यं, वितर्कणीयः -या -यं, शङ्कास्पदं, संशयास्पदं.—(Doubtful) सशङ्कः -ङ्का -ङ्कं, साशङ्कः &c., शङ्कितः -ता -तं, आशङ्कितः &c., *see* DOUBTFUL.

To SUSTAIN, *v. a.* धृ (c. 1. धरति, धर्त्तुं, c. 10. धारयति -यितुं), सन्धृ, अभिधृ, आलम्ब्, भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), सह्. *See To* SUPPORT, BEAR.

SUSTAINED, *p. p.* धृतः -ता -तं, भृतः &c., आलम्बितः &c. *See* SUPPORTED.

SUSTENANCE, *s.* आहारः, अन्नं, जीविका, उपजीविका. *See* SUPPORT.

SUTLEJ, *s.* (The River) सुरुद्रवी.

SUTLER, *s.* सेनाचरः, सेनानुचरः, सेनानुचारी *m.* (न्).

SUTTEE, *s.* (Widow who burns herself) सती, अनुमृता.

SUTURE, *s.* सन्धिः *m.*, सेवनी, सीवनं; 'of the skull,' कपालसन्धिः *m.*, कपालसेवनी, तुन्नसेवनी.

To SWADDLE, *v. a.* दीर्घपट्टकैः परिवेष्ट् (c. 1. -वेष्टते -ष्टितुं) or वेष्ट्.

SWADDLING-CLOTHES, *s.* बालपरिवेष्टनं, शिशुपरिवेष्टनं, बालकवेष्टनं.

SWAG-BELLIED, *a.* लम्बोदरः -रा -रं. *See* POT-BELLIED.

To SWAGGER, *v. n.* *See To* BLUSTER, BULLY, BRAG, STRUT.

SWAIN, *s.* ग्राम्यजनः, क्षेत्री *m.* (न्), मेषपालकः. *See* COUNTRYMAN.

To SWALLOW, *v. a.* गॄ (c. 6. गिरति, गरितुं -रीतुं), निगॄ, अवगॄ, ग्रस् (c. 1. ग्रसते -सितुं), गरणं कृ. गिरणं कृ, निगरणं कृ, निगारं कृ, ग्रसनं कृ, ग्रासं कृ, गिलनं, कृ.

SWALLOW, *s.* निगरणः, अन्नमार्गः, अन्नवाहिस्रोतस् *n.*

SWALLOWED, *p.p.* निगीर्णः -र्णा -र्णं, गीर्णः &c., गिरितः -ता -तं, निगिरितः &c., गिलितः -ता -तं, ग्रस्तः -स्ता -स्तं, ग्रसितः -ता -तं.

SWALLOWING, *s* (The act) गिरणं, गरणं, निगरणं, निगारः, निगरः, गीर्णिः *f.*, गिरिः *f.*, गरा, गिलनं, गिलिः *f.*, ग्रसनं, ग्रासः.

SWALLOW-WORT, *s.* (Plant) अर्कः, अर्कपत्रः, सूर्य्यः, मन्दारः, गणरूपः, अर्कपुष्पिका, आदित्यपुष्पिका, अर्कपर्णः, वसुकः, आस्फोतः, विकिरणः.

SWAMP, *s.* अनूपभूः *f.*, कच्छभूः *f.*, अनूपभूमिः *f.*, कच्छः. *See* MARSH.

To SWAMP, *v. a.* *See To* SINK, PLUNGE, OVERWHELM.

SWAMPY, *a.* अनूपः -पा -पं, कच्छः -च्छा -च्छं. *See* MARSHY.

SWAN, *s.* राजहंसः, हंसः. मृदुगमना.

SWARD, *s.* सतृणभूमितलं, तृणसभूमितलं, सतृणभूमिपृष्ठं.

SWARM, *s.* गणः, सङ्घः, वृन्दं, यूथं, कुलं, समूहः, मण्डलं, *see* MULTITUDE; 'of bees,' अलिवृन्दं, अलिकुलं, भ्रमरमण्डलं.

To SWARM, *v. n.* (Collect in crowds) समूहीभू, सङ्घशः सम्, सङ्घशो गम् or या or इ, वृन्दीभू.—(Be crowded with) सङ्कीर्णः -र्णा -र्णं भू, आकीर्णः &c. भू, *see* the next.

SWARMING WITH, *a.* आकीर्णः -र्णा -र्णं, सङ्कीर्णः &c., व्याप्तः -प्ता -प्तं. जुष्टः -ष्टा -ष्टं, उपद्रुतः -ता -तं. *See* CROWDED.

SWARTHINESS, *s.* श्यामता -त्वं, श्यावता, कृष्णवर्णता, कृष्णता.

SWARTHY, *a.* श्यामः -मा -मं, श्यावः -वा -वं, कृष्णवर्णः -र्णा -र्णं.

To SWATHE, *v. a.* दीर्घपट्टकैः or दीर्घवस्त्रखण्डैः परिवेष्ट्.

SWATHE, *s.* दीर्घपट्टः -ट्टकः, परिवेष्टनं, दीर्घवस्त्रखण्डः.

SWATHED, *p. p.* परिवेष्टितः -ता -तं, दीर्घपट्टपरिवेष्टितः -ता -तं.

To SWAY, *v. a.* *See To* BIAS, INFLUENCE, RULE, WIELD.

To SWAY, *v. n.* नम्, आनम्, प्रलम्ब्. *See To* LEAN, INCLINE, *v. n.*

SWAY, *s.* *See* INFLUENCE, POWER, AUTHORITY, RULE.

To SWEAR, *v. n.* शप् (c. 1. शपति -ते, c. 4. शप्यति -ते, शप्तुं), अभिशप्, परिशप्, शपथं कृ, दिव्यं कृ, शपथं शप्; 'he swore by the king,' नृपेण or नृपे शपथं शेपे; 'to swear by heaven,' स्वर्गेण शप्; he swore to return,' पुनरागमनाय शपथं चकार; 'made to swear,' शापितः -ता -तं.

To SWEAR, *v. a.* (Cause to take an oath) शप् in caus. (शापयति -यितुं), शपथं or दिव्यं कृ in caus.—(Swear an oath) शपथं शप्.

SWEARER, *s.* शपथकृत्, शपथकर्त्ता *m.* (र्त्तृ), दिव्यकर्त्ता *m.*

SWEARING, *s.* शपथकरणं, दिव्यकरणं, शपनं, शापः, अभिशापः.

SWEAT, *s.* स्वेदः, घर्म्मः, निदाघः, स्यन्दं, प्रस्वेदः. *See* PERSPIRATION.

To SWEAT, *v.n.* स्विद् (c. 4. स्विद्यति -ते, स्वेत्तुं). *See To* PERSPIRE, *v. n.*

SWEATY, SWEATING, *a.* स्वेदितः -ता -तं, सस्वेदः -दा -दं, स्वेदवान् -वती &c., स्वेदाप्लुतः -ता -तं, घर्म्माप्लुतः &c., स्वेदविन्दुक्लिन्नः &c. *See* PERSPIRING.

To SWEEP, *v. a.* मृज् (c. 2. मार्ष्टि -ष्टुं, c. 1. मार्जति -र्जितुं), सम्मृज्, परिमृज्, प्रमृज्, आमृज्, मार्जनं कृ, सम्मार्जनं कृ, मार्जन्या or मार्जनयन्त्रेण शुध् (c. 10. शोधयति -यितुं); 'to sweep off or away,' अपमृज्; अवमृज्, *see To* CARRY OFF.

To SWEEP, *v. a.* (Pass with force) महावेगेन चल् or सृ or अतिक्रम्.

SWEEP, *s.* प्रसरः, प्रचरः. *See* COMPASS, RANGE, REACH.

SWEEPER, *s.* सम्मार्जकः, मार्जकः, अवस्करकः, मलाकर्षी *m.* (न्), खलपूः *m.*, बहुकरः -रा -री, हडुकः, हडिकः, अवकृष्टः. *See* SCAVENGER.

SWEEPING, *s.* मार्जनं -ना, सम्मार्जनं, परिमार्गः, मलापकर्षणं.

SWEEPINGS, *s. pl.* अवस्करः, अवकरः, सङ्कारः, सङ्करः, अपस्करः, मलं.

SWEET, *a.* (To the taste) स्वादुः -दुः -ड्वी -दु, मधुरः -रा -रं, सुरसः -सा -सं, मधुः -ध्वी -धु, मिष्टः -ष्टा -ष्टं, वभुः -भुः -भु, मधुमान् -मती -मत् (न्), मधुमयः -यी -यं.—(Pleasing), *see* PLEASING, PLEASANT; 'a sweet song,' मधुरगीतं, कोमलगीतं -तकं.

SWEET, *s.* मधु *n.*, मधुरं, मिष्टं, स्वाद्वन्नं, आस्वादः.—(Any thing pleasant) सुखं; 'the sweets of royalty,' राज्यसुखं.

To SWEETEN, *v. a.* स्वादूकृ, मधुरीकृ, मधुसात्कृ मिष्टीकृ.

To SWEETEN, *v. n.* मधुरीभू, मिष्टीभू, मधुर (nom. मधुरायते).

SWEETENED, *p. p.* मिष्टीकृतः -ता -तं, मधुरीकृतः &c., मधुसाद्भूतः &c.

SWEETHEART, *s.* प्रियः -या, दयितः -ता, नायकः -यिका, कान्तः -न्ता.

SWEETISH, *a.* ईषन्मधुरः -रा -रं, ईषत्स्वादुः -दुः -ड्वी -दु.

SWEETLY, *adv.* मधुरं, स्वादु, मधुर in comp. *See* PLEASINGLY.

SWEETMEAT, *s.* मोदकः -कं, मिष्टं, मिष्टान्नं, स्वाद्वन्नं, मधुमस्तकं, लड्डुकं, लड्डुकं, मण्डलं, वायनं, गुल्यः, प्रहेणकं.

SWEETNESS, *s.* मधुरता, माधुर्यं, स्वादुता, स्वाद्यं, सुरसता, मिष्टता, स्वादुः *m.*, मधुरसः, कोमलता. *See* PLEASANTNESS.

SWEET-SMELLING, *a.* सुगन्धः -न्धा -न्धं, सुरभिः &c. *See* FRAGRANT.

SWEET-VOICED, SWEET-TONED, SWEET-SPEAKING, *a.* चारुस्वनः -ना -नं, मञ्जुस्वनः &c., सुस्वरः -रा -रं, मधुरस्वरः &c., मधुरभाषी -षिणी -षि (न्), मिष्टभाषी &c., प्रियवादी &c., प्रियंवदः -दा -दं.

To SWELL, *v. n.* श्वि (c. 1. श्वयति -यितुं or pass. शूयते), उच्छ्वि, स्फाय् (c. 1. स्फायते -यितुं), आस्फाय्, शूनीभू, स्फीतीभू, उच्छूनीभू, उच्छूनः -ना -नं भू, पुटवद् भू, वृध्, प्रवृध्, उत्सृप्, *see To* INCREASE, DILATE, HEAVE, *v. n.*; 'with air,' *see To* PUFF, *v. n.*

To SWELL, *v. a.* श्वि in caus. (श्वाययति -यितुं), उच्छ्वि in caus., स्फाय् in caus. (स्फावयति -यितुं), वृध् (c. 10. वर्धयति -यितुं), *see To* INCREASE, DILATE, *v. a.*

SWELLED, *p. p.* शूनः -ना -नं, उच्छूनः &c., स्फीतः &c. *See* SWOLLEN.

SWELLING, SWELL, *s.* (Tumour) शोथः, शोफः, श्वयथुः *m.*, आध्मानं, मांसवृद्धिः *f.*; 'white swelling,' पूयालसः; 'of the glands of the neck,' गण्डमाला, *see* TUMOUR.—(Intumescence), *see* the word.—(Extension, increase, expansion) विस्तारः, वृद्धिः *f.*, जृम्भः &c.—(Of the sea) ऊर्म्मिप्रलोठनं, ऊर्म्मिविभ्रमः, वानं, वारिराशिः *m.*

SWELLING, *part.* शूयमानः -ना -नं, उत्सर्पी -र्पिणी &c., प्रलोठितः -ता -तं.

SWEPT, *p. p.* मार्जितः -ता -तं, सम्मार्जितः -ता -तं, सम्मृष्टः -ष्टा -ष्टं; 'off,' अपमार्जितः -ता -तं; 'away,' अपहृतः -ता -तं.

To SWERVE, *v. n.* विचल् (c. 1. -चलति -लितुं), चल्, पराङ्मुखः -खा -खं भू, *see To* DEVIATE; 'he swerves from his duty,' स्वधर्म्मान्नाद्विचलति.

SWIFT, *a.* त्वरितः -ता -तं, शीघ्रः -घ्रा -घ्रं, शीघ्रगामी -मिनी -मि (न्) शीघ्रगतिः -तिः -ति, त्वरितगतिः &c., महावेगः -गा -गं, वेगवान् -वती -वत् (न्), द्रुतः -ता -तं, द्रुतगतिः -तिः -ति, त्वराञ्चितः -ता -तं, लघुगामी &c., जववान् &c., जवी &c., तरस्वी &c., तूर्णः -र्णा -र्णं, प्रतूर्णः &c., वेगवाही &c., क्षिप्रगतिः &c., *see* QUICK, RAPID; 'as the wind,' वायुवेगसमः -मा -मं, वायुगतिः -तिः -ति.

SWIFTLY, *adv.* शीघ्रं, त्वरितं, सत्वरं. *See* QUICKLY, RAPIDLY.

SWIFTNESS, *s.* शीघ्रता, वेगः, जवः, क्षिप्रत्वं. *See* RAPIDITY.

To SWIG, SWILL, *v. a.* अतिपानं कृ, अतिशयपानं कृ, बहुशः पा.

To SWIM, *v. a.* (Pass a river, &c., by moving the arms in water) बाहुभ्यां नदीं तॄ (c. 1. तरति -रितुं -रीतुं) or नदीतरणं कृ.

To SWIM, *v. n.* (Move along in water by means of the arms) बाहुभ्यां तरणं कृ, बाहुभ्यां जले सृ (c. 1. सरति, सर्त्तुं) or विसृ; 'as a fish,' मत्स्यवद् जले विसृ; 'unable to swim,' तरणविद्यायाम् अकुशलः, अप्रवेशः.—(Float) प्लु (c. 1. प्लवते, प्लोतुं), *see To* FLOAT.

SWIMMER, *s.* तरणकर्त्ता *m.* (र्तृ), तरणकृत्, प्लवनकृत्.

SWIMMING, *s.* तरणं, प्लवनं, जलविसरणं, बाहुभ्यां तरणं, बाहुतरणं; 'swimming across a river,' बाहुभ्यां नदीतरणं; 'swimming against the stream,' स्रोतःप्रतीपतरणं, स्रोतःप्रतिकूलतरणं.

SWIMMING, *part.* जलविसारी -रिणी -रि (न्), प्लवमानः -ना -नं.

To SWINDLE, *v. a.* or *n.* प्रतॄ, वञ्च्, परिवञ्च्, छलेन हृ or अपहृ.

SWINDLER, *s.* प्रतारकः, परस्वापहारी *m.* (न्), चाटः, पार्श्वकः.

SWINE, *s.* शूकरः, सूकरः, शूकराः *m. pl.* *See* HOG.

To SWING, *v. a.* इतस्ततो विचल् (c. 10. -चालयति -यितुं) or सञ्चल् or चल्, प्रेङ्ख् (c. 10. प्रेङ्खयति -यितुं), आन्दोलनं कृ, आन्दोल (nom. आन्दोलयति -यितुं), प्रेङ्खोल (nom. प्रेङ्खोलयति -यितुं), प्रेङ्खोलनं कृ.

To SWING, *v. n.* इतस्ततो विचल् (c. 1. -चलति -लितुं) or सञ्चल् or चल्, दोल (nom. दोलायते -यितुं). *See To* OSCILLATE.

SWING, *s.* (Oscillation) आन्दोलनं, प्रेङ्खोलनं, प्रेङ्खणं, इतस्ततो विचलनं.—(Seat, line and other apparatus for swinging) दोला -ली -लं, दोलिका, प्रेङ्खा, प्रेङ्खोलनं, हिन्दोलः -लकः, खट्वा, आन्दोलनं, काचः; 'suspended in a swing,' काचितः -ता -तं, शिक्यितः &c.—(Impetus) वेगः.

SWINGING, *part.* दोलायमानः -ना -नं, दोदुल्यमानः -ना -नं, प्रेङ्खन् -ङ्खन्ती -ङ्खत् (न्), प्रेङ्खितः -ता -तं, प्रेङ्खोलितः &c., विचलमानः -ना -नं, विचलन् &c., प्रचलितः -ता -तं, काचितः -ता -तं, शिक्यितः &c.

SWINISH, *a.* सौकरः -री -रं, शौकरः &c., सूकरवृत्तिः -त्तिः -त्ति, शूकरसदृशः -शी -शं, शूकरशीलः -ला -लं, शूकरबुद्धिः -द्धिः -द्धि.

SWITCH, *s.* पिच्छा, शिथिलदण्डः, कोमलदण्डः, मृदुपल्लवः.

SWIVEL, *s.* परिवर्त्तनवलयः, जङ्गमवलयः, परिवर्त्तननाडिः *f.*

SWOLLEN, *p. p.* शूनः -ना -नं, उच्छूनः &c., प्रोच्छूनः &c., संशूनः &c., शोथयुक्तः -क्ता -क्तं, शोफयुक्तः &c., स्फीतः -ता -तं, स्फातः &c., प्रवृद्धः -द्धा -द्धं, प्रस्फुरितः -ता -तं. *See* INCREASED, DILATED.

To SWOON, *v. n.* मुर्च्छ् (c. 1. मूर्च्छति -र्च्छितुं). *See To* FAINT.

SWOON, *s.* मूर्च्छा, मूर्च्छनं -ना, मोहः. *See* FAINTING, *s.*

SWOONED, *p. p.* मूर्च्छितः -ता -तं, मूर्च्छापन्नः -न्ना -न्नं. *See* FAINTED.

SWOONING, *part.* मूर्च्छितः -ता -तं, गतचेतनः &c., *see* FAINTING, *part.*

SWOOP, *s.* आकस्मिकावपातपूर्व्वं नखैर् ग्रहणं, अकस्माद् ग्रहणं, अकस्माद् अवपातः, अकस्माद् आक्रमणं; 'of a hawk,' श्येनावपातः.

SWORD, *s.* खड्गः, असिः *m.*, कृपाणः, निस्त्रिंशः, शिरिः *m.*, रिष्टिः *m.*, ऋष्टिः *m.*, पारेरकः; 'sword in hand,' खड्गपाणिः *m.*, कृपाणपाणिः *m.*, खड्गहस्तः; 'having a drawn sword in the hand,' आकृष्टकृपाणपाणिः; 'armed with a sword,' *see* SWORD-MAN; 'edge of a sword,' असिधारा; 'blade of a sword,' असिपत्रं; 'hilt of a sword,' त्सरुः *m.*; 'sword-exercise,' खड्गमार्गः, त्सरुमार्गः; 'sword-cut,' खड्गप्रहारः, खड्गाघातः; 'sword-bearer, खड्गधारी *m.* (न्); 'sword-belt, or sword-knot,' मेखला, त्सरुनिबन्धनं; 'sword-stick,' कूटः -टं, कूटास्त्रं.

SWORD-MAN, *s.* खड्गी *m.* (न्), खड्गधरः, खड्गधारी *m.* (न्). सखड्गः,

असिभृत् *m.*, आसिकः, असिहेतिः *m.*, नैस्त्रिंशिकः.

SWORN, *p.p.* शापितः -ता -तं, कृतशपथः -था -थं, कृतशापः -पा -पं.

SWUNG, *p.p.* आन्दोलितः -ता -तं, प्रेङ्खितः &c., प्रेङ्खोलितः -ता -तं.

SYCOPHANCY, *s.* अत्यनुरोधः, छन्दोनुरोधः, छन्दोनुवृत्तिः, *see* SERVILITY.

SYCOPHANT, *s.* अत्यनुरोधी *m.* (न्), छन्दोनुरोधी *m.* *See* SERVILE.

SYLLABIC, *a.* अक्षरसम्बन्धी -न्धिनी -न्धि (न्), आक्षरिकः -की -कं.

SYLLABLE, *s.* अक्षरं; 'monosyllable,' एकाक्षरं, *see* the word.

SYLLABUB, *s.* दुग्धफेनं, दुग्धतालीयं, क्षीरफेनं, शार्कैकः, शार्करः.

SYLLABUS, *s.* सारः, सारार्थः, ग्रन्थसारः, सारांशः. *See* COMPENDIUM.

SYLLOGISM, *s.* न्यायः, अवयवी *m.* (न्), अवयवघटितवाक्यं, अवयवयुक्तवाक्यं, अवयवोपेतवाक्यं, आनुपूर्व्यं. A syllogism has five members or अवयवाः, according to the Nyáya system, viz. 1. The proposition or assertion to be proved, प्रतिज्ञा; 2. the reason given, हेतुः; 3. the example or illustration, उदाहरणं; 4. the application, उपनयः; 5. the conclusion, निगमनं. Thus, 1. 'The hill is fiery,' पर्व्वतो वह्निमान्. 2. 'Because it smokes,' धूमवत्त्वात्. 3. 'Whatever smokes is fiery, like a culinary hearth,' यो यो धूमवान् स वह्निमान् यथा महानसः. 4. 'This (hill) has smoke which is always accompanied with fire,' वह्निव्याप्यधूमवान् अयं. 5. 'Therefore it is fiery,' तस्माद् वह्निमान्. According to the Mímánsá school, a syllogism has only the last three members.

SYLLOGISTIC, *a.* न्यायसम्बन्धी -न्धिनी -न्धि (न्), न्यायविषयकः -का -कं, न्यायरूपः -पा -पं, नैयायिकः -की -कं, अवयवयुक्तवाक्यसम्बन्धी &c.

SYLPH, *s.* तन्वङ्गी, लघ्वङ्गी, लघ्वी, तनुमध्या, विद्याधरी.

SYLVAN, *a.* वन्यः -न्या -न्यं, वानः -नी -नं, वनजः &c., *see* SILVAN.

SYMBOL, *s.* लक्षणं, चिह्नं, लिङ्गं, संज्ञा. *See* EMBLEM, SIGN.

SYMBOLICAL, *a.* लाक्षणिकः -की -कं, साङ्केतिकः -की -कं, सङ्केतात्मकः -का -कं, सङ्केतरूपः -पा -पं, उद्बोधकः -का -कं, प्रदर्शकः &c., प्रतिरूपकः &c.

SYMMETRICAL, *a.* शुद्धरूपः -पा -पं, शुद्धाकारः -रा -रं, शुद्धरेखः -खा -खं, युक्तरूपः -पा -पं, सम्मितरूपः &c., रूपवान् -वती -वत् (त्).

SYMMETRY, *s.* आकारशुद्धिः *f.*, आकारशुद्धता, अङ्गसंयोगः, अवयवसंयोगः, अङ्गसंहतिः *f.*, अवयवसंहतिः *f.*, आकारसम्मितिः *f.*

SYMPATHETIC, *a.* समदुःखः -खा -खं, समदुःखी -खिनी -खि (न्), सहदुःखी &c., समदुःखसुखः -खा -खं, समवेदनः -ना -नं. *See* SYMPATHIZING.

To SYMPATHIZE, *v. n.* समदुःखी -खिनी -खि भू, समदुःखसुखोपहतः -ता -तं भू, समदुःखसुखी &c. भू, अन्येन सह दुःखी -खिनी भू, अन्येन सह सुखी -खिनी भू, परदुःखसुखसहभागी -गिनी भू.

SYMPATHIZING, *part.* or *a.* समदुःखसुखः -खा -खं, एकदुःखसुखः &c., समदुःखी -खिनी -खि (न्), सहदुःखी &c., सहसुखी &c., अन्यदुःखसुखभागी &c., परदुःखसुखभागी &c., परदुःखदुःखी &c., परसुखसुखी &c., समदुःखः &c.

SYMPATHY, *s.* समदुःखत्वं, समदुःखिता, सहदुःखिता -त्वं, समदुःखसुखिता, अन्यदुःखदुःखिता, परदुःखदुःखिता, अन्यदुःखदुःखं, अनुवेदना, कारुण्यं, अनुकम्पा; 'joyful sympathy,' सुखसुखिता, अनुमोदनं.—(Conformity of temperament) आनुगुण्यं, स्वभावसमता, स्वभावानुगुण्यं, समभावः, भावसाम्यं, प्रकृतिसाम्यं, आनुरूप्यं, साधर्म्यं.

SYMPHONIOUS, *a.* समस्वरः -रा -रं, समानस्वरः &c. *See* HARMONIOUS.

SYMPHONY, *s.* स्वरैक्यं, स्वरसमता, तालसमता, स्वरसाम्यं, स्वरमेलनं, तानमेलनं, मानमानं, *see* HARMONY.—(Air) चर्चरी.

SYMPTOM, *s.* लक्षणं, पूर्व्वलक्षणं, चिह्नं, पूर्व्वचिह्नं, सूचना, प्रज्ञानं, कान्तारं *see* INDICATION, SIGN; 'of disease,' रोगलक्षणं, लक्षणं, विभूषिका; 'secondary symptom,' अनुबन्धः.

SYMPTOMATIC, *a.* सूचकः -का -कं, प्रदर्शकः -का -कं, उद्बोधकः &c., बोधकः &c., लाक्षणिकः -की -कं. *See* INDICATIVE.

SYNAGOGUE, *s.* यिहुदीयानां भजनभवनं or पूजामन्दिरं.

SYNCHRONISM, *s.* समकालिकता, कालैक्यं, यौगपद्यं, एककालिकता.

To SYNCHRONIZE, *v. n.* एककाले सम्भू or सम्यद्, एकसमये सम्भू, समकाले भू, समकालिकः -का -कं भू or अस्. *See* SIMULTANEOUS.

SYNCHRONOUS, *a.* स ... लकः -की -कं. *See* SIMULTANEOUS.

To SYNCOPATE, *v. a.* मध्याक्षरं लुप् (c. 6. लुम्पति, लोप्तुं), मध्याक्षरलोपं कृ.

SYNCOPE, *s.* (Fainting) मूर्च्छना.—(In grammar) मध्याक्षरलोपः

SYNECDOCHE, *s.* (Figure in rhetoric) उपलक्षणं.

SYNOD, *s.* धर्म्माध्यक्षसभा, धर्म्मोपदेशकसभा, धर्म्मसभा.

SYNODAL, SYNODICAL, *a.* सभ्यः -भ्या -भ्यं; 'month,' चन्द्रमासः.

SYNONYM, *s.* पर्य्यायः, अपरपर्य्यायः, एकार्थपदं, समानार्थशब्दः, समार्थकशब्दः, तुल्यार्थकशब्दः, उपशब्दः.

SYNONYMOUS, *a.* समानार्थः -र्था -र्थं, एकार्थः &c., एकार्थकः -का -कं, तुल्यार्थकः &c., सहार्थः -र्था -र्थं.

SYNONYMY, *s.* समानार्थत्वं, समार्थत्वं, एकार्थत्वं, तुल्यार्थत्वं.

SYNOPSIS, *s.* ग्रन्थसारात्मकपत्रं, सारपत्रकं. *See* EPITOME.

SYNTACTICAL, *a.* वाक्यविन्याससम्बन्धी &c., वाक्यरचनाविषयकः -का -कं, पदविन्यासविषयकः &c.; 'syntactical agreement,' अन्वयः.

SYNTAX, *s.* वाक्यविन्यासः, वाक्यरचना, पदविन्यासः, पदरचना, पदयोजना, वाक्ययोजना, पदान्वयः, अन्वययोजना.

SYNTHESIS, *s.* संयोगः, संयोजनं, योगकरणं. *See* COMBINATION.

SYNTHETICAL, *a.* संयोगरूपः -पा -पं, संयोगात्मकः &c., संयोगकारी &c.

SYPHILIS, *s.* उपदंशः, वृषणकच्छूः *f.* *See* LUES VENEREA.

SYPHON, *s.* *See* SIPHON.

SYRINGE, *s.* वस्तिः *m. f.*, नलिका, अन्तःप्रक्षेपणी. *See* SQUIRT

To SYRINGE, *v. a.* वस्तिद्वारेण जलादि अन्तःप्रक्षिप्, अन्तः शुध्.

SYRUP, *s.* मधुरं, मधु *n.*, इक्षुरसः, इक्षुरसजः, लेह्यं.

SYSTEM, *s.* (Plan) कल्पना, अनुसन्धानं, *see* SCHEME.—(Method) क्रमः, पर्य्यायः, *see* METHOD.—(Of the body, constitution) शरीरप्रकृतिः *f.*, देहप्रकृतिः *f.*, प्रकृतिः *f.*, भावः, शरीरं.—(Assemblage of parts adjusted into a regular whole) रीतिः *f.*, स्थितिः *f.* संस्थानं, संस्थितिः *f.*, मार्गः, क्रमः.—(Systems of philosophy). These are six, *see* under SCHOOL. The three leading systems are the Nyáya, Vedánta, and Sánkhya.

SYSTEMATIC, SYSTEMATICALLY, *see* METHODICAL, &c.

To SYSTEMATIZE, SYSTEMIZE, *v. a.* *See To* METHODIZE.

SYSTOLE, *s.* (In anatomy) हृत्पिण्डसङ्कोचः.

T.

TABOSHEER, *s.* (Manna of the bamboo) वंशक्षीरी, वंशरोचना, वंशलोचना, त्वक्क्षीरा -री, कर्म्मरी.

TABBY, *a.* चित्रः -त्रा -त्रं, शवलः -ला -लं. *See* BRINDLED

TABERNACLE, *s.* मण्डपः, दूष्यं, पटमण्डपः. *See* TENT.

TABES, *s.* क्षयः, क्षयरोगः, क्षयथुः *m.*, शरीरशोषणं.

TABLE, *s.* (For holding dishes, &c.) फलकः -कं, भोजनफलकः -कं, भोजनाधारः, भोजनासनं, मञ्चः -ञ्चकः, भोजनमञ्चः; 'writing table,'

लिखनफलकं, लिपिफलकं, लिपिसज्ञाधारः, लेखसाधनाधारः.—(Persons eating at the same table) सहभोजिनां पंक्तिः *f.*; 'unworthy of eating at the same table with the good,' सद्भिः सह एकपंक्तिभोजनानर्हः -र्हा -र्हं.—(Of stone, metal, &c., for writing) पट्टः, प्रस्तरः, पत्रं -त्रिका.—(Tabular view) पत्रकं, सारणी, प्रस्तरः, चक्रं, *see* SYNOPSIS; 'table of numbers, figures, &c.,' अङ्कजालं, सारणी, कोष्ठकं.—(Table of contents) अनुक्रमणिका, सूचीपत्रं, सूची -चिका, पत्रपद्धी.

TABLE-CLOTH, *s.* लेकाच्छादनं, फलकावरणं, फलकाच्छादनपटः.

TABLE-LAND, *s.* सानुः -नु *m. n.*, अधित्यका, प्रस्थः, समस्थलं, पर्वतभूमिका, भृगुः *m.*, कटकः, क्षुः *m.*, क्षु *n.*

TABLET, *s.* पत्रं, पत्रिका, पत्रकं, पट्टः, फलकः -कं, प्रस्तरः.

To TABOO, *v. a.* उपभोगासेधं कृ, भोगासेधं कृ. *See To* INTERDICT.

TABOR, *s.* मृदङ्गः, पटहः, पणवः, प्रणवः, आंझी *See* DRUM.

TABULAR, *a.* पत्रस्थः -स्था -स्थं, पत्रकारूढः -ढा -ढं, फलकस्थः &c.

TACIT, *a.* विवक्षितः -ता -तं, अर्थसिद्धः -द्धा -द्धं, ध्वनितः &c., अनिषेधरूपः &c., मानसः -सी -सं; 'tacit consent,' मानसानुज्ञा, मानसं.

TACITLY, *adv.* विवक्षया, अनिषेधेन, मनसा, ध्वनितार्थतस्, तूष्णीं.

TACITURN, *a.* अनालापशीलः -ला -लं, अल्पवादी -दिनी &c., तूष्णीशीलः -ला -लं, कथाविरक्तः -क्ता -क्तं, आलापविमुखः -खा -खं, भाषणविरक्तः &c., परिमितकथः &c., मौनी &c., अनालापः -पा -पं, तूष्णीकः -का -कं. *See* RESERVED.

TACITURNITY, *s.* आलापविरक्तिः *f.*, अनालापशीलता, अनालापः -पिता, मौनित्वं, मौनं, कथाविरक्तिः *f.*, वाग्यामः. *See* RESERVE.

To TACK, *v. a.* (Fasten, attach) अनुबन्ध् (c. 9. -बध्नाति -बन्द्धुं), आबन्ध्, पिनह्, आनह्, *see To* FASTEN, STITCH.

To TACK, *v. n.* नौमार्गं परिवृत् in caus., नौमार्गपरिवर्त्तनं कृ.

TACK, *s.* (Small nail) क्षुद्रकीलः, कीलकः, क्षुद्रशङ्कुः *m.*

TACKING, *s.* नौमार्गपरिवर्त्तनं, नौमार्गपरिवृत्तिः *f.*, नौपथपरिवृत्तिः.

TACKLE, TACKLING, *s.* नौकासज्जा, नौसज्जा, सज्जा. *See* RIGGING.

To TACKLE, *v. a.* *See To* HARNESS, RIG, SEIZE, LAY HOLD.

TACT, *s.* युक्तिः *f.*, कुशलता, कौशल्यं, विज्ञता, अभिज्ञता. *See* SKILL.

TACTICIAN, *s.* व्यूहरचनकुशलः, व्यूहरचनाभिज्ञः, व्यूहपण्डितः.

TACTICS, *s.* व्यूहरचनविद्या, बलविन्यासविद्या, सैन्यविन्यासविद्या, व्यूहरचना, सैन्यरचना, व्यूहनं.

TACTILE, *a.* स्पर्शनीयः -या -यं, स्पृश्यः -श्या -श्यं. *See* TANGIBLE.

TADPOLE, *s.* भेकशावकः, मंडूकशावकः, बालमण्डूकः.

TAIL, *s.* पुच्छः -च्छं, लाङ्गूलं, लाङ्गुलं, लङ्गूलं, बालः -ला, बालधिः *m.*, बालहस्तः, लूमं, लोमः, पिच्छः, लम्बः; 'peacock's tail,' बर्हः -र्हं, पिच्छं, कलापः, मयूरपुच्छं, प्रचलाकः; 'to lift up the tail,' उत्पुच्छ (Nom. उत्पुच्छयते).

TAILED, *a.* पुच्छी -च्छिनी -च्छि (न्), पुच्छवान् -वती -वत् (त्), पिच्छवान् &c., पुच्छान्वितः -ता -तं, लाङ्गूली &c., पिच्छिलः -ला -लं.

TAIL-LESS, *a.* अपुच्छः -च्छा -च्छं, पुच्छहीनः -ना -नं, पुच्छरहितः &c.

TAILOR, *s.* सौचिकः, सूचिकः, सौचिः *m.*, तुन्नवायः, वस्त्रभेदी *m.* (न्), वस्त्रभेदकः, सूचिकर्म्मविद् *m.*

To TAINT, *v. a.* दुष् (c. 10. दूषयति -यितुं), लिप् (c. 6. लिम्पति, लेप्तुं), दोषयुक्तं -क्तां कृ, दूषणं कृ. *See To* CORRUPT, INSPECT, STAIN.

TAINT, *s.* दूषणं, दोषः, कलङ्कः, मलं, लेपः -पनं. *See* STAIN.

TAINTED, *p. p.* दूषितः -ता -तं, लिप्तः -प्ता -प्तं, कलङ्कितः -ता -तं, सकलङ्कः -ङ्का -ङ्कं; 'as meat,' पूतिगन्धिकः -का -कं, दुर्गन्धी -न्धिनी &c.

To TAKE, *v. a.* ग्रह् (c. 9. गृह्णाति -ह्लीते, ग्रहीतुं), प्रतिग्रह्, अभिग्रह्, परिग्रह्, सम्प्रग्रह्, उपसम्प्रग्रह्, आदा (c. 3. -ददाति -दत्ते -दातुं), उपादा, लभ् (c. 1. लभते, लब्धुं), उपलभ्, धा (c. 3. धत्ते, धातुं), प्रतीप् (c. 6. -इच्छति -एषितुं), ग्रहणं कृ, आदानं कृ.—(Seize) हृ (c. 1. हरति, हर्त्तुं), धृ (c. 1. धरति, धर्त्तुं), हरणं कृ.—(Captivate), *see* the word.—(Apprehend) ग्रह्, उपलभ्, अवगम्.—(Feel, experience, be affected by) उपहतः -ता -तं भू, अनुभू, उपगम्, उपागम्, विद्.—(Swallow) गृ, निगृ, ग्रस्, खाद्, पा.—(Admit) ग्रह्, स्वीकृ, अङ्गीकृ.—(Gain possession of) आप्, प्राप्, अर्ज्, उपार्ज्, लभ्, आसद्, अधिगम्, *see To* GAIN.—(Take possession of) आक्रम् (c. 1. -क्रामति -क्रमितुं), आविश्, समाविश्.—(Require) आकांक्ष्, *see To* REQUIRE.—(Take away) अपनी (c. 1. -नयति -नेतुं), नी, अपहृ, हृ, *see To* REMOVE, *v. a.*—(Take back) प्रत्यादा; 'lead back,' प्रतिनी.—(Take down), *see To* PULL DOWN, DEPRESS, WRITE.—(Take in), *see To* COMPREHEND, CHEAT.—(Take off) अपनी, अवतॄ or उत्तॄ in caus., उत्कृष्, *see To* STRIP, DIVEST, IMITATE.—(Take up), *see To* LIFT, UNDERTAKE, OCCUPY, ENGROSS, COMPRISE.—(Take upon one's self) स्वीकृ, *see To* UNDERTAKE. Obs. The word 'take' in English has often no equivalent in Sanskrit, but must be rendered by some other form of expression. It may often be expressed by the roots कृ or भू in conjunction with a noun, and is not unfrequently inherent in the verb without being expressed at all, as in the following examples.—(Take aim) बद्धानुशयः -या -यं भू, लक्षीकृ, अनुसन्धा.—(Take an airing) वायुहेतोः परिस्रम् or विहृ.—(Take breath), *see To* PAUSE, REST.—(Take care, take heed), *see To* HEED.—(Take care of) रक्ष, *see* under CARE.—(Take a course), *see To* RESORT.—(Take effect) प्रभू, सप्रभावः -वा -वं भू, प्रबलीभू, सफलीभू, *see* EFFICACIOUS.—(Take hold), *see To* SEIZE, HOLD.—(Take in hand), *see To* UNDERTAKE.—(Take leave) आमन्त्र्, आमन्त्रणं कृ, *see* FAREWELL.—(Take notice), *see To* OBSERVE, NOTICE.—(Take pains), *see* under PAIN.—(Take part), *see To* SHARE.—(Take place), *see To* HAPPEN.—(Take root), *see To* ROOT, *v. n.*—(Take to task) निर्भर्त्स्, *see To* REPROVE.—(Take the name) नाम ग्रह्.

To TAKE, *v. n.* (Betake one's self) आश्रि, *see* RECOURSE, RESORT.—(Gain reception, succeed) सिध् (c. 4. सिध्यति, सेद्धुं), सम्पद् (c. 4. -पद्यते -पत्तुं), प्रसिद्धिं प्राप्, प्रसिद्धीभू, लोकप्रसिद्धः -द्धा -द्धं भू.—(Have effect) प्रभू.—(Take after) अनुकृ.

TAKEN, *p. p.* गृहीतः -ता -तं, आदत्तः -त्ता -त्तं, आप्तः &c., उपात्तः &c.—(Gained) प्राप्तः -प्ता -प्तं, आप्तः &c., लब्धः -ब्धा -ब्धं.—(Taken away) अपनीतः -ता -तं, अपहृतः -ता -तं, हृतः &c., *see* REMOVED.—(Taken down) अवपातितः -ता -तं, पातितः -ता -तं, *see* LOWERED, HUMBLED.—(Taken off, as clothes, &c.) अवतारितः -ता -तं, *see* STRIPPED.—(Captivated) मोहितः -ता -तं, हृतचित्तः -त्ता -त्तं, वशीकृतः &c.; 'let it be taken,' गृह्यतां; 'proper to be taken,' ग्रहणीयः -या -यं, आदेयः -या -यं; 'having taken,' गृहीत्वा, आदाय; 'having taken his bow and arrow,' गृहीतेषुकार्म्मुकः, आत्तेषुकार्म्मुकः.

TAKER, *s.* ग्राही *m.* -हिणी *f.* (न्), ग्राहकः -हिका, ग्रहीता *m.* -त्री *f.* (तृ), आदायी *m.* -यिनी *f.*, प्रतिग्रहीता *m.*, हर्त्ता *m.*, हारी *m.*

TAKING, *s.* (The act) ग्रहणं, ग्रहः, ग्राहः, प्रतिग्रहणं, प्रतिग्राहः, आदानं, उपादानं, स्वीकरणं, स्वीकारः; 'taking away,' अपनयनं, हरणं, अपहरणं, *see* REMOVAL.

TAKING, *a.* मनोहारी -रिणी &c., हृदयग्राही &c. *See* CAPTIVATING.

TALC, *s.* अभ्रकं, अभं, अमलं, निर्मलं, गिरिजं, गिरिजामलं, मेघजालं, मेघनालं, शुभ्रं, स्वच्छपत्रं, अक्षरं, अनश्वरीक्षं, भृङ्गं; 'calx of it,' अभ्रकभस्म *m.* (न्).

TALE, *s.* कथा, उपाख्यानं, आख्यानं, परिकथा, उदन्तः. *See* STORY.

TALE-BEARER, *s.* कर्णेजपः, कर्णेजपः, उपजापकः, पिशुनः, भेदजनकः.

TALE-BEARING, *s.* पैशुन्यं पिशुनता, उजापः, कर्णेजापः, दोषानुवादः.

TALENT, *s.* (Endowment) गुणः.—(Great abilities) बुद्धिवैभवं, बुद्धिकौशलं, धीशक्तिः *f.*, बुद्धिप्रभावः, दाक्षिण्यं, *see* GENIUS.

TALENTED, *a.* गुणी -णिनी -णि (न्), गुणवान् &c. *See* under GENIUS.

TALISMAN, *s.* कवचः -चं, संवदनं -ना, यन्त्रं. *See* AMULET.

To TALK, *v. n.* भाष् (c. 1. भाषते -षितुं), सम्भाष्, वद् (c. 1. वदति -दितुं), संवद्, आलप्, मन्त्र्, कथोपकथनं कृ. *See To* CONVERSE.

TALK, *s.* कथोपथनं, संवादः, सम्भाषा -षणं, आलापः, कथा, कथाप्रसङ्गः, *see* CONVERSATION; 'small talk,' लघुभाषणं; 'fine talk,' शब्दपाण्डित्यं; 'mere talk,' वाङ्मात्रं.—(Report) वदन्तिः -न्ती *f.*

TALKATIVE, *a.* वावदूकः -का -कं, कथनः &c. *See* LOQUACIOUS.

TALKATIVENESS, *s.* वावदूकता, वाचालता. *See* LOQUACIOUSNESS.

TALKER, *s.* वक्ता *m.* (क्तृ), कथकः, भाषी *m.* (न्), आलापी *m.*, वादी *m.*

TALL, *a.* तुङ्गः -ङ्गा -ङ्गं, उत्तुङ्गः &c., प्रांशुः -शुः -शु, उच्चः -च्चा -च्चं, *see* HIGH; 'in stature,' उच्चदेहः -हा -हं, उच्चमूर्त्तिः -र्त्तिः -र्त्ति, दीर्घदेहः -हा -हं, दीर्घमूर्त्तिः &c., दीर्घतनुः -नुः -नु.

TALLNESS, *s.* उच्चता, तुङ्गता, प्रांशुता, उन्नतिः *f.*; 'of stature,' देहदीर्घता, दीर्घदेहत्वं, शरीरदीर्घता, शरीरोच्चता.

TALLOW, *s.* मेषवपा, मेषवसा, गोवपा, गोवसा, गोमेदस् *n.*

TALLOW-CANDLE, *s.* गोवपामयदीपकः, गोवसानिर्म्मितदीपिका.

TALLOW-CHANDLER, *s.* गोवपाविक्रयी *m.* (न्), मेषादिवपाव्यापारी *m.*

TALLY, *To* TALLY. *See* MATCH, *To* MATCH, *v. n.*

TALON, *s.* नखः, नखरः, करुहः, करजः. *See* CLAW.

TAMARIND, *s.* (The tree) अम्लिका, अम्लीका, आम्लिका, आम्लीका, अम्लफलः, तिन्तिडी, तिन्तिली, तिन्तिडीकः -का -कं, तिन्तिडिका, चिञ्चा, चुक्रा -क्री, गुरुपत्रा, चारित्रा, चरित्रा, गुरुपत्रा, चञ्चः.—(The fruit) अम्लफलं.

TAMARISK, TAMARIX, *s.* (Tree) पिचुलः, पिच्छिलः, झावुः *m.*, झावुकः, बहुग्रन्थिः *m.*, यमदूतका.

TAMBOUR, TAMBOURINE, *s.* मृदङ्गः, पटहः. *See* DRUM.

TAME, *a.* (Not wild) गृह्यः -ह्या -ह्यं, गृह्यकः -का -कं, ग्राम्यः -म्या -म्यं, गृहपुष्टः -ष्टा -ष्टं, लेकः -का -कं, अहिंस्रः -स्रा -स्रं, गृह or ग्राम in comp.; 'a tame pigeon,' गृहकपोतकः; 'tame hog,' ग्राम्यशूकरः, ग्रामशूकरः, विड्वराहः.—(Subdued, trained) दान्तः -न्ता -न्तं, दमितः -ता -तं, वशः -शा -शं, अधीनः -ना -नं, शिक्षितः -ता -तं, उपशान्तः &c.—(Flat, spiritless), *see* the words.

To TAME, *v. a.* दम् (c. 10. दमयति -यितुं), प्रदम्, क्रूरतां शम् (c. 10. शमयति -यितुं), क्रूरताशान्तिं कृ, क्रूरतानाशं कृ, क्रूरताभङ्गं कृ, वशीकृ, निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं), सन्निग्रह्.

TAMEABLE, *a.* दमनीयः -या -यं, दम्यः -म्या -म्यं, सुदमः -मा -मं.

TAMED, *p. p.* दमितः -ता -तं, दान्तः -न्ता -न्तं, वशीकृतः -ता -तं, वशीभूतः &c., वशङ्गतः &c., शान्तः &c., शान्तक्रौर्य्यः -र्य्या -र्य्यं.

TAMELY, *adv.* कापुरुषवत्, क्लीववत्, कातरवत्, सकातर्य्यं.

TAMENESS, *s.* गृह्यता, वशता, वश्यता, अहिंस्रता, वशीभूतता.

TAMER, *s.* दमकः, दमी *m.* (न्), दमनकारी *m.* *See* SUBDUER.

TAMING, *s.* दमनं, दमः, दमथः -र्थं, दमथुः *m.* *See* SUBJUGATION.

To TAMPER, *v. a.* (Meddle), *see To* MEDDLE.—(Practise secretly) कुकर्म्मसम्पादनार्थं गूढव्यवहारं कृ or गूढव्यापारं कृ or गूढसंसर्गं कृ, छलेन व्याप् in pass. or व्यवहृ.

To TAN, *v. a.* (Leather) चर्म्मसन्धानं कृ, चर्म्मपाचनं कृ, दृतिसन्धानं कृ.—(Imbrown) ताम्रीकृ, ताम्रवर्णीकृ, श्यामीकृ.

TAN-PIT, *s.* चर्म्मसन्धानभाण्डं, चर्म्मपाचनभाण्डं, चर्म्मपाचनकुण्डं.

TANGENT, *s.* (In geometry) स्पर्शरेखा, सम्पातरेखा.

TANGIBILITY, *s.* स्पर्शनीयता, स्पृश्यता, स्पर्शवेद्यता.

TANGIBLE, *a.* स्पर्शनीयः -या -यं, स्पृश्यः -श्या -श्यं, संस्पृश्यः &c., स्प्रष्टव्यः -व्या -व्यं, स्पर्शयोग्यः &c., स्पर्शार्हः -र्हा -र्हं, स्पर्शवेद्यः &c., सम्पर्कीयः &c.

To TANGLE, TANGLE, &c. *See To* ENTANGLE, ENTANGLEMENT, &c.

TANJORE, *s.* (The country) चोलः, चोलाः *m. pl.*

TANK, *s.* तडागः, जलाधारः, सरोवरः, वेशन्तः. *See* RESERVOIR.

TANNER, *s.* चर्म्मकारः -री *m.* (न्), चर्म्मारः, चर्म्मसन्धानी *m.*

To TANTALIZE, *v. a.* इष्टवस्तु दर्शयित्वा मनोरथान् जनयित्वा खण्ड् (c. 10. खण्डयति -यितुं), आशाः or मनोरथान् जनयित्वा खण्ड्, स्पृहणीयवस्तु दर्शयित्वा न दा or भग्नाशं -शां कृ or वञ्च् (c. 10. वञ्चयति -यितुं).

TANTALIZED, *p. p.* वञ्चितः -ता -तं, खण्डितः &c., जाताशः -शा -शं.

TANTALIZING, *a.* आशाजनकः -का -कं, स्पृहाजनकः &c., वञ्चकः &c.

TANTAMOUNT, *a.* समानार्थकः -का -कं, सममूल्यः &c. *See* EQUIVALENT

TANTRA, *s.* (A religious treatise, generally in the form of a dialogue between Siva and Durga, teaching peculiar and mystical formulæ for the worship of the deities, or the attainment of superhuman power. These works are very numerous, and their authority in many parts of India seems, in a great measure, to have superseded that of the Vedas) तन्त्रं; 'a follower of the doctrine taught in the Tantras,' तान्त्रिकः.

To TAP, *v. a.* (Strike a gentle blow) लघुप्रहारं कृ, लघ्वाघातं कृ, लघु प्रह् or आहन्.—(A cask, &c.) सुरादिभाजने छिद्रं कृ, सुरादिस्रावणार्थं भाण्डं छिद्र् (c. 10. छिद्रयति -यितुं).

TAP, *s.* लघुप्रहारः, लघ्वाघातः, ईषदाघातः, ईषत्प्रहारः.

TAPE, *s.* पट्टः, दीर्घपट्टः, बन्धनी, दीर्घबन्धनी, तनुपट्टः.

TAPER, *s.* क्षुद्रदीपः -पकः, क्षुद्रदीपिका, सूक्ष्मदीपिका.

TAPER, *a.* शुण्डाकृतिः -तिः -ति, शुण्डाकारः -रा -रं, शुण्डारूपः &c.

TAPESTRY, *s.* चित्रजवनिका, जवनिका, चित्रयवनिका, अपटी.

TAPE-WORM, *s.* उदरावेष्टः, नाडीकीटः, नाडीजन्तुः *m.*, मीषा.

TAPTI, *s.* (A river in India) तापी

TAR, *s.* सरलद्रवः, सरलरसः, सर्ज्जरसः, अरालः, रालः.

TARDINESS, *s.* मन्दता, मान्द्यं, विलम्बः -म्बनं. *See* SLOWNESS.

TARDY, *a.* मन्दः -न्दा -न्दं. *See* SLOW, DILATORY.

TARE, *s.* कक्षः, शस्यक्षेत्ररुहः कक्षभेदः, वन्यघासः.

TARGET, *s.* बाणलक्ष्यं, शरलक्ष्यं, लक्ष्यं, लक्षं, शरध्यं, *see* BUTT.

TARIFF, *s.* सूचिः -ची *f.*, सूचिपत्रं, अनुक्रमणिका. *See* LIST.

To TARNISH, *v. a.* कलङ्क (nom. कलङ्कयति -यितुं), दुष् in caus., *see To* SOIL.

To TARNISH, *v. n.* मलिनीभू, सकलङ्कीभू, दुष् (c. 4. दुष्यति, दोष्टुं).

TARNISHED, *p. p.* मलिनितः -ता -तं, कलङ्कितः &c., दूषितः -ता -तं.

To TARRY, *v. n.* स्था, अवस्था, विलस्, वस्. *See To* STAY, DELAY.

TART, *a.* अम्लः -म्ला -म्लं, शुक्तः -क्ता -क्तं. *See* SOUR, SHARP.

TART, *s.* (Kind of pie) शष्कुली, पिष्टकं.

TARTAR, *s.* (Of the teeth) दन्तमलं, दन्तशर्करा, पुप्पिका, पिप्पिका, रौचनिकं.

TASK, *s.* कार्य्यं, कर्त्तव्यं, व्रतं, कर्म्म *n.* (न्), भारः; 'to take to task,' निर्भर्त्सै् (c. 10. -भर्त्सयति -यितुं), निन्द्, *see To* REPROVE.

To TASK, *v. a.* भारं न्यस् (c. 4. -अस्यति -सितुं), कार्य्यं नियुज्.

TASK-MASTER, *s.* कार्य्यशासकः, कार्य्यकारयिता *m.* (तृ), कर्म्मशासकः.

TASSEL, *s.* शिथिलसूत्रमयं प्रलम्बकाभरणं, प्रलम्बः -म्बकः -कं.

TASTABLE, *a.* प्राशनीयः -या -यं, प्राश्यः &c., आस्वादनीयः &c.

To TASTE, *v. a.* प्राश् (c 9. -अश्नाति -शितुं), आस्वाद् (c. 1. -स्वादति -दितुं), स्वाद्, लिह् (c. 2. लेढि -ढुं), अवलिह्, रसम् आस्वाद्, आस्वादनं कृ, रसास्वादनं कृ, रस् (c. 10. रसयति -यितुं), रसवेदनं कृ, रसबोधं कृ, रसज्ञानं कृ, रसनं कृ.—(Perceive by the taste) स्वादज्ञानं कृ, स्वादबोधनं कृ, स्वादवेदनं कृ.

To TASTE, *v. n.* (Have a taste or flavor) स्वद् (c. 1. स्वादते, स्वदते), सरसः -सा -सं भू or अस्, स्वादयुक्तः -क्ता -क्तं भू or अस्.

TASTE, *s.* (The sensation excited by applying any thing to the tongue or palate) स्वादः, आस्वादः, रसज्ञानं, रसबोधः, रसवेदनं.—(The sense) रसनेन्द्रियं, आस्वादनशक्तिः *f.*, रसनशक्तिः *f.*, रसनं, रुचिः *f.*—(Flavor) रसः, आस्वादः, रुचिः *f.*; 'the six tastes,' षड्रसाः *m. pl.*; these are, 1. sweet, मधुरः; 2. salt, लवणः; 3. pungent, कटुः; 4. bitter, तिक्तः; 5. sour, अम्लः; 6. astringent, कषायः.—(Relish, liking for) रुचिः *f.*, अभिरुचिः *f.*, सन्तोषः; 'that husband was not to her taste,' स पतिः सन्तोषाय तस्या नाभवत्; 'according to taste,' यथारुचि; 'loss of taste,' अरुचिः *f.*, अरोचकं; 'of similar tastes,' समानशीलः -ला -लं.—(Nice perception, faculty of discerning beauty) रसः, रसिकता, रसज्ञता, रसज्ञानं; 'devoid of taste,' अरसिकः -का -कं, अरसज्ञः -ज्ञा -ज्ञं; 'having taste,' रसज्ञः &c., रसिकः &c., सरसः -सा -सं, रसी -सिनी &c.

TASTED, *p. p.* आस्वादितः -ता -तं, स्वादितः &c., प्राशितः &c., ज्ञातरसः -सा -सं, गृहीतरसः &c., रसितः &c., अनुभवरसिकः &c.

TASTELESS, *a.* विरसः -सा -सं, नीरसः &c. *See* INSIPID.

TASTER, *s.* आस्वादी *m.* (न्), रसास्वादी *m.*, प्राशी *m.*, रसी *m.*

TASTING, *s.* आस्वादः -दनं, स्वादनं, प्राशनं, रसनं, लेहनं.

TASTINESS, TASTEFULNESS, *s.* रसिकता, सरसत्वं, सौरस्यं, रोचकता.

TASTY, TASTEFUL, *a.* रसिकः -का -कं, सरसः -सा -सं, सुरसः &c., रसवान् -वती -वत् (त्), रसी -सिनी -सि (न्), रोचकः -का -कं, रुचिरः -रा -रं, रुच्यः -च्या -च्यं, रुचिकरः -रा -रं, रसितः -ता -तं. *See* SAVORY.

TATTER, TATTERED. *See* RAG, RAGGED, RAGAMUFFIN.

To TATTLE, TATTLE, TATTLER. *See To* PRATE, BLAB, &c.

TAUGHT, *p. p.* शिक्षितः -ता -तं, उपदिष्टः -ष्टा -ष्टं, अध्यापितः -ता -तं, पाठितः -ता -तं, ज्ञापितः &c., विज्ञापितः &c., लब्धविद्यः -द्या -द्यं.

To TAUNT, *v. a.* उपालभ् (c. 1. -लभते -लब्धुं), अवक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), आक्षिप्, अधिक्षिप्, परिक्षिप्, तर्ज्, *see To* REVILE.

TAUNT, *s.* आक्षेपः, अवक्षेपः, क्षेपः, उपालम्भः. *See* SARCASM.

TAUNTED, *p. p.* आक्षिप्तः -प्ता -प्तं, अवक्षिप्तः &c., उपालब्धः -ब्धा -ब्धं.

TAUNTING, TAUNTINGLY. *See* SARCASTIC, SARCASTICALLY.

TAURUS, *s.* (The sign or constellation) वृषः, वृषभः, तावुरिः *m.*

TAUTOLOGY, *s.* पुनरुक्तिः *f.*, पुनरुक्तत्वं, अनुवादः. *See* REPETITION.

TAVERN, *s.* सत्रा, मदिरागृहं, मद्यविक्रयस्थानं, *see* PUBLIC-HOUSE.

TAVERN-KEEPER, TAVERNER, *s.* शौण्डिकः, मद्यविक्रयी *m.* *See* VINTNER.

TAWDRY, *a.* कुशोभनः -ना -नं, मिथ्याशोभायुक्तः &c., मिथ्याशोभनः &c.

TAWNINESS, *s.* पिङ्गलता, कपिलता, पिशङ्गता, ताम्रवर्णता.

TAWNY, *a.* पिङ्गलः -ला -लं, पिङ्गः -ङ्गा -ङ्गं, कपिलः -ला -लं, पिशङ्गः -ङ्गा -ङ्गं, पिशङ्गी -ङ्गिनी -ङ्गि (न्), पिञ्जरः -रा -रं, ताम्रवर्णः -र्णा -र्णं, अरुणः -णा -णं, कविलः -ला -लं, कदूः -दूः -दु, आरुः -रूः -रु, शावः -वी -वं.

TAX, *s.* करः, शुल्कः -ल्कं, राजकरः -रं, कारः, राजस्वं, *see* IMPOST; 'exempt from it,' अकरः -रा -रं.—(Burthen) भारः.

To TAX, *v. a.* करान् दा in caus. (दापयति -यितुं), करं न्यस् (c. 4. -अस्यति -सितुं), सकरीकृ.—(Impose a burthen) भारं न्यस्.—(Charge, accuse), *see* the words.

TAXABLE, *a.* कराधीनः -ना -नं, शुल्काधीनः -ना -नं, करयोग्यः -ग्या -ग्यं, करदः -दा -दं; 'taxable article,' शुल्कस्थानं.

TAXATION, *s.* करादिन्यासः, करादिव्यवस्थापनं, शुल्कादिस्थापना.

TAXED, *p. p.* सकरः -रा -रं, सशुल्कः -ल्का -ल्कं, करदः -दा -दं.

TAX-GATHERER, *s.* करग्रहः, करग्राही *m.* (न्), शुल्कग्राही *m.*

TEA, *s.* No Sanskrit equivalent, चहा may be used.

TEA-POT, *s.* चहापात्रं, चहाधारः, चहाभाजनं.

To TEACH, *v. a.* उपदिश् (c. 6. -दिशति -देष्टुं), शिक्ष् (c. 10. शिक्षयति -यितुं), अनुशिक्ष्, अभिशिक्ष्, अधी in caus. (अध्यापयति -यितुं, rt. इ), पठ् in caus., शास् &c., *see To* INSTRUCT. Sometimes the causal expresses the sense of 'teach;' as, 'he teaches to dance,' नर्त्तयति; 'he teaches to read,' पाठयति.

TEACHABLE, *a.* शिक्षणीयः -या -यं, शिक्ष्यः -क्ष्या -क्ष्यं. *See* DOCILE.

TEACHABLENESS, *s.* शिक्षणीयता, शिक्ष्यता, सुशिक्ष्यता.

TEACHER, *s.* उपदेशकः, शिक्षकः, अध्यापकः, बोधकः, अवबोधकः, *see* INSTRUCTOR; 'of children,' बालाध्यापकः, *see* PEDAGOGUE.

TEACHING, *s.* उपदेशः, शिक्षा, अध्यापनं. *See* INSTRUCTION.

TEAK, *s.* (Tree) अर्णः, शाकः, शाकाख्यः, करञ्जदः, खरपत्रः, अर्जुनोपमः, हलीनः.

TEAL, *s.* (Kind of duck) कलहंसः, कादम्बं.

TEAM, *s.* (Of horses) रथसंयोजिता अश्वश्रेणी; 'of oxen,' गोश्रेणी.

TEAR, *s.* (Of the eye) अश्रु *n.*, असृ *n.*, अश्रं, असं, वाष्पः, नेत्रासृ *n.*, नेत्रजलं, नेत्रोदकं, नेत्रजं, नयनासृ *n.*, नयनजलं, नयनवारि *n.*, नयनसलिलं, विलोचनासृ *n.*, लोचनासृ *n.*, रोदनं; 'tear-drop,' वाष्पबिन्दुः *m.*, अश्रुबिन्दुः *m.*, असृबिन्दुः *m.*, अश्रुकला; 'starting of tears,' वाष्पोद्भवः; 'flood of tears,' अश्रुधारा, धाराश्रु *n.*; 'flowing of tears,' अश्रुपातः, अश्रुस्रावः; 'tears of affection,' प्रेमाश्रु; 'of joy,' हर्षाश्रु *n.*; 'to shed tears,' अश्रूणि पत् (c. 10. पातयति -यितुं) or सु in caus. (स्रावयति -यितुं) or वृत् in caus., वाष्प (nom. वाष्पायते), असृ (nom. असायते), प्ररुद्, रुद्, रोदनं कृ; 'he shed tears of joy,' हर्षाद् अश्रूण्य् अपातयत्; 'in tears, having the eyes filled with tears,' जाताश्रुः -श्रुः -श्रु, अश्रुलोचनः -ना -नं, अश्रुनयनः &c., अश्रुमुखः -खी -खं, वाष्पोपप्लुताक्षः -क्षी -क्षं, वाष्पाविलेक्षणः &c., पर्य्यश्रुः -श्रुः -श्रु; 'interrupted by tears,' वाष्पाकुलः -ला -लं.—(Rent) *see* RENT.

To TEAR, *v. a.* दृ (c. 10. दारयति -यितुं, c. 9. दृणाति, दरितुं -रीतुं), विदृ, अवदृ, दारणं कृ, विदारणं कृ, विभिद्, *see To* REND, LACERATE, PULL.—(Tear down, off, out, up), *see* under *To* PULL.—(The hair) लुच् &c., *see To* PLUCK.

To TEAR, *v. n.* (Rush along) महावेगेन चल्.—(Be torn or rent) विदृ in pass., विभिद् in pass., *see To* CLEAVE, DIVIDE, *v. n.*

TEARFUL, *a.* साश्रुः -श्रुः -श्रु, सासुः &c., साश्रः -श्रा -श्रं, सासः &c., सवाष्पः -ष्पा -ष्पं, अश्रुपूर्णः -र्णा -र्णं, वाष्पपूर्णः &c., अश्रुमयः -यी -यं.

TEARFULLY, *adv.* सवाष्पं, साश्रं, सासं, वाष्पाकुलवाचा, साश्रुपातं.

TEARING, *s.* दारणं, विदारणं, विदारः, विभेदः -दनं, पाटनं.

To TEASE, *v. a.* बाध् (c. 1. बाधते -धितुं). *See To* ANNOY, TORMENT.

TEASED, *p. p.* बाधितः -ता -तं, पीडितः &c., व्यथः -था -थं.

TEAT, *s.* स्तनाग्रं, स्तनः, *see* NIPPLE; 'having two teats,' द्विस्तनी.

TECHNICAL, *a.* लाक्षणिकः -की -कं, पारिभाषिकः &c., साङ्केतिकः -की -कं, परिभाषितः -ता -तं, विशेषविद्यासम्बन्धी -न्धिनी &c.

TECHNICALLY, *adv.* परिभाषानुसारेण, विशेषकलानुसारेण.

TECHNICALITY, *s.* लाक्षणिकत्वं, पारिभाषिकत्वं, साङ्केतिकत्वं.—(A technical term) परिभाषा, लाक्षणिकः.

TEDIOUS, *a.* दीर्घसूत्रः -त्रा -त्रं, अतिदीर्घः -र्घा -र्घं, खेदजनकः -का -कं, श्रमजनकः &c. *See* LONG, PROLIX, IRKSOME.

TEDIOUSLY, *adv.* अतिदीर्घं, दीर्घसूत्रवत्, सुदीर्घं.

TEDIOUSNESS, *s.* दीर्घसूत्रता, अतिदीर्घता. *See* IRKSOMENESS.

To TEEM, *v. n.* पूर्णगर्भः -र्भा -र्भं भू, अतिपूर्णः -र्णा -र्णं भू.—(Bring forth abundantly) बाहुल्येन उत्पद् (c. 10. -पादयति -यितुं) or जन्.

TEEMING, *part.* पूर्णगर्भः -र्भा -र्भं, परिपूर्णः -र्णा -र्णं, सम्पूर्णः &c., पूर्णः &c., आकुल in comp., आढ्य in comp. *See* PROLIFIC.

TEETH, *s. pl.*, दन्ताः *m. pl.*, *see* TOOTH; 'having teeth,' दन्ती -न्तिनी -न्ति (न्), सदन्तः -न्ता -न्तं, जातदन्तः &c.; 'having good teeth,' सुदन् -दती -दत् (त्); 'woman having fine teeth,' शुभदन्ती; having discolored teeth,' अरोकदन्तः &c.; 'row of teeth,' दन्तपंक्तिः *f.*; 'sensitiveness of the teeth,' दन्तहर्षः.

To TEETH, *v. n.* जातदन्तः -न्ता -न्तं भू, उद्भिन्नदन्तः -न्ता -न्तं भू.

TEETHING, *s.* दन्तोद्भेदः, दन्तोद्भवः, दन्तस्फोटः, दन्तोत्पत्तिः *f.*, दन्तजननं; 'time of teething,' दन्तोद्भेदनकालः.

TEGUMENT, *s.* आवेष्टनं, कवचः -चं, पुटः -टी. *See* INTEGUMENT.

TELESCOPE, *s.* दूरदर्शकयन्त्रं, महादूरदर्शकयन्त्रं, दूरदर्शनयन्त्रं, चाक्षुषयन्त्रं, दृष्टिसाधकयन्त्रं.

TELINGANA, *s.* (The country) आन्ध्रः, आन्ध्राः.

To TELL, *v. a.* कथ् (c. 10. कथयति -यितुं). *See To* RELATE, NARRATE.

To TELL, *v. n.* (Take effect) सफलीभू, सफलीभू, सप्रभावः -वा -वं भू, सिध्.—(Hit the mark), *see* under MARK.—(Tell of) सूच्.

TELLER, *s.* कथकः, कथिकः, आख्यायकः. *See* RELATER.

TELLING, *s.* कथनं, उपकथनं, आख्यानं, *see* RELATION, NARRATION.

TELL-TALE, *s.* सूचकः, सूची *m.* *See* TALE-BEARER, INFORMER.

TEMERITY, *s.* साहसं, दुःसाहसं, विषमसाहसं. *See* RASHNESS.

To TEMPER, *v. a.* शम् (c. 10. शमयति -यितुं). *See To* MODERATE.

TEMPER, *s.* (Of mind) शीलः, प्रकृतिः *f.*, भावः, स्वभावः, संवेदनं; 'good temper,' सद्भावः, *see* GOOD-HUMOUR; 'bad temper,' असद्भावः.—(Calmness, moderation) शान्तिः *f.*, शान्तता, समता, संयमः, रोषाभावः.—(Anger) रोषः.

TEMPERAMENT, *s.* प्रकृतिः *f.*, स्वभावः, भावः, देहप्रकृतिः *f.*, देहस्वभावः, शरीरप्रकृतिः *f.*, जन्मप्रकृतिः *f.*; 'bilious,' पित्तप्रकृतिः *f.*

TEMPERANCE, *s.* (Moderation) संयमः, यमः, परिमितता, अप्रसक्तिः *f.*—(In eating) मिताशनं, अल्पाशनं, मिताहारः -रित्वं, मितभोजनं, अल्पाहारः -रित्वं, परिमिताहारः, परिमितभोजनं -जित्वं.—(In drinking) परिमितपानं, मितपानं, अल्पपानं, मात्रापानं.

TEMPERATE, *a.* (Moderate) संयमी -मिनी &c., संयतः -ता -तं, संयतवृत्तिः -त्तिः -त्ति, संयमशीलः -ला -लं, *see* MODERATE.—(In desires) अल्पाकांक्षी -क्षिणी &c., अप्रसक्तः -क्ता -क्तं, जितेन्द्रियः -या -यं.—(In eating) मिताशनः -ना -नं, परिमिताहारः -रा -रं, मिताहारः &c., मिताहारी -रिणी &c., यताहारः &c., अल्पाहारः &c., अल्पाहारी &c., स्वल्पाहारः &c., मितभोजी &c., नियताहारी &c., लघ्वाहारः -रा -रं, लघ्वाहारी &c., अल्पाशी &c., मिताशी &c.—(In drinking) मितपायी &c., परिमितपायी &c., अल्पपायी &c., मितपानी &c., पानाप्रसक्तः -क्ता -क्तं.—(Not excessive) परिमितः -ता -तं, अतीव्रः -व्रा -व्रं.—(Moderately warm) ईषदुष्णः -ष्णा -ष्णं, मन्दोष्णः &c., अचण्डः -ण्डा -ण्डं, अग्रीष्मः -ष्मा -ष्मं.—(Calm, not violent) शान्तः -न्ता -न्तं, अरोषणः -णा -णं, शान्तिप्रयुक्तः -क्ता -क्तं, अचण्डः -ण्डा -ण्डं, धीरः -रा -रं, धैर्यशाली &c.

TEMPERATELY, *adv.* अरोषेण, अक्रोधेन, अतीव्रं, अचण्डं, शान्त्या.

TEMPERATURE, *s.* उष्णानुष्णमानं, उष्णानुष्णप्रमाणं, उष्णशीतमानं, उष्णानुष्णता, उष्णमानं, उष्णप्रमाणं, ग्रीष्माग्रीष्मता.

TEMPERED, *p. p.* शमितः -ता -तं, उपशमितः &c., नियमितः -ता -तं.

TEMPEST, TEMPESTUOUS. *See* STORM, STORMY, HURRICANE.

TEMPEST-TOST, TEMPEST-BEATEN, *a.* पवनाहतः -ता -तं, पवनक्षिप्तः -प्ता -प्तं, पवनाघातप्रेरितः &c., वातावेगप्रेरितः &c., अनिलसंक्षुब्धः &c.

TEMPLE, *s.* (Building dedicated to a deity) मन्दिरं, प्रासादः, देवमन्दिरं, देवालयं, देवगृहं, देवभवनं, मण्डपः -पं, देवागारः -रं, देववेश्म *n.* (न्), देवतामन्दिरं, भजनालयं, देवतागारः -रं, देवतायतनं, देवावासः, महालयः -यं, सुरस्थानं, सुरमन्दिरं, सुरगृहं, देवकुलं, यज्ञियशाला, वीहारः, वयुनं, चिच्छदिकः, चिच्छन्दकः, स्वस्तिकः, सर्वतोभद्रः, नन्द्यावर्तः, रुचकः; 'temple dedicated to Siva,' शिवालयं, शिवमन्दिरं; 'open temple,' मण्डपः; 'endowments of a temple,' देवस्वं; 'worship at the entrance of a temple,' द्वारपूजा.—(Of the head) कपोलः, केनारः, शङ्खः, शङ्खकः -कं.

TEMPORAL, *a.* ऐहिकः -की -कं, ऐहलौकिकः -की -कं, लौकिकः &c., सांसारिकः &c., दृष्टार्थः -र्था -र्थं. *See* SECULAR.

TEMPORARILY, *adv.* अल्पकालमात्रं, क्षणमात्रं, अचिरेण, अशाश्वतं.

TEMPORARINESS, *s.* अनित्यता, अचिरस्थायिता, क्षणिकता.

TEMPORARY, *a.* अचिरस्थायी -यिनी -यि (न्), अचिरकालिकः -का -कं, अचिरः -रा -रं, अनित्यः -त्या -त्यं, अशाश्वतः -ती -तं, क्षणिकः -का -कं.

To TEMPORIZE, *v. n.* समयानुरोधं कृ, समयानुवर्त्तनं कृ, कालानुरोधं कृ.

TEMPORIZER, *s* समयानुरोधी *m.* (न्), कालानुरोधी *m.*, कालानुवर्त्ती *m.*

To TEMPT, *v. a.* (Entice to evil) प्रलुभ् (c. 10. -लोभयति -यितुं), परिलुभ्, लुभ्, आकृष् (c. 1. -कर्षति -कर्ष्टुं), मुह् (c. 10. मोहयति -यितुं), प्रलोभनं कृ, विमोहनं कृ.—(Try, prove) परीक्ष् (c. 1. -ईक्षते -क्षितुं), परीक्षां कृ.

TEMPTATION, *s.* (Enticement to evil) प्रलोभनं, विलोभनं, आकर्षणं, आकृष्टिः *f.*, मोहः -हनं, विमोहनं.—(Trial) परीक्षा.

TEMPTED, *p. p.* प्रलोभितः -ता -तं, आकृष्टः -ष्टा -ष्टं, मोहितः &c., 'by avarice,' लोभाकृष्टः &c.—(Tried) परीक्षितः -ता -तं.

TEMPTER, *s.* प्रलोभकः, विलोभकः, मोहकः, परीक्षकः, परीक्षाकृत.

TEMPTING, *a.* आकर्षकः -का -कं, विमोहनः -ना -नं. *See* ENTICING.

TEN, *a.* दश *m. f. n. pl.* (न्), दशकः -का -कं, दशसंख्यकः -का -कं; 'aggregate of ten,' दशकं; 'ten days,' दशाहं; 'in ten ways,' दशधा.

TENABLE, *a.* रक्षणीयः -या -यं, प्रतिपादनीयः &c., स्थापनीयः &c.

TENACIOUS, *a.* (Holding fast) संलग्नशीलः -ला -लं, *see* RETENTIVE. —(Persistent in a course) अभिनिविष्टः -ष्टा -ष्टं, आग्रही -हिणी &c., दृढः -ढा -ढं, दृढसङ्कल्पः -ल्पा -ल्पं.—(Of opinions) स्वमताग्रही &c.—(Of life) दुर्भरः -रा -रं.

TENACITY, *s.* अभिनिवेशः, आग्रहः, ग्रहः, दृढता, धृतिः *f.*, धारणा.

TENANT, *s.* अधिवासी *m.* (न्), परस्वामिकक्षेत्राधिवासी *m.*, परस्वामिकगृहाधिवासी *m.*, परस्वत्वयुक्तभूम्यधिवासी *m.*

To TENANT, *v. a.* परस्वामिकभूमिम् अधिवस् (c. 1. -वसति -वस्तुं).

TENANTED, *p. p.* अध्युषितः -ता -तं, अधिष्ठितः &c. *See* OCCUPIED.

TENANTRY, *s.* परस्वामिकक्षेत्राधिवासिनां गणः, अधिवासिगणः.

To TEND, *v. a.* पाल्, रक्ष्, *see* under *To* KEEP; 'cattle,' गोपालनं कृ.

To TEND, *v. n.* (Aim at, be directed or incline towards) अभिसन्धा (c. 3. -दधाति -धातुं), उद्दिश् (c. 6. -दिशति -देष्टुं), अभिप्रे (c. 2. अभिप्रैति -तुं, rt. इ), प्रवणः -णा -णं भू; 'act which tends to a main object,' प्रयुक्तमः, प्रयुक्तान्तिः *f.*, प्रयोगार्थः.—(Conduce, contribute), *see* the words.

TENDENCY, *s.* प्रावण्यं, प्रवणता, प्रवृत्तिः *f.*, प्रवाहः, शीलता or आलुता in comp., *see* INCLINATION; 'to descend,' अधोगतिशीलता.

TENDER, *a.* (Soft) कोमलः -ला -लं, मृदुः -दुी -दु, आर्द्रः -र्द्री -र्द्रं.—(Sensible of pain) सुलभदुःखः -खा -खं, सुदुःखितः -ता -तं, *see* SORE.—(Delicate) सुकुमारः -रा -रं, कौमारः -री -रं, पेलवः -वा -वं, मृदुः &c.; 'having a tender frame,' प्रकृतिपेलवः -वा -वं, मृदङ्गः -ङ्गी -ङ्गं.—(Young) बालः -ला -लं, कौमारः -री -रं.—(Compassionate) दयालुः -लुः -लु, कारुणिकः -की -कं, आर्द्रः -र्द्री -र्द्रं, दयार्द्रः &c., सहार्द्रः &c., *see* PITIFUL.

TENDER, *To* TENDER. *See* OFFER, *To* OFFER.

TENDER-HEARTED, *a.* करुणात्मकः -का -कं, कोमलचित्तः -त्ता -त्तं, कोमलान्तःकरणः -णा -णं, कोमलहृदयः -या -यं, सदयहृदयः &c., दयार्द्रभावः -वा -वं, दयार्द्रचित्तः &c., क्लिन्नहृदयः &c., क्लिन्नहृद्, भावार्द्रः &c.

TENDERLY, *adv.* सकरुणं, सकारुण्यं, करुणं, सदयं, सानुकम्पं.

TENDERNESS, *s.* (Softness) कोमलता -त्वं, मृदुता, मार्दवं, सौकुमार्य्यं, कौमारं, आर्द्रता.—(Compassion, kindness) कारुण्यं, करुणा, कृपा, दया, अनुकम्पा, दयालुता, वात्सल्यं, *see* PITY.

TENDINOUS, *a.* शिरालः -ला -लं, शिरामयः -यी -यं, स्नायुमयः &c.

TENDON, *s.* स्नायुः *m.*, स्नसा, शिरा, सिरा, स्नावः, सन्धिबन्धनं, ग्रन्थिबन्धनं, नाडी, *see* MUSCLE; 'of the neck,' मन्या.

TENDRIL, *s.* (Of a vine or creeper) लतातन्तुः *m.*, तन्तुः *m.*

TENEMENT, *s.* आयतनं, भवनं, *see* DWELLING; 'earthly,' देहः.

TENET, *s.* मतं, सम्मतं, तत्त्वं, स्थितिः *f.* *See* OPINION, DOGMA.

TENFOLD, *a.* दशगुणः -णा -णं, दशविधः -धा -धं, दशधा indec.

TENOR, *s.* (Course, drift) क्रमः, अन्वयः, प्रसङ्गः, प्रवाहः, अभिप्रायः, तात्पर्य्यं, निदर्शनं.—(Voice) मध्यस्वरः.

TENSE, *a.* आततः -ता -तं, ततः &c. *See* STRETCHED, TIGHT.

TENSE, *s.* (In grammar) कालः; 'Present,' वर्त्तमानकालः; 'Preterite,' अतीतकालः; 'Imperfect,' अद्यतनभूतकालः.

TENSION, *s.* आततिः *f.*, आततत्वं, ततिः *f.*, अशैथिल्यं. *See* TIGHTNESS.

TENT, *s.* दूष्यं, दूष्यं, पटमण्डपः, पटगृहं, पटवेश्म *n.* (न्), पटवासः, पटकुटिः *f.*, वस्त्रगृहं, शिविरं, स्फुलं, पोताच्छादनं, गुल्मी, केणिका, कुटरु *n.*, गुणलयनिका; 'tent-maker,' दूष्यनिर्म्माणजीवी *m.*; 'outer tent, or screen surrounding a tent,' जवनिका, यवनिका.

TENTH, *a.* दशमः -मी -मं; 'tenth day of the month,' दशमी.

TENUITY, *s.* तनुता, तानवं, सूक्ष्मता, सौक्ष्म्यं, क्षीणता.

TENUOUS, *a.* तनुः -नुः -नुी -नु, सूक्ष्मः -क्ष्मा -क्ष्मं. *See* THIN.

TEPID, *a.* ईषदुष्णः -ष्णा -ष्णं, कोष्णः &c., कवोष्णः &c., मन्दोष्णः &c., कुतपः -पा -पं, अनुष्णाशीतः -ता -तं. *See* LUKEWARM.

TEPIDNESS, *s.* कोष्णता, कवोष्णता, मन्दोष्णता. *See* LUKEWARMNESS.

TERGIVERSATION, *s.* अपदेशः, पलायनं, अपक्रमः, पराङ्मुखता, छलं.

TERM, *s.* (Limit, end) अन्तः, पर्य्यन्तः -न्तं, *see* LIMIT.—(Period) अवधिः *m.*, कालावधिः *m.*, *see* PERIOD; 'of days,' अहर्गणः; 'utmost term,' परमावधिः *m.*; 'of life,' आयुर्म्मर्य्यादा.—(Word, expression, appellation) संज्ञा, पदं, वाक्यं, शब्दः, वचनं, अभिधानं, आख्या, नाम *n.* (न्), पद्धतिः *f.*—(Conditions) सङ्केतः, प्रतिज्ञा, नियमः, नियमवाक्यं.—(State of intercourse) व्यवहारः, वृत्तिः *f.*, परिचयभावः, परिचयः; 'good terms,' प्रीतिः *f.*, मैत्र्यं, संविद्भिः *f.*; 'ill terms,' वितृष्टं, अतुष्टिः *f.*, अप्रीतिः *f.*—(Time of business) व्यवहारकालः, कार्य्यनिर्वाहकालः, *see* SESSION.—(Of a syllogism) अवयवः.—(Of an arithmetical series) पदं; 'first term,' आदिपदं, मुखं; 'last term,' अन्त्यपदं.

To TERM, *v. a.* अभिधा, आख्या. *See To* NAME, CALL, STYLE.

TERMAGANT, *s.* ककैशा, चण्डी, दुष्टा. *See* SCOLD, SHREW.

TERMED, *p. p.* अभिहितः -ता -तं, स्मृतः &c. *See* NAMED, CALLED.

TERMINABLE, *a.* समर्य्यादः -दा -दं, परिच्छेदनीयः &c., *see* LIMITABLE.

TERMINAL, *a.* अन्तस्थः -स्था -स्थं, पार्श्वस्थः -स्थी -स्थं, आन्तः -न्ती -न्तं.

To TERMINATE, *v. a.* or *n.* अवसो. *See To* END, CLOSE, LIMIT.

TERMINATION, *s.* अवसानं, अन्तः, अवधिः *m.*, परिणामः, निष्ठा, *see* END, CONCLUSION.—(In grammar) अन्तः, अन्त्यवर्णः.

TERMLESS, *a.* निरवधिः -धिः -धि, अनन्तः -न्ता -न्तं. *See* ENDLESS.

TERRACE, *s.* (Before a house) आलिन्दः, अलिन्दः, प्रघाणः, प्रघणः, गृहनटी, वीथिः -थी *f.*, देहली -लिः *f.*—(On the roof of a house) प्रासादपृष्ठं, अट्टालः -लिका, तमङ्गकः, पृष्ठं.—(Covered terrace in the yard) वितर्द्धिः *f.*, वेदिका.

TERRAQUEOUS, *a.* जलस्थलमयः -यी -यं, जलस्थलात्मकः -का -कं.

TERRESTRIAL, TERRENE, *a.* (Sublunary) लौकिकः -की -कं, ऐहलौकिकः &c., *see* MUNDANE.—(Earthen, earthly) भौमः -मी -मं, भौमिकः -की -कं, *see* EARTHLY, EARTHEN.—(Going or existing on the earth) भूचरः -री -रं, स्थलचरः &c., भूमिजः -जा -जं, स्थलजः &c., भूलोकस्थः -स्था -स्थं; 'terrestrial globe,' भूगोलः -लकं.

TERRIBLE, TERRIFIC, *a.* भयानकः -का -कं, घोरः -रा -रं, दारुणः -णा -णं, भीमः -मा -मं. *See* FRIGHTFUL, FEARFUL, HORRIBLE.

TERRIBLY, TERRIFIED, &c. *See* FRIGHTFULLY, FRIGHTENED, &c.

To TERRIFY, *v. a.* त्रस् in caus., भी in caus., *see To* FRIGHTEN.

TERRITORIAL, *a.* राष्ट्रीयः -या -यं, राष्ट्रसम्बन्धी &c., दैशिकः -की -कं.

TERRITORY, *s.* राष्ट्रं, देशः, प्रदेशः, भूमिः *f.*, राज्यं, अधिकारः.

TERROR, *s.* त्रासः, सन्त्रासः, साध्वसं, भयं. *See* FEAR, FRIGHT.

TERSE, *a.* शुद्धः -द्धा -द्धं, संस्कृतः -ता -तं, संक्षिप्तः -प्ता -प्तं.

TERSENESS, *s.* शुद्धता, शुद्धिः *f.*, संक्षिप्तता, संक्षेपः, संस्कृतत्वं.

TERTIAN, *s.* व्याहिकज्वरः, व्याहिकः, तृतीयकज्वरः, तृतीयकः.

TESSELATED, *a.* अष्टापदानुकारेण नानावर्णप्रस्तरखचितः -ता -तं.

TEST, *s.* (Trial) परीक्षा, -क्षणं, कष्टिः *f.*, उपधा, कषः -षणं, आकषः, निकषः, प्रतीतिः *f.*, परीक्षितं; 'this may be put to the test,' एतत्परीक्षा करणीया, एतत्प्रतीतिर उपाद्या.—(Means of trial) परीक्षासाधनं.

To TEST, *v. a.* परीक्ष् (c. 1. -ईक्षते -क्षितुं), ज्ञा in des. *See To* TRY.

TESTACEOUS, *a.* शङ्खवासी -सिनी &c., कसुविशिष्टः -ष्टा -ष्टं, कसुस्थः &c.

TESTAMENT, *s.* (Will) मृतपत्रं, मरणपत्रं, मृत्युपत्रं, मृतलेखः; 'Old Testament,' पुरातननियमः; 'New Testament,' नूतननियमः.

TESTAMENTARY, *a.* (Pertaining to a will) मृतपत्रसम्बन्धी &c. -विषयकः -का -कं.—(Given by a will) मृतपत्रदत्तः -त्ता -त्तं.

TESTATOR, *s.* मृतलेखकर्त्ता *m.* (र्त्तृ), मरणलेखकर्त्ता *m.*

TESTATRIX, *s.* मृतलेखकर्त्री, मृत्युलेखकर्त्री, मरणलेखकर्त्री.

TESTED, *p. p.* परीक्षितः -ता -तं, कृतपरीक्षः -क्षा -क्षं. *See* TRIED.

TESTICLE, *s.* अण्डं, मुष्कः, वृषणः, कोषः -षकः, कोशः, फलं, मुच्चकः, तीक्ष्णं; 'testicles,' अण्डद्वयं, मुष्कद्वयं, अण्डयुग्मं, वृषणद्वयं, वृषणौ *m. du.*; 'enlargement of them,' अण्डवृद्धिः *f.*, अण्डशोफः; 'having them,' सवृषणः -णा -णं, अण्डीरः -रा -रं, अण्डीलः &c.

To TESTIFY, *v. a.* or *n.*, साक्ष्यं दा or कृ, प्रमाणं दा, प्रमाण (nom. प्रमाणयति -यितुं). *See To* DECLARE, CERTIFY, PUBLISH.

TESTIMONIAL, *s.* प्रमाणपत्रं, प्रमाणलेखः, प्रामाणिकलेखः.

TESTIMONY, *s.* साक्ष्यं, साक्षिता, प्रमाणं, प्रामाण्यं. *See* EVIDENCE.

TESTINESS, *s.* कर्कशता, कार्कश्यं, वक्रता, कटुता. *See* PEEVISHNESS.

TESTY, *a.* कर्कशः -शा -शं, कटुः -टुः -टु. *See* PEEVISH, FRETFUL.

TETE-A-TETE, *s.* रहःसंलापः, रहःसम्भाषा, रहःप्रत्यासत्तिः *f.*

TETHER, *s.* बन्धनरज्जुः *m. f.*, बन्धनसूत्रं, चारणरज्जुः *m. f.*

To TETHER, *v. a.* दीर्घरज्जुना बद्ध्वा चर् (c. 10. चारयति -यितुं).

TETRAD, *s.* (Aggregate of four) चतुष्टयं, चतुष्कं.

TETRAGON, *s.* चतुरस्रं, चतुष्कोणः, चतुर्भुजः.

TETRAGONAL, *a.* चतुष्कोणः -णा -णं, चतुरस्रः -स्रा -स्रं, चतुर्भुजः -जा -जं.

TEXT, *s.* (Subject of a comment) मूलं, मूलग्रन्थः, पांक्तग्रन्थः, प्रतीकं, निदर्शनं, अभिहितत्वं, प्रयोगः.—(Verse or passage of Scripture) वचनं, वाक्यं, सूक्तं, ऋक् *f.* (च्), विधिः *m.*, प्रतीकं, श्रुतिः *f.*; 'of the Vedas,' वेदवचनं, वेदवाक्यं.

TEXTILE, *a.* तान्तवः -वी -वं, तन्त्वी -न्तिणी -न्ति (न्).

TEXTUAL, *a.* वाचनिकः -की -कं, मौलिकः -की -कं.

TEXTURE, *s.* (Weaving) ऊतिः *f.*, वापः, व्यूतिः.—(Web, that which is woven) तान्तवं, वस्त्रं.—(Quality of the threads) तन्तुगुणः, सूत्रगुणः.

THAN, *adv.* or *conj.* Usually expressed in Sanskrit by the abl. c.; as, 'a store of grain is better than all stores,' धान्यसंग्रहः श्रेयान् सर्वसंग्रहात्; 'worthier than I,' अस्मत्तो वरीयान्. Or by न च; as, 'silence is better than speaking untruth,' वरं मौनं न च वचनम् अनृतं [*i. e.* better silence and not speaking untruth]. In modern Sanskrit 'than' is often expressed by अपेक्षया, or अपेक्ष्य; as, 'some of the organs of animals are stronger than those of men,' जन्तूनां कानिचित् इन्द्रियाणि मनुष्यापेक्षया प्रबलानि; 'acid has a stronger attraction for iron than copper,' अम्लरसं ताम्रम् अपेक्ष्य लोहम् अधिकम् आकर्षति; 'placing the cup on some place higher than one's head,' स्वमस्तकम् अपेक्ष्य उन्नतरे स्थाने पात्रं विन्यस्य; 'than him,' तदपेक्षया; 'than me,' मदपेक्षया.

To THANK, *v. a.* धन्यं वद् (c. 1. वदति -दितुं), कृतज्ञताकथनं कृ, कृतज्ञताप्रकाशनं कृ, कृतज्ञतादर्शनं कृ, उपकारस्तुतिं कृ, प्राप्तोपकारस्तुतिं कृ, उपकारस्वीकारं कृ, धन्यवादं कृ; 'to give thanks to God,' ईश्वरं धन्यं वद्, ईश्वरगुणान् वद्, ईश्वरस्य धन्यवादं कृ; 'I thank thee,' त्वां धन्यं वदामि.

THANK, THANKS, *s. pl.* धन्यवादः, कृतज्ञतादर्शनं, कृतज्ञताकथनं, कृतज्ञताप्रकाशनं, उपकारस्तुतिः *f.*, उपकाराभिवादः, उपकारस्वीकारः; 'many thanks to you for your kindness,' अनुगृहीतो ऽस्मि तवोपकारेण; 'thanks to thee for the breakfast,' कुशलं ते प्रातराशस्य.

THANKFUL, *a.* कृतज्ञः -ज्ञा -ज्ञं, उपकारज्ञः &c., कृतज्ञतादर्शकः -का -कं, कृतज्ञताकथकः &c., कृतज्ञताप्रकाशकः &c., उपकाराभिवादकः &c., धन्यवादी -दिनी -दि (न्).

THANKFULLY, *adv.* कृतज्ञतापूर्वं, सधन्यवादं, कृतज्ञवत्, उपकारज्ञवत्.

THANKFULNESS, *s.* कृतज्ञता, उपकारज्ञता, उपकृतज्ञता.

THANKLESS, *a.* अकृतज्ञः -ज्ञा -ज्ञं, कृतघ्नः &c. *See* UNGRATEFUL.

THANKSGIVING, *s.* धन्यवादः,-कृतज्ञताकथनं, कृतज्ञतादर्शनं.

THAT, *pron.* (Demonstrative) सः सा तत् (त्), एषः एषा एतत् (एतत्) असौ *m. f.* (अदस्); 'that man,' स नरः; 'at that time,' तस्मिन् काले, *see* THEN.—(Relative) यः या यत् (यत्) or expressed by a compound; as, 'the man that has great wealth,' महाधनो नरः, *see* WHO, WHICH.—(That is to say) अर्थात्, अर्थतस्, वस्तुतस्.—(So that) तथा यथा, *see* the next.

THAT, *conj.* Expressed by तथा यथा, यथा, यत्, इति or by the accusative case, as in the following examples; 'do you contrive that I may be liberated from my bonds,' यथा मुच्ये बन्धनात् तथा संविधातुम् अर्हसि; 'I did not expect that I should see you again,' न म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये; 'do you not know that I keep watch in the house?' त्वं न जानासि यथा गृहरक्षां करोमि; 'know that it is impossible to stand before him,' अवेहि यद् अशक्यं तस्याग्रे स्थातुं; 'this is a new doctrine, that having killed an enemy remorse should be felt,' अयं नूतनो न्यायो यद् अरातिं हत्वा सन्तापः क्रियते 'the pupils said that they had done their task,' कृतकृत्या वयम् इति शिष्या ऊचुः; 'having ascertained that it was a monkey who rang the bell,' मर्कटो घण्टां वादयति इति परिज्ञाय; 'his idea was that an increase of wealth ought to be made,' अर्थवृद्धिः करणीया इति मतिर् बभूव; 'reflecting in his mind that I am happy in possessing such a wife,' धन्यो ऽहं यस्य एतादृशी भार्य्या इति मनसि निधाय; 'I will inform the Guru that the hour of sacrifice has arrived,' उपस्थितां होमवेलां गुरवे निवेदयामि; 'they related that a golden shower had fallen from the clouds,' हिरण्मयीं वृष्टिं नभस्तः पतितां शशंसुः; 'thou sayest that my beloved is pining away,' पर्युत्सुकां प्रियां मे कथयसि.—(In order that) expressed by अर्थं in comp., or by the dative case; as, 'what must I do in order that I may get money?' धनप्रापणार्थं or धनप्रापणाय किं मया कर्त्तव्यं.

THATCH, *s.* छदिः *f.*, तृणछदिः *f.*, छादं, पटलं, तृणपटलं, कटनं, कुटलं, कुटङ्गः, गृहाच्छादनी.

To THATCH, *v. a.* शुष्कतृणादिना or तृणपटलेन गृहाच्छादनं कृ.

THATCHED, *p. p.* तृणाच्छादितः -ता -तं, शुष्कतृणछादितः -ता -तं.

THATCHER, *s.* गृहाच्छादनकृत् *m.*, तृणपटलकारः, कोटकः.

To THAW, *v. a.* द्रवीकृ, विद्रु in caus., विद्रावणं कृ. *See To* MELT, *v. a.*

To THAW, *v. n.* द्रवीभू, द्रु (c. 1. द्रवति, द्रोतुं), विद्रु. *See To* MELT, *v. n.*

THAW, *s.* हिमद्रवः, हिमद्रावः, हिमगलनं, हिमक्षरणं.

THE. This definite article may be either expressed by the pronoun सः सा तत्, or is more usually omitted altogether; as, 'the man,' स पुरुषः or पुरुषः; 'the woman,' सा स्त्री or स्त्री; 'the lion,' स सिंहः or सिंहः.

THEATRE, *s.* रङ्गः, रङ्गशाला, नाटकशाला, नाट्यशाला, नाटकगृहं, नाटकमन्दिरं, नृत्यशाला, रङ्गभूमिः *f.*, समाजसन्निवेशः, आनत्तैः.

THEATRICAL, *a.* नाटकीयः -या -यं, नाट्यसम्बन्धी -न्धिनी &c., नाट्यविषयकः -का -कं, नाटकसम्बन्धी &c., नाट्यशालासम्बन्धी &c.

THEE, *pron.* त्वां acc. c.; 'by thee,' त्वया; 'to thee,' तुभ्यं, ते; 'of thee,' तव, ते.

THEFT, *s.* स्तेयं, चौर्यं, चौरं, चौरिका, स्तैन्यं, स्तैनं, चुरा, तास्कर्यं, तस्करता, मुष्टं, मुष्टिः *f.*, अपहारः, परद्रव्यापहारः, चौर्यकर्म्म *n.* (न्). *See* STEALING.

THEIR, *pron.* तेषां *gen. pl. m.*, तासां *f.*, एतेषां *gen. pl. m.*, एतासां *f.*, एषां *gen. pl. m.*, आसां *gen. pl. f.*

THEISM, *s.* आस्तिक्यं, आस्तिक्यमतं, आस्तिक्यवादः, ईश्वरवादः.

THEIST, *s.* आस्तिकः, आस्तिक्यवादी *m.* (न्), ईश्वरवादी *m.*

THEM, *pron.* तान् or एतान् *acc. pl.*; 'by them,' तैः; 'of them,' तेषां.

THEME, *s.* (Topic) प्रकरणं, विषयः, *see* SUBJECT.—(Short dissertation) अल्पप्रबन्धः, अल्पलेखः, अल्पप्रसङ्गः.

THEMSELVES, *pron.* Expressed by आत्मा *m.* (न्). *See* MYSELF.

THEN, *adv.* (At that time) तदा, तदानीं, तर्हि, एतर्हि, तस्मिन् काले, तत्काले.—(After that) ततः, अथ, तदनन्तरं, तदुपरि; 'now and then,' कदाचित्, कदापि, *see* under NOW.

THENCE, *adv.* (From that place) ततस्, तस्मात् स्थानात्, तस्माद् देशात्.—(For that reason) तस्मात्, *see* THEREFORE.

THENCEFORTH, THENCEFORWARD, *adv.* ततःप्रभृति, तदाप्रभृति, तत्कालादारभ्य, तत आरभ्य, तदारभ्य, तदवधि, तत्कालावधि.

THEOCRACY, *s.* ईश्वरकर्त्तृकराज्यं, ईश्वरकर्त्तृकशासनं, ईश्वरप्रभुत्वं.

THEOGONY, *s.* देवोत्पत्तिः *f.*, देवजन्म *n.* (न्), देववंशः -वंशावली.

THEOLOGIAN, *s.* परमार्थविद् *m.*, परमार्थज्ञानी *m.* (न्), ब्रह्मज्ञानी *m.*, ब्रह्मविद्याज्ञः, अध्यात्मज्ञानी *m.*, अध्यात्मदृक् *m.* (श्), श्रोत्रियः, श्रुताध्ययनसम्पन्नः, धर्म्मशास्त्रज्ञः, वेदानी *m.*

THEOLOGICAL, *a.* परमार्थविद्याविषयकः -का -कं, परमार्थविद्यासम्बन्धी -न्धिनी &c., अध्यात्मज्ञानविषयकः &c., औपनिषदः -दी -दं.

THEOLOGY, *s.* परमार्थविद्या, परमार्थज्ञानं, श्रुतिविद्या, धर्म्मविद्या, देवज्ञानं, ब्रह्मज्ञानं, ब्रह्मविद्या, तत्त्वज्ञानं, तत्त्वविद्या, अध्यात्मज्ञानं, अध्यात्मविद्या, श्रोत्रियता, परार्थप्रकरणं.

THEOREM, *s.* (Proposition to be proved) प्रमेयं, प्रमेयोपपाद्यं.

THEORETIC, THEORETICAL, *a.* मानसिकः -की -कं, काल्पनिकः &c., अव्यवहारिकः -की -कं, व्यवहारागम्यः -म्या -म्यं, मनोमयः &c. *See* SPECULATIVE.

THEORETICALLY, *adv.* मनःकल्पनानुसारेण, मनःकल्पनया, कल्पनापूर्व्वं.

THEORY, *s.* (Speculation, scheme) कल्पना, मनःकल्पना, मानसकल्पना, मानससृष्टिः *f.*, तर्कः, कल्पितं, मनःकल्पितं, अधीपत्तिः *f.*; 'anxious to establish one's own theory,' स्वकल्पनासाधनेच्छुः -च्छुः -च्छु.—(Exposition of principles) बीजनिर्देशः, उपपत्तिः *f.*

THERAPEUTIC, रोगशमकः -का -कं, रोगप्रतिकारकः &c., *see* CURATIVE.

THERE, *adv.* तत्र, तत्स्थाने, तस्मिन् स्थाने, तस्मिन् देशे; 'here and there,' इतस्ततस्; 'produced there, or relating to that place,' तत्रत्यः -त्या -त्यं, तत्रस्थः -स्था -स्थं; 'the people residing there,' तत्रस्थजनाः *m. f.*, तत्रत्यजनाः.

THEREABOUTS, *adv.* (Near that place) तत्रोपान्ते, तत्स्थानसमीपे-निकटे, तत्रसमीपे, आदिपश्चात्.—(Nearly), *see* NEARLY, *adv.*

THEREAT, *adv.* तेन, तस्मात्, तदुपरि, ततस्, अतस्.

THEREBY, *adv.* तेन, तेनोपायेन, तद्द्वारा, तद्द्वारेण, अनेनोपायेन.

THEREFORE, *adv.* तेन, तस्मात्, अनेन हेतुना, तेन हेतुना, तस्य हेतोः, तेन कारणेन, तत्कारणात्, अतस्, ततस्, अतःकारणात्, अतोहेतोः, तन्निदानात्, तत्, इति, इति हेतोः.

THEREIN, *adv.* तत्र, तस्मिन्, एतस्मिन्, अस्मिन्, अस्मिन् विषये.

THEREOF, *adv.* तस्य, एतस्य, तदीयः -या -यं; 'belonging to that place,' तत्रत्यः -त्या -त्यं, तत्स्थानिकः -की -कं, तत्स्थानीयः -या -यं, तत्रस्थः &c.

THEREUPON, *adv.* ततस्, अतस्, तत्रोपरि, तदनन्तरं, अत्रान्तरे.

THERMOMETER, *s.* उष्णानुष्णमापनयन्त्रं, शीतोष्णमापनयन्त्रं.

THESE, *pron.* एते *m.* एताः *f.* एतानि *n. pl.* (एतत्), इमे *m.*, इमाः *f.*, इमानि *n. pl.* (इदं), अमी *m. pl.* (अदस्); 'these two,' एतौ *m. du.*, एते *f. du.*

THESIS, *s.* (Proposition) पक्षः, पूर्व्वपक्षः, प्रतिज्ञा.

THEY, *pron.* ते *m.*, ताः *f.*, तानि *n. pl.* (तद्), एते &c., इमे &c. (इदं), अमी *m. pl.* (अदस्); 'they two,' तौ *m. du.*, ते *f. du.*

THICK, *a.* घनः -ना -नं, स्थूलः -ला -लं, सान्द्रः -न्द्रा -न्द्रं, निविडः -डा -डं, अविरलः -ला -लं, नीरन्ध्रः -न्ध्रा -न्ध्रं, श्यानः &c., स्यानः &c., *see* DENSE.—(As water, &c., turbid) कलुषः -षा -षं, अनच्छः -च्छा -च्छं, आविलः -ला -लं.

THICK, *adv.* (In quick succession) निरन्तरं, अविरतं, *see* FREQUENTLY.—(Closely) निरन्तरं, अविरलं, निविडं.

To THICKEN, *v. a.* घनीकृ, सान्द्रीकृ, स्थूलीकृ, श्यानीकृ, निविडीकृ.

To THICKEN, *v. n.* घनीभू, सान्द्रीभू, स्थूलीभू, श्यानीभू, निविडीभू.

THICKENED, *p. p.* घनीभूतः -ता -तं, घनीकृतः -ता -तं, स्थूलीभूतः &c.,

THICKENING, *s.* घनीकरणं, घनता. *See* INSPISSATION.

THICKET, *s.* गहनं, वृक्षगहनं, तरुगहनं, वनगहनं, झाटः -टं, गुहिनं, विपिनं, गह्वरं, सान्द्रं, प्रस्तारः.

THICK-HEADED, *a.* स्थूलबुद्धिः -द्धिः -द्धि, स्थूलधीः &c. *See* STUPID.

THICKLY, *adv.* निरन्तरं, अविरलं, निविडं, अविरतं, सुसंहतं.

THICKNESS, *s.* घनता -त्वं, स्थूलता, स्थौल्यं, सान्द्रता, नैविड्यं, श्यानता, पीवरत्वं, संहतत्वं, *see* DENSITY. 'Thickness,' as a property of matter, is expressed by पिण्डत्वं.

THICK-SET, *a.* संहतः -ता -तं, सुसंहतः &c., निरन्तरः -रा -रं.

THIEF, *s.* स्तेनः, चौरः, स्तेयी *m.* (न्), चोरः, तस्करः, स्तेयकृत् *m.*, मोषकः, आमोषी *m.* (न्), मोष्टा *m.* (ष्टृ), परस्वापहारी *m.*, अदत्तादायी *m.*, परद्रव्यहारकः, चौर्य्यकृत् *m.*, ऐकागारिकः, मलिम्लुचः. *See* ROBBER, STEALER.

THIEF-TAKER, THIEF-CATCHER, *s.* चौरग्राही *m.* (न्). स्तेनग्राही *m.*

To THIEVE, *v. n.* चौर्य्यं कृ, स्तेयं कृ, तास्कर्य्यं कृ, परद्रव्यहरणं कृ.

THIEVISH, *a.* चौर्य्यासक्तः -क्ता -क्तं, स्तेयासक्तः &c., चौर्य्यशीलः -ला -लं, स्तेयकारी -रिणी -रि (न्), अदत्तपरधनापहारप्रसक्तः -क्ता -क्तं.

THIEVISHNESS, *s.* चौर्य्यासक्तिः *f.*, स्तेयासक्तिः *f.*, चौर्य्यशीलता, तस्करता.

THIGH, *s.* ऊरुः *m.*, सक्थि *n.*, जङ्घा, जाङ्घनी, भगत *m.*; 'fore part of

the thigh,' प्रतिजङ्घा ; 'having long thighs,' दीर्घसक्थः-क्था-क्थं.

THIMBLE, *s.* अङ्गुल्यग्रत्राणं, अङ्गुलिमुखत्रं, अग्राङ्गुलित्रं -त्राणं, सूचिचालनी, सूचिप्रणोदनी, सूचिचालनयोग्ययन्त्रं.

THIN, *a.* (Not thick) तनुः -नुः -न्वी -नु, प्रतनुः &c., वितनुः &c., सूक्ष्मः -क्ष्मा -क्ष्मं, अस्थूलः -ला -लं.—(Slender, lean) तनुः -न्वी -नु, क्षीणः -णा -णं, शीर्णः -र्णा -र्णं, कृशः -शा -शं, कृशाङ्गः -ङ्गा -ङ्गं, जैवातृकः -का -कं, पृश्निः -श्निः -श्नि, शातः -ता -तं, अमांसः -सा -सं ; 'having a thin waist,' तनुमध्यमः -मा -मं, अल्पमध्यमः &c., क्षीणमध्यः -ध्या -ध्यं, शातोदरी.—(Rare, subtil, fine) मृक्षः -क्षा -क्षं, श्लक्ष्णः -क्ष्णा -क्ष्णं, दरः -रा -रं.—(Not close) विरलः -ला -लं ; 'a thin plank,' सूक्ष्मफलकः, सूक्ष्मदारुः *m.*

To THIN, *v. a.* तनूकृ, सूक्ष्मीकृ, श्लक्ष्णीकृ, श्लक्ष्ण (nom. श्लक्ष्णयति -यितुं), लेखनं कृ, तक्षणं कृ.—(Make less, close, &c.) विरलीकृ.

THINE, *a.* तव gen. c., ते gen. c., त्वदीयः -या -यं, तवकः -का -कं, तावकः -की -कं, तावकीनः -ना -नं, त्वत्कः -त्का -त्कं, भवदीयः -या -यं, त्वत् in comp.

THING, *s.* द्रव्यं, वस्तु *n.*, अर्थः, विषयः, पदार्थः, द्रविणं, वसु *n.*, वित्तं, विभवः, *see* SUBSTANCE ; 'things,' द्रव्याणि *n. pl.*, वस्तूनि *n. pl.*

To THINK, *v. a.* or *n.* (Reflect) चिन्त् (c. 10. चिन्तयति -यितुं), संचिन्त्, विचिन्त्, परिचिन्त्, प्रविचिन्त्, तर्क् (c. 10. तर्कयति -यितुं), वितर्क्, ध्यै (c. 1. ध्यायति, ध्यातुं), अनुध्यै, उपध्यै, अभिध्यै, प्रध्यै, संध्यै, विमृश्, अनुमृश्, परिमृश्, मनसा विचर्, भू in caus., सम्भू in caus., आलोच्, आलोक्, निरूप्, *see To* REFLECT.—(Suppose) मन् (c. 4. मन्यते, मन्तुं), *see To* IMAGINE ; 'to think of,' अनुस्मृ, *see To* RECOLLECT ; 'to think to one's self,' स्वगतं चिन्त् ; 'one who thinks that it is night,' रात्रिम्मन्यः.

THINKER, *s.* चिन्तकः, चिन्तयिता *m.* (तृ), चिन्तनकृत्, मन्ता *m.*

THINLY, *adv.* विरलं, वैरल्येन, असंहतं, अस्थूलं, तनु, तानवेन.

THINNED, *p. p.* तनूकृतः -ता -तं, सूक्ष्मीकृतः &c., तष्टः -ष्टा -ष्टं, त्वष्टः &c.

THINNESS, *s.* तनुता, तानवं, सूक्ष्मता, क्षीणता, शीर्णता, कृशता, कृशाङ्गता, सौक्ष्म्यं, अस्थूलता.—(Rareness) विरलता, वैरल्यं.

THIRD, *a.* तृतीयः -या -यं, त्रितयः &c., तृतीयी -यिनी -यि (न्).

THIRD, *s.* (Third part) तृतीयांशः, तृतीयभागः ; 'two thirds,' द्वौ तृतीयांशौ, द्वौ तृतीयभागौ ; 'having a third,' तृतीयी -यिनी &c.

THIRDLY, *adv.* तृतीयतस्, तृतीयं, तृतीयपदे, तृतीयस्थाने.

THIRST, *s.* तृष्णा, तृषा, तृट् *f.* (ष्), पिपासा, तर्षः -र्षणं, अनुतर्षः, तृषितं, पानेच्छा, उदकेच्छा, उदन्या, अपलापिका, उपलालिका, धीतिः *f.* ; 'excessive thirst,' अतितृष्णा ; 'of wealth,' धनतृष्णा, धनाशा ; 'eating to excite thirst,' अवदंशः.

To THIRST, *v. n.* तृष् (c. 4. तृष्यति, तर्षितुं), वितृष्, पा in des. (पिपासति -सितुं), तृषार्तः -र्ता -र्तं भू, तृषार्तीभू, उदन (nom. उदन्यति).

THIRSTING, *part.* तृष्यन् -ष्यन्ती -ष्यत् (त्), पिपासन् -सन्ती -सत् (त्). *See* the next.

THIRSTY, *a.* तृषार्तः -र्ता -र्तं, पिपासुः -सुः -सु, तर्षितः -ता -तं, तृषितः &c., तृष्णाक् *m. f. n.* (ज्), तृषातुरः -रा -रं, तृष्णातुरः -रा -रं, पानेच्छुः -च्छुः -च्छु, उदकेच्छुः &c., उदकार्थी -र्थिनी -र्थि (न्), पानार्थी &c., पिपासितः -ता -तं, सतृष्णः -ष्णा -ष्णं, सतृट् *m. f. n.* (ष्), तृट्परीतः -ता -तं, सतृषः -षा -षं, तृषान्वितः -ता -तं, तृषावान् -वती &c., तृषाकुलः -ला -लं, तृषाविष्टः -ष्टा -ष्टं, तृषाक्रान्तः -न्ता -न्तं.

THIRTEEN, *a.* त्रयोदश *m. f. n. pl.* (न्), त्रिदश *m. f. n. pl.* (न्).

THIRTEENTH, *a.* त्रयोदशः -शी -शं, त्रिदशः -शी -शं.

THIRTIETH, *a.* त्रिंशः -शी -शं, त्रिंशत्तमः -मी -मं.

THIRTY, *a.* त्रिंशत् *sing. f.*, त्रिंशकः -का -कं ; 'the aggregate of thirty,' त्रिंशकं ; 'he reigned thirty years,' त्रिंशतम् अब्दान् राज्यं चकार ; 'with thirty arrows,' त्रिंशता शरैः ; 'thirty-one,' एकत्रिंशत् ; 'two,' द्वात्रिंशत् ; 'three,' त्रयस्त्रिंशत् ; 'four,' चतुस्त्रिंशत् ; 'five,' पञ्चत्रिंशत् ; 'six,' षट्त्रिंशत्, *see* SEVENTY ; 'thirty-fold,' त्रिंशद्गुणः -णा -णं.

THIS, *pron.* एषः एषा एतद् (एनद्), अयं इयं इदं (इद्), असौ *m. f.* (अदस्).

THISTLE, *s.* गोक्षुरः -रकः, गोखुरः, गोखुरिः *m.*, क्षुरः.

THITHER, *adv.* तत्र, तस्यानं प्रति, तद्देशं प्रति, तं देशं प्रति.

THONG, *s* वरत्रा, चर्मरज्जुः *m. f.*, चर्मबन्धः, वधी, वद्री, वध्री, वार्द्री, वार्द्रं -द्री, नद्री, बलिसङ्गः, चर्मनिर्म्मितो रज्जुः, चर्मपट्टी.

THORAX, *s.* उरस् *n.*, वक्षस् *n.*, वक्षःस्थलं, उरःस्थलं, वक्षस्स्थलं, उरस्स्थलं, पार्श्वं.

THORN, *s.* (Tree) कण्टकवृक्षः.—(Prickle) कण्टकः -कं, दुनखः, द्रुनखः, तरुनखः, पत्रसूचिः *m.*, दलसूचिः *m.*, शल्यं, शिताग्रः, सिताग्रः, राङ्कवः, वल्किलः, वङ्किलः, पनसः, द्रुमरः ; 'extraction of thorns,' कण्टकोद्धरणं, शल्योद्धरणं ; 'eater of thorns,' कण्टकभुक् *m.*—(Any thing troublesome) कण्टकः, शल्यं.

THORN-APPLE, *s.* धत्तूरः, धुस्तूरः, धुस्तुरः, धूस्तूरः, कनकः, कितवः, उन्मत्तः, धूर्त्तः, मातुलः, मदनः, मारः, हेमतरुः *m.*, पुरीमोहः, खरदूषणः, काहलापुष्पः, तीक्ष्णकण्टकः ; 'its fruit,' मातुलपुत्रकः.

THORNLESS, *a.* निष्कण्टकः -का -कं, अकण्टकः &c., कण्टकहीनः -ना -नं.

THORNY, *a.* कण्टकितः -ता -तं, कण्टकी -किनी -कि (न्), सकण्टकः -का -कं, बहुकण्टकः &c., प्रचुरकण्टकः &c., कण्टकयुक्तः -क्ता -क्तं.

THOROUGH, *a.* साद्यन्तः -न्ता -न्तं, पर्य्याप्तः -प्ता -प्तं. *See* COMPLETE.

THOROUGH-BRED, *a.* (Horse) आजानेयः, कुलीनः, *see* under HORSE.

THOROUGHFARE, *s.* सर्व्वसाधारणमार्गः, सर्व्वसामान्यपथः, सर्व्वगम्यमार्गः, लोकगम्यपथः, अप्रतिरोधपथः ; 'a great thoroughfare,' लोकयात्रा, सर्व्वलोकयात्रा, जनाकीर्णमार्गः, जनाकीर्णं.

THOROUGHLY, *adv.* साद्यन्तं, पर्य्याप्तं, साकल्येन. *See* COMPLETELY.

THOSE, *pron.* ते *m.*, ताः *f.*, तानि *n. pl.* (तद्), अमी *m. pl.* *See* THESE.

THOU, *pron.* त्वं (युष्मत्) ; 'to thou and thee,' त्वङ्कृ.

THOUGH, *conj.* यद्यपि, अपि, तथापि, यदि. *See* ALTHOUGH.

THOUGHT, *s.* (Operation of the mind, act of thinking) चिन्ता -न्तनं, विचारणं -णा, विचारः, ध्यानं, अभिध्यानं, आध्यानं, भावना, चर्चा, मननं, मनोव्यापारः, अन्तःकरणव्यापारः, चित्तव्यापारः, चित्तचेष्टा, मनश्चेष्टा, अन्तःकरणचेष्टा, *see* REFLECTION, MEDITATION.—(That which is formed in the mind) बुद्धिः *f.*, मतिः *f.*, मतं, मनस् *n.*, बोधः, मनोगतं, कल्पना, मनःकल्पना, मनःकल्पितं, सङ्कल्पः, मनोगुप्तं, मनस्जं, मनोवृत्तिः *f.*, चित्तवृत्तिः *f.*, हृद्गतं, भावना, तर्कः ; 'inmost thoughts,' अन्तर्गतं मनस् ; 'evil thoughts,' कुकल्पना, कुतर्कः, अपध्यानं ; 'speed of thought,' मनोवेगः, मनोजवः ; 'swift as thought,' मनोजवः -वा -वं, मनोयायी -यिनी &c. ; 'beyond thought,' अचिन्त्यः -न्त्या -न्त्यं, अचिन्तनीयः -या -यं ; 'in thought, word, or deed,' मनोवचनकर्म्मभिः *inst. pl.*

THOUGHT, *p. p.* चिन्तितः -ता -तं, मतः &c., भावितः &c., कल्पितः &c.

THOUGHTFUL, *a.* (Contemplative) चिन्तापरः -रा -रं, *see* MEDITATIVE.—(Considerate, attentive) विचारशीलः -ला -लं, विचारवान् -वती &c., सविचारः -रा -रं, सचिन्तः -न्ता -न्तं, चिन्तावान् &c., चिन्तायुक्तः -क्ता -क्तं.

THOUGHTFULNESS, *s.* विचारशीलता, सविचारता, सचिन्तता, मानसत्वं.

THOUGHTLESS, *a.* निश्चिन्तः -न्ता -न्तं, विवेकहीनः -ना -नं, विचारहीनः &c., अविचारशीलः -ला -लं, अनूहः -हा -हं. *See* HEEDLESS, NEGLIGENT.

THOUGHTLESSLY, *adv.* अचिन्तया, निश्चिन्तं, अविचारेण, अविवेकेन; 'thoughtlessly done,' अविचारकृतः -ता -तं, अविवेककृतः &c.

THOUGHTLESSNESS, *s.* अविचारः -रता, अविवेकता, अविवेकः, विचारहीनता, विवेकहीनता, प्रमादः. *See* HEEDLESSNESS.

THOUSAND, *a.* सहस्रं *n. sing.*, दशशतं. The word सहस्रं may be used with the nom. pl. or gen. pl.; as, 'a thousand ancestors,' सहस्रं पितरः or सहस्रं पितॄणां; 'ten thousand,' अयुतः -तं; 'one hundred thousand,' लक्षं -क्षा; 'a thousand times,' सहस्रकृत्वस्; 'in a thousand ways,' सहस्रधा; 'thousand eyed,' सहस्रनयनः -ना -नं; 'a regiment of a thousand men,' सहस्री *m.* (न्), साहस्रः; 'the aggregate of a thousand,' साहस्रं; 'thousand-fold,' सहस्रगुणः -णा -णं; 'by thousands,' सहस्रशस्.

THOUSANDTH, *a.* सहस्रतमः -मी -मं, साहस्रः -स्री -स्रं.

THRALLDOM, *s.* दास्यं, वशता, पारतन्त्र्यं, *see* SERVITUDE, SLAVERY.

To THRASH, *v. a.* निस्तुषीकृ, कणडनं कृ, पृ, तड्. *See To* THRESH.

THREAD, *s.* सूत्रं, तन्तुः *m.*, तन्त्रं, गुणः, सूत्रतन्तुः *m.*, सरत् *n.*, सरित् *f.*, कुत्रं, चीनः, खात्रं; 'point of a thread,' पक्ष्म *n.* (न्), सूत्राग्रं; 'thread of a story or subject,' प्रबन्धार्थः, अर्थप्रबन्धः, अन्वयः, अर्थान्वयः, अर्थसन्दर्भः, कथासन्दर्भः, कथाप्रबन्धः, सन्धानं, अनुसन्धानं; 'thread of hope,' आशातन्तुः *m.*; 'sacrificial thread,' *see* under SACRIFICIAL.

To THREAD, *v. a.* सूत्र् (Nom. सूत्रयति -यितुं), गुम्फ्, *see To* STRING.

THREADBARE, *a.* जर्जरीलः -का -कं, जर्जरः -रा -रं, सूत्रदरिद्रः &c.

THREADED, *p. p.* सूत्रितः -ता -तं, गुम्फितः &c., ग्रन्थितः &c., ग्रथितः &c.

THREAT, *s.* भर्त्सनं, निर्भर्त्सनं, तर्जनं, दण्डसूचनं. *See* MENACE.

To THREATEN, *v. a.* भर्त्स् (c. 10. भर्त्सयति -ते -यितुं), निर्भर्त्स्, तर्ज्, *see To* MENACE.—(Declare purpose of punishing) दण्डसूचनं कृ, दण्डप्रदर्शनं कृ, दण्डसङ्कल्पप्रदर्शनं कृ.—(Exhibit the appearance of something evil approaching) अनिष्टसूचनं कृ, अनिष्टावेदनं कृ, *see To* PREBODE.

THREATENED, *p. p.* भर्त्सितः -ता -तं, निर्भर्त्सितः &c., तर्जितः -ता -तं.

THREATENING, *part.* भर्त्सनकारी -रिणी &c., अनिष्टावेदी -दिनी &c.

THREE, *a.* त्रयः *m. pl.*, तिस्रः *f. pl.*, त्रीणि *n. pl.* (त्रि); 'the three worlds,' त्रिभुवनं; 'the aggregate of three,' त्रयं, त्रयी, त्रिकं, त्रितयं. The word त्रयं is often used at the end of a compound to express 'three;' as, 'three months,' मासत्रयं; 'three years,' वर्षत्रयं; 'three steps,' पदत्रयं; 'the three properties,' गुणत्रयं; 'he was seen by three rogues,' स धूर्तत्रयेण दृष्टः; 'two or three,' द्वित्राः -त्राः -त्राणि (त्र being here put for त्रि); two or three or any number,' द्वित्रादिसंख्या, द्वित्राद्याः *m. pl.*; 'three or four,' चतुरः -राः -राणि; 'rule of three' त्रैराशिकगणितं, *see* under RULE, *s.*

THREE-FOLD, *a.* त्रिगुणः -णा -णं, त्रिविधः -धा -धं, त्रिवृत् *m. f. n.*

THREE-FOURTHS, *s. pl.* त्रयश् चतुर्भागाः *m. pl.*, त्रिपादाः, त्र्यंशाः.

THRENODY, *s.* यमगाथा, शवगीतं, यमगानं.

To THRESH, *v. a.* (Corn) धान्यादि मृद् (c. 9. मृद्नाति, मर्दितुं) or पृ or परिपृ or निस्तुषीकृ, धान्यादिमर्दनं कृ, धान्यादिकणडनं कृ, अवघातं कृ.—(Beat) तड् (c. 10. ताडयति -यितुं), ताडनं कृ.

THRESHED, *p. p.* मर्दितः -ता -तं, मृदितः &c., निस्तुषितः &c., निस्तुषीकृतः &c., पूतः &c., परिपूतः &c., अवहतः &c., बहुलीकृतः &c.

THRESHING, *s.* धान्यादिमर्दनं, धान्यादिकणडनं, कणडनं, निस्तुषीकरणं, अवघातः, पावनं, ताडनं.

THRESHING-FLOOR, *s.* धान्यादिमर्दनस्थानं, धान्यादिकणडनस्थानं, धान्यमर्दनभूमिः *f.*, खलः, शस्यमर्दनस्थानं.

THRESHOLD *s.* देहली, गृहावग्रहणी, गृहतटी, शिला -ली, द्वारपिण्डी, रुधिरका, अग्रुरः, उदुम्बरः.

THRICE, *adv.* त्रिवारं, वारत्रयं, त्रिः, त्रिकृत्वस्, त्रिगुणः -णा -णी -णं, त्रि in comp.; 'thrice ploughed,' त्रिसीत्यः -त्या -त्यं, त्रिहल्यः -ल्या -ल्यं, त्रिगुणाकृतः -ता -तं.

THRIFT, THRIFTINESS, THRIFTY, &c. *See* FRUGALITY, FRUGAL, &c.

THRILL, *s.* स्फुरणं, स्फूर्त्तिः *f.*, स्फुरितं, हर्षः; 'of joy,' रोमहर्षः -र्षणं, रोमोद्धर्षणं, रोमोद्गमः, रोमोद्भेदः, रोमाञ्चः, पुलकः, पुलकोद्गमः.

To THRILL, *v. n.* स्फुर् (c. 6. स्फुरति -रितुं), हृष् (c. 4. हृष्यति, हर्षितुं).

THRILLING, *part.* स्फुरन् -रन्ती -रत् (न्), स्फुरितः -ता -तं; 'with joy,' हृष्टः -ष्टा -ष्टं, हर्षी -र्षिणी -र्षि (न्), पुलकितः -ता -तं, रोमाञ्चितः &c.

To THRIVE, *v. n.* *See To* FLOURISH, PROSPER, *v. n.*

THRIVING, *v. n.* समृद्धः -द्धा -द्धं. *See* PROSPEROUS, FLOURISHING.

THROAT, *s.* कण्ठः, गलः, ग्रीवा, कन्धरः -रा, कुहरं, कूकः, निगरणः, *see* NECK; 'relating to it,' कण्ठ्यः -ण्ठ्या -ण्ठ्यं; 'seated in it,' कण्ठस्थः -स्था -स्थं, कण्ठगतः -ता -तं; 'up to the throat,' आकण्ठात्; 'dryness of it,' कण्ठशोषः.

To THROB, *v. n.* स्फुर् (c. 6. -स्फुरति -रितुं), विस्फुर्, स्पन्द् (c. 1. स्पन्दते -न्दितुं), प्रतिस्पन्द्, परिस्पन्द्, कम्प्, विकम्प्, वेप्. *See To* PALPITATE, BEAT.

THROB, THROBBING, *s.* स्फुरणं -णा, स्फुरितं, स्पन्दनं, स्पन्दितं, विस्पन्दः, स्पन्दः, कम्पः, स्फोरणं, स्फुरः, स्फारणं, स्फारणं, स्फुलनं; 'of the eye,' चक्षुःस्पन्दः.

THROE, *s.* (Of child-birth) प्रसववेदना, गर्भवेदना, वेधना.

THRONE, *s.* सिंहासनं, नृपासनं, राजासनं, उच्चासनं, भद्रासनं, राजशय्या, महाशय्या, मञ्चः, राजासनमञ्चः.

THRONG, *To* THRONG. *See* CROWD, *To* CROWD.

THRONGED, *p. p.* सङ्कीर्णः -र्णा -र्णं, समाकीर्णः &c., बाधितः -ता -तं.

To THROTTLE, *v. a.* गलग्रहं कृ, गलहस्तं. *See To* CHOKE, SUFFOCATE.

THROUGH, *prep.* (From one end or side to the other) पारं, आपाश्चात्यान्तरात्, पाश्चात्यान्तरपर्य्यन्तं, पाश्चात्यान्तरं यावत्, तीरान्तरं.—(Denoting passage) मध्येन, अन्तरेण or expressed by the inflection of the noun; 'he goes through a fissure in the rock,' गिरिरन्ध्रमध्येन गच्छति; 'through the branches,' विटपान्तरेण.—(By means of, through the agency or influence of) expressed by the abl. or instr. case; as, 'through ambition,' लोभात्, लोभेन; 'through anger,' कोपात्, रोषणतया; 'through him,' तेन, *see* under BY, *prep.*

THROUGH, *adv.* (From the beginning to the end) साद्यन्तं, साद्यन्तं.—(To the end) शेषपर्य्यन्तं, शेषं यावत्, समाप्तिपर्य्यन्तं, अवसानपर्य्यन्तं, आसमाप्तेः, आशेषात्, *see* THROUGHOUT; 'to carry through, get through,' पार् (c. 10. पारयति -यितुं), तीर् (c. 10. तीरयति -यितुं), *see To* FINISH, *v. a.*

THROUGHOUT, *adv.* (From the beginning to the end) साद्यन्तं,

आसन्नं, शेषपर्य्यन्तं.—(Of time) expressed by पर्य्यन्तं, यावत् or आ in comp.; thus, 'throughout the month,' मासपर्य्यन्तं; 'throughout the year,' वर्षपर्य्यन्तं; 'throughout the whole year,' आवर्षान्तात् or वर्षान्तं यावत् (*i. e.* to the end of the year); 'throughout life,' यावज्जीवं, जीवनपर्य्यन्तं, आजीवनान्तात्.

To THROW, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), उत्क्षिप्, अस् (c. 4. अस्यति -क्षितुं), प्रास्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, ईर् (c. 10. ईरयति -यितुं), समीर्, उदीर्, पत् (c. 10. पातयति -यितुं), सृज्, प्रहृ, प्रेष् in caus.—(Throw away) अपास्, व्युदस्, अपध्वंस्, त्यज्, अपहा, विहा, नश् in caus., *see To* LOSE, REJECT; 'one's time,' कालं क्षिप्, कालक्षेपं कृ.—(Throw about) विक्षिप्, इतस्ततः क्षिप्.—(Throw behind one's back) पृष्ठतः कृ or क्षिप्.—(Throw down) पत् in caus., अवपत्, अधःपत्, अधः क्षिप्, अधः कृ, भंश् in caus., प्रभंश्, च्यु in caus., प्रच्यु.—(Throw into disorder) व्यूहान् भञ्ज् or भिद्, पिञ्जलीकृ.—(Throw off) अवधू, निर्धू, विधू, निरस्, निराकृ, अपध्वंस्.—(Throw out) निरस्, निराकृ; 'as hints, &c.,' सूच्, सूचनां कृ.—(Throw up) उत्क्षिप्, उत्क्षेपं कृ, *see To* VOMIT.—(Throw up), *see To* RESIGN.—(Throw one's self down) स्वदेहावपातं कृ; 'from a cliff,' गिरिशिखराद् अवपातं कृ or प्रपतनं कृ.

THROW, *s.* क्षेपः -पणं, प्रक्षेपः, आक्षेपः, असनं, पातः -तनं, क्षिप्तिः *f.*

THROWER, *s.* क्षेपकः, प्रक्षेपकः, क्षेप्ता *m.* (प्तृ), प्रासकः, क्षेपणकृत्.

THROWN, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः &c., अस्तः -स्ता -स्तं, प्रास्तः &c., ईरितः -ता -तं, पातितः -ता -तं; 'away,' अपास्तः &c., व्युदस्तः &c., अपविद्धः -द्धा -द्धं, अपसारितः -ता -तं, त्यक्तः -क्ता -क्तं, नष्टः -ष्टा -ष्टं; 'a kindness is thrown away on bad men,' सुकृतम् असत्सु नष्टं; 'thrown down,' पातितः -ता -तं, निपातितः &c., अधःपातितः &c., अधःक्षिप्तः -प्ता -प्तं, अधःकृतः -ता -तं, भंशितः -ता -तं; 'thrown into disorder,' भग्नव्यूहः -हा -हं, भिन्नव्यूहः &c., पिञ्जलः -ला -लं, समुत्पिञ्जलः &c.; 'thrown off,' निर्धूतः -ता -तं, अवधूतः &c., अपविद्धः &c.; 'as from a horse, &c.,' निरस्तः -स्ता -स्तं.

THRUM, *s.* (Ends of threads) दशाः *f. pl.*, वस्तयः *f. pl.* (वस्ति).

THRUSH, *s.* (Bird) सारिका, शारिका, मदनसारिका, शलाका, शरारिः *f.*, शरालिः *f.*, सरातिः *f.*, आटिः *f.*, आडिः *f.*, आतिः *f.*

To THRUST, *v. a.* तुद् (c. 10. तोदयति -यितुं), प्रसृ (c. 10. -सारयति -यितुं), प्रसारणं कृ; 'aside,' अपसृ, *see To* PUSH.

THRUST, *s.* ताडनं, आघातः, अभिघातः, प्रसारणं, प्रहारः, *see* PUSH.

THUMB, *s.* अङ्गुष्ठः, अङ्गुलः, वृद्धाङ्गुलिः *f.*; 'thumb and forefinger,' सन्तोषः.

To THUMB, *v. a.* अङ्गुलीभिर् अङ्गं (c. 10. अङ्गयति -यितुं) or परामृश् or स्पृश्, अङ्गुल्याङ्कितं -तां कृ. *See To* FINGER, *v. a.*

THUMP, *s.* आघातः, प्रहारः, करघातः, मुष्टिपातः. *See* BLOW.

To THUMP, *v. a.* तुद् (c. 10. तोदयति -यितुं), प्रहृ, आहन्. *See To* BEAT.

THUNDER, *s.* गर्जनं -ना, गर्जितं, मेघगर्जितं, मेघनादः, मेघशब्दः, मेघनिर्घोषः, स्फूर्जः, स्फूर्जनं, स्फूर्जथुः *m.*, विस्फूर्जितं, मेघविस्फूर्जितं, स्तनितं, मेघस्तनितं, स्तननं, मेघस्तननं, स्तनयित्नुः *m.*, घनशब्दः, घनस्वनः, घनरवः, मेघध्वनिः *m.*, परिघोषः, गम्भीरनादः, गर्जिः *m.*, गर्जं, रसितः.

To THUNDER, *v. n.* गर्ज् (c. 1. गर्जति -र्जितुं), परिगर्ज्, स्फुर्ज् (c. 1. स्फूर्जति -र्जितुं), विस्फुर्ज्, स्तन् (c. 1. स्तनति -नितुं), गर्जनं कृ, स्फूर्जनं कृ.

THUNDERBOLT, *s.* वज्रः -ज्रं, वज्राघातः, कुलिशः -शं, भिदुरं, भिदिः *m.*, भिदिरं, भिदुः *m.*, अशनिः *m. f.*, वज्राशनिः *m.*, स्फिदकं, मृदाकरः, शतधारं, शतारं, बहुधारः, शतकोटिः *m.*, षट्कोणं, अभोग्यं, चिदशाकुशं, गिरिच्छरः, गिरिध्वजः, गिरिकण्टकः, इन्द्रप्रहरणं, स्वरुः *m.*, दम्भोलिः *m.*, ह्रादिनी, पविः *m.*, शक्रः, शम्भः, पेशिः *m.*, जसुरिः *m.*, व्याधानः, मेघभूतिः *f.*, दृम्भूः *m.*, दधीच्यस्थि *n.*, वैद्युतो ऽग्निः; 'fall of a thunderbolt,' वज्रपातः; 'like a thunderbolt,' वज्रप्रायः -या -यं.

THUNDER-CLAP, *s.* स्फूर्जथुः *m.*, वज्रनिर्घोषः, वज्रनिष्पेषः, वज्राघातः, वज्रज्वाला, वज्रपातशब्दः, वज्रस्तनितं, वज्रनिस्वनः.

THUNDER-CLOUD, *s.* घनः, वज्रघनः, मेघः, वज्रमेघः, वज्राभ्रं.

THUNDERER, *s.* वज्री *m.* (न्), वज्रपाणिः *m.*, वज्रधरः, कुलिशभृत्.

THUNDERING, *s.* स्फूर्जनं, गर्जनं, मेघगर्जनं. *See* THUNDER.

THUNDERING, *part.* गर्जन् -र्जन्ती -र्जत् (त्), स्फूर्जीवान् -वती -वत् (त्).

THUNDER-STORM, *s.* वज्रवर्षः, अशनिवर्षः, कुलिशवर्षः.

THUNDERSTRUCK, *a.* वज्राहतः -ता -तं, वज्रहतः &c., वज्रप्रहतः &c., वज्रताडितः -ता -तं, विद्युद्धतः &c. *See* ASTOUNDED.

THURSDAY, *s.* बृहस्पतिवारः, गुरुवारः, गुरुवासरः, लक्ष्मीवारः.

THUS, *adv.* (In this manner) एवं, इत्थं, अनेन प्रकारेण, एवम्प्रकारेण, उक्तेन प्रकारेण, उक्तप्रकारेण, अनया रीत्या, अनयथा, अतएव.—(So) तथा, तथाहि, इति, एतादृशं.—(Thus much) इयान् -यती -यत् (त्), एतावान् &c.

To THWART, *v. a.* खण्ड्, प्रतिहन्, प्रतिरुध्, *see To* FRUSTRATE, HINDER.

THWARTED, *p. p.* संरुद्धचेष्टः -ष्टा -ष्टं, प्रतिबद्धः &c. *See* FRUSTRATED.

THY, *pron.* तव gen. c. (युष्मत्), त्वदीयः -या -यं.

THYSELF, *pron.* स त्वं, आत्मा *m.* (न्). *See* MYSELF.

TIARA, *s.* मुकुटं, किरीटः, मौलिः *m. f.*, अवतंसः, ललाटपट्टं, चूडा.

TIBIA, *s.* जङ्घायाः पूर्वास्थि *n.* or अग्रास्थि *n.*

TICK, *s.* (Credit), *see* CREDIT.—(Louse) यूकः, लोमकीटः.

To TICK, *v. n.* (As a clock) कालमापकवत् किटकिटशब्दं कृ or घटघटशब्दं कृ, घटघट (nom. घटघटायते -ति).

TICKET, *s.* पत्रकं, पत्रं, सूचकपत्रं, निदर्शनपत्रं, अङ्कपत्रं.

To TICKET, *v. a.* अङ्कपत्रयुक्तं -क्तां कृ, अङ्कपत्रविशिष्टं -ष्टां कृ.

To TICKLE, *v. a.* कण्डू (nom. कण्डूयति), कण्डूयनं कृ, कण्डूयां कृ.

TICKLER, *s.* कण्डूयनकः, कण्डूतिकारी *m.* (न्), कण्डूयाकृत्.

TICKLISH, *a.* कण्डूयनासहनः -ना -नं, कण्डूयासहः -हा -हं, कण्डूयसहः &c.

TID-BIT, *s.* सुग्रासः, विशिष्टग्रासः, आहारविशेषः, भोजनविशेषः.

TIDE, *s.* वेला, स्रोतस् *n.*, प्रवाहः, रयः; 'of the sea,' समुद्रवेला; 'against the tide,' प्रतिस्रोतस्.

TIDINGS, *s.* वार्त्ता, सन्देशः, समाचारः. *See* NEWS, INTELLIGENCE.

TIDY, TIDINESS, TIDILY. *See* NEAT, NEATNESS, NEATLY.

To TIE, *v. a.* बन्ध् (c. 9. बध्नाति, बन्द्धुं), निबन्ध्, पिनह्; 'together,' सबन्ध्, योक्त्र् (nom. योक्त्रयति -यितुं), संयुज्, संश्लिष् in caus., सन्धा, संलग्नीकृ, संदृ, ग्रन्थ्, गुम्फ्, *see To* FASTEN, KNIT, &c.; 'with a fetter,' पाशीकृ, पाश (nom. पाशयति -यितुं); 'to tie up a young deer,' मृगपोतकं संयोजयितुं; 'to tie up in a bag,' वस्त्रखण्डं -ण्डां कृ.

TIE, *s.* (A fastening, knot) बन्धः -न्धनं -नी, ग्रन्थिः *m.*, बन्धनग्रन्थिः *m.*; 'of a yoke,' आबन्धः, योक्त्रं, योत्रं; 'of a letter or parcel,' तालिकः.—(A fetter) पाशः, बन्धनं.—(String) गुणः, दाम -मा, *see* STRING.—(Attachment, tie of affection, &c.) सङ्गः; 'free from ties,' निःसङ्गः -ङ्गा -ङ्गं, सङ्गवर्जितः -ता -तं, असञ्जितात्मा -त्मा -त्म (न्).

TIED, *p. p.* बद्धः -द्धा -द्धं, निबद्धः &c., सन्निबद्धः &c., निबन्धितः -ता -तं, आबद्धः &c., पिनद्धः -द्धा -द्धं, आनद्धः &c., दृब्धः &c., गुणवान् -वती &c.; 'together,' सबद्धः -द्धा -द्धं, आबद्धः &c., संयोजितः -ता -तं, संसक्तः -क्ता -क्तं, संलग्नीकृतः -ता -तं, सन्धानितः &c., सन्धितः &c., सन्दितः &c.; 'tied with a fetter,' पाशितः -ता -तं, पाशीकृतः &c.; 'tied up in,' निबद्धः -द्धा -द्धं; 'a quantity of money tied up in a bag,' वस्त्रबद्धो मुद्रासञ्चयः; 'a man with his arms tied behind him,' पश्चाद्बद्धबाहुः पुरुषः.

TIER, *s.* पंक्तिः *f.*, श्रेणिः -णी *f.*, राजिः -जी *f.* *See* Row, LINE.

TIGER, *s.* व्याघ्रः, शार्दूलः, द्वीपी *m.* (न्), विचित्राङ्गः, गुहाशयः, मृगारिः *m.*, मृगाद् *m.*, हिंसारुः *m.*, भयानकः; 'state of one,' व्याघ्रता; 'relating to one,' वैयाघ्रः &c.; 'its skin,' व्याघ्रचर्म्म *n.*

TIGHT, *a.* (Close, firm) दृढः -ढा -ढं, घनः -ना -नं, संहतः -ता -तं, अशिथिलः -ला -लं, गाढः -ढा -ढं, प्रगाढः &c.—(Tied tight) दृढबद्धः -द्धा -द्धं, सन्निबद्धः &c., दृढसन्धिः -न्धिः -न्धि.—(Tight-drawn) आततः -ता -तं, दृढः &c., *see* STRETCHED.—(Pinching) सङ्घाधकः -का -कं, सङ्घाधः -धा -धं, सङ्कोचकः &c.

To TIGHTEN, *v. a.* दृढीकृ, द्रढ (nom. द्रढयति -यितुं), दृढतरीकृ.

TIGHTLY, *adv.* दृढं, गाढं, प्रगाढं; 'tied tightly,' दृढबद्धः -द्धा -द्धं.

TIGHTNESS, *s.* दृढता, दार्ढ्यं, घनता, संहतत्वं, सङ्घाधता -धकता.

TIGRESS, *s.* व्याघ्री, शार्दूली, द्वीपिनी, विचित्राङ्गी.

TIGRINE, TIGRISH, *a.* वैयाघ्रः -घ्री -घ्रं, व्याघ्रोपमः -मा -मं.

TILE, *s.* पक्वेष्टका, पक्वेष्टिका, पक्वमृत्तिकाफलकः.

To TILE, *v. a.* पक्वेष्टकाभिर् आछद्, पक्वेष्टकाच्छादनं कृ.

TILL, *s.* (Money-box) मुद्राभाण्डं, मुद्रापात्रं, मुद्राधारः.

TILL, *prep.* or *adv.* यावत्, पर्य्यन्तं, अवधि, आ. The last is prefixed, and governs the abl. c.; 'till now,' अद्य यावत्, इदानीं यावत्, अद्यपर्य्यन्तं, एतत्कालपर्य्यन्तं, अद्यावधि, आवर्त्तमानकालात्; 'till then,' तदानीं यावत्, तत्कालं यावत्, तत्कालपर्य्यन्तं; 'till satisfied,' आतृप्तेः; 'till death,' आमृत्योः, आमरणात्; 'till the whole was mixed together,' आसर्व्वमिश्रणात्, सर्व्वमिश्रणपर्य्यन्तं; 'abide ye there till you have to go to another place,' स्थानान्तरगमनपर्य्यन्तं तत्र तिष्ठत; 'he kept him in prison till he should pay the debt,' यावद् ऋणं न परिशोधयति तावत् तं कारायां बद्धवान्.

To TILL, *v. a.* कृष् (c. 1. कर्षति, क्रष्टुं), कर्षणं कृ, कृषिं कृ, *see To* PLOUGH.

TILLAGE, TILLING. *s.* कृषिः *f.*, कृषिकर्म्म *n.* (न्), प्रमृतं. *See* PLOUGHING.

TILLED, *p. p* कृष्टः -ष्टा -ष्टं, कर्षितः -ता -तं. *See* PLOUGHED.

TILLER, *s.* कृषकः, कर्षकः, क्षेत्रकर्षकः, कृषीवलः, कृषिजीवी *m.*

TILT, *s.* (Kind of awning) वितानं -नकं, आच्छादनं, उल्लोचः.—(Tournament) अश्वारोहिणां क्रीडायुद्धं.

To TILT, *v. a.* (Incline) आवृज् (c. 10. -वर्जयति -यितुं).

To TILT, *v. n.* (Lean) नम्, अवनम्.—(Fight) क्रीडायुद्धं कृ.

TILTED, *p. p.* (Inclined) आवर्जितः -ता -तं.—(Covered) सवितानः -ना -नं.

TIMBER, *s.* दारु *m.* -रु *n.*, काष्ठं, दलिकः, विसारः; 'of a door,' नासा.

TIMBREL, *s.* मृदङ्गः, पटहः, पणवः. *See* TABOR, DRUM.

TIME, *s.* (In general) कालः, समयः, वेला, दिष्टः, अनेहाः *m.* (स्), हरिमा *m.* (न्), सर्व्वभूषकः, भसन्नः, अमसः, ग्रहकः; 'lapse of time,' कालगतिः *f.*, कालचक्रं, कालावृत्तिः *f.*, कालपर्य्यायः; 'in the course of time,' कालगत्या, काले गच्छति, दिनेषु गच्छत्सु, कालपर्य्यायेण; 'through the influence of time,' कालवशात्; 'measurement of time,' कालमानं, कालमापनं, कालसाधनं; 'spirit of the time,' कालधर्म्मः; 'to waste one's time,' कालं क्षिप्, कालक्षेपं कृ, *see To* SPEND; 'to make good use of one's time,' सत्कालक्षेपं कृ; 'without loss of time,' अकालक्षेपं -पेण; 'one whose time is come,' प्राप्तकालः.—(Space of time) कालः, समयः, अवधिः *m.*, कालमर्य्यादा, *see* SPACE; 'for a long time,' चिरं, चिरकालं, चिरात्, *see* LONG; 'for a short time,' किञ्चित्कालं, कियत्कालं, *see* SHORT; 'for the time being,' आपाततस्; 'at this time,' इदानीं, अधुना, एतर्हि, *see* Now; 'at that time,' तदानीं, तत्काले, *see* THEN; 'at a certain time,' एकदा; 'at any time,' यदा कदाचित्, कदापि; 'at times,' *see* SOMETIMES; 'at all times,' सर्व्वदा, सदा; 'at the same time,' युगपत्, एकपदे; 'for such a time,' तावत्कालं; 'former time,' पूर्व्वकालः; 'in former time,' *see* FORMERLY; 'past time,' गतकालः; 'specific time,' निमित्तकालः; 'during all time,' सर्व्वकालं; 'the three times, or present, past, and future,' त्रिकालं.—(Season) कालः, समयः, प्रसङ्गः; 'in time, out of time,' *see* SEASONABLY, UNSEASONABLY.—(Particular time, occasion) समयः, कालः, समयविशेषः, विशेषकालः, वारः, वारुः; 'according to the time,' समयानुसारेण; 'auspicious time,' सुवेला, शुभवेला; 'hard times,' आपत्कालः; 'dark times,' कलिकालः; 'from time to time,' वारं वारं, काले काले, अनुवेलं.—(A time, with reference to repetition) कृत्वस् or वारं in comp., गुण in comp., आवृत्ति in comp.; as, 'five times,' पञ्चकृत्वस्; 'three times,' त्रिवारं, वारत्रयं; 'a hundred times,' शतकृत्वस्, शतगुणं; 'for a thousand times,' सहस्रकृत्वस्, सहस्रावृत्तिं; 'often times,' बहुवारं; 'how many times?' कतिकृत्वस्; 'the repetition of texts is a hundred times better than sacrifices,' जपो यज्ञाद् दशगुणैर् विशिष्यते; 'the second number is contained in the first as many times as the fourth in the third,' द्वितीया संख्या प्रथमायां तावद्वारं वर्त्तते यावद्वारं चतुर्थी तृतीयायां; 'gold is nineteen times as heavy as water,' सुवर्णगुरुत्वं जलगुरुत्वमपेक्ष्य एकोनविंशतिगुणं.—(In music) तालः, लयः; 'beating time,' तालः, कुलङ्कः; 'quick time,' द्रुतं, ओघः; 'slow time,' विलम्बितं, विलम्बितवृत्तिः *f.*, तत्त्वं; 'mean time,' मध्यं, घनं; 'out of time,' वैतालिकः -की -कं.—(Measures of time), *see* under MEASURE.—(Time personified) कालः, उच्चदेवता.

To TIME, *v. a.* (Adapt to the time) कालयोग्यं -ग्यां कृ, कालोपयुक्तं -क्तां कृ, समयोपयुक्तं -क्तां कृ, कालानुरूपं कृ, कालसदृशं -शीं कृ.—(Regulate the time) कालं परिकॢप् or निर्णी.

TIMELY, *a.* कालिकः -की -कं, कालीनः &c. *See* SEASONABLE.

TIME-PIECE, *s.* कालमापनयन्त्रं, कालयन्त्रं. *See* CLOCK.

TIME-SERVER, *s.* कालानुवर्त्ती *m.* (न्), कालानुरोधी *m.*, समयानुरोधी *m.*

TIME-SERVING, *s.* कालानुवर्त्तनं, समयानुवर्त्तनं, कालानुरोधः.

TIMID, TIMOROUS, *a.* भीरुः -रुः -रु, भीरुहृदयः -या -यं, भयशीलः -ला -लं, हरिणहृदयः &c., कातरः -रा -रं, क्षुद्रः -द्रा -द्रं, दीनचेतनः -ना -नं, दीनः -ना -नं, असाहसिकः -की -कं, अप्रगल्भः -ल्भा -ल्भं, चकितः -ता -तं. *See* FEARFUL.

TIMIDITY, TIMOROUSNESS, *s.* भीरुता -त्वं, भयशीलता, कातरता, कातर्य्यं, सभयत्वं, चकितं, क्षुद्रता, दीनता, विक्लवता, सत्रासत्वं.

TIMIDLY, TIMOROUSLY, *adv.* सभयं, सत्रासं, सचकितं, सकातर्य्यं

TIN, *s.* त्रपु *n.*, त्रपुस् *n.*, त्रपुलं, वङ्गं, रङ्गं, पिच्चटं, स्वर्णेजं, नागं, कुरूप्यं, कस्तीरं, सुरेभं, वापूषं, तीरः, आलीनकं, कुटिलं, बार्ङ्गटीरं; 'calx of it,' वङ्गभस्म *n.* (न्); 'made of tin,' त्रापुषः -षी -षं, त्रपुमयः -यी -यं.

To TIN, *v. a.* त्रपुपत्रावृतं -तां कृ, वङ्गाच्छादितं -तां कृ, त्रपुलीकृ.

TINCTURE, *s.* (Slight admixture) ईषत्प्रक्षेपः, ईषत्संसर्गः, ईषत्सम्पर्कः, ईषत्सम्मिश्रणं.—(Infusion, extract) निर्यासः, निष्कर्षः.

To TINCTURE, *v. a.* ईषत् प्रक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), ईषत्प्रक्षेपं कृ, ईषत् सम्मिश्र् (c. 10. -मिश्रयति -यितुं), ईषत्सम्मिश्रणं कृ, ईषद्वाप्तं -प्तां कृ.

TINDER, *s.* शीघ्रदाह्यवस्तु *n.*, शीघ्रज्वलनीयवस्तु *n.*, शीघ्रदाह्यं.

TINGE, *s.* रागः, रङ्गः, ईषद्रागः, ईषद्रङ्गः, छाया.

To TINGE, *v. a.* रञ्ज् (c. 10. रञ्जयति -यितुं), अभिरञ्ज्, *see To* TINCTURE.

TINGED, *p. p.* रञ्जितः -ता -तं, अभिरञ्जितः &c., सरागः -गा -गं.

To TINGLE, *v. n.* तीक्ष्णवेदनोपहतत्वात् स्फुर् (c. 6. स्फुरति -रितुं), तोदवेदनोपहतत्वात् स्फुर् or ह्रष्, सशूलस्फुरणम् अनुभू or सूच्; 'a speech that makes the ears tingle,' श्रवणविदारणं वचः.

TINGLING, *s.* सशूलस्फुरणं, शूलसहितस्फुरणं, तीक्ष्णवेदनासहितस्फुरणं, तोदसहितस्फुरणं, हर्षः; 'of the feet,' पादहर्षः.

TINKER, *s.* जीर्णभाण्डसन्धाता *m.* (तृ), जीर्णपिठरसन्धानजीवी *m.* (न्).

To TINKLE, *v. n.* शिञ्ज्, विशिञ्ज्, क्वण् (c. 1. क्वणति -णितुं), विरु, क्वणक्वण (nom. क्वणक्वणायते), खणखण (nom. खणखणायते). *See To* JINGLE.

TINKLING, *s.* शिञ्जितं, क्वणितं. *See* JINGLE, JINGLING, CLINK.

TIN-MAN, *s.* त्रपुमयभाण्डकारकः, त्रपुमयभाण्डविक्रेता *m.* (तृ).

TINSEL, *s.* मिथ्याशोभनवस्तु *n.*, मिथ्याशोभायुक्तद्रव्यं, कुशोभनवस्तु.

TINSEL, *a.* मिथ्याशोभनः -ना -नं, मिथ्याशोभायुक्तः -क्ता -क्तं.

TINT, *s.* रागः, रङ्गः, छाया, ईषद्रागः, ईषद्रङ्गः, ईषद्वर्णः.

To TINT, TINTED, &c. *See To* TINGE, TINGED.

TINY, *a.* अतिक्षुद्रः -द्रा -द्रं, अत्यल्पः -ल्पा -ल्पं, सूक्ष्मः -क्ष्मा -क्ष्मं.

TIP, *s.* अग्रं, मुखं, अन्तः, अणिः *m.*, शिखरं, अग्रभागः; 'of the finger,' अङ्गुल्यग्रं, अङ्गुल्यग्रभागः, अङ्गुलिमुखं; 'on the tip of the fingers,' अङ्गुलीनाम् अग्रे; 'of the tongue,' जिह्वाग्रं; 'of the foot,' पादाग्रं, प्रपदं; 'of the hand,' हस्ताग्रं, अग्रपाणिः *m.*, हस्ताग्रभागः; 'of hair,' केशाग्रः, केशाग्रं; 'of the fingers as sacred to the gods,' दैवं; 'of an elephant's trunk,' पुष्करं, कर्णिका.

To TIP, *v. a.* (Strike ligthly), *see To* TAP.—(Cover the end) अग्राच्छादनं कृ, अग्रपिधानं कृ, अग्रावरणं कृ; 'with iron,' लोहाग्रं -ग्रां कृ. *See* TIPPED.

TIPPED, *p. p.* अग्र in comp., मुख in comp.; 'with iron,' लोहाग्रः -ग्रा -ग्रं, अयोग्रः &c., अयोमुखः -खा -खं.

TIPPET, *s.* ग्रीवाच्छादनं, ग्रीवापरिधानं, कण्ठाच्छादनं, कण्ठवस्त्रं.

To TIPPLE, *v. n.* वारं वारं मद्यपानं कृ, मुहुर्मुहुः सुरापानं कृ, नित्यपानं कृ, सदापानं कृ, नित्यशो मद्यपानं कृ, पानव्यसनं कृ.

TIPPLER, *s.* सुरापः, मद्यपः, नित्यपायी *m.* (न्). *See* DRUNKARD, SOT.

TIPPLING, *s.* सुरापानं, मद्यपानं, अतिशयमद्यपानं, नित्यपानं, पानव्यसनं, मधुधारः, मधुक्रमः, मद्यलं.

TIPSY, *a.* मद्यविह्वलः -ला -लं, मद्यवशः -शा -शं. *See* DRUNK.

TIPTOE, *s.* पादाग्रं, पदाग्रं, पादाङ्गुष्ठाग्रं, पादाङ्गुल्यग्रं, अग्रपादः, प्रपदं; 'on tip toe,' पादाग्रेण, पदाग्रेण, पादाङ्गुल्यग्रैः, प्रपदेन, पादाङ्गुष्ठास्थितावनिः -निः -नि.

TIPTOP, *s.* अग्र्यं, अग्रतमभागः, अग्रशिखरं, अग्रशिखा.

TIRADE, *s.* भर्त्सनवाक्प्रबन्धः, निन्दावाक्प्रबन्धः, उपालम्भवाक्यं.

TIRE, *s.* (Of a wheel) चक्रनेमिपरिगतो लोहवलयः.

To TIRE, TIRED. *See To* FATIGUE, FATIGUED, *To* BE FATIGUED.

TIRESOME, *a.* श्रमजनकः -का -कं, कष्टकरः -रा -रं. *See* WEARISOME.

TIRHUT, *s.* (The country) मिथिला, तीरभुक्तिः *f.*, निच्छविः *f.*

TIRING-ROOM, *s.* (In a theatre) नेपथ्यं, शाणी.

TISSUE, *s.* (Brocade), *see* BROCADE.—(Connected string) ग्रन्थः -न्थनं, प्रबन्धः, रचना, क्रमः, व्यूहनं, संव्यूहः, विधानं

TITAN, *s.* दानवः, दैत्यः, दितिजः, राक्षसः. *See* GIANT.

TITHE, *s.* दशमांशः, दशमभागः, दशमांशरूपो करः.

To TITILLATE, TILILLATION. *See To* TICKLE, &c.

TITLE, *s.* (Head) स्थानं, पदं, विषयः, अधिकरणं, मार्गः.—(Inscription in the beginning of a book, &c.) नामपत्रं -त्रकं, अभिधानपत्रं, मुखपत्रं, नामलेखः.—(Name, appellation) नाम *n.* (न्), संज्ञा, अभिधा, अभिधानं, उपाधिः *m.*, आख्या, ख्यातिः *f.*, पद्धतिः *f.*, उक्तिः *f.*, लक्षणं; 'title of honour,' ख्यातिः *f.*, कीर्तिः *f.*, उपपदं; 'one who by his prowess has acquired the title of hero,' स्वहस्तार्जितवीरख्यातिः *m.*, स्वहस्तार्जितवीरशब्दः.—(Right) अधिकारः -रित्वं, स्वत्वं, स्वाम्यं, आधिपत्यं; 'written title,' आगमः, आगमपत्रं, *see* TITLE-DEED; 'without it,' आगमरहितः -ता -तं.

TITLE-DEED, *s.* आगमः, कूटकीला, पट्टोलिका, पांशुकूलं.

TITLE-PAGE, *s.* मुखपत्रं, मुख्यपत्रं, नामपत्रं, अभिधापत्रं.

To TITTER, TITTER, TITTERING. *See To* GIGGLE, &c.

TITTLE, *s.* (Jot) लेशः, लवः, अणुः *m.*, *see* JOT, IOTA.

TITTLE-TATTLE, *s.* आलस्यवचनं, प्रलापः, जल्पः. *See* PRATING, *s.*

TITULAR, *a.* नामधारी -रिणी -रि (न्). *See* NOMINAL.

To, *prep.* Many of the meanings of 'to' are expressed by prepositions or affixes, or by the infin. mood, or are inherent in the inflections of the Sanskrit noun; thus, (Motion to or toward any place) expressed by the acc. case alone, or with प्रति &c. added; as, 'he went to the city,' नगरं or नगरं प्रति अगाम, or by the gen. c., with अन्तिकं &c.; as, 'he sent me to you,' मां तवान्तिकं or तव सकाशम् अप्रैषीत्.—(Motion to any state) by the acc. c.; as, 'he attains to fame,' ख्यातिं याति.—(Adaptation) by the dat. c. or crude form; as, 'that husband was not to her taste,' स पतिस् तस्याः अनोधाय नाभवत्; 'suited to royalty,' राजयोग्यः -ग्या -ग्यं, राजार्हः &c.; 'that is pleasing to me,' तत् मह्यं रोचते.—(Address, declaration, compellation) by the acc. c. or dat. c.; as, 'he addressed a speech to the king,' राजानं वचनम् अब्रवीत्; 'speak to me,' मां ब्रूहि; 'I will declare this to my pupils,' शिष्येभ्यः प्रवक्ष्यामि तत्; 'he made it known to the king,' तद् राज्ञे विज्ञापयति.—(Giving) by the dat., gen., or loc. c.; 'he gives sweetmeats to his son,' पुत्राय or पुत्रस्य मोदकान् ददाति.—(Up to, as far as, denoting extent, degree, &c.) आ prefixed to the abl. or acc. c., पर्य्यन्त or अन्त in comp.; as, 'to the ocean,' आसमुद्रात् or समुद्रपर्य्यन्तं; 'to the throat,' आकण्ठात्; 'to the knee,' आजानु; 'the numbers from one up to ten thousand,' एकाद्ययुतानसंख्याः.—(Possession, appertainment) by the gen. c.; as, 'money belongs to me,' मम धनं भवति.—(Purpose, intention, object) by the dat. c. or infin. mood, or by अर्थं &c. affixed; as, 'the

sat down to consult,' मन्त्रणाय or मन्त्रयितुं or मन्त्रणार्थम् उपविष्टः; 'the barber came to shave his master,' भट्टारकौरकरणाय नापित आगच्छत्; 'he came to make peace,' सन्धिं कर्तुम् आगच्छत्; 'give me something to eat,' आहारार्थं किञ्चिन् मम देहि.—(As a sign of the infinitive) expressed by the infinitive, or by यथा &c.; as, 'unable to move,' चलितुम् असमर्थः; 'I desire to hear,' श्रोतुम् इच्छामि; 'I did not expect to see you again,' न म आसीद् आशंसा यथा पुनरपि त्वां प्रेक्षिष्ये. There may be other ways of expressing 'to' in Sanskrit, as in the following examples: 'the peacock dances to the songs of the bees,' शिखी नृत्यति मधुकरगीतैः; 'he performed penance to the deity,' देवम् उद्दिश्य तपस् तेपे; 'the town was speedily reduced to ashes,' नगरी सहसा भस्मसात् अक्रियत; 'compared to that,' तदपेक्ष्य or तदपेक्षया; 'to the east of the village,' ग्राम् ग्रामात्; 'he goes to and fro,' गमनागमनं करोति, *see* FRO; 'to one's face,' प्रत्यक्षं -क्षतस्, समक्षं; 'to a man,' अशेषतस्, अशेषेण; 'I have a debt to pay,' मया ऋणं दातव्यं; 'ready to go,' गन्तुम् उद्यतः, गमनोन्मुखः; 'he causes her to enter the house,' तां गृहं प्रवेशयति.

TOAD, *s.* स्थूलमण्डूकः, स्थूलभेकः, वर्षाभूः *m.*

TOADSTOOL, *s.* गोमयच्छत्रं, विड्जं, विड्जच्छत्रं. *See* FUNGUS.

To TOAST, *v. a.* उपाग्नि धृत्वा शुष्कीकृ, अग्निशुष्कं -ष्कां कृ, अग्निना तप् (c. 10. तापयति -यितुं), भृज्, भर्ज्ज्. *See To* FRY, *v. a.*

TOAST, *s.* दग्धापूपः, दग्धपिष्टकः, अग्निशुष्कापूपः, भृष्टापूपः.

TOASTED, *p. p.* भृष्टः -ष्टा -ष्टं, भर्जितः -ता -तं, अग्निशुष्कः -ष्का -ष्कं.

TOBACCO, *s.* ताम्रकुटः -टकः, ताम्रकूटः, ताम्रपत्रिका.

TOBACCONIST, *s.* ताम्रकुटविक्रयी *m.* (न्), ताम्रकुटकव्यापारी *m.*

TOCSIN, *s.* आसन्नभयसूचकघण्टा, भयज्ञापकघण्टा.

TO-DAY, *s.* or *adv.* अद्य; 'of to-day,' अद्यतनः -नी -नं.

To TODDLE, *v. n.* बालकवत् स्खलन्नया क्रम् or चर्.

TODDY, *s.* (Of the palm) ताली, तालकी, ताडी -डिः *f.*—(Of the cocoa-nut) नारिकेलासवः, नारिकेरासवः.

TOE, *s.* पादाङ्गुली -लिः *f.*, पादाङ्गुरिः *f.*, पदाङ्गुली -लिः *f.*, पादशाखा, अङ्गुरिः *f.*; 'the great toe,' पादाङ्गुष्ठः; 'the little toe,' पादस्य कनिष्ठाङ्गुली; 'toe-nail,' पादनखः, चरणनखः.

TOGETHER, *adv.* (In company) सह in comp., सम्, सहितं, एक in comp., एकत्र; 'going together,' सहगामी -मिनी &c.; 'dancing together,' सहनर्त्तनं; 'drinking together,' सहपानं; 'eating together,' सहभोजनं, एकभोजनं, एकत्र भोजनं; 'fighting together,' सहयुध्वा *m.* (न्); 'all together, in a body,' सङ्घशस्, एकमेकं -क्षतस्, साकल्येन.—(Into union or junction) सम् prefixed; as, 'to bind together,' सम्बन्ध्; 'to meet together,' सङ्गम्, सम्मिल्; 'having the feet together,' सम्पदं; 'two letters placed together,' सन्निहितवर्णौ *m. du.*—(In the same place) एकत्र, एकस्थाने, एकदेशे.—(At the same time) एककाले, समकाले, युगपत्, सह in comp.; 'born at the same time,' एककालजः -जा -जं, समकालजः &c., सहजः &c.—(With one another) परस्परं, अन्योन्यं; 'quarelling together,' परस्परकलहः, अन्योन्यकलहः.—(Together with) सह, सम, साद्धं, सहितं, साकं, all with instr. c.; 'together with him,' तेन सह.

To TOIL, *v. n.* आयस्, श्रम्, क्लिश्. *See To* LABOUR, DRUDGE, FAG.

TOIL, *s.* आयासः, क्लेशः, श्रमः, कष्ट. *See* LABOR, DRUDGERY.

TOILET, *s.* (Act or mode of dressing) वस्त्रमाल्यादिविन्यासः, वस्त्रमाल्यादिरचना, अङ्गसंस्कारः, मण्डनं, नेपथ्यं, भूषणं; 'he makes his toilet,' नेपथ्यं धारयति, वस्त्रविन्यासं करोति; 'one who has finished her toilet,' अवसितमण्डना; 'toilet-table,' भूषणाधारः; 'cover,' भूषणाधाराच्छादनं.

TOILSOME, *a.* कष्टसाध्यः -ध्या -ध्यं, श्रमसाध्यः &c. *See* LABORIOUS.

TOKEN, *s.* लक्षणं, चिह्नं, अभिज्ञानं, सङ्केतः, *see* SIGN, MEMENTO.

TOLA, *s.* (Indian weight for gold and silver) तोलः-लं, तोलकः-कं.

TOLD, *p. p.* कथितः -ता -तं, आख्यातः &c., समाख्यातः &c., उक्तः -क्ता -क्तं, भणितः -ता -तं, आवेदितः &c., निवेदितः &c., ज्ञापितः -ता -तं, ज्ञपितः &c., ख्यापितः &c., ज्ञप्तः -प्ता -प्तं, सन्दिष्टः -ष्टा -ष्टं.

TOLERABLE, *a.* (Bearable) सहनीयः -या -यं, सह्यः -ह्या -ह्यं, सोढव्य -व्या -व्यं.—(Moderately good) विगुणः -णा -णं, मध्यमगुणः -ण -णं, मध्यमः -मा -मं.

TOLERABLY, *adv.* विगुणं, यावत्तावत्, कल्प or देशीय or देश्य in comp.; 'tolerably clever,' पटुकल्पः -ल्पा -ल्पं, पटुदेशीयः &c.

TOLERANCE, *s.* सहनं, सहिष्णुता, क्षमा. *See* TOLERATION.

TOLERANT, *a.* सहनः -ना -नं, सहिष्णुः -ष्णुः -ष्णु, अनिषेधकारी -रिणी -रि (न्), अप्रतिबन्धकारी &c. *See* PATIENT, INDULGENT.

To TOLERATE, *v. a.* सह्, विषह्, क्षम्, मृष्, तिज् in des., उपेक्ष्, अनिषेधं कृ, अप्रतिबन्धं कृ, अनिवारणं कृ. *See To* SUFFER, PERMIT.

TOLERATED, *p. p.* अनिषिद्धः -द्धा -द्धं, अनिवारितः -ता -तं, उपेक्षितः &c.

TOLERATION, *s.* क्षमा, क्षान्तिः *f.*, तितिक्षा, सहिष्णुता, अनिषेधः, अनिवारणं, अप्रतिबन्धः, उपेक्षा, अप्रतिरोधः, अनिरोधः.

TOLL, *s.* शुल्कः -ल्कं, तारिकं, तार्यं, घट्टादिदेयं, करः. *See* TAX.

To TOLL, *v. a.* (A bell) शनैः शनैः or वारं वारं घण्टां वद् in caus.

To TOLL, *v. n.* (As a bell) शनैः शनैः or वारं वारं क्वणितं कृ.

TOLL-BOOTH, TOLL-HOUSE, *s.* शुल्कस्थानं, शुल्कग्रहणस्थानं.

TOLL-GATHERER, *s.* शौल्किकः, शुल्कग्राही *m.* (न्), करग्राही *m*

TOMATO, *s.* हिण्डीरः, हिङ्गुली, वङ्गनः. *See* EGG-PLANT.

TOMB, *s.* समाधिः *m.*, श्मशानं, स्तूपः, प्रेतकुड्यं. *See* GRAVE.

TOMB-STONE, *s.* चित्यं, चैत्यं, चिताचूडकं. *See* GRAVE-STONE.

TO-MORROW, *s.* or *adv.* श्वस्, परेद्युस्, परदिनं, *see* MORROW; 'day after,' परश्वस्; 'belonging to to-morrow,' श्वस्तनः -नी -नं, श्वस्त्यः &c.,

TOM-TOM, *s.* मृदङ्गः, पटहः, दुन्दुभिः *m.*, डिण्डिमः. *See* DRUM.

TON, *s.* सभ्याचारः, सभ्यरीतिः *f.*, सभ्यसम्प्रदायः, शिष्टाचारः.

TONE, *s.* (Sound, note) स्वरः, नादः, ध्वनिः *m.*, विरावः, विरिञ्चः, *see* SOUND; 'having a good tone,' सुस्वरः -रा -रं.—(Musical sound) स्वरः, क्वाणः, क्वाणः, क्वणनं, निक्वाणः, निक्वाणः; 'of a lute,' प्रक्वाणः, प्रक्वाणः.—(Seventh part of a scale) मूर्च्छनं -ना; 'half tone,' स्वरांशः; 'quarter tone,' श्रुतिः *f.*—(In medicine) सुश्रावना, सश्रावना, सश्रावः, तेजस् *n.*, अग्निः *m.*

TONGS, *s. pl.* सन्दंशः, सन्दंशकं -का, कङ्कमुखः.

TONGUE, *s.* जिह्वा, रसना, रसज्ञा, रशना, रसिका, रसाला, रसनं, ललना, लोला, जिह्वः, विश्वासा, मुखचीरी; 'root of the tongue,' जिह्वामूलं; 'tip of it,' जिह्वाग्रं; 'that is on the tip of it,' जिह्वारूढः -ढा -ढं; 'hold your tongue,' वाचं नियच्छ, तूष्णीम्भव: 'tongue-scraper,' *see* SCRAPER; 'one of the seven tongues of fire,' स्फुलिङ्गिनी; 'tongue of a bell,' लोला; of a bolt,'

कण्टकः.—(Speech) भाषा; 'mother-tongue,' जन्मभाषा.

Tongue-less, *a.* अजिह्वः -ह्वा -ह्वं, जिह्वाहीनः -ना -नं, निर्जिह्वः &c.

Tongue-tied, *a.* बद्धजिह्वः -ह्वा -ह्वं, संपन्नितजिह्वः &c., यतजिह्वः &c.

Tonic, *a.* रूचकः -का -कं, रोचकः &c., तेजस्करः -रा -रं, दीपकः &c., अग्निवर्धकः &c., अग्निदः -दा -दं, पाचकः -का -कं, दीपनः -ना -नं.

Tonic, *s.* रूचकं, रोचकः, अग्निवर्धनः -नं, पाचकं, दीपनं.

To-night, *adv.* अद्य रात्रौ, अद्य निशि, अद्य नक्तं.

Tonsil, *s.* कण्ठान्तर्वर्त्ती श्लेष्माद्याश्रयो मृदुमांसपिण्डः; 'enlargement of them,' अधिमांसकः, शतघ्नी, गण्डमाला.

Tonsure, *s.* (Shaving the head) क्षौरं, क्षौरकर्म्म *n.* (न्), केशवपनं, शिरोवपनं, मुण्डनं, शिरोमुण्डनं, केशच्छेदः.—(As a sacred rite) चूडाकर्म्म *n.* (न्), चूडाकरणं, चूडा, चौडं, चौलं, चौलकर्म्म *n.*, चूडालक्षणं.

Too, *adv.* (Over much) अति or सु prefixed, अतीव, अत्यन्तं, एकान्ततस्, एकान्त in comp., *see* Excessively; 'too great a load,' अतिभारः; 'he approaches too near the fire,' अग्नेर् अतिसमीपम् उपसर्पति; 'too compassionate,' अतिकरुणः -णा -णं, एकान्तकरुणः &c.; 'too early,' अतिप्रगे, अतिकल्यं; 'too late in the evening,' अतिसायं -ये; 'too long,' सुदीर्घः -र्घा -र्घं.—(Also) चैव, च, अपि, तथा.

Tool, *s.* उपकरणं, यन्त्रं, साधनं, शस्त्रं, *see* Instrument; 'a mere tool,' निमित्तमात्रं, कारणमात्रं, उपकरणमात्रं.

Tooth, *s.* दन्तः, दशनः -नं, रदः, रदनः, दंशः, दंष्ट्रा, खादनः, दाढा, द्विजः, द्विजन्मा *m.* (न्), मुखजः, छद्वरः, दन्दशः, जम्भः, हालुः *m.*, क्रूरः *m.*, वक्त्रजुरः, रूचकः, मल्लकः, फटः; 'a row of teeth,' दन्तपंक्तिः *f.*, दन्तावली, *see* Teeth; 'two middle fore teeth,' राजदन्तौ *m. du.*; 'double tooth,' माटिः *f.*; 'decay of a tooth,' द्विजव्रणः.—(Of a saw, comb, wheel, &c.) दन्तः.

Tooth-ache, *s.* दन्तवेदना, दन्तव्यथा, दन्तशूलः, दालनं.

Tooth-brush, *s.* दन्तधावनं, दन्तकाष्ठं, कूर्चकं.

Toothed, *a.* दन्ती -न्तिनी -न्ति (न्), रदी &c., दन्तजातः -ता -तं, दन्त or दन् &c. in comp.; as, 'handsome-toothed,' सुदन् -दती -दत् (त्); 'iron-toothed,' अयोदन्तः -न्ता -न्तं, अयोदन् &c.

Toothless, *a.* अदन्तः -न्ता -न्तं, निर्दन्तः &c., दन्तहीनः -ना -नं, निर्दशनः -ना -नं, गतदन्तः -न्ता -न्तं, गलितदन्तः &c., नीरदः -दा -दं, अदंष्ट्री -ष्ट्रिणी -ष्ट्रि (न्), भग्नदंष्ट्रः -ष्ट्रा -ष्ट्रं, उद्धृतदंष्ट्रः &c., दशनोच्छिष्टः -ष्टा -ष्टं.

Tooth-pick, *s.* दन्तशोधनी, शलाका, दन्तनिर्घर्षणकः.

Tooth-powder, *s* दन्तपवनं, दन्तशाणं, निष्पेषणं. *See* Dentifrice.

Top, *s.* (Highest part, upper end) अग्रं, शिखा, शिखरं, अग्रभागः, पृष्ठं, शृङ्गं, चूडा, शिरस् *n.*, उपरिभागः, शीर्षकं, मस्तकं, तुङ्गः, नीचकी *m.* (न्); 'of a tree,' वृक्षाग्रं, वृक्षशिरस् *n.*; 'fallen from the top of a tree,' वृक्षाग्रात् पतितः; 'of a palace or house,' प्रासादपृष्ठं, गृहपृष्ठं; 'of a mountain,' गिरिशृङ्गं, गिरिपृष्ठं, प्राग्भारः.—(Lid) पिधानं.—(Highest or chief place) मुख्यस्थानं.—(Spinning top) भमरं, भमरक्रीडनकं.

Top, *a.* (in comp.) उपरिस्थः -स्था -स्थं, अग्रस्थः -स्था -स्थं.

Topaz, *s.* पीताश्मा *m.* (न्), पीतस्फटिकः, पीतमणिः *m.*, पीतसारः, पीतरत्नं, पीतः, पुष्परागः, पद्मरागः, गुरुरत्नं.

Tope, *s.* (Mound of earth) स्तूपः.

Top-heavy, *a.* भाराधिकशिरस्कः -स्का -स्कं, अग्रीगुरुः -रुः -रु.

Topic, *s.* विषयः, प्रकरणं, प्रसङ्गः, प्रसक्तिः *f.*, वृत्तान्तः, पदं. *See* Subject.

Topic, topical, *a.* प्राप्तरणिकः -की -कं, विशेषस्थानिकः -की -कं.

Top-knot, *s.* चूडा, शिखा, शिखण्डः -ण्डकः, शिखरः -रं, शेखरः.

Topmost, *a.* सर्व्वोपरिस्थः -स्था -स्थं, सर्व्वाग्रस्थः &c., अग्रतमः -मा -मं.

Topography, *s.* विशेषस्थानवर्णनं, विशेषस्थलविवरणं, स्थानवर्णनं.

To topple, *v. n.* अग्रीगुरुत्वाद् अग्रतः पत् (c. 1. पतति -तितुं).

Topsy-turvy, *a.* or *adv.* अधरोत्तरः -रा -रं, अग्रीधरः -रा -रं.

Torch, *s.* उल्का, ज्वलनकाष्ठं, अग्निकाष्ठं, उल्मुकं, अङ्गारं, अलातं, अग्निकुक्कुटः, कण्डनीलकः.

Torch-bearer, *s.* उल्काधारी *m.* (न्), उल्कावाही *m.* -वाहकः.

To torment, *v. a.* अत्यन्तं पीड् (c. 10. पीडयति -यितुं) or तप् (c. 10. तापयति -यितुं) or सन्तप् or परितप्, यत् (c. 10. यातयति -यितुं), अतीव व्यथ् (c. 10. व्यथयति -यितुं), अतिशयेन बाध् (c. 1. बाधते -धितुं) or क्लिश्, अतियातनां कृ or दा, अतिवेदनां कृ or दा, तीव्रवेदनां कृ or दा, अतिव्यथां कृ or दा, परमदुःखं कृ, विडम्ब् (c. 10. -डम्बयति -यितुं). *See To* harass, vex, annoy.

Torment, *s.* (Extreme pain) यातना, अतियातना, अतिवेदना, अतिव्यथा, अतिदुःखं, अतिपीडा, तीव्रवेदना, तिग्मवेदना, तिग्मयातना, अतिक्लेशः, परमदुःखं, दारुणदुःखं, दारुणयातना, यमयातना, तापः, परितापः, यन्त्रणं -णा, विडम्बनं -ना, क्लेशः, दुःखं.—(That which gives annoyance) कण्टकः.

Tormented, *p. p.* अतिपीडितः -ता -तं, अतिव्यथितः &c., अतिबाधितः &c., विडम्बितः -ता -तं, कर्षितः -ता -तं, तुन्नः -न्ना -न्नं, दुःखदग्धः -ग्धा -ग्धं.

Tormenting, tormenter, *a.* and *s.* अतिपीडकः -का -कं, अतिपीडाजनकः &c., अतिक्लेशकरः -री -रं, अतिदुःखकरः &c., अरुन्तुदः -दा -दं, प्रमाथी -थिनी &c., आयासकारी &c., परिक्लेष्टा -ष्ट्री -ष्टृ (ष्टृ).

Torn, *p. p.* विदारितः -ता -तं, विदीर्णः -र्णा -र्णं, दारितः -ता -तं, प्रविदारितः &c., दीर्णः -र्णा -र्णं, दलितः -ता -तं, विदलितः &c., पाटितः -ता -तं, भिन्नः -न्ना -न्नं; 'with the nails,' नखभिन्नः -न्ना -न्नं; 'being torn,' विदीर्य्यमाणः -णा -णं; 'having torn,' विदार्य्य; 'is torn,' विदीर्य्यते.

Tornado, *s.* घूर्णवातः, घूर्णवायुः *m.*, प्रभञ्जनः. *See* Tempest.

Torpid, *a.* जडः -डा -डं, विचेतनः -ना -नं, सुप्तः &c., *see* Numb.

Torpor, torpidity, *s.* जडता, जाड्यं, जडिमा *m.* (न्), चैतन्यस्तम्भः, चैतन्यनाशः, सुप्तिः *f.*, स्वापः, मान्द्यं, कुण्ठता, तन्द्रा. *See* Numbness.

Torrent, *s.* निर्झरः -री, झरः, जलप्रवाहः, जलप्रपातः, जलधारा, स्रोधः, जलौघः, प्रस्रवणं, स्रोतस् *n.*, स्रा; 'of rain,' वृष्टिधारा, धारासारः, धारासम्पातः, तरन्तः; 'a mountain torrent,' गिरिनदी, गिरिसरित्.

Torrid, *a.* उष्णदग्धः -ग्धा -ग्धं, ग्रीष्मदग्धः &c.; 'zone,' उष्णकटिबन्धः.

Tortoise, *s.* कूर्म्मः, कच्छपः, कमठः, कामठः, गूढाङ्गः, पञ्चाङ्गगुप्तः, पञ्चगुप्तः, कठिनपृष्ठं, चतुर्गतिः *m.*, क्रोडपादः, उन्नटः, स्मरणापत्यतर्पकः; 'female,' कूर्म्मी, कच्छपी, कमठी, दुलिः -ली *f.*, दुलिः *f.*; 'relating to a tortoise,' कौर्म्मः -र्म्मी -र्म्मं, कामठः -ठी -ठं.

Tortoise-shell, *s.* कूर्म्मकवचः -चं, कूर्म्मकक्षुः -क्षु *m. n.*, कूर्म्मपृष्ठं, कौर्म्मं.

Tortuosity, *s.* वक्रता, वक्रिमा *m.* (न्), कुटिलत्वं, जिह्मता, तिर्य्यक्त्वं.

Tortuous, *a.* वक्रः -क्रा -क्रं, कुटिलः -ला -लं, तिर्य्यङ् -र्य्ग्वी -र्य्यक् (च्); 'moving tortuously,' तिर्य्यग्गामी -मिनी &c., कुटिलगामी &c., दन्द्रम्यः -म्या -म्यं; 'movement,' वक्रिमा -मणं, दन्द्रमं -मणं.

To torture, *v. a.* यत् (c. 10. यातयति -यितुं), दारुणयन्त्रेण व्यथ् or प्रमथ् (c. 10. -माथयति -थितुं), यातनां कृ, अत्यन्तं पीड् &c. *See To* torment.

Torture, *s.* यातना, अतिव्यथा, व्यथा, प्रमाथः, व्याधिः *m.*, अतिव्याधिः *m.*,

तिग्मव्यथा, तिग्मवेदना, सम्पीडः, उद्वेजनं. *See* TORMENT.

TORTURED, *p. p.* व्यथितः -ता -तं, सन्तप्तः -प्ता -प्तं, प्रमथितः -ता -तं.

TORTURER, *s.* यातनाकारी *m.* (न्), यातनकृत् *m.*, व्यथाकरः, प्रमाथी *m.* (न्), उद्वेजनकरः, सन्तापकः, परिक्लेष्टा *m.* (ष्टृ). *See* TORMENTING.

To TOSS, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), विक्षिप्, उत्क्षिप्, समुत्क्षिप्, क्षुभ् (c. 10. क्षोभयति -यितुं), विक्षुभ्, संक्षुभ्, उद्धू (c. 5. -धूनोति -धोतुं), विधू.

To TOSS, *v. n.* विक्षिप् in pass. (-क्षिप्यते), इतस्ततो विक्षिप् or विचल् (c. 1. -चलति -लितुं) or प्रचल्, इतस्ततो लुड् (c. 6. लुठति -ठितुं) or प्रलुड् or लुल्, घूर्ण् (c. 1. घूर्णति -ते -र्णितुं), विघूर्ण्, व्याघूर्ण्, परिघूर्ण्, उद्धू in pass. (-धूयते), विधू, इतस्ततः भ्रु (c. 1. भ्रवते, भ्रोतुं).

TOSS, *s.* क्षेपः -पणं. उत्क्षेपः -पणं, समुत्क्षेपः, क्षोभः, व्याक्षोभः.

TOSSED, *p. p.* क्षिप्तः -प्ता -प्तं, उत्क्षिप्तः &c., क्षुभ्रः -भ्रा -भ्रं, संक्षुभ्रः &c., उद्धूतः -ता -तं, विधूतः &c., व्यस्तः -स्ता -स्तं, प्रलोठितः -ता -तं, उद्भ्रान्तः -न्ता -न्तं, विक्षिप्तः &c., विकीर्य्यमाणः -णा -णं, कात्यमानः &c.

TOSSING, *s.* क्षेपणं, उत्क्षेपणं, हलनं. *See* ROLLING, *s.* and *part.*

TOTAL, *a.* सम्पूर्णः -र्णा -र्णं, पूर्णः &c., समग्रः -ग्रा -ग्रं, आत्यन्तिकः -की -कं, *see* ENTIRE, COMPLETE; 'total rout,' सुपलायितं.

TOTAL, TOTALITY, *s.* साकल्यं, समुदायः, समष्टिः *f.*, समासः, सामग्र्यं, रेकं, पारायणं, कात्स्न्यं, समाम्नायः. *See* WHOLE, *s.*

TOTALLY, *adv.* सर्व्वतस्, सर्व्वांशस्, सम्यक्, साकल्येन. *See* ENTIRELY.

To TOTTER, *v. n.* स्खल् (c. 1. स्खलति -लितुं), प्रस्खल्, विचल् (c. 1. -चलति -लितुं), संचल्, चल्, विह्वल् (c. 1. -ह्वलति -लितुं), प्रह्वल्, ह्वल्.

TOTTERING, *part.* स्खलितः -ता -तं, विचलन् -लन्ती -लत् (त्), स्खलितगतिः -तिः -ति, विह्वलगतिः &c., स्खलद्गतिः &c., चलविचलः -ला -लं.

To TOUCH, *v. a.* स्पृश् (c. 6. स्पृशति, स्प्रष्टुं), संस्पृश्, परिस्पृश्, हस्तेन परामृश् or आलभ्, स्पर्शं कृ. *See To* HANDLE, MOVE.

WEIGHT, *s.* (Weight or quantity ascertained by balance) भारः, भारपरिमाणं, उन्मानं, मितिः *f.*, परिमाणं, भारंमितिः *f.*, तोलः, तुला, गुरुत्वं -ता, गौरवं, गरिमा *m.* (न्), भरः; 'of deficient weight,' न्यूनतोलः -ला -लं.—(Mass to weigh with) तोलं, उन्मानं. For the different weights, *see* under MEASURE; 'measure by weight,' तुलामानं.—(Ponderous load, burden) भारः, धुरा, धूः *f.* (धुर्), *see* BURDEN.—(Importance, influence) गौरवं, गुरुत्वं -ता, प्रभावः, भारः, प्रमाणं; 'of little weight,' अल्पप्रभावः -वा -वं, अल्पप्रमाणः -णा -णं, लघुप्रभावः &c.

WEIGHTY, *a.* (Having weight) भारी -रिणी -रि (न्), गुरुः -वी -रु, *see* HEAVY, PONDEROUS.—(Important, influential) गुरुः &c., सप्रमाणः -णा -णं, *see* IMPORTANT.

WEIR, *s.* जलप्रवाहबन्धकः, जलबन्धकः, जलप्रतिबन्धकः.

WELCOME, *s.* स्वागतं, अभिनन्दनं, आनन्दनं, सभाजनं, स्वभाजनं, आमन्त्रणं, आप्रच्छनं; 'word of welcome,' स्वागतवचनं, *see* SALUTATION; 'of a guest,' आगतस्वागतं.

WELCOME, *a.* स्वागतः -ता -तं.—(Grateful) सुखदः -दा -दं.

To WELCOME, *v. a.* स्वागतम् इति वद् (c. 1. वदति -दितुं), स्वागतवचनेन पूज् (c. 10. पूजयति -यितुं), स्वस्ति or स्वस्तिवचनं वद्, आमन्त्र् (c. 10. -मन्त्रयति -यितुं), प्रशंस् (c. 1. -शंसति -सितं); 'a new-comer,' आगतस्वागतं कृ, आगतसत्कारं कृ.

WELCOMED, *p. p.* स्वागतपूजितः -ता -तं, सत्कृतः &c., समुपवेशितः &c.

To WELD, *v. a.* अयोघनाघातेन तप्तलोहं तप्तलोहेन संयुज्.

WELFARE, *s.* कुशलं, कौशलं, कौशल्यं, कुशलता, कल्याणं, क्षेमं, क्षेमकुशलं, मङ्गलं, माङ्गल्यं, सुखं, शुभं, भद्रं, हितं, श्रेयस् *n.*, श्रःश्रेयसं, भूतिः *f.*, सुस्थितिः *f.*, स्थितिः *f.*, अभीष्टं, अभीप्सितं, भविकं, भावुकं, भव्यं, शिवं.

WELL, *a.* (In health) स्वस्थः -स्था -स्थं, सुस्थः &c., निरामयः -या -यं, नीरोगः -गा -गं, *see* HEALTHY.—(Fortunate, happy) कुशलः -ला -लं, क्षेमः -मा -मं, हितः -ता -तं, सुखी -खिनी -खि (न्); 'Is it well?' किं क्षेमम् अस्ति.

WELL, *s.* (For water) कूपः, कूपकः, प्रहिः *m.*, अन्धुः *m.*, जलकूपी, कूपी, निपानं, उदपानं, उदकाधारः, जलाधारः, जलात्मिका, आपीनः, चृडकः, कोट्टारः; 'wooden frame or upper part of a well,' नेमिः *f.*, त्रिका; 'cover or facing,' वीनाहः; 'reservoir near a well,' आहावः, निपानं, उपकूपजलाशयः; 'well-water,' कूपोदकं, कौपं; 'well-digger,' कूपखनिता *m.* (तृ).—(Of a ship) गुम्फिः *f.*

WELL, *adv.* सु or अति prefixed, सुष्ठु, साधु, सम्यक्, युक्तं, यथायोग्यं, भद्रं, उत्तमरूपेण; 'well off,' सुस्थितः -ता -तं, सुस्थः -स्था -स्थं; 'well said,' स्वभिहितः -ता -तं, सूक्तः -क्ता -क्तं, साध्वभिहितः -ता -तं, साधूक्तः &c., भद्रमुक्तः &c.

WELL, *exclam.* भद्रं, वाढं, साधु, अस्तु, भवतु, तथेति; 'very well,' वाढं, कामं; 'well then,' तद्भद्रं; 'well done!' साधु.

WELL-AFFECTED, *a.* सुरक्तः -क्ता -क्तं, हितबुद्धिः -द्धिः -द्धि, सुशीलः &c.

WELL-BALANCED, *a.* समतोलः -ला -लं, समानतोलः -ला -लं.

WELL-BEHAVED, *a.* विनीतः -ता -तं, साधुवृत्तिः -त्तिः -त्ति, साध्वाचारः -रा -रं, सुचरितः -ता -तं, सदाचारः &c., सुनीतः -ता -तं.

WELL-BEING, *s.* कुशलं, क्षेमं, सुस्थता, सुस्थितिः *f.* *See* WELFARE.

WELL-BORN, *a.* कुलीनः -ना -नं, सत्कुलीनः &c., सुजन्मा -न्मा -न्म (न्), सुजातः -ता -तं, अभिजातः &c., साधुजः &c. *See* NOBLE.

WELL-BRED, *a.* सुविनीतः -ता -तं, सुशिष्टः -ष्टा -ष्टं, सुशीलः -ला -लं.

WELL-DISPOSED, *a.* हितबुद्धिः -द्धिः -द्धि, सुशीलः &c. *See* WELL-WISHER.

WELL-DOER, *s.* सुकर्मा *m.* (न्), सुकृती *m.* (न्). *See* VIRTUOUS.

WELL-DONE, *a.* सुकृतः -ता -तं, सुचरितः &c. *Exclam.* साधु.

WELL-DRESSED, *a.* सुवेशः -शा -शं, सुवेषी -षिणी &c., सुवेष्टितः -ता -तं

WELL-FORMED, *a.* सुरूपः -पी -पं, सुरूपी -पिणी &c., शुद्धाकारः -रा -रं.

WELL-INFORMED, *a.* बहुज्ञः -ज्ञा -ज्ञं, सुज्ञः &c., बहुश्रुतः -ता -तं.

WELL-KNIT, *a.* सुसंहतः -ता -तं, दृढसन्धिः -न्धिः -न्धि.

WELL-KNOWN, *a.* सुज्ञातः -ता -तं, प्रसिद्धः -द्धा -द्धं. *See* NOTORIOUS.

WELL-MADE, *a.* सुरूपः -पा -पं, सुरूपी -पिणी &c., सुघटितः -ता -तं.

WELL-MEANING, *a.* सदभिप्रायः -या -यं, सदाशयः &c., सुशीलः &c.

WELL-NIGH, *adv.* प्रायस्, प्रायशस्. *See* NEARLY.

WELL-READ, *a.* स्वधीतः -ता -तं, स्वधीती -तिनी -ति (न्), अधीती &c., सर्वशास्त्रपारगः -गा -गं, ग्रन्थी -न्थिनी &c., बहुज्ञः &c.

WELL-SPENT, *a.* सुव्ययितः -ता -तं; 'time,' सत्कालक्षेपः.

WELL-WISHER, *s.* हितैषी -षिणी *m. f.*, प्रियैषी -षिणी *m. f.*, हितेप्सुः *m. f.*, हितप्रेप्सुः *m. f.*, श्रेयोर्थी -र्थिनी, हितकामः -मा.

To WELTER, *v. n.* लुठ् (c. 6. लुठति -ठितुं), प्रलुठ्. *See To* WALLOW.

WELTERING, *part.* लुठन् -ठन्ती -ठत् (त्). *See* ROLLING, *part.*

WEN, *s.* मांसवृद्धिः *f.*, मेदोबुर्दं, गलगण्डः. *See* TUMOUR.

WENCH, *s.* जोषा, योषिता, तरुणी, कन्या, बन्धकी, गणिका.

To WENCH, WENCHING. *See To* FORNICATE, FORNICATION.

To WEND, *v. n.* गम्, या, इ, सृ, आवृत्, अभिवृत्, *see To* GO; 'hither he wends his way,' इत एवाभिवर्त्तते.

WEST, *s.* (The quarter of the sky) पश्चिमा, पश्चिमदिशा, पश्चिमदिक् *f.* (श्), पश्चिमाशा, प्रतीची, अपरा, चरमा, वारुणी, मध्यः -ध्यं. The god Varuna is fabled as the Regent of the West.

WEST, WESTERLY, WESTERN, *a.* पश्चिमः -मा -मं, प्रत्यङ् -ञ्चती -ञ्चि (च्), प्रतीच्यः -च्या -च्यं, प्रतीचीनः -ना -नं, चरमः -मा -मं, अपरः -रा -रं, पाश्चात्यः -त्या -त्यं. 'Madyadesha is west of Prayága,' मध्यदेशः प्रयागात् पश्चिमः; 'as far as the western ocean,' आपश्चिमसमुद्रात्.—(Facing the west) प्रत्यङ्मुखः -खी -खं, पश्चिमाभिमुखः &c.

WESTWARD, *adv.* पश्चात्, प्रत्यक्, पश्चिमदिशि, पश्चिमतस्.

WET, *a.* आर्द्रः -र्द्रा -र्द्रं, जलार्द्रः &c., क्लिन्नः -न्ना -न्नं, सिक्तः -क्ता -क्तं, जलसिक्तः &c., समुक्षितः -ता -तं, अनूपः -पा -पं. *See* MOIST.

WET, *s.* आर्द्रता, क्लेदः -दं, तेमः, स्तेमः, जलं. *See* MOISTURE.

To WET, *v. a.* क्लिद् (c. 10. क्लेदयति -यितुं). *See To* MOISTEN.

WETHER, *s.* छिन्नवृषणो मेषः, मुष्कशून्यो मेषः.
WETNESS, *s.* आर्द्रता, क्लिन्नता, जलार्द्रता, सिक्तता -त्वं.
WET-NURSE, *s.* धात्रेयी, उपमाता, उपमात्री, पयःप्रसविणी, स्तन्यदानेन पोषयित्री or पालयित्री.
To WHACK, WHACK. *See To* STRIKE, BEAT, BLOW.
WHALE, *s.* तिमिः *m.*, तिमिङ्गिलः, तिमिङ्गिलगिलः, मीनरः, समुद्रारुः *m.*, मकरः, राघवः, वृहन्मीनः.
WHARF, *s.* घट्टः, उमः, तरस्थानं, तरणस्थानं, गुल्मः.
WHAT, *pron. rel.* (That which) यद्.—(What kind, what like, which) यादृशः -शी -शं, यादृक्षः -क्षा -क्षं, यः या यद्.
WHAT, *pron. inter.* कः का किं, कौ *m. du.*, के *f. n. du.*, के *m. pl.*, काः *f. pl.*, कानि *n. pl.*; 'what?' किं, किन्नु, किमुत, किंस्वित्; 'what kind?' कीदृशः -शी -शं, कीदृक्षः -क्षा -क्षं, कीदृक् *m. f. n.* (श्), किम्भूतः -ता -तं; 'on what account?' किमर्थं; 'what then?' किं तर्हि, किमु; 'what else?' अथ किं; 'what do you wish to say?' किम् असि वक्तुकामः; 'what is he doing?' किंव्यापारः सः; 'what is his name?' किन्नामधेयः सः; 'to what degree?' किम्पर्य्यन्तं; 'what is that to me?' किं मम तेन; 'what though?' यद्यपि.
WHAT, *interj.* कथं, किं, किमुत, उत, उत्, ननु, स्वित्.
WHATEVER, WHATSOEVER, *pron.* यत्किञ्चित्, यद्यद्, यद्, यावत्; 'whatever wealth is in the world,' यत्किञ्चिद् or यावद् जगद्वर्त्ति धनम् अस्ति.
WHEAT, *s.* गोधूमः, सुमनाः *m.* (स्), सुमनः, धान्यं, प्रवटः, रसालः, अपूपः, गन्धविह्वलः, भूजघूः *f.*, गोरक्षजसूः *f.*, शितसूकः, म्लेच्छभोजनः, सितशिम्बिकः, निस्तुषक्षीरः, बहुदुग्धः.
WHEATEN, *a.* गोधूममयः -यी -यं, गोधूमात्मकः -का -कं, गौधूम in comp.
To WHEEDLE, WHEEDLER, WHEEDLING. *See To* COAX, FLATTER, &c.
WHEEL, *s.* चक्रं, रथाङ्गं, रथपादः, रथ्यं, मण्डलं, उपधिः *m.*, औपधेयं, नभिः *m.*, दृभ्भूः *f.*: 'its circumference,' नेमिः -मी, प्रधिः *m.*, चक्रपरिधिः *m.*; 'potter's wheel,' कुलालचक्रं.
To WHEEL, *v. a.* परिवृत् (c. 10. -वर्त्तयति -यितुं), विवृत्, आवृत्, व्यावृत्.
To WHEEL, *v. n.* परिवृत् (c. 1. -वर्त्तते -र्त्तितुं), विवृत्, व्यावृत्, सम्परिवृत्.
WHEELBARROW, *s.* हस्तसञ्चालितम् एकचक्रयुक्तं वाहनं.
WHEELED, *a.* चक्रवान् -वती -वत् (त्), चक्री -क्रिणी -क्रि (न्), चक्रयुक्तः -क्ता -क्तं; 'two-wheeled carriage,' द्विचक्रयुक्तो रथः.
WHEEL-WRIGHT, *s.* रथकारः, रथकृत्, रथकरः, चक्रकारः.
To WHEEZE, *v. n.* कासश्वासं कृ, कृच्छ्रेण श्वासं कृ, प्रतिश्युतं कृ.
WHELP, *s.* शावः -वकः, शिशुः *m.*, वत्सः; 'of a lion,' सिंहशावकः.
WHEN, *adv.* (At the time that) यदा, यर्हि, or expressed by काले, समये, &c. in comp.; as, 'when he was dying,' मरणकाले.—(At what time?) कदा, कर्हि.
WHENCE, *adv.* (Interrog.) कुतस्, कस्माद् देशात् &c., कस्मात् स्थानात् &c.; 'whence have you come?' कुतः समागतो ऽसि.—(Indef.) यतस्, यस्माद् देशात् &c.; 'to return whence one came,' प्रतिगन्तुं यथागतं.
WHENEVER, WHENSOEVER, *adv.* यदा यदा, यर्हि यर्हि, यदाकदाचित्.
WHERE, *adv.* (In which place) यत्र.—(In what place?) कुत्र, क्व.
WHEREAS, *adv.* यस्मात्, येन, यतस्, यत्. *See* SINCE.
WHEREBY, *adv.* (By which) येन.—(By what?) केन.
WHEREFORE, *adv.* (For which reason) यतस्, येन, यत्, यदर्थं, तथात्वे.—(For what reason?) किमर्थं, किम्, केन हेतुना, कस्य हेतोः, किन्निमित्तं, केन निमित्तेन.
WHEREIN, *adv.* (In which) यस्मिन्, यत्र.—(In what?) कस्मिन्, कुत्र.
WHEREOF, *adv.* (Of which) यस्य.—(Of what?) कस्य.
WHEREVER, WHERESOEVER, *adv.* यत्र कुत्रिचित्, यत्र कुत्रापि, यत्र यत्र, कुत्रापि, कुत्रचित्, यत्र क्वचित्.
WHEREUPON, *adv.* यदनन्तरं, यत्रान्तरे, तदनन्तरं, अत्रान्तरे.
WHERRY, *s.* दण्डसञ्चालिता or क्षेपणिसञ्चालिता लघुनौका.
To WHET, *v. a.* निशो, निशि, क्षणु, तिज्. *See To* SHARPEN.
WHETHER, *adv.* किं, किंवा, वा, उत. The particle वा, either with or without किं, usually expresses the sense of 'whether,' as in the following examples; 'whether you kill me or whether you release me,' मां मारयत वा मुञ्चत वा; 'do you know whether he is virtuous or not?' वेत्सि किं धार्म्मिको न वा; 'whether or not he does that,' तत् करोतु न करोतु वा.—(Whether of twain, which of two) कतरः -रा -रत्.
WHET-STONE, *s.* शाणः -णी, शानः, शाणाश्म *n.* (न्), भ्रमः, क्षामरः, वागरः, सामकः.
WHEY, *s.* मस्तु *n.*, दधिमण्डः -ण्डं, दुग्धमण्डं, दध्युत्तरं.
WHICH, *pron.* (Relat.) यः या, यद्, यौ *m. du.*, ये *f. n. du.*, ये *m. pl.*, याः *f. pl.*, यानि *n. pl.*, *see* WHO.—(Interrog.) कः का किं, कौ *m. du.*, के *f. n. du.*, के *m. pl.*, काः *f. pl.*, कानि *n. pl.*
WHICHEVER, *pron.* Expressed by doubling the relative, thus यद् यद् &c.
WHIFF, *s.* फुत्कृतं, फुत्कारः, फूत्कृतं, फूत् indec. *See* PUFF.
WHILE, WHILST, *adv.* यावत्, यावत्कालं, यत्कालं, यस्मिन् काले, यत्पर्य्यन्तं, यदा; 'whilst he thought on this the messenger arrived,' यावत् तच् चिन्तयति दूतः समागच्छति. The sense of whilst may sometimes be expressed by मध्ये, *see* DURING, or by the locative absolute, or some similar form of expression; as, स तदेव चिन्तयति दूतश्च समागच्छति.
WHILE, *s.* कालः, समयः; 'a long while,' बहुकालः; 'for a long while,' बहुकालं, चिरकालं, चिरं; 'after a long while,' चिरात्; 'a little while,' अल्पकालः; 'for a little while,' अल्पकालं, किञ्चित्कालं; 'in a little while,' अचिरेण -रात्, क्षणान्तरे, कियता कालेन; 'for a while,' कियत्कालं, आपाततस्; 'a long while ago,' पुरा, पूर्व्वकाले; 'one while,' कदाचित्.—(Worth while) सफलः -ला -लं, फलवान् -वती -वत् (त्), उपयोगी -गिनी &c.
To WHILE, *v. a.* विनोदेन कालं गम् (c. 10. गमयति -यितुं) or नी (c. 1. नयति, नेतुं), विनुद् in caus. (नोदयति -यितुं).
WHIM, *s.* मनोलौल्यं, चापलं, चापल्यं. *See* FREAK, CAPRICE.
To WHIMPER, *v. a.* बालकवत् क्रन्द् or रुद् or रु or कूज्.
WHIMSICAL, *a.* चपलः -ला -लं, लोलः &c., *see* CAPRICIOUS, FREAKISH.
To WHINE, *v. n.* कूज् (c. 1. कूजति -जितुं), अनुकूज्. *See To* MURMUR.
WHINE, *s.* कूजनं, कूजितं, विलपनं, कलरुतं, काकुः *f.*, काकूक्तिः *f.*
To WHIP, *v. a.* कशया or चर्म्मरज्ज्वा or रज्ज्वा तड् (c. 10. ताडयति -यितुं) or दण्ड् or शास् (c. 2. शास्ति -सितुं). *See To* LASH.
WHIP, *s.* कशा, कषा, चर्म्मयष्टिः *f.*, प्रतिष्कषः, भीमा. *See* SCOURGE.
WHIPPED, *p. p.* कशाहतः -ता -तं, दण्डितः &c.; 'whipped horse,' प्रतिकशाश्वः.
WHIPPING, *s.* कशाघातः, कषाघातः, कशाताडनं, ताडनं; 'worthy of it,' कश्यः -श्या -श्यं, कशार्हः -र्हा -र्हं.
To WHIRL, *v. a.* भ्रम् (c. 10. भ्रमयति -यितुं). *See To* TURN, TWIRL.

To WHIRL, *v. n.* भ्रम् (c. 4. भाम्यति, c. 1, भ्रमति -मितुं), अतिशीघ्रं परिवृत् (c. 1. -वर्त्तते -र्त्तितुं) or घूर्ण्. *See To* REVOLVE, *v. n.*

WHIRLED, *p. p.* भ्रान्तः -न्ता -न्तं, उद्भ्रान्तः &c., शीघ्रं परिवर्त्तितः &c.

WHIRL, WHIRLING, *s.* भ्रमः -मणं, भ्रान्तिः *f.*, भ्रमिः *f.*, विभ्रमः, आवृत्तिः *f.*

WHIRLPOOL, *s.* जलावर्त्तः, जलभ्रमः, जलगुल्मः, आवर्त्तः -र्त्तिका, आवर्त्तिनी, भ्रमिः *m.*, भ्रमः, भ्रमरकः, अवघूर्णः. *See* EDDY.

WHIRLWIND, *s.* चक्रवातः, वातावर्त्तः, वातमण्डली, वायुगुल्मः, वात्या, भ्रमिः *m.*, वातभ्रमः, आवर्त्तः, निर्घातः, भ्राजिः *f.*, कुनाभिः *m.*, पवाका.

To WHISK, *v. a.* अतिक्षिप्रं चल् (c. 10. चालयति -यितुं), अतिलाघवेन चल्; 'he whisks his tail,' परिपुच्छयति.

WHISK, *s.* लघुक्षेपः, आकस्मिकक्षेपः.—(For flies, &c.) चामरं.

WHISKER, *s.* पक्ष्म *n.* (न्), गुम्फः, गण्डलोम *n.* (न्), मुखजलोम *n.*

To WHISPER, *v. n.* जप् (c. 1. जपति -पितुं), प्रजप्, नीचस्वरेण or नीचवाचा वद् (c. 1. वदति -दितुं), नीचैर् वद्, उपांशु वद्; 'to whisper into the ear,' कर्णम् उपजप्, कर्णे कथ्, कर्णे जप् or वद्; 'to whisper to one's neighbour,' जनान्तिकं वद्.

WHISPER, WHISPERING, *s.* जपः -पनं, जापः, कर्णेजपनं, कर्णेकथनं, कर्णेवादः, उपांशुवादः, उपांशुकथनं, नीचैर्वादः; 'in a whisper,' उपांशु, जनान्तिकं.

WHISPERER, *s.* कर्णेजपः, कर्णजपः, कर्णेकथकः, कर्णोपजापकः.

To WHISTLE, *v. n.* ओष्ठाधरसङ्कोचपूर्ब्बं श्वासोत्क्षेपं कृत्वा शीशशब्दं कृ or सीस्शब्दं कृ or कीचकवत् पटुशब्दं कृ, वेणुवत् ककैशशब्दं कृ, ओष्ठशब्दं कृ.

WHISTLE, *s.* (The sound) शीशशब्दः, सीस्शब्दः, ओष्ठशब्दः, कीचकशब्दः.—(Instrument for whistling) वंशः -शी, ध्वनिनालः.

WHIT, *s.* लेशः, लवः, लवलेशः; 'not a whit,' न मनागपि.

WHITE, *a.* शुक्लः -क्ला -क्लं, श्वेतः -ता -तं, धवलः -ला -लं, सितः -ता -तं, श्वेतः -ता -नी -तं, शुभ्रः -भ्रा -भ्रं, शुचिः -चिः -चि, अवदातः -ता -तं, विशदः -दा -दं, गौरः -री -रं, धौतः -ता -तं, पाण्डुरः -रा -रं, अमलः -ला -लं, विमलः &c., रजतः -ता -तं, ककैः -कैा -कैं, खरः -रू -रु, अर्जुनः -नी -नं, शितिः -तो -ति, अर्जुनलविः -विः -वि, वलक्षः -क्षा -क्षं; 'yellowish white,' हरिणः -णा -णं.

WHITE, *s.* (The colour) शुक्लः, धवलः, श्वेतः, सितः, वलक्षः.—(Of the eye) शुक्लमण्डलं, विभ्रमरं.

To WHITEN, *v. a.* शुक्ल (nom. शुक्लयति -यितुं), धवल (nom. धवलयति -यितुं), शुक्लीकृ, धवलीकृ, आदीप् (c. 10. -दीपयति -यितुं).

To WHITEN, *v. n.* शुक्लीभू, धवलीभू, श्वेतीभू, विशदीभू.

WHITENED, *p. p.* धवलितः -ता -तं, धवलीकृतः &c., शुक्लीकृतः -ता -तं.

WHITENESS, *s.* शुक्लता -त्वं, शुक्लिमा *m.* (न्), शौक्ल्यं, धवलत्वं -ता, धावल्यं, शुभ्रता, श्वेतता, सितत्वं, सितिमा *m.* (न्), वैशद्यं.

WHITES, *s.* (Fluor albus) प्रदरः, प्रदरामयः.

WHITEWASH, *s.* सुधा, शुक्ललेपः, धवललेपः, धवलसुधा.

To WHITEWASH, *v. a.* सुधया लिप् (c. 6. लिम्पति, लेप्तुं) or आलिप्, सुधया धवलीकृ or धवल (nom. धवलयति -यितुं).

WHITEWASHED, *p. p.* सुधाधवलितः -ता -तं, सुधालिप्तः &c.; 'house,' सुधाभवनं.

WHITHER, *adv.* (Interrog.) कुत्र, क्व; 'whither shall I go?' क्व गच्छामि.—(Relat.) यत्र.

WHITHERSOEVER, *adv.* यत्र कुत्रचित्, यत्र कुत्रापि.

WHITISH, *a.* ईषच्छुक्लः -क्ला -क्लं, ईषत्पाण्डुः -ण्डुः -ण्डु, धूसरः -रा -रं.

WHITLOW, *s.* नखस्फोटः, पिप्पं, कृमिः *m.*, नखशूलः -लं, नखव्रणः.

To WHIZ, *v. n.* झीशशब्दं कृ, सीस्शब्दं कृ, रणरणशब्दं कृ.

WHO, *pron.* (Relat.) यः या यद्, यौ *m. du.*, ये *f. n. du.*, ये *m. pl.*, याः *f. pl.*, यानि *n. pl.* The relative pronoun is not much used in Sanskrit excepting at the beginning of a sentence; as, 'he who desires great riches is not wise,' यो बहुधनम् आकांक्षति स बुद्धिहीनः. In other cases it is more usually expressed by स च or is inherent in a compound word or indecl. part.; thus, 'in that city there dwelt a king who was beloved by his subjects,' तस्मिन् नगरे वसति राजा स च प्रजावल्लभः; 'a saint who has subdued his organs of sense,' जितेन्द्रियो मुनिः; 'by all the birds who had assembled,' सर्व्वैः पक्षिभिर् मिलित्वा.—(Interrog.) कः का किं, कौ *m. du.*, के *f. n. du.*, के *m. pl.*, काः *f. pl.*, कानि *n. pl.*; 'who are you?' कस् त्वं; 'who's there,' को ऽत्र.

WHOEVER, WHOSOEVER, WHOSO, *pron.* यः कश्चित् *m.*, या काचित् *f.*, यत्किञ्चित् *n.*, यः कोपि *m.*, या कापि *f.*, यत्किमपि *m.*, यो यः *m.*, या या *f.*, यद्यद् *n.*

WHOLE, *a.* सर्व्वः -र्व्वा -र्व्वं, सकलः -ला -लं, समग्रः -ग्रा -ग्रं, विश्वः -श्वा -श्वं, कृत्स्नः -त्स्ना -त्स्नं; 'the whole earth,' सर्व्वमही; 'the whole world,' सर्व्वलोकः; 'the whole night,' सर्व्वरात्रः; 'the whole day,' सर्व्वाह्णः; 'the whole business from beginning to end,' साद्यन्तं कर्म्म, आगमनिगमौ *m. du.*; 'for the whole month,' मासपर्य्यन्तं; 'whole number,' अभिन्नसंख्या.

WHOLE, *s.* साकल्यं, समुदायः, कात्स्न्यं, कार्त्स्न्यं, सामग्र्यं, आखिल्यं, मात्रं, समासः, समस्तः -स्तिः *f.*, व्यस्तिः *f.*

WHOLENESS, *s.* सामग्र्यं, सम्पूर्णता, अभिन्नता. *See* ENTIRENESS.

WHOLESALE, *s.* or *a.* समस्तविक्रयः, महाविक्रयः, अखण्डविक्रयः.

WHOLESOME, *a.* पथ्यः -थ्या -थ्यं, हितः -ता -तं. *See* SALUBRIOUS.

WHOLLY, *adv.* सर्व्वतस्, सर्व्वशस्, सर्व्वथा, साकल्येन, सम्यक्, अशेषतस्, अत्यन्तं, सर्व्वभावेन, सर्व्वतोभावेन. *See* ENTIRELY.

WHOOP, *s.* (The cry) हूप्; 'war-whoop,' सिंहनादः, क्ष्वेडा -डितं.

To WHOOP, *v. n.* हूपशब्दं कृ, उच्चैःस्वरेण क्रुश्. *See To* SHOUT.

WHORE, *s.* वेश्या, गणिका, पुंश्चली, बन्धकी. *See* HARLOT.

WHOREDOM, WHOREMONGER. *See* FORNICATION, HARLOTRY, &c.

WHORESON, *s.* वेश्यापुत्रः, गणिकापुत्रः, पुंश्चलीजः.

WHOSE, *pron.* (Relat.) यस्य *m.*, यस्याः *f.* The relative 'whose' is not often expressed in Sanskrit, but is frequently inherent in a compound, or rendered by तस्य च &c., *see* WHO; as, 'a wife whose husband is abroad,' प्रोषितभर्त्तृका स्त्री.—(Interrog.) कस्य *m.*, कस्याः *f.*

WHY, *adv.* किमर्थं, किं, केन हेतुना, किन्निमित्तं, कस्य हेतोः, *see* WHEREFORE; 'why inquire into my story?' किं ते मम वृत्तान्तप्रश्नेन; 'why conceal it?' संवरणे किं कारणं; 'why do you do this?' किमर्थं तत् करोषि.

WICK, *s.* (Of a lamp, &c.) तूला -ली, वर्त्तिः *f.*, वर्त्तिका, तैलिनी, तैलमाली, दशा, दशाकर्पः, पिञ्जूलं, दीपकूर्पी, दीपखोरी.

WICKED, *a.* (Said of persons) दुष्टः -ष्टा -ष्टं, पापी -पिनी -पि (न्), दुर्वृत्तः -त्ता -त्तं, दुरात्मा -त्मा -त्म (न्), पापात्मा &c., अपुण्यः -ण्या -ण्यं, शठः -ठा -ठं, पामरः -रा -रं, खलः -ला -लं, नैकृतिकः -की -कं, नैष्कृतिकः &c., अधार्म्मिकः -की -कं, दुष्टमानसः -सा -सं, दुश्चरित्रः -त्रा -त्रं, विकर्म्मिकः &c., *see* SINFUL; 'a wicked man,' दुर्जनः, असज्जनः.—(Of actions) दुष्टः -ष्टा -ष्टं, पाप in comp., *see* SINFUL;

'a wicked act,' पापकर्म्मन् *n.* (न्); 'very wicked,' पापिष्ठः -ष्ठा -ष्ठं, दुरिष्टः &c.

WICKEDLY, *adv.* दुष्टं, दुष्टवत्, सपापं, दुर्जनवत्, दुर्वृत्तवत्, खलवत्.

WICKEDNESS, *s.* पापं, दुष्कृतं, दुष्कृतिः *f.*, कुकर्म्म *n.* (न्), दुष्कर्म्म *n.*, कुकृत्यं, कुसृतिः *f.*, निकृतिः *f.*, निकारः, दुष्टता, दौष्ठवं, दौरात्म्यं, दौर्जन्यं, दुर्जनत्वं, असाधुता, विप्रकारः, कौकृत्यं, असत्कर्म्म *n.*, *see* SINFULNESS; 'great wickedness,' पापिष्ठता, पापीयस्त्वं, दुरिष्टं.

WICKER, *a.* वैदलः -ली -लं, वैणवः -वी -वं, वैणुकेयः -यी -यं, वैत्रकः -की -कं, वंशादिदलनिर्म्मितः -ता -तं; 'wicker-work,' वैदलं.

WICKET, *s.* क्षुद्रद्वारं, उपद्वारं, द्वारकं, खडक्किका.

WIDE, *a.* विशालः -ला -लं, पृथुः -थुः -थु, विस्तीर्णः -र्णा -र्णं, विपुलः -ला -लं, विप्रकृष्टः -ष्टा -ष्टं; 'wide-spread,' बहुविस्तीर्णः -र्णा -र्णं, सन्ततः -ता -तं, बहुप्रतानी &c.; 'wide-awake,' प्रबुद्धः -द्धा -द्धं; 'wide-mouthed,' गुहामुखः -खा -खं; 'wide-open,' उत्फुल्लः -ल्ला -ल्लं.

WIDE, WIDELY, *adv.* विस्तीर्णं, विस्तरेण, विपुलं, प्रचुरं, अत्यन्तं, बहु or अति or सु prefixed, *see* EXTENSIVELY.

To WIDEN, *v. a.* प्रथ् (c. 10. प्रथयति -यितुं), पृथूकृ, विशालीकृ.

WIDENESS, *s.* विशालता, पृथुता, विस्तृतिः *f.* *See* BROADNESS.

WIDOW, *s.* विधवा, रण्डा, विश्वस्ता, विश्वस्या, गतभर्त्तृका, मृतपतिका, अभर्त्तृका, निर्नाथा, अनाथा, अवीरा, यतिनी, वृषभी, कात्यायनी, वितनुः *f.*; 'widow before puberty,' बालविधवा, बालरण्डा; 'widow that burns with the body of her husband,' सती; 'the act of doing so,' अग्निप्रवेशः, सहमरणं, सहगमनं, अनुगमनं, अन्वारोहणं; 'stone by which she ascends the pyre,' धर्म्मशिला.

WIDOWED, *a.* हृतभर्त्तृका, हृतपतिका.—(Stripped) हृतः -ता -तं.

WIDOWER, *s.* मृतभार्य्यः, मृतपत्नीकः, विधुरः, अयोगः.

WIDOWHOOD, *s.* वैधव्यं, वैधव्यदशा, विधवात्वं, निर्नाथता, रण्डावस्था, ब्रह्मभङ्गः.

WIDTH, *s.* विशालता, परिणाहः, व्यासः, परिसरः. *See* BREADTH.

To WIELD, *v. a.* हस्तेन धृ (c. 1. धरति, c. 10. धारयति -यितुं) or धा (c. 3. दधाति, धातुं) or विधा, हस्तेन भृ (c. 1. भरति, c. 3. बिभर्त्ति, भर्त्तुं), हस्तेन प्रयुज् or उपयुज् or प्रणी.

WIFE, *s.* भार्य्या, स्त्री, पत्नी, जाया, दाराः *m. pl.*, दारा, वधूः *f.*, वधूः *f.*, कलत्रं, गृहिणी, गेहिनी, पाणिगृहीता, सहधर्म्मिणी, सधर्म्मिणी, दयिता, कान्ता, वल्लभा, प्रिया, प्रियतमा, रमणी, नायिका, प्राणेशा, प्राणसमा, प्रेयसी, प्रेष्ठा, वनिता, द्वितीया, महिला, क्षेत्रं, परिग्रहः, गृहं, गृहाः *m. pl.*, धूता, अर्द्धाङ्गं, वामाङ्गं, दम् indec.; 'virtuous and faithful wife,' पतिव्रता, सती, साध्वी, सुव्रता, धर्म्मदाराः *m pl.*, पतिप्राणा, सुचरित्रा; 'one who has a family,' कुटुम्बिनी, पुरन्ध्रिः -न्ध्री; 'a superseded wife,' अध्यूढा, अधिविन्ना, कृतसापत्निका -त्नीका, कृतसापत्नी, कृतसापत्नका, कृतसपत्निका; 'wife of one husband,' एकभर्त्तृका; 'rival wife,' सपत्नी; 'one's own wife,' स्वकीया, स्वीया; 'wife of another,' परकीया, परस्त्री, परदाराः *m. pl.*; 'well-born wife,' कुलस्त्री; 'wife of one's bosom,' वक्षःसम्मर्दिनी; 'unfaithful wife,' अपतिव्रता, असती; 'taking a wife,' दारपरिग्रहः, दारसंग्रहः, दारक्रिया; 'along with one's wife, or having a wife,' सवधूकः, सपत्नीकः, सभार्य्यः; 'condition of a wife,' भार्य्यात्वं, पत्नीत्वं; 'one whose husband is abroad,' प्रोषितभर्त्तृका; 'wife's property,' स्त्रीधनं.

WIG, *s.* उपकेशः, कृत्रिमकेशः, केशमयमस्तकाभरणं.

WIGHT, *s.* जनः, माणवकः, नागरः; 'unlucky wight,' तपस्वी *m.* (न्).

WILD, *a.* (Pertaining to or inhabiting a forest or wilderness, not tame) आरण्यः -ण्यी -ण्यं, आरण्यकः -का -कं, वन्यः -न्या -न्यं, अरण्यजः -जा -जं, वनजः &c., आरणीयः -या -यं, जङ्गलः -ला -लं, जाङ्गलः -ली -लं, वनेचरः -रा -रं, वनचारी -रिणी -रि (न्), वन in *comp.*, अरण्य *in comp.*, *see* DESERT, *a.*; 'wild-animal, wild-beast,' अरण्यपशुः *m.*, वनपशुः *m.*, आरण्यपशुः *m.*; 'wild hog,' अरण्यशूकरः, आरण्यशूकरः, वनशूकरः; 'wild goat,' वनछागः; 'wild elephant,' वनगजः; 'wild fowl,' वनकुक्कुटः, वृक्षकुक्कुटः, रज्जुदालकः; 'wild duck,' कामिकः; 'wild stag,' अरण्यमृगः, व्यालमृगः.—(Growing without culture) अरण्य in comp., वन in comp.; 'wild flower,' वनपुष्पं; 'wild fruit,' वनफलं; 'wild rice,' अरण्यधान्यं, तृणधान्यं, नीहारः.—(Irregular, disorderly) विषमः -मा -मं, उच्छृङ्खलः -ला -लं, प्रकीर्णः -र्णा -र्णं, *see* IRREGULAR.—(Absurd) अयुक्तिकः -का -कं, अनर्थकः -का -कं.—(Mad) उन्मत्तः -त्ता -त्तं.—(Savage, desert), *see* the words.

WILDERNESS, WILD, *s.* अरण्यं, वनं, जङ्गलं, शून्यारण्यं, मरुदेशः, मरुस्थलं, मरुः *m.*, जाङ्गलभूमिः *f.*, प्रान्तरं. *See* DESERT, *s.*

WILD-GOOSE-CHASE, *s.* मृगतृष्णा, हेममृगानुगमनं, हेममृगानुधावनं.

WILDLY, *adv.* विषमं, उच्छृङ्खलं, उन्मत्तवत्, सोन्मादं, व्याकुलं.

WILDNESS, *s.* (Uncultivated state) वन्यता, आरण्यता, जङ्गलत्वं.—(Savageness) रौद्रता, दारुणता, अशिष्टता.—(Irregularity) विषमता, उच्छृङ्खलता.—(Madness) उन्मत्तता, विक्षिप्तता.

WILE, *s.* माया, छलं, छद्म *n.* (न्), कपटः -टं, उपायः, व्यपदेशः.

WILFUL, *a.* स्वैरी -रिणी -रि (न्). *See* WILLFUL.

WILL, *s.* (Faculty which is exercised in deciding) इच्छा, सङ्कल्पशक्तिः *f.*, निश्चयशक्तिः *f.*—(Inclination, choice, liking) इच्छा, सङ्कल्पः, वशः -शं, अभिप्रायः, अभिलाषः, आकांक्षा, अभिप्रेतं, अभिमतं, इष्टं, छन्दस् *n.*; 'the will of God,' परमेश्वरेच्छा; 'of one's own will, at will,' इच्छातस्, स्वेच्छातस्, स्वेच्छानुसारेण, यथाकामं, कामतस्; 'ill-will,' दुष्टभावः, दुष्टबुद्धिः *f.*; 'good will,' हितेच्छा, हितकाम्या; 'subject to the will of another,' परवशः -शा -शं; 'following one's own will,' स्वेच्छाचारी -रिणी -रि (न्), *see* WILFUL; 'against the will of,' अनिच्छया, अनिच्छातस्, अनभिप्रेतेन.—(Testament) मृतपत्रं, मृत्युपत्रं, मृतलेखः, मृत्युलेखः.—(Will-with-a wisp), *see* IGNIS FATUUS.

To WILL, *v. a.* (Determine, decide in the mind) सङ्कल्पं कृ, निश्चयं कृ, निश्चि, निर्णी, संकॢप् (c. 10. -कल्पयति -यितुं), मनसा निश्चि or निर्णयं कृ.—(Wish, desire) इष् (c. 6. इच्छति, एषितुं), अभिलष्, आकांक्ष्.—(Command), *see To* COMMAND.—(Dispose of by testament) मृतपत्रेण दा or प्रदा or कृ in caus.

WILLED, *p. p.* सङ्कल्पितः -ता -तं, साङ्कल्पिकः -की -कं, इष्टः -ष्टा -ष्टं.

WILLFUL, *a.* स्वैरी -रिणी -रि (न्), यथेष्टचारी &c., यथाकामी &c., स्वैरः -री -रं, स्वैरवृत्तः -त्ता -त्तं, स्वैरगतिः -तिः -ति, स्वैरगामी -मिनी &c., यादृच्छिकः -की -कं, छान्दसः -सी -सं. *See* SELF-WILLED.

WILFULLY, *adv.* यथाकामं, यथेष्टं, स्वैरवत्, यदृच्छया, इच्छातस्, कामं.

WILFULNESS, *s.* स्वैरिता, स्वैरता, स्वैरं, स्वेच्छा, स्वेच्छाचारः, यथेष्टचारः, स्वातन्त्र्यं, स्वतन्त्रता, यदृच्छा, प्राकाम्यं. *See* SELF-WILL.

WILLING, *a.* (Not averse, ready) इच्छुः -च्छुः -च्छु, इच्छुकः -का -कं, सकामः -मा -मं, सानुरागः -गा -गं.—(Received of choice, assented to) इष्टः -ष्टा -ष्टं, यथेष्टः &c., अभीष्टः &c., अनुमतः -ता -तं, सम्मतः &c., यथेप्सितः &c.

WILLINGLY, *adv.* कामं, प्रकामं, कामतस्, इच्छातस्, यथेप्सितं

Willingness, *s.* सकामत्वं, इच्छुता, इच्छुकत्वं, सानुरागता, सम्मतिः *f.*

Wily, *a.* मायी -यिनी -यि (न्), बहुमायः -या -यं. *See* Cunning.

To win, *v. a.* (Gain by conquest) जि (c. 1. जयति, जेतुं), निर्जि, प्रतिजि.—(Gain, obtain) अर्ज्, प्राप्, लभ्, *see To* obtain.—(Win over) आराध् (c. 10. -राधयति -यितुं), अनुरञ्ज्, प्रसाध्, संग्रह्, *see To* conciliate.

To wince, *v. n.* विकम्प् (c. 1. -कम्पते -म्पितुं), विस्फुर् (c. 6. -स्फुरति -रितुं).

Wind, *s.* (Air in motion) वायुः *m.*, अनिलः, वातः, पवनः, मरुत् *m.*, मरुतः, मारुतः, वातिः *f.*, समीरणः, समीरः, समिरः, सदागतिः *m.*, सततगतिः *m.*, आशुगः, पवमानः, प्रभञ्जनः, गन्धवहः, गन्धवाहः, प्रधावनः, धवाणकः, जगत्प्राणः, जगद्बलः, श्वसनः, स्पर्शनः, मातरिश्वा *m.* (न्), पृषदश्वः, पृषताश्वः, पृषताम्पतिः *m.*, प्रजीनः, अतसः, नान्दनः, लघटिः *m.*, विश्वयुः *m.*, यः.—(Air) वायुः *m.*, स्पर्शः; 'against the wind,' प्रतिवातं; 'cold wind,' हिमानिलः; 'swift as the wind,' वायुवेगसमः -मा -मं, वायुगतिः -तिः -ति; 'like the wind,' वायुसमः -मा -मं, वायुभूतः -ता -तं.—(Flatulence) वायुः *m.*, वातः, *see* Flatulence; 'to break wind,' पर्द् (c. 1. पर्दते -र्दितुं), शृध् (c. 10. शर्धयति -यितुं).

To wind, *v. a.* (Blow a horn, &c.) शङ्खं ध्मा.—(Cause to turn or twist) आवृत् (c. 10. -वर्त्तयति -यितुं), परिवृत्, *see To* twist, *v. a.*—(Wind up, as a discourse, &c.) उपसंहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, उपसंहारं कृ, प्रत्याहारं कृ.

To wind, *v. n.* (Proceed in a winding direction) विसृप् (c. 1. -सर्पति -सर्प्तुं), वक्रं or कुटिलं गम्.—(Turn, twine), *see* the words.

Wind-bound, *a.* वातरुद्धः -द्धा -द्धं, वायुप्रतिबद्धः &c., वातबद्धः &c.

Wind-fall, *s.* आगन्तुकलाभः, आकस्मिकलाभः, अलभ्यलाभः.

Winding, *s.* वक्रता, वक्रं, वक्रिमा *m.* (न्), पुटः, आवृत्तिः *f.*, व्यावर्त्तनं; 'of a river,' रोधोवक्रता, वक्रं, वङ्कः, पुटभेदः.

Winding, *part.* विसर्पी -र्पिणी -र्पि (न्), वक्रगामी &c.

Winding-sheet, *s.* शववस्त्रं, शववसनं. *See* Shroud.

Wind-mill, *s.* वायुसञ्चालितचक्रं, वायुचक्रं, वातचक्रं.

Window, *s.* वातायनं, जालं -लकः -लिका, गवाक्षः -क्षकः, गृहाक्षः, प्रग्रीवः, मुखं, गृहमुखं; 'at the window,' वातायनगतः, वातायनस्थः, वातायनाश्रितः; 'having a window,' जाली -लिनी &c.

Windy, *a.* वातलः -ला -लं, वातवान् -वती -वत् (त्), वायवः -वी -वं, वायव्यः -व्या -व्यं, वातमयः -यी -यं. *See* Stormy.

Wine, *s.* मद्यं, द्राक्षारसः, द्राक्षामद्यं, द्राक्षासवः, द्राक्षासुरा, मदिरा, मधु *n.*, मध्वासवः, माध्वी -ध्वीकं, माध्वकं, मधुमाध्वीकं, माधवकः, माद्वीकं, सुरा -री, हाला, कश्यं, रसितः, महानन्दा, कादम्बरी, पक्वरसः; 'wine personified,' सुरा -री; 'wine-drinker, wine-bibber,' मद्यपः, सुरापः, मद्यपायी *m.*; 'wine-drinking,' मद्यपानं.

Wine-glass, *s.* मद्यपात्रं, सुराभाजनं, चषकः, *see* Drinking-vessel.

Wine-merchant, *s.* द्राक्षारसविक्रेता *m.* (तृ), मद्यविक्रयी *m.*

Wine-press, *s.* द्राक्षापेषणयन्त्रं, द्राक्षापेषणी.

Wing, *s.* (Of a bird, &c.) पक्षः, पक्ष्म *n.* (न्), गरुत् *m.*, देहधिः *m.*, पत्रं, पतत्रं, छदः -दनं, तनूरुहः, तनूरुहः, बाजः, बाहुकृत्यः; 'spreading its wings,' पक्षौ प्रसार्य्य; 'under the wing,' पक्षाधस्; 'root of a wing,' पक्षमूलं, पक्षति. —(Of an army) पक्षः, सेनापक्षः, सैन्यपक्षः, पार्श्वस्थदलं, चक्रं.—(Of a house) गृहपक्षः, गृहपार्श्वभागः.

Winged, *a.* पक्षी -क्षिणी -क्षि (न्), पक्षवान् -वती &c., सपक्षः -क्षा -क्षं, पक्षयुक्तः -क्ता -क्तं, जातपक्षः &c., पत्री &c., पतत्री &c.

Wink, *s.* (Of the eye) निमेषः -क्षः, निमिषः, निमीलनं, मीलनं, श्मीलनं, श्मीलितं, विकूणनं, ककैराटः, अक्षिपक्ष्मणः सङ्कोचः.—(Sign, or hint made by the eye) नेत्रसङ्केतः, अक्षिसंज्ञा, अक्षिसङ्कोचसंज्ञा, भ्रूसंज्ञितं, अपाङ्गदर्शनं, इङ्गितं.

To wink, *v. n.* (Close the eyelids quickly) निमिष् (c. 6. -मिषति -मेषितुं), मिष्, निमील् (c. 1. -मीलति -लितुं), मील्, श्मील्, अक्षिपक्ष्म संकुच् (c. 1. -कोचति -चितुं), कण् (c. 10. कणयति -यितुं), चूण्, अक्षिसङ्कोचं कृ.—(Make a sign with the eye) अक्षिपक्ष्मसङ्कोचेन सङ्केतं कृ or संज्ञां कृ, नेत्रसङ्केतं कृ.—(Wink at) उपेक्ष्, *see To* connive.

Winking, *pdrt.* निमिषन् -षन्ती -षत् (त्), निमीलन् &c., सङ्कटाक्षः -क्षा -क्षं, सङ्कुचिताक्षः &c.—(Winking at) उपेक्षी -क्षिणी &c.

Winner, *s.* जेता *m.* (तृ), जयी *m.* (न्), विजेता *m.*, विजयी *m.*

Winning, *a.* अनुरञ्जकः -का -कं, मनोहरः &c., मित्रयुः -युः -यु.

To winnow, *v. a.* शुध् (c. 10. शोधयति -यितुं), निष्पावं कृ, पू, परिपू, प्रस्फुट् (c. 10. -स्फोटयति -यितुं), प्रस्फोटनं कृ. *See To* thresh.

Winnowed, *p. p.* पूतः -ता -तं, परिपूतः &c., बहुलीकृतः -ता -तं.

Winnower, *s.* पावकः, निष्पावकः, प्रस्फोटनकारी *m.* (न्).

Winnowing, *s.* निष्पावः, पवनं, पवः, प्रस्फोटनं, बहुलीकरणं, उत्कारः, निकारः; 'winnowing-fan or basket,' सूर्प्पः-र्प्पं, शूर्प्पः-र्प्पं, प्रस्फोटनं.

Winter, *s.* हेमन्तः -न्तं, हैमनं, हेमन्तकालः, हिमकालः, शीतकालः, शिशिरः -रं, हिमर्तुः *m.*, शीतर्तुः, हिमागमः, हैमलं.

To winter, *v. n.* हेमन्तकालं गम् (c. 10. गमयति -यितुं) or नी.

Wintery, *a.* हैमन्तः -न्ती -न्तं, हैमन्तिकः -की -कं, हैमः -मी -मं, हैमनः -नी -नं, हिमकालसम्बन्धी &c.; 'weather,' हिमदुर्दिनं.

To wipe, *v. a.* मृज् (c. 2. मार्ष्टि -ष्टुं, c. 1. मार्जति -र्जितुं), प्रमृज्, आमृज्, परिमृज्, सम्मृज्, प्रक्षाल् (c. 10. -क्षालयति -यितुं), मृद्, *see To* rub; 'the mouth,' मुखं प्रमृज्; 'the eyes,' नेत्रे परिमृज्; 'tears from the eyes,' नेत्राभ्याम् अश्रूणि प्रमृज्.—(Wipe away, wipe off) अपमृज्, अवमृज्, निःक्षिप्; 'dirt or defilement,' मलम् अपमृज्, निर्लेपं कृ.

Wipe, *s.* मार्जः -र्जनं, प्रक्षालनं.—(Blow) प्रहारः, आघातः.

Wiped, *p. p.* मार्जितः -ता -तं, प्रमार्जितः &c.; 'with the hand,' समुद्धस्तः &c.

Wiper, *s.* मार्जनी, मार्जनवस्त्रं, प्रक्षालनी, वरकं.

Wire, *s.* तारः -रा, लोहतारा, लोहतन्तुः *m.*, लोहसूत्रं, लोहतन्त्री, शलाका, धातुसूत्रं, तन्तुः *m.*, सूत्रं, तन्त्री -न्त्रं.

To wiredraw, *v. a.* लोहोद्धर्त्तनं कृ, लोहतारोद्धर्त्तनं कृ.

Wiry, *a.* तन्तुमयः -यी -यं, तन्तुसगुणः -णा -णं, तन्तुप्रायः &c.

Wisdom, *s.* ज्ञानं, विज्ञानं, प्रज्ञा, बुद्धिः *f.*, प्राज्ञता, विज्ञता, मेधा, वैदुष्यं, विद्वत्ता, पाण्डित्यं, मनीषा, मतिः *f.*, विवेकः, हिताहितविवेकः, धीः *f.*; 'god of wisdom,' गणेशः.

Wise, *a.* (Having wisdom) विद्वान् -दुषी -द्वत् (त्), ज्ञानी -निनी -नि (न्), ज्ञानवान् -वती -वत् (त्), प्राज्ञः -ज्ञा -ज्ञं, प्रज्ञः &c., बुद्धिमान् -मती &c., मतिमान् &c., धीमान् &c., प्रज्ञावान् &c., पण्डितः -ता -तं, विज्ञः -ज्ञा -ज्ञं, विवेकी -किनी &c., प्रज्ञी &c., मेधावी -विनी &c., सविवेकः -का -कं, कोविदः -दा -दं, सुधीः -धीः -धि, सुबोधः -धा -धं, कृतधीः &c., धीरः -रा -रं, विशेषज्ञः -ज्ञा -ज्ञं, कृतज्ञः &c., निपुणदृक् *m. f. n.* (श्), प्रेक्षावान् &c., मर्म्मज्ञः &c.; 'a wise man,' विद्वज्जनः, बुधः, *see* Learned.—(Dictated by wisdom) ज्ञानप्रयुक्तः -क्ता -क्तं, बुद्धिप्रयुक्तः &c., ज्ञानमूलकः -का -कं, बुद्धिमूलकः &c

Wise, *s.* *See* Manner, Way; 'in no wise,' न कथञ्चन.

WISEACRE, *s.* पण्डितम्मन्यः, ज्ञम्मन्यः, अल्पबुद्धिः *m.*

WISELY, *adv.* विद्वज्जनवत्, प्राज्ञवत्, विज्ञवत्, सज्ञानं, सविवेकं, विवेकपूर्व्वं, सम्यक्, सुष्ठु, युक्तं.

To WISH, *v. n.* इष् (c. 6. इच्छति, एषितुं), अभिलष् (c. 1. -लषति -षितुं), वाञ्छ् (c. 1. वाञ्छति -ञ्छितुं), कांक्ष् (c. 1. कांक्षति -क्षितुं), आकांक्ष्, *see To* DESIRE. Often expressed by the desid. form of a root; as, 'to wish to obtain,' आप् in des. (ईप्सति -प्सितुं), लभ् in des. (लिप्सते -प्सितुं); 'to wish to go,' गम् in des. (जिगमिषति -षितुं).

To WISH, *v. a.* (Well to one) इष्टं or मङ्गलम् or कल्याणम् आशंस् (c. 1. -शंसते -सितुं) or आशास् (c. 2. शास्ते -सितुं) or प्रार्थ्.—(Wish one ill) अनिष्टं or अमङ्गलम् आशंस् or प्रार्थ्.

WISH, *s.* इच्छा, अभिलाषः, आकांक्षा, इष्टं, स्पृहा, मनोरथः, ईप्सितं, *see* DESIRE; 'according to one's wish,' यथाभिमतं; 'earnest wish,' कौतूहलं, कुतूहलं, *see* LONGING.

WISHED, *p. p.* इष्टः -ष्टा -ष्टं, अभीष्टः -ष्टा -ष्टं. *See* DESIRED.

WISHING, *part.* or *a.* इच्छुः -च्छुः -च्छु, आकांक्षी &c. *See* DESIROUS.

WISP, *s.* (Of straw) शुष्कतृणकूर्चकः, शुष्कनालगुच्छकः.

WISTFULL, WISTFULLY. *See* EARNEST, EAGER, EAGERLY.

WIT, *s.* (Understanding) बुद्धिः *f.*, मतिः *f.*, धीः *f.*; 'one who has lost his wits,' नष्टबुद्धिः -द्धिः -द्धि.—(Quickness of fancy) बुद्धिपाटवं, बुद्धिचातुर्य्यं, बुद्धिविलासः, बुद्धिकौशलं, बुद्धितीक्ष्णता, वैदग्ध्यं, विदग्धता.—(Humour) रसः, रसिकवाक्यं, रसिकोक्तिः *f.*, नर्म्मोक्तिः *f.*, नर्म्म *n.* (न्), मर्म्म *n.*—(A wit, man of wit) रसज्ञः, नर्म्मज्ञः, नर्म्मवेदी *m.* (न्), परिहासवेदी *m.*, नर्म्मभाषी *m.*—(To wit) वस्तुतस्, अर्थतस्.

WITCH, *s.* मायिनी, पूतना, डाकिनी. *See* SORCERESS.

WITCHCRAFT, *s.* माया, अभिचारः, पूतनात्वं. *See* SORCERY.

WITH, *prep.* (Denoting cause, means, instrument) usually expressed by the instrumental case; as, 'with a sword,' खड्गेन; 'with grief,' शोकेन.—(In opposition to, against) instr. c., with or without सह; as, 'to fight with one's enemies,' शत्रुभिः or शत्रुभिः सह युध् or expressed by उपरि or by the dat. or gen. c., in such phrases as, 'he is angry with his son,' पुत्रस्योपरि or पुत्राय or पुत्रस्य क्रुध्यति.—(In company, together with, along with) सह, साद्धं, समं, साकं, सहितं, सत्रं -त्रा, अमा all with the instrum. c.: 'along with me,' मया सह; 'along with him,' तेन सह. The preposition सम्, prefixed to roots, gives this sense of 'with;' as, 'to live in company with,' संवस्.—(Associated, attended, connected with) सहितः -ता -तं in comp. or expressed by the instr. c., with or without सह, or by पूर्व्व or पुरःसर in comp.; as, 'associated with enemies,' शत्रुसहितः -ता -तं or शत्रुभिः सहितः &c.—(Denoting manner) expressed by instr. c., or by स in comp. with the accus. n., or by पूर्व्वं or पूर्व्वकं or पुरःसरं affixed; as, 'with anger,' कोपेन, सकोपं, कोपपूर्व्वं, कोपपूर्व्वकं, कोपपुरःसरं; 'with respect,' सादरं; 'with affection,' प्रीतिपूर्व्वं.—(Among) मध्ये. To express a person with any thing in his possession, or a thing in connection with something else, a compound adjective may often be used; thus, 'a man with a stick in his hand,' दण्डहस्तः पुरुषः; 'a man with riches,' सधनः or धनवान् पुरुषः; a ship with two masts,' द्विकूपका नौः or कूपकद्वययुक्ता नौः.

WITHAL, *adv.* समं, तथैव, अपिच, अपरञ्च. *See* LIKEWISE.

To WITHDRAW, *v. a.* अपनी (c. 1. -नयति -नेतुं), विनी, व्यपनी, अपकृष् (c. 1. -कर्षति -कर्ष्टुं), अपाकृष्, अपहृ (c. 1. -हरति -हर्त्तुं), व्यपहृ, उपसंहृ, प्रतिसंहृ, संहृ.

To WITHDRAW, *v. n.* अपक्रम् (c. 1. -क्रामति -क्रमितुं), अपसृ (c. 1. -सरति -सर्त्तुं), परावृत्, अवस्था, पलाय्, चल्. *See To* RETIRE.

WITHDRAWAL, *s.* (Taking back) अपनयः -यनं, अपहरणं, उपसंहारः -हरणं.—(Retiring) अपक्रमः, अपायः, *see* RETIREMENT.

WITHDRAWN, *p. p.* अपनीतः -ता -तं, उपसंहृतः &c., परावृत्तः -त्ता -त्तं.

To WITHER, *v. n.* विशृ in pass. (-शीर्य्यते), म्लै (c. 1. म्लायति, म्लातुं), नश् (c. 4. नश्यति), सद्, क्षि. *See To* FADE, *v. n.*

To WITHER, *v. a.* नश् (c. 10. नाशयति -यितुं). *See To* FADE, *v. a.*

WITHERED, *p. p.* विशीर्णः -र्णा -र्णं, म्लानः -ना -नं, शुष्कः -ष्का -ष्कं, गतरसः -सा -सं, *see* FADED; 'a withered leaf,' जीर्णपर्णं; 'having a withered arm or hand,' विकलपाणिकः -का -कं, कृकरः -रा -रं, कुणिः *m.*, कूणिः, कोणिः.

WITHERS, *s.* (Of an elephant, &c.) स्कन्धदेशः, स्कन्धः, आसनं.

WITHHELD, *p. p.* उपसंहृतः -ता -तं, प्रत्याहृतः &c., अपहृतः &c., विधृतः &c., विधारितः &c., निगृहीतः &c., उच्छिन्नः -न्ना -न्नं.

To WITHHOLD, *v. a.* उपसंहृ (c. 1. -हरति -हर्त्तुं), प्रत्याहृ, संहृ, विधृ (c. 10. -धारयति -यितुं), उच्छिद् (c. 7. -छिनत्ति -छेत्तुं), निग्रह्, विनिग्रह्, नियम्, निरुध्. *See To* RESTRAIN, RETAIN.

WITHIN, *prep.* (In the inner part) अन्तर्, अभ्यन्तरे, अन्तरे; 'within the house,' गृहाभ्यन्तरे; 'being within the house,' गृहान्तर्वर्त्ती -र्त्तिनी &c., गृहान्तर्गतः -ता -तं, गृहान्तःस्थः -स्था -स्थं.—(Not later than) मध्ये, अर्वाक्, *see* UNDER; 'within a year,' संवत्सरमध्ये; 'within ten days,' दशाहमध्ये.—(In the limits or compass of) गोचरः -रा -रं, विषय in comp., गम्य or ग्राह्य &c. in comp.; 'within hearing,' कर्णगोचरः -रा -रं; 'within sight,' दृष्टिगोचरः -रा -रं, दृग्गोचरः &c., दृष्टिगम्यः -म्या -म्यं, दृष्टिविषयः -या -यं; 'within arrow-shot,' बाणगोचरः -रा -रं; 'within reach of the hand,' हस्तग्राह्यः -ह्या -ह्यं, हस्तप्राप्यः &c., हस्तवर्त्ती -र्त्तिनी &c.

WITHIN, *adv.* अन्तर्, अभ्यन्तरे, *see* INWARDLY; 'gone within,' अन्तर्गतः -ता -तं; 'being within,' अन्तर्भवः -वा -वं, अन्तर्वर्त्ती &c.

WITHOUT, *prep.* (Not with) विना with instr. or acc. c., ऋते with abl. or acc. c., अन्तरेण with abl. or acc. or gen., अन्तरा, व्यतिरेकेण in comp., व्यतिरिक्तं, पृथक्, अ prefixed; 'without ornament,' भूषणेन विना or भूषणं विना; 'without feeling,' रसाद् ऋते; 'without punishment,' दण्डव्यतिरेकेण, दण्डमन्तरेण; 'without delay,' अविलम्बेन; 'without beginning or end,' अनाद्यन्तः -न्ता -न्तं; 'without doubt,' असंशयं; 'without reason,' असम्भावनीयं; 'without cause,' प्रयोजनं विना, अकस्मात् or expressed by the loc. abs., असति प्रयोजने.—(Destitute of) हीनः -ना -नं, विहीनः &c., रहितः -ता -तं, विरहितः &c. or expressed by अ, निर्, वि &c. prefixed; 'without money,' धनहीनः -ना -नं, धनरहितः &c., अधनः -ना -नं, निर्धनः &c.; 'how can I go without you?' कथं त्वद्विहीनो यास्यामि.—(Unless, if not, except) यदि न, अन्तरेण with acc., or expressed by the indec. part. with अ or न prefixed; 'without you do that,' यदि न तत् करोषि or तद् अकृत्वा; 'without drinking

any water,' पानीयम् अपीत्वा; 'it cannot be seen without a telescope,' दूरदर्शकयन्त्रमन्तरेण न दृश्यते; 'this cannot be ascertained without algebra,' बीजगणितम् अन्तरेण न ज्ञायते तत्.—(On the outside of) बहिस्, बहिर्भागे, अन्तरेण; 'without the fort,' दुर्गबहिस्, दुर्गबहिर्भागे, दुर्गादन्तरेण.

WITHOUT, *adv.* (Not within) बहिस्, अवस्.—(Externally) बाह्यतस्.

To WITHSTAND, *v. a.* पर्यवस्था (c. 1. -तिष्ठति -स्थातुं), प्रतिकूल (nom. प्रतिकूलयति -यितुं), विरुध्. *See To* RESIST, OPPOSE.

WITNESS, *s.* (Testimony) साक्ष्यं, साक्षिता, प्रमाणं; 'false witness,' कूटसाक्ष्यं, मिथ्यासाक्ष्यं, अलीकसाक्ष्यं.—(Person who gives testimony) साक्षी *m.* (न्), प्रमाता *m.* (तृ), साक्ष्यदाता *m.*, साक्ष्यकारी *m.*; 'false witness,' कूटसाक्षी *m.*, कौटसाक्षी *m.*, कूटकारः -रकः; 'having witnesses,' साक्षिमान् -मती -मत् (त्); 'proved by them,' साक्षिभावितः -ता -तं; 'absence of them,' साक्ष्यभावः; 'examination of a witness,' साक्षिपरीक्षा.—(One who is personally present) प्रत्यक्षदर्शी *m.*, साक्षाद्दृष्टा *m.*, *see* EYE-WITNESS.

To WITNESS, *v. a.* (See by personal presence) प्रत्यक्षं or प्रत्यक्षतस् or स्वचक्षुषा दृश् (c. 1. पश्यति, द्रष्टुं), साक्षाद् दृश्, प्रत्यक्षदर्शिनं कृ.—(Attest) साक्ष्यं दा, साक्ष्येण प्रमाणीकृ, *see To* ATTEST.

To WITNESS, *v. n.* साक्ष्यं दा, साक्ष्यं कृ, साक्षितां दा, साक्षी भू, प्रमाणीकृ, प्रमाणीभू. *See To* TESTIFY.

WITNESSED, *p. p.* (Seen in person) प्रत्यक्षदृष्टः -ष्टा -ष्टं, साक्षाद्दृष्टः &c., स्वचक्षुषा दृष्टः &c.—(Attested) प्रमाणीकृतः -ता -तं, साक्षिकः -की -कं, ससाक्षिकः &c.

WITTICISM, *s.* रसिकवाक्यं, रसिकोक्तिः *f.*, सरसोक्तिः *f.*, सरसवाक्यं, नर्म्मोक्तिः *f.*, नर्म्मभाषणं, विनोदवाक्यं.

WITTILY, *adv.* सरसं, रसिकोक्त्या, बुद्धिविलासेन, नर्म्मोक्त्या.

WITTINGLY, *adv.* ज्ञानतस्, बुद्धिपूर्व्वं, कामतस्. *See* KNOWINGLY.

WITTY, *a.* (Of persons) रसज्ञः -ज्ञा -ज्ञं, नर्म्मज्ञः &c., रसवेदी -दिनी -दि (न्), नर्म्मवेदी &c., नर्म्मभाषी -षिणी &c., नर्म्मवक्ता -क्त्री -क्तृ (क्तृ), विदूषकः -का -कं, विदग्धः -धा -धं.—(Of sayings, &c.) रसिकः -का -कं, सरसः -सा -सं, रसी -सिनी &c., रसवान् -वती -वत् (त्).

WIZARD, *s.* अभिचारविद् *m.*, मायाकारः. *See* MAGICIAN.

WOE, *s.* दुःखं, शोकः, दुर्गतिः *f.*, *see* MISERY, SORROW, CALAMITY.—(Exclam.) हा, वत, धिक्.

WOEFUL, WOEFULLY, &c. *See* SORROWFUL, CALAMITOUS, &c.

WOLF, *s.* वृकः, कोकः, अरण्यश्वा *m.* (न्), ईहामृगः, ईहावृकः, छागभोजी *m.* (न्), जनाशनः.

WOMAN, *s.* स्त्री, नारी, अङ्गना, वनिता, योषित् *f.*, योषिता, योषा, जोषित *f.*, जोषिता, जोषा, नरी, मानवी, महिला, अबला, मनुषी, मानुषी, कामिनी, वामा, विलासिनी, प्रमदा, मानिनी, वधूः *f.*, महेला -लिका, महीला, ललना, ललिता, रमणी, रामा, प्रकृतिः *f.*, सीमन्तिनी, प्रतीपदर्शिनी, भरण्या, परिगृह्या; 'a young woman,' तरुणी, कन्या, बाला, युवती, यूनी, नवयौवना; 'assembly of young women,' यौवतं, यौवनं; 'an old woman,' वृद्धा, वृद्धस्त्री, जरती, पलिता, पलिक्नी; 'a woman of good family,' कुलस्त्री, कुलनारी, कुलाङ्गना; a beautiful woman,' सुन्दरी, प्रमदा, कान्ता, सुभगा, नितम्बिनी, वामलोचना, an excellent woman,' वराङ्गना, वरारोहा, उत्तमा, अरवर्णिनी, मत्तकाशिनी, मत्तकासिनी, स्त्रीरत्नं; a passionate woman,' कोपना, भामिनी; 'virtuous woman,' सती, साध्वी, सुचरित्रा, कुलस्त्री, कुलपालिका; 'clever woman,' सरस्वती; 'woman who has borne a child,' प्रसूता -तिका; 'married woman,' सभर्तृका, सनाथा; 'woman-killer,' स्त्रीघातकः; 'woman-hater,' स्त्रीद्वेषी *m.* The Hindús divide women into four classes, corresponding to the four classes of men. These are, 1. पद्मिनी, comprising the most excellent women; 2. चित्रिणी or हरिणी or मृगी, comprising well-educated, accomplished, and beautiful women; 3. शङ्खिनी, comprising women who are tall, neither stout nor thin, with long hair, irascible, and with strong passions; 4. हस्तिनी, comprising women who are short, stout, with curly hair and furious passions.

WOMAN-HOOD, *s.* स्त्रीता, स्त्रीत्वं, नारीत्वं, स्त्रैणं, स्त्रीधर्म्मः.

WOMANISH, WOMANLY, *a.* स्त्रैणः -णी -णं. *See* FEMININE.

WOMANKIND, *s.* स्त्रीजातिः *f.*, स्त्रीप्रकृतिः *f.*, स्त्रीजनाः *m. pl.*

WOMB, *s.* गर्भाशयः, गर्भस्थानं, योनिः *m. f.*, योनी, गर्भकोशः, जरायुः *m.*, गर्भः, कोषः, उदरं, जठरः -रं, मातृकुक्षिः *m.*, उल्वं, कललः -लं, चत्वालः, धरा.

WON, *p. p.* जितः -ता -तं, निर्जितः &c., उपार्जितः -ता -तं.

WONDER, *s.* (The emotion) विस्मयः, आश्चर्य्यं -र्य्यत्वं, चमत्कारः, चित्रं, विचित्रकं.—(A wonder, cause of wonder) आश्चर्य्यं, अद्भुतं, अद्भुतवस्तु *n.*, कौतुकं, चमत्कारः, चमत्कृतिः *f.*, चित्रं, विचित्रता, *see* MARVEL; 'a great wonder,' महदाश्चर्य्यं; 'wonder of the world,' भुवनाद्भुतं.

To WONDER, *v. n.* विस्मि (c. 1. -स्मयते -स्मेतुं), विस्मयापन्नः -न्ना -न्नं भू, विस्मितः -ता -तं भू, सविस्मयः -या -यं भू, विस्मयान्वितः -ता -तं भू, कुहुकुह (nom. कुहुकुहायते). *See To* MARVEL.

WONDERFUL, WONDROUS, *a.* आश्चर्य्यः -र्य्या -र्य्यं, अद्भुतः -ता -तं, चित्रः -त्रा -त्रं, विचित्रकः &c., चित्री -त्रिणी &c., विस्मापकः &c. *See* MARVELLOUS.

WONDER-STRUCK, *a.* विस्मितः -ता -तं, विस्मयाकुलः -ला -लं.

WONDER-WORKING, *a.* आश्चर्य्यकर्म्मा -र्म्मा -र्म्म (न्), अद्भुतकर्म्मा &c., चित्रकर्म्मा &c., विचित्रकर्म्मा &c.

WONT, *To* BE WONT. *See* USED, HABITUATED, *To* USE.

WONTED, *a.* आभ्यासिकः -की -कं, व्यावहारिकः &c. *See* CUSTOMARY.

To WOO, *v. a* विवाहार्थं याच् (c. 1. याचति -चितुं) or प्रार्थ् (c. 10. -अर्थयति -ते -यितुं), विवाहार्थम् आराध् or चित्ताराधनं कृ.

WOOD, *s.* (Forest) वनं, अरण्यं, विपिनं, काननं, *see* FOREST.—(Substance of trees, timber) काष्ठं, दारु: *m.* -रु *n.*

WOOD-APPLE, *s.* (The tree) कपित्थः.—(The fruit) कपित्थं.

WOOD-COCK, *s.* वनकुक्कुटः, अरण्यकुक्कुटः, वृक्षकुक्कुटः.

WOOD-CUTTER, *s.* वृक्षच्छिद् *m.*, वनच्छिद्, छेत्ता *m.* (तृ), स्थाणुच्छेदः.

WOODED, *a.* वृक्षावृतः -ता -तं, तरुगुल्मावृतः &c., सवृक्षः -क्षा -क्षं.

WOODEN, *a.* काष्ठमयः -यी -यं, दारुमयः &c., काष्ठी -ष्ठिनी -ष्टि (न्), काष्ठघटितः -ता -तं, दारुघटितः &c., दारवः -वी -वं, दारुजः -जा -जं, अधिदार्वः -र्वी -र्वं, काष्ठ in comp., दारु in comp.

WOOD-HOUSE, *s.* काष्ठरक्षणस्थानं, इध्मस्थानं, दार्व्यगारस्थानं.

WOOD-LAND, *s.* वृक्षावृतभूमिः *f.*, तरुगुल्मावृतभूमिः *f.* -भूः *f.*

WOODMAN, *s.* वनचारी *m.*, वनजीवी *m.*, आटविकः. *See* FORESTER.

WOOD-NYMPH, *s.* वनदेवता, वनदेवी, अरण्यदेवता -देवी.

WOOD-PECKER, *s.* दार्वीघाटः, दार्वीघातः, काष्ठकुट्टः, शतपत्रकः, शतच्छदः, भद्रनामा *m.* (न्), कुठाकुः *m.*, कुठारुः *m.*

WOOD-PIGEON, *s.* हारितः, हारीतः, वनपारावतः, वनकपोतः.

WOOD-SORREL, *s.* चाङ्गेरी, कुचाङ्गेरी, चुक्रिका, दन्तशठा, अम्ली, अम्लोणिका, अम्लोलिका, अम्लिका, चलस् *n.*

WOODY, *a.* (Abounding with wood) बहुवृक्षावृतः -ता -तं, वृक्षाकीर्णः -र्णा -र्णं, प्रचुरवृक्षः -क्षा -क्षं, वार्क्षः -र्क्षी -र्क्षं.—(Ligneous) काष्ठमयः -यी -यं.—(Silvan) आरण्यकः &c., *see* SILVAN.

WOOER, *s.* विवाहार्थप्रार्थकः, विवाहार्थयाचकः, रूप्युपासकः.

WOOF, *s.* (In weaving) वाणिः -णी *f.*

WOOING, *s.* विवाहार्थं प्रार्थनं, विवाहार्थं चिन्ताराधनं.

WOOL, *s.* ऊर्णा, मेषलोम *n.* (न्), अविलोम *n.*, मेषरोम *n.*, मेषाङ्गरुहं, अङ्गरुहं.

WOOLLEN, *a.* और्णः -र्णी -र्णं, और्णिकः -की -कं, ऊर्णामयः -यी -यं, मेषलोममयः -यी -यं, मेषलोमनिर्मितः -ता -तं, मेषलोमजः -जा -जं, आविकः -की -कं, राङ्कवः -वी -वं, मृगरोमजः &c.; 'woollen cloth,' और्णवस्त्रं, और्णपटः, अविपटः, आविकः, और्णं, जालिका; 'garment,' और्णवासस् *n.*, वालवासस् *n.*

WOOLLY, *a.* लोमशः -शा -शं, रोमशः &c., रोमवान् -वती -वत् (त्), लोमवान् &c., ऊर्णासदृशः -शी -शं; 'woolly hair,' वर्ष्वरः, वर्ष्वरीकः, चर्चरी.

WORD, *s.* (Single component part of a sentence) शब्दः, पदं, वाचकः, वर्णात्मा *m.* (न्), वाक्यं; 'word for word,' यथाशब्दं; 'force of a word,' शब्दशक्तिः *f.*, निरूढः; 'sense,' शब्दार्थः; 'acceptation,' शब्दानुशासनं; 'low word,' अपशब्दः, अवाक्षरं; 'radical form of a word,' प्रकृतिः *f.*—(Discourse, language) उक्तिः *f.*, वाक्यं, वचनं, वाक् *f.* (च्), वचस् *n.*; 'mere words,' वाङ्मात्रं; 'bad words,' दुरुक्तिः *f.*, दुर्वाक्यं, दुर्वचनं; 'waste of words,' वाग्व्ययः; 'war of words,' वाग्युद्धं; 'a word in season,' प्राप्तकालवचनं; 'a man of few words,' अल्पभाषी *m.* (न्), मितभाषी *m.*, मितवाक् *m.*, वाग्दरिद्रः.—(Promise) वचनं, प्रतिज्ञा; 'to break one's word,' विसंवद्, *see* PROMISE.—(Tidings) समाचारः, संवादः, सन्देशः.—(In a word) समासतस्.

To WORD, *v. a.* शब्दद्वारा व्याख्या (c. 2. -ख्याति -तुं), शब्दतो व्याख्या, शब्दरचनां कृ, शब्दयोजनां कृ, शब्दविन्यासं कृ.

WORDINESS, *s.* शब्दविस्तारः, शब्दबाहुल्यं, बहुशब्दत्वं.

WORDY, *a.* बहुशब्दकः -का -कं, शाब्दिकः -की -कं, शाब्दः -ब्दी -ब्दं, बहुवाङ्मयः -यी -यं, वाग्मी -ग्मिनी -ग्मि (न्).

To WORK, *v. n.* (Labor, make exertion) श्रम् (c. 4. श्राम्यति, श्रमितुं), परिश्रम्, श्रमं कृ, उद्योगं कृ, उद्यमं कृ, उत्साहं कृ, यत्नं कृ, व्यवसायं कृ, कर्म्म कृ, आयस् (c. 4. -यस्यति -सितुं), आयासं कृ, यत्, चेष्ट्, व्यवसो, उद्यम.—(Operate, act) कृ, चेष्ट्, फलम् उत्पद्, प्रभू, *see To* OPERATE.

To WORK, *v. a.* (Move, cause to move) चल् (c. 10. चालयति -यितुं), संचल्, संचर् (c. 10. -चारयति -यितुं), सृ in caus.—(Form by labour) कृ, घट् (c. 10. घटयति -यितुं), निर्मा, रच्, विधा, कॢप्, *see To* MAKE, MANUFACTURE.—(Produce, bring about) उत्पद् (c. 10. -पादयति -यितुं), सम्पद्, जन् (c. 10. जनयति -यितुं), साध्, कृ.—(Cause to labour) आयस् (c. 10. -यासयति -यितुं), क्लिश् (c. 10. क्लेशयति -यितुं), श्रम् (c. 10. श्रमयति -यितुं), सद् (c. 10. सादयति -यितुं), अवसद्.—(Manage) प्रणी, नी, नियम्, वह् in caus., निर्वह्.—(Embroider), *see* the word.

